May 1925.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO'S. 193, 194, 195, 215, 216, 218, 251, 252, 275, 276, 306, 312, 321 & 329.

व्याकरणसिद्धान्तसुधानिधिः।

पर्वतीयविश्वेश्वरसूरिविरचितः।

माधवशास्त्रिणा परिशोधितः।

VYÂKARANA SIDDHANTA SUDHÂNIDHI.

BY

VISVESVAR SURI,

Edited by

Vyakaranopadhyaya and Sahitya tirth

Pandit Madhava Sastri Bhandari.

FASCICULUS XV–१५.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO; BOOKSELLERS LONDON.

Printed by Jai Krishna Das Gupta, at the Vidya Vilas Press, Benares.

1924.

Printed-Published & sold
JAI KRISHNA DAS GU
The Chowkhamba Sanskrit Ser
VIDYA VILAS PRES
Gopal-Mandir-Lane,
BENARES.

श्रीः ।

भूमिका ।

श्रीगुरुचरणकमलेभ्यो नमः ।

निष्प्रपञ्चमिदं विपश्चिदपश्चिमानां यन्नैकशाखोपशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमधर्मादिप्रविभागहेतोः जन्तुजातस्य हिताहितप्राप्तिपरिहारोपायाध्यवसायैकनिदानस्य ऋग्यजुःसामभेदैस्त्रय्यात्मकत्वमवगाहमानस्याङ्गिनः सत्स्वपि शिक्षादिष्वङ्गान्तरेषु व्याकरणमेव प्रथमतः पदपदार्थव्युत्पादनप्रणाल्या प्रयोजनवदर्थावबोधजननोपयोगितया मुखस्थानीयतां भजते । अतएव महामुनिः सहस्रवदनः पतञ्जलिर्वदनसहस्रेण वेदरक्षामेव व्याकरणस्याद्यं प्रयोजनं संवर्णयञ्जनान् व्याकरणस्य मुख्यतां प्रत्याययामासेति ।

तच्चेदं व्याकरणं प्रवाहानादितयाऽनाद्येव भवद्वेदाङ्गत्वं निर्वहति तथाच तैत्तिरीयश्रुतिः 'वाग्वै पराच्यव्याकृताऽवदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति । सोऽब्रवीद्वरं वृणै, मह्यं चैवैष वायवे च सह गृह्याता इति । तस्मादैन्द्रवायवः सह प्रगृह्यते, तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् । तस्मादियं व्याकृता वागुद्यत ।इति ।

अद्यत्वेच तीव्रतरतपस्यासंतोषितश्रीमहेश्वरवरप्रसादसमवाप्ताक्षरच्छन्दोमूलत्वेन पाणिनीयमेव व्याकरणं वेदाङ्गमिति गीयते। तच्चेदं श्रीमता कात्यायनेन महर्षिणा वार्तिकसमुपबृंहित मत्र भवता पतञ्जलिना च प्रत्यक्षरं वेदाक्षरनिर्विशेषेण गौरवभरेण भाषितमिति कस्य न श्रद्धातिरेकास्पदतां तनुते ।

अस्य च मुनित्रयस्य वेदसंरक्षणबद्धदीक्षस्य ज्ञेयैकदेशभूत-सूत्रवार्तिकभाष्यस्य गम्भीराशयं ध्यायंध्यायं सहस्रशो व्यवस्य-न्तोऽप्यनध्यवस्यन्तः कति कति न वा निजमतिमहिमग्राहिलाः संवृत्ताः। तथात्वे च कथमधुनातनैर्मतभेदतमस्तिरोहितमतिभिः शक्या वैयाकरणसिद्धान्ता अध्यवसातुमिति करुणापरायणेन श्रीपर्व-तीयाभिजनेन पाण्डयोपाभिधेन श्रीलक्ष्मीधरपण्डितवरतनूजातेन श्रीविश्वेश्वरावतारभूतेन श्रीविश्वेश्वरसूरिणा सर्वज्ञानाकरेण दुरवगाहं व्याकरणमहोदधिं क्वचिदप्यभिदुरेण निजमतिमन्दरे-णामन्थरं प्रमथ्य समुद्धृतोऽयं सिद्धान्तसुधानिधिः कथमिव स्वसेवित्रवैयाकरणकुलान्यजरामरतां विबुधतां च नावापयेत् ।

सचायं ग्रन्थो ग्रन्थकृताऽष्टाध्यायीसूत्रक्रमेणाध्यायत्रय पर्यन्तं भाष्यवचस्तात्पर्यकुसुमामोदविस्तारगर्भं ग्रथितोऽपि निःशेषतः सि-द्धान्तप्रतिपादनेन क्वचिद्भाष्यवार्तिककृन्मतयोर्लाघवगौरवविचा-रोट्टङ्कनात् तथा क्वचित् 'अत्रेदमवधेय' मित्यादिना भाष्यवार्तिका-दितः स्फुटमनवगम्यमानविषयाणा माञ्जस्येन बोधनाच्च

शास्त्रैकदेश संबद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विचक्षणाः ॥

इत्युक्तदिशा व्याकरणप्रकरणग्रन्थतां भजते। अतएव चा-ग्रिमपञ्चाध्याय्या अव्याख्यानमपि न न्यूनतामापादयतीत्येके ।

अग्रिमपञ्चाध्याय्यामप्येतद्व्याख्यानमस्ति । अनुपलम्भस्तु कारणान्तरेणापि संभवति। तथाच कैयटप्रदीपादिवदाकरग्रन्थ-एवायमित्यस्मद्गुरुचरणाः ।

अयंच ग्रन्थकृत् श्रीभट्टोजीदीक्षितानन्तरकालोत्पन्नो हरि-दीक्षिताच्च प्राचीन इति प्रकृतग्रन्थे शब्दकौस्तुभादिग्रन्थस्य बहुशःसमुद्धरणाच्छब्दरत्नादीनां चासमुद्धरणतो निर्णीयते ।

अयंच त्रार्भकस्य एवानपत्यत्वक्लेशमतप्रमानसाभ्यां दम्पतिभ्यां मतप्तीव्रतपः प्रसन्नेन यदृच्छया निग्रहानुग्रहयोः प्रभवता पार्वतीजानिना विश्वेश्वरेण 'मत्सदृशपुत्रमाप्नुही'ति वितीर्णवरप्रसादात्समासादितः पुत्र इति विश्वेश्वर एव भक्तमनोरथपूरणायावतीर्ण इति वदन्ति। यतः किलायं सप्तम एव मासि गर्भवासान्निर्गत्य पञ्चमे वर्षे एव पदवाक्यमानानिगमाकूपारपारंगमेण श्रीलक्ष्मीधरपण्डितप्रकाण्डेन जनकेनोपनीय निगमागमपारावारपारीणतां गमितोऽसौ ३२ द्वात्रिंशतोऽब्देभ्य प्रागेव परममहनीयान् तर्क कौतूहल–अलङ्कारकौस्तुभ–सिद्धान्तसुधानिधि रुक्मिणीपरिणय–आर्यासप्तशती–अलंकार कुलप्रदीपप्रभृतीन् नैकग्रन्थान् महनीयान् विरच्य कीर्तिमात्रशरीरतां लेभे इति च किंवदन्तीं वदन्ति।

सचेदृशोऽयं महनीयो ग्रन्थ इत्यालोच्याऽमुद्रितसारवत्तर ग्रन्थमुद्रणधृतव्रतेन श्रेष्ठिश्रीजयकृष्णदासमहोदयेन बहुवर्षेभ्यः प्राक् मुद्रापयितुं समारब्धोऽपि मुद्रणालयकार्यशैथिल्यादिभिरनेकैर्विलम्बकारणैरस्मिन्वत्सरे पूर्णतामयासीत्।

अस्मिंश्च स्थले स्थले प्रसङ्गानुप्रसङ्गतो विचारितानां नानाविधविषयाणां द्रष्टॄणां सौकर्याय विषयसूच्यपि प्रकृतग्रन्थकृतो, अत्र विचारितानां मतान्तराणां च सिद्धान्तप्रदर्शनगर्भा साकल्येन निर्माय समुपन्यस्ता। तथा ग्रन्थकृता प्रमाणत्वेनोपन्यस्तानां व्याकरण–वेदान्त–न्याय–मीमांसादिग्रन्थानां च सूच्यपि सह संनिवेशिता। अस्य ग्रन्थस्य संशोधनकार्यं मयाऽष्टमखण्डादारभ्य कृतम्। ततः प्राक्तनशोधनमपि समुचितमेव श्रीनेपालाभिजनदाधिराम शास्त्रिभिः शेण्ड इत्युपाह्व सीताराम शास्त्रिभिश्च कृतम्। शोधनार्थं च पुस्तकद्वयं प्रायशः शुद्धं

क्वचित्खण्डितंच समुपलब्धमासीत् एकं काशीस्थपर्वतीयश्रीकेशवदत्त शास्त्रिमहोदयाल्लब्धम् । अपरं च बरेलीस्थाङ्ग्ल–महाविद्यालयस्थ संस्कृताध्यापक पण्डितवरपन्थोपाह्व श्रीरामदत्तशास्त्रिमहोदयेभ्यो लब्धम् । तदाधारेणच सम्यक् शोधितेऽप्यत्र दृष्टिदोषवशादिना संभाव्यमाना अशुद्धीः मानुषधिषणानिसर्गबुद्ध्योपेक्ष्य प्रथमत एव मुद्रितादस्माद्ग्रन्थात्सारसुधा आदाय फलेग्रहितामवापयिष्यन्तीममुद्यमं महोदया इत्याशासानः ।

सुधीजनविधेयो
भाण्डार्युपाह्वो माधवशास्त्री
व्याकरणोपाध्यायः साहित्य–मीमांसातीर्थश्च
संवत् १९८१ कार्तिक कृष्ण ११

सिद्धान्त सुधानिधौ मानत्वेनोपन्यस्तानां

ग्रन्थानां सूची ।

ग्रन्थकाराः	ग्रन्थाः
पतञ्जलिः	महाभाष्यम्
कात्यायनः	वार्तिकम्
वृत्तिकृत्	वृत्तिः
कैयटः	प्रदीपः
काशिकाकृत्	काशिका
भट्टिः	भट्टिः
भट्टोजीदीक्षितः	शब्दकौस्तुभः
न्यासकारः	न्यासः
हेलाराजः	वाक्यपदीयटीका
भागवृत्तिः	भागवृत्तिः
लघुविवरणकारः	लघुविवरणम्
बृहद्विवरणकारः	बृहद्विवरणम्
हरदत्तः	पदमञ्जरी
नन्दी	धातुपारायणम्
क्षीरस्वामी	धातुपारायणम्
वैयाघ्रपद्यः	वार्तिकम्
अभिनवशाकटायनः	शब्दानुशासनम्
हेमसूरिः	हेम व्याकरणम्
वर्धमानमिश्रः	कातन्त्रविस्तरः
त्रिलोचनदासः	कातन्त्रपञ्जिका

ग्रन्थकाराः	ग्रन्थाः
दुर्ग गुप्तः	दुर्ग टीका
क्षेमेन्द्रः	जैनेन्द्रन्यासः
प्रसादकृत्	प्रसादः
वामनः	वृत्तिः
माधवः	धातुवृत्तिः
दुर्गसिंहः	व्याख्या
जयादित्यः	व्याख्या
व्याघ्रभूतिः	कारिका
सीरदेवः	व्याख्या
अनुन्यासः	न्यासः
लक्ष्मीधरः	व्याख्या
सुधाकरः	वृत्तिः
शब्दकण्टकोद्धारकृत्	शब्दकण्टोद्धारः

इति व्याकरणग्रन्थाः ।

अथ श्रुत्यादयः ।

	सामब्राह्मणम्
	आथर्वणश्रुतिः
	यजुर्वेदः
द्राह्यायणिः	द्राह्यायणिसूत्रम्
आपस्तम्बः	आपस्तम्बसूत्रं च

वेदान्तग्रन्थाः ।

व्यासः	वेदान्तसूत्रम् भारतं च
वाचस्पतिः	भामती
खण्डनकृत्	खण्डनम्

ग्रन्थकाराः	ग्रन्थाः
अद्वैतचन्द्रिकाकारः	अद्वैतचन्द्रिकाः
अमलानन्दसरस्वती	कल्पतरुः

मीमांसाग्रन्थाः ।

जैमिनिः	जैमिनिसूत्रम्
शबरस्वामी	शाबरभाष्यम्
पार्थसारथिः	शास्त्रदीपिका
माधवाचार्यः	जैमिनीय न्यायमाला
प्रभाकरः	प्रकरणपञ्चिका

न्यायग्रन्थाः ।

शिरोमणिः	दीधितिः
गदाधर भट्टाचार्यः	शक्तिवादः
उदयनः	कुसुमाञ्जलिः
विश्वेश्वरसूरिः	तर्ककौतूहलम्
	अन्ये च ।

साहित्यग्रन्थाः ।

श्रीहर्षः	नैषधः
मुरारिः	माघः
भारविः	किरातार्जुनीयम्
कालिदासः	मेघदूतम्
कालीदासः	रघुवंशम्
भवभूतिः	उत्तरचरितम्
विश्वेश्वरसूरिः	अलङ्कार कौस्तुभम्

इति ग्रन्थ संग्रहः ।

श्रीसिद्धान्तसुधानिधेः ।

विषयानुक्रमणिका ।

प्रथमपादे प्रत्याहाराह्निके द्वितीये

विषयाः पृ.

इति प्रथमः पादः

—<>◦<>—

इति द्वितीयः पादः ।

इति तृतीयः पादः ।

अथ कारकप्रकरणम्।

अथ द्वितीयाध्याये

इति द्वितीयाध्याये प्रथमः पादः

चार्थ निरूपणम् ।

इति द्वितीयः पादः ।

अथ चतुर्थःपाद ।

इति द्वितीयः पादः ।

श्रीगणेशाय नमः ॥

व्याकरणसिद्धान्तसुधानिधिः ।

ॐ नमः स्वप्रकाशाय समिद्धसुखसिद्धये ॥
विशुद्धाय विवर्तानां निदानाय चिदात्मने ॥ १ ॥
आत्मसत्तापरिस्यूतजगद्भास्तव्यवस्तुने ॥
दुर्विगाहरहस्याय वाङ्मयब्रह्मणे नमः ॥ २ ॥
महसा महतोदयैः सहस्रैः समरुत्कैरवपद्मबान्धवानाम् ॥
जयति त्रितयी महामुनीनां नयनानामिव चन्द्रशेखरस्य॥३॥
जयति यथाजातानां वाग्जातसुजातपारिजातश्रीः ॥
श्रीलक्ष्मीधरविबुधावतंसचरणाब्जरेणुकणः ॥ ४ ॥
विषये फणिनायकस्य मार्गं क्षमते नैव विधातुमल्पमेधः ॥
विबुधाधिपतिप्रसादधाराः पुनराराद्उपकारमारभन्ते ॥ ५ ॥
व्युत्पित्सारसवत्सलस्य बलवद्विभ्रंशयन् संशयं
निष्प्रत्यूहसमूहयन्बुधवरव्यूहस्य कौतूहलम् ॥
साक्षीकृत्य पदं तनोति सवितुर्दाक्षीसुतस्यागमे
सिद्धान्तस्य सुधानिधिं बहुवचोदृश्वेह विश्वेश्वरः ॥ ६ ॥

तत्र प्रवृत्तिं प्रति स्वविषयविशेष्यकस्येष्टसाधनताज्ञानस्य हेतुत्वात् साधुशब्दज्ञाने वक्ष्यमाणेष्टसाधनत्वज्ञानवतां पुंसां शब्दज्ञानोपायाकाङ्क्षायां व्याकरणस्य शब्दज्ञानोपायत्वप्रदर्शनपरं भाष्यमवतरति ॥

अथ शब्दानुशासनमिति ।

अत्रोपसर्गोपसन्धानवशात्सजातीयापेक्षभेदपूर्वकबोधकत्वार्थ-

कस्यानुशास्तेः कर्मषष्ठ्यन्तशब्दपदसमभिव्याहाररूपतात्पर्यग्राहकवशादपशब्दापेक्षभेदपूर्वकप्रमापरतया ल्युटः करणार्थकतया शब्दानामित्यत्र विशेष्यत्वस्य षष्ठ्यर्थतया अथशब्दस्य चारम्भार्थकतया साधुशब्दविशेष्यकापशब्दत्वावच्छिन्नप्रतियोगिताकभेदप्रकारकप्रमाकरणं शास्त्रमारभ्यत इत्यर्थः। तेन स्वरूपमात्रेण यत्किञ्चित्साधुशब्दस्य प्रकारान्तरेण ज्ञानसम्भवेऽपि न शास्त्रवैयर्थ्यम्। यथोक्तभेदप्रकारकत्वाभावात्। न च तथात्वस्यापि क्वचिदाप्तवाक्यादितः सम्भवोऽस्त्येवेति वाच्यम्। शब्दानामानन्त्येन सर्वत्र तदसम्भवात्। तथा च भगवतोक्तम्, बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदविहितानां शब्दानां शब्दपारायणं प्रोवाच नचान्तं जगामेति। न च व्याकरणेनापि तत्तद्व्यक्तित्वावच्छिन्नविशेष्यताकयथोक्तभेदप्रकारकज्ञानासम्भवः, शब्दानामानन्त्यादिति वाच्यम्। यावतीनां साधुव्यक्तीनां व्याकरणेन ज्ञानं तावतीनामेव प्रकारान्तरेण ज्ञातुमशक्यत्वात्। सति शब्दज्ञाने तत्र यथोक्तभेदप्रकारकत्वस्यापि प्रकारान्तरेणानुपपत्तेः। यत्साधुशब्दव्यक्तीनां च यस्य पुरुषस्योपस्थितिर्न जाता तद्व्यक्तित्वावच्छिन्नविशेष्यताकयथोक्तभेदप्रकारकज्ञानोपायज्ञानस्याक्षतत्वाच्च। न चाप्तवाक्यादितः शब्दत्वसामानाधिकरण्यमात्रेणापि अपशब्दाभिन्नत्वग्रहसम्भवः। अभियोगविशेषव्यतिरेके तदाप्तत्वग्रहविरहात्। अप्रामाण्यज्ञानानास्कन्दितस्यैव तादृशज्ञानस्योद्देश्यत्वात्। अत्र शब्दानामिति कर्तृकर्मणोः कृतीति षष्ठी, न तूभयप्राप्तौ कर्मणीति। कर्मणिचेति सूत्रेण कर्मणीतिशब्दवता उभयप्राप्ताविति सूत्रेण या षष्ठी तदन्तस्य समासनिषेधात्। शेषषष्ठीयमिति केचित्। अथशब्दश्चारम्भवाचकः। अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्य-

त इति भगवदुक्तेः । मङ्गलन्त्वस्य प्रयोजनमात्रं न तु वाच्यम् । वाक्यार्थानन्वयात् । स्पष्टं चेदं शारीरकभाष्यादौ । एतेन—

ॐ कारश्चाथशब्दश्च सर्गादौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥

इति स्मृतिर्व्याख्याता ।

यत्तु अथशब्दः आरम्भस्य द्योतको न तु वाचको निपातत्वादुपसर्गवदिति । तन्न । व्याप्यत्वासिद्धेः । उपसर्गत्वस्योपाधित्वाच्च । न च शबादौ साध्याव्यापकत्वं, निपातत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वात् । न च वाचकत्वाभाव एव साध्यः, साधनावच्छिन्नसाध्याधिकरणे पादपूरणमात्रार्थे तुहीत्यादौ साध्याव्यापकत्वादिति वाच्यम् । शक्तिप्रमापकाभावस्योपाधित्वात् । विभक्तिप्रतिरूपकनिपाते व्यभिचाराच्च । मिश्रास्तु निपातमात्रस्य वाचकत्वेऽर्थवदादिसूत्रेणैव सिद्धौ निपातस्यानर्थकस्य प्रातिपदिकसंज्ञेतिवार्त्तिकस्य द्योतकत्वे तु व्यावर्त्याभावादनर्थकस्येतिविशेषणभागस्य वैयर्थ्यमतश्चादयो वाचकाः प्रादयस्तु द्योतका इत्याहुः । यत्तु वैपरीत्येनापि ज्ञापकपर्यवसानसम्भवान्न तदुक्तपर्यवसानमिति । तदसत् । सूत्रापेक्षया वार्तिकस्याल्पविषयकत्वकल्पनाया युक्तत्वात् ।

उक्तानुक्तद्विरुक्तानां चिन्ता यत्र प्रवर्त्तते ।
तद्वार्त्तिकमिति प्राहुर्वार्त्तिकज्ञा विपश्चितः ॥

इत्युक्तेः । न चैवमुपसर्गस्य प्रातिपदिकसंज्ञेत्येव ब्रूयादिति वाच्यम् । तवापि चादीनां तुल्यत्वात् । यदपि अधिपरी अनर्थकाविति सूत्रे उक्तवार्त्तिकं भाष्ये प्रत्याख्यातं, कुतोऽध्यागच्छति कुतः पर्यागच्छतीत्यत्र गतिर्गताविति निघातवारणार्थो गतिसंज्ञाबाधिका कर्मप्रवचनीयसंज्ञा व्यर्था । अनर्थकयोः

क्रियायोगाभावादेव गतित्वाभावात् । पञ्चम्याश्चापदानत्वादेव सिद्धौ पञ्चम्यपाङ्परिभिरित्यस्यानपेक्षितत्वादित्याशङ्क्योक्तम्, अनर्थकानामप्येषामर्थवत्कृतकार्यज्ञापनार्थं तत्संज्ञारम्भः । उक्त-वार्तिकानारम्भश्च प्रयोजनमिति । अतस्तन्मूलकं कल्पन-मश्रद्धेयमेवेति । तदप्यसत् । तावताऽप्युक्तार्थस्य वार्त्तिकतात्प-र्यविषयत्वासिद्धेः । अत एव भाष्यकृता प्रत्याख्येयमपि जात्या-ख्यायामिति सरूपाणामिति च सूत्रद्वयं जातिव्यक्तिपक्षयो-र्ज्ञापकत्वेन स्वयमेवोपन्यस्तम् । अथ वा नेमावनर्थकावित्यु-त्तरभाष्येण तत्संज्ञाविधानावश्यकत्वाभिधानाच्च । धातोरधिप-र्योश्च सहाभिधायित्वमिति कैयटोक्तेः । एतद्भाष्यप्रामाण्यादर्थ-वत्सूत्रस्थभाष्यस्यापि तद्वार्त्तिकप्रत्याख्याने तात्पर्याभावोन्नय-नाच्च । एवं च निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः । नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः पदार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयो-रर्थविकरणमित्यादि । ततो द्वितीयपादारम्भे अथ निपाता उच्चा-वचेष्वर्थेषु निपतन्तीत्यादिनिरुक्तदर्शनाच्च । उपसर्गाणां ना-माख्यातार्थविकरणं स्वसबन्धेन तयोरन्यादृशार्थबोधकत्वमि-त्युक्त्या निपातानां तद्वैपरीत्यस्य स्पष्टत्वात् । यत्तु उपास्यते गुरुरित्यादौ धातोः सकर्मकक्रियार्थत्वाभावे कर्मणि लकारा-नुपपत्त्योपसर्गाणामिव साक्षात्क्रियतेऽलङ्क्रियते इत्याद्यनुरोधा-न्निपातानामपि द्योतकत्वमिति । तन्न । स्थलविशेषे तथात्वेऽपि सर्वत्र तत्कल्पने मानाभावात् । सामान्ये प्रमाणानां पक्षपा-तस्य बाधकाभावनियतत्वात् । यदपि "तुहिचस्महवै पादपूरणे" इत्यमरात् "कमीमिद्विति पादपूरणार्थाः" इति निरुक्ताच्च यत्र द्योत्योऽप्यर्थो न विवक्षितस्तदर्थमुक्तवार्त्तिकारम्भ इति । तदप्य-

सत् । निपातान्तराणामर्थवत्त्वसिद्धेः । यत्तु द्योत्यार्थेनैव तदिति । तन्न । मतुबर्थसंबन्धस्य शब्दे प्रकारीभूतस्य रामादिपदानुरोधेन वृत्तिस्वरूपतयोभयपरत्वानुपपत्तेः । आवृत्तौ मानाभावात् । यदपि अर्थवत्त्वमर्थप्रतीतिजनकज्ञानविषयत्वमेव न तु शक्तिलक्षणान्यतरवत्त्वं, तच्च द्योतकसाधारणमिति । तदप्यसत् । वृक्ष इत्यादौ प्रत्येकवर्णादपि विभक्त्यापत्तेः । स्यादेतत् । स्वादिसङ्ख्याशास्त्रयोरेकवाक्यत्वात्प्रत्येकस्य संख्यानभिधायकत्वान्न तथा । तथा च हयवरट्सूत्रे भाष्यम् । सङ्घातस्यैकार्थ्यात्सुबभावो वर्णादिति । यद्वा । एकाज्द्विर्वचनन्यायेन समुदायादेव विभक्तिः । यद्वा । तन्मध्यपतितन्यायेन प्रत्येकोत्तरविभक्तेः प्रातिपदिकावयवत्वात्सुपोधातुप्रातिपदिकयोरिति लुक् । अथ वा समासान्तमेकं रामपदं तत्र राजपुरुषादिवल्लुगिति । तत्र नाद्यः । निपातानामपि संख्यानभिधायकत्वात् सुबुत्पत्तेरसिद्धेः । नचैकवचनमुत्सर्गत इति रीत्या संख्यानभिधायकत्वेऽपि तदिति वाच्यम् । प्रत्येकवर्णसाधारण्यात् । न द्वितीयः । समुदायकार्येणावयवानामप्यनुग्रहस्यैतद्बीजत्वात् । समुदायोत्तरविभक्तेश्च प्रत्येकवर्णपदत्वात् । न तृतीयः । प्रातिपदिकानवयवत्वात् । विशिष्टशब्दरूपोपादाने एव तन्मध्यपतितन्याय इति कैयटेनोक्तत्वात् । समासग्रहणस्य नियमार्थतया वर्णसमुदायस्य प्रातिपदिकत्वानुपपत्तेः । न चतुर्थः । धनं वनमित्यादौ नलोपङमुडागमजश्त्वानां हस्तीत्यत्र ढत्वस्य देह इत्यत्र घत्वस्य परिमृजो याजको राजा छाया इत्यादौ षत्वस्य पन्थानावित्यत्र समासान्तस्य च प्रसङ्गात् । यदि त्वत्र " धनगणं लब्धा " " वनागिर्योः " " अहस्त्यादिभ्यः " " परिमृजापनुदोः " " याजकादिभिश्च " " राजाहःसखिभ्यः " " छा-

या बाहुल्ये " "भृशादिभ्य" इत्यादिनिर्देशात्तत्तत्कार्याभावः। "इतोऽत्सर्वनामस्थाने" इति पथिशब्देकारस्यात्वविधानाच्च न समासान्तः। अन्यथा द्विवचनबहुवचनयोस्तेनैव सिद्धौ स्वमोरेव तद्विधानापत्तेरित्यादि विभाव्यते, तदा गौरवम् । मथ्यादिशब्दानुरोधात्सर्वनामस्थानमात्रेऽत्वविधानावश्यकतया पथिशब्दे स्वमोः पृथक्कृत्य तद्विधाने गौरवाच्च । अथ पदान्तोपादानसामर्थ्यात्समुदायप्रवृत्तपदसंज्ञायामेव तत्तत्कार्याणि प्रवर्तन्ते। अन्यथा अस्मिन् पक्षे ऽवयवप्रवृत्तपदसंज्ञायाः सार्वत्रिकतया तदुपादानवैयर्थ्यादिति विभाव्यते, तर्हि राजपुरुष इत्यादौ नलोपो न स्यात् । समासावयवपूर्वपदप्रवृत्तपदसंज्ञयैव तत्प्रवृत्तेः। वस्तुतस्त्वर्थवद्ग्रहणं प्रत्येकवर्णाद्विभक्तिवारणार्थमिति भाष्यकारैरेवोक्तम्। पर्युदासादर्थवत्त्वप्राप्तावपि धर्मान्तरप्रयुक्तसादृश्यवद्वारणस्य तदर्थत्वात्। त्वदुक्तार्थवत्त्वविवक्षायां तु तद्व्यतिरेकेणापि तात्सिद्धेः अर्थवदादिसूत्रेऽनर्थकस्य प्रातिपदिकसंज्ञायां प्रकाशयितव्यस्यार्थस्याभावात्समुदायादिव प्रतिवर्णं विभक्त्युत्पत्तिप्रसङ्ग इति कैयटाद्युक्तेरिष्टापादनत्वप्रसङ्गात् । अतो वर्णेभ्यो विभक्तिवारणाय कृतेनैवार्थवत्पदेन तेभ्यो विभक्त्यानयनं शान्तिकर्मणि वेतालाभ्युदयन्यायमनुहरति । यत्तु " अव्ययादाप्सुप " इति लोपप्रतियोगितयैव निपातेभ्यो विभक्तिरिति। तन्न। प्रापकाभावे सत्यनुवादतः पदार्थप्राप्तेरङ्गीकारात्। स्वरादिपरत्वेन तत्सम्भवाच्च । यदपि निपातस्यानर्थकस्येत्येव विभक्तिरिति। तदप्यसत् । तद्बलादेव निपातत्वसामानाधिकरण्येन वाचकत्वासिद्धेः । यदपि " अधिपरी अनर्थकौ " इति सूत्रे विशेषणबलादनर्थकयोरप्यधिपरिशब्दयोर्द्विवचनान्तत्वदर्शनादनर्थकनिपातोत्तरं विभक्तिज्ञापनस्य सामान्यापेक्षत्वाश्रयणा-

दनर्थकत्वेऽपि निपातोत्तरं विभक्तिरिति । तदप्यसत् । शब्दस्वरूपपरयोराधिपर्योरनुकार्येणार्थवत्त्वात् । धात्वर्थातिरिक्तार्थाभावस्यानुकार्यनिष्ठस्याभिप्रायेणैवानर्थकत्वोक्तेः । यदपि कृत्तद्धितेत्यत्र चकारेण तत्सिद्धिरिति । तदप्यसत् । कृत्तद्धितग्रहणमेतदन्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा नान्यस्येति, समासग्रहणं चार्थवत्समुदायानां मध्ये समासस्यैव प्रातिपदिकत्वमिति नियमार्थमिति भाष्यादौ तत्सूत्रस्य नियमार्थत्वोक्तेः । चकारस्यापूर्वविधित्वे समभिव्याहारविरोधात् । क्वचिदगत्या तत्समूहनेऽपि स्वेच्छया तदनौचित्यात् । एतेन—

स वाचको विशेषाणां सम्भवाद् द्योतकोऽपि वा ।

इति वाक्यपदीयं व्यवस्थितविकल्पार्थकत्वेन व्याख्यातम् । न च

क्वचित्सम्भविनो भेदाः केवलैरनिदर्शिताः ।
उपसर्गेण संबन्धे व्यज्यन्ते प्रपरादिना ॥

इति उपसर्गप्रक्रमात्तच्छब्दस्तत्पर एवेति वाच्यम् । त्वदाभिमताया निपातमात्रस्योभयरूपत्वेन तत्संमतेरप्यनुपपत्तेः । तत्पूर्वप्रक्रान्तनिपातमात्रपरत्वे तु यथोक्तेऽप्यविरोधात् । एतेन घटश्चेत्यादौ समुच्चितघटे लक्षणेत्यपास्तम् । चार्थे द्वन्द्वविरोधात् । न च स्वातन्त्र्येण प्रयोगापत्तिः । प्रत्ययादिसाम्यात् । तथा च वाक्यपदीयम् ।

प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते ।
समुच्चयाभिधानेऽपि व्यतिरेको न विद्यते ॥ इति ।

न चैषां प्रत्ययवत्परत्वानुशासनं नेति वाच्यम् । समुच्चयादेस्तदर्थस्य संबन्धिनमन्तरेणानवभासात् ।

तथा च वाक्यपदीयम्,

समुच्चयाभिधानेऽपि विशिष्टार्थाभिधायिना ।

गुणैः पदानां संबन्धः परतन्त्रास्तु चादयः ॥

इति । चकारमात्राभिधाने केवलसमुच्चयबोधस्येष्टत्वात् । अत एव तत्र प्रतियोगिविशेषाकाङ्क्षा । अत एव नेत्यादितः प्रतियोग्यमिश्रिताभावशाब्दबोधोदयादभावप्रत्यक्षत्वमेव प्रतियोगिज्ञानकार्यतावच्छेदकम् । अत एव ननेत्युक्तेऽभावो नास्तीत्यर्थो भाष्ये दर्शितः । निपातेनापि कारकाभिधानोक्तेश्च । "परिहर्त्तुं न तवापि सांप्रतम्" इत्यादौ क्रियायोगनिबन्धनस्य तुमुनो दर्शनाच्च । भूवादिसूत्रे नतरामिति भाष्याच्च । अन्वयव्यतिरेकाभ्यां चकारस्य समुच्चयार्थतायाः समुच्चयाधिकरणसिद्धत्वाच्च । नञः पर्युदासे लक्षणेतिसकलतान्त्रिकव्यवहाराच्च । न च शोभनः समुच्चय इतिवच्चार्थेऽपि विशेषणान्वयः, घटपटयोः समुच्चय इतिवत्षष्ठी च स्यादिति वाच्यम् । अभेदसंसर्गावच्छिन्ननामार्थप्रकारतानिरूपितविशेष्यतया बोधे निपातजन्योपस्थितेर्विरोधात् । चार्थे प्रतियोगित्वेन नामार्थान्वयाच्च । अत एव घटो नेत्यत्र प्रतियोगित्वसंसर्गको बोधः । घटस्याभाव इत्यत्र प्रतियोगित्वप्रकारकः । निपातातिरिक्तनामार्थस्य भेदान्वयानुपपत्तेः । यत्तु—

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ।

इत्यादावुस्रसदृशैः शरैरिति बोधे द्योतकत्वपक्ष एव सम्भवतीति । तदसत् । तत्र सादृश्यस्यैवाश्रयत्वसम्बन्धेन शरेषु प्रकारत्वात् । अन्यथा इवादिपदोपादाने श्रौती उपमा, सदृशादिपदप्रयोगे त्वार्थीतिकाव्यमीमांसकासिद्धान्तविरोधात् । उस्रपदोत्तरविभक्तेः साधुत्वार्थत्वादित्यास्तां विस्तरः । स्यादेतत् । उपसर्गाणामपि वाचकत्वमेव । न च तत्र प्रजयतीत्यादौ निपातार्थस्य प्रकर्षस्याश्रयत्वेन धात्वर्थान्वयो न

स्यात्, नामार्थधात्वर्थयोर्भेदान्वये तण्डुलं पचतीत्यादावतिप्रस-ङ्गादिति वाच्यम् । निपातातिरिक्तत्वेन नाम्नो विशेष्यत्वात् । न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणाभावविषयकं कार्यमिति गुरुमते धात्वर्थस्य प्रतियोगित्वेनाभावे विशेषणत्वात् । न्यायनये कलञ्जभक्षणं पापाजनकत्वाभाववदित्यभावस्य विशेषणतया धात्वर्थे प्रकारत्वाच्च । आकाशं न पश्यतीत्यादावाकाशविषयकलौकिकविषयताशालिचाक्षुषस्याप्रसिद्ध्या आकाशविषयकत्वाभावस्य दर्शने बोधाच्च । प्रतिष्ठतइति स्थितिप्रकर्षस्य लक्षणया त्वन्मतेऽपि बोधापत्तेः । उक्तसमभि-व्याहारे गमनत्वप्रकारकबोधत्वं कार्यतावच्छेदकमित्यस्यापि तु-ल्यत्वात् । प्रशब्दस्याभावार्थकतां स्वीकृत्य धात्वर्थस्य गत्य-भावस्य प्रतियोगित्वेन तदन्वये गत्यभावाभावस्य प्रतीतेः घ-टो नेत्यादिवत्षष्ठ्याद्यभावेऽपि क्षतिविरहात् । उपास्यतइत्या-दौ तत्तदनुपपत्तिबलादुपसर्गस्य द्योतकत्वेऽपि क्षतिविरहादि-ति कन्दलीकारादयः । अत्र वदन्ति । धातुशक्तेर्विशेष्यांशे क्लृप्ताया एव विशेषणविषयकत्वकल्पने लाघवादुपसर्गः शक्त्य-वच्छेदको न तु शक्तः शक्त्यन्तरकल्पनापत्तेः । उक्तरीत्या तु न तथा । परस्परव्यभिचारिनानाप्रवृत्तिनिमित्तकत्वस्यैव शक्तिभेदकल्पकत्वात् । प्रकृष्टजयत्वस्य तु जयत्वव्याप्यत्वा-त् । यदि प्रवृत्तिनिमित्तभेदमात्रेण शक्तिभेदो लाघवादिति विभाव्यते, तदाऽस्तु प्रकृष्टजये लक्षणैव । ननु विशिष्टजये क-थं लक्षणा, विशिष्टस्यानर्थान्तरत्वात् । स्वनिरूपितसम्ब-न्धस्य स्वस्मिन्नभावात् । अत्र मिश्रादयः । अभेदसम्बन्धोऽत्र-लक्ष्यतावच्छेदकः । न च घटपदस्यापि घटे लक्षणापत्तिः । वि-शेषप्रकारकप्रतीत्यर्थमेव तदङ्गीकारात् । एवं प्रतिष्ठतइत्यत्रा-

भावे प्रत्ययार्थानन्वयः । प्रकृत्यर्थत्वाभावात् । न च गत्यभावोऽत्र प्रशब्दस्य धातोस्त्वभावोऽर्थ इति वाच्यम् । कृतहानाकृताभ्यागमप्रसङ्गात् । न च गतिरभावश्च पृथगेव धात्वर्थः, ततो गतेः प्रशब्दार्थेऽभावे तस्य च धात्वर्थेऽभावेऽन्वय इति वाच्यम् । समानश्रुत्यवरुद्धतया गतेर्धात्वर्थाभावान्वयस्यान्तरङ्गत्वात् । गमनत्वप्रकारकप्रतीत्यसिद्धिश्चेति दिक् ।

प्रकृतमनुसरामः । ननु शब्दत्वस्यैव व्युत्पाद्यतावच्छेदकत्वेऽपशब्दसाधारण्यमिति चेन्न । साधुत्वस्य तथात्वात् । तच्च निरूपयिष्यते । न च डोप्रत्ययसुप्रत्ययवर्वादेशादीनां व्युत्पादनेऽर्थान्तरम् । गौरित्यादिशब्दप्रतिपत्त्युपयोगित्वात् । न च—राम इत्यादावपि सुप्रत्ययादेरुपयोगान्नासाधारणोपयोगित्वम् , नापि व्युत्पाद्यतावच्छेदकावच्छेदेन पचतीत्यादावनुपयोगादिति वाच्यम् । निरूपणीयतावच्छेदकावच्छेदेनानुपयोगित्वस्यैवार्थान्तरत्वापादकत्वात् । व्युत्पाद्यतावच्छेदकसामानाधिकरण्यमात्रेणाप्युपयोगे तदनवकाशात् । द्रव्यत्वादिभिर्वाच्यवाचकभावसत्त्वेऽपि तेषामन्यत्र निरूपितत्वाच्छब्दस्वरूपप्रतिपत्त्यनुपयोगित्वात् । शब्दा द्विधा । लौकिका वैदिकाश्च । लौकिकत्वं च जन्यज्ञानवत्पुरुषप्रयोगार्हत्वम् । वैदिकत्वं तु वेदमात्रप्रयुक्तत्वम् । वेदपदं च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति प्रमाणशब्दमात्रपरम् । तेन वैदिकानां स्मृत्यादौ प्रयोगेऽपि न क्षतिः । ते च "शन्नोदेवीरभिष्टये" "इषेत्वोर्जेत्वा" "अग्निमीडेपुरोहितम्" "अग्नआयाहिवीतये" इति भाष्यम् । सर्ववैदिकशब्दानां व्युत्पाद्यत्वलाभाय प्रथमप्रतीकोपादानम् वैदिकैकदेशमात्रव्युत्पादकप्रातिशाख्यवैलक्षण्यसूचनाय । देवीरित्यस्य प्रथमाबहुवचनान्तस्य

च्छान्दसत्वात्प्रथममुल्लेखः । इषेत्वेत्यत्र श्रेष्ठतमायेति तमपः ईशतेति लुगभावस्य बह्वीरिति पूर्वसवर्णदीर्घस्य चच्छान्दसत्वात् । न च तथापि शन्नोदेवीरित्यस्य अग्निमीडे इत्यस्मादेव प्राथम्यमस्तु न त्विषे इत्यस्मादपि, उभयत्रापि छान्दसशब्दसत्त्वे क्रमोल्लङ्घने बीजाभावादिति वाच्यम् । एकत्र प्रतीकान्तर्गत एवच्छान्दसशब्दोऽन्यत्र तदुत्तरगत इति वैषम्यसत्त्वात् । स्यादेतत् । वैदिकशब्दानामप्यर्था लौकिका एव वेदे रात्र्यादीनां घृताच्यादिपदैर्व्यवहारेऽपि वाच्यभेदविरहात् । शब्दार्थयोश्चात्यन्तपरस्पराभिन्नत्वे मानाभावः । अयं गौरित्यादिव्यवहारेणाभेदस्यैव विषयीक्रियमाणत्वात् । तथा हि । त्वन्मतेऽपि शाब्दबोधे समवायेन जातेरिव शक्तिसम्बन्धेन शब्दस्याऽर्थे प्रकारतया भानम् ।

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥

इत्युक्तेः । किं च ज्ञानमात्रेऽपि शब्दभानम् । तदुक्तम्,

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

गृहीतशक्तिकस्य शब्दादर्थवदर्थाच्छब्दस्यापि स्मरणोपपत्तेः । तदुक्तम्,

यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् ।
पिण्ड एव हि दृष्टः सन्संज्ञां स्मारयितुं क्षमः ॥

यद्यपि नान्यहेतुकमित्यस्य व्यक्तितादात्म्यहेतुकं नेत्यर्थस्य वाचस्पत्यादावुक्तत्वान्नोक्तसंवादः, तथाऽपि शब्दोपस्थितिनियमप्रतिपादकत्वांशे संवादः । तदयं प्रयोगः । अर्थः पदादव्यतिरिक्तः, पदाविषयकप्रतीत्यविषयत्वात् । यद् यद-

विषयकप्रतीत्यविषयस्तत् तदव्यतिरिक्तम्, यथा गौरेव स्वात्रिषयकप्रतीत्याविषयः, स्वाव्यतिरिक्तश्च । न ह्यत्यन्तभेदेऽयं नियमः । अश्वमहिषयोः परस्पराविषयकप्रतीत्याविषयकत्वनियमापत्तेः । तथा चार्थाभेदाद्वैदिकलौकिकशब्दभेदोऽप्यनुपपन्न इति कथं द्वैराश्येन तदुल्लेख इति । एतदभिप्रायेणैव अथगौरित्यत्र कः शब्द इति भाष्यम् । न च द्रव्यसामान्ययोर्गौरित्येतद्बोधविषयत्वेऽपि गुणकर्मणोरतथात्वाच्छब्दस्य तदभेदशङ्कापरं भाष्यमनुपपन्नमेवेति वाच्यम् । भेदाभेदयोर्विरुद्धत्वात्कथं समावेश इत्याशङ्क्य दृष्टान्तत्वेन तदुपादानात् । भेदाभेदवादिभिस्तत्राप्यभेदोपगमात् । न च गुणकर्मणोः शब्दाभेदशङ्का तथाऽपि कथमिति वाच्यम् । शब्दाभिन्नद्रव्याभिन्नतया शब्दाभिन्नत्वस्यापि तदुपपत्तेः । न च तत्र सामानाधिकरण्येनाभेदः, प्रकृते त्वेकप्रतीतिविषयत्वेन घटपदं घट इति प्रत्ययानभ्युपगमादिति पक्षदृष्टान्तयोर्न साधनैक्यमिति वाच्यम् । यथोक्तसाधने साधनान्तरस्योक्तत्वात् । अत एवायं गौरित्यादौ शब्दार्थयोरभेदव्यवहारदर्शनादेव शङ्काभाष्यमवतारितम् । केचित्तु गोशब्दस्यापि गवि तादात्म्यमेव संसर्गोऽस्तु । एवं गुणादिभिरपि तदभिन्नाभिन्नस्य तदभेदादित्याशयेन द्रव्यगुणसामान्यैः सह शब्दस्याभेदशङ्केति व्याख्याय निराकरणग्रन्थमित्थं व्याचक्षते । घटे व्यावहारिकपटभेदस्य प्रातिभासिकपटाभेदस्य च सत्त्वेऽपि समसत्ताकौ भेदाभेदौ विरुद्धावेव । अन्यथा सत्तागुणत्वाद्यभेदात्सुखदुःखस्वर्गनरकादेरप्यभेदापत्तौ प्रवृत्तिनिवृत्तिव्यवस्था भेदग्रहाद् भ्रमनिवृत्तिश्च न स्यादिति । तच्चिन्त्यम् । नीलो घट इत्यादौ समानसत्ताकयोरेव भेदाभेदयोस्तद्वादिभिरभ्युपगमात् । तदुक्तं वाचस्पत्ये,

विरुद्धमिति नः क्व संप्रत्ययो यत्र प्रामाणिकं सामानाधिकरण्यप्रत्यये तु भेदाभेदौ भासेते इति । अतश्च प्रतियोग्यभावयोरन्यत्र सामानाधिकरण्याभावेऽपि अनुभवानुरोधात्संयोगतदभावयोस्तदभ्युपगमः सुखदुःखादेस्तु सत्तादिनाऽभेदेऽपि प्रातिस्विकधर्मेण भेदसत्त्वादेव प्रवृत्त्यादिव्यवस्थोपपत्तेः । विरोधिविषयकत्वस्यैव बाधकत्वे तन्त्रतया भेदग्रहाद् भ्रमनिवृत्तेश्च । शक्तिसंबन्धेन प्रकारतामादाय नियमोत्थाने पश्चात्तादात्म्यस्य संसर्गताशङ्काऽनुत्थानाच्चेति । उच्यते । न पदार्थयोरभेदः, एकज्ञाननियतविषयताकयोरपि द्रव्यसामान्ययोर्भेदस्वीकारेण व्यभिचारात् । न च गोत्ववानित्याद्यनुमित्यादौ गवादेर्न विषयत्वमिति वाच्यम् । गोत्वत्वस्य साध्यतावच्छेदकतया भानेन तद्घटकतया गोरपि विषयत्वात् । तथा च द्रव्यं नाम तत् सामान्यं नाम तादित्यनेन प्रकृतहेतौ व्यभिचार उक्तः । गुणक्रियाभागेन च दृष्टान्तासिद्धिरुक्तेति विभागः । तथा हि । घटो नील इत्यत्र किं शाब्दं सामानाधिकरण्यमभेदसाधकमुतार्थम् । नाद्यः । भेदमात्रसाधकतया विरुद्धत्वात् । नान्त्यः । उभयथाऽप्युपपन्नतया तत्साधकत्वायोगादित्युदयनाचार्याः । तर्ककौतूहले विस्तरः । स्यादेतत् । शाब्दबोधस्य शब्दविषयकत्वकल्पने मानाभावः । स्वारसिकानुभवविरहात् । न च गोत्वस्य प्रकारतायाः सर्वसिद्धत्वाद्गोपदप्रकारताकल्पनं नाधिकम्, सङ्केतविशेषसंबन्धेन गोपदस्यैव गोत्वरूपत्वादिति वाच्यम् । गोत्वस्य स्वरूपत एव प्रकारत्वाभ्युपगमाद्गोपदत्वावच्छिन्नप्रकारताकल्पनस्याधिक्यात् । गोत्वस्य समवायेन प्रकारत्वाङ्गीकाराच्च । शब्दस्य वृत्त्यविषयतया शाब्दत्वानुपपत्तेश्च । घटपदात्समवायित्वेनोपस्थिताकाशादेरपि तदापत्तेश्च । न चाश्रयत्वनिरूपकत्वा-

न्यतरसंबन्धेन वृत्तिमत्त्वमेव वृत्तिविषयत्वमिति वाच्यम् । आ-
श्रयत्वप्रवेशे मानाभावात् । यत्तु गामुच्चारयेत्यादौ पदविषय-
कत्वं विनाऽन्वयानुपपत्तिः । अर्थस्योच्चारणासम्भवात् । शब्दे
लक्षणायां च गौरवात् । अस्माकं तु विशेषणतया पदोपस्थि-
तिसत्त्वात्तस्योच्चारणान्वयोपपत्तेः । न च विशेष्यत्वार्थं लक्षणा,
पदप्रकारकव्यक्तिविशेष्यकबोधत्वस्यैव कार्यतावच्छेदकत्वाद्घटो
नित्य इत्यादावित्रिवेति वाच्यम् । तत्र घटत्वत्वप्रकारकबोधानु-
रोधादेव तथात्वात् । घटत्वांशे निर्विकल्पकापत्तेश्च । अत्र तु
पदावच्छेदकतयाऽऽनुपूर्वीविशेषस्यापि भाने तदनापत्तेः । वि-
शेष्यव्यक्त्यभाने पदप्राधान्यस्याप्यर्थात्सिद्धेः । यद्वा शक्तिज्ञा-
नस्य कार्यतावच्छेदकं न पदप्रकारकबोधत्वम्, किं तु गो-
त्वप्रकारकबोधत्वमेव प्रथमोपस्थितत्वेन, सामान्यसामग्रीबला-
त्तु शब्दस्य विशेषणतया भानं, निर्विकल्पकोत्तरप्रत्यक्षे जाते-
रिव प्रकारत्वनियमोपपत्तेरिति । तदप्यसत् । व्यक्त्यवच्छेदक-
तयोपस्थितस्यान्यत्रान्वयायोगात् । स्वतन्त्रोपस्थित्यर्थमेव तत्र
घटत्वे लक्षणोपयोगात् । अत एव पङ्कजपदस्य कुमुदे लक्षणे-
ति दर्पणचिन्तामण्यादयः । अयं ह्यत्र निष्कर्षः । येन रूपेण
पदादुपस्थितिस्तेनेतरपदार्थान्वयसम्भवे न लक्षणा । यथा गौ-
रनित्य इति । अवच्छेदकत्वेनोपस्थितस्य गोत्वस्यावच्छेदक-
त्वेनानित्यत्वान्वययोग्यत्वात् । गौर्नित्य इत्यत्र त्ववच्छे-
दकत्वेनोपस्थितस्य विशेष्यतया नित्यत्वान्वयानर्हत्वात्से-
ति । पदार्थप्रकारकबोधे विशेष्यतया पदजन्योप-
स्थितेर्हेतुत्वात् । अन्यथा घटं पश्येत्यादौ घटत्वस्य क-
र्मत्वबोधापत्तेः । घटत्वनिर्विकल्पकापत्तावपि क्षतिविरहाच्च ।
गोपदशक्तिज्ञानस्य पदप्रकारकव्यक्तिविशेष्यकबोधे हेतुतायां

समानविषयकत्वस्य समानप्रकारकत्वस्य वा प्रत्यासत्तित्वे गोपदाविशेष्यकस्मरणानुपपत्तेश्च । न चाभेदसंसर्गकगोपदप्रकारकगोपदविशेष्यकस्मरणमेवास्त्विवति वाच्यम् । शक्तिज्ञानकार्यतावच्छेदकेऽभेदस्यानिवेशात् । अन्यथा तादृशघटत्वप्रकारकघटत्वविशेष्यकबोधस्याप्यापत्तेः । उपस्थितिमात्रस्य शाब्दविषयकत्वनियामकत्वे चातिप्रसङ्गात् । न ह्युपास्थितत्वादेव शाब्दे भानमिति प्रत्यक्षं दीधितिकारोक्तेः । निर्विकल्पकस्य च धर्मिग्राहकमानेन तथैव सिद्धेः । तस्माच्छाब्दबोधे शब्दभाने मानाभावः । ज्ञानमात्रे तु तद्भाने सुतराम् । तथा हि । व्यक्तिज्ञानस्य शब्दस्मारकत्वं त्वयाऽभ्युपगम्यते । अज्ञातस्योद्बोधकत्वायोगात्पिण्ड एव हि दृष्टः सन्नित्युक्तेः । तथा च प्राथमिकं व्यक्तिज्ञानं शब्दाविषयकमेवेति वाच्यम् । तदा तस्यानुपास्थितत्वात् । तथा च व्यभिचारः स्फुट एव । गोत्वेन गां जानामीतिवद्गोपदेन गां जानामीत्यनुव्यवसायाविरहादिति प्राप्ते उच्यते । अनुभवानुरोधेन ज्ञानमात्रस्य पदविषयकत्वकल्पनाऽऽवश्यकतया ज्ञानसामान्यसामग्री पदविशिष्टमेवार्थं बोधयतीति नियमः कल्प्यते । अतो वृत्तिसन्निकर्षाद्यभावेऽपि न क्षतिः । अत एवेच्छादेर्मदंशादिविषयत्वं न कारणानियम्यमिति नैयायिकाः। किञ्च । अगृहीतघटपदशक्तिकस्य घटचक्षुःसन्निकर्षसत्त्वेऽपि घटत्वप्रकारकघटविशेष्यकचाक्षुषानुदयोऽनुभवसिद्धः । सोऽयन्निष्कर्षनियमः शक्तिसम्बन्धेन पदप्रकारकबोधसामग्रीव्यतिरेकप्रयुक्त एव कारणान्तरसत्त्वादिति तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगितया शब्दभानमङ्गीकार्यम् । अयं तु विशेषः । कदाचित्किञ्चित्पदत्वं प्रकारतावच्छेदकं कदाचिच्च घटपटत्वादिकमिति । इदं च दर्शनान्तरेऽपि मन्तव्यम् । अनुभवं-

स्यापह्नोतुमशक्यत्वात् । अत एवाक्षरमम्बरान्तधृतेरिति शारीरकमीमांसासूत्रसिद्धान्ते भामत्यामपि ज्ञानमात्रे शब्दाविषयकत्वमङ्गीकृतम् । संज्ञा तु गृहीतसम्बन्धैरत्यन्ताभ्यासवशात्पिण्डानिवेशिन्येव संस्कारोद्बोधसम्पातायाता स्मर्यते । यथाह,

"यत्संज्ञास्मरणं तत्र" इत्यादि ।

संज्ञा हि स्मर्यमाणाऽऽपि प्रत्यक्षत्वं न बाधते ।
संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥

इति । गृहीतसम्बन्धैर्वाच्यवाचकज्ञानवाद्भिः । पिण्डानिवेशिनी व्यक्तितादात्म्यमनापन्ना । स्मर्यमाणसंज्ञायाः परोक्षत्वात्तद्विशिष्टार्थस्य प्रत्यक्षत्वं न स्यात्, अतः संज्ञाहीति । स्मर्यमाणाऽपि संज्ञा संज्ञिनः प्रत्यक्षत्वं न बाधते । सा हि तटस्थाऽर्थानिविष्टा । अतो नार्थस्वरूपाच्छादनक्षमा । ग्रहणस्मरणात्मकज्ञानद्वयाभ्युपगमेन संज्ञाविशिष्टसंज्ञिप्रत्यक्षानभ्युपगमादित्यर्थः । तथा च लीलावत्याम् "न च शब्दः संसर्गप्रत्यक्षगोचरः, ततो जातिसंसर्गमात्रं तत्रावभासते, शब्दस्तु व्युत्पत्तिसमयावगतोऽत्र स्मर्यते न तु केन चित्संसर्गोऽवभासतइत्यादि"। एवं च शब्दस्यापि व्यक्तिविशेषणत्वेन भानमित्येव शाब्दिकमते विशेष इति दिक् । ननु तथाऽपि शब्दस्य शक्तिसम्बन्धेन कथं व्यक्तौ प्रकारत्वं स्फोटस्यैवैतन्मते वाचकत्वात् । अन्यथा स्फोट एव प्रमाणानवतारादिति चेत्, सत्यम् । आरोपितामेव वाचकतामादाय तथोक्तेः । अथ वर्णस्फोटे विप्रतिपत्तिः । तिप्प्रभृतयो वाचका न वेति । यदि तिबादिभिः स्मृतानां लादीनां बोधकत्वं तदा निषेधकोटिः, अथ श्रूयमाणानामेव तदा विधिः । अन्ये तु प्रयुज्यमानपदसमभिव्याहारानन्तर्गता वर्णा वाचका न वेति स्थानिपक्षिकां विप्रतिपत्तिमाहुः । आद्यायां विधिकोटिर्वैयाकरणानां

निषेधकोटिर्नैयायिकादीनाम् । द्वितीयायां तु वैपरीत्यम् । नन्वाद्यायां क्तिप्रत्ययादिमादाय विधौ सिद्धसाधनं निषेधे च बाधः । द्वितीयायामपि पचसीत्यादिसमभिव्याहारानन्तर्गतयजसीत्यादिसमभिव्याहारान्तर्गतवर्णानादाय सिद्धसाधनबाधौ । न चादेशत्वं पक्षतावच्छेदकं प्रथमायां द्वितीयस्यां च स्थानित्वमिति वाच्यम् । तथाऽप्येकत्वादिवाचकतया तयोरपरिहारात् । द्वितीयायामपि भ्वादेशादिस्थलेऽभूदित्यादिसमभिव्याहारानन्तर्गतस्यास्त्यादेर्वाचकतया तयोः प्रसङ्गात् । सत्यम् । कर्त्रादिवाचकत्वस्य विध्यर्थत्वात् । कर्त्रादिपदेषु तस्य घटादिपदेषु तदभावस्य प्रसिद्धिः । पचतीत्यादिसमभिव्याहारानन्तर्गतत्वं च तिप्रभृतीनां विशेषणम् । द्वितीयायां च तादृशस्थले पक्षसङ्कोच एव शरणम् । अयं च पक्षः स्थानिवत्सूत्रे सर्वे सर्वपदादेशा इति भाष्यग्रन्थे पद्यते ज्ञायतेऽर्थोऽनेनेति व्युत्पत्त्या पदशब्दस्यार्थवत्परत्वमाश्रित्य एरुरित्यस्य तेस्तुरित्यर्थः अर्थवत्येव स्थान्यादेशभावविश्रान्तेरित्यादिग्रन्थैश्च स्वीकृतः । अत्र वदन्ति । लकार एव वाचको न तु प्रयोगान्तर्गतास्तिबादयः । अनेकशक्तिकल्पनापत्तेः । "लः कर्मणि" इत्याद्यनुशासनाच्च । न च स्थान्यादेशभावधीविधुराणां बोधानुपपत्तिः । शक्तिभ्रमात्तदुपपत्तेः । न च शत्रादीनामपि लकारादेशतया बोधवैषम्यं न स्यात्, वाचकस्य लकारस्यैक्यादिति वाच्यम् । "कर्त्तरिकृत्" इत्यनुशासनान्नामार्थयोरभेदान्वयाच्च तत्र कर्त्रादिपरत्वात् । यत्तु–राम इत्यादौ पाणिनीयाः सुप्रत्ययं विदधाति, कौमारास्तु सिम्, अन्ये तु रुप्रत्ययम्, तावानित्यत्र सूत्ररीत्या वतुः, "आ सर्वनाम्नः" इत्यात्वम्, डावतावर्थवैशेष्यादिति पूर्वाचार्यवार्तिकोक्तरीत्या डावतुः, तत्र किं स्मारणीयम् । न च

स्वाधीतव्याकरणस्थानिनः स्मरणं, सर्वाधीतिनो विनिगमनाविरहादिति । तन्न । उद्बोधकानुसारेण व्यवस्थासम्भवात्, संभेदेऽन्यतरवैयर्थ्याभावाच्च । न च स्थानिनामप्युक्तरीत्या बहुत्वादनेकशक्तिकल्पनसाम्यं वृद्धव्यवहारस्याप्यादेशे एव शक्तिपरिच्छेदकत्वमिति वाच्यम् । "लः कर्मणि च" इत्यस्य शक्तिपरिच्छेदकत्वात् । न च साधुत्वानुशासने एव तस्य तात्पर्यं न तु शक्तिपरिच्छेदेऽपीति वाच्यम् ।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

इति प्रथमकक्षायां तदुपादानानुपपत्तेः । वाक्यशेषादिनाऽपि तदनुपपत्तेश्च । न चेष्टापत्तिः । त्रिवृच्चर्वधिकरणादिविरोधात् । व्यवहारस्यापि तदतात्पर्यकत्वाच्च । तदुन्नायकत्वस्यापि साम्यात् । त्वयाऽपि कर्तृशक्तावुक्तानुशासनस्यैव प्रमाणितत्वात् । "अनेकमन्यपदार्थे" इत्यादेर्बहुव्रीह्यादावतिरिक्तशक्तिस्वीकाराच्च । न च भूलू इत्यतो बोधापत्तिः । भूतिपूइत्येतत्तुल्यत्वात् । शबादिविध्यन्तरप्रवृत्तिविषयत्वादपरिनिष्ठितत्वस्यापि साम्यात् । असाधुत्वज्ञानस्य शाब्दधीविरोधित्वाच्च । न च भवतीत्यादिसमभिव्याहारो वा समभिव्याहृता वर्णा वा वाचका इति विनिगमकाभावाद्वर्णानां वाचकत्वमिति वाच्यम् । समभिव्याहारो हि क्वचित्पूर्वोत्तरभावरूपो यथा घटमित्यादौ प्रकृतिप्रत्ययादेः, क्वचित्तात्पर्यरूपः, अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ तत्सत्त्वेऽपि तात्पर्याभावाद्राजपुरुषयोरन्वयाभावात् । तस्य च वाचकतायाः कुत्राप्यनुक्तत्वात् । पदोपस्थितानामर्थानामन्वयाविशेष एव तस्य सहकारित्वात् । अभ्युपेत्यापि ब्रूमः, लकारस्य वाचकत्वं त्वयाऽप्यभ्युपगम्यते । लकारस्य वाचकत्वे

तिबादीनां शत्रादीनां च वैषम्यं न स्यात् । न च "कर्त्तरि कृत्" इत्यनेन निर्वाहः । स्थान्यर्थेनैव निराकाङ्क्षत्वाच्छत्रादौ तदप्रवृत्तेः । ण्वुलादीनामनादेशतयाऽर्थाकाङ्क्षायां तत्रैव प्रवृत्तेः । आकाङ्क्षितविधानं ज्याय इतिन्यायादिव्यवस्थापितत्वात् । तद्यदि लकारः कस्य चिदर्थस्य नाभिधायकस्तत्कथं तदर्थेन शत्रादीनामर्थाकाङ्क्षोपशान्तिः । कथं च तेन शय्यमाने आस्यमाने चायं गत इत्यादौ भावे घटः क्रियमाण इत्यादौ कर्मणि शानच् । नन्वस्मन्मते तिबादिवच्छानजादीनामपि लादेशत्वात्तन्निष्ठामेव वाचकतां लकारे आरोप्य तदर्थकथनाभ्युपगमात्तथोक्तमिति चेत्, आस्तां तावदेतत्, लकारस्यैव वाचकत्वमिति तार्किकमतमित्यसिद्धमेव । तिङो व्यापारे लक्षणेति कुसुमाञ्जलावाचार्योक्तेः । एकत्वादिसंख्यामात्रमाख्यातार्थ इत्युपाध्यायाश्च ।आख्यातदीधितावपि आख्यातत्वं लत्वमेव दशलकारसाधारणमिति यद्यपि कैश्चिद्व्याख्यातम्, तथाऽप्याख्यातत्वं न जातिर्मत्वादिना सङ्करान्मानाभावाच्च, किं त्वभियुक्तानां सङ्केतविशेषेणाख्यातपदवत्त्वम्, शक्ततावच्छेदकं तु तिप्त्वादिकमेव तद्रूपेणाज्ञानदशायां शाब्दबोधानुदयादिति व्याख्यातमेव । अन्यैरप्येकोच्चारणान्तर्भावेन तिप्त्वादिकमेव वर्त्तमानत्वयत्नयोः शक्ततावच्छेदकम्पुष्पवन्तादिवत् । अत एवातीते यत्ने वर्त्तमानत्वबोधे तात्पर्याभावे पचतीत्यादिप्रयोगाभावः । उष्णपुष्पवन्ताविितिवदित्याद्युक्तम् । अतो लकारस्यैव न्यायमते वाचकत्वमित्येकान्तकल्पनं प्रामादिकमेव । नन्वेवं सुत्वेनैकत्वे शक्तिरित्यादिकं कथमिति चेत् । मैवम् । स्थानिन एवादेशस्यैवेति वा नियमाभावात् । न हि त्वन्मते ऽप्यादेशस्यैव वाचकत्वनियमः । भ्यामित्यादिभ्यो बोधानापत्तेः । न च रामभ्यामित्यस्य "सुपि च"

इति दीर्घद्वारा रामाभ्यामित्यादेश इति वाच्यम् । वर्णस्फोटपक्षस्य पदस्फोटपक्षाद्भिन्नत्वात् । प्रमाणानुरोधेनैव वाचकत्वविश्रामात् । "लः कर्मणि" इत्याद्यनुशासनसत्त्वेऽपि तस्य प्रयोगाविरहानियमात्तदादेशानामेव तत् । लाघवार्थमेव लकारस्य तत्रोल्लेखात् । त्वयाऽप्येवमेवाभ्युपेतत्वाच्च । न च "तिङ्कर्मणिच" इत्यादिकमेव तदस्तु इति वाच्यम् । तिबाद्यन्यतमत्वरूपस्य तिङ्त्वस्य विधेयतावच्छेदकत्वे गौरवात् । न-च लस्येति सूत्रस्य लडित्यादिसूत्रस्य चानारम्भाल्लाघवमिति वाच्यम् । सुब्विभक्तीनामनुगतार्थतया स्वातन्त्र्येण तद्विधानेऽपि तिङां तत्तत्कालविशेषप्रयुक्तावान्तरानेककार्यवैलक्षण्येन तन्निर्वाहान्यथानुपपत्त्या स्थानिभेदेनैव तस्योपपाद्यत्वात् ।

प्रकृतमनुसरामः । सुपां च स्वौजसित्यादिना स्वरूपं निर्दिश्य तत्रैव द्व्येकयोर्द्विवचनैकवचने इत्याद्यर्थविशेषनिर्देशात्सुत्वादिकमेव शक्ततावच्छेदकम् । अत एवैकत्वादौ तिबादेरेव शक्तिः । तत्रापि विसर्गत्वस्य राम इत्यादौ शक्ततावच्छेदकत्वे पचत इत्यादौ व्यभिचारात् । सुस्थानीयविसर्गत्वापेक्षया च सुत्वस्य लघुत्वात् । टादौ तु गौर्येत्यादौ तस्यापि स्वरूपेण प्रयोगयोग्यतया शक्त्यावश्यकत्वे इनाद्यादेशानामपि तत्कल्पने गौरवात् । अन्यथा स्त्रीलिङ्गमात्रे हलन्तपुन्नपुंसकयोश्च टाप एव रामेणेत्यादाविनादेशस्य घिसंज्ञास्थले हरिणेत्यादौ च नादेशस्येति शक्तित्रयकल्पनापत्तेः । स्थानिशक्तिबाधकप्रमाणाभावात् । इनादिशक्तिसाधकप्रमाणाभावाच्च । बोधस्य च व्युत्पन्नानां स्मरणेनान्येषां च शक्तिभ्रमेण सम्भवात् । अत एव टात्वेन एकत्वे करणत्वे च शक्तिरिति नैयायिकानां व्यवहारः । किञ्च तिबादीनामपि सर्व-

लकारसाधारणार्थ एव शक्तिः । तत्तदसाधारणार्थे तु लडादीनां तत्तद्रूपेणैव शक्तिः । अन्यथा बोधवैलक्षण्यानुपपत्तेः । वर्तमानत्वादौ लडादीनां शक्तिरिति वैयाकरणाः । लिङादावाख्यातत्वेन भावना तिङ्त्वादिना तु प्रवर्तना वाच्येति मीमांसकाः । यदाहुः—

अभिधाभावनामाहुरन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः ॥

तत्सिद्धमेतत् आदेशविनिर्मुक्तस्य प्रयोगाभावे आदेशानामेव, उभयथा प्रयोगे तु स्थानिनामेव वाचकत्वम् । यत्र त्वनुगतेष्वप्यादेशेषु अर्थविशेषपुरस्कारो यथा लिङादौ तत्र सर्वानुगतेऽर्थे आदेशानां अर्थविशेषे च स्थानिनामेव तथात्वम् । एवं च द्वितीयविप्रतिपत्तौ अभावकोटौ बाध इत्यादिकं बहुतरमूहनीयम् । नन्वेवं यत्रैवादेशानां वाचकत्वमभ्युपगम्यते तत्रैव स्फोटासिद्धिरिति चेत् । मैवम् । यदि तिबादीनामर्थवाचकत्वमेव स्फोट इत्युच्यते तदा इष्टापत्तिः । अथ तकारेकारादीनां प्रत्येकं वाचकत्वम् । तन्न । तवाप्यसिद्धान्तात् । एरुरित्यस्य तेस्तुरित्यर्थ इतिव्याख्यातृवचनानुपपत्तेः । इकारस्याप्यर्थवत्त्वे तस्योकारादेशेऽप्यर्थवत्त्वेव स्थान्यादेशभाव इति नियमभङ्गाभावात् । नन्वेवं चैत्रः पचात्वित्यादौ “तिङ्ङतिङः” इति निघातो न स्यात् । इकारमात्रस्य तिङ्त्वाभावात्तदादेशस्य स्थानिवत्त्वेनापि तिङ्त्वाभावे पचतु इत्यस्य तिङन्तत्वाभावादिति चेत्, किं तेन । न हि वयमिकारस्यैव उकारादेशो विधेय इति व्यवस्थापयामः । किं तु इकारमात्रस्य वाचकत्वे नैवापसिद्धान्तापत्तिः । अन्यथा निघातानुरोधात्तेस्तुरित्यर्थ इति ब्रुयान्न तूक्तन्यायानुरोधादिति न किं चिदेतत् । एतेन आदेश-

वाचकत्वाभ्युपगमे घटेन दधीदं हरेऽव विष्णोऽवेत्यादिषु पद-वाक्यस्फोटावपि सिद्ध्येतामिति परास्तम्। अवेत्यादिस्मरणादपि बोधोपपत्तेः। पूर्वरूपस्थलेऽकारलोपाभ्युपगमेऽपि क्षतिविरहात्। वस्नसादौ प्रकृतिप्रत्ययविभागसंमोहेऽपि तत्रापि युष्माकमित्यादिस्थानिनः स्मरणाद् बोधात्। अन्यथा तेषां षष्ठीचतुर्थीद्वितीयासाधारण्यादर्थविशेषस्य दुर्ग्रहत्वात्। सर्वादेशानां वाचकत्वानभ्युपगमात्। आदेशशक्तिग्राहकप्रमाणसत्त्व एव तथात्वात्। ननु—

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥

इति रीत्या हरे अव इत्यस्य स्थाने पूर्वरूपमुखेन हरेऽव इत्यादेश एव विधीयत इति चेत्, कामं विधीयतामर्थबोधोपायस्योक्तत्वात्। न चैवमादेशस्यार्थवत्त्वं कथमिति वाच्यम्। तवापि स्थानिनस्तत्कथमिति पर्यनुयोगात्। उक्तन्यायेनादेशवत्स्थानिनोऽप्यर्थवत्ताया लाभात्। आदेशार्थवत्तयैव स्थानिनस्तथात्वमिति चेत्, तर्हि स्थान्यर्थवत्तयैवादेशस्य तथात्वमिति तुल्यम्।

वाक्यस्फोटे त्विदमपि विचार्यते। विशिष्टवाक्यार्थबोधे विशिष्टवाक्यशक्तिज्ञानस्य हेतुत्वे मानाभावः। तथा हि वाक्यशक्तिवादिना पदानां शक्तिस्तज्ज्ञानस्य शाब्दधीकारणत्वं च स्वीक्रियते न वा। नाद्यः। तत एव वाक्यार्थबोधोपपत्तौ वाक्यशक्तिकल्पनाऽनवतारात्। नान्त्यः। पदशक्तिज्ञानविरहे वाक्यशक्तिज्ञानाद् बोधापत्तेः। पदशक्तिज्ञानसत्त्वे वाक्यशक्तिज्ञानाविरहेण शाब्दधीव्यतिरेकानुपलम्भाच्च। यत्तु पदशक्तिज्ञानस्य पदार्थशाब्दबोधत्वं वाक्यशक्तिज्ञानस्य च वाक्यार्थशाब्दत्वं कार्यतावच्छेदकमिति नान्यतरवैय-

र्थ्यमिति । तन्न । पदार्थशाब्दबोधः स्वातन्त्र्येणैव वक्तृतात्पर्यविषयः प्रकारान्तरेण वा । नाद्यः । प्रयोजनाभावात् । पदार्थवाक्यार्थज्ञानस्य समूहालम्बनत्वप्रसङ्गात् । वाक्यार्थबोधसमये पदार्थानां खण्डशो बोधस्याप्रामाणिकत्वात् । न द्वितीयः । वाक्यार्थज्ञानोपयोगित्वातिरिक्तस्य प्रकारस्याभावात् । पदशक्तिज्ञानेन वाक्यार्थबोधे जननीये पदार्थस्मरणस्य द्वारतायास्त्वयैवोक्तत्वात् । घटकर्मकानयनबोधस्य वाक्यशक्तिज्ञानादेव सिद्धौ प्रत्येकपदजन्यघटादिज्ञानानां तदुपयोगासम्भवाच्च । ननु घटादिपदशक्तिज्ञानस्य घटत्वप्रकारकघटविशेष्यकशाब्दत्वादिकमेव कार्यतावच्छेदकं तत्कथं तेन वाक्यार्थज्ञाननिर्वाहः । अतस्तत्कारणीभूतज्ञाने विषयतया ऽवच्छेदिका वाक्यशक्तिरवश्यं कल्पनीया । यत्कार्यं यत्कार्यविजातीयं तत् तत्कारणविजातीयकारणजन्यम्, यथा घटविजातीयः पट इति न्यायेन घटमानयेत्येतद्वाक्यार्थज्ञानत्वं प्रत्येकपदार्थज्ञानत्वावच्छिन्नकार्यताप्रतियोगिककारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं तद्धर्मावच्छिन्नकार्यताभिन्नकार्यतावच्छेदकधर्मवत्त्वादिति चेत् । न । प्रत्येकशक्तिज्ञानैः स्वस्वकार्यतावच्छेदकावच्छिन्नजनने आकाङ्क्षादिरूपसहकारिवशाद्विशिष्टधर्मावच्छिन्नजननसम्भवात् । यत्त्वाकाङ्क्षादिज्ञानहेतुत्वापेक्षया वाक्यशक्तिज्ञानमेव कारणत्वेनाभ्युपगम्यतामिति । तन्न । तद्धि निरपेक्षमेव वाक्यार्थज्ञानजनकं किञ्चिदपेक्षं वा । नाद्यः । घटः कर्मत्वमानयनं कृतिरित्यादितोऽपि बोधापत्तेः । नान्त्यः । आकाङ्क्षाज्ञानादेरेवापेक्षत्वात् । न च घटः कर्मत्वमित्यादौ शक्तिग्रहसत्त्वे भवत्येव शाब्दमिति वाच्यम् । विमलं जलं नद्याः कच्छे महिषश्चरतीत्यादौ कदाचिन्नद्यर्थो जलान्वितत्वेन कदाचिच्च कच्छान्वितत्वेन

प्रतीयत इति वैषम्यानापत्तेः । उभयवाक्यार्थशक्तिज्ञानसत्त्वात् । न च नानार्थवत्तात्पर्याद्विनिगमनेति वाच्यम् । तात्पर्यज्ञानहेतुत्वापत्तेः । न च तथाप्याकाङ्क्षाज्ञानस्थले वाक्यशक्तिज्ञानं स्यादिति वाच्यम् । घटमानय घटः कर्मत्वमित्यनयोस्तुल्यकक्षतया प्रयोगापत्तेः । न च विपरीतव्युत्पन्नस्यैव द्वितीयाद् बोधः । तद्व्युत्पत्तेर्वैपरीत्य एव मानाभावात् । निराकाङ्क्षत्वातिरिक्तस्य तद्बीजस्य दुर्वचत्वात् । घटमानय आनय घटं घटः कर्मत्वमित्यादीनां भिन्नतया घटकर्मकानयनबुद्धौ हेतुत्रयकल्पनापत्तेश्च । तत्तदानुपूर्वीवैशिष्ट्यस्य कार्यतावच्छेदके निवेश्यत्वाच्च । तदरिक्तवाक्यत्वस्य त्वया दुर्वचत्वात् । न च साकाङ्क्षपदसमूह एव वाक्यमिति वाच्यम् । आकाङ्क्षाज्ञानहेतुतासिद्धेः । किं च वह्निनासिञ्चतीत्यादौ वह्निकरणकसेकरूपवाक्यार्थाप्रसिद्ध्या तत्र शक्तिग्रहानुपपत्तिः । मन्मते पदार्थानां प्रत्येकं प्रसिद्धिनियमात् । यत्तु—विशिष्टं नातिरिक्तं किं तु तावन्त एव पदार्थास्ते च प्रसिद्धा एवेति । तत्तुच्छम् । पदार्थशक्तेस्त्वयाऽपि स्वीकाराद्वाक्यार्थशक्तिस्वीकारवैयर्थ्यात् । यमेव विशेषमादाय भवता पदार्थाद्वाक्यार्थाभेदो मन्तव्यस्तमेवादायाप्रसिद्धेर्वाच्यत्वात् । अन्यथा ग्रावाणः प्लवन्ते इत्यादेरयोग्यत्वम्, काञ्चनमयः पर्वत इत्यादावाश्रयासिद्ध्यादिकं च न स्यात् । पर्याप्तिसम्बन्धेन तद्वृत्तिविषयताया एव विशिष्टपदार्थत्वाच्च । एतेन पीतः शङ्खो नास्तीत्यत्रारोपिता पीतशङ्खसत्तेति बोध इत्युन्नीतमतमपास्तम् । तत्रापि पीतशङ्खसत्ताया अप्रसिद्धेः । यत्त्वाहार्या प्रतियोगिप्रसिद्धिः । प्रतियोगिज्ञानस्याभावधीहेतुत्वेऽनाहार्यत्वस्य गौरवादनिवेशादिति । तदसत् । सा हि शब्दादेव अन्यतो वा । नाद्यः । परोक्षज्ञान-

स्यानाहार्यत्वनियमात् । शक्तिग्रहं विना तदनुपपत्तेश्च । नान्त्यः । ज्ञानान्तरविषयस्य शाब्दान्वयानुपपत्तेः । नञर्थेनारोपितत्वेन सहानन्वयापत्तेः । एतेन विशेषणतावच्छेदकप्रकारकज्ञानकारणतैव प्रतियोगिज्ञानकारणतेति पक्षेऽप्याहार्यज्ञानादप्याहार्यविशिष्टवैशिष्ट्यबोध इत्यपि परास्तम् । तावताऽप्युक्तरीत्या दोषानुद्धारात् । इदं च सौकर्यादुक्तम् । वस्तुतस्तु वाक्यार्थस्यापूर्वत्वात्सर्वत्रैव न शक्तिग्रहसम्भवः ।

यत्तु येषां मते वाक्यार्थो लक्ष्यो येषां वाऽन्विते शक्तिस्तेषामपि प्राक् तदनुपस्थितेर्वृत्तिग्रहासम्भवात्कथं निर्वाह इत्यादि, तत् कथं चिद्भट्टादीन्प्रति सङ्गच्छतां नाम, नैयायिकादीन्प्रति तु सर्वथा नेदमुत्तरं घटते । परैरपि घटपदमितरान्वितघटे शक्तमित्याकारकस्यैव शक्तिग्रहस्य स्वीकारेण कर्मत्वान्वितघटे शक्तमित्यस्यानभ्युपगमाच्च ।

यदपि पदशक्तिः पदार्थांशे ज्ञाताऽन्वयांशे तु स्वरूपसत्येवोपयुज्यते इति कुब्जशक्तिवादे इवास्माकमपि पदशक्तिर्ज्ञाता वाक्यशक्तिरज्ञातैवोपयुज्यतामिति । तदप्यसत् । वाक्यशक्त्युपयोगो हि पदार्थबोधे वाक्यार्थबोधे वा । नाद्यः । पदशक्त्यैव सिद्धेः । नान्त्यः । पदशक्तेरुभयसिद्धतयाऽन्वयांशे ऽज्ञातोपयोगिन्याः शक्तेरपि पदेष्वेव कल्प्यत्वात् । वाक्यशक्तेरज्ञातोपयोगित्वे घटः कर्मत्वमित्यादौ वाक्यशक्तिज्ञानसत्त्वे भवत्येव शाब्दमन्यथा तदभावादेव तदभाव इति पूर्वोक्तविरोधाच्च ।

अयं चात्र नैयायिकमतनिष्कर्षः । यद्यपि पदानामन्वयज्ञानजनकत्वात्तत्र शक्तिरस्ति, अशक्तस्याजनकत्वात्, पदादन्वयबोध इतीश्वरेच्छासत्त्वाच्च । तथा-

४

ऽप्यन्वयबोधे स्वरूपसती सा व्याप्रियते, न तु ज्ञाता घटज्ञानशक्तत्वेन ज्ञातादेव घटान्वयबोधोपपत्तेः । ज्ञायमानकरणे ज्ञातोपयोगिसम्बन्धस्य विषयप्रतियोगिकसंसर्गबोधकत्वनियमाच्च । वह्निप्रतियोगिकव्याप्तेरिव तत्सम्बन्धव्याप्तेरपि बोधस्य वह्न्यनुमित्यनङ्गत्वात् । न च घटज्ञानत्वमितरान्वितघटज्ञानेऽप्यस्तीति तेन रूपेणान्वितघटज्ञानेऽपि ज्ञातशक्त्युपयोगः । अन्वयांशस्य गौरवादन्यलभ्यत्वाच्च घटज्ञानत्वमेव शक्यतावच्छेदकम्, न त्वन्वितघटज्ञानत्वमिति स्वीकारात् । अत एव घटाद्यन्वयप्रतियोग्युपस्थापकपदज्ञानत्वमुभयमतेऽपि कारणतावच्छेदकम् । कार्यतावच्छेदकं तु भट्टमतेऽन्वितघटादिशाब्दत्वम्, न्यायमते तु घटादिशाब्दत्वमेवेति विशेषः । तस्माद् भट्टमते जातिवाचकपदस्य व्यक्ताविव एकैव शक्तिरन्वयांशे स्वरूपसती पदार्थांशे ज्ञाता व्याप्रियते । न च जातिव्यक्त्योः समानसंवित्संवेद्यत्वात्तथा, घट ज्ञानस्य तु नान्वयविषयकत्वनियमः, स्मरणे व्यभिचारादिति वाच्यम् । घटानुभवविशेषघटान्वययोरेकवित्तिवेद्यत्वात् । स्मरणे च सम्बन्धितया ज्ञातत्वेन घटपदस्य जनकत्वात् । तस्मात्पदज्ञानं करणम्, पदार्थस्मरणं व्यापारः, आकाङ्क्षादिसहकारिवशात्स्मारितार्थान्वयानुभवः फलम्, व्यापारत्वाच्च पदार्थस्मरणस्य न व्यवधायकत्वमिति । एवं चान्वयबोधविरहप्रयोजकाभावप्रतियोगिज्ञाने विषयतया ऽवच्छेदकत्वाभावे वाक्यशक्तौ मानाभावः । पदशक्तेस्त्वेकस्या एवान्वयांशेऽज्ञातोपयोगित्वकल्पनया वैषम्यात् । हरिद्रायां नद्यां घोष इत्यादौ तु सम्भवत्येकवाक्यत्वे वाक्यभेदायोगात्प्रसिद्धार्थकनदीपदसमानविषयकत्वाद्धरिद्रापदस्य नदीविशेषवाचकत्वं कल्पयित्वा

हरिद्रानद्योरभेदान्वयबोधोत्तरं नदीशब्दस्य तीरे लक्षणा। यत्तु पदार्थोपस्थित्याकाङ्क्षादिसहकारेण तत एव वाक्यार्थोपस्थितावपि स बोधो न शाब्द इति मध्ये लक्षणाकल्पनम्, तद्वदत्रापि शक्तिकल्पनमिति। तन्न। शाब्दत्वं हि न शब्दशक्तिजन्यत्वं, लक्षणाकल्पनेऽप्यनिर्वाहात्। न शब्दवृत्तिजन्यत्वं, न्यायरीत्यैव सिद्धेः। नापि स्वविषयविषयकवृत्तिज्ञानजन्यत्वम्। अन्वयस्य पदार्थत्वे तेषामिव तस्यापि संसर्गस्य विषयत्वापत्तौ तत्र व्यभिचारात्। अन्यथा चानवस्थानात्। अत एवान्वयस्य शक्यत्वे पदार्थवत्तस्य विशेषणत्वे संसर्गसंसर्गभानापत्तिरिति नान्वयः शक्य इति तात्पर्यं न शक्तिनिर्वाह्यमिति मिश्राः। न च संसर्गसंसर्गस्य वृत्तिं विनैव शाब्दत्वमिति वाच्यम्। पदार्थसंसर्गे एव तथाकल्पनौचित्यात्। पदार्थस्यापि संसर्गस्य संसर्गो न भासते इत्यत्र च बीजाभावात्। भट्टमतेऽपि शक्तिवदन्वयसामान्य एव पदानां लक्षणायाः स्वीकारात्। पूर्वं संसर्गविशेषोपस्थितेरनपेक्षितत्वात्। अन्वयविशेषस्याकाङ्क्षादिवशात्सिद्धिस्वीकारात्। यत्तु प्रथमं मानससंसर्गबोधेऽपि तस्य संशयसाधारणतया निर्णयार्थं शाब्दादरः। वस्तुतस्तात्पर्यज्ञानरूपामेवोपस्थितिमादायान्वयांशशक्तिग्रहस्तात्कालिक एवेति। तदसत्। लौकिकवाक्ये तत्सम्भवेऽपि वैदिके तदयोगात्। वेदार्थस्य मानान्तरानवगम्यत्वात्। तस्य च प्रथममबोधकत्वात्। तात्पर्यज्ञानस्य शाब्दधीत्वावच्छिन्ने हेतुत्वानभ्युपगमाच्च। एतेनाप्तोक्तत्वनिश्चयोऽपि व्याख्यातः।

नाप्तोक्तता तु वाक्यार्थगर्भा ज्ञातोपयुज्यते।
वाक्यार्थानामपूर्वत्वात्संशयेऽप्यन्वयोदयात्॥

इत्युक्तत्वात्। पदार्थवाक्यार्थतात्पर्यस्य च घटपदं

ऽप्यन्वयबोधे स्वरूपसती सा व्याम्रियते, न तु ज्ञाता घटज्ञानशक्तत्वेन ज्ञातादेव घटान्वयबोधोपपत्तेः । ज्ञायमानकरणे ज्ञातोपयोगिसम्बन्धस्य विषयप्रतियोगिकसंसर्गबोधकत्वनियमाच्च । वह्निप्रतियोगिकव्याप्तेरिव तत्सम्बन्धव्याप्तेरपि बोधस्य वह्न्यनुमित्यनङ्गत्वात् । न च घटज्ञानत्वमितरान्वितघटज्ञानेऽप्यस्तीति तेन रूपेणान्वितघटज्ञानेऽपि ज्ञातशक्त्युपयोगः । अन्वयांशस्य गौरवादन्यलभ्यत्वाच्च घटज्ञानत्वमेव शक्यतावच्छेदकम्, न त्वन्वितघटज्ञानत्वमिति स्वीकारात् । अत एव घटाद्यन्वयप्रतियोग्युपस्थापकपदज्ञानत्वमुभयमतेऽपि कारणतावच्छेदकम् । कार्यतावच्छेदकं तु भट्टमतेऽन्वितघटादिशाब्दत्वम्, न्यायमते तु घटादिशाब्दत्वमेवेति विशेषः । तस्माद् भट्टमते जातिवाचकपदस्य व्यक्ताविव एकैव शक्तिरन्वयांशे स्वरूपसती पदार्थांशे ज्ञाता व्याम्रियते । न च जातिव्यक्त्योः समानसंवित्संवेद्यत्वात्तथा, घटज्ञानस्य तु नान्वयविषयकत्वनियमः, स्मरणे व्यभिचारादिति वाच्यम् । घटानुभवविशेषघटान्वययोरेकवित्तिवेद्यत्वात् । स्मरणे च सम्बन्धितया ज्ञातत्वेन घटपदस्य जनकत्वात् । तस्मात्पदज्ञानं करणम्, पदार्थस्मरणं व्यापारः, आकाङ्क्षादिसहकारिवशात्स्मारितार्थान्वयानुभवः फलम्, व्यापारत्वाच्च पदार्थस्मरणस्य न व्यवधायकत्वमिति । एवं चान्वयबोधविरहप्रयोजकाभावप्रतियोगिज्ञाने विषयतया ऽवच्छेदकत्वाभावे वाक्यशक्तौ मानाभावः । पदशक्तेस्त्वेकस्या एवान्वयांशेऽज्ञातोपयोगित्वकल्पनया वैषम्यात् । हरिद्रायां नद्यां घोष इत्यादौ तु सम्भवत्येकवाक्यत्वे वाक्यभेदायोगात्प्रसिद्धार्थकनदीपदसमानविषयकत्वाद्धरिद्रापदस्य नदीविशेषवाचकत्वं कल्पयित्वा

हरिद्रानद्योरभेदान्वयबोधोत्तरं नदीशब्दस्य तौ
यत्तु पदार्थोपस्थित्याकाङ्क्षादिसहकारेण तत एव
स्थितावपि स बोधो न शाब्द इति मध्ये लक्षणाकल्प
दत्रापि शक्तिकल्पनमिति । तन्न । शाब्दत्वं हि न शब्द
जन्यत्वं, लक्षणाकल्पनेऽप्यनिर्वाहात् । न शब्दवृत्तिजन्यत्वं, न्या-
यरीत्यैव सिद्धेः । नापि स्वविषयविषयकवृत्तिज्ञानजन्यत्वम् ।
अन्वयस्य पदार्थत्वे तेषामिव तस्यापि संसर्गस्य विषयत्वापत्तौ
तत्र व्यभिचारात् । अन्यथा चानवस्थानात् । अत एवान्वय-
स्य शक्यत्वे पदार्थवत्तस्य विशेषणत्वे संसर्गसंसर्गभानापत्तिरि-
ति नान्वयः शक्य इति तात्पर्यं न शक्तिनिर्वाह्यमिति मिश्राः ।
न च संसर्गसंसर्गस्य वृत्तिं विनैव शाब्दत्वमिति वाच्यम् ।
पदार्थसंसर्गे एव तथाकल्पनौचित्यात् । पदार्थस्यापि संसर्गस्य
संसर्गो न भासते इत्यत्र च बीजाभावात् । भट्टमतेऽपि शक्तिवदन्व
यसामान्य एव पदानां लक्षणायाः स्वीकारात् । पूर्वं संसर्ग-
विशेषोपस्थितेरनपेक्षितत्वात् । अन्वयविशेषस्याकाङ्क्षादिवशा-
त्सिद्धिस्वीकारात् । यत्तु प्रथमं मानससंसर्गबोधेऽपि तस्य सं-
शयसाधारणतया निर्णयार्थं शाब्दादरः । वस्तुतस्तात्पर्यज्ञा-
नरूपामेवोपस्थितिमादायान्वयांशशक्तिग्रहस्तात्कालिक एवेति ।
तदसत् । लौकिकवाक्ये तत्सम्भवेऽपि वैदिके तदयोगात् ।
वेदार्थस्य मानान्तरानवगम्यत्वात् । तस्य च प्रथममबोधक-
त्वात् । तात्पर्यज्ञानस्य शाब्दधीत्वावच्छिन्ने हेतुत्वानभ्युप-
गमाच्च । एतेनाप्तोक्तत्वनिश्चयोऽपि व्याख्यातः ।

नाप्तोक्तता तु वाक्यार्थगर्भा ज्ञातोपयुज्यते ।
वाक्यार्थानामपूर्वत्वात्संशयेऽप्यन्वयोदयात् ॥

इत्युक्तत्वात् । पदार्थवाक्यार्थतात्पर्यस्य च घटपदं

कर्मत्वविशेष्यकप्रतीतिपरामित्यादिरीत्या एकत्र प-
घटितत्वादिति दिक् । अपि च पदार्थबोधवद-
यस्तस्य महावाक्यार्थबोधहेतुत्वं च त्वयाऽप्य-
म्यमनुभवानुरोधात् । अन्यथाऽवान्तरवाक्यार्थायो-
ग्यत्वानिर्णयकाले महावाक्यार्थबोधापत्तेः । ग्राह्याभावावगा-
हित्वजनकज्ञानविघटकत्वान्यतरव्यतिरेके ज्ञानस्य प्रतिबन्धक-
त्वायोगात् । अतो घटप्रकारककर्मत्वविशेष्यकबोधे घटपदाम्प-
दयोराकाङ्क्षाज्ञानस्य हेतुत्वमावश्यकम् । न च घटमित्यादि-
पदशक्तिज्ञानादेव तत्सिद्धिः । वाक्यस्फोटस्य पदस्फोटभिन्न-
त्वात् । "पदैः पदार्था बुद्ध्यन्ते वाक्येन वाक्यार्थ" इति भवदभ्यु-
पगमात् । अत्र पदशब्दस्य प्रत्येकप्रकृत्यादिपरत्वात् । अत एव
"समासग्रहणं नियमार्थं सद् वाक्यस्य प्रातिपदिकसंज्ञां वार-
यतीति वैयाकरणसाम्प्रदायिकानां ग्रन्थाः । अन्यथा घटमि-
त्यादिसमुदायस्य तन्नियमाद्व्यावृत्त्यभावादर्थवत्त्वाच्चार्थवदादि
सूत्रेण प्रातिपदिकत्वापत्तेः । न च पदस्यापि तदुपलक्षणम् ।
पदस्फोटपक्षेऽपि तस्याऽर्थवत्समुदायत्वरूपनिर्द्धारणप्रतियोगि-
तावच्छेदकधर्मानवच्छिन्नत्वात् । घटमिति समुदायस्य प्रत्ययभे-
दसत्त्वात् । प्रत्ययान्तपर्युदासे च मानाभावात् । किञ्च मणि-
मन्त्रादिन्यायेनैव निराकाङ्क्षत्वज्ञानादीनां प्रतिबन्धकत्वं त्वया-
ऽपि वाच्यम्, हेतुत्वन्तु त्वन्मते निराकाङ्क्षत्वज्ञानाभावस्य । मम
त्वाकाङ्क्षाज्ञानस्येति लाघवम् । निराकाङ्क्षत्वमाकाङ्क्षाविरहः सा-
काङ्क्षभिन्नत्वं चेति द्वयोर्विरोधितायास्तदभावद्वयस्य च कारण-
ताया आपत्तेः । न चाकाङ्क्षाविरोधिज्ञानत्वेन तदनुगमः । वि-
रोधितावच्छेदकभेदेन विरोधिताभेदात् । अपि च निराका-
ङ्क्षत्वज्ञानस्य प्रतिबन्धकतायामप्रामाण्यनिश्चयाभावोऽवच्छेदको

वाच्यः । तदपेक्षयाऽऽकाङ्क्षानिश्चयहेतुतैव युक्ता । अभ
भावस्यैवावच्छेदकत्वे लाघवात् । संसर्गे शाब्दया
वसायोऽपि वाक्यार्थबोधस्य शब्दप्रयोज्यत्वात् । न
र्थस्याप्यशाब्दत्वं, हेत्वन्तराभावेन वैषम्यात् । तदुक्तं भट्टपा

तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते ।
अशाब्दोऽपि च वाक्यार्थो न पदार्थेष्वशाब्दता ॥
वाक्यार्थस्यैव नैतेषां निमित्तान्तरसम्भवः ।

न च व्यवहाराद्वाक्यार्थे एव शक्तिग्रहः । आवापोद्वापाभ्यां पदशक्तिकल्पनसमये गौरवान्यलभ्यत्वाभ्यां तद्ग्रहस्य भ्रमत्वात् । चन्द्राद्यल्पत्वग्रहवत् ।

अखण्डस्फोटे विप्रतिपत्तिः । शब्दत्वं शब्दोपादानवृत्ति न वेति लीलावत्यामुपायकृतः । विधिर्वैयाकरणानाम्, निषेधो नैयायिकादीनाम् । शब्दोपादानमाकाशस्तद्वृत्तित्वं तदीये विशेषे परिमाणे वा प्रसिद्धम् । तदभावस्तु घटत्वादौ । न च पक्षेऽप्याकाशवृत्तित्वेनार्थान्तरत्वप्रसङ्गः । शब्देतरावृत्तित्वे सति सकलशब्दसमवेतत्वरूपपक्षतावच्छेदकधियो बाधकत्वात् । स्फोटात्मकशब्दोपादानककारादिवृत्तित्वं विना साध्यानुपसंहारात् । अत्र कैयटादयः । शब्दस्यार्थप्रत्यायकत्वान्यथानुपपत्त्या वर्णातिरिक्तं पदं पदातिरिक्तं च वाक्यमखण्डं कल्प्यते । न ह्येकवर्णमात्रेणार्थधीः । अनुभवविरोधाद्वर्णान्तरवैयर्थ्यात् । नापि समुदायेन, मेलकाभावात् । वर्णानां नित्यत्वेऽभिव्यक्तेरनित्यत्वे च स्वरूपस्यैव क्रमिकत्वात् । न च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकारेण समूहालम्बनरूपसकलविषयकज्ञानेन निर्वाहः । सरो रसः नदी दीनः जारा राजा इत्यादावर्थविशेषप्रत्ययानुपपत्तेः । वर्णस्व-

…त्वात् । अतो वर्णादिव्यङ्ग्यं पदं वाक्यं वाऽखण्ड-
…मर्थप्रत्यायकम् ।

…दुक्तम्—

एकैकवर्णासामर्थ्यान्मेलकानुपपत्तितः ।
एकबुद्धेर्नदीदीनसाम्यात् स्फोटः स तु द्विधा ॥

अत्र वदन्ति । स्फोटोऽपि किमेकैकवर्णज्ञानेनाभिव्यङ्ग्यः, तत्समूहज्ञानेन वा । नाद्यः । शेषवैयर्थ्यात् । नान्त्यः । मेलनानुपपत्तेः । अभिव्यञ्जकाभावेऽभिव्यङ्ग्यग्रहासम्भवात् ।

तदुक्तम्—

यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः ।
सोऽपि पर्यनुयोगेन नैवानेन विमुच्यते ॥

इदमेव साङ्ख्यसूत्रेणाप्युक्तम्,

प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्द इति । पदप्रत्यक्षाभ्युपगमे तेनैवार्थप्रतीतेः तदभावे चाभिव्यञ्जकाभावादित्यर्थः । यत्तु पदप्रत्यक्षमनुपपन्नमिति । तदसत् । घज्ञानानन्तरज्ञानविषयत्वं टस्यानन्तर्यं घकारटकारयोरानुपूर्वी । मौनिश्लोकानुरोधात् । सा च घटपटज्ञानयोरिव मनसैव गृह्यते । मानसोपनीता च श्रोत्रे भासते । सुरभिचन्दनमित्यादिवत् । बहिरिन्द्रियेण मानसोपनीतस्य स्वायोग्यस्यापि ग्रहोपगमात् । नन्वेवं घज्ञानानन्तरज्ञानविषयष्टकार इति टकारमुख्यविशेष्यकमानुपूर्वीविशेषणकं लौकिकप्रत्यक्षं न स्यात् । टकारोत्पत्तिसज्ज्ञानं तत्र घज्ञानानन्तर्यग्रहश्चेत्येतावत्पर्यन्तं टकारनाशे विशेष्याभावात् ।

उच्यते—

वीचीतरङ्गन्यायेन श्रोत्रावच्छेदेन नानाटकारा उत्पद्यन्ते ।

तत्र तत्तद्व्यक्तिभेदेऽप्यानुपूर्व्या एकत्वात्पूर्वटकारस्य
वेततया तत्समवेतटत्वस्य समवेतसमवायेन निर्विकल्
द्वितीयटकारे पूर्वटकारघटितसम्बन्धेन ज्ञातानुपूर्वी विशे
भासते इत्यभ्युपगमः। तथा च टकारोत्पत्तिस्तज्ज्ञानं त
नानन्तरं तत्र घज्ञानानन्तर्यग्रहः। सा चानुपूर्वी पूर्वटकारनाशेऽपि टकारान्तरे विशेषणतया श्रौत्रप्रत्यक्षे भासते इति। अथ चोक्तक्रमेण कालान्तरे गृहीतैवानुपूर्वी टकारोत्पत्तिकाले स्मर्यते, ततष्टकारस्थितिक्षणे तत्रैव प्रकारीभूय भासते इति। अन्यथा तवाप्यनुपपत्तेरुक्तत्वात्।

यत्तु—पदं वाक्यं चाखण्डमेव। न तु वर्णसमूहः। अनन्तवर्णकल्पने मानाभावात्। तेषां जनकत्वेन व्यञ्जकत्वेन वाऽभिमतवायुसंयोगेषु तदुभयावच्छेदकवैजात्यस्यावश्यकतया मन्मते कत्वादीनामेव वायुसंयोगनिष्ठत्वोपगमात्। नचैवं वायुसंयोगस्यैव वाचकत्वापत्तिः। प्रत्यक्षसिद्धकादीनामेव तदौचित्यात्। तथा च वाचकत्वान्यथानुपपत्त्या तदेवं पदं वाक्यं चेत्यादिप्रतीत्याऽखण्डस्फोटसिद्धिः। कत्वादिकं च तत्रारोप्यते। भट्टमते तारत्वादिरिव ककारादौ, तस्माद्वायुसंयोगा एव स्फोटव्यञ्जकाः। न च तत्र प्रत्येकसमुदायविकल्पः। केचिद्गत्वेन केचिदौत्वेन केचिद्विसर्गत्वेनेति प्रकारभेदेन सर्वेऽपि व्यञ्जका इत्यभ्युपगमात्। न चैकेनाभिव्यक्तावन्यवैयर्थ्यम्। विशदप्रतीतेस्तावदभिव्यक्तिसाध्यत्वात्। न च वर्णानामप्येवमेवार्थप्रतीतावुपयोगोऽस्त्विति वाच्यम्। प्रत्यक्षात्मकप्रतीतावेव विशदाविशदाभासस्वीकारात्। अर्थप्रतीतेश्च प्रत्यक्षानात्मकत्वात्। तदुक्तम्,

साकल्येन तु तद्व्यक्तिः सर्वान्ते मणिरत्नवत्।

अत एव तदतिरिक्तवर्णानभ्युपगमः । कादिप्र-
यस्य स्फोटविशेष्यककत्वाद्यारोपेणैव निर्वाहात् ।
कारौकारविसर्गादिव्यतिरिक्तस्य स्फोटस्याभावादित्य-
म् । तेषामेव स्फोटातिरिक्तानामनङ्गीकारात् । तत्प्रतीतेरेव
स्फोटविषयकत्वात् । अत एव तत्त्वबिन्दौ—"वस्तुतः ककारादति-
रिच्यमानमूर्त्तेर्गकारस्याभावादिति स्फोटवादिमतं वाचस्पति-
मिश्रैरुक्तम् । हरिणाऽप्युक्तम्—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्च न ॥

इति । यथा ऋकारादिषु रेफादिसमानाकारैकदेशावभासस्त-
थाऽखण्डपदे वर्णप्रत्यय इति दृष्टान्ततया द्वितीयचरणोपादानम् ।
अवयवा इवेति पाठे स्पष्टम् ।

अत्रेदं वक्तव्यम् । प्रमाणान्तरासिद्धे हि धर्मिणि त-
न्निष्ठात्यन्ताभावप्रतियोगित्वेन भासमानानां धर्माणां प्रती-
तिरारोप इत्युच्यते । न चेह यथोक्तस्फोटो मानान्तरा-
त्सिद्धः । नापि कत्वादीनां प्रतीयमानककारादिगतत्वे
बाधकं वायुसंयोगवृत्तित्वे साधकं वाऽस्ति । वायुसंयोग-
जनकवृत्तित्वस्याप्यापत्तेः । अकार औकाराद्भिन्न इति गत्व-
प्रकारकप्रतीतिविशेष्यस्यौत्वप्रकारकप्रतीतिविशेष्याद्भेदप्रतीतेश्च ।
अभिव्यञ्जकानामभिव्यङ्ग्यवृत्तिविशेषग्राहकत्वेनैवोपयोगाच्च ।
यत्तु—वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः । अ-
न्यथा कपालातिरिक्तघटासिद्धिप्रसङ्गादिति । तन्न । आधाराधे-
यभावोऽस्या विषयः, अभिव्यङ्ग्याभिव्यञ्जकभावो वा । नाद्यः ।
तवाप्यपसिद्धान्तात् । उत्पत्तये स्थितये वा स्फोटेन तदपेक्षान-
भ्युपगमात् । नान्त्यः । आलोकेन घटव्यञ्जनेऽपि आलोके

घट इति प्रत्ययानुदयादिति दिक् ।

अत्रोच्यते । एकं पदमेकं वाक्यमिति
तीतिबलादेवाखण्डस्फोटासिद्धिः । अत एव ली
ये स्फोटवादिमतोपन्यासे उक्तप्रतीतिरेव तत्साध
नोक्ता न त्वर्थप्रत्ययान्यथानुपपत्तिः । एकम्पदमिति धी
सर्वानुभवासिद्धा न तावद्वर्णविषया । वर्णानामनेकत्वात् ।
नापि वर्णेष्वेवैकार्थज्ञानजननौपाधिकी । उपाध्यननुसन्धानेऽपि
जायमानत्वात्। अतो यस्तस्या विषयः स एव स्फोट इति । न ह्यत्र
तद्धेतोरितिन्यायावकाशः । स्फोटानभ्युपगमे स्फोटहेतोरेवार्थप्र-
त्ययोऽस्त्विवति वक्तुमशक्यत्वात् । न च तद्धेतुत्वेन त्वदभिम-
तादित्यर्थः । सर्वत्र कल्पनोच्छेदापत्तेः । अत एव भेदाग्रहस्य
विशिष्टज्ञानहेतुत्वेनावश्यकतया स एव प्रवृत्तिहेतुरिति न्यायो-
ऽसत्यविशिष्टज्ञानकल्पनायां न बाधकः । भ्रमं प्रति भेदाग्रह-
हेतुत्वस्य भ्रमकल्पनोत्तरकल्पनीयतया प्रवृत्तिकारणताग्रह-
काले तदुपस्थितिविरहात् । प्रमाणप्रवृत्तिसमये सिद्ध्यसिद्धि-
पराहतत्वेन फलमुखगौरवस्यादूषणत्वादिति नैयायिकाः । न
चैवं यथोक्तन्यायोच्छेदः । तद्धेतोर्धर्मिणो मानान्तरसिद्धत्वे एव
तदवकाशात् । यथा धर्मिज्ञानहेतुत्वेनावश्यकस्य धर्मीन्द्रिय-
सन्निकर्षस्यैव संशयहेतुत्वं, न तु धर्मिज्ञानस्येति मिश्रादिभिरु-
क्तत्वात् । अथात्राप्युक्तप्रत्ययादेव स्फोटसिद्धावुक्तन्यायः प्र-
वर्त्ततामिति वाच्यम् । तर्हि स्फोटस्य वाचकत्वे एव विवादो
न स्वरूपे, तस्य त्वयाऽप्यभ्युपगमादिति सिद्धमिष्टम् । न च
त्वदभिमतं तद्वाचकत्वं न सिद्धमिति वाच्यम् । अस्माद्वाक्याद-
यमर्थो बुद्ध इति प्रत्ययात्तद्वाचकतायाः सुसाधत्वात् ।

स्यादेतत् । एकं पदमित्यादिप्रतीतेरतिरिक्ताविषयकत्वे

५

उक्तं हि शारीरकभाष्ये भगवत्पादैः—

गौरित्येकोऽयं शब्द इति प्रतीतिः सा बहुष्वेव वर्णे-च्छेदनिबन्धनौपचारिकी, वनसेनादिबुद्धिवदिति ।

तत्र वाचस्पतिमिश्रैरप्युक्तम्—

तस्मात्प्रत्येकवर्णानुभवजनितभावनानिचयलब्धजन्मनि निखिलवर्णावगाहिनि स्मृतिज्ञाने भासमानानां वर्णानां तद्रूपैकज्ञानविषयतया वा एकार्थधीहेतुतया वौपचारिकमेकत्वमिति ।

अत एवाहुः—

यस्त्वेकप्रत्ययः सोऽपि बाधकेन बलीयसा ।
औपाधिकतया नीतस्तस्मात्स्फोटो न मानभाक् ॥

इति । तन्न । उक्तोपाधिप्रतिसन्धानव्यतिरेकेऽपि ऐक्यप्रत्ययात् । सेनावनादिबुद्धेश्चोपाधिप्रत्ययं विनाऽनुत्पादेन वैषम्यात् । एकज्ञानविषयत्वमात्रस्य समूहालम्बनसमुल्लिख्यमानघटपटादिष्वैक्यप्रतीत्यनुपधायकत्वात् । एकार्थधीहेतुत्वस्य तावद्वर्णवाचकत्वसिद्ध्युत्तरकल्प्यत्वाच्च । न चैकसुप्तिङन्तत्वावच्छेदेनैवैक्यधीः, अन्यथा कश्चित्पदात्मा स्फोटः, कश्चिच्च वाक्यात्मा स्फोटो न स्यादिति लीलावत्युक्त उपाधिर्युक्त इति वाच्यम् । वस्तुत एव तस्य नियामकतया ज्ञानस्यानुपयोगात् । तदेतदभ्युपगम्य कैयटेनोक्तम्—

वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्तीति ।

अथ जातिस्फोटपक्षः । तथा हि । प्रत्यक्षसिद्धवर्णानां तावदपलापो न युक्तः । युक्तेरुक्तत्वात् । स्फोटेऽतिरिक्तगत्वादिस्वीकारे गत्वादेरेव गकारादिरूपतायां वर्णनित्यत्वपक्षे सम्भवेन तदतिरिक्तस्फोटकल्पनएव-

गौरवात् । अस्वीकारे चानुभवविरोधात् । [illegible]
युसंयोगे ध्वनौ वा गत्वादिकं स्वीकृत्य तस्य [illegible]
रोप इति वाच्यम् । विना बाधकं प्रतीतेर्भ्रमत्वकल्[illegible]
नुचितत्वात् । वायुसंयोगस्यैव गकाररूपत्वोपपत्तेश्च । ता[illegible]
गत्वादेरिव तस्यापि श्रोत्रेन्द्रियग्राह्यत्वकल्पनसम्भवात् । तस्मा[illegible]
दतिरिक्ता एव वर्णाः । परन्तु गौरवान्न वाचकाः । आकृत्य-
धिकरणन्यायेन वाच्यताया इव वाचकताया अपि जातावेव
स्वीकर्त्तुमुचितत्वात् । हर्युपस्थितित्वावच्छिन्नजन्यतानिरूपित-
जनकतावच्छेदकतया, इदं हरिपदमिति प्रतीत्या च, जातिवि-
शेषसिद्धेः । वर्णानुपूर्व्यैव तत्प्रतीत्यवच्छेदकत्वयोर्निर्वाहे
च घटत्वपटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादिभि-
रन्यथासिद्धिप्रसङ्गात् । तस्माज्जातेरेव वाचकत्वं, तादात्म्येन
तदवच्छेदकत्वं च । जातिविशेषाभिव्यञ्जकश्चानुपूर्वीविशेषरूप
उपाधिः । तेन सरो रस इत्यादौ वर्णसाम्येऽप्यर्थबोधभेद उपप-
न्नः । उक्तं च वोपदेवेन —

शक्यत्वइव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ।
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत् ॥

वाशब्दः तुशब्दसमानार्थः । उपाधेर्ज्ञानभेदप्रयोजकत्वे दृ-
ष्टान्तो वर्णानामिति । भट्टमते इति शेषः । वाक्यपदीयेऽप्युक्तम्—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥

इति । अस्यार्थः । यद्यपि स्फोटपक्षे सरो रस इत्यादावर्थ-
विशेषप्रत्ययानुपपत्तिरूपो दोषोऽस्ति तथाऽपि पदस्फोटवाक्य-
स्फोटपक्षयोर्न । तत्र जातेर्व्यासज्यवृत्तित्वस्य धर्मिग्राहकप्रमाण-
सिद्धत्वात् । न च तस्या नित्यत्वात्सर्वदा पदार्थबोधापत्तिः । ज्ञा-

[...]ाः फलोपधायकत्वात् । वर्णाभिव्यक्तेश्च तदभि-
[...] । वर्णाभिव्यञ्जकत्वेनाभिमता ध्वनय एव क-
[...]ासन्त इति प्रागुक्तं मतान्तरमाह । कैश्चिदिति ।
[...]क्तवर्णानङ्गीकर्तृभिरित्यर्थः । तदुक्तं काव्यप्रकाशे—

बुधैर्वैयाकरणैः प्रधानीभूतस्फोटव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृत इति । जातिश्च तत्तद्व्यक्तिविशिष्टाऽविद्या तदीयो धर्मविशेषो वा । अत एव ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, आत्मैवेदं सर्वमिति श्रुतिदर्शनादिति कैयटस्तदभिप्रायः* । वस्तुतस्तु तत्तद्व्यक्तिविशिष्टं ब्रह्मैव गोत्वादिजातिरिति वेदान्तिसिद्धान्तः । तदुक्तं वाक्यपदीये—

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥

सम्बन्धिनां गोत्वादिनाऽभिमतव्यक्तिविशेषाणां, सत्ता सद्रूपमेव, भिद्यमाना गोत्वादिविषयकधीविशेषविषयत्वापन्ना । यावत्यो गवादिव्यक्तयस्तावदन्यतमनिष्ठतादात्म्यसम्बन्धेन सद्रूपमेव गोत्वादिकम् । न च सम्बन्धाननुगमः । स्वरूपसम्बन्धेन कारणत्वादिस्थले तस्यादोषत्वोपगमात् । अन्यतमत्वेनानुगमाच्च । तादात्म्यानामनन्तत्वेऽपि तावदन्यतमव्यक्तेः स्वरूपेणैव निवेशात् । अनुगतरूपान्तरसत्त्वएव तद्रूपेणान्यथासिद्धेः । अत एव स्वरूपसम्बन्धेनाभावादेः कारणत्वादिस्थले तावत्स्वरूपान्यतमत्वं स्वरूपत एवावच्छेदकमन्यथाऽननुगत-

---

* स एव पूर्वोक्त एवाभिप्रायो यस्येत्यर्थात् कैयटविशेषणमिदं बोध्यम् ।

सम्बन्धैः कारणत्वादेर्दुर्वचत्वात् । तस्माद्यः गोत्वमतिरिक्तमवच्छेदकं परेषां तत्रास्माकमुक्तसम्बन्धेन सद्रूपमेव तथा । न च गोव्यक्तीनामेवान्यतमत्वेन कारणत्वसम्भवात् सत्सामान्यस्यैव कथमवच्छेदकत्वमिति वाच्यम् । अतिरिक्तगोत्वाद्यभ्युपगमेऽपि तादृशविनिगमनाविरहात्तेन रूपेणान्यथासिद्धेरुभाभ्यां स्वीकार्यत्वादित्यादि नवीनवेदान्तिनः ।

प्रकृतमनुसरामः । तस्यां व्यवस्थिता इति । तद्वाचका इति भावः । प्रातिपदिकार्थत्वं जातेर्विप्रतिषेधसूत्रे दर्शयिष्यामः। धात्वर्थत्वं च भूवादिसूत्रे । नित्येति । ब्रह्मस्वरूपत्वात् ध्वंसप्रतियोगित्वं नास्तीत्यर्थः । अन्यथा प्रागभावाप्रतियोगित्वरूपनित्यत्वस्याविद्यारूपत्वेऽपि सम्भवात् । तदेवाह । सा महानात्मेति । अविद्यात्मकत्वे तु तस्या ब्रह्मसाक्षात्कारोच्छेद्यत्वाभ्युपगमात्तन्न स्यात् । तामिति विशेष्यत्वं द्वितीयार्थः । त्वतलादिभिर्विशेष्यतया तद्बोधनात् । प्रकारतया तु घटादिपदैरपि बोधात् । एतेनासत्त्वोपाध्यवच्छिन्नं ब्रह्मैव शब्दवाच्यमित्यर्थ इति ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थ इति च कैयटग्रन्थौ व्याख्यातौ । इदं पुनरिहावधेयम्—

हरिपदत्वादिकं जातिरिति यदुक्तं तद् भूषणानुसारेण । कौस्तुभकारास्तु घोत्तरटत्वादिकमेव वाचकं, तच्च उपाधिरूपमेव । उपाधिश्च परम्परासंबद्धा जातिरेव । वह्निमत्त्वमित्यादौ वह्न्यादेर्नानात्वेऽपि स्वसमवायिसंयोगसम्बन्धेन वह्नित्वादिजातेरेव सामान्यत्वस्य तार्किकैरपि स्वीकृतत्वादित्याहुः । अन्यत्पूर्ववत् । युक्तं चैतत् । पदत्वादिजातिस्वीकारे मानाभावात् । घोत्तरटत्वादिप्रकारकज्ञानाभाव-

दशायां तत्रापि तज्जात्यनभिव्यक्तिस्वीकारस्यावश्यकत्वात् । अन्यथा हरो रस इत्यादावर्थविशेषबोधानुपपत्तितादवस्थ्यात् । एतेन घटत्वादिप्रतिबन्दिरपास्ता । संयोगविशेषादिज्ञानविकलानामपि घटत्वादिप्रकारकबोधस्य जायमानत्वादित्यास्तां विस्तरः ।

अथ व्याकरणाध्ययने किं प्रवर्त्तकमिति चेत् । अत्र भाष्यम् । कानि पुनरस्य प्रयोजनानि रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति । अत्रैकः प्रयोजनशब्दः पुल्लिङ्गः प्रवर्त्तकविधिपरः । करणे बाहुलकात्कर्त्तरि वा ल्युट् । द्वितीयस्तु क्लीबः फलपरः । द्वयोर्नपुंसकमनपुंसकेनेति नपुंसकैकशेषे वैकल्पिक एकवद्भावः । अतः प्रश्ने बहुवचनमुत्तरे चैकवचनम् । तत्रागमः प्रवर्तकः । अन्यच्चतुष्टयं फलम् । आद्यो यथा । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । निष्कारणो दृष्टकारणनिरपेक्षः । कारयतेः करणल्युटा प्रवृत्तिजनकेच्छाविषयत्वसंबन्धेन प्रवृत्तिजनकस्य फलस्य कारणपदेन लाभात् । एतेन प्रत्यवायसाधनीभूताभावप्रतियोगित्वरूपनित्यत्वमुक्तम् । तथा च संध्योपासनादिवदत्रापि प्रवृत्तिः । न चैवं फलसन्देशविरोधः । फलस्य नित्यत्वेन समं विरोधाभावात् । इयं च श्रुतिः आगमपदस्य वेदे रूढत्वादिति शाब्दिकाः । स्मृतिरिति मीमांसकाः । अत एव तैरागमस्यापि फलत्वमाभिसन्धाय तस्य स्वरूपेण व्याकरणफलत्वायोगाद्वेदवाक्यार्थरूपधर्मज्ञानोपयोगिपदान्वाख्यानद्वारा व्याकरणस्य धर्मप्रयोजनकत्वमिति लक्षणयाऽऽगमस्य फलत्वोक्तिरित्याशङ्क्य चकारेण षडङ्गवेदाध्ययनज्ञानयोर्द्वयोरपि क्रत्वनुष्ठानोपयुक्तत्वेन विधेयत्वावगमान्नात्र धर्मज्ञानस्य षडङ्गवेदाध्ययनफलत्वधीः । नचैवं विधेयानेकत्व-

निबन्धनो वाक्यभेदः । पौरुषेयत्वेन तस्यादोषत्वमित्युक्तम् । अङ्गत्वं च तदुपकारकत्वेन तदारोपात् । तथा च शिक्षायाम्,

मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते ।
निरुक्तं शिर उद्दिष्टं छन्दसां विचितिः पदे ॥
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रचक्षते ।

व्याकरणस्य स्वरादिभिः पदार्थनिर्णये, ज्योतिषस्याध्ययनानुष्ठानयोरुपयुक्तकालविशेषज्ञाने, निरुक्तस्य लोपागमविकारादिप्रतिपादने, छन्दोविचितेर्गायत्र्यादिलक्षणेन गायत्र्या यजते इत्यादिविध्यर्थनिर्णये, शिक्षायाश्च वर्णोच्चारणप्रकारे, कल्पानां च न्यायलभ्यानामन्यशाखागतानां चाङ्गानामुपसंहारेण प्रयोगेयत्ताज्ञाने उपयोगात् । तत्रापि व्याकरणं प्रधानं, वाक्यार्थज्ञानोपयोगिनोः पदपदार्थयोस्तत एव निर्णयात् ।

ननु रक्षा नैतत्फलम् । सा हि लौकिकानां पदानां वैदिकनां वा । नाद्यः । लोकत एव सिद्धेः । नान्त्यः । वाक्यवत् पदानामप्यध्येतृसंप्रदायपरम्परयैव रक्षोपपत्तेः । मैवम् । पदस्वरूपमात्रस्य परम्परया रक्षायामनुपयोगेऽपि वाक्यार्थज्ञानस्यावश्यापेक्षणीयत्वात्तस्य च पदार्थग्रहमूलकत्वात् त्मनेत्यादीनां च लोकतोऽर्थग्रहानुपपत्तेर्लोपाद्यन्वाख्यानद्वारा तदुपयोगात् । लोपो यथा, त्मनादेवेषुविविदेमितद्रुः । मन्त्रेष्वाङ्यादेरात्मन इत्यालोपः । आगमो यथा । देवासः । ब्राह्मणासः । आज्जसेरित्यसुक् । उभयं यथा । देवा अदुह । अदुहत इत्यर्थः । दुहेर्लङो झस्यादादेशः । लोपस्त आत्मनेपदेष्विति तलोपः । बहुलं छन्दसीति रुट् । एतेन नाशिरं दुहे इति लडन्तमपि व्याख्यातम् । आशिरं सोमसंस्कारार्थं पयो न दुहते इत्यर्थः । विकारो यथा । गृभ्णामितेमहतेसौभगाय । "हग्रहोर्भश्छन्दसि" इस्येति वक्तव्यमिति हकारस्य भत्वम् । प्रत्ययो य-

था। उद्ग्राभं च निग्राभश्चेति। "उदिग्रह" इति सूत्रे "उद्ग्राभनिग्राभौ चच्छन्दसि स्रुगुद्यमननिपातनयोः" इति वार्त्तिकान्निपूर्वादपि ग्रहेर्घञ्। भृतिः प्राग्वत्। सन्निवेशविशिष्टपात्रपरस्यापि स्रुक्पदस्यात्र जुहूभृन्मात्रपरत्वम्। उद्ग्राभश्चेति जुहूमुद्यच्छाति निग्राभं वत्युपभृतं नियच्छतीति वचनात्। ननु ऊहस्वरूपं तावन्मीमांसोक्तन्यायमूलकमेव, उह्यमानपदस्वरूपं तु लोकत एव सिद्धमिति चेन्न। प्रकृत्यादिमात्रस्योहस्थले व्याकरणं विना तद्विवेकासम्भवात्। तथा हि। यत्राङ्गजातं पूर्णमुपादिष्टं सा प्रकृतिः। यथा दर्शपौर्णमासौ। यत्र नोपदिष्टं सा विकृतिः। यथा सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः, प्राजापत्यं घृते चरुं निर्वपेत् कृष्णलमायुष्काम इत्यादि। अतिदेशश्च त्रेधा। प्रत्यक्षवचनेन यथा। इष्टावेकाहे समानमितरच्छ्येनेनेति। नामधेयेन यथा। कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीति। आनुमानिकवचनेन यथा। सौर्यमित्यादि। नन्वत्र प्रमाणाभावान्न धर्मातिदेश इति चेन्न। यागेन ब्रह्मवर्चसं भावयेदिति वाक्यार्थे भावनायाः किं केन कथमित्यंशत्रयसापेक्षत्वानियमात्। किमित्यंशस्य भाव्यश्रुत्या केनेत्यंशस्य यागश्रुत्या पूरणेऽपि कथमितीतिकर्त्तव्यांशस्य पूर्णत्वाभावात्तदाकाङ्क्षायामतिदेशावश्यकत्वात्। न च वैदिक्या दर्शादीतिकर्त्तव्यतायास्तन्मात्रोपनिबद्धत्वादन्यत्र नेतुमशक्यत्वाल्लौकिक्याः पार्वणस्थालीपाकादीतिकर्त्तव्यताया बहुष्वनुवृत्त्या साधारणत्वात्सैव गृह्यतामिति वाच्यम्। करणस्य वैदिकत्वे वैदिक्या एव तस्या अपेक्षितत्वात्। न च सोऽपि कथम्भावः स्मृतिमूलवेदविहितत्वाद्वैदिक एवेति वाच्यम्। दर्शादिकथम्भावस्य प्रत्यक्षवेदमूलतया ततो विशेषात्। सौर्यस्य प्रधानस्य वैतानिकेऽग्नौ प्रवृत्तिः लौकिकेतिकर्त्तव्यतायास्तु आ-

चारात्स्मार्त्तं इत्यङ्गप्रधानयोर्भिन्नदेशत्वापत्तेश्च [illegible] । प्रकृतिविकृतिभावश्चैकदेवताकत्वादिना सुज्ञानः । तथा [illegible] । सौर्यस्याग्नेयविकारत्वमेकस्य देवतात्वपर्याप्त्याश्रयत्वात् [illegible] ओषधिद्रव्यकत्वाच्च । आग्नावैष्णवमेकादशकपालं नि[illegible]दिति [illegible]यागो द्विदेवताकत्वादैन्द्राग्नविकारः । अपराह्णे सरस्वत[illegible]ज्यस्य यजेतेत्याज्यद्रव्यकत्वादुपांशुयाजविकार इत्यादि ॥

ऊहस्याप्येकदेशबाधरूपतया बाधप्रवृत्तिप्रकारो दर्श्यते । दशमे निरूपितं किं सर्वं प्राकृतं विकृतौ कर्त्तव्यम्, उत लुप्तप्राकृतप्रयोजनं नेति । तत्र पूर्वपक्षः अनपेक्षितप्रयोजनमेव प्राकृतमङ्गजातं स्वरूपमात्रेण विकृतावतिदिश्यते, अतो वैतुष्याद्यसम्भवेऽपि प्रापकप्रमाणानुरोधाददृष्टार्थकत्वं कल्पयित्वा कृष्णलादावप्यवघातादयः कार्या इति । सिद्धान्तस्तु—

अपेक्षासत्तियोग्यत्वैरुपकारातिदेशनम् ।
तदभावात्पदार्थानामतिदेशो न कल्प्यते ॥

यागेन भावयेदिति—यथा यागः फलसाधनं भवति तथा व्याप्रियेतेत्युक्ते केन व्यापारेण यागः फलजनको भवतीति व्यापारविशेष एवापेक्षितो न पदार्थस्वरूपमात्रम् । सन्निधिरप्युपकारस्यैव । निर्वपत्यादिचोदनासाम्येन वैकृतवाक्यस्य प्राकृताङ्गवाक्योपस्थापकत्वात् । तस्य चांशत्रययुक्तभावनोपस्थापकत्वात्साध्यसाधनयोर्विशिष्य वैकृतवाक्योपादानात्तावनादृत्य कथंभावांशस्यैवाङ्गजन्योपकारसंपादनस्वरूपस्य तेन ग्रहणात् ।

आकाङ्क्षापूरणयोग्यताऽपि व्यापारस्यैव नाङ्गानाम् । अतः पदार्थविशिष्टोपकाराणामेवातिदेशो न पदार्थस्वरूपाणाम् । तस्मात्प्राकृतकार्यस्य विकृतावसंभवे तत्पदार्थस्यानतिदेश एव । अतो व्रीहीनवहन्तीत्यत्र प्रकृतौ वैतुष्यमवघातस्योपकारतया

६

क्लृप्तम् । तस्य च कृष्णलेष्वसंभवाद्बाध एव । श्रपणं तु घृते श्रपयतीति प्रत्यक्षवचनाद् भवतीति वैषम्यमिति । मन्त्राणां चानुष्ठेयार्थप्रकाशनद्वारकमङ्गत्वम् । तत्र मन्त्राभिधेयस्य सर्वस्य विकृतावभावे सर्वस्य मन्त्रस्य निवृत्तिः । यथा अवरक्षोदिवः सपत्नं वध्यासमित्यवघातमन्त्रस्य कृष्णलेषु । अर्थैकदेशमात्राभावे तु विकृतिवृत्त्यभावप्रतियोग्यर्थाभिधायिभागस्यैव निवृत्तिः । यथा अग्नये त्वा जुष्टं निर्वपामीत्यत्राग्निशब्दस्य । सूर्यपदस्य तत्स्थाने प्रयोगात् । अर्थाच्च एकारस्यापि निवृत्तिः । अकारान्तायां प्रकृतौ यकारस्यैव संप्रदाने साधुत्वात् । अतोऽग्नये इति मध्योदात्तस्थाने सूर्यायेत्याद्युदात्तमूहनीयम् ।

लिङ्गस्य यथा । देवीरापःशुद्धाःस्थेत्यप्सु विनियुक्तस्य देवाज्यशुद्धमसीति ।

प्रत्ययमात्रस्य यथा । माभेर्मासंविक्था इति पुरोडाशेऽवदानमन्त्रस्य धानासु माभैष्टमासंविजिध्वमिति हरदत्तादयः । संविग्ध्वमिति याज्ञिकाः । प्रकृतावनिरुक्ततया विजिर् पृथग्भाव इत्यस्य प्रयोग इति तेषामभिप्रायः ।

पूर्वेषां त्वयमाशयः । तन्मन्त्रभाष्यकारेण ओविजी भयसञ्चलनयोरित्यस्यार्थद्वयमध्ये भयस्य माभैरित्यनेनैव निषेधान्मासंविक्था इत्यनेन संञ्चलनं निषिध्यतइत्युक्तम् । अवदानोपयोगिनि मन्त्रे पृथग्भावस्य निषेधानर्हत्वात् । तथा च तत्र छान्दसत्वादिडभावेऽपि ऊहस्य वेदत्वाभावादूह्यमाने इडेव युक्त इति ।

ननु लाघवं न फलम् । सूत्रपाठादेरलौकिकसंज्ञापरिभाषोपनिबद्धत्वाद्भाष्यवार्त्तिकादेश्चात्यन्तविषमत्वाद्गौरवस्य वैपरीत्यादिति चेन्न । शब्दानामानन्त्येन प्रतिपदपाठस्यासंभवात् उत्सर्गापवादरूपलक्षणद्वारा तद्व्युत्पादनस्यैव ल-

घुत्वात् । लक्षणप्रणयनं च जातिव्यक्तिपक्षयोरन्यतरपक्षमाश्रित्य । लक्ष्यानुरोधश्च तन्नियामक इति विप्रतिषेधसूत्रे निरूपयिष्यामः ।

असन्देहः सन्देहप्रागभावो न तु ध्वंसः । वैयाकरणस्य संशयानुत्पादादिति कैयटः । न च तस्यानादित्वात्फलत्वानुपपत्तिः । संदेहानुत्पादे उत्तरक्षणे तत्प्रागभावानुवृत्तेरेव क्षेमसाधारणसाध्यत्वस्वीकारात् । अत एवान्वयीभावाप्रसक्तिः । प्रागभावार्थकनञस्तदभावस्य वक्ष्यमाणत्वात् ।

स्थूलपृषतीमनड्वाहीमालभेतेत्यत्र संशयः । कर्मधारये स्थूलत्वं गव्यन्वेति । पृषतीपदस्य मत्वर्थलक्षणया बिन्दुमत्परत्वात् । बहुव्रीहौ तु पृषत्स्विति विशेषः । तत्र पूर्वपदान्तोदात्तत्वं दृष्ट्वा पूर्वपदप्रकृतिस्वरेण बहुव्रीहित्वनिश्चयः । नन्वेवम् इन्द्रपीतस्योपहूतोभक्षयामीत्यत्रापीन्द्रशब्दस्याद्युदात्तपाठादेव बहुव्रीहिनिर्णयसंभवादिन्द्रपीताधिकरणवैयर्थ्यापत्तिरिति चेत् । अत्राहुः । अवैयाकरणान्प्रति तत् कृत्वाचिन्तान्यायेन वेति ।

स्यादेतत् । कर्मार्थकक्तप्रत्ययान्ते परे तृतीयान्तं पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थकेन "तृतीयाकर्मणि" इति सूत्रेण तृतीयान्तेन्द्रपदस्य कर्मक्तान्तपीतपदेन समासेऽपि पूर्वपदप्रकृतिस्वरस्यैवानुशासनात्तस्य निर्णायकत्वानुपपत्तिः । अतोऽधिकरणं सार्थकमिति । अत्राहुः । पीतपदस्य दानपरत्वमत्रावश्यकम् । देवताया अचेतनत्वेन पानासंभवात् । इन्द्राय दत्तस्येत्यादिग्रन्थदर्शनाच्च । तथा चेन्द्रोद्देश्यकदाने तस्य कर्तृत्वकरणत्वयोरसंभवाच्चतुर्थ्यन्तं वाच्यमिति उक्तसूत्रस्य नायं विषयः । न च हेतुतृतीयान्तत्वम् । उपपदविभक्तितः कारकविभक्तेर्बलवत्त्वात् । न च तदर्थचतुर्थीसमासस्य प्रकृतिविकारभावमात्रविषय-

त्वाच्चतुर्थीसमासानुपपत्तिः। "तृतीयातत्कृतार्थेन" इत्यादेरप्रवृत्त्या तृतीयासमासस्याप्यसंभवात्। योगविभागस्य चतुर्थीत्यत्रापि संभवात्। तस्माच्छान्दसत्वाच्चतुर्थीसमासः षष्ठीसमासो वेति वाच्यत्वात्। अत्र च स्वरभेदस्यावश्यकत्वात्पूर्वपदप्रकृतिस्वरेण निर्णयो युक्त एवेति।

अत्र नवीनमीमांसकाः। नात्र बहुव्रीहिलक्षणानुगमः। समानाधिकरणानामेव तद्विधानात्। सप्तमीविशेषणे बहुव्रीहाविति ज्ञापकबलादेव कण्ठेकाल इत्यादौ तत्सिद्धेः। तत्पुरुषे तु "कर्तृकरणे कृता बहुलम्" इति लक्षणानुगमः। बहुलग्रहणेन चतुर्थीसमासस्याप्युपपत्तेः। न चैवं स्वरेणैव बहुव्रीहिनिर्णयोपपत्तावाधिकरणवैयर्थ्यतादवस्थ्यम्। सत्यपि बहुव्रीहिज्ञापके स्वरे प्रधानभूतस्वार्थानुग्रहाय तत्पुरुषावधारणादङ्गगुणविरोधन्यायेन शब्दधर्मस्वरस्यैव व्यत्ययेनोपपाद्यत्वात्। नचैवं स्थूलपृषतीमित्यत्रापि स्वरेण निर्णयो न स्यात्, इष्टापत्तौ च महाभाष्यविरोध इति वाच्यम्। तत्र समानाधिकरणबहुव्रीहिसंभवेन वैषम्यात्। अतोऽधिकरणारम्भ इत्याहुः।

इमानि च भूय इत्यादिभाष्येण प्रयोजनान्तराणि दर्शितानि। ते सुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द इति ब्राह्मणम्। न म्लेच्छितव्यमित्यस्यार्थे नापभाषितवै इति। निन्दार्थान्म्लेच्छतेः कर्मणि घञ्। अत्र "हैहेप्रयोगे हैहयोः" इति प्लुते तन्निमित्ते प्रकृतिभावे च प्राप्ते तदकरणान्म्लेच्छनमिति केचित्। सर्वः प्लुतः साहसमनिच्छता विभाषाकर्त्तव्य इति भाष्यादत्रापरितुष्य वाक्यद्विर्वचनं

तथा । सर्वस्य द्वे इत्यत्र पदस्यैव तद्विधानात् । न चानावृत्तिः शब्दादनावृत्तिः शब्दादितिवदैच्छिक एवायं पुनः प्रयोग इति वाच्यम् । आम्रेडितस्वरानुपपत्तेः । शास्त्रीयाद्विवत्वने एव तद्विधानादित्यपरे । तत्स्वररहितस्यैव पाठे तु अरिशब्दे रेफस्य लत्वमपशब्द इत्याहुः । अत एव वेदस्थशब्दत्वं साधुत्वमित्यस्य[१] विवक्षायां वेदस्थेऽलिशब्दे गतत्वादिति मणिकारेणोक्तम् ।

माध्यन्दिने ब्राह्मणे तु हेलवो हेलव इति पठित्वा तस्माद् ब्राह्मणो न म्लेच्छेदिति पठ्यते । तत्र यकारस्थाने वकारोऽपशब्दः । तस्माच्छास्त्रबोधितविपरीतानुष्ठानान्म्लेच्छा निन्द्यां मा भूमेत्यध्येयं व्याकरणम् । न च म्लेच्छनेन पराभवोक्त्या तदभावेन पराभवाभाव एव रात्रिसत्रन्यायेन फलं स्यादिति वाच्यम् । द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यादिति न्यायेनापापश्लोकश्रवणवत्प्राशस्त्यमात्रपरत्वात् ।

तथाहि । यस्य पर्णमयीजुहूर्भवति न स पापं शृणोतीति द्रव्ये फलं श्रूयते । यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति ज्योतिष्टोमे अञ्जनाख्यसंस्कारे, यत्प्रयाजानुयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्यै इति च कर्मणि । अङ्क्ते अञ्जनं करोति । भ्रातृव्यः शत्रुः । किमेते फलविधयः उत क्रत्वर्थपर्णतादिफलार्थवादा इति संदेहे खादिरं वीर्यकामस्य यूपं कुर्य्यादितिवत्फलविधयः क्रतूपकारेण व्यवहितफलोपादानापेक्षया अव्य-

१ वेदस्थशब्दत्वं साधुत्वमिति साधुत्वनिर्वचने हे ऽलयो हे ऽलय इति वेदे प्रयुज्यमाने अलिशब्दे अति प्रसङ्गः स्यात् । तस्मात् तथा निर्वचनमसङ्गतमित्यर्थः ।

वहितस्य श्रूयमाणफलस्य विपरिणामेन साध्यत्वौचित्यादिति प्राप्ते सिद्धान्तः। रात्रिसत्राणामनन्यशेषत्वादगत्या विपरिणाम आश्रितः। पर्णतादीनां त्वव्यभिचरितक्रतुसंबन्धजुह्वादिद्वारा क्रत्वङ्गत्वात् प्रधानफलेनानाकाङ्क्षत्वान्न तथेति। न चासाधुप्रयोगनिषेधस्यापि अनन्यशेषत्वाद्रात्रिसत्रसाम्यम्। प्रकरणादेतन्निषेधस्य क्रत्वङ्गत्वमिति वक्ष्यमाणत्वात्। क्रतुप्रकरणपाठे च भाष्यकारस्यैव साक्षित्वात्॥

वस्तुतो नात्र रात्रिसत्रन्यायावकाशः। तथा हि। आयुर्ज्योतिरित्यादिवाक्यविहितसोमयागविशेषाणां वाचको रात्रिशब्दः। तत्र स्वर्गः प्रतिष्ठा वा फलमिति संशये पूर्वपक्षः। रात्रिसत्रे फलार्थवादमङ्गवत्कार्ष्णाजिनिः। यथाऽङ्गेषु फलश्रुतिरर्थवादस्तथाऽत्रापि कामपदसमभिव्याहारादेः फलत्वकल्पकस्य विरहः। अतः सर्वाभिलषितत्वेन स्वर्गोपस्थित्या स एव फलमिति। सिद्धान्तस्तु फलमात्रेयो निर्देशादिति। निर्देशादर्थवादवाक्योपात्तत्वात् प्रतिष्ठा फलमेवेति आत्रेय आचार्यो मन्यते। प्रतितिष्ठन्ति ह वै यएता रात्रीरुपयन्तीत्यर्थवादेन प्रतिष्ठाया उपस्थितत्वात् तस्याः फलत्वकल्पने लाघवम्। स्वर्गस्य तूपस्थितिः फलत्वं चेत्युभयकल्पने गौरवमिति। प्रकृते तु म्लेच्छनेन पराभवस्यार्थवादादुपस्थितत्वेऽपि तदभावेन तदभावोपस्थितिरपि कल्प्यैवेति। शिक्षासु पठ्यते।

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

स्वरतः स्वरेण। "हीयमानपापयोगाच्चेति तसिः। मिथ्याप्रयुक्तः। तात्पर्यविषयार्थातिरिक्तार्थप्रतिपादकः। तदाह।

न तमर्थमाहेति । स्पष्टमन्यत् । इन्द्रशत्रुरिति । विश्वरूपवधानन्तरं कुपितेन त्वष्ट्रा इन्द्रवधार्थमाभिचारिकयागप्रयोगे इन्द्रस्य शत्रुर्हिंसकः सन्वर्द्धस्वेत्यभिप्रायेणेन्द्रशत्रुर्वर्द्धस्वेति प्रयुक्तम् । तत्र षष्ठीसमासत्वादन्तोदात्ते वक्तव्ये प्रमादादाद्युदात्त उक्तः । तथा च पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थो लब्धः । रन्प्रत्ययान्तत्वादिन्द्रशब्दस्याद्युदात्तत्वात् । तेनेन्द्रनिष्ठशातकतानिरूपितशातनीयत्वलाभादिन्द्र एव वृत्रस्य हिंसको वृत्त इति । इन्द्रशत्रुत्वस्य विधेयत्वान्न संबोधनविभक्तिः । तस्या अनुवाद्यविषयत्वात् । ननु कथं यथोक्तेऽपीन्द्रशत्रुत्वं विधेयं वृद्धेरेव तथात्वात् । न च विशिष्टविधेर्विशेषणस्याप्यप्राप्तस्य विधेयत्वादिति वाच्यम् । संबोधनपक्षेऽपि तुल्यत्वात् । मैवम् । इन्द्रशत्रुत्वविशिष्टस्य वृद्धेर्विधानाद्विशेषणविधिः । संबोधनस्य तु विशेषणतयाऽपि विध्यन्वयाभावान्नेति ।

स्यादेतत् । "यज्ञकर्मण्यजपन्यूङ्खसामसु" इति एकश्रुत्येह भाव्यम् । सा च स्वराविभागः । सचोभयत्राप्यविशिष्ट एवेति ।

अत्राहुः । जपादिपर्युदासादेकश्रुतिविधिर्मन्त्रमात्रपरः । अघट इत्यादौ भेदप्रतियोगिवृत्तिर्भेदप्रतियोगितानवच्छेदकश्च यो धर्मस्तदवच्छिन्नानुयोगितयैव भेदस्य भासमानत्वात् । प्रकृतेऽपि भेदप्रतियोगिजपादिवृत्तिस्तत्प्रतियोगितानवच्छेदकश्च धर्मो मन्त्रत्वादिस्तदवच्छिन्न एव विधितात्पर्यात् । ऊहादीनां च स्वेच्छया प्रयुज्यमानत्वान्न मन्त्रत्वम् ।

तदाह जैमिनिः–अनाम्नातेष्वमन्त्रत्वमिति । ऊहप्रवरनामधेयानां मन्त्रत्वमस्ति न वेति संशयः । ऊहः प्रसिद्धः । आर्षेयं वृणीते इत्यादिविधिवशादुच्चार्यमाणः काश्यपादिः प्रवरः । यजमानस्य नाम गृह्णातीति विधेरुच्चार्यमाणं देवदत्तादिपदं नामधेयम् । तत्र

प्रयोगकालीनार्थाभिधायित्वरूपमन्त्रस्योहादिसाधारण्यान्मन्त्रपदैकवाक्यत्वाच्चैषामपि मन्त्रत्वम् । अन्यथा श्लोकैकवाक्यतापन्नमन्त्रवदूहादिभिरमन्त्रैरेकवाक्यीभूतानामपि मन्त्राणाममन्त्रत्वं स्यादिति प्राप्ते सिद्धान्तः । अभियुक्तप्रसिद्धिविषयत्वमेव मन्त्रत्वम् । ऊहादिषु चाभियुक्तानां मन्त्रत्वप्रसिद्ध्यभावान्न तत् । तदेकवाक्यतापन्नमन्त्राक्षराणां तु मन्त्रत्वप्रत्यभिज्ञानात्तथेति । आपस्तम्बोऽपि, अनाम्नाता अमन्त्राः, यथा, प्रवरोहनामधेयग्रहणानीति । अत एव मन्त्रस्य स्वरादिदोषेणानिष्टजनकत्वमित्यर्थे यथेन्द्रशत्रुरिति दृष्टान्तोऽसङ्गतः स्यात् । तस्य मन्त्रत्वाभावात् । अतो मन्त्रशब्दस्य शब्दमात्रपरत्वमिति मनसि कृत्वा मन्त्रो हीन इत्यस्य स्थाने दुष्टः शब्द इति भाष्ये पठितम् । यद्यपि स्वाहेन्द्रशत्रुर्वर्द्धस्वेति वेदे पठ्यत एव, तथाऽपि ऊहितानुकरणमेव तदिति तदनुकार्यस्य लौकिकत्वमक्षतम् । न च स्वरस्य वेदमात्रविषयकत्वात्तत्र तत्प्रयुक्तगुणदोषयोर्न प्रसक्तिरिति वाच्यम् । तद्विधौ छन्दसीति अनधिकारात् । वेदे त्रैस्वर्यैकश्रुत्योश्च यथासंप्रदायं व्यवस्था । लोके त्वैच्छिको विकल्प इति तु विशेषः ।

स्यादेतत् । अजपेति प्रतिषेध एव युक्तः । तथा हि । "उच्चैस्तरां वा वषट्कार" इति सूत्रस्थस्यैव वाशब्दस्य विभाषाच्छन्दसीत्यत्रानुवृत्तिसम्भवाद् विभाषाग्रहणं व्यर्थं स्यात् । तद्विकल्पस्येव यज्ञकर्मणीत्यस्याप्यनुवृत्तिर्माभूदित्येतदर्थमुच्चैस्तरांवेति सूत्रे यज्ञकर्मणीत्यस्यानुवृत्तेः । पर्युदासपक्षे च यज्ञकर्मणीत्येकश्रुतेर्वेदमात्रपरत्वान्नित्यत्वाच्च । विभाषाच्छन्दसीत्येकश्रुतेरपि यज्ञकर्मविषयकत्वे एकत्रैव वैकल्पिक्या नित्यायाश्च प्राप्तिविरोधात्तत्परिहाराय यज्ञकर्मणी-

त्यस्यानुवृत्तेर्वाग्रहणानुवृत्तेश्च संभवात्पुनर्विभाषाग्रहणवैयर्थ्यं स्पष्टम् । प्रतिषेधपक्षे तु "विभाषा च्छन्दसि" इत्यत्र यज्ञकर्मानुवृत्तावपि वेदे वैकल्पिक्येकश्रुतिः, ऊहादौ तु "यज्ञकर्मणि" इति सूत्रेण नित्येति व्यवस्थोपपत्तेरुक्तरीत्या तत्सार्थक्यमिति चेत् । मैवम् । पर्युदासपक्षेऽपि वैकल्पिकैकश्रुतेः छन्दोविषयत्वान्नित्यैकश्रुतेश्च मन्त्रविषयत्वात् छन्दःशब्दस्य सामान्यपरस्य मन्त्रातिरिक्तपरत्वं कल्पयित्वा विकल्पस्य ब्राह्मणपरत्वसंभवात् । विशेषविधिविरोधे सामान्यविधेस्तदतिरिक्तविषयकत्वस्य व्युत्पन्नत्वात् । अत उभयमतेऽपि यज्ञकर्मणीत्यस्यानुवृत्तितात्पर्यग्राहकत्वेन विभाषापदं समानयोगक्षेममेवेति ।

केचित्तु एकश्रुतिप्रसङ्गेऽप्युदात्तोच्चारणादेवेन्द्रशत्रुपदे दुष्टत्वमित्याहुः ।

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हि चित् ॥

निगदः पाठमात्रम् । न ज्वलति न प्रकाशते । निष्फलमिति यावत् । निरुक्ते तु—

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥

इति मन्त्रं लिखित्वा यद् गृहीतमविज्ञातमिति पाठः । गृहीतं शब्दतः । अविज्ञातम् अर्थतः प्रकृत्यादिविभागेन चेत्यर्थः । एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीतिषाष्ठभाष्यवक्ष्यमाणश्रुतिमूलकम्—

भ्राजाख्यश्लोकेषु कात्यायनस्मरणमपि—

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥

दुष्यति चेत्यवैयाकरणपरम् ।

अविद्वांसः प्रत्याभिवादे नाम्नो ये न प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥

अयमहमिति "अनुकरणं चानितिपरम्" इति संज्ञा । न च समासे विभक्तिलोपापत्तिः । अनुकरणत्वात् । अस्यवामीयमित्यादिवत् ।

याज्ञिकाः पठन्ति, प्रयाजाः सविभक्तिकाः कार्या इति । आधानोत्तरं यजमानस्योदरव्यथाया वर्षमध्ये आपद्विशेषस्य वोपनिपाते नैमित्तिकीं पुनराधायेष्टिं विधायेदमाम्नातम् । विभक्तिमात्रस्यानर्हत्वात्प्रकृतेराक्षेपः । सा चाग्निशब्दरूपा । निरुक्ते अथ किंदेवताः प्रयाजानुयाजा इति प्रश्ने छन्दांसि वै प्रयाजा ऋतवो वै प्रयाजा इत्यादिपक्षानुदाहृत्य आग्नेया इति तु स्थितिर्भक्तिमात्रमितरादिति सिद्धान्तितत्वात् । अत एव प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वन्तं हविषो दत्तभागमिति अग्नेर्वरप्रार्थनम् । तव प्रयाजा अनुयाजाश्च केवला ऊर्जस्वन्तो हविषः सन्तु भागा इति देवानां वरप्रदानं च श्रूयते ।

अन्यत्रापि श्रूयते, यो वाइमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीन इति । पदं पदमिति सङ्ख्यैकवचनाच्चेति शस् । ऋत्विजमर्हति इति ऋत्विक्कर्मार्हति इति च व्युत्पत्त्या आर्त्विजीनपदं याज्ययाजकोभयपरम् । "यज्ञर्त्विग्भ्यां घखञौ" इति सूत्रेण "यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानम्" इति वार्तिकेन च खञ् । अन्येऽपि मन्त्रवर्णाः—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याँ आविवेश ॥

शब्द एव सर्वकामदत्वाद् वृषभत्वेन रूप्यते । यज्ञाप्यम्,

वृषभो वर्षणादिति । कामानां ज्ञानपूर्वकानुष्ठानफलत्वादिति कैयटः । नामाख्यातनिपातोपसर्गाणां चतुष्टयम् । कालानां त्रयम् । व्यञ्जकव्यङ्ग्यभेदेन कार्यनित्ययोर्वर्णाखण्डस्फोटात्मकयोर्द्वयम् । विभक्तीनां सप्तकम् । उरसि शिरसि कण्ठे च बद्धः । तेषां व्यञ्जकध्वनिस्थानत्वात् । महान्देवः शब्दः । महता देवेन ब्रह्मणा साम्यमध्ययनप्रयोजनमित्यर्थः ।

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

मनस ईषिणो मनीषिणः पृषोदरादिः । तएव विदन्तीत्यर्थः । गुहेति लुप्तसप्तमीकमज्ञानार्थकम् । व्याकरणेनैव प्रकाशन्ते नान्यथा । अमनुष्या अवैयाकरणाः चतुर्णां पदजातानामेकैकस्य चतुर्थं भागं वदन्ति । सामस्त्येन न जानन्तीति यावत् ।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्यउशती सुवासाः ॥

त्वशब्दोऽन्यार्थः । उतेत्यपिशब्दार्थे । पूर्वार्द्धमविद्वत्परम् । प्रत्यक्षेण शब्दमुपलभमानोऽप्यर्थानवबोधान्न पश्यतीत्यर्थः । उत्तरार्द्धं विद्वत्परम् । यथा कामयमाना जाया पत्ये स्वात्मानं प्रकाशयति, तथैव विदुषे वागपीत्यर्थः ।

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ॥

यथा चालन्या सक्तूनां तुषनिष्कासनेन सारं गृह्णन्ति, तथाऽपशब्देभ्यो वाचं पृथक्कृत्य जानन्तीत्यर्थः । अत्र ज्ञानमात्रप्राप्ये दुर्गममार्गरूपे वाग्विषये सखायः समानख्यातयः अविद्यानाशेन द्वैतनिवृत्त्या सर्वमेकमिति मन्यमानाः सख्यानि सायुज्यानि भजन्ते,

वैयाकरणा इत्यर्थलभ्यम् । वेदाख्ये ब्रह्मणि या लक्ष्मीर्वेदान्तेषु परमार्थसंविल्लक्षणोक्ता सा यस्मादेषां सन्निहिता भवतीत्यर्थः । "चालनी तितउः पुमान्" इत्यमरः । इदं च नान्यव्यवच्छेदपरम् । "स्याद्वास्तु हिङ्गु तितउ" इति त्रिकाण्डशेषे ऽपुंस्त्वस्यापि विधानात् । अतस्तितउ परिपवनं भवतीति भाष्येण संगतिः । याज्ञिकाः पठन्ति—

"आहिताग्निरपशब्दं प्रयुज्य सारस्वतीं प्रायश्चित्तीयामिष्टिं निर्वपेत्"

इति । तथा—

"दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्य्यान्न तद्धितम्"

इति । संस्कार्यस्य पितरमवधीकृत्य ये आद्यास्त्रयः पुरुषास्ताननुकायत्याभिधत्ते इति त्रिपुरुषानूकम् । मूलविभुजादित्वात्कः । अन्येषामपि दृश्यते इति दीर्घः । पात्रादित्वान्न स्त्रीत्वम् । अप्रत्तानां च स्त्रीणां त्रिपुरुषी विज्ञायते इति वसिष्ठप्रयोगस्त्वार्षः ।

"सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव" ॥

इति ऋङ्मन्त्रः । सिन्धवो विभक्तयः । काकुर्जिह्वा उद्यते उत्क्षिप्यतेऽस्मिन् काकुदम् । वदिरुत्क्षेपणपरः । घञर्थे कविधानमित्याधिकरणे कः । शकन्ध्वादित्वात्पररूपमित्येके । नुद प्रेरणे अधिकरणे कः । पृषोदरादित्वान्नुलोप इत्यन्ये । तथा च काकुदं ताल्वाचक्षतइत्युपक्रम्य कोकूयमाना एनां नुदतीति वेति निरुक्तम् । अनुक्षरन्ति तालु प्राप्य प्रकाशन्तइत्यर्थः । यथाऽग्निः सच्छिद्रां

लोहमयीं प्रतिमां प्रविश्य प्रकाशते तन्मलं भस्मीकृत्य तां च शुद्धां करोति । तथा विभक्तयोऽपि दुरितं निरस्यन्तीत्यर्थः । "सूर्मी स्थूणाऽयःप्रतिमा" इत्यमरः ।

"गर्त्ते गर्त्तान्विते वाद्यविशेषे सुषिरं त्रिषु"

इति शाश्वतः । विषयप्रयोजनयोरुक्त्या च प्रतिपाद्यप्रतिपादकभावः संबन्धः । उक्तप्रयोजनकामश्चाधिकारीत्युक्तप्रायम् । इति प्रयोजननिरूपणम् ॥

ननु यथाऽऽचार्यप्रेरणयैव वेदाध्ययने प्रवृत्तिस्तद्वदत्रापि, तत्किं प्रयोजनेनेति । मैवम् । इदानींतनैः बाल्यदशायां प्रयोजनप्रश्नमकृत्वा वेदाध्ययनेऽपि तदुत्तरं तद्व्यतिरेकेणात्र प्रवृत्त्यनुपपत्तेः ।

"वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः ।

अनर्थकं व्याकरणम्" इत्याशङ्कावताराच्च । पूर्वकल्पेष्वङ्गान्येव प्रथममपठ्यन्त इति भाष्यम् । न च—

श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्द्धपञ्चमान् ॥
अत ऊर्ध्वन्तु च्छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदाङ्गानि रहस्यं च कृष्णपक्षेषु संपठेत् ॥

इत्यादिस्मृतिभिर्वेदतदङ्गाध्ययनयोः समकालत्वलाभ इति वाच्यम् । भाष्यकारोक्तेरपि बलवत्त्वाद्विकल्पसंभवात् । नियमत्वदर्शनाय वार्त्तिकम्—

सिद्धे शब्दार्थसंबन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु ।

लोकत इति पूर्वान्वयी । प्रथमव्युत्पत्तेर्लोकाधीनत्वात् । अर्थवदित्यादिव्याकरणस्य लोकसिद्धशक्तिग्रहमुपजीव्य प्रवृत्तेः । अत एव समर्थसूत्रेऽर्थानादेशनादिति वार्त्तिकम् ।

अर्थप्रतिपादनार्थं च शब्दप्रयोगोऽपि प्रसक्तः । शब्दश्च द्वेधा । साधुरपशब्दश्च । तत्र गवादय एव प्रयोक्तव्या न तु गाव्याद-य इति नियमनिर्वाहकं व्याकरणम् । तत्फलं तु धर्मः । तत्र प्रा-ङ्मुखोऽन्नानि भुञ्जीतेत्यादिः लौकिकः व्रीहिनवहन्तीत्यादिश्च वैदिको दृष्टान्तः । धर्मनियम इत्यश्वघासादिवत् षष्ठीसमासः । न च प्रयुक्तमात्राणां व्युत्पाद्यत्वे—ऊष, तेर, चक्र, पेच, इत्यादि-व्युत्पादनवैयर्थ्यं तेषामप्रयोगादिति वाच्यम् । अस्मदादिभि-स्तस्य दुर्गमत्वात् । यद्भाष्यम्—

सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः, एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सा-मवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाऽथर्वणो वेदः, वाको-वाक्यम्, इतिहासः, पुराणम्, वैद्यकम्, इत्येतावान् प्रयोगस्य विषय इति । अस्ति चैषां वेदे प्रयोगः—'

सप्तास्ये रेवतीरेवदूष, यन्मेनरः श्रुत्यं ब्रह्म चक्र, यत्रा-नश्चक्रा जरसं तनूनामिति ।

न च व्युत्पादितत्वमात्रेण प्रयुक्तत्वानुमाने वचन्ती-त्यादीनामपि साधुत्वापत्तिः । न हि वचिरन्तिपरः प्र-युज्यतइति अविगीतशिष्टव्यवहारेण तत्र व्युत्पत्त्यप्रवृत्तेः । त-था चाप्रयुक्तत्वप्रमित्यविषयत्वे सति व्युत्पाद्यत्वं हेतुः । तदाह-

यथालक्षणमप्रयुक्ते—

इति ।

स्यादेतत् । अप्राप्तांशपूरणफलको नियमविधिः । व्रीही-नवहन्तीत्यादौ वैतुष्यसाधनत्वेन नखविदलनादेरपि प्राप्तिपक्षेऽव-घातस्य प्राप्त्यभावात् । अवघातेनैव वैतुष्यं साध्यमिति बोधात् ।

इतरव्यावृत्तिफलकस्तु परिसङ्ख्याविधिः । "इमामगृ-

भणन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यत्र रशनाग्रहणे लिङ्गबलादेव मन्त्रप्राप्त्या गर्दभरशनाव्यावृत्तावेव तात्पर्यात्। यद्यपि लिङ्गात्पूर्वमेवेयं श्रुतिः प्रवृत्ता, तस्यानुपपत्तिप्रतिसंधानापेक्षतया चरमप्रवृत्तिकत्वात्, तथाऽप्युक्तव्यावृत्तिरेव फलम् । तदुक्तम्—

अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः ।
प्रयोजनं विधेः किं स्यादस्येति तु निरूपणे ॥
न गर्दभाभिधानीतः फलमन्यन्निवर्त्तनात् ।

एवं च लिङ्गेनोभयसाधारणरशनाग्रहणे मन्त्रविधिकल्पनया यावद्गर्दभरशनाया मन्त्रप्राप्तिः संभवति तावदेव प्रत्यक्षविधिनाऽश्वरशनायामेव मन्त्रविधानाल्लिङ्गस्य निराकाङ्क्षतयोभयसाधारणविध्यकल्पकत्वाद् गर्दभरशनायां मन्त्रस्य प्रापकप्रमाणाभावादप्राप्तिरेव व्यावृत्तिरित्युच्यते । यत्र तु प्रमाणान्तरप्राप्त एवार्थो व्यावर्त्यते, यथा पञ्च पञ्चनखा भक्ष्या इत्यत्र पञ्चातिरिक्तभक्षणस्यापि रागप्राप्ततया पञ्चातिरिक्तभक्षणव्यावृत्तौ तात्पर्ये सा प्राप्तपरिसंख्या । नन्वयं नियम एवास्त्विति चेत्,

अविज्ञानेश्वरः—

नियमपक्षे शशाद्यभक्षणे दोषप्रसङ्गः, श्वादिभक्षणे चादोषप्रसङ्ग इति प्रायश्चित्तस्मृतिविरोध इति परिसंख्यैवेति । आद्यायां च प्राप्तबाधरूपदोषाभावात्तदपेक्षया द्वितीयाऽभ्यर्हितेति सिद्धान्तः । तथा च पञ्च पञ्चनखा इत्यस्य नियमोदाहरणत्वं भाष्यकृतोऽनुपपन्नमिति । अत्राहुः—

परिसङ्ख्याऽप्यत्र नियमशब्देन व्यवह्रियते इति ।

न चैवमपभ्रंशेभ्यो बोधो न स्यादिति वाच्यम् । नियमफलस्यादृष्टस्याभावेऽपि दृष्टस्य कार्यस्योत्पत्तेः । नख-

विदलनादिना वैतुष्यवत्, दिगन्तराभिमुखभोजने तृप्तिवच्च ।

नन्वपभ्रंशानामर्थावबोधहेतुत्वस्याक्लृप्तत्वात् कारणाभावप्रयुक्त एवार्थबोधाभावः स्यात् । मैवम् । पर्यायवद्विनिगमनाविरहादपभ्रंशानामपि शक्तिसद्भावात् । अस्मात्पदादयमर्थो बोध्य इतीश्वरेच्छायाः शक्तित्वपक्षे भगवदिच्छायाः सन्मात्रविषयकत्वात् । पदार्थान्तरत्वपक्षेऽपि कल्पकस्य तुल्यत्वात् । असाधुस्मरणद्वारा साधोर्बोधकत्वप्रसङ्गाच्च । तिबादिस्मारितानां लादीनां बोधकत्वस्य वार्त्तिकैरभ्युपगमात् । नचाल्पत्वबहुत्वाभ्यां विनिगमः, अल्पीयांसो हि शब्दा भूयांसश्चापशब्दा इति महाभाष्योक्तेरिति वाच्यम् । घटबोधकत्वरूपायाः शक्तेस्तद्भ्रमाद्बोधं वदताऽप्यङ्गीकारात् । शक्तिभ्रमस्य भ्रमत्वकल्पनस्य पुनरुक्तित्वात् । नचैवं सर्वे सर्वार्थवाचका इति पर्यवसानाद् गौणमुख्यविभागोच्छेद इति वाच्यम् । त्वत्पक्षेऽपीश्वरेच्छाया गौणादावतिप्रसङ्गात् । प्रयोगप्राचुर्यतद्विरहाभ्यां विभागाच्च ।

अत्र नैयायिकाः । नेश्वरेच्छामात्रं शक्तिः, किं तूक्तविषयविशेषवैशिष्ट्येन । तथा च सन्मात्रविषयकत्वमकिंचित्करम् । प्रमाणानुरोधेनैव यथोक्तविशेषकल्पनात् ।

मिश्रास्तु उक्तेच्छया ईश्वरेण स्वातन्त्र्येणोच्चरितत्वमेव शक्तिः । न च चैत्रादावव्याप्तिः । द्वादशेऽह्नि पिता नामेत्यादितो नामत्वेन तेषामपीश्वरोच्चरितत्वात् । न च निषेधप्रतियोगित्वेनापभ्रंशानामप्यपभ्रंशत्वरूपेण तथात्वम् । तदिच्छयोच्चरितत्वाभावात् । नामपदार्थपर्यालोचनया नाम्नां तथा तात्पर्यकोच्चारणसत्त्वात् । न च गावीशब्दस्य बोधकतया स्वज्ञाप्यसम्बन्धसत्त्वाल्लक्षणया गवि साधुत्वापत्तिः । गभीरायां न-

द्यामित्याद्यनुरोधाच्छक्यसंबन्धस्य लक्षणात्वाभावादिति वाच्यम् । शक्यसंबन्धस्यैव तत्त्वात् । तस्य च ज्ञप्तिप्रयोजकसंबन्धाश्रयसंबन्धपर्यवसन्नस्य साक्षात्परम्परासाधारणशक्तिविषयसंबन्धपर्यवसन्नत्वाद् गाव्यादिपदेऽनुपपत्तेरित्याहुः । एतेन पदार्थान्तरत्वपक्षेऽपि वैषम्यं व्याख्यातम् । उक्तलाघवस्योभयत्र विनिगमकत्वात् । न च प्राकृतस्यापि संस्कृतवदनुगतत्वाच्छक्त्यापत्तिः ।

"तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः" इति दण्ड्युक्तेः ।

यत्तु काव्यप्रकाशादौ शब्दशक्तिमूलध्वन्यादौ प्राकृतगाथोदाहरणं तत् तद्बोध्यसंस्कृताभिप्रायम् । शक्तिभ्रमाद्बोधोक्तौ तत्र शक्तिस्वीकार इति त्वसंगतम् । व्याप्तिभ्रमविषये व्याप्तेरप्यापत्तेः । तथा च "न च शक्तिसाध्यं शक्त्यारोपाद्भवितुमर्हति, आरोपितदहनादपि दाहापत्तेः" इत्याशङ्क्य मणिकृतोक्तम्—

"ज्ञायमानकरणे प्रयोजकरूपवत्तया ज्ञायमानादेव फलं बाष्पे धूमारोपाद् वन्ह्यनुमितिवत्" इति ।

न च जनकज्ञानभ्रमत्वे शाब्दबुद्धेरयथार्थत्वम् । शक्तिज्ञानयथार्थत्वस्य शाब्दप्रमायामप्रयोजकत्वात् । अनाप्तोक्ते व्यभिचारात् । नापि जनकज्ञानभ्रमत्वे नायथार्थत्वम् । भ्रमानुव्यवसाये व्यभिचारात् । अपभ्रंशस्य शाब्दप्रमाजनकत्वं तु तत्प्रयोजकाद् योग्यतादेः यथार्थतद्बोधाद्वा । अबाधितसंसर्गज्ञानजनकपदार्थोपस्थापकत्वाद्वा । संसर्गबाधकप्रमाविरहाद्वेति । प्रयोगप्रत्यययोरविशेषेऽपि व्याकरणस्य साधुत्वनियमार्थत्ववत् कोशादीनां शक्तिनियामकत्वाच्च । उक्तं च वाक्यपदीये—

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्यैव शब्दस्यार्थप्रकाशकाः ॥

न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।
न यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ॥
अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ इति ।

न च संस्कृतज्ञानविरहिणां म्लेच्छादीनां कथं शक्त्यारोप इति वाच्यम् । प्रथमं केनचिद् गावीशब्दे प्रयुक्ते तत्र व्युत्पन्नो गोशब्दादर्थं प्रतीत्य व्यवहृतवान् अम्बाम्बेतिन्यायात्, पार्श्वस्थैश्च गावीशब्दादेव स्वार्थः प्रबोध्यतइति भ्रमेण गावीपदं गवि शक्तमिति अन्येषां व्युत्पादनादिति भ्रमपरम्परया निर्वाहात् । नन्वेवं संस्कृतत्वाभावे शक्त्यभावव्याप्यत्वज्ञानवतां तद्वाचकसंस्कृतविशेषज्ञानवतां च–

स्मारयन्तश्च ते साधूनर्थावगतिहेतवः ।

इति रीत्या तत्स्मरणाद्बोधोपपत्तौ अपि संस्कृतविशेषज्ञानविरहिणामपभ्रंशाच्छाब्दबोधो न स्यात्, विशेषदर्शनसत्त्वे भ्रमानवकाशाच्च इति चेत्,

अत्र कण्टकोद्धारकृतः,

अयमर्थः किञ्चित्पदवाच्य इति सामान्यज्ञानादेव आहार्यं शक्तिज्ञानं तत्रेत्यपि कल्पनीयम् । यद्वा तद्बोध्यार्थसंबद्धपदार्थान्तरवाचकस्य स्मृत्या ततो लक्षणया बोध इति ।

न च यत्र सर्वेऽप्यपभ्रंशास्तत्समार्थकसंस्कृतमात्रस्य चानुपस्थितिस्तत्रोक्तरीत्या शाब्दबोधानुपपत्तिः लाक्षणिकस्याननुभावकत्वादिति वाच्यम् । सविभक्तिकस्यैवोक्तपदस्य स्मरणात् । विभक्तेरेव तत्रानुभावकत्वात् ।

गङ्गायां द्विरेफ इत्यादिवत् ।

एवं सर्वेषां सर्वार्थवाचकत्वे अश्वशब्दोऽस्वशब्दश्च क्रमेण वाजिनि दरिद्रे च साधुः, व्युत्क्रमेण त्वसाधुः, परत्र परशब्दप्रयोगः तद्धर्मप्रतिपत्त्यर्थ इति सिद्धान्तविरोधः । गतिबुद्धिप्रत्यवसानार्थेत्याद्यर्थविशेषघटितानुशासनानुपपत्त्यतिप्रसक्त्यादिः । प्रयोगबाहुल्याल्पत्वयोरसर्वज्ञापरिच्छेद्यत्वात् । कोषादेश्च शक्तिमात्रबोधकत्वेन तदतात्पर्यकत्वात् । अत एव दुश्च्यवनादिपदानामल्पप्रयोगतेत्यालंकारिकाः । नियतविषया अपि शब्दा दृश्यन्ते शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते विकारएवैनमार्या भाषन्ते इत्यादिभाष्यनिरुक्तादिदर्शनान्नियतप्रयोगाणां तस्मिन्नर्थे गौणत्वं स्यात् ।

यत्तु सर्वत्र शक्तिस्वीकारे लक्षणानङ्गीकाराल्लाघवम् । अन्यथा कार्यकारणभावद्वयस्य शाब्दधीद्वये परस्परव्यभिचारवारणाय कार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशस्य चापत्तेरिति । तत्तुच्छम् । शक्तिज्ञानीयकार्यकारणभावेषु तत्रापि तत्साम्यात् । न च तादृशस्थले शक्तिभ्रमाद् यत्र बोधस्तत्र शक्तिज्ञानत्वेन कारणतायास्त्वयाऽपि कल्पनान्नैतदाधिक्यमिति वाच्यम् । तथाऽपि लाक्षणिकपदानामननुभावकत्वपक्षे तीरत्वप्रकारकतीरविशेष्यकशाब्दत्वं तीरपदशक्तिज्ञानस्य कार्यतावच्छेदकम् । गङ्गापदलक्षणाज्ञानस्य तु तादृशस्मृतित्वमिति कार्यतावच्छेदकभेदेन व्यभिचारानवकाशात् । नव्यमतेऽपि लक्ष्यतावच्छेदके लक्षणानभ्युपगमात् ।

किं च शतं शब्दानर्थांश्चोदाहृत्य विचार्यते । एकैकस्य शतशतार्थवाचकत्वेऽयुतशक्तिकल्पनं तावत्कार्यकारणभावकल्पनं तावदव्यवहितोत्तरत्वनिवेशनं च स्यात् ।

मम तु शतमेव शक्तयः कल्प्यन्ते । न हि ममापि तावतीनां लक्षणानां स्वीकार आवश्यकः । तावच्छब्देभ्यो लक्षणया तावदर्थबोधः कस्य चिज्जात एवेत्यत्र मानाभावात् । एतेन शक्तिभ्रमोऽपि व्याख्यातः । त्वया त्वजनितान्यार्थबोधस्य तच्छक्तत्वकल्पने मानाभावात् तावद्भ्यस्तावदर्थबोधो जात एवेति कल्प्यम् । एवं तज्जन्यव्यवहारादयोऽपीति महागौरवमित्यास्तां विस्तरः ।

केचित्तु शक्तिलक्षणाज्ञानयोरेक एव कार्यकारणभावः । शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदानिष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताशालिज्ञानत्वं कारणतावच्छेदकं, शाब्दबोधत्वं च कार्यतावच्छेदकं, घटो घटपदवानित्यत्रार्थो विशेष्यः, पदं प्रकारः, शक्तिः संसर्गः। नचैवं शक्यसम्बन्धस्य लक्षणास्थले संसर्गत्वात्तदसंग्रहः । तस्यापि शक्तिघटितत्वात् । शक्तित्वनिष्ठावच्छेदकतायां पर्याप्तेरनिवेशात् । नचैवं तीरं गङ्गापदवादिति शक्तिरूपसम्बन्धावच्छिन्नप्रतियोगिताकपदाभावप्रकारकनिर्णयसत्त्वे लक्षणाज्ञानादपि लक्ष्यार्थबोधो न स्याद्, बाधकसत्त्वादिति वाच्यम् । पदनिष्ठप्रकारतानिरूपितशक्तिनिष्ठसांसर्गिकविषयतायामर्थनिष्ठविशेष्यतानिरूपितत्वानभ्युपगमात्तद्धर्मावच्छिन्नविशेष्यतानिरूपिता यस्य सांसर्गिकविषयता तद्धर्मावच्छिन्नविशेष्यताकतत्संसर्गावच्छिन्नप्रतियोगिताकाभावप्रकारकज्ञानस्यैव प्रतिबन्धकत्वादिति । तदसत् । उक्तबाधदशायां शक्यार्थबोधस्यापि प्रसङ्गात् । शक्यसम्बन्धप्रतियोगितावच्छेदककोक्तज्ञानदशायामपि लक्ष्यार्थबोधप्रसङ्गाच्च । उक्तरीत्या बाधकाभावात् । शक्तिनिष्ठसांसर्गिकविषयतायाः पदनिष्ठविशेष्यता-

निरूपितत्वानभ्युपगमे पदनिष्ठविशेष्यतायाः शक्तिनिष्ठसांसर्गिकविषयतानिरूपितत्वस्यापि दुर्वचत्वाच्च । यन्निष्ठा या विषयता यन्निष्ठयद्विषयतानिरूपिता तन्निष्ठा तद्विषयता तन्निष्ठतद्विषयतानिरूपितेति क्लृप्तत्वात् । अन्यथा शक्तिनिष्ठसांसर्गिकविषयतायां पदनिष्ठप्रकारतानिरूपितत्वस्य पदनिष्ठप्रकारतायां वा शक्तिनिष्ठसांसर्गिकविषयतानिरूपितत्वस्याभावमभ्युपगम्योक्तबाधदशायां लक्ष्यार्थबोध इत्यस्य दुर्वारत्वात् । तन्निष्ठविषयतानिरूपकस्य कथं तन्निष्ठविषयतानिरूपितत्वं नास्तीति युक्तेस्त्वदुक्तेऽपि जागरूकत्वात् । एवं पदनिष्ठप्रकारतायामर्थविशेष्यतानिरूपितत्वाभावः स्वीक्रियतामुत शक्तिनिष्ठसांसर्गिकविषयतायामित्यप्यापादनीयम् । यद्धर्मावच्छिन्नविशेष्यतानिरूपिता या प्रकारता तद्धर्मावच्छिन्नविशेष्यताकतद्धर्मावच्छिन्नप्रतियोगिताकाभावज्ञानमेव प्रतिबन्धकमित्यस्यापि सुवचत्वात् ।

अत्रेदं बोध्यम् । भाष्यमते क्रतावेवापशब्दप्रयोगनिषेधः । न म्लेच्छितवाइत्यस्य तत्प्रकरणस्थत्वात् । श्रुत्यन्तरमपि यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परावरज्ञा इत्यादि । योगजधर्मेण धर्मसाक्षात्कारवन्तः ।

अयमर्थः । विषयोदासीनतया यद्वानस्तद्वान इति वक्तव्ये यर्वाणस्तर्वाण इति प्रयोगात्तन्नामकतेति । एवं च क्रतोर्बहिरपशब्दप्रयोगस्तैः कृतः इति तस्याविगीतत्वोन्नयनमिति । भट्टैरप्युक्तम्—

स्त्र्युपायमांसभक्तादिपुरुषार्थमपि श्रितः ।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ॥

वार्तिकमते तु उभयत्र निषेधः । नानृतं वदेदित्यनारभ्याधीतपुरुषार्थनिषेधेन सर्वसिद्धेनार्थानृतवच्छब्दानृतस्यापि निषेधोपपत्तेः । एवं च क्रतावपभाषणे तद्वैगुण्यं प्रत्यवायश्च ।

तद्बहिस्तु प्रत्यवायमात्रमिति विशेषः।

अत्र मीमांसाकौस्तुभकृतः। अनृतपदस्योभयपरत्वे वदेदित्यस्योच्चारणप्रतिपादनोभयपरत्वे वैरूप्यम्। एवं सकृच्छ्रुतानृतपदस्यापि। न च शब्दानृतस्यैव तर्हि निषेधोऽयं विनिगमकाभावादिति वाच्यम्। "प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्" इत्यादिश्रौतप्रयोगवशादर्थानृतएवानृतपदशक्त्यवधारणात्। भाष्यस्मृतेरनवकाशतया तदनुरोधेनात्रत्यानृतपदस्यार्थासत्यत्वपरत्वस्य कल्पयितुमुचितत्वाच्च। अत एव नानृतं वदेदिति श्रुतेरेव विवाहार्थानृतवदनाभ्यनुज्ञापकस्मृत्या सङ्कोचः। न च न म्लेच्छितवाइति म्लेच्छभाषाया एव निषेधः। हेलय इत्युपक्रमविरोधात्। म्लेच्छो हवा एष यदपशब्द इत्युपसंहारविरोधाच्च।

ननु "वाग्योगविद् दुष्यति चापशब्दैः" इत्यत्र वाचा चैव हि मनसा च यज्ञः प्रवर्ततइतिदर्शनेन वाग्योगविच्छब्दस्य यजमानपरत्वात् साधुभाषणनियमस्य याज्ञे कर्मणि नियमोऽन्यत्रानियम इति महाभाष्योक्त्या यज्ञमात्रपरत्वात् तद्बलादेव ज्योतिष्टोमेऽपि निषेधसिद्धौ तत्र पृथङ्निषेधवैयर्थ्यम् इति चेन्न। अवघातासम्भवे दलनवत्प्रतिनिधित्वेन प्रसक्तानामसाधूनां प्रयोगनिषेधार्थत्वात्। अयज्ञिया वै माषा इत्यादिवत्। एवं ज्योतिष्टोमे साधुप्रयोगासम्भवे प्रातिनिधित्वेनाप्यसाधवो न वाच्याः। किं त्वक्षिसंकेतादिभिरेव व्यवहर्तव्यम्। यज्ञान्तरे त्वपभ्रंशा अपि प्रतिनिधेया इति फलितम्। अत एवाहिताग्निरपशब्दं प्रयुज्येत्यत्राहिताग्निपदं संगच्छते। अन्यथा निषेधस्य ज्योतिष्टोममात्रपरत्वे नैमित्तिकप्रायश्चित्तस्यापि तन्मात्रविषयकत्वस्य स्वत एव सिद्धेः। न चेयमिष्टिरनारभ्याधीतत्वने

हिरण्यनाशेष्ट्यादिवत् पुरुषार्थैव स्यादिति वाच्यम् । प्रायश्चित्तीया मा भूमेत्यादिभाष्यदर्शनेन दोषनिर्घातार्थत्वाद्दोषस्य च भाष्यानुसारेण यज्ञेऽपशब्दभाषणादेव प्रसक्तेर्दोषनिर्घातद्वारा क्रत्वङ्गत्वप्रतीतेः । न चैवमप्याहिताग्निग्रहणवैयर्थ्यम्, यज्ञमात्रएव तदधिकारादिति वाच्यम् । याज्ञे कर्मणीति भाष्यस्मृतावसाधुभाषणनिषेधस्य स्मार्त्तयज्ञादिभ्यो व्यावृत्त्यर्थत्वात् ।

वस्तुतः प्रायश्चित्तेऽपशब्दभाषणस्य निमित्ततया तद्विशेषणमाहिताग्निपदमविवक्षितमेवेत्यनुवाद एव । न च नैमित्तिकोक्तेष्टिकर्तृत्वेन तद्विवक्षा । इष्टेरपि स्वत एवाहिताग्निसाध्यत्वात् । अतो न तद्वैयर्थ्यभयेन स्वतन्त्रपुरुषार्थनिषेधकल्पनं युक्तम् । न च वाग्योगविदिति कात्यायनवचनात्पुरुषार्थोऽपि निषेध इति वाच्यम् । यथोत्तरं मुनीनां प्रामाण्यमिति न्यायेन पतञ्जलिप्रोक्तस्यैव ग्राह्यत्वादित्याहुः ।

अथ किमिदं साधुत्वम् । न तावद् बोधकत्वम् । अपशब्दसाधारण्यात् । न च शक्तिमत्त्वम् । शबादिविकरणानामसाधुत्वापत्तेः । तेषां कर्त्रादिवाचकतायास्तृतीये परास्तत्वात् । अपशब्दे व्यभिचाराच्च । साधुत्वस्यैव शक्त्यवच्छेदकत्वेनान्योन्याश्रयत्वाच्च । गौणलाक्षणिकयोरव्याप्तेश्च । तयोरपि क्वचिच्छक्तिरस्त्येवेति चेद्गावीशब्दस्य गं गणपतिमवितुं प्रीणायितुं शीलमस्येति मिश्रोक्तरीत्या गुङ् शब्दइत्यतो णिनि वा क्वचिदर्थे शक्तिसत्त्वाद् गव्यपि तदापत्तेः । एतेन वृत्तिमत्त्वं तदित्यपि परास्तम् । एतेन यस्य शब्दस्य यत्रार्थेऽनादिप्रयोगः स तत्र साधुरित्यपि निरस्तम् । हेलय इति वेदप्रयुक्ते अलिशब्देऽतिव्याप्तेश्च । तस्यापशब्दत्वात् । न च वेदस्य तदंशेऽनुवादरूपत्वान्न तत्रानादिप्रयोगः । संज्ञा-

शब्देदष्वव्याप्तेः । न च नामधेयत्वेन तदपि वेदस्थमेवेति वाच्यम् । नापभाषितवै इत्यादावपभ्रंशत्वेनापशब्दानामपि तथात्वात् । न च निषेधाप्रतियोगित्वेन तदिति वाच्यम् । म्लेच्छो ह वा एष यदपशब्द इत्यादौ तस्यापि सत्त्वात् । एतेन वेदस्थशब्दत्वं तदित्यपि निरस्तम् । "भाषायां सदवसश्रुवः" "प्रथमायाश्च द्विवचने भाषायाम्" इति भाषापुरस्कारेण व्युत्पादितानां निषेदिवान् युवामित्यादीनां साधुत्वानापत्तेश्च । भाषापदोपादानसामर्थ्येन तेषां वेदे प्रयोगो नास्तीति निर्णयात् । नापि यज्ञप्रयोगार्हत्वम् । साधूनामेव तथात्वात् । तदवच्छेदकरूपान्तरापरिचयात् । एतेनाभ्युदयजनकत्वमपि परास्तम् । नाप्यनपभ्रष्टत्वम् । तद्ध्यपभ्रंशाभिन्नत्वमेव । तच्च न सादित्वम् । संज्ञाशब्दातिव्याप्तेः । नापि साधुभिन्नत्वम् । अन्योन्याश्रयात् । साधुत्वस्य तद्भेदघटितत्वात् । नापि प्रत्यवाययोग्यत्वम् । तदवच्छेदकरूपानिरुक्तेः । नानृतं वदेदित्यादिना विसंवादिसंस्कृतस्यापि प्रत्यवायजनकत्वात् । न च जातिविशेष एव साधुत्वम् । कत्वादिना सङ्करात् । साधुगकारे असाधुककारे च परस्परात्यन्ताभावसमानाधिकरणयोः साधुत्वकत्वयोः साधुककारे समावेशात् । कशब्दादाचारक्विबन्तात्कर्तरि क्विपि पर्याप्त्या सामानाधिकरण्यसम्भवात् ।

अत्राहुः ।

अनपभ्रष्टता ऽनादिः यद्वाऽभ्युदययोग्यता ।
प्रक्रियाव्यञ्जनीया वा जातिः काऽपीह साधुता ॥

इत्यभियुक्तोक्त्या जातिविशेष एव साधुत्वम् । न च सङ्करस्तद्बाधकः । गुणगतजातौ तस्यादोषत्वात् । तथा हि । सन्ति तावच्छब्देषु तत्तज्जन्यतावच्छेदिका जातयः । यतः स्त्रीपुंसाद्युच्चरितमनु-

मीयते । सन्ति च देवदत्तादिजन्यतावच्छेदिका अपि जातयः । यतोऽयं देवदत्तीय इत्याद्यनुमीयते इति निर्विवादम् । तत्र देवदत्तीयत्वाभिव्यञ्जिका जातिः तदीयककारादिवृत्तिरेका स्वीकर्तव्या । यत्र देवदत्तीया अनोष्ठ्या एव वर्णाः पूर्वं श्रुताः, तत्र चाक्षुषाद्यविषयदेवदत्तोच्चारितौष्ठ्यश्रवणे देवदत्तीयत्वानुमानस्यानुभविकत्वात् । कत्वादिव्याप्यतादृशनानाजातिस्वीकारे ओष्ठ्यवर्णवृत्तिजातेः पूर्वमग्रहादनुमानानुपपत्तेः । तथा च देवदत्तोच्चरितगकारे चैत्रीयककारे च परस्परात्यन्ताभावसमानाधिकरणयोर्देवदत्तीयत्वाभिव्यञ्जकजातिकत्वजात्योर्देवदत्तोच्चारितककारे समावेशात् संकर आवश्यक इति । तच्चिन्त्यम् । द्रव्यगतजातितो वैषम्याभावात् । "गुणगतजातौ सांकर्यं न दोष इति मतं निर्बीजमेव" इत्युपायकृता "बीजसाम्येन गुणेऽपि तस्य दोषत्वम्" इति मणिकृता चाभिहितत्वात् । न चोक्तानुपपत्तिः । तत्र स्मर्यमाणायाः ककारादिवृत्तिजातेरारोपेणैवानुमानोपपत्तेः । विषयसत्त्वेनानुमितेर्भ्रमत्वानापत्तेः ।

अत एवोक्तं शब्दमणौ । शुकककारादिषु कत्वादिव्याप्यजातिर्भिन्ना । तया प्रत्येकं शुकककारादिषु शुकादिप्रभवत्वमनुमाय तद्व्यवहारः । न तु शुकककारादिष्वेका जातिरस्ति शुकप्रभवत्वानुमापिका तद्व्यवहारिका वा । गत्वादिना संकरप्रसङ्गादिति ।

मिश्रास्तु साधुत्वजातेर्वर्णवृत्तित्वे वर्णेषु साधुत्वप्रत्ययापत्तिः । वाक्ये तथात्वप्रत्ययानुपपत्तिः । देवदत्तीयत्वाद्यनुमापकजातिसंकरापत्तिश्चेत्याहुः ।

किं च घटादिपदेषु जात्यनुपपत्तिः । पदस्य वर्णसमु-

दायात्मकस्य अव्यवहितोत्तरत्वसंबन्धेन घविशिष्टकारादिरूपतया साधुत्वपर्याप्त्यधिकरणस्य युगपदनवस्थानात् ।

"अनारब्धे तु गोशब्दे गोशब्दत्वं कथं भवेत्" इतिन्यायेन पदत्ववत् साधुत्वस्यापि जातित्वासंभवात् । जातेर्व्यासज्यवृत्तित्वानुपपत्तिश्चेति । अत्रोच्यते—

अयं वृद्धानामाशयः । नित्यत्वे सत्यनेकसमवेतत्वं जातिस्वरूपम् । तच्च व्यासज्यवृत्तित्वेऽप्यविरुद्धम् । समवायावच्छिन्नवृत्तेरेकमात्राश्रयनिरूप्यत्वनियमाभावात् । घटादावेव व्यभिचारात् । संयोगादीनां च जन्यत्वादेव जातित्वाभावो न तु व्यासज्यवृत्तित्वात् । दर्शनमात्रस्य चाप्रयोजकत्वात् । पदवृत्तित्वाभ्युपगमादेव संकरोऽप्यनवकाशः । एकजातिपर्याप्त्यधिकरणे यथोक्तान्यजातिपर्याप्तावेव तदुल्लासात् । न च "अकारो वासुदेवः स्यात्" इत्याद्यनुशासनात् तत्सम्बुद्धौ अ इत्यादौ सङ्करो दुर्वारः । तथाऽपि वाक्यनिष्ठसाधुत्वाभ्युपगमे दोषाभावात् ।

नचैवं व्याकरणस्य साध्वनुशासनत्वभङ्गापत्तिः । पदद्वारा वाक्यस्यैव संस्कारात् । वाक्यादपोद्धृत्य पदानि संस्क्रियन्ते इति पक्षस्यापि "न पदान्त"इति सूत्रे आकरारूढत्वात् । पदमात्रस्य कयाचिद् व्युत्पत्त्या साधुत्वाद्वा । वाक्यविशेषान्तर्भावेणैव साधुत्वासाधुत्वयोर्व्यवस्थितत्वात् । न च पर्याप्त्यधिकरणसमुदायघटकवर्णानामेककालानवस्थानात् कथं तत्र साधुत्वम् । पदवाक्यप्रत्यक्षस्य सर्वसंमततया तत्र यादृशी विषयता यस्य वर्णस्य तद्विषयत्वापन्नवर्णसमुदाये तद्वृत्तिसंभवात् । प्रत्यक्षविषयवर्णमात्रवृत्तित्वानभ्युपगमात् । व्यवहारेण तथैव सिद्धत्वाच्च । विरुद्धधर्मसमसंख्याका नित्या एव अका-

रादयो वर्णा इतिपक्षस्य पाणिन्याद्यभिमतत्वेन अइउण्सूत्रे वक्ष्यमाणत्वात् ।

मणिकृतस्तु व्याकरणव्युत्पाद्यत्वं साधुत्वम् । व्याकरणपरिगृहीतत्वतदभावाभ्यामेव प्रामाणिकानां साध्वसाधुव्यवहारात् । अत एव यः शब्दो व्याकरणेन यस्मिन्नर्थे व्युत्पादितः तत्र साधुरसाधुरन्यत्र । नाम्नामपि "उणादयो बहुलम्" इति व्युत्पादितत्वात् । केवलप्रकृतिप्रत्यययोर्बाधयति ग्रामगादेश्च न तद्व्युत्पाद्यत्वम् । अनभिधानेन तेषां प्रयोगानर्हत्वात् । गौणलाक्षणिकयोश्च यथा प्रतिपादकत्वं तद्व्युत्पादनमपि तत्र तथेति तयोरपि साधुत्वम् ।

न च साधुशब्दव्युत्पादकत्वमेव व्याकरणत्वमित्यात्माश्रयः। शब्दगुणदोषविद्भिरभियुक्तैः प्रकृतिप्रत्ययादिपारिकल्पनया शब्दान्वाख्यायकवाक्यस्य व्याकरणत्वात् । न च गुणदोषयोरपि साधुत्वात्मकत्वाद् दोषतादवस्थ्यम् । धर्मजनकत्वाधर्मजनकत्वयोरेव तत्त्वात् । न च साधुत्वे सिद्धे व्याकरणव्युत्पाद्यत्वं तद्व्युत्पाद्यत्वे च साधुत्वमित्यन्योन्याश्रयः । पूर्वपूर्वव्याकरणतः साधुत्वमवगम्योत्तरोत्तरव्याकरणेन तद्व्युत्पादनात् । साधुत्वस्य जातित्वे निष्प्रतियोगिकत्वापत्तौ सर्वत्र सर्वसाधुत्वापत्तिः । न च गोशब्दः अश्वे प्रयुक्तः साधुरेव, ज्ञापकश्च न भवति, तच्छक्तत्वेनाज्ञानादिति वाच्यम् । गावीशब्दस्यापि कयाचिद् व्युत्पत्त्या क्वचित् साधुत्वमिति तज्जातियोगेन गव्यपि साधुत्वापत्तेः । प्रतिशब्दं भिन्नतद्विषयजातिस्वीकारे चाननुगमात् । न च जातेः प्रतियोगिनिरूपणनिरूप्यत्वाभावनियमे तारत्वादिजातिरपि मन्दादिनिरूपणनिरूप्या न स्यादिति वाच्यम् । तत्रापि जातिर्नेतरनिरूप-

णनिरूप्या, किन्तु तदुत्कर्षत्वमेवेत्यभ्युपगमादित्याहुः ।

मीमांसकास्तु वृत्तिप्रमयाऽर्थप्रतिपादकत्वं साधुत्वम् । वृत्तित्वं च शक्तिलक्षणागौण्यन्यतमत्वरूपम् । गाव्यादिषु च प्रयोगादेरन्यथैवोपपत्तेर्वृत्तित्रयाभावान्नातिव्याप्तिः । संज्ञानां तु द्वादशेऽहनीत्यादिसामान्यविधिना पुत्रत्वाद्युपाधिना संकेतकरणेन शक्तेः प्रमितत्वान्नाव्याप्तिः ।

पुत्रादिनामकरणे गृह्येषु नियमश्रुतेः ।
अनादिशक्तिता संज्ञास्वपि नैव विरुध्यते ॥

इति वाक्यपदीयात् । टिघुभादीनां चालक्ष्यत्वादेव । "नैव ताः साधवो मताः" इतिन्यायात् ।

वस्तुतो वृत्तिग्रहाभावे तेषामर्थबोधकत्वानुपपत्तेः स्वयं संपादितसंकेतत्वेन गाव्यादिवच्छब्दान्तरोपस्थापकतयाऽपि तदयोगान्मुख्यार्थाभावे तन्मूलकलक्षणागौण्योरप्यनुपपत्तेः सांप्रातिकशक्तिस्वीकारेणैव टिघुभादिशब्दानामर्थबोधकत्वं वाच्यम् । अत एव पूर्वोक्तसाधुत्वेऽपि न क्षतिः । अत एव पाणिन्यादेः "टेः" इत्यादौ षष्ठ्यादिप्रयोगोऽप्युपपद्यतइत्याहुः ।

केचित्तु "टेः"इत्यादीनां टिशब्दानुकरणत्वमेव। अनुकरणोत्तरमितिशब्दप्रयोगनियमे मानाभावात् । "अनुकरणं चानितिपरम्" इतिसूत्रविरोधात् । नचैवं टीतिशब्दस्यैव लोपादिकार्यं स्यान्न त्वन्त्यस्वरादिवर्णस्येति वाच्यम् । लक्षणया तत्परत्वाङ्गीकारादित्याहुः ।

असाधुत्वं तु तद्भिन्नत्वमेव, न तु जातिविशेषः । प्रमाणाभावात् । तदनुभवस्य साधुत्वाभावविषयत्वस्यानुभविकत्वाच्च । योग्यानुपलब्धिबाधितत्वाच्च । साधुत्वं तु व्याकरणसंस्कारसहकृतश्रोत्रेन्द्रियग्राह्यम् । तदुक्तम् । प्रक्रियाव्यञ्जनीयेति। तदुक्तम्—

तत्र तत्त्वमभियोगात् स्यादिति । तथा—

अभियुक्ताश्च ये तत्र यन्निबद्धप्रयोजनाः ।
तत्रत्यगुणदोषाणां ज्ञाने चाधिकृता मताः ॥

साध्वनुशासनाभ्यासस्यासाधुविषयकसंस्कारजनकत्वोक्तौ चातिप्रसङ्गादिति । संज्ञाशब्दे त्वयं विशेषः—

यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः ।
कथं नु तासां साधुत्वं नैव ताः साधवो मताः ॥
अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता ।
हस्तचेष्टा यथा लोके तथा सङ्केतिता इमाः ॥
तासां प्रयोगेऽभ्युदयः प्रत्यवायोऽपि वा भवेत् ।
लाघवेनार्थबोधार्थं प्रयुज्यन्ते तु केवलम् ॥
इति उभयबहिर्भावः ।
व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित् ।
नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत् ॥
वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः ।
अकृत्रिमोऽभिसम्बन्धो विशेषणविशेष्यवत् ॥

इतिरीत्या तेषामप्यनादिता इतिपक्षे तु साधुत्वमेव। नामकरणे तु "कृतं कुर्यान्न तद्धितम्" इति गृह्यसूत्रानुगतानामेव साधुत्वम् । द्वादशेऽहनि पिता नाम कुर्यादिति श्रुतेर्विशेषविषयकस्मृत्या बाधात् । देशभाषानुसारिणीनां तु संज्ञानां न तत् । तथा च शब्दकण्टकोद्धारे—

अनादिता चेत् साधुत्वं संज्ञाशब्देषु का गतिः ।
उच्यते नामकरणे गृह्येषु नियमश्रुतेः ॥
यथाकामं न संज्ञानां विनियोगः समस्ति नः ।
तस्मादनादिता संज्ञास्वपि नैव विधीयते ॥

यास्तु तद्देशभाषाभिः संज्ञास्तासां न साधुता ।

अत एव न्याय्यभावात् कल्पनं संज्ञादिष्विति तृतीयवार्त्तिके अनादिशब्दानां साधुत्वमित्युक्तम् । तृतीयत्वाभिधानं तु विपरीतगणनयेत्यवधेयम् । वार्त्तिकं तु ऋलृक्सूत्रे स्पष्टम् । तस्मात् प्रकृतिप्रत्ययविभागकल्पनया साधुशब्दा अत्र व्युत्पाद्यन्तइति सिद्धम् ॥ इति साधुत्वविचारः ॥

अथैवं वर्णोपदेशवैयर्थ्यम् । अइउण् इत्यादिना कस्यचित् साधुत्वानवगमात् । न च दोषरहितवर्णस्वरूपप्रतीतिः तदर्थः । लोकत एव तत्सिद्धेः । अन्यथोदात्तादिपाठस्याप्यापत्तेः । तदुक्तम्—

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेश इति ।

कर्त्तव्यः स्यादिति शेषः । त्रैस्वर्येण सूत्रपाठे एकस्योच्चारणादेव सिद्धौ द्वयोरेव कर्त्तव्यताया आपाद्यत्वेऽपि एकश्रुत्या पाठाभिप्रायेणोदात्तादित्रयपाठ आपादितः । न च निर्देशस्य जातिपरत्वाद् उदात्तादिसंग्रहः । संवृतकलादीनामपि तत्तज्जात्यवच्छिन्नतया संग्रहापत्तेः । तदुक्तम्—

आकृत्युपदेशात्सिद्धम् इतिचेत् संवृतादीनां प्रतिषेध इति ।

विधेयः स्यादिति शेषः । ह्रस्वाकारस्य संवृतत्वेऽपि तदन्येषामचां संवृतत्वं दोषः । आदिपदसंग्राह्यानाह भाष्यम्—

संवृतः, कलः, ध्मातः, एणीकृतः, अर्द्धकः, ग्रस्तः, निरस्तः, प्रगीतः, उपगीतः, क्ष्विण्णः, रोमशः, अवलम्बितः, निर्हतः, संदष्टः, विकीर्णः, इति ।

अपर आह—

ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम् ।
संदष्टमेणीकृतमर्द्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः ॥

व्याख्यातं च कैयटेन । कलः स्थानान्तरनिष्पन्नः काकलीत्वेन प्रसिद्धः । ध्मातः श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यते । एणीकृतोऽविशिष्टः किमयमोकार उत औकार इति यत्र संदेहः । अम्बूकृतो यो व्यक्तोऽप्यन्तर्मुख इव श्रूयते । अर्द्धको दीर्घोऽपि ह्रस्व इव । ग्रस्तो जिह्वामूले निगृहीतः, अव्यक्त इत्यपरे । निरस्तो निष्ठुरः । प्रगीतः सामवदुच्चारितः । उपगीतः समीपवर्णान्तरगीत्याऽनुरक्तः । क्ष्विण्णः कम्पमान इव । रोमशो गम्भीरः । अवलम्बितो वर्णान्तरसंभिन्नः । निर्हतो रूक्षः । संदष्टो वर्द्धित इव । विकीर्णो वर्णान्तरे प्रसृतः, एकोऽप्यनेकनिर्भासीत्यपरे । स्वरदोषभावनाः स्वरदोषगोत्राणि । अनन्ता हि दोषाः शक्तिप्रमादकृता इति ।

न च दोषविशिष्टानामपि निर्देशे तादृशानामेव प्रयोगापत्तिः । शास्त्रान्ते सर्वासामेव वर्णव्यक्तीनां शुद्धानां पाठ्यत्वात् । सिद्धान्ते अकारस्य प्रक्रियायां विवृतत्वप्रतिज्ञायामपि "अअ" इतिसूत्रेण संवृतत्ववत् । शास्त्रान्तपाठेन च सर्वत्रासिद्धत्वलाभः । एवं चानुबन्धानामित्संज्ञालोपयोश्च त्यागाल्लाघवम् । तथा हि । शी धातौ ईकारः एव कलः पाठ्यः । कलादात्मनेपदम् । ध्मातात्कर्त्रभिप्राये । आद्यन्तौ कलध्मातौ इत्यादिकं तत्र तत्र पठनीयम् । इडानुगादयः कलध्माताश्च क्रमेण पाठ्याः । डुकृञ् इत्यत्र कृ इति द्विदोषं पाठ्यम् । अनुबन्धास्तु सर्वत्र हेयाः । आदिरन्त्येन सहेता इत्यत्र आदिकलौ सहेति वाच्यम् । कलेनेतिपाठे तु सिद्धान्ते चरमस्य णकारादेरिवात्राप्यन्त्यवर्णस्य संज्ञा न स्यात् । हलोप इत्यादौ अण इत्यस्य स्थाने अओरिति । असंदेहार्थोऽसन्धिः । सिद्ध्यत्येवम्, अपाणिनीयं तु

भवति । अत्र सिद्धान्तवार्त्तिकम्—

आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः ।
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः ॥

जातिपरानिर्देशेऽपि शास्त्रे आगमादीनां विशिष्य पाठेन दोषनिवृत्तिरित्यर्थः। न चापठितेषु प्रातिपादिकेषु दोषः । त्वयाऽपि प्रतिपदपाठस्यावश्याश्रयणीयत्वात् । अन्यथा शशो, मञ्चकः, पलाशः, इत्यादौ षषो, मञ्चकः, पलाषः, इत्यादेः प्रसङ्गात् । ननु स्वरादिनिर्णयाय प्रतिपदपाठे दोषनिवृत्तिरपि ततोऽस्तु, उणादित्वात् पृषोदरादित्वाद्वा साधुत्वाभ्यनुज्ञानम्—विशेषाववधारणं तु कोषादिना इत्युक्तौ तु दोषनिवृत्तिरपि शिक्षादेरस्तु इति चेत् । सत्यम् । दोषनिवृत्तेरानुषङ्गिकत्वात् । प्रत्याहारनिष्पत्तेरेव प्रयोजनत्वात् ।

ते च अणादयः । प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अत्रेतिव्युत्पत्तेः । न च ग्रहणकवाक्यादकारादिभिरप्यनेकेषामुपस्थापनादतिप्रसङ्गः । रूढेरेव नियामकत्वात् । भाष्यवार्त्तिकव्यवहारस्य च तत्र मानत्वात् । न च रूढ्यवच्छेदकाभावः । पङ्कजपदे पद्मत्वस्येवात्रापि आदिरन्त्येनेत्येतत्सूत्र-विहितसंज्ञात्वस्य तथात्वात् । तेन सुप्तिङादिसाधारण्यम् ।

यदि तु तत्पदजन्यबोधप्रकारस्यैव रूढ्यवच्छेदकत्वमिति नियमः, शक्त्युपाधेः शाब्दविषयत्वनियमादिति ग्रन्थदर्शनात् । तदाऽस्तु प्रयोगोपाधिरेवोक्तधर्मः । तत्प्रयोगजन्ययोगार्थज्ञानविरोधिविरहप्रतियोगित्वस्य तथात्वात् । यद्वा—उक्तसंज्ञात्वमेव प्रत्याहारत्वम् । आदिरन्त्येनेतिसूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियन्तइति दर्शनादिति सर्वं शिवम् ॥

इति श्रीकूर्माचलचक्रवर्त्तिगुरुणा विश्वेश्वरेण विरचिते

सिद्धान्तसुधानिधौ प्रथमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ॥

अइउण् ।

आदिरन्त्येनेतिवक्ष्यमाणसूत्रसङ्केतवशादणादिसंज्ञासंग्राह्य-वर्णानुपूर्वीपराणि चतुर्दश सूत्राणि । स्पष्टप्रतिपत्त्यर्थं गुणादी-नामभावः ।

यत्तु अ इत्यत्र विभक्तेरुत्वयत्वयलोपेषु लोपस्यासिद्ध-त्वात् इकारे इकोऽसवर्णइति ऋकारे ऋत्यक इति प्रकृतिभावा-च्च समाधानाद् एदैतोरयायौ दुर्वाराविति । तन्न । प्रकृतिभावे पदान्ताधिकारात् । छान्दसत्वाद्विभक्तिलोपकल्पनमपेक्ष्यासन्धि-कल्पनस्यैव युक्तत्वात् ।

कैयटस्तु वर्णोपदेशकालेऽजादिसंज्ञानामनिष्पादान्न सन्धि-रिति । तस्यायमाशयः । अनिष्पादात् स्वनिमित्तकविधेरत्र प्रवृत्त्यौपयिकरूपवैकल्यात्, वर्णोपदेशव्यावृत्तं यदुद्देश्यता-वच्छेदकं तदवच्छिन्नत्वादिति यावत् । साधुशब्दानामेव व्यु-त्पाद्यत्वात् । एषां च लौकिकवैदिकशब्दानन्तर्भावात् । संज्ञाशब्द-त्वे "अइउण्" इत्यादीनां मानाभावात् । एतेन पाठपौर्वापर्यं न शास्त्रप्रवृत्तौ तन्त्रम् । उत्तरसूत्रप्रयुक्तकार्यनिर्देशस्य पूर्वसूत्रेषु बहुलमुपलभ्यमानस्यानुपपत्तेः । "तुल्यास्यप्रयत्नम्" इत्यादौ त-द्विधेयसवर्णादिसंज्ञोपजीवकसवर्णदीर्घाद्यप्रवृत्त्यापत्तेः । विधि-सूत्रे उद्देश्यतावच्छेदकतया गृह्यमाणो यो धर्मस्तदवच्छिन्ने का-र्यप्रवृत्तेरावश्यकत्वात् । अत एव नेह नानाऽस्ति किंचने-त्यादीनां निषेध्यतावच्छेदकीभूतदृश्यत्वादिधर्मावच्छिन्नतया स्व-स्यापि मिथ्यात्वबोधकत्वं सङ्गच्छते । न चैवं ग्रहणकशास्त्र-स्यापि स्वस्मिन् प्रवृत्त्यापत्तौ दीर्घाणामनण्त्वेन सवर्णग्राहक-

त्वं नास्तीतिसिद्धान्तभङ्गापत्तिः इति वाच्यम् । तत्र तच्छास्त्रात् पूर्वमकारादीनां दीर्घानुपस्थापकत्वात् दीर्घाणामुद्देश्यत्वग्रहाभावात् इति दूषणमलग्नकं वेदितव्यम् । तुल्यास्यादिपदानां साधुत्वेन तत्र शास्त्रप्रवृत्तेः । तद्वाक्यार्थबोधे तुल्यास्यादिपदार्थोपस्थितेरेव तन्त्रतया सवर्णदीर्घत्वप्रकारकबोधस्यानपेक्षितत्वाच्च ।

यत्तु संहिताविरहान्न तत्कार्यम्—.

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

इति वाक्ये संहिताया अनित्यत्वादिति । तच्चिन्त्यम् । अकारेकारादीनां परस्परार्थान्वयप्रतियोग्यर्थानुपस्थापकत्वेन वाक्यत्वाभावात् । न चैतत्सूत्रोक्तानामकारादीनाम् "अणुदित्सवर्णस्य च"इत्यादावन्वयप्रतियोगित्वात्तदिति वाच्यम् । तस्य वाक्यत्वेऽप्यस्य तदनुपपत्तेः । अन्यथाऽतिप्रसङ्गात् ।

केचित्तु चादिषु पाठान्निपातत्वे "निपात एकाज्"इति प्रगृह्यसंज्ञया प्रकृतिभावः । नचैवं दाक्षिरित्यादौ "अत इञ्"इत्यादीनां प्रवृत्तिर्न स्यात्, तपरत्वसामर्थ्यादाक्षरसमाम्नायिकस्यैवाकारस्य तत्र ग्रहणाद् अन्यस्य सवर्णग्राहकत्वाप्रसक्त्या तन्निवृत्त्यर्थं तपरत्वानुपयोगादिति वाच्यम् । सर्वव्यक्तीनां निर्देशानर्हतया यत्किंचिद्व्यक्तिनिर्देशध्रौव्ये संहिताकार्यविरहेण स्फुटप्रतिपत्त्यर्थं निपातव्यक्तीनामेव निर्देशेऽपि सादृश्येन सर्वाकारव्यक्तीनामुपस्थित्या तत्सिद्धेरित्याहुः । तदप्यसत् । स्ववृत्तिवर्णत्वव्याप्यधर्मेण सादृश्यविवक्षायां दीर्घाणामपि ग्रहापत्तेः । न च निपातान्यव्यक्तिनिर्देशेऽप्ययं दोषः । अविवक्षितावान्तरधर्मकव्यक्तिमात्रस्य निर्देशोपगमात् । न च निपातत्वतद्भिन्नत्वोभयाभाववद्वर्ण-

व्यक्तिमात्रमलीकमिति वाच्यम् । तद्धर्मयोरविवक्षामात्रस्योक्तत्वात् । निपातत्वस्य च प्रगृह्यसंज्ञार्थमवश्यं विवक्षणीयत्वात् ।

कारप्रत्ययस्तु न भवति । "रोगाख्यायां ण्वुल्बहुलम्" इत्यत्र तदुपसंख्यानात् तद्विधौ बहुलग्रहणान्वयात् ।

स्यादेतत् । अकारः संवृत इति शिक्षावाक्यात् संवृतप्रयत्नस्य ह्रस्वाकारस्य विवृतप्रयत्नैर्दीर्घप्लुताकारैः सह सावर्ण्याभावात् कथम् " अस्य च्वौ " इत्यादौ दीर्घग्रहः । " अणुदित्सवर्णस्य चाप्रत्यय " इति सवर्णानामेव ग्रहणोक्तेः । भिन्नप्रयत्नानां च सावर्ण्याभावात् । एवमिहाग्निदत्तेत्यत्र "गुरोरनृत" इति प्लुताकारेण सह सवर्णदीर्घो न स्यात् इतिचेत् सत्यम् । अत एवात्राकारो विवृत एवोपदिष्टः । यद्वार्त्तिकम्—

अकारस्य विवृतोपदेश आकारग्रहणार्थ इति ।

अत्र च शास्त्रान्ते "अ अ"इति प्रत्यापत्तिसूत्रं ज्ञापकम् । तत्र हि अ इति विवृतत्वविशिष्टम् अ इति च संवृतत्वविशिष्टम् अकारमुच्चार्य विवृतोद्देशेन संवृताकारो विधीयते । सविशेषणे हीति न्यायेन संवृतत्वस्यैव विधेयत्वपर्यवसानम् । अकारस्य च संवृतत्वे शास्त्रीयप्रक्रियादशायामाश्रीयमाणे संवृतत्वविधिवैयर्थ्यापत्तेः । ततः पूर्वमकारो विवृतः प्रतिज्ञायतइति प्रक्रियादशायां प्रयोगदशायां वा न दोषः । शास्त्रान्ते विहितस्य संवृतत्वस्य संपूर्णशास्त्रं प्रत्यसिद्धत्वात् । आकारस्य विवृतत्वं च पाणिनीयशिक्षायामुक्तम्—

स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ इति ।

स्वरपदमेज्भिन्नपरम् ह्रस्वाकारान्यपरं च। संवृतोऽकार इति शिक्षान्तरोक्तेः। एवं च ह्रस्वान्याकारस्य इउऋऌव-र्णानां च विवृतत्वम्। ततोऽप्येकारे ओकारे च तदुत्कर्षः। ततोऽप्यैकारे औकारे चेत्यर्थः।

केचित्तु उक्तवार्त्तिकस्थं विवृतपदं विवृततरपरम्। दीर्घा-द्यकारस्य विवृततरत्वेन तत्सावर्ण्यस्य विवृतत्वमात्रेणासिद्धेः। तथा च शिक्षान्तरे—

विवृतकरणाः स्वरास्तेभ्य एओ विवृततरौ ताभ्यामैऔ ताभ्यामप्याकार इति।

न च व्याप्यधर्मावच्छिन्नस्य व्यापकधर्मावच्छिन्नत्वानि-यमात् विवृततरस्यापि विवृतत्वानपायात् तत एव सावर्ण्य-निर्वाहे वार्त्तिकस्थं विवृतपदं यथाश्रुतमेवास्त्विति वाच्यम्। व्याप्यधर्मपुरस्कारेणैव सावर्ण्यस्य वाच्यत्वात्। अत एवो-ष्मणामीषद्विवृतत्वमाश्रित्य विवृतप्रयत्नैरिकारादिभिः सावर्ण्यं नास्तीति "नाज्झलौ" इति सूत्रं भाष्यकृद्भिः प्रत्यादेक्ष्यते। अथ वा सामर्थ्याद्विवृततरस्यापि विवृतत्वमात्रेण सावर्ण्यम्। अन्यथा विवृतत्वप्रतिज्ञानवैयर्थ्यादित्याहुः।

अन्ये तु विवृततरेणापि विवृतत्वमात्रेण सावर्ण्यं, सूत्रकृता "नाज्झलौ" इत्यस्यारम्भात्। अतएव—

"चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्री-यन्ते" इति वृत्तिः।

नन्वेवमेकारौकाराभ्यां सह ऐदौतोः सावर्ण्यं स्यात्। तयोर्विवृततरत्वेऽपि विवृतत्वानपायात्। न चेष्टापत्तिः। नावं नाव इत्यादौ "औतोऽम्शसोः" इत्यात्वस्य करवावहै अत्रेत्यत्रदूदेदिति प्रगृह्यत्वस्य कस्मै अदात् विष्णौ

अस्तीत्यादौ पूर्वरूपस्य चापत्तेः । मैवम् । अत्र पृथङ्निर्देशसामर्थ्यादनुबन्धद्वयसामर्थ्याद्वा तत्र सावर्ण्याप्रवृत्तेः । अन्यथा ह्येकानुबन्धेनैव व्यवहरेत्, ऐदौतौ वा न निर्दिशेत् । ग्रहणकशास्त्रेणैव सिद्धेरित्याहुः । अत्रेदं चिन्त्यम् । "एचोऽयवायावः" इत्यत्रादेशानियमार्थमैकारौकारयोः पृथगुपदेशः । अन्यथाऽऽदेशसङ्करापत्तेः ।

अथान्तरतमपरिभाषयैव तत्र निर्वाहः । एचां सन्ध्यक्षरतया संवृताकारतालव्यस्य एकारस्य तादृशोऽय्, संवृताकारौष्ठ्यस्य ओकारस्य तादृशोऽव्, ऐचोश्चोत्तरभूयस्त्वस्य वक्ष्यमाणतया अकारस्यार्द्धमात्रत्वादिकारोकारयोश्चाध्यर्द्धमात्रत्वाद्विवृताकारतालव्यस्य ऐकारस्य तादृश आय्, विवृताकारौष्ठ्यस्य औकारस्य तादृश आव्, इति व्यवस्थासम्भवात् । मैवम् । प्रक्रियादशायामकारस्य विवृतत्वप्रतिज्ञानात् ।

यत्तु पृथगनुबन्धादिति । तन्न । गुणवृद्धिसंज्ञयोरुद्देश्यसंज्ञिनियमार्थमनुबन्धद्वयस्याप्यावश्यकत्वात् । न च तत्र स्वरूपेणैव संज्ञिनिर्देशान्निर्वाहः । तथा सति तत्राष्टमात्रागौरवात् । यथान्यासे तु सार्द्धमात्राद्वयं प्रत्येकं गुणवृद्धिसंज्ञयोः, अर्द्धमात्रा च वर्णसमाम्नाये इति सार्द्धाः पञ्चैव मात्रा इति लाघवात् । न च गुणसंज्ञायामेव स्वरूपेण संज्ञिनिर्देशः, वृद्धिसंज्ञायां त्वनुबन्धेनैवेति वाच्यम् । तथाऽपि गुणसंज्ञायां मात्राचतुष्टयम्, वृद्धिसंज्ञायां सार्धमात्राद्वयमिति मिलित्वा सार्द्धषण्मात्रासंपत्त्या एकमात्राधिक्यात् । ननु "एङः पदान्ताद्" इत्यादौ एच इत्यपहाय एङ्ग्रहणसामर्थ्यादेव ऐचोर्नातिप्रसङ्गः । सावर्ण्याप्रवृत्तिरित्यस्य तत्प्रयुक्तकार्याप्रवृत्तिरित्यर्थ इति चेन्न । तथाऽपि "औतोऽम्शसोः" इत्यादौ अतिप्रसङ्गात् । न हि तपरत्वादिस्थलेऽणः स-

वर्णग्राहकत्वं नास्तीति स्थलान्तरेऽपि तथैव स्यादिति दिक् ।

अत्र चैकशेषेण षण्णां ह्रस्वव्यक्तीनामुपादानम्। सौत्रत्वाद्विभक्तिलोपः। एवमुत्तरसूत्रेऽपि। अत एव दीर्घाणामनण्त्वमित्यपि संगच्छते। एवम् "अस्यच्वौ" इत्यादावनुवादे "त्यदादीनामः" इत्यादिविधौ च ह्रस्वनिर्देशे सर्वत्र ह्रस्वानामण्त्वमस्त्येव। ततश्चानुवादे दीर्घादिग्रहो विधौ तु नेति इष्टसिद्ध्यर्थं ग्रहणकशास्त्रारम्भः। तेन विना सद्व्यवस्थानुपपत्तेः। एवं च विरुद्धधर्मसमसंख्याका नित्या एवाकारादिव्यक्तयः इति मते नैवात्र सूत्रप्रवृत्तिः। षण्णामेव ह्रस्वाकारव्यक्तीनां जगति सत्त्वेन तासां विवृतत्वप्रतिज्ञाने धातुप्रातिपदिकप्रत्ययनिपातस्थानामकाराणां प्रत्याहारनिर्दिष्टषडकारव्यक्तिभेदकूटानाश्रयतया सर्वेषामनायासेन तत्तदच्कार्यसिद्धेः। नचैवं सर्वे वर्णाः सकृदुपदिष्टा इति हयवरट्सूत्रस्थभाष्यविरोधापत्तिः, अकारषट्कनिर्देशस्य त्वयाऽभ्युपगमादिति वाच्यम्। एकप्रयत्नोच्चार्यत्वस्यैव तदर्थत्वात्। उच्चार्यवर्णानाह उपदिष्टा इमे वर्णा इति भाष्यदर्शनात्।

नन्वष्टादशैव भिन्ना नित्याश्चाकारा इति न कस्यचित् तान्त्रिकस्य मतम् इति चेत् सत्यम्। युक्तिसहत्वेनास्याप्यभ्युपगम्यत्वात्। तथा हि—

भट्टमते तावदेकैका एव अकारादिव्यक्तयो नित्याः। स एवायमकार इति प्रत्यभिज्ञानात्। नचेदं तज्जातीयत्वावगाहि वक्तुं शक्यम्। बाधकबलादेव ज्वालादिप्रत्यभिज्ञानस्य तज्जातीयविषयकत्वोक्तेः। प्रकृते च तदभावात्। न च गकार उत्पन्नो विनष्ट इत्यादिरुत्पत्तिविनाशप्रत्ययः तथा। व्यञ्जकध्वनिगतस्योत्पत्त्यादेस्तत्रारोपात्। न च स्वाधिकरणक्षणध्वंसानधिकरणसमयसम्बन्धरूपाया उत्पत्तेः स्वत्वघटि-

तत्वेन धर्मिभेदाभिन्नत्वात् कथम् अन्योत्पत्तेरन्यत्रारोप इति वाच्यम् । उत्पत्तिघटकपदार्थानां प्रत्येकमुपनये अकारादेरधिकरणे तस्य क्षणे तस्य ध्वंसे तस्याधिकरणे इत्यादिरीत्या सखण्डोत्पत्तिभ्रमसंभवात् । अत एव इन्धनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणरूपाया अखण्डव्याप्तेर्वह्नित्वे इन्धनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वाभावादप्रसिद्धावपि तद्धटकपदार्थानां परस्परोपश्लेषविषयत्वेनैव व्याप्तिभ्रमः । न च प्रत्यभिज्ञाया एव भ्रमत्वम् प्रत्ययानुरोधादिति वाच्यम् । तथाऽपि विनिगमकाभावात् । अनन्तशब्दतद्ध्वंसप्रागभावादिकल्पनागौरवस्य नित्यत्वपक्षपातित्वाच्च । न चैकस्मिन् धर्मिणि एककालावच्छेदेन विरुद्धधर्मानुपपत्त्या तारत्वमन्दत्वादिभेदात् तद्भेद इति वाच्यम् । तारत्वादीनां वायुधर्मत्वात् । मुखमालिन्यादेर्दर्पणधर्मत्ववत् । अन्यथा वर्णगतत्वाभिमतगत्वादिजातिभिर्व्याप्यव्यापकभावानुपपत्तेः । न हि तारत्वव्याप्यं गत्वम् । मन्दगकारेऽपि तत्सत्त्वात् । नापि गत्वव्याप्यं तारत्वम् । ककारादावपि तत्सत्त्वात् । तारगकारे च तयोः सांकर्यात् ।

नचैवं तारत्वादेः श्रोत्रग्राह्यत्वं न स्यात् । तस्य वायुग्राहकत्वाभावेनैव वायुधर्मग्राहकत्वाभावादिति वाच्यम् । केषांचिद् वायुधर्माणां तेन ग्रहेऽपि बाधकाभावात् । पृथिवीजलाकाशानां घ्राणरसनश्रोत्राग्राह्यत्वेऽपि गन्धरसशब्दानां तद्ग्राह्यत्वोपगमात् । तारमन्दवर्णजनकवायूनामुत्कर्षापकर्षोद्भूतस्पर्शानां नैयायिकाभ्युपगतत्वेन स्पर्शपुरस्कारेण कर्णशष्कुल्यवच्छिन्नत्वगिन्द्रियगृहीतानां तारत्वादीनां श्रोत्रेण ग्रहसंभवाद्वा । अत एव घज्ञानानन्तरग्रहवि-

षयत्वादिरूपानुपूर्व्याः मानसोपनीतायाः टकारादौ श्रोत्रेणैव ग्रह इति सिद्धान्तः । अत एव दशकृत्वो गकारमुच्चारयतीत्यावृत्तिविषयक एव प्रत्ययः; न तु व्यक्तिभेदावगाही दश गकारानुत्पादयतीति । तदुक्तम्—

तेन यत् प्रार्थ्यते जातेस्तद्वर्णादेव लप्स्यते ।
व्यक्तिलभ्यं तु नादेभ्य इति गत्वादिर्धीर्वृथा ॥

इति । प्रत्यभिज्ञानस्य वर्णैक्याद्विरुद्धधर्मवत्तायाश्च ध्वनिगतत्वादुपपत्तिरित्यर्थः । अत्र चैवं सूत्रोपपत्तिः । धात्वादिस्थानामकाराणामैक्येन सर्वेषामप्यण्त्वात् "अस्यच्वौ" इत्यादिस्थे अकारे ग्रहणकशास्त्रप्रवृत्तिः । शाम्यतीत्यादौ "शमामष्टानाम्" इति दीर्घः । दृषदित्यत्र फिट्सूत्रेण प्रातिपदिकान्त्यस्याकारस्य उदात्तत्वम् । अणादिस्थस्य प्रत्ययस्वरेणाद्युदात्तत्वम् । अवनमतीत्यादौ "उपसर्गाश्चाभिवर्जम्" इत्याद्युदात्तत्वम् । अन्यथा अकाराणां भिन्नत्वे वर्णोपदेशस्थाकारस्य विवृतत्वप्रतिज्ञानेऽप्यन्यत्र गतानां विवृतत्वाभावादुक्तानामच्कार्याणामप्रवृत्तिप्रसङ्गात् । ह्रस्वत्वादीनाम् उदात्तत्वादीनां चाजेकधर्मत्वात् । वर्णसमाम्नायान्तर्गतस्यैवाच्त्वात् । ततश्च वर्णसमाम्नायोपदिष्टावर्णमात्रोद्देशेन कस्यचित् कार्यस्याविधानादुक्तवचनसामर्थ्यमात्रेण तत्कार्यप्रवृत्तिरित्यादि कल्प्यं स्यात् ।

न चैवं कप्रत्ययेऽप्यण्प्रत्ययकार्याणाम् अण्प्रत्यये च कप्रत्ययकार्याणां प्रवृत्तिः स्यात्, अनुबन्धसङ्करापत्तेरिति वाच्यम् । नियतानुबन्धकरणसामर्थ्येन तत्तद्देशपुरस्कारेणैव तत्तदनुबन्धकार्यनियमोपपत्तेः। लोकेऽपि इह मुण्डो भव, इह जटिलो भव, इह नग्नो भव, इत्यादिरीत्याऽस्यानेकधर्मोपदेशेऽपि यद्धर्मावच्छिन्नो यत्रोपदिश्यते तत्रैव तद्धर्मव्यवस्थादर्शनात्। एवं "कर्मण्यण्" इत्या-

दावेव णित्त्वम् ।"चरेष्टः" इत्यादावेव टित्त्वम् ।"गापोष्टक्" इत्यत्र कित्त्वटित्त्वे । अत एव "प्राग्दीव्यतोऽण्" "शिवादिभ्योऽण्" इत्यादौ पुनर्णित्करणसार्थक्यम् ।

ननु तथाऽपि घटेन तरतीति घटिक इत्यत्र "नौ-द्व्यचष्ठन्" इति ठन्प्रत्ययः, धनस्य निमित्तं संयोग उत्पातो वा धन्य इत्यत्र "तस्य निमित्तं संयोगोत्पातौ" इत्यधि-कृत्य विहितो "गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्" इति यत्प्र-त्ययश्च न स्यात्, अकारस्यैकत्वेन द्व्यच्त्वाभावात्, सूत्रं तु बाहुभ्यां तरति बाहुक इत्यादौ यत्र विजातीयमज्द्वयं तत्र सा-वकाशम् इति चेन्न । आवृत्त्या घटादिपदस्यापि द्व्यच्त्वात् । न च गौणमुख्ययोरितिन्यायावतारः । "गोद्व्यच" इत्यत्र असंख्या-परिमाणाश्वादेर्यदित्यश्वादिपर्युदासेन तदभावस्यापि ज्ञापितत्वा-त् । अन्यथा अश्वशब्दे मुख्यद्व्यच्त्वाभावेन यत्प्रत्ययाप्राप्तौ प-र्युदासवैयर्थ्यात् । अत एव किरिणा गिरिणेत्यादौ "सा-वेकाच" इति विभक्तेरुदात्तत्वं नास्ति । गौणेनापि द्व्यज्व्य-पदेशेन एकाज्व्यपदेशस्य बाधितत्वात् । एतद्रीत्यैव सृष्टि-समयोत्पन्ना तत्प्रलयपर्यन्तस्थायिनी एकैवाकारादिव्यक्तिरि-ति वेदान्तमतेऽपि प्रकृतेरुपपत्तिरवधेयेति । एतच्चायुक्तम् । तारत्वादीनां वायुधर्मत्वे कत्वादीनामपि तथात्वापत्तेः । उक्तं हि तात्पर्यशुद्धावुदयनाचार्यैः—

वर्णात्मकोऽपि नित्यः कल्प्यमान एकः कल्पनीयः । प्रत्यभिज्ञानात् । भेदे प्रमाणाभावाच्च । तारत्वादयस्त्वौपा-धिकास्तत्रावभासन्ते । तथा च तीव्रत्वादिवत् कत्वादयोऽपि तस्यौपाधिकाः सन्तु, कृतम् अप्रामाणिकबहुतरकल्पनाजा-लेन । उपाधयश्च बहव इति तद्गतमेकत्रसामान्यं कल्पनीय-

मिति घट्टकुट्यां प्रभातम् । अथोक्तदोषभिया स्वाभाविका एव तीव्रत्वादय इत्यभ्युपगमः तथा सति तावन्त एव ध्वनिवत् कादयोऽपीति कत्वसामान्यमावर्ततइति ।

न चोत्पत्तिविनाशप्रतीत्योर्भ्रमत्वं कल्प्यम् । विनिगमकाभावात् । ध्वंसप्रागभावादिकल्पनस्य च फलमुखत्वात् । तन्मते कण्ठताल्वाद्यभिघातस्य कसाक्षात्कारत्वं जन्यतावच्छेदकम् मन्मते तु कत्वमेवेति लाघवाच्च । न च तन्मतेऽपि लौकिकविषयितासम्बन्धेन कत्वमेव कार्यतावच्छेदकमिति वाच्यम् । लौकिकत्वस्याननुगतत्वात् । कोलाहलप्रत्यक्षानुपपत्तेश्च । तत्र कत्वादीनामनवबोधात् । तेष्वेतत्प्रत्यक्षे कत्वादिलौकिकविषयकत्वाभावात् । अगृह्यमाणकशब्दत्वादिव्याप्यजातिकनानाशब्दानां कोलाहलपदार्थत्वात् । न च तत्र कत्वादिकमेव नास्तीति वाच्यम् । बुभुत्सायां कत्वादिश्रावणस्य सर्वानुभवसिद्धत्वात् । न च प्रत्यभिज्ञानमात्रेणैक्यसिद्धिः । सैवेयं गुर्जरीत्यादिप्रत्यभिज्ञानेन ध्वनीनामपि नित्यत्वापत्तेः । स एवायं गकार इति प्रत्यभिज्ञायाश्च व्यक्त्यभेदविषयकत्वएव भ्रमत्वम् । गत्वाद्यवच्छिन्नप्रतियोगिताकभेदाभावपरत्वे तु प्रमात्वमेव ।

न च जातिप्रत्यभिज्ञायास्तज्जातीयोऽयमित्येवाकार इति वाच्यम् । तदेवेदम् औषधं बहुभिर्भुक्तं मयाऽपि भुज्यते इत्यादौ तज्जातीयाभेदप्रत्यभिज्ञाया अपि तदाकारत्वादर्शनात् ।

अयं तु विशेषः । यदा गत्वे जातित्वमपि भासते तदा तज्जातीयोऽयमिति । तदभावे तु सोऽयमितिप्रत्यभिज्ञास्वरूपमिति । तस्मात्तत्तत्स्वरूपजन्या अनन्ता एव वर्णाः । नन्वेवं शब्दस्यार्थबोधकत्वं न स्यात्, यस्मिन्पदे शक्तिग्रहस्तस्य नष्टत्वादिति चेत् । मैवम् । यथा शक्तिग्रहविषयस्य घटादेर्नाशेऽपि

घटपदाद् घटान्तरस्य बोधः तथा शक्तिमत्त्वेन ज्ञातपदनाशेऽपि तज्जातीयपदान्तराद् बोधोपपत्तेः ।

यत्तु व्यक्त्यैक्ये सामान्यमेव नास्ति तत् कथं पदान्तराद् बोध इति । तन्न । व्यक्तिभेदस्यापि साधितत्वात् । इति नैयायिकाः ।

अत्रापि व्यक्त्यभेदप्रत्यभिज्ञाया भ्रमत्वमस्त्येव । एवम् एतन्मतस्यात्रानुसारे प्रत्युच्चारणं वर्णानां भेदाद् "अस्य च्वौ" इत्यादावकारस्य अणुत्वाभावात् सवर्णग्राहकत्वं न स्यात् । अतस्तत्र कण्ठादिजन्यतावच्छेदकजातिव्याप्या ह्रस्वमात्रवृत्तिरपि जातिरस्ति । सैव वर्णसमाम्नाये विवृतत्वेनोपदिष्टा । अत एव सर्वेषामपि ह्रस्वानामणुत्वमस्त्येवेति न कुत्राप्यनुपपत्तिः ।

अत्रापीदं चिन्त्यम् । ह्रस्वाकारमात्रवृत्तिजातौ मानाभावः । न च ह्रस्वेषु दीर्घादिव्यावृत्तानुगतप्रत्ययादेव तत्सिद्धिः । तस्य ह्रस्वत्वेनैवोपपत्तेः । न च ह्रस्वत्वमेव सा जातिः न त्वतिरिक्तेति वाच्यम् । तस्या अत्वादिव्याप्यत्वानुपपत्तेः । अत्वह्रस्वत्वयोर्दीर्घाकारे ह्रस्वोकारे च परस्परात्यन्ताभावसमानाधिकरणयोर्ह्रस्वाकारे सङ्करापत्तेः । न चात्वादिव्याप्यत्वं ह्रस्वत्वं नानैवेति वाच्यम् । ह्रस्वाकारेकारादिष्वनुगतप्रत्ययानुपपत्तेः । "ऊकालोऽज् ह्रस्वदीर्घप्लुतः" इति ह्रस्वत्वस्य जातित्वाभावाच्च । उच्चारणगर्भस्य ह्रस्वत्वस्योपाधेरनुगतत्वाच्च । तस्मादष्टादशैव अकारव्यक्तयो नित्याः । एवं हि प्रत्यभिज्ञानस्य प्रमात्वम् विरुद्धधर्माणां च नारोपस्वीकार इति मतद्वयाद्विशेषः । तदनुगतस्य अत्वादिसामान्यस्य स्वीकाराच्च कोलाहलप्रत्यक्षोपपत्तिः ।

न च लौकिकविषयतासम्बन्धेन कत्वादीनां कार्यतावच्छेदकत्वे कथं कोलाहलप्रत्यक्षम्, तत्र कत्वादीना-

मग्रहादिति वाच्यम् । तथाऽपि स्वाश्रयविषयताया एव कार्यतावच्छेदकसम्बन्धत्वात् । कत्वाद्याश्रयककारादीनां कोलाहलप्रत्यक्षे विषयताया निर्विवादत्वात् । विजातीयपवनसंयोगस्य यथा तन्मते अवच्छेदकतासम्बन्धेन अकारादौ हेतुत्वं, समवायश्च कारणतावच्छेदकः, तथैवात्र तत्साक्षात्कारे समवायेन पवनसंयोगवति श्रवणे अवच्छेदकतया शब्दश्रावणोत्पत्तेः अत्वादिप्रत्यक्षे च श्रावणसमवायो नियामकः । श्रावणे अकारे अत्वस्य समवायात् । अकारनिष्ठकत्वाभावश्रावणे च श्रावणविशेषणता नियामिका । श्रोत्रसमवायादेरेतत्पक्षेऽनभ्युपगमात् ।

ननु श्रावणसमवायसन्निकर्षे श्रावणं विशेषणमुपलक्षणं वा । नाद्यः । अनभिव्यक्तदशायामप्यकारस्य श्रावणोपलक्षितत्वेन तदाऽप्यत्वप्रत्यक्षापत्तेः । नान्त्यः । अकारस्य तत्काले श्रावणोत्पत्तिं विना श्रावणविशिष्टत्वासम्भवात् । अत्वप्रत्यक्षोत्पत्तिपूर्वं केवलावर्णप्रत्यक्षस्वीकारापत्तेः । न चेष्टापत्तिः । स्वाश्रयलौकिकविषयितासम्बन्धस्य कार्यतावच्छेदकतया केवलशब्दप्रत्यक्षासम्भवात्, निर्विकल्पके लौकिकविषयताऽनभ्युपगमात् इतिचेत् । मैवम् । शब्दत्वादिप्रकारकप्रत्यक्षस्यैव पूर्वं स्वीकारात् ।

" नन्वत्राप्युदात्ताकारादनुदत्ताकाराभेदावगाहिप्रत्यभिज्ञाया भ्रमत्वमेवेति चेत्, सत्यम् । तथाऽपि बह्वीनां तासां प्रमात्वरक्षणादित्यादिकमूहनीयम् ।

अयं च पक्षः तारमन्दादिधर्मभेदभिन्ना गकारादिव्यक्तयो नित्या एव सन्त्विति वर्णानित्यतावादे भट्टमतैकदेशतया न्यायग्रन्थेषु शङ्कितप्राय एव अष्टादशावर्णव्यक्तय इति शब्दकौ-

स्तुभेऽप्यत्रोपन्यस्तः । अनुसृतश्च भगवद्भ्यां वार्त्तिकभाष्यकाराभ्याम्—

तथा हि । "अअ" इति सूत्रे अनुवाद्यपरेण पूर्वाकारेण ग्रहणकशास्त्रवशाद् दीर्घादीनामप्युपस्थापने तेषामपि-प्रयोगदशायां संवृतत्वविधानं स्यादित्याशङ्क्य द्वेधा समाहितम्—

सिद्धन्तु तपरनिर्देशात्, एकशेषनिर्देशाद्वा स्वरानुनासिकभिन्नानां भगवतः पाणिनेः सिद्धमिति । अत् इति पाठः कर्तव्यः "ततश्च तपरस्तत्कालस्य" इति दीर्घादिग्रहणं नेत्याद्यं समाधानम् । सूत्रस्वारस्याभावादत्रापरितुष्य षण्णां ह्रस्वानामेकशेषेण अ इति निर्देशः, तत्सामर्थ्याच्च न ग्रहणकशास्त्रप्रवृत्तिरिति द्वितीयम् । अतश्च षडेव ह्रस्वाकारव्यक्तय इति तात्पर्यात् अर्थात्तावतां दीर्घाणां प्लुतानां च लाभेनित्यत्वम् । विना च षण्णामेकशेषेण सर्वह्रस्वाकारसंग्रहाभावाद् ह्रस्वमात्रवृत्त्यत्वव्याप्यजातिसत्त्वे च तपरत्वेनैवोपपत्तौ एकशेषानुवादानुपपत्तेस्तान्नित्यत्वपर्यवसानात् ।

नन्वेवं सर्वत्र सवर्णग्रहणाभावस्थले एकशेषणैव निर्वाहे "तपरस्तत्कालस्य" इति सूत्रं व्यर्थं स्यादिति चेत् । मैवम् । सूत्रनिर्देशस्वारस्येन अत्रैकशेषस्वीकारेऽपि तपरत्वापेक्षया तत्र गौरवात् । "उपसर्गादृति धातौ" इत्यादौ ऋवर्णेन ऌवर्णग्रहणस्यैकशेषेण साधयितुमशक्यत्वाच्च । तत्र दीर्घग्रहणवारणार्थं तपरत्वस्यावश्यकतयाऽन्यत्रापि तस्यैव युक्तत्वाच्च । एतेन घटेन तरतीत्यादौ गौणेऽपि कार्यनिर्वाहार्थं ज्ञापकानुसरणं परास्तम् । मुख्यतयैव निर्वाहात् । द्व्यच्स्थलेऽन्यतरस्योदात्तत्वे शेषनिघातेनान्यतरस्यानुदात्तत्वधौव्येण भेदसत्त्वात् ।

एवं भट्टमते किरिणेत्यादौ सप्तमीबहुवचने सौ य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता स्यादित्यर्थकेन "सावेकाचस्तृतीयादिर्विभक्तिः" इति सूत्रेणोदात्तत्वं स्यात् । किरिषु इत्यत्रैकाच्कसत्त्वात् ।

यत्त्वावृत्तिकृतेन व्यज्व्यपदेशेन स्वाश्रयस्यैकाच्कत्वस्य निवृत्तिरिति । तन्न । गौणेनाग्नित्वेन माणवकत्वस्य निवृत्त्यभावात् । त्रिपुत्रे द्विपुत्रव्यपदेशाभावस्तु त्रिपुत्रत्वस्याप्यनारोपितत्वात् । द्वित्वान्यव्यासज्यवृत्तिसंख्यापर्याप्त्यनाश्रयपुरुषनिष्ठजन्यत्वनिरूप्यजनकत्वाभाववत्पुरुषतात्पर्यकस्यैव द्विपुत्र इति प्रयोगस्य तस्मिन्नप्रमाणत्वात् । संभवाभिप्राये तु प्रमाणत्वात् । द्विपुत्रत्वव्यतिरेकेण त्रिपुत्रत्वस्याप्यनुपपत्तेः । अत एव "न वान्यसंख्याव्यवच्छेदो नवैव द्रव्याणीत्यस्य नार्थः तत्पूर्वसंख्योत्पत्तिं विना नवत्वायोगाद्" इति द्रव्योपायादावुक्तम् । अत एवाद्यानां त्रयाणां पदार्थानां सामान्यवत्त्वमित्यादयः प्रयोगाः । अश्वादिपर्युदासस्य सामान्यापेक्षज्ञापकत्वोक्तावपि गौणे कार्यप्रवृत्तेरेव निर्वाहो न तु मुख्यव्यावृत्तेः । तन्मात्रेण सामर्थ्यस्योपक्षीणत्वात् ।

ननु राज्ञेत्यादौ विभक्तेरुदात्तत्ववारणार्थं सावित्युक्तम् । स्वाश्रयैकाच्त्वाभ्युपगमे तु राजस्वित्यत्राप्येकाच्त्वसत्त्वात् तद्वारणं न स्यात्, अतोऽत्र स्वाश्रयैकाच्त्वनिवृत्तौ सावित्येव ज्ञापकम् इति चेत् । न । बाहुनेत्यादिवारणेन तस्य सार्थक्यसंभवात् । न चैकाच इत्यनेन तद्व्यावृत्तिः । सप्तम्येकवचने तस्याप्येकाच्त्वात् । "औकारादेशो ङित्कर्तव्य" इति सप्तमे भाष्यकृतोक्तत्वात् । न च विभक्तिमात्रे एकाच्त्वं विवक्षणीयम् । सावित्यस्य वैयर्थ्यात् ।

किं च "ऊडिदम्पदाद्यप्पुंरैद्युभ्यः" इति सूत्रे एकाज्ग्रहणानुवृत्त्या "पद्दन्नोमास्" इति सूत्रे निर्दिष्टाः पदादयो निश्शब्दपर्यन्ता गृह्यन्ते, ततः परेषामसन्नादीनामनेकाच्त्वात् इति स्थितम् पदादिषु निशन्तानि प्रयोजयन्तीति वार्त्तिके भाष्ये च । गौणेन द्व्यच्त्वेन स्वाश्रयैकाच्त्वानिवृत्तौ च असन् यकन् शकन् आसन् इत्येतेषामप्यनेकाच्त्वेन ग्रहणं स्यादिति तद्विरोधो दुर्वारः । अतो वार्त्तिकादिकमेव तन्निवृत्तिज्ञापकम् इति चेत्, सत्यम् । एवंविधकष्टसृष्टिमपेक्ष्योक्तरीतेरेव युक्तत्वात् । उक्तसर्वग्रन्थानामकारव्यक्तिभेदपक्षाभिप्रायेणैवोपपन्नत्वाच्चेति दिक् ।

वार्त्तिकमते तु अत्वादिजातिपरो निर्देशः । न चैवं दीर्घाणामपि सवर्णग्राहकत्वापत्तिः । दीर्घोच्चारणसामर्थ्यात् । सर्वेषां सञ्जिघृक्षितत्वे लाघवार्थं ह्रस्वस्यैव निर्देशप्रसङ्गात् । न चैवमपि दीर्घस्य प्लुतग्राहकत्वं स्यादेव, प्लुतानिर्देशे गौरवापत्त्या तन्निवृत्तौ दीर्घोच्चारणस्य सामर्थ्याभावादिति वाच्यम् । ह्रस्वव्यावृत्ततत्साधारणधर्माभावात् । ग्रहणकशास्त्रेऽण्ग्रहणं च न कार्यम् । तदुक्तम्—

सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् ।

तपरसूत्रं तु स्थलविशेषे जातिपरत्वव्यावर्त्तनायैव । नचैवं विधेयस्थलेऽपि सवर्णग्राहकत्वापत्तौ "त्यदादीनामः" "सनाशंसभिक्ष उः" इत्यादौ दीर्घादीनामपि विधानं स्यादिति वाच्यम् । तत्र विधेयविशेषणतया एकत्वस्यापि पश्वेकत्ववत् विवक्षितत्वात् । न च तथाऽप्यत्वावच्छिन्नविधानस्य दीर्घेणापि चरितार्थतया दीर्घ एवैकोऽस्त्विति वाच्यम् । अनुपस्थितदीर्घकल्पनापेक्षया उपस्थितह्रस्वस्यैव विधे-

यत्वात्। न च ह्रस्वत्वं न पदार्थतयोपस्थितमिति वाच्यम्। स्वरूपेणैव ह्रस्वस्योच्चारणात्। "अस्य च्वौ" इत्यादौ त्वनुवाद्यविशेषणत्वाद्ग्रहैकत्ववन्न तद्विवक्षेति सर्वपरत्वम्।

यत्तु वैयाकरणमते विधेयानुवाद्यविशेषणानां विवक्षिताविवक्षितत्वनियमाभावः। "उपेयिवाननाश्वाननूचानश्च" इत्यादौ उपेत्यादेः नञादेश्च विधेयविशेषणत्वाविशेषेऽपि विवक्षावैषम्यदर्शनात्। "आर्द्धधातुकस्येड् वलादेः" इत्यत्र वलादित्वस्यानुवाद्यविशेषणस्यापि विवक्षितत्वाच्च। अत एव "एकः पूर्वपरयोः" इतिसूत्रे एकग्रहणम्। अन्यथा आद्गुण इत्येकत्वविवक्षयैवोपपत्तेरिति। तत् तुच्छम्। मीमांसकादीनामप्यविवक्षादेः कुलधर्मत्वाभावात्। शब्दोपात्तार्थे विवक्षाया ध्रौव्येऽपि विध्यन्वयानुपपत्त्या न्यायबलात् तत्परित्यागात्। न्यायस्य वचनविरोधे सत्यकिञ्चित्करतयाऽनुवाद्यविशेषणस्यापि क्वचित् विवक्षितत्वात्। अत एव—

पर्वण्यौदयिके कुर्युः श्रावर्णीं तैत्तिरीयकाः।

इत्यत्र औदयिकत्वविशिष्टपर्वविशिष्टोपाकर्मोद्देशेन तैत्तिरीयका एवेति कर्तृनियमविधाने उद्देश्यविशेषणविवक्षाधीनवाक्यभेदापत्त्या तैत्तिरीयपदं याजुषमात्रोपलक्षणीकृत्य पर्वविशिष्टोपाकर्मोद्देशेन औदयिकत्वमात्रविधिः। पर्वणोऽप्यविवक्षायाम् - "बह्वृचाः श्रवणे कुर्युः" इति वाक्यवैयर्थ्यापत्तेरिति स्वीकारात्। अत एव च "यस्योभयं हविरार्त्तिमार्छेद्" इत्यत्र आर्तिमात्रस्य प्रतियोगिविशेषानवच्छिन्नस्य सार्वदिकत्वान्निमित्तत्वापर्यवसानात् तद्विशेषणमपि हविर्विवक्षितमेव। तदुक्तम्—

मृष्यामहे हविषा विशेषणं पर्यवसितस्य हि विशेषणं वाक्यभेदमावक्ष्यतीति।

तद्विशेषणमुभयत्वं त्वविवक्षितमिति सिद्धान्तः ।

वस्तुतः षष्ठ्याः शैषिकत्वात् क्रियान्वयानावश्यकत्वात् पूर्वमेवार्द्धधातुके विशेषणसंभवान्न वाक्यभेदः, अश्वाभिधानीमित्यादिवत्। "ईयिवांसमतिस्रिधः" इत्यादेः केवलस्योपसर्गान्तरपूर्वकस्य च प्रयोगदर्शनाद् उपेत्यस्याविवक्षितत्वात्। उरित्येकत्वविवक्षया उद्वयस्थाने एकस्योकारादेशस्य मनोरमाकौस्तुभयोरुक्तत्वाच्च एकग्रहणस्य भाष्यकृता प्रत्याख्याततत्वात्। तथा च तत्र कैयटेनोक्तम्—

"तदेवमेकग्रहणं प्रत्याख्यातम्। "आद् गुणः" इत्यादौ संख्यायाः शब्दोपात्ताया विवक्षणात्। यत्र तु संख्या न विवक्ष्यते तत्र लक्ष्यसिद्धिरविवक्षितत्वे हेतुः" इति।

संख्येति प्रकृताभिप्रायम्, विधेयविशेषणान्तराणामप्युपलक्षणम् । अभ्युपेत्यापि ब्रूमः । तपरप्रत्ययौ तत्कालस्य इति सूत्रयित्वाऽपि " त्यदादीनामः " इत्यादौ अतिप्रसङ्गवारणस्य स्पष्टप्रकारेणैव संभवाद् ग्रहणकसूत्रेऽण्ग्रहणमनावश्यकमेव । अवश्यं चाण्भिन्नस्थले वर्णनिर्देशस्य जातिपरत्वं वक्तव्यम्। अन्यथा अवात् सृ तामित्यत्र सिचः पूर्वोत्तरयोस्तकारयोर्मध्ये एकस्यैव झल्त्वं स्यान्न तु द्वयोः। अक्षरसमाम्नाये द्वयोरनिर्देशात्। ततश्च "झलो झलि" इति सिचो लोपो न स्यात्। न च वचनसामर्थ्यं गतिः। अभित्था इत्यादौ विजातीयवर्णपरत्वे सावकाशत्वात् । एवं "नाज्झलौ" इतिसूत्रं प्रयत्नसाम्यपक्षेऽप्यनारभ्यमिति लाघवम् । उभयसाधारणैकजात्यभावेनैवाकारादिभिर्इकारादीनामग्रहणासिद्धेः । न च दण्डहस्त इत्यादौ सवर्णदीर्घवारणं सावर्ण्यनिषेधं विना दुरुपपादमिति वाच्यम् । तद्धिभावचीत्यनुवृ-

स्यैव तत्सम्भवात्। सूत्रारम्भपक्षेऽपि तदनुवृत्तेः कुमारी शेते इत्यादौ दोषवारणायावश्यकत्वात् । अगृहीतसवर्णाना-मेव "नाज्झलौ" इतिनिषेध इति सिद्धान्तादिति दिक् ।

यत्तु प्रत्याहारसूत्रोपदिष्टोऽकारादिः सादृश्यसम्बन्धेन स्वसदृशीः षट् व्यक्तीरुपस्थापयति । न च वृत्त्याऽनुपस्थितानां शाब्दान्वयानुपपत्तिः। गुरुमतेन तत्संभवादिति । तच्चिन्त्यम्। ह्रस्वत्वेन सादृश्यविवक्षायामिकारादेरप्युपस्थापनापत्तेः । अ-त्वह्रस्वत्वाभ्यां तथात्वे तु अत्वमात्रेण सादृश्यं विवक्षित्वा-ऽष्टादशव्यक्तीनामेवोपस्थितिसम्भवात्। अकारोपरि प्रकारीभूय भासमानायामत्वजातौ तात्पर्यमुपेक्ष्य तद्घटितगुरुतरधर्मेणा-कारान्तरोपस्थितिकल्पनस्यानुक्तिसम्भवग्रस्तत्वाच्च ।

ऋऌक् २ ।

ननु विधिप्रदेशेषु ऋकारेणाष्टादशस्वभेदानामिव द्वादश-ऌवर्णभेदानामपि ग्रहसम्भवाद् इह ऌकारोपदेशो व्यर्थः। न च मूर्द्धदन्तरूपस्थानभेदेन सावर्ण्याभावात् कथं ग्रहणकशास्त्रप्रवृत्ति-रिति वाच्यम् । "ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्" इति वा-चनिकसावर्ण्येन तत्सिद्धेः। न च तदेव नारभ्यमिति वाच्यम्। "उपसर्गादृति धातौ" इतिसूत्रात् "वा सुप्यापिशलेः" इत्यत्र ऋतीत्यनुवृत्त्या आल्कारीयतीत्यत्र वृद्धिविकल्पप्रवृत्त्यर्थं तदाव-श्यकत्वात्।

यद्वा वाच्यं व्याख्येयम्। "ऋकारऌकारावथ षष्ठ ऊष्मा जि-ह्वामूलीया" इति बह्वृचप्रातिशाख्योक्तरीत्या तुल्यस्थानत्वात् सू-त्रेणैव सावर्ण्यं सिद्धमित्यर्थः। अत एव "ऋदुपधाच्चाक्लृपिचृतेः" इत्यत्र क्लृपिपर्युदासः सङ्गच्छते । किं च क्लृपिस्थऌकारस्यैव

ऌकारमात्रमनुकरणम् । स्वातन्त्र्येण तद्भिन्नऌकारस्य लोकवेदयोरभावात् । क्लृपेर्ऌकारश्च लत्वस्यासिद्धत्वात् स्वरकार्येषु ऋकाररूप एवेति वृद्ध्यादीनां सिद्धिरिति ऌकारोपदेशः सावर्ण्यवार्त्तिकं च व्यर्थमेव ।

न च "कृपो रो लः" इति विहितस्य ऌकारस्यैवासिद्धत्वम्, न तु ऌकारीयतीत्यादिस्थतदनुकरणस्येति वाच्यम्। प्रकृतिवदनुकरणम् इत्यातिदेशेन तस्याप्यसिद्धत्वात् । अन्यथा द्विःपचन्त्वित्याहेत्यत्र पचन्तुशब्दस्य " तिङ्ङतिङः " इति निघातो न स्यात् । तिङन्तशब्दानुकरणत्वेन स्वरूपतास्तिङन्तत्वाभावात् । न च तैत्तिरीयवाक्ये आद्युदात्तपाठात् तत्र निघातो नेष्यतएवेति वाच्यम् । भाष्योदाहरणसामर्थ्येन शाखान्तरे निघातपाठस्याप्यनुमानात् । एवम् अग्नीइत्याहेत्यादौ "ईदूदेद् द्विवचनं" इति प्रगृह्यसंज्ञा न स्यात् । न चैवम् ऋकारबुद्ध्या कार्यप्रवृत्तौ तत्स्थानीयगुणादे रपरत्वमेव स्यात्, न तु लपरत्वमिति वाच्यम् । "उरण् रपरः" इत्यत्र प्रत्याहारग्रहणवैयर्थ्यापत्तेः, प्रकृतौ कुत्राप्यनुपयोगात् ।

न च चल्कृपे इत्यादौ अभ्यासस्य अत्वे प्रकृतावेव लपरत्वसार्थक्यम् । तत्र हलादिशेषस्यावश्यकतया रपरत्वेऽपि दोषाभावात् । न च क्लृप्तस्यायं काल्प्त इत्यादौ तस्योपयोगः । " तद्धितेष्वचामादेः " इति वृद्धौ लत्वस्यासिद्धतया ऋकारएव वृद्धिप्रवृत्तौ रपरत्वे च "कृपो रो लः" इत्यनेनैव सिद्धेः । न च तद्रेफस्य स्वतन्त्रतया ऋकारानन्तर्गतत्वात् कथं लत्वमिति वाच्यम् । कृपेर्यो रेफस्तस्यापि लत्वमित्युत्तरसूत्रयोर्व्यवस्थापनीयत्वात् । न च तथाऽपि गम्ऌ गतावित्यादिस्थस्य ऌकारस्यानुकरणे कथं निर्वा-

द:, तत्रासिद्धत्वातिदेशयोरप्रवृत्तेरिति वाच्यम्। पुषादिद्युताद्यॢदितः" इति सूत्रे ॡकारे परतो यणादेशप्रयोगेण इत्संज्ञानुवादेन च ज्ञापकेन तस्याप्यच्कार्यसिद्धेः।

वस्तुत इत्संज्ञानुवादस्य हल्कार्यसिद्धिं ज्ञापयित्वाऽपि पर्यवसानसम्भवाद्यण्निर्देश एव ज्ञापकः।

यत्त्वेवम् "इदितो नुम्" इत्याद्यनुवादानाम् "ऋत्यकः" इत्यादिज्ञापकानां च सत्त्वात् इकारादयोऽपि न निर्दिश्येरन्निति। तन्न। तन्निर्देशं विना अच्कार्यत्वादेरेव दुर्ग्रहत्वात्। ॡकारस्यात्यल्पविषयकत्वेनोक्तस्थलानुपपत्तिपरिहारमात्रार्थमनुवादानुसारात्। तत् किमर्थं ॡकारोपदेश इति प्राप्ते अभिधीयते—

ॡकारोपदेशो यदृच्छाऽशक्तिजानुकरणप्लुत्याद्यर्थ इति।

दध्यॢतकाय देहीति यदृच्छाशब्दः। ऋकारोच्चारणप्रवृत्तौ करणापाटवात् ॡजुइत्युक्तस्य कुमारीॡजुइत्याहेत्यशक्तिजानुकरणम्। प्लुतद्विर्वचनस्वरिताश्च प्लुत्यादयः। क्लृप्तशिखेत्यत्र "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" इति प्लुतः। अन्यथा अनृत इति निषेधः स्यात्। क्लृप्तेत्यत्र "अनचि च" इति द्वित्वम्। अन्तर्भावितण्यर्थात् कर्मणि क्तप्रत्ययान्ते प्रक्लृप्त इत्यत्र कर्मार्थकक्तप्रत्ययान्ते परेऽव्यवहितगतिः प्रकृत्या स्यादित्यर्थकेन "गतिरनन्तरः" इति सूत्रेण पूर्वपदे प्रकृतिस्वरविधानात् प्रशब्द उदात्तः। शेषनिघातेन ॡकारप्रत्ययाकारयोरनुदात्तत्वम्। तत "उदात्तादनुदात्तस्य" इति ॡकारस्य स्वरितत्वम्। न ह्येतद् असिद्धत्वेन साधयितुं शक्यम्। "कृपो रो लः" इत्यस्यैतदपेक्षया पूर्वत्वात्। पूर्वस्य च परं प्रत्यसिद्धत्वाभावात्। न च स्वरितपूर्वभाविनोऽनुदात्तत्वस्यापि अ-

ज्मात्रधर्मत्वात् तदपि प्रयोजनं शक्यम् । शेषनिघातस्य षाष्ठत्वेन तं प्रत्यसिद्धतया ऋकारत्वेनैव तत्प्रवृत्तेः । तत्राद्य-प्रयोजननिरासपरं वार्त्तिकम्—

न्याय्यभावात् कल्पनं संज्ञादिषु इति ।

अयमर्थः । ऋतेरीयङिति निर्दिष्टात्सौत्राद्दतिधातोः "क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि" इत्यनेन शिल्पिन्यभिधेये संज्ञायां च सोपपदान्निरुपपदाच्च धातोः क्वुन् स्यादित्यर्थकेन उणादि-सूत्रेण क्वुन्प्रत्यये संज्ञायां व्युत्पन्नतया शास्त्रानुगतत्वात् "कृतं कुर्यान्न तद्धितम्" इति गृह्यस्मृत्यानुगुण्याच्च ऋतकशब्द एव संज्ञा न तु लृतकः । यदृच्छाशब्दानां साधुत्वानभ्युपग-मात् । एतेन देशभाषानुसारेण क्रियमाणानां शास्त्राननुग-तानां कूची मञ्चीत्यादिनाम्नामप्यसाधुत्वं व्याख्यातम् । आ-दिशब्दादनुकरणेष्वपि शिष्टानुरोधदर्शनात् । लृवर्णस्य दीर्घा न सन्तीति मर्यादामतिक्रम्य क्रियमाणस्य दीर्घलृवर्णानुकरणस्या-प्यसाधुत्वमेव । मातृकान्यासादौ दीर्घलृवर्णस्य मन्त्रशास्त्रादौ प्रसिद्धत्वेऽप्यन्यत्र तदभावात् । अत एव दधि लृतकाय देही-त्याहेत्यनुकरणमप्यसाध्वेवेति ।

न च ऋतकशब्दस्य शास्त्रानुगतत्वेन लृतकशब्दस्यासंज्ञा-त्वेऽपि लृफिडलृफिड्डेति यदृच्छाशब्दौ दुर्वाराविति वाच्यम् । तत्रापि ऋधातोरौणादिकफिडफिड्डप्रत्ययान्तयोः ऋफिड-ऋ-फिड्ड इत्येतयोर्निवर्तकत्वात् ।

भाष्ये तु "पक्षान्तरैरपि परिहारा भवन्ति" इत्युक्तम् । तेन यदृच्छाशब्दानामपि साधुत्वमेव । न च गृह्यस्मृतिविरोधः । औपगवादिवदस्यापि साधुत्वोपपत्तेः । तत्र नामकर्तुः प्रत्यवा-यस्तु उक्तशास्त्रोल्लङ्घनादेव । न त्वसाधुप्रयोगात् । अत एव

कात्यायनादिशब्दानां संज्ञात्वं निर्बाधम् ।

यत्तु द्वितीयप्रयोजननिरासाय वार्तिकम्-

अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु इति ।

तस्यार्थः । शिष्टस्य विहितस्य अशिष्टाप्रतिषिद्धस्य विहितनिषिद्धान्यस्य वाऽनुकरणं साधु । ततश्चापशब्दप्रयोगस्य निषिद्धत्वात्तदनुकरणमप्यसाध्वेवेति ।

भाष्यकृतस्तु तत्प्रयोजनं समर्थयन्ते । न ह्यपशब्दवाचकत्वमात्रेणासाधुत्वम् । अपशब्दपदस्यापि गाव्याद्यपभ्रंशवाचकत्वेनासाधुत्वापत्तेः । अत एव "ते ऽसुरा हेलयो हेलय इति कुर्वन्तः" इत्यादीनामनुकरणानां साधुत्वं सर्वसिद्धम् ।

न च प्रकृतिवदनुकरणम् इत्यसाधुत्वातिदेशः । अपशब्दस्यानुपदिष्टत्वेन शास्त्रीयप्रकृतित्वाभावात् । असाधुत्वस्य शास्त्रीयकार्यत्वाभावाच्च ।

यदपि तृतीयप्रयोजननिरासाय वार्त्तिकम्—

एकदेशविकृतस्यानन्यत्वात्प्लुत्यादय इति ।

तस्याप्ययमर्थः । वक्ष्यमाणरीत्या ऋकारैकदेशस्य रेफस्य लत्वे एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः । न च अनृत इति प्लुतनिषेधापत्तिः । अनृत इत्यपहाय अरवत इति पठनीयत्वात् । छिन्नपुच्छस्य श्वत्वाद्यनपायेऽपि पुच्छवत्त्वप्रयुक्तकार्याणामप्रवृत्तिवत् ऋकारेऽपि रेफापगमदशायां रेफवत्त्वप्रयुक्तानिषेधाप्रवृत्तेः । न चैवं होतृ३कारेत्यादेर्दीर्घस्यापि प्लुतनिषेधापत्तिः, रेफवत्त्वादिति वाच्यम् । ह्रस्वस्य रवतो नेति वक्तव्यत्वात् । अत्र भाष्यम्—

स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन्प्रत्याख्यायते सैषा महतो वंशस्तम्बाल्लट्वा अनुकृष्यतइति ।

अत्रार्थः । एकस्य लृवर्णस्य प्रत्याख्यानाय अनृत इत्यस्य लघोः स्थाने ह्रस्वस्य रवतो नेतिगुरुतरन्यासाश्रयेण विपरीतमेव गौरवमिति ।

लट्वा करञ्जभेदे स्यात्फले ऽवद्ये खगान्तरे ।

इति विश्वः ।

स्यादेतत् । "कृपो रो लः" इतिसूत्रम् "अअ" इत्यस्मात्पूर्वमस्तु । ततश्चासिद्धत्वादेव प्लुत्यादयः सेत्स्यन्तीति "अनृत" इति यथान्यासमेवास्त्विति । अत्राहुः । तथा सति रोल इत्यस्यानुवृत्त्यर्थं "ग्रो यङि" इत्यस्यापि तत्रैव पाठापत्तौ निजेगिल्यतइत्यत्र लत्वस्यासिद्धतया धातोरेफान्तत्वात् "हलिच" इति दीर्घः स्यादिति ।

इदं पुनरिहावधेयम् । " गुरोरनृृत " इति दीर्घपाठ एवास्तु अनृऌत इतिच्छेदः । तकारस्य द्वन्द्वोत्तरवर्तित्वेन सामर्थ्येन च ऋकारेऽप्यन्वयः । दीर्घऌकारस्याप्रसिद्ध्या व्यावृत्त्यनर्हत्वात् । प्लुताविधौ च प्लुतस्यानुवादानुपपत्तेस्तपरत्वस्य ऋकारएवोपयुक्तत्वात् । अतो न दीर्घॠकारस्य प्लुतनिषेधापत्तिः । ऋकारऌकारयोः सवर्णदीर्घे दीर्घॠकारः । अनृत इत्येतच्च गुरोरित्यस्य विशेषणम् । ह्रस्वऋकारभिन्नस्य ऌकारस्य च गुरोः प्लुतो भवतीति सूत्रार्थः । न च ऌकारस्यैव प्लुतः स्यान्न तु वर्णान्तरस्य, ऌकारसामानाधिकरण्यादिति वाच्यम् । ह्रस्वऋकारभिन्नस्येति विशेषणवैयर्थ्यापत्तेः । नचात्राप्यनृत इति ऌकारस्यापि पर्युदासापत्तिः । विशिष्य ऌकारग्रहणसामर्थ्यात् । नच दीर्घकारमात्रस्य पर्युदासापत्तिः । ऋकारऌकारयोर्व्याख्यानवशेन सवर्णदीर्घनिर्णयात् । न च तथाऽप्येकमात्रावृद्ध्या वर्णोपदेशे ऌकारपाठापेक्षया लाघवाभाव इति वाच्यम् । प्लुतमात्रासिद्ध्यर्थस्य

यत्नस्य तद्विधावेव युक्तत्वात् ।

किं च "र्वोरुपधाया दीर्घ" इत्यत्र रेफद्वयप्रश्लेषाद्र एव यो रेफस्तस्मिन्नेवोपधाभूते दीर्घो न त्वासिद्धत्वप्रयुक्तरेफेऽपत्ति व्याख्याय निजेगिल्यते इत्यत्र "हलि च" इति दीर्घस्य वारणसम्भवात् "कृपो रो ल" इत्यस्य शास्त्रोपान्तपाठेनापि प्लुत्यादिसिद्धिः। न चैवं पिपठीरित्यादावपि दीर्घो न स्यात्, षत्वस्यासिद्धतया सस्य रुत्वप्रवृत्तेरिति वाच्यम् । तत्रासिद्धत्वस्य सत्वमात्रोपजीव्यत्वात्तदुत्तरं रुत्वप्रवृत्तेरिति दिक् ।

एओङ् ३ ऐऔच् ४ ।

नन्वत्र तपरत्वं वक्तव्यम् एत् ओत् ङ् इत्यादि । अन्यथा एचो ह्रस्वविधौ स्थानत आन्तरतम्येन ह्रस्वयोरेव एदोतोः प्रसङ्गात् । तपरत्वे तु "अचश्च" इत्यत्र द्विमात्राणामेवोपस्थित्या एकमात्रयोर्ह्रस्वसंज्ञाविरहेण तदप्रसङ्गात् । न च ह्रस्वो नास्तीति सिद्धान्तादापाद्याप्रसिद्धिः । छान्दोग्ये सात्यमुग्रिराणायनीयानाम्–

"सुजातेएश्वसूनृतेअध्वर्योओद्रिभिः सुतम् ।

शुक्रं तेएन्यद्"इति एकमात्रयोरेदोतोः प्रसिद्धेः । अन्तःपादस्थस्य अव्यपरस्य तत्प्रातिशाख्ये ह्रस्वयोरेदोतोर्विधानाच्च । न चैतदर्थम् "एच इग्घ्रस्वादेशे " इति सूत्रारम्भात् तत एव तन्निवृत्तिः । तत्सूत्रारम्भप्रयुक्तस्यैव गौरवस्यापत्तेः ।

अथ गीतिवशात्तत्र तथात्वेऽपि तदन्यत्र वेदे लोके च ह्रस्वयोरेदोतोर्न प्रसिद्धिः । प्रयोजनाभावेन तदुक्तयोरप्यत्रानभिमतत्वात्। अन्यथा अकारादिवत् लाघवात् तयोरेवात्रोपदेशः स्यात् । ग्रहणकशास्त्रेणैव दीर्घप्लुतसंग्रहासिद्धेः । न च गुण-

संज्ञायां, द्विमात्रसंज्ञिलाभार्थमत्र द्विमात्रोपदेशः । तत्र स्वरूपेणैव दीर्घनिर्देशसम्भवात् "अदेओ गुणः" इति । यथान्यासे वर्णोपदेशे मात्राचतुष्टयम् गुणसंज्ञायामेङिति सार्द्धमात्राद्वयमित्युभयत्र सार्द्धषण्मात्राः । उक्तरीत्या तु वर्णोपदेशे द्वे मात्रे गुणसंज्ञायां चतस्र इति षडेव । वर्णोपदेशे ङकारानुबन्धस्तु पक्षद्वयेऽपि समानः । "एच इग्घ्रस्वादेशे" इति सूत्रं तु न ह्रस्वयोरेदोतोर्व्यावृत्त्यर्थम्, किं त्वेदैतोः कण्ठ्यतालव्ययोरोदौतोश्च कण्ठ्यौष्ठ्ययोरुभयान्तरतमस्य ह्रस्वस्याभावात् कण्ठस्थानतया पूर्वभागसादृश्येन चतुर्णां स्थानेऽकारस्य, तालुस्थानतया उत्तरभागसादृश्येन च एदैतोः स्थाने इकारस्य, ओष्ठस्थानतया च ओदौतोः स्थाने उकारस्यच, प्राप्त्या अकारस्यापि पाक्षिकप्राप्तिप्रसङ्गात् तन्निवृत्त्यर्थमेव । अत एव सन्धीयमानवर्णद्वयसदृशावयववत्वेन सन्ध्यक्षरेति एचाम् पूर्वाचार्यसंज्ञा । तदभिप्रायेणैव—

अकारेकारयोर्योगादेकारो वर्ण उच्यते ।

इति मन्त्रशास्त्रे व्यवहारः । एचां शुद्धतालव्यशुद्धौष्ठ्यत्वमाश्रित्य तत्सूत्रं प्रत्याख्यास्यत इति त्वन्यदेतत् । अतस्तपरत्वं किमर्थम् इतिचेत् । मैवम् । तथाऽपि गङ्गोदकम्, रमेशः, खट्वैलका, खट्वौदनः, इत्यादौ पूर्वोत्तरवर्णयोर्मिलित्वा त्रिमात्रचतुर्मात्रत्वात् प्रमाणत आन्तरतम्येन तादृशानामेवादेशानां प्रसङ्गात् । न च चतुर्मात्रमप्रसिद्धम् । छान्दोग्ये प्रसिद्धेः । "इष्यते एव चतुर्मात्रः प्लुतः" इतिभाष्याच्च । तपरत्वे तु "तपरस्तत्कालस्य" इति एज्भिस्त्रिमात्रादीनामग्रहणे तेषां गुणादिसंज्ञाविरहेण दोषाभावात् । "प्लुतश्च विषये स्मृतः" इति तु प्लुताप्लुतप्रसङ्गे एव प्रवर्तत इति सिद्धान्तः ।

न च "अकः सवर्णे दीर्घः" इत्यत्र दीर्घ इतियोगं विभज्य "एकः पूर्वपरयोः" इत्यधिकारे यो विहितः स दीर्घो भवतीति व्याख्यानान्न दोष इति वाच्यम् । "अमि पूर्वः" "सम्प्रसारणाच्च" इति पूर्वरूपस्य "अतो गुणे" इति पररूपस्य च दीर्घत्वप्रसङ्गात् ।

अथ "प्रथमयोः" इतिसूत्रात् पूर्वसवर्णदीर्घस्याधिकाराच्च पूर्वपरयोरित्यस्योपस्थितया अमीत्येव निर्वाहे पूर्वग्रहणं यादृशः पूर्वः तथैव न तु तद्विलक्षण इति व्याख्यानात् गौरीमित्यादौ दीर्घः, पशुमित्यादौ च ह्रस्वः । "सम्प्रसारणाच्च" इत्यत्रापि तस्यैव पूर्वशब्दस्यानुवृत्तेः "हल" इति हलुत्तरसम्प्रसारणस्य दीर्घत्वविधानात् ज्ञापकाच्च विद्धमित्यत्र न दीर्घः । "अतो गुणे" इत्यत्रापि परग्रहणादेव सिद्धेः रूपग्रहणसामर्थ्यात् परसजातीय एवादेशः ।

वस्तुतस्तु अकारपरत्वे सवर्णदीर्घेण एङ्परत्वे च वृद्ध्यैव दीर्घसिद्धौ "अतो गुणे" इतिसूत्रमेव व्यर्थं स्यात् । न च वृद्धिं विनाऽप्यकारस्य एङ्रूपविधानेन दीर्घविधिनिर्वाहाद् वृद्धिप्रतिषेधार्थमेव तदिति वाच्यम् । तथाऽप्यकारपरत्वे फलाभावेन "अत एङि" इत्येव सूत्रापत्तेः । एवं सत्येकमात्रालाघवाच्च । अतश्च ह्रस्वाकारपरे पररूपविधानसामर्थ्यादेव पचन्तीत्यत्र न दोषः । अतो योगविभागो निर्दोष एवेति कल्प्यते । तथाऽपि कृष्णर्द्धिः तवल्कारः इत्यादौ गुणो न स्यात् । अकारस्य दीर्घविधानात् एङश्चान्तरतम्याभावादेव निवृत्तेः । गुणविधानस्य इकारोकारयोः परतः सावकाशत्वात् । "उरण् रपरः" इत्यस्य च वृद्धिविषये चारितार्थ्यात् । एवं च विगृहीतस्यैव श्रवणं स्यात् ।

ननु "ऋत्यकः" इति प्रकृतिभावविधानसामर्थ्यान्न तथा। न चवर्णादिनिवृत्त्यर्थतया तत्सार्थक्यम् । इक इत्येव निर्वाहे अक इत्यकारसङ्ग्रहस्य वैयर्थ्यापत्तेः । सत्यम् । तथाऽप्यकारस्यांशतः स्थानसाम्यमादाय एदोतोरेव प्रसङ्गात् । "कर्त्तरि चर्षिदेवतयोः" इत्यादिनिर्देशानुसरणे च गौरवात् । तस्माद्योगविभागो दुष्ट एवेति त्रिमात्रादिवारणार्थं तपरत्वमावश्यकमिति प्राप्ते—

उच्यते गुणवृद्धिसंज्ञयोरेचां तात्परत्वेन दीर्घाणामेव तत्र संज्ञित्वान्न दोषः । प्लुतस्य गुणवृद्धिसञ्ज्ञाविरहात् । "सहिवहोरोदवर्णस्य" इति वर्णग्रहणेन तात्परस्यापि तत्कालग्राहकत्वज्ञापनात् ।

न चैङैच्छब्दयोस्तात्परतया दीर्घमात्रोपस्थापकत्वेऽपि तदुपस्थितानां दीर्घाणामनुच्चारितत्वेन तपरत्वाभावात् सवर्णोपस्थापकत्वं स्यादेवेति वाच्यम् । तात्परत्वस्य संज्ञायामनुपयुज्यमानत्वेन सामर्थ्यात्तदुपस्थाप्यसञ्ज्ञिषु तत्कालावधारणार्थत्वात् । न च आकारस्य सवर्णग्राहकत्वाभावेन तत्रत्यतकारस्य ऐचां तत्कालग्राहकत्वसामर्थ्येऽपि गुणसञ्ज्ञायां न तथा, अकारस्य ग्राहकतानिषेधार्थमेव तत्र तदुपयोगेन वैयर्थ्याभावादिति वाच्यम् । "अणुदित् सवर्णस्य" इति सूत्रे "स्वं रूपम्" इतिसूत्राद् अशब्दसञ्ज्ञेत्यनुवृत्त्या सञ्ज्ञाविधौ अण् सवर्णान्न गृह्णातीति व्याख्यानादेव उभयत्र निर्वाहात् । तपरत्वस्य सञ्ज्ञिस्वरूपस्फुटतरप्रतिपत्तिमात्रार्थत्वात् । ऐङ् गुण इत्युक्ते ऐकारोत्तरङकाराभावादवर्णप्रश्लेषनिर्णयेऽपि ह्रस्वदीर्घसन्देहः, ऐजित्यत्र त्वाकारप्रश्लेषाभावसन्देहश्च स्यात् । मालाप्रस्थ इत्यत्र "मालादीनां च" इति पुनराद्युदात्तविधानगम्यायाः "प्रस्थेऽवृद्धमकर्क्यादीनाम्" इत्यत्र भेदप्रतियोगितावच्छे-

दकवृद्धत्वघटकवृद्धिसञ्ज्ञाया आकारेऽनुपपत्तिबलाभ्यकार-प्रश्लेषनिर्णयकल्पने च गौरवात् । त्व-

वस्तुतस्तु "एङ्द् गुणः" इति पाठेनाप्यकारमात्रस्य तत्कालग्राहकत्वसम्भवाद् "अदेङ् गुण" इति मध्ये तकारनिर्देशस्य सामर्थ्यमक्षतमेव । न चैकमात्राधिक्यम् । गुण एङद् इति पाठसम्भवात् । "वृद्धिरादैच्" इत्यादाविव सञ्ज्ञासञ्ज्ञिनिर्णयस्य व्याख्यानत उपपत्तेः । ऊकालसूत्रे अच्पदोपस्थितस्य ह्रस्वस्य वर्णग्राहकत्वेऽकारस्य सञ्ज्ञात्रयं स्यात् । अतः शब्दसञ्ज्ञायामण् सवर्णग्राहको नेतिपक्षस्य भाष्ये उक्तत्वेऽपि तस्याभ्युच्चयमात्रत्वात् ।

ननु तात्परस्यापि तत्कालग्राहकत्वे "ऋदोः"इत्यप्प्रत्ययो यवः, स्तवः, इत्यादावेव स्यान्न तु लवः, पवः, इत्यादावपि इतिचेत् । अत्र भाष्यम्—

नायं तकारः किं त्वसन्देहार्थः मुखसुखार्थो वा दकार इति ।

अथ "दिव उद्" इत्युकारादेशस्य द्युभ्यां द्युभिरित्यादौ "तित्स्वरितम्" इति स्वरितत्ववारणाय चर्त्वेन दकार एवायं न तु तकार इति व्यवस्थाप्य "अदसोऽसेर्दादु दो मः" इत्यत्रैव भाव्यमानस्याप्युकारस्य सवर्णग्राहकत्वं स्यादित्याशङ्क्य संहितया पाठे तपरसूत्रे चर्त्वेन दकारस्यापि निर्देशाद्दकारोऽपि तत्कालग्राहक इति समाहितं षाष्ठभाष्ये, तत्कथमत्र "ऋदोरप्" इत्यत्र दकारनिर्देशात् तत्कालग्राहकत्वं नास्तीत्युच्यतइति चेत् । अत्राहुः । थकारस्य धकारस्य वा स्थाने जश्त्वेन निष्पन्नो दकारोऽत्र विवक्षितः । स्वाभाविकदकारस्तु तत्कालग्राहकत्वेन तत्रोपन्यस्त इति न विरोधः ।

केचित्तु "तिति प्रत्ययग्रहणं कर्त्तव्यम्" इति वदता वा-

र्तिककारैश्च दकारस्य तत्कालग्राहकत्वानङ्गीकारात् तन्मतेनात्रत्यं भाष्यमित्याहुः ।

अन्ये तु "प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्" इति परिभाषयैव द्युभिरित्यादाविष्टसिद्ध्या न कोऽपि क्लेशो ऽनुसरणीयः ।

यत्तु तस्यास्तु परिभाषाया भाष्यवार्त्तिकयोरिहादर्शनाद् अयं यत्नो महानस्माभिरादृत इति हरदत्तेनोक्तम् । तच्चिन्त्यम् । "अङ्गस्य" इतिसूत्रं प्रत्याख्यातुं भाष्ये कण्ठत एवैतत्परिभाषोपन्यासात् ।

न च तत्र श्रयर्थं भ्वर्थम् इत्यादौ इयङुवङादीनां प्रत्ययग्रहणार्थवद्ग्रहणपरिभाषाभ्यां वारणेऽपि निरुतं दुरुतमित्यादौ हल उत्तरस्य संप्रसारणस्य दीर्घप्रसक्तेस्ताभ्यां दुर्वारत्वात् तद्वारणायाङ्गाधिकारस्यावश्यकत्वात् प्रत्ययग्रहणपरिभाषावैयर्थ्यमेव भाष्यसम्मतम्, अत एव "तित्स्वरितम्" इति सूत्रे प्रत्ययग्रहणपरिभाषा भाष्यवार्तिककाराभ्यां न क्व चिदाश्रितेति कैयटेनाप्युक्तमिति हरदत्ताभिप्रायमिति वाच्यम् । तथाऽपि "दिव उत्" इत्यादौ स्वरितत्वप्रसक्तेरेवाभावात् । यथोक्तकुसृष्टिमात्रस्यानुपादेयत्वात् । उदित्यस्य विधेयोकारानुकरणतयाऽस्य तित्त्वेऽपि विधेयस्योकारस्य तदभावात् । संज्ञायास्तान्तत्वेऽपि तित्त्वाभावाच्च । "तपरस्तत्कालस्य" इति सूत्रापेक्षिततपरत्वस्येत्सञ्ज्ञां विनाऽपि निष्पत्तेस्तकारस्येत्संज्ञायामेव मानाभावात् ।

न च यथा "अचो यत्" इत्यत्र संज्ञाधर्मेण तित्त्वेन विधेयस्य यप्रत्ययस्य तित्कार्यम्, तथा संज्ञाद्वारा अत्रापि संज्ञिनस्तित्कार्यं स्यादिति कैयटोक्तं युक्तमिति वाच्यम् । तत्र तकारस्यानन्यार्थ-

त्वात् । अत्र च विधीयमानस्याप्युकारस्य ग्राहकत्वादर्शनेन तन्निवृत्त्यर्थत्वेन सामर्थ्याभावात् । न चानुबन्धानामनेकार्थत्व-दर्शनात् तदपि स्यादिति वाच्यम् । इष्टस्थले तथात्वेऽप्यत्रा-न्यार्थत्वं स्वीकृत्य तन्निवृत्त्यर्थकष्टकल्पनाऽयोगात् । तस्मा-त्तत्रत्यं भाष्यादिकमभ्युपेत्यवाद एव । अत्रत्यभाष्यं तु यथा-श्रुतमेव साधु । दकारस्य तत्कालग्राहकत्वकल्पने प्रयोजना-भावादिति वदन्ति ।

अत्रेदं चिन्त्यम् । यद्युच्चार्यमाणात्तकारान्तादन्य एव तपरत्वाभाववान् संज्ञी विधेयः, तर्हि कथं "त्यदादीनामः" इत्यादौ अप्रत्यय इति पर्युदासप्रवृत्तिः । अस्य विधेयत्वाभावेन विधेय-भेदसत्त्वात्सवर्णग्राहकत्वापत्तेः ।

अथ सामर्थ्याद्विधेयसमर्पकस्यैव तत्र भेदप्रतियोगिकत्वे-नान्वय इति कल्प्यते, तर्हि यस्य सवर्णग्राहकत्वं प्रसक्तं तस्यैव तपरत्वे सति ग्राहकत्वाभावस्य तपरसूत्रार्थत्वात् किमा-यातम् । विधेयस्य तपरत्वाभावेन विधेयसमर्पकनिष्ठतित्त्वे-नैव स्वरितस्यापत्तेः ।

न च अनुबन्धस्यानन्यार्थतायामेव तत्प्रयुक्तकार्यस्य वि-धेये प्रवृत्तिरिति वाच्यम् । "दिव उद्" इत्यत्रापि तुल्यत्वात् । वर्णसंज्ञापक्षे द्युभ्यामित्यादौ "हलः" इत्यनेन द्युलोक इत्यादौ "संप्रसारणस्य च" इत्यनेन प्राप्तस्य दीर्घस्य व्यावृत्त्या तपरत्वस्य चरितार्थतया भाष्यादौ स्पष्टत्वाच्च । "अदसोऽसेः" इत्यत्र ह्र-स्वदीर्घयोरुकारयोः समाहारद्वन्द्वं कृत्वा उ इत्युभयोर्निर्देशसं-भवेन भाव्यमानस्याप्युकारस्य सवर्णग्राहकत्वामिति ज्ञापनस्या-प्यनावश्यकत्वात् । एतेन सामर्थ्याभावात् संज्ञागततित्त्वस्य न संज्ञिनि कार्यप्रवर्तकत्वमित्यपास्तम् । अनुपपत्तिमूलकत्वाभावेन

सामर्थ्ये क्षयेऽपि क्षतिविरहात् । सामर्थ्यस्याप्युक्तरीत्या रक्षणाच्च ।

न च तस्य स्वरार्थकत्वे किमर्थं प्रकारान्तरेण तन्निषेधः क्रियतइति वाच्यम् । असत्युक्तप्रकारेण तन्निषेधे तित्त्वस्य स्वरार्थत्वं विज्ञायेतेति तत्तात्पर्यस्यैवोक्तरीत्या विघटितत्वात् । अन्यथा स्वरितस्य दुर्वारत्वात् । एवं च दपरत्वमाश्रित्य स्वरितापत्तौ समाहितायां दित्त्वस्य तत्कालग्राहकत्वे च प्रयोजनाभावे सिद्धे प्रकृतभाष्यं यथाश्रुतमेव रम्यम् ।

किं तु अन्यार्थत्वेऽपि तत्प्रयुक्तस्वरस्य दुर्वारतया तदर्थस्य प्रकारान्तरेण समाधानाय प्रवृत्ते षाष्ठभाष्ये अत्रत्यभाष्ये च विरोधपरिहारोऽन्यस्थानीयदकारनिर्देशाभिप्रायेणैव परिहार्य इति चोक्तक्लेशवैयर्थ्यम् ।

अथैवम् "औत्" "इटोऽत्" इत्यादावपि स्वरितापत्तिः । न चेष्टापत्तिः । "स्तीर्णे बर्हिषि समिधाने अग्नौ" इत्यादावदर्शनात् । लविषीयेत्यत्रान्तोदात्तत्वस्य "आद्युदात्तश्च" इति सूत्रे भाष्यएवोक्तत्वाच्च इतिचेत् । मैवम् । "न विभक्तौ तुस्माः" इति तत्र इत्संज्ञानिषेधाद् इति दिक् ।

स्यादेतत् । वर्णग्रहणेषु तद्वर्णान्तर्गता वर्णान्तरसदृशभागाः कार्यं प्रवर्तयन्ति न वा । नाद्यः । अग्ने इन्द्र, वायो उदकमित्यत्र सवर्णदीर्घस्य, अग्ने एहीत्यत्र "एङः पदान्ताद्" इति पूर्वरूपस्य, आलूयेत्यत्र "ह्रस्वस्य पिति कृति" इति तुगागमस्य, मालाभिरित्यत्र "अतो भिस ऐस्" इत्यस्य च प्रवृत्त्यापत्तेः । एचामुत्तरभागस्य इउवर्णसादृश्यात् । आकारादीनां चोत्तरभागस्य ह्रस्वतद्वर्णसाम्यात् । नान्त्यः । ऋधेर्ऋकारान्तर्गतरेफसदृशभागस्य स्वातन्त्र्येणानुपादाने "तस्मान्नुड् द्विहलः" इति नुडा-

गमानुपपत्तेः । "कृपो रो लः" इत्यस्यानुपपत्तेश्च । ॠकारान्त-र्गतरेफातिरिक्तरेफस्य तत्राभावात् । गृणातीत्यादौ रेफनिमित्तकणत्वानुपपत्तेश्च इतिचेत् । मैवम् । पक्षद्वयस्यादोषत्वात् ।

तत्र नेत्येकः पक्षः।नृसिंहवद् वर्णान्तरत्वेन तत्र तद्वर्णप्रयुक्तकार्यप्रवृत्तौ मानाभावात्। "गोन्यच" इत्यत्र "नौन्यच" इत्यत्र च गोनौशब्दयोः पृथगुपादानसामर्थ्याच्च । अन्यथा पूर्वोत्तरभागावादाय द्वयोरपि न्यच्त्वेन तद्वैयर्थ्यापत्तेः । नुड्विधिलादेशविनामेषु तु प्रतिविधेयम्। "नतिर्दन्त्यमूर्द्धन्यभाव" इति प्रातिशाख्योक्त्या दन्त्यस्थाने मूर्द्धन्यादेशस्य नतिसंज्ञत्वाद् विनामपदं प्रकृते नस्य णत्वपरम् । नुड्विधौ तावत् द्विहल इति विहाय "तस्मान्नुड्" इत्येव सूत्रं कार्यम् । दीर्घादभ्यासात्परस्य नुट्स्यादिति तदर्थः । न च आट आटतुः इत्यादावतिप्रसङ्गः । "अश्नोतेश्च" इत्यस्य यथान्यासे विध्यर्थस्यात्र नियमार्थत्वात् । अकारोपधानां मध्ये अश्नोतेरेव नुडागम इति नियमार्थः । तन्मात्रानिषेधस्य नाश्न इत्यतोऽपि सिद्धेः । "कृपो रो लः" इत्यत्रापि कृप उः रः लः इतिच्छेदः । कृप इत्यविभक्तिको निर्देशः । उच्चारणार्थश्चाकारः । कृपेर्यो रेफस्तस्य लः कृपेॠकारस्यावयवो यो रेफो रेफसदृश इति यावत् तस्य च लादेश इति तेन चलीक्लृप्यतइत्यादौ "रीगृत्वतः" इति रीगागमस्य रेफस्यापि लत्वसिद्धिः । अत एव "कृपे रो लः" इति पाठो भाष्यविरोधादुपेक्ष्यः ।

वस्तुतः संबन्धसामान्ये षष्ठीमाश्रित्य कृपेः साक्षादवयवस्य परम्परावयवस्य च रेफस्योपादानात्तत्रापि न दोषः । भाष्यस्य समाधानोपलक्षणमात्रत्वात् । स्वतन्त्रास्वतन्त्रवृत्तिजातिर्नेति स्वयं वक्ष्यमाणत्वाद्रेफस्य विधीयमानं लत्वं लृका-

रैकदेशः कथं स्यादिति वस्तुत इति चिन्त्यम् ।

यत्तु "रो लः" इत्यत्र अनुवाद्ये विधेये च स्वतन्त्रास्वतन्त्रवर्णसाधारणजातिर्ग्राह्या, तेन ऋकारस्य लृकारादेश एवात्र विधेयः, एकदेशस्य पृथक्कर्तुमशक्यत्वात् । तन्न । तादृशैकजातौ प्रमाणाभावात् । "लुटि च क्लृपः" इत्यादिनिर्देशश्च इह लिङ्गम् । गृणातीत्यादौ णत्वसिद्ध्यर्थं च "छन्दस्यृदवग्रहाद्" इत्यत्र ऋदितियोगं विभज्य ऋतः परस्य नस्य णत्वं विधीयते । ततः "छन्दस्यवग्रहाद्" इति सूत्रान्तरम् । ऋत इत्यनुवृत्त्या "पितृयाणं द्युमद्" इत्यत्र पदपाठे णत्वम् । न चैवं तपरत्वान्मातॄणामित्यादौ णत्वं न स्यादिति वाच्यम् । "रषाभ्याम्" इत्यत्रापि रेफतत्सदृशभागयोः साधारण्येन ग्रहात्तत एव सिद्धेः । न च तत्र रेफसदृशभागोपादाने प्रमाणाभावः । "क्षुभ्नादिषु" तृप्नोतिशब्दस्य नृनमनशब्दस्य च पाठस्यैव तथात्वात् । न च नृनमनस्यापत्यं नार्नमनिरित्यत्र स्वतन्त्ररेफप्रयुक्तणत्ववारकतया सार्थक्यात्कथं नृनमनशब्दपाठस्य ज्ञापकत्वमिति वाच्यम् । "असिद्धं बहिरङ्गमन्तरङ्गे" इत्यत एव सिद्धेः । एवं च योगविभागपक्षस्य पश्चादुपन्यासेऽपि न तत्र भाष्यतात्पर्यम् । किं त्वत्रैव लाघवादित्यवधेयम् ।

न च ऋकारे रेफोत्तरवर्त्तिनाऽज्भागेन व्यवधानात् कथं "रषाभ्याम्" इत्यस्य प्रवृत्तिरिति वाच्यम् । "व्यवायेऽपि" इति योगविभागात् । न च कृतेनेत्यादावतिप्रसङ्गः । "अट्कुप्वाङ्नुंभिः" इति नियमात् । आक्षरसमाम्नायिकैः तत्संगृहीतैर्वा व्यवधाने यदि भवति तदा एतैरेवेति तस्यार्थः ।

वस्तुतस्त्वस्मिन्पक्षे उक्तज्ञापकात् प्रशास्तॄणामित्यादिनिर्देशाच्च ऋकारात्परस्य णत्वमेव लाघवात् ज्ञाप्यम् । योगविभा-

गस्य वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते इतिपक्षं प्रक्रम्य भाष्ये लिखितत्वात् ।

ननु तत्पक्षे पूर्वोक्तदोषाः कथं परिहार्या इति चेत्, उच्यते—एचां भागद्वयस्य विवृततरत्वेन अग्ने इन्द्र इत्यादौ सवर्णदीर्घाभावः । स्वतन्त्रयोरिदुतोर्विवृतत्वेन प्रयत्नभेदात् सावर्ण्याभावात् । अत एवाग्ने एहीत्यत्र न पूर्वरूपापत्तिः । "एङः पदान्तादति" इत्यकारेण सावर्ण्याभावादेचः पूर्ववर्त्यकारभागानुपस्थापनात् । "दीर्घात् पदान्ताद्वा" इति एकयोगेनैव सिद्धौ दीर्घात् पृथक् तुगागमं विधाय "पदान्ताद्वा" इति विकल्पविधानेन दीर्घे ह्रस्वाश्रयो विधिर्न भवतीति ज्ञाप्यते । दीर्घस्यापदान्ते नित्यं पदान्ते च विकल्पेन तुक् इतिव्यवस्थार्थं हि तत्र पृथक् सूत्रम् । यदि तु "छे च" इति ह्रस्वस्य विधीयमानस्तुग्दीर्घेऽपि प्रवर्तेत, तदाऽपदान्ते दीर्घेऽपि तेनैव सिद्धत्वात् पदान्ते दीर्घस्य विकल्पमात्रं विदध्यात् । अत एवालूय प्रमायेत्यत्र "ह्रस्वस्य पिति कृति" इति तुगभावः । खट्वाभिः मालाभिरित्यादौ ऐसादेशोऽपि न भवति । तपरत्वसामर्थ्यात् । अन्यथा अस्येत्येव ब्रूयात् । याता वातेत्यादौ अतो लोपोऽपि न भवति । "गापोष्टक्" इत्यत्र कित्त्वेन दीर्घाकारे अतो लोपो न प्रवर्त्ततइति ज्ञापनात् । अन्यथा ह्याकारोत्तरभागवर्त्तिनोऽकारस्य लोपे पूर्वभागवर्त्तिनश्च प्रत्ययाकारेण सह पररूपे सामगः सुराप इति सिद्धौ "आतो लोप इटि च" इत्यालोपप्रवृत्त्यर्थं कित्त्वं व्यर्थं स्यादिति दिक् ।

ननु सय्ँयन्ता सव्ँवत्सरः सल्ँलोक इत्यादौ एकवर्णात्मकस्यापि यकारद्वयादेरणुपदिष्टैरनेकवर्णात्मकैः सावर्ण्येन ग्रहणादस्तु हल्संज्ञा, कुक्कुटः पिप्पली पित्तमित्यादिस्थानां तु क-

थम्, क्क प्प् त्त् इत्यस्याखण्डतया एकवर्णत्वात्। अन्यथा व्यञ्जनस्यार्द्धमात्रतया क्क् इत्यादेः मात्राकालत्वानुपपत्तेः । ततश्च तस्य तदवयवयोश्च प्रत्याहारमध्ये पाठाभावात् पठितैश्चाग्रहीतत्वात् हल्संज्ञाविरहात्संयोगसंज्ञकत्वाभावे "संयोगे गुरु" इत्यस्याप्रवृत्त्या तत्पूर्वस्योकारादेर्गुरुत्वाभावे "गुरोरनृतः" इति प्लुतो न स्याद् इतिचेत् । अत्राहुः—द्वावेवात्र ककारौ पकारौ तकारौ च मात्राकालौ, तुल्यव्यापारोच्चार्यतया द्रागेवोच्चारणात्तु द्वयोरैक्यभ्रम इति शिष्टसंप्रदाय इति परमार्थतो वर्णानां निरवयवतया प्रक्रियादशायामेवायं विचार इति ॥

हयवरट् ५ ।

अत्र हकारोपदेशोऽटि अशि हशि इणि च ग्रहणार्थः । तेन महान् हि इत्यत्र "दीर्घादटि समानपादे" इति हकाररूपमटमाश्रित्य नस्य रुत्वम्, "आतोऽटि नित्यम्" इत्यनुनासिकश्च, "भोभगो" इत्यादिना रुस्थानीययकारस्य "हलि सर्वेषाम्" इति लोपश्च। तत्राप्यशीत्यनुवृत्तेः । ब्राह्मणो हसतीत्यत्र "हशि च" इत्युत्वम् । लिलिहिढ्वे लिलिहिध्वे इत्यत्र "विभाषेटः" इति ढत्वविकल्पः । "इणः षीध्वम्" इतिसूत्रादिण इत्यस्यानुवृत्त्या इणः परो य इट् ततः परस्य विभाषा मूर्द्धन्यादेशस्य तेन विधानात् ।

अन्त्यसूत्रे तदुपदेशस्तु वल्रल्झल्शल्प्रत्याहारेषु ग्रहणार्थः । तेन रुदिहि स्वपिहीत्यत्र "रुदादिभ्यः सार्वधातुके" इति वलादिसार्वधातुकलक्षण इट् । स्निहित्वा स्नेहित्वा सिस्निहिषति सिस्नेहिषतीत्यत्र "रलो व्युपधाद्धलादेः संश्च" इति इकारोकारान्यतरोपधात् रलन्तात्

परौ क्त्वासन्प्रत्ययौ वा कितौ स्तः इति कित्त्वविकल्पक। अदाग्धाम् अदाग्धम् इत्यत्र "दादेर्धातोर्घः" इति घत्वस्यासिद्धतया हकाररूपात् झलः परस्य सिचः सकारस्य "झलो झलि" इति लोपः। अरुक्षत् अलिक्षदित्यत्र "शल इगुपधादनिटः क्सः" इति शलन्तत्वप्रयुक्तः सिचः क्सादेशः। तस्मादुभयत्र निर्देशः प्रत्येकं प्रत्याहारचतुष्टये ग्रहणार्थ इति दीक्षिताः।

नव्यास्तु प्रथमोपदेशस्य अम्प्रत्याहारे ग्रहणमपि प्रयोजनमस्ति। प्रयोजनचतुष्टयनियमस्य भाष्येऽनुक्तत्वात्। ककारहकाररूपव्यञ्जनानुकरणे पुंसः क्हौ इति समासे "पुमः खय्यम्परे" इति रुत्वं प्रयोजनम्।

यत्तु कारप्रत्ययस्यावश्यकतया नैतयोरानन्तर्यं सम्भवतीति। तन्न। "बहुलमेव तद्विधानम्" इति कौस्तुभादावुक्तत्वात्। एतेन "स्कोः संयोगाद्योः" इत्यादौ छान्दस एव तदभावः। "उच्चैस्तरां वा वषट्कारः" इत्यादौ पदादपि कारप्रत्ययोत्पत्तिवदिति निरस्तम्। छान्दसत्वापेक्षया वैकल्पिकप्रवृत्तिरूपबाहुलकस्यैव युक्तत्वात्। सवर्णसंज्ञासूत्रे चशयोः कङयोः शषसविसर्जनीयेत्यादिकौस्तुभप्रयोगाणां तत्तत्सूत्रव्याख्याने प्राचीनार्वाचीनानेकप्रयोगाणां कः खो गो घश्च लक्ष्मीं वितरतीत्यादिभामत्यादिप्रयोगाणां च छान्दसत्वेन साधयितुमशक्यत्वाच्च। केवलव्यञ्जनोत्तरमभियुक्तानां कारप्रयोगस्य कुत्राप्यदर्शनाच्च।

यदपि "झलां जशोऽन्ते" इति जश्भावस्य दुर्वारत्वात् हकारस्य खय्परत्वं नास्ति। न च मुख्यपदान्तएव तत्प्रवृत्त्या व्यपदेशिवद्भावेन पदान्तेऽत्र न तत्प्रवृत्तिः, अन्यथा "स्कोः संयोगाद्योरन्ते च" इत्यत एवान्तपदानुवृत्तौ

पुनरन्तग्रहणवैयर्थ्यादिति वाच्यम् । झलीत्यादिनिवृत्त्या पदस्येत्यर्थानुवृत्त्या चान्तग्रहणस्य चरितार्थत्वादिति । तदप्यसत् । स्थानिसमर्पकझल्शब्दस्य पृथगुपादानसामर्थ्यादेव झलि इत्यस्य निवृत्तिसिद्धेः। अन्यथा "झलो झलि" इत्यनन्तरं "जशन्ते" इत्येव सूत्रं स्यात् "स्कोः" इति सूत्रे पृथगन्तग्रहणसामर्थ्यादेव मध्यस्थसूत्रद्वये तदनुवृत्त्यभावोपपत्तेः ।

न चैवमपि तत्सूत्रद्वये लोपपदानुवृत्तिर्न स्यादिति वाच्यम् । जशः स्वरितत्वाभावादननुवृत्तौ विधेयतया लोपस्य लाभोपपत्तेः । न च झलः परस्य सस्य लोपविधायके "झलो झलि" इति सूत्रे झल इत्यस्य पञ्चम्यन्ततया "जशन्ते" इति सूत्रे षष्ठ्यन्तत्वं न स्यादिति वाच्यम् । शब्दाधिकाराश्रयणात् । न च सस्येत्यस्याप्यनुवृत्त्यापत्तिः । स हि झल इत्यस्यानुवृत्तस्य पञ्चम्यन्तत्वे षष्ठ्यन्तत्वे वा । नाद्यः । झलः परस्य सस्य जश् स्यादित्यर्थे झलीत्यस्यान्तइत्यस्य च नैरपेक्ष्येण निमित्तत्वे झलीत्यंशे "झलां जश् झशि" इत्यंशतः सिद्धेः । "खरि च" इत्यंशतो बाधाच्च। "झलो झलि" इति लोपविधानविरोधाच्च। न च समुच्चयः । चकारादेरभावात् । भावाभावयोस्तद्विरोधाच्च । एतेन विकल्पोऽप्यपास्तः । क्लृप्तकल्प्ययोस्तदयोगान्निरनुयोगत्वाच्च । नान्त्यः । स्थान्याकाङ्क्षाविरहात् । न च झलीत्यभेदेन सकारे विशेषणम् । अव्यभिचारात् । नापि वैपरीत्येन विशेषणविशेष्यभावः । विशेष्यभागवैयर्थ्यात् ।

वस्तुतस्तु "इट ईटि" इत्यनन्तरं "झलो झलि" इति सूत्रं कृत्वा "जशन्ते" इति सूत्रं कर्त्तव्यम् । इत्थं च "ह्रस्वादङ्गात्" "इट ईटि" इति सूत्रद्वये सकारस्य लोपप्रतियोगिकत्वलाभो निर्बाधः।

सकारानुवृत्त्यादिकं पूर्ववत्। "स्कोः संयोगाद्योरन्ते च" इति सूत्रं पाठ्यम्। "जशन्ते" इतिसूत्रादन्तग्रहणस्य चकाराच्च झलीत्यस्य लाभोपपत्तेः।

यदि त्वेवमपि चकारेण जश्त्वसमुच्चयः स्यादिति दुराग्रहः, तर्हि "स्कोः" इति सूत्रं यथाश्रुतमेवास्तु। पुनरन्तग्रहणसामर्थ्याच्च जशन्त इति सूत्रनिर्दिष्टस्य कस्यापि नानुवृत्तिरिति। एवं सिद्धे सति "झलां जशोऽन्ते" इति सूत्रं व्यवधानेन कृत्वा झलाम् इत्यस्य पुनर्ग्रहणसामर्थ्यादेव झलीत्यस्य निवृत्तिसिद्धौ अन्तग्रहणस्य मुख्यान्तग्रहणार्थत्वस्यावश्यकत्वात् नात्र जश्त्वेन समाधानं साधीयः। अत एव चित्पित्किचिदित्यादिप्रयोगाः। आदैजित्यत्र तपरस्योत्तरार्थत्वे पदान्तत्वाभावाज्जश्भावानापत्तिशङ्का असन्देहार्थतया पूर्वशेषत्वात् समाधानं चेतिद्वयं कौस्तुभोक्तं च सङ्गच्छते।

यदप्युक्तम् "ञमङणनम्" सूत्रे मकारानुबन्धप्रत्याख्यानाय झकारभकारौ पदान्तौ न स्त इति भाष्ये वक्ष्यते। उक्तरीत्या च पुम्कुझ् इत्याह पुम्कुभ् इत्याहेत्यादौ अञ्ङञ्प्रत्याहारयोःकुझ्भ् इति कुभ्झ् इति चानुकरणे यञ्प्रत्याहारस्याप्यतिप्रसङ्गः स्यादिति तद्भाष्यविरोधः।

मन्मते तु जश्त्वेन नातिप्रसङ्गः। न च तस्यासिद्धत्वम्। त्रितयापेक्षयाऽपि पूर्वत्वात्।

तस्मात्पदान्तगतझकारभकाराभावप्रतिपादकभाष्यबलादीदृशस्थले जश्त्वादिकमनभिधानं वाऽवश्यमाश्रयणीयम्। अन्यथा कुगुह् इत्याहेत्यादौ संयोगादिलोपस्य प्रसक्त्या "सडि" इति वचनावश्यकत्वे "परेश्च घाङ्कयोः" इति सूत्रगततत्खण्डनपरभाष्यविरोधाच्चेति। तदप्यसत्। अतिप्रसङ्गस्थले तद्बलादनभिधा-

नेऽपि प्रकृते बाधकाभावात् । न ह्यत्र संयोगादिलोपप्रसक्तिः । संयोगस्य झलपरत्वाभावात् । पदान्तत्वाभावाच्च । न चान्तर्वर्तिविभक्त्या प्रकृते ह्र् इत्यस्य पदान्तत्वम् । उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणनिषेधात् । पुम् त्रह् इत्याद्यनुकरणेऽमि प्रयोजनसम्भवाच्च ।

तत् शृह्रौ इत्यत्र "छत्वममि" इति प्रयोजनमस्तीति केचित् । तच्चिन्त्यम् । यथाश्रुते अट्प्रयोजनोक्त्यैव क्रोडीकृतत्वात् । तस्मादमि प्रयोजनं दुर्वारमिति दिक् ।

स्यादेतत् । रेफस्य यरन्तर्भावात् तत्कार्याणि प्रसज्यन्ते । तथा हि । मद्रह्रदः भद्रह्रद इत्यत्र "अचो रहाभ्याम्" इति अचः पराभ्यां रेफहकाराभ्यां परस्य यरो विधीयमानं द्वित्वं स्यात् । न च "रो रि" इति लोपान्निर्वाहः । तं प्रति द्वित्वस्यासिद्धत्वात् । "हलो यमां यमि" इतिलोपस्य तु वैकल्पिकतया पक्षे रेफद्वयश्रवणापत्तेः । कुण्डं रथेन वनं रथेनेत्यत्र "अनुस्वारस्य ययि परसवर्णः" स्यात् । न च रेफोष्मणां सवर्णाभावान्न दोषः । विजातीयतदभावेऽपि रेफस्यैवापत्तेः । प्रातर्नयतीत्यादौ "यरोऽनुनासिकेऽनुनासिको वा" इति स्थानसाम्येन पक्षे णकारः स्यात् ।

न च "हरयवट्" इति यकारवकाराभ्यां पूर्वं रेफो निर्देश्य इति वाच्यम् । देवित्वा दिदेविषतीत्यत्र "रलो व्युपधाद्" इति पक्षे कित्त्वप्रसङ्गात् । वकारस्याप्युक्तरीत्या रलन्तर्भावात् । न च तत्र अव्युपधाद् इतिच्छित्वा वकारद्वयं च प्रश्लिष्य अवकारान्ताद् इउवर्णोपधाद् इतिव्याख्यानाद्वकारान्ते न दोष इति वाच्यम् । तथा ऽपि गौधेर इत्यादौ " गोधाया ढ्रक् " इति ढ्रक्प्रत्यये ढस्य एयित्यादेशे आदिवृद्धौ "यस्येति च" इत्याकारलोपे च " लोपो व्योर्वलि " इति यका-

रलोपानुपपत्तेः । पचेरन्नित्यत्र सीयुटि सलोपे पचेर्ईय् रन् इत्यत्र तदसिद्धेश्च । रेफस्य वल्यनन्तर्भावात् ।

न च "रलि" इत्येव तत्र वक्तव्यमिति वाच्यम् । हय गतौ हय्यादित्यत्र यकारस्यापि लोपापत्तेः । न च यथान्यासएव र्वलि इति सरेफं पदं छित्त्वा रेफे वलि च परतो लोपविधानान्न दोष इति वाच्यम् । तथाऽपि यणूस्थले सर्वत्र रणिति न्यासापत्तेः । यथासंख्यपरिभाषया इकारोकारऋकाराणां स्थाने रेफयकार-वकारादेशापत्तेश्च । न च "स्थानेऽन्तरतम"परिभाषया निर्वाहः । परत्वाद्यथासंख्यस्यैवापत्तेरिति वदन्ति ।

वस्तुतस्तु "व्युपधात्" इत्यत्र इकारोकारयोः स्थाने यकारवकारयोः "अत्रिणम्रसौ" इत्यत्र ऋकारस्थाने रेफादेशस्य च दर्शनादन्तरतमपरिभाषैवात्र प्रवर्त्तते ।

यद्वा "अऋइण्" "उलृक्" इति पूर्वत्रापि न्यासः कर्त्तव्यः । इक्स्थाने ऋक् इति इण्स्थाने च ऋण् इति प्रदेशेषु व्यवहर्तव्यम् । इणूग्रहणानां सर्वेषां सिद्धान्तेऽपि द्वितीय-णकारेणैव वाच्यत्वात् । इच्प्रत्याहारस्थलेऽपि ऋच्पदमेव वक्तव्यम् । "इसुसुक्तान्तात्" इत्यत्रापि उक्स्थाने ऋक्पदमेव देयम् । न च इकारस्याधिकस्य संग्रहापत्तिः । इष्टापत्तेः । "यस्येति च" इकारलोपमिकादेशं च कृत्वा सिद्धान्ते यथारूपं तथैव काद्देशेऽपि । "यस्येति च" इत्यस्याप्रवृत्तिमात्रं तु न दोषाय । "श्र्युक" इत्यत्रापि ऋक्पदोपादाने इकारस्याधिकस्य संग्रहेऽपि श्रिग्रहणस्य नियमार्थत्वात् ।

वस्तुत ऋक्प्रत्याहारे इकारस्य कुत्रापि ग्रहणं नेति ज्ञापनार्थत्वात् । तेन "उगिदचां सर्वनामस्थाने" "उगितश्च" इत्यादौ न दोषः । एवं च हस्तिनीनां समूहो हास्तिकमिति ठक्प्रत्यये इका-

देशाभावे प्रसंज्ञाविरहे "भस्याढे तद्धिते" इति पुंवद्भावो न स्याद् इतिदोषविरहोऽपि निर्बाधः। "अणुदित् सवर्णस्य" इत्यत्र तु न कोऽपि विशेषः । परेणैव तत्र प्रत्याहारात् । तदन्यत्र तु अणूप्रत्याहारस्य पूर्वेणैव ग्राह्यत्वात् उकारस्य तद्बहिर्भाव ऋकारस्य तदन्तर्भावश्च स्यादिति दोषः। परं तु व्य इति तत्स्थले सर्वत्र निर्देश्यम्। उ इ अ इत्येषां तेन संग्रहात्। व्याख्यानवशाच्च वकारादीनां न ग्रहणम् । सिद्धान्तेऽपि पूर्वेण परेण वा णकारेण प्रत्याहार इति निर्णयार्थं व्याख्यानस्यैवादरणीयत्वात् । पूर्वत्र णकारानुबन्धश्च परित्याज्यः। न चैवं व्याख्यानतो विशेषप्रतिपत्तिरिति परिभाषायां लिङ्गाभावः। लिङ्गान्तरस्य संभवात्।

वस्तुतस्तु "अऋइउण्" "ऌक्" इति न्यासः कार्यः। अत उकारस्य न बहिर्भावः । परिशिष्यते तु ऋकारस्याधिकस्यान्तर्भावापत्तिः। साऽप्येवं परिहार्या । तृतीयेतिनिर्देशेन अणग्रहणेषु ऋकारो न गृह्यते इति ज्ञाप्यते। तथा हि। "हलः" इतिसूत्रे अण इत्यस्य नानुवृत्तिरिति लण्=सूत्रे स्थापयिष्यते। तथाऽपि तत् सिद्धान्तदृष्ट्यैव । एतत्पक्षे तु तत्राप्यण इत्यनुवर्त्यमेव। "इकः काशे" इत्यत्रापि तदनुवृत्तौ इग्रूपस्याण इत्यभेदान्वयेन समाधानस्य भाष्यएव स्पष्टत्वात् । यदि च "ढ्रलोपे" इतिसूत्रे अणग्रहणेन ऋकारोऽपि गृह्येत, तदा "हलः" इत्यत्रापि तथात्वप्रसक्त्या तृतीयेत्यत्र त्रेस्तीयप्रत्यये रेफस्य संप्रसारणे ऋकारे च कृते ऋकारस्यापि दीर्घापत्त्या तृतीयेति निर्देशोऽसंगत एव स्यात् । अत इष्टानुरोधात्पूर्वेणाणूग्रहणस्थले ऋकारस्तन्मध्ये न गृह्यते इतिज्ञापनेन सकलेष्टसिद्धेः ।

स्यादेतत् । ऋकारस्य यथान्यासपक्षे पूर्वेणैव अण्प्रत्याहारे गृह्यमाणे तद्बहिर्भूततया तद्व्यावृत्त्यर्थं तत्र पूर्वेणाणुग्रहणं स्वीक्रियते । उक्तन्यासे तु पूर्वेणाणुग्रहणेऽपि तद्बहिर्भावानुपपत्त्या उक्तातिप्रसङ्गस्य च तृतीयेति निर्देशेनैव वारणसम्भवात् तत्र अणुग्रहणं पूर्वेणैवेत्यत्र मानाभावः । परेणाणुग्रहणेऽपि ऋकारस्याणुबहिर्भाव इति स्वीकारे तु "अणुदित् सवर्णस्य" इत्यत्रापि तद्ग्रहणानुपपत्तिः इतिचेत् । सत्यम् । ऋलृवर्णयोर्मिथः सावर्ण्यारम्भसामर्थ्यात् तस्य ग्राहकत्वसिद्धेः । न च सवर्णदीर्घादिविधाने चारितार्थ्यमिति वाच्यम् । तथाऽपि "ऋदुपधाच्चाल्कृपिचृतेः" इत्यत्र भेदप्रतियोगित्वेन लृकृपिनिवेशेन पर्युदासव्यतिरेके ऋदुपधत्वप्रयुक्तकार्यापत्तेरपेक्षितत्वात् । ऋकारस्य लृकारग्राहकत्वाभावे च सामान्यशास्त्रस्य तद्विषयकत्वप्रसक्त्यभावे तद्व्यावृत्तितात्पर्यकस्य लृकृपिपर्युदासस्य वैयर्थ्यापातात् ।

वस्तुतो हलां दीर्घत्वबाधाद् एचां च विशेषाभावात्तत्र परेणाणुग्रहणवैयर्थ्यात् । तथा च यथासङ्ख्यपरिभाषयैव निर्वाह इति भगवतो भाष्यकारस्य भावः । वेलीति व्याख्यानेन च पचेरन् गौधेरादिसिद्ध्यनन्तरं दोषान्तरानुपन्यासेन तद्दोषपरिहारे तत्सम्मतिनिर्णयात् । अत एव "अथ वा पुनरस्तु परोप्रदेश" इति रेफापकर्षसमकक्षतयैव यथान्यासे दोषोद्धाराभिधानात् । तद्यथा ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविष्टामित्यत्र सामान्यतः प्राप्तं भोजनं विशेषशिष्टेन परिवेषणेनेव कार्यप्रतियोगियन्निष्ठपरत्वनिरूप्यपूर्वत्वरूपेण द्वित्वनिमित्तत्वश्रुत्या कार्यप्रतियोगित्वं बाध्यतइति मद्रह्रद इत्यादौ न द्वित्वम् । सामान्यस्य विशेषपर्यवसानपर्यन्तं साक्षाच्छ्रुतकार्या-

न्तरस्यैव प्रथमोपस्थित्या तद्विशेषेऽन्वयात् । तदेतदुक्तम्—

नेमौ रहौ कार्यिणौ द्विर्वचनस्य, किं तर्हि निमित्तमिति ।

हकारस्य यर्बहिर्भूतस्य यथा न द्वित्वं, तथा तदन्तर्भूतस्यापि रेफस्य । कार्योपधायकसामग्रीवैकल्यसाम्ये तदन्तर्भावमात्रस्याकिंचित्करत्वात् । तच्च दृष्टान्ते यत्वाभावात् दार्ष्टान्तिके चोद्देश्यतावच्छेदकघटकभेदप्रतियोगित्वात् । रेफभिन्नयत्वस्यैव न्यायवशाद्द्वित्वविधानुद्देश्यतावच्छेदकत्वात् । एवम् "अनचि च" इत्यनेन हर्यनुभव इत्यादावपि रेफस्य न द्वित्वम् । अर्थाधिकारेण तत्रापि यर इत्यस्य रेफभिन्नपरत्वात् ।

अथैवम् "इको यणचि" इत्यादिकं दध्युदकमित्यादौ न प्रवर्तेत । विशेषतः श्रुतेन स्थानित्वेन इको निमित्तत्वबाधापत्तेः इतिचेत्, अत्र कैयटः—

तस्मादित्युत्तरस्य इत्यादिनिर्देशान्न तत्रोक्तन्यायप्रवृत्तिरिति ।

यत्तु कौस्तुभे व्यक्तिपक्षे प्रतिलक्ष्यमसकृल्लक्षणप्रवृत्तेः स एव तत्राश्रयणीयः । यद्वा प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तन्त्रेणोच्चारणम् "इको यणचि" इति । तथा च सर्वासामिकारव्यक्तीनां यण्विधानेऽर्थादिक्रूपरत्वेऽपि यण्सिद्धिः । अन्यथा सर्वेषामिकाराणामिग्भिन्नाच्परत्वान्नियमाभावेन विध्यर्थानिष्पत्तेः । न चातिप्रसङ्गः, अपवादविधिपर्यालोचनया तद्व्यक्तावेतत्तात्पर्याकल्पनादिति । तच्चिन्त्यम् । व्यक्तिपक्षेऽपि निमित्तसमर्पकस्याच्पदस्य न्यायवशादिग्भिन्नपरत्वे सिद्धे इग्रूपाच्पूर्ववर्त्तिभ्या इग्व्यक्तेरुद्देश्यत्वएव मानाभावाद् दध्युदकादौ तत्प्रवृत्तेर्दुर्घटत्वात् । श्रूयमाणवाक्ये उद्देश्यताविधेयतावच्छेदकत्वाभ्यां निश्चिता ये धर्माः तदवच्छिन्नव्यक्तिष्वेव न्यायसाम्येन तत्समानाकारकवाक्यान्तराणां प्रवृत्तेः । अन्यथा हल्प-

रत्वेऽपि यणादिप्रवृत्त्यापत्तेः। न च अच्पदोपादानसामर्थ्यम्। इग्भिन्नमात्रसंग्राहकप्रकारान्तराभावात्। एचीत्युक्ते एकमात्राधिक्यादकारानुपग्रहाच्च इति दिक्।

अत्र वार्त्तिकम्—

अयोगवाहानामट्सु णत्वम्, शर्षु जश्भावषत्वे, अविशेषेण संयोगोपधासंज्ञाऽलोऽन्त्यद्विर्वचनस्थानिवत्त्वप्रतिषेधा इति।

प्रयोजनविशेषपुरस्कारेणैव येषां प्रत्याहारविशेषान्तर्भाव इष्टः तेषां प्रत्याहारान्तरेषु प्रवेशापत्त्या वर्णसमाम्नायेऽनुपदेशादनेन सप्रयोजनः प्रत्याहारविशेषान्तर्भावः प्रतिपाद्यते।

अयोगाः स्वरूपतो द्वारतो वा प्रत्याहारानन्तर्भूताः वाहाः प्रयोगे श्रूयमाणाः ते च विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमा इति भाष्यम्।

यद्यप्यत्र "ऋति ऋ वा" "ऌति ऌ वा" इति षष्ठे वक्ष्यमाणौ ईषत्स्पृष्टौ नोक्तौ। तथाऽपि तयोरच्त्वं वक्ष्यामीति तुल्यास्यसूत्रभाष्ये दर्शनात्तावप्यत्रोपलक्षणीयौ। एषामट्सु पाठः कार्यः। उरः कायति उरः पातीति कप्रत्ययः। उरःकेण उरःपेण इत्यत्र णत्वं यथा स्यात्। अन्यथा अट्त्वाभावेऽड्व्यवायेऽपीति न प्रवर्त्तेत।

शर्षु चोपदेशः कार्यः। उब्ज आर्जवे इत्युपध्मानीयोपधस्य धातोरुपध्मानीयस्थाने "झलां जश् झशि" इति जश्त्वेनान्तरतम्याद् बकारादेशे उब्जितेत्यादि यथा स्यात्। शर्त्वसिद्धौ तन्नान्तरीयकतया झल्त्वस्यापि सिद्धेः। सर्पिःषु धनुःषु इत्यादौ "नुम्विसर्जनीयशर्व्यवायेऽपि" इति षत्वं च यथा स्यात्। न च तत्र विसर्जनीयस्य पृथगुपादानादेवेष्टसिद्धिः। तस्यैवोक्तरीत्या प्रत्याख्येयत्वात्।

अविशेषेण प्रयोजनपञ्चकोपयुक्तप्रत्याहारपुरस्कारेण इत्यर्थः । तेन उ३ब्जकेत्यत्र उकारस्य प्लुतोपयुक्तगुरुसंज्ञाप्रयोजकसंयोगसंज्ञाप्रयोजकं हल्त्वम्, निष्कृतं दुष्कृतमित्यत्र "इदुदुपधस्य" इति षत्वोपयुक्तोपधासञ्ज्ञाया विशेष्यभूतवर्णनिष्ठाव्यवहितपूर्वत्वनिरूपकान्त्यत्वप्रतियोगितावच्छेदकत्वं, वृक्षस्तरतीत्यत्र विसर्जनीयान्तस्य पदस्य स इति पक्षे सर्वादेशत्ववारणाय अलोऽन्त्यसूत्रविहितान्तादेशस्थानितावच्छेदकम्, व्यूढोरस्केनेत्यत्र सकारस्य स्थानिवद्भावेनाड्व्यवाय इति णत्वप्राप्तौ "अनल्विधौ" इति पर्युदासघटकभेदप्रतियोगितावच्छेदकं चाल्त्वम्, उरःक उरःप इत्यादौ "अनचि च" इति द्वित्वप्रतियोगितावच्छेदकं यत्वं च विसर्गादीनां सिध्यतीति वार्त्तिकार्थः ।

अत्रायं विवेकः । जश्भावो न प्रयोजनम् । उब्जधातोरुपध्मानीयोपधत्वे प्रमाणाभावात् । उब्जिजिषतीत्यसिद्ध्यापत्तेश्च । तथा हि । बकारसहितस्यैव द्वित्वे "हलादिः शेषः" इति जकारनिवृत्तावभ्यासे बकारमात्रं श्रूयते । न च जश्त्वासिद्धतया बकारसहितस्य न द्वित्वमिति वाच्यम् । पूर्वत्रासिद्धीयमद्वित्वे इत्युक्तेः ।

अथ प्राणिणिषतीत्यत्र "उभौ साभ्यासस्य" इति नकारद्वयस्य णत्वविधानादुक्तपरिभाषाऽनित्या । अन्यथा णकारविशिष्टस्यैव द्वित्वे अभ्यासे स्वत एव णकारसिद्धौ तद्वैयर्थ्यात् । अत एव औजढदित्यत्राभ्यासे जकारसिद्धिरित्याश्रीयते । तथाऽपि नेष्टसिद्धिः । अभ्यासस्योपध्मानीयमात्रशेषतापत्तौ "अभ्यासे चर्च" इति जश्त्वेन बकारस्यैव श्रवणापत्तेः । उबिब्जिषतीति रूपसाम्येन दोषाविशेषादिति कैयटादयः ।

यत्तु "प्रकृतिचरां प्रकृतिचरः" इति सिद्धान्ताद् उपध्मानीयमा-

त्रस्याभ्यासे श्रवणापत्तिरिति स्थापितम् । तच्चिन्त्यम् । प्रातिनियतविषयपुरस्कारेण प्रत्याहारविशेषान्तर्भाववचनसामर्थ्येन चर्त्वासिद्धेः । न चैवं झल्संज्ञाऽपि न स्यादिति वाच्यम् । जश्त्वस्य प्रयोजनत्वोक्त्या तदेकवाक्यतापन्नसंज्ञाया अप्याक्षेपेण वैषम्यात् । न हि "झलाञ्जशः" इति जश्त्वमेव तत्रोपात्तमिति वक्तुं शक्यम् । बीजाभावादिति वृद्धाभिप्रायात् । तस्मादुब्जिजिपतीति रूपासिद्धिस्तदवस्थेति । एवमस्मादेव घञि "चजोः कु घिण्ण्यतोः" इति कुत्वेन जकारस्य गकारादेशे उपध्मानीयस्य जश्त्वेन बत्वे कृते अभ्युब्ग समुब्गः इति रूपापत्तौ "सोऽपदादौ" इत्यधिकारे "उपध्मानीयस्य च" इति वार्त्तिकान्तरेण कवर्गे परत उपध्मानीयस्य सकारादेशं तत्स्थाने जश्त्वेन दन्तस्थानसाम्याद्दकारादेशं कृत्वा अभ्युद्गः समुद्गः इति रूपं साधनीयमिति सत्वविधायकवचनान्तरारम्भेऽपि गौरवम् ।

यदि तु बकारोपधोऽयमिति वृत्तिमतमाश्रीयते तथाऽपि सनि बकारस्य द्वित्वनिषेधोऽभ्युद्ग इत्यत्र बस्य दत्वं च साधयितुं वचनद्वयानुमाने गौरवमेव स्यात् । तस्माद्दकारोपध एवायम् । अभ्युद्ग इत्यादेः स्वरसतः सिद्धेः । न चैवमुब्जितेत्यादि कथमिति वाच्यम् । "भुजन्युब्जौ" इति कुत्वाभावनिपातनार्थे सूत्रे बकारोच्चारणेन "भ उद्जेः" इति "ब उद्जेः" इति वा वचनस्यानुपानात् । अकुत्वविषये उद्जेर्दकारस्य भकारो बकारो वा स्यात् । "स्तोश्चुना श्चुः" इत्येतदुत्तरं तत्कल्पनाच्च तवर्गोपस्थितदकारस्य स्थानित्वलाभः । एवं च "न न्द्राः संयोगादयः" इति दकारस्य द्वित्वनिषेधाज्जिशब्दस्यैव द्वित्वे दकारस्य चोक्तवचनेन बत्वे कृते उब्जिजिषतीत्यपि सिद्धम् । न च द्वित्वात्पूर्वं परत्वाद्बत्वापत्तिः । "पूर्वत्रा-

सिद्धे नास्ति विप्रतिषेधः" इति सिद्धान्तात् । नाप्यन्तरङ्गत्वात् । असिद्धत्वादेव । नापि "पूर्वत्रासिद्धीयमद्विर्वचने" इति तन्निषेधः । द्वित्वविधावेव तत्प्रवृत्तेः । अत्र च द्वित्वनिषेधेन वैषम्यात् ।

अत्रेदमवधेयम् । " न न्द्राः संयोगादयः " इत्यत्र "लोपो व्योर्वलि " इति लोपेन दकाराद्रेफाद्वा पूर्वं बकारोऽपि प्रश्लिष्यते । तेन वार्त्तिकमते वृत्तिमते च उब्जेर्बकारस्य द्वित्वनिषेधार्थं न वचनान्तरानुसारः । वार्त्तिकमतेऽपि पूर्वत्रासिद्धीयमद्विर्वचन इत्याश्रित्य बकारस्य द्वित्वनिषेधसिद्धेः । अतो भाष्यमते न लाघवावकाशः । अतिरिक्तैकवचनकल्पनं तु त्रयाणामपि समानम् । एतावान्परं विशेषः । वार्त्तिकमते उपध्मानीयस्य सकारादेशविधायकं वचनं कल्प्यम् । भाष्यमते दकारस्य बत्वविधायकम् । वृत्तिमते तु बकारस्य दकारविधायकमिति । यदि तु "भुजन्युब्जौ"इति निपातनादेव दस्य बादेशो न तूक्तवचनमनुमेयमिति भाष्यमते लाघवमिति कल्प्यते, तदा बकारस्यैव द्वित्वापत्तिः । असिद्धत्वाभावात् । दकारोपधनिर्देशसामर्थ्याज्जिशब्दस्य द्वित्वानन्तरमेव दकारस्य द्वित्वमिति कल्पनेऽपि अभ्युद्ग इत्यादावपि तदापत्तेः । अकुत्वविषये एव बत्वं निपात्यत इतिकल्पनेऽपि कुत्वविषये श्रवणार्थतया दकारोपदेशस्य चरितार्थत्वात् द्वित्वानन्तरमेव बत्वमिति न स्यात् ।

अथाविशेषेण बत्वनिपातमभ्युपेत्य उपसर्गान्तरपूर्वकात्केवलाद्वा उब्जेर्न घञादिः अनभिधानात् । अभ्युद्गः समुद्ग इति तूपसर्गद्वयपूर्वकाद्गमेर्डप्रत्यये रूपमिति कल्प्यते । ततो वार्त्तिकवृत्त्योर्मतेऽपि अभ्युद्ग इत्यादेरुक्तगत्यैव साधयितुं शक्यतया उपध्मानीयस्य सत्वविधायकं बकारस्य दत्वविधायकं च

वचनं न कल्प्यमिति कुतस्तत्रापि गौरवम् ।

परं तूपध्मानीयस्य शर्षूपदेश एवातिरिक्तः कल्प्य इति गौरवम् । वृत्तिमते तूक्तरीत्या वकारप्रश्लेषकृतं गौरवम् वार्त्तिकसाधारणं बोध्यम् । किं च भाष्यवृत्त्योर्मते संयोगसंज्ञार्थं यत्नान्तरं नास्थेयम् । वार्त्तिकमते तु पूर्वोक्तरीत्या तदावश्यकमिति गौरवम् ।

ननु षत्वसिद्ध्यर्थं शर्षूपदेशस्यावश्यकतया तद्गौरवमपि नेति चेत् । मैवम् । तदर्थं विसर्गस्यैव तदन्तर्भावानपेक्षणात् । वस्तुतस्तस्याप्यप्रयोजनत्वात् । "नुम्विसर्जनीय" इति सूत्रे विसर्जनीयपदस्य सत्त्वेन तद्व्यवाये षत्वसिद्धेरप्रत्यूहत्वात् । न च तत्र तन्न कर्त्तव्यमेवेति वाच्यम् । सिद्धं प्रत्याख्याय यत्नान्तरकल्पनस्यैव वैयर्थ्यात् ।

यत्तु शर्षूपदेशेन झल्त्वमिव हल्त्वयर्त्वखर्त्वान्यपि सिध्यन्ति । खर्त्वस्य फलं तु " कुप्वोः ≍क≍पौ च " इति विसर्गः । अतः शर्षूपदेशावश्यकत्वे तत एव निर्वाहे सूत्रे विसर्जनीयग्रहणं न कार्यमेवेति । तच्चिन्त्यम् । जश्त्वस्य प्रयोजनत्वोक्त्या तद्बलाज्झल्त्वसिद्धावपि हल्त्वादीनां तेनानाक्षेपात् । हल्त्वयर्त्वाल्त्वानां प्रातिस्विकरूपेणैव विधानात् । विसर्गस्य च सौत्रत्वादेव सिद्धेः । लोकेऽपि तस्येष्टत्वे तु अविशेषणेत्यत्र तस्यापि प्रक्षेप्तुमुचितत्वात् । अस्तु वा तत एव ज्ञापकादतिरिक्तखर्त्वस्यापि स्वातन्त्र्येण सिद्धिः । न तु तावता हल्त्वयर्त्वादेः शर्त्वाक्षेप्यत्वं मानाभावात् ।

अस्तु वा शर्त्वाक्षिप्तानामप्येषां कार्यविशेषपुरस्कारेण नियमार्थम् । अविशेषेणेत्यादिवार्त्तिकं सर्वथाऽप्युक्तकार्यातिरिक्ते नैषां कुत्रापि प्रत्याहारउपादानम् । अत एव "कुप्वोः ≍क≍पौ"

इत्यत्र "खर्परे शरि" इति विसर्ग एव । यद्वा "वा शरि" इति विकल्प इति निरस्तम् । अत एवाट्सरोरुपदेशेन संज्ञान्तराणां सिद्धिसम्भवेऽपि उपायस्योपायान्तरादूषकत्वादित्याशयेन प्रत्याहारविशेषान् पृथक् पुरस्कृत्य वार्त्तिकाक्षरविन्यास इत्यप्यपास्तम् । नियमार्थमुक्तप्रकारेणैव वार्त्तिकरचनाया उचितत्वात् । एतेन हरिः. करोति हरिं पश्य इत्यत्र यण्वारणाय विसर्गानुस्वारयोरसिद्धत्वानुसरणक्लेशोऽप्यपास्तः । एतेनैव अट्सु क्रियमाण उपदेशोऽकाराव्यवहितोत्तरमेव कर्त्तव्यः, अन्यथा इण्प्रत्याहारान्तर्भावे संस्कर्त्तेत्यत्रानुस्वारात्परस्य सस्य षत्वापत्तेरित्यप्यपास्तम् । ध्वनितं चेदं संस्कर्त्तेत्यत्रानुस्वारादचः परस्य सस्य द्वित्वं वदता, उक्तरीत्या उविब्जिषतीत्यभ्यासे वकारं चापादयता कैयटेनैवेति दिक् । तस्माज्जश्त्वषत्वे नात्र प्रयोजने इति सिद्धम् ।

आवश्यकं चेदं भाष्यकृतोऽपि । अन्यथा षत्वार्थे शर्पूपदेशस्यावश्यकत्वे तत एव जश्त्वस्यापि तत एव झल्त्वेन सिद्धौ वार्त्तिकमतेऽपि शर्पूपदेशरूपगौरवानापत्तेः । "भुजन्युब्जौ" इति निपातनस्य बत्वांशेऽपि तात्पर्यस्य भाष्यकृतोऽप्यधिकस्य कल्प्यत्वात् । गौरवान्तरस्य च परिहृतत्वात् ।

न च वार्त्तिकमते संयोगसंज्ञासिद्ध्यर्थयत्ननिबन्धनं गौरवम् । "भुजन्युब्जौ" इत्यत्र गुरूच्चारणसामर्थ्येन जश्त्वस्यासिद्धत्वाभावं कल्पयित्वा बकारमादायैव तत्सिद्धेः । संयोगसंज्ञायाः प्रयोजनत्वाभिधानस्य च यथाश्रुतपरत्वात् । तस्माज्जश्त्वरूपप्रयोजनप्रत्याख्यानपरभाष्यप्रामाण्यात् षत्वस्यापि प्रकृतप्रयोजनत्वप्रत्याख्याने तत्सम्मतिरुन्नीयते । जिह्वामूली-

यपरत्वे विसर्गसिद्धिस्तु "कुप्वोः ≍क≍पौ च" इति निपातसामर्थ्यादेव। तेन "खयां यमाः खयः ≍क≍पौ" इत्यादौ नानुपपत्तिरिति सूक्ष्ममवधेयम्।

उपधासंज्ञाऽपि न प्रयोजनम्। इदुदुपधस्थानिको यो विसर्ग इतिव्याख्यानात्। इदुद्भ्यां परस्य विसर्गस्येत्यत एव सिद्धावुपधाग्रहणप्रत्याख्यानाद्वा।

अलोऽन्त्यविधिरपि न प्रयोजनम्। पदस्य यो विसर्जनीयस्तस्य सकार इतिव्याख्यानादेव सिद्धेः।

स्थानिवत्त्वप्रतिषेधोऽपि न प्रयोजनम्। पूर्वत्रासिद्धीये न स्थानिवदिति सिद्धेः। न च तस्य " अचः परस्मिन् " इत्येतन्मात्रविषयकत्वम्। स्थानिवद्भावं प्रति त्रिपादीस्थस्यासिद्धतया न्यायमूलकत्वात् स्थानिवद्भावमात्राविषयकत्वात्। तस्मादट्सु णत्वम् " अनचि च " इति द्वित्वं चेति प्रयोजनद्वयमेव सिद्धम्।

लण् ६।

हकारादावकारस्य सुखोच्चारणमात्रार्थत्वेऽप्यत्रानुनासिकत्वादित्संज्ञा। प्रतिज्ञाऽऽनुनासिक्याः पाणिनीया इतिसिद्धान्तात्। तेन रेफेण सहाकारोच्चारणे "उरण् रपरः" इत्यत्र रप्रत्याहारेण रेफलकारयोरुपादानम्। ऋकारऌकारयोः सावर्ण्यमिति वार्त्तिकनिर्देशश्चात्र मानम्।

ननु "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इत्यादावणग्रहणं पूर्वेण परेण वा णकारेणेतिसंदेहः प्राप्नोति इतिचेन्न। ग्रहणकशास्त्रे परेणैव तदन्यत्र पूर्वेणैवेतिव्याख्यानवशात्तन्निवृत्तेः। तथा हि। अच इत्येव सिद्धत्वाद् एचां दीर्घत्वे विशेषाभावाद्

अक इत्येव वा सिद्धत्वाद् दीर्घत्वस्याज्मात्रधर्मतया हकारादीनां तदसम्भवाद्विनाऽप्यज्ग्रहणं सिद्धत्वाच्चाण्ग्रहणसामर्थ्यादेव "ढ्रलोपे" इत्यत्र पूर्वेणाण्ग्रहणम् । न च वृहू उद्यमन इत्यस्मात्तृचि ऊदित्त्वात् "स्वरतिसूति" इति इडभावऋकारस्य गुणे "हो ढः" इति ढत्वे "झषस्तथोः" इति प्रत्ययतकारस्य धत्वे ष्टुत्वेन धस्य ढत्वे "ढो ढे लोपः" इति पूर्वढकारलोपे रेफस्य स्थानसाम्येन ऋकारे दीर्घे ढलोपस्यासिद्धतया तत्पूर्वऋकारस्योपधासंज्ञायाम् "उपधायाश्च" इति इत्वे रपरत्वे इकारस्य लघूपधगुणे च वेर्ढेतिरूपार्थं परेणाण्ग्रहणं स्यादिति वाच्यम् । "अचश्च" इतिपरिभाषाविरोधात् रेफस्य दीर्घासम्भवात् । न च परेणाण्ग्रहणसामर्थ्यम् । अन्योऽन्याश्रयात् । अण्ग्रहणसामर्थ्यप्रदर्शकभाष्यविरोधाद् अटिति टकारेण सह प्रत्याहारपाठेनापि तदुपपत्तेश्च ।

यत्तु तृतीयेति निर्देशात्पूर्वेणैवात्राण् । अन्यथा "हलः" इत्यत्राप्यत्रत्यस्यैवाणोऽनुवृत्त्या त्रेः संप्रसारणे रेफस्थानीयऋकाररूपस्याणोऽपि दीर्घप्रसङ्गादिति । तच्चिन्त्यम् । अङ्गावयवाद्धलः परं यत् संप्रसारणं तदन्ताङ्गस्य दीर्घः स्यादित्येव तदर्थात् । "इकः काशे" इत्यादौ विच्छिन्नस्याण्ग्रहणस्यानुवृत्तौ मानाभावात् । तथा च तत्र भाष्ये उक्तसूत्रादण्ग्रहणानुवृत्त्या पूर्वं समाधानं कृत्वा सिद्धान्तितम्—

अथ वा उभयं निवृत्तं, कस्मान्न भवति तृतीय इति, द्वितीयतृतीयनिपातनादेतत्सिद्धमिति ।

तस्मादण्ग्रहणमेव ज्ञापकमिति भाष्यसम्मतम् ।

यत्तु प्राचाम् अणः किं दृढ इति प्रत्युदाहरणम्, तच्चिन्त्यम् । "दृढः स्थूलबलयोः" इत्यत्र इडभावो नकारहकारयोर्लोपो

निष्ठातकारस्य ढत्वं च निपात्यते । न त्वसिद्धकाण्डस्थढत्वादेः प्रवृत्तिः । परिवृढयेत्यत्र "ल्यपि लघुपूर्वात्" इत्ययादेशस्य पारिवृढीकन्येत्यादौ गुरूपोत्तमत्वाभावप्रयुक्तष्यङभावस्य चासिद्ध्यापत्तेः इति भाष्यादावुक्तत्वादिति बहवः ।

प्रासादकारस्तु नकारलोपनिपातनोक्त्या दृंहेरेवेदं निपातनमिति वृह वृद्धावित्यस्य प्रत्युदाहरणत्वं युक्तमेवेत्याह । युक्तं चैतत् । आदृढः आवृढः इत्यत्र भाष्यस्वारस्यात् । अत एव "दादेर्धातोर्घः" इत्यस्य प्रवृत्त्यभाव इडभावश्चेत्यादिकल्पनमपि न दोषावहम् । बलवत्प्रमाणानुगृहीतत्वात् । एतेन दृहेरपीदं निपातनमिति काशिकोक्तं परास्तम् । उक्तलिङ्गविरोधेन कल्पनोच्छेदाच्च । एतेनास्मात्परिवृढय्य पारिवृढीत्यत्रायादेशाभावष्यङ्प्रत्यययोरापादनमपीष्टापादनमेव । रूपभेदस्वीकारे बाधकाभावात् । प्रमाणस्य च दर्शितत्वात् । एतेन प्रक्रियायां वृढ इति पाठकल्पनमप्यपास्तम् । "केऽणः" इत्यपि पूर्वेणैव । गोका नौका इत्यादौ उपानत्का चतुष्कामित्यादौ च षत्वविसर्जनीययोरसिद्धत्वात्परेषामचां हलां च संभवेऽपि ह्रस्वविध्युपस्थितस्य "अचः" इत्यस्यानुरोधादिति कौस्तुभे ।

कैयटे तु "न मु ने" इत्यत्र नेतियोगविभागाद्ढत्वादीनामसिद्धत्वं नास्तीति हकारादीनां कप्रत्यये परेऽसम्भव एवेति व्याख्यातम् । न च गोका इत्यादावतिप्रसङ्गः । अच इत्येव वक्तव्यत्वापत्तेः । "अणोऽप्रगृह्यस्यानुनासिकः" इत्यत्र परेण प्रत्याहारे यद्यपि ऋकारादीनां स्वरूपतः संभवोऽस्त्येव, कर्तृ, अग्ने, वायो, पचै, मालामाचक्षाणो माल्, वृक्षवयतेरप्रत्यये वृक्षव्, इत्यादौ सानुनासिकाननुनासिकभेदेन यव-

लानां द्वैविध्यात्, तथाऽप्यप्रगृह्यस्येति पर्युदासेन भेदप्रतियोगित्वात्तिभेदप्रतियोगितावच्छेदकसाक्षाद्व्यापकधर्मावच्छिन्नस्यैवानुयोगिनो व्युत्पत्तिबलात्प्रतीत्या प्रगृह्याभिन्नत्वेनाच एवोपस्थितिसिद्धौ अणूग्रहणसामर्थ्यात्पूर्वेणैव प्रत्याहारः।

वृक्षव्रूशब्दस्तु कैयटेन व्याख्यातः । वृक्षं वृश्चतीति क्विवन्ताद् वृक्षवृश्चमाचष्टइति णिचि णाविष्ठवत्प्रातिपदिकस्येति टिलोपेन ऋकारशकारचकाराणां निवृत्तौ वृक्षवयतीति सिद्धे ततो विच्। न तु क्विप्। क्वित्त्वेन सम्प्रसारणापत्तेः । वकारलोपापवादस्य "च्छ्वोः शूड्" इत्यूठः प्रसङ्गाच्च । न च णिलोपस्य स्थानिवद्भावः। क्वौ लुप्तं न स्थानिवदिति क्वौ विधिं प्रति न स्थानिवद् इति च निषेधात्। विचि तु स्थानिवत्त्वेन वलोपाभावादिनिर्वाहः। न च तथाऽपि "हलि सर्वेषाम्" इति लोपापत्तिः, पूर्वत्रासिद्धीये स्थानिवत्त्वाभावादिति वाच्यम्। तत्र " भोभगो " इत्यतोऽशीत्यनुवर्त्तनात् । न च णिच्प्राग्भाविनं क्विपमेवाश्रित्य ऊठ्प्रसङ्गः । अन्तर्भूतक्विबाश्रयतयाऽन्तरङ्गे तत्र कर्त्तव्ये बहिर्भूतणिजपेक्षया बहिरङ्गस्य टिलोपस्यासिद्धत्वादिति ।

यत्तु कौस्तुभे एकदेशविकृतस्यानन्यतया "व्रश्च" इति षत्वं दुर्वारम्। न च णिलोपस्य स्थानिवद्भावः। पदान्तविधौ नेति निषेधात्। पूर्वत्रासिद्धे तदभावाच्च। तस्माद् वृक्षं वेतीति वृक्षवीः वातीति वृक्षवाः। वृक्षव्यं वृक्षवां वाऽऽचष्टे इति ण्यन्ताद्विच्। न च "लोपो व्योः" इति वलोपापत्तिः। णिलोपस्य स्थानिवत्त्वात्। लोपस्यानवयवत्वेन पदान्तश्चेद्विधीयत इत्यर्थकस्य "न पदान्त" इति निषेधस्याप्रवृत्तेरिति । तच्चिन्त्यम्। व्रश्चादिसूत्रेच्छशामित्यत्र छकारात्पूर्वं चकारद्वयप्रश्लेषेण एकेन स्वाभाविकस्यापरेण जकारस्थाने षत्वेन प्रयुक्तस्य चकारस्य निर्देशाद्व्रश्चादीनां

चकारजकारयोरेव षत्वविधानात् । उपायस्य चोपायान्तरादूषकत्वात् ।

स्यादेतत् । "च्छ्वोः" इतिसूत्रे किद्ग्रहणमनुवर्त्तते न वेति विचार्य भाष्ये उक्तम्—

अनुवर्त्तमाने किद्ग्रहणे छः षत्वं वक्तव्यमिति ।

अस्यार्थः । तदनुवृत्त्यभावे "च्छ्वोः" इति छस्य शत्वे शकारस्य च षत्वविधानादेव सिद्धौ व्रश्चादिसूत्रे छग्रहणं न कार्यमिति । एवं च लाघवादत्रैव भाष्यतात्पर्ये छकारपरित्यागे कथमुक्तः प्रश्लेष इति । सत्यम् । तथाऽपि अलोऽन्त्यपरिभाषया चकारजकारयोरेव षत्वविधानाद्छकारस्य तदनापत्तेः । व्रश्चाद्यंशे षत्वस्य कुत्वापवादत्वात् ।

हरदत्तस्तु वृक्षन् करोति इत्येवंरूपः प्रयोगो नास्त्येव । "न पदान्ता हलोऽणः सन्ति" इति भाष्योक्त्याऽनभिधाननिश्चयादिति "हलि सर्वेषाम्" इतिसूत्रे व्यवस्थापितवान् ।

अत्र कौस्तुभकृतः । लण्सूत्रभाष्ये "न पदान्ताः परेऽणः सन्ति" इत्येव पाठः । अन्यथा अप्रगृह्यस्येतिपर्युदासेनाचामेव कार्यभाक्त्वादितरे कार्यिणो न सन्तीति कैयटविरोधादिति । तच्चिन्त्यम् । कर्त्तृ इत्यादीनां सत्त्वप्रदर्शनपरेण भाष्येणाचामप्रदर्शनेऽपि हलां सत्त्वे मानाभावात् । यथाश्रुतकैयटोक्तेश्च युक्तिविरुद्धत्वात् । स्वरूपेण ऋकारादीनामणां सत्त्वेन तन्निषेधे बाधाभावात् । विशिष्टाभाव ऋकारादिषु विशेषणाभावेनैव हलसाधारण्येन वर्त्तिष्यतइत्यभिप्रायेण त्वदुक्तरीत्या कार्यिणो न सन्तीति व्याख्यानावतारात् । न चैतद् युक्तम् । अण्ग्रहणस्य पूर्वेण सह व्यवस्थापनात्प्राक् ऋकारादीनां विशेषणाभावप्रयुक्तविशिष्टाभावाश्रयत्वासिद्धेः । अन्यथा पूर्वपक्षस्यैवानुपस्था-

नात् । “ननु चायमस्ति कर्तृ” इत्यादिभाष्यानुपपत्तेश्च । ऋकारादेः कार्यभाक्त्वाभावशङ्कायां स्वरूपमात्रसत्त्वोक्तेरप्रयोजकत्वात् । अतः स्वरूपेण पदान्तानामृकारादीनामसत्त्वशङ्कायामृकारस्य तदुत्तराज्मात्रोपलक्षणतया तत्सत्त्वे उक्ते पदान्तऋकाराद्यभावावबोधकस्य “न पदान्ताः परेऽणः सन्ति” इतिवाक्यस्य अजंशे अप्रामाण्यव्यवस्थित्या हकाराद्यभावबोधकत्वांशे बाधकाभावात्प्रामाण्यं पर्यवस्यतीति फलितार्थमादाय न हलोऽणः सन्तीतिवाक्यस्य मिश्रैः समुल्लिखितत्वात् ।

न च ऋकारप्रदर्शनस्योपलक्षणत्वे हलोऽप्युपलक्ष्यन्तामिति वाच्यम् । प्रमाणाभावात् । “ह्रस्वस्य गुणः” “एत ऐ” “आत औ णलः” इत्यादीनामजंशे उपलक्षणतायां तात्पर्यग्राहकत्वात् । न च हलंशे “हलि सर्वेषाम्” इतिसूत्रे-

हलि अशि यथा स्यात्, इह मा भूत्, वृक्षवयतेरप्रत्ययः वृक्षव् करोति इति भाष्यं तात्पर्यग्राहकमस्त्येवेति वाच्यम् । तस्यैतद्भाष्यविरोधेन प्रौढिवादत्वात् । न च वैपरीत्यम् । प्राथम्यस्यैव तावद्विनिगमकत्वात् । विकल्पस्य च वस्तुन्यसम्भवात् । तदाहुः प्रामाणिकाः—

अनुष्ठानं हि विकल्प्यते न वस्त्विति ।

न च वृक्षव् करोतीति स्पष्टार्थकभाष्यविरोधेन पूर्वभाष्यस्य तथातात्पर्यं न कल्प्यमिति वाच्यम् । तस्याप्यन्यथाऽनुपपन्नत्वात् ।

न च तस्य पूर्वपक्षगतत्वेन सर्वांशाप्रामाण्येऽपि न क्षतिः, अजभावबोधकत्वांशवदुक्तबाधकस्य हलभावबोधकत्वांशेऽप्यप्रामाण्यकल्पकस्य सत्त्वादिति वाच्यम् । ननु चायमस्तीति निषेधात्यन्तायोगव्यवच्छेदपरोत्तरभाष्यादप्येतदर्थस्य प्रतीतेः ।

हकारादेः कस्यचिद् उभयाभ्युपगतपदान्तत्वाभावकत्वात् । विप्रतिपन्ननिषेधस्यांशतो भाष्यसंमतत्वात् । अन्यथा पूर्वेणाण्ग्रहणासिद्धेश्च । तथा हि । अप्रगृह्यस्येत्युक्तव्युत्पत्तिवशादचां लाभेन हयादीनां कार्यित्वासम्भवादेवाज्विषयकत्वसिद्धौ अण्पदसामर्थ्यात्पूर्वेणेति न शक्यते वक्तुम् । अण्पदसामर्थ्येन वादीनां कार्यित्वे सिद्धे न्यायस्याकिञ्चित्करत्वात् । "अर्थवदधातुरप्रत्ययः" इत्यर्थवद्ग्रहणेन "ओषधेश्च विभक्तावप्रथमायाम्" इत्यादौ विभक्त्याद्युपादानेन च तन्न्यायस्याप्यसार्वत्रिकत्वात् । "अर्वणस्त्रसावनञः" इतिसूत्रे भेदप्रतियोगिवृत्तितत्त्वावच्छेदकधर्मसाक्षाद्व्यापकधर्मावच्छिन्नानुयोगिताकभेदभाने विभक्तित्वस्यैव तथात्वात् तदनवच्छिन्ने अणादौ तदप्रवृत्तौ आर्वतमित्याद्यसिद्ध्यापत्तेश्च ।

निषेधस्वीकारे च "वाहैरलुप्यत सहस्रदगर्वगर्वैः" इत्यादिविरोधात् । भेदप्रतियोगितावच्छेदकान्यप्रतियोगिवृत्तिधर्ममात्रेण सादृश्यविवक्षायां च तत्र प्रत्ययत्वस्यैवात्राप्यल्त्वस्य तादृशत्वात्तदवच्छिन्नानां वादीनां वारणानुपपत्तेः । एतेनाण्ग्रहणस्य पूर्वेणाप्युपपन्नत्वान् नञिवयुक्तन्यायबाध इत्यप्यपास्तम् । उभयोरप्यन्यथोपपत्तौ न्यायसङ्कोचस्यैव न्याय्यत्वात् । "केऽणः" इत्यादौ तु ह्रस्वश्रुत्यैवाच उपस्थापनात्तदनुरोध इति वैषम्यम् । उक्तरीत्या तु बाधाभावस्य प्रमाणमात्रोपजीव्यतया हलामणां पदान्तेऽनुपपत्तेः तत्संग्रहार्थत्वायोगात् । अच्पदं परित्यज्याण्ग्रहणसामर्थ्यादेव पूर्वेणाण्ग्रहणासिद्धिः । तस्मादत्रत्यभाष्यस्य हरदत्तोक्त एवार्थो युक्तः । कैयटस्याप्यत्रैव तात्पर्यात् । तथा हि । वृक्षव् करोतीत्यश्पदानुवृत्तेः प्रयोजनं वक्ष्यतीति यथाश्रुताष्टमि-

कभाष्यविरोधमाशङ्क्य उक्तपर्युदासादितरे कार्यभाजो न सन्तीति समाधानस्य न पदान्ता हलोऽणः सन्तीत्यत्रैव तात्पर्यम् । ऋकारादीनां स्वरूपतः सत्त्वेन कार्यभाक्त्वं विशेषणम् । स च विशिष्टाभाव ऋकारादिषु विशेषणाभावेन हकारादिषु च विशेष्याभावेनाविशिष्टः । उभयत्रापि विशेषणाभावपरत्वे विशेष्यभागवैयर्थ्यात् ।

यद्यपि चेदं प्रथममसिद्धम् ऋकारादिष्वनुनासिकविध्यप्रवृत्तेस्तद्वेलायामसिद्धेः, तथाऽप्यप्रगृह्यस्येति पर्युदासेनाच एवानुनासिकेन भाव्यम्, न तु हल इति फक्किकायां हलामणामसम्भवे सतीति शेषः । अन्यथा उक्तरीत्या न्यायस्याप्रवृत्तौ वादीनामप्यनुनासिकापत्तेः इत्युक्ते पदान्ता हलोऽणो न सन्तीत्युक्तप्रायम् । तथा चाष्टमिकभाष्यं प्रौढिमात्रमिति भावः ।

न हि पदान्ता इत्यस्यार्थमाह । "कार्यभाज इत्यर्थः" इति । तथा च गूढाभिप्राय उक्तविशिष्टाभावं दर्शयतीति सिद्धान्त एवायं न तु पूर्वपक्ष इति भावः ।

इतरस्तु यथाश्रुते दूषणमाह । ननु चायमिति भाष्ये आचार्यः पूर्वाक्षिप्तं स्वाभिप्रायं प्रकाशयति—एवं तर्हीति । पदान्ते हलामणामसम्भवात् पर्युदासेनाचामेव ग्रहणे सिद्धे अण्ग्रहणसामर्थ्यात्पूर्वेणैवेति भावः । अत एवाच एव प्रगृह्या भवन्तीति पर्युदासमात्रं साधकत्वेनोक्तम् । तच्चोक्तरीत्या पदान्ते हलामणां सत्त्वेऽसाधकमेवेति सर्वथाऽप्यत्रत्यभाष्यस्य न पदान्ताः परेऽणः सन्तीति भाष्यस्य च सिद्धान्तत्वे कैयटस्य तात्पर्यम् । पूर्वपक्षत्वे ग्रन्थद्वयस्याप्यलग्नकत्वापत्तेः । वृक्षव् हसतीत्यत्रातिप्रसङ्गस्य अशीत्यनुवृत्त्याऽपि दुर्वारतया त्वयाऽपि तत्रानभिधानस्यावश्यमाश्रयणीयत्वात् । अनभिधानस्य च

पदविशेषणगर्भतया वृक्षव् इतिप्रयोगाभावमात्रपर्यवसितत्वाद् इत्यास्तां विस्तरः।

"उरण् रपरः" इत्यपि पूर्वेण। परेण प्रयोजनाभावात्। न च होतृकारः मातृणामित्यादौ ऋकारस्य सवर्णदीर्घे "नामि" इति दीर्घे च रपरत्वार्थं परेण स्यादिति वाच्यम्। "ऋत इद्धातोः" इति धातुग्रहणात् ज्ञापकात्। तद्धि ऋकारान्तमात्रस्य इत्वविधाने मातृणामित्यादावपि इत्वं स्यादित्यतिप्रसङ्गनिषेधार्थम्। तत्रापि रपरत्वे तु रेफान्तत्वापत्त्या ऋकारान्तत्वाभावादेव तदप्रसक्त्या किं तेन। न च चिकीर्षतीत्यादौ "अज्झनगमां सनि" इति ऋकारस्य दीर्घे रपरत्वे च "उपधायां च" इतिसूत्रेण यथा ऋकारस्य इकारादेशो भवति, तथा मातृणामित्यादावपि रपरत्वे कृते स्यात्, अतः "उपधायां च" इत्यत्रानुवृत्त्यर्थमेव धातुग्रहणमिति वाच्यम्। तथाऽपि तत्रैव तदुपादानापत्त्या पूर्वत्र निर्देशस्य ज्ञापनार्थत्वात्। अण्ग्रहणस्यैव ज्ञापकत्वसंभवाच्च। अन्यथा "उरञ्परः" इत्येव ब्रूयात्। तत्र तत्र ऋकारस्थानीयानाम् उदात्तानुदात्तस्वरितानुनासिकदीर्घरूपाणामादेशानां रपरत्वापत्तेस्तेनैव निर्वाहसम्भवात्।

अथ कर्त्रर्थमित्यादौ यणादेशेन ऋकारस्य रेफे तस्य रपरत्वासिद्ध्यर्थमण्ग्रहणम्। न च "हलो यमां यमि" इत्याद्यरेफस्य लोपावश्यकत्वात्तत्र रपरत्वं व्यर्थमिति वाच्यम्। "झयो होऽन्यतरस्याम्" इत्यतस्तत्र विकल्पानुवृत्तेरुक्तत्वात् इति चेन्न। "रोरि" इति लोपस्य दुर्वारत्वात्। न च तस्य पदान्तमात्रविषयकत्वम्। अजर्घा इत्यादेरसिद्ध्यापत्तेः। गृधु अभिकाङ्क्षायाम् इत्यस्य हि यङ्लुकि द्वित्वे उरदत्वे जश्त्वे "रुग्रिकौ च लुकि" इत्यभ्यासस्य रुगागमे च कृते लङि अडागमे सिपि शब्लुकि गुणे रपरत्वे

सिलोपे भष्भावेन गस्य घत्वे जश्त्वेन धस्य दत्वे दस्य रुत्वे घकारोत्तररेफस्य लोपे " ढ्रलोप " इति घकाराकारस्य दीर्घत्वे " खरवसानयोः " इति रोर्विसर्गे चास्य सिद्धेः । एतच्च सर्वमभ्युपगम्यवादः ।

वस्तुतस्तु ऋकारस्थानीयानामणां रपरत्वे विधेये ऋकारलृकारयोः स्थानित्वेन . रेफलकारयोश्च विधेयत्वेनोपस्थितौ परिशेषादादेशसमर्पकमण्पदं स्थानिभिन्नेषु रेफलकारभिन्नेषु चाणूसु पर्यवस्यति । तथा च मातॄणामित्यादौ कुत्रापि नातिप्रसङ्गः । नापि कर्त्रर्थमित्यादौ रेफद्वयापत्तिः । एवं च परेण ग्रहणे वैयर्थ्यापत्तिरेवाण्ग्रहणसामर्थ्यादिति भाष्यस्यार्थः । यथाश्रुते लाकृतिरित्यत्र लपरत्वस्यैव तत्फलत्वसम्भवादिति कौस्तुभोक्तदोषापत्तेः । नापि धातुग्रहणेन निस्तारः । तस्योत्तरार्थत्वस्यापि सम्भवात् ।

यत्तु नुड्वाच्य उत्तरार्थं तु इह किञ्चिन्नपो इतिन्यायेनात्र करणं ज्ञापकमेवेति, तन्न । "नामि" इति सूत्रे नुड्विशिष्टग्रहणस्य केवलोत्तरार्थत्वस्यापि स्थापितत्वेन तथानियमाभावात् । न च वचनेन तक्रकौण्डिन्यन्यायबाधः । पूर्वेणाप्युपपत्तेः । अन्यथा कर्त्रर्थमित्यादौ "रो रि" इति लोपस्यापि बाधापत्तेः । न च वचनसामर्थ्यान्न्यायबाधः श्रेयान् । तत्र रेफलोपस्वीकारे रेफस्य रपरत्ववैयर्थ्यात् । तद्बोधकवचनबाधस्य तत्राप्यविशेषात् । कुत्रापि तच्छ्रवणाभावे प्रवृत्तिमात्रेण चरितार्थत्वानुपपत्तेः । अन्यथा "शरोऽचि" इत्यस्य विकल्पानुवृत्तिज्ञापकत्वताद्विघटनोभयपरस्य भाष्यादेरनुपपत्तेरिति दिक् ।

"अणुदित् सवर्णस्य च" इत्यत्र तु परेणैव । "उरृत्" इति ज्ञापकात् । तद्धि कृत संशब्दने इत्यस्माच्चुरादिण्यन्ताल्लुङि

"णिश्रि" इति च्लेश्चङादेशे च अचीकृतदित्यत्र ऋकारस्थाने ऋकारविधानार्थम् । तत्र दीर्घस्थानेऽपि ह्रस्व एव ऋकारोऽस्तु इत्येतदर्थं तपरत्वम् । ग्रहणकशास्त्रे पूर्वेणाण्ग्रहणे तु दीर्घऋकारस्य स्थानित्वादेशत्वयोः प्रसक्त्यभावाद्व्यर्थं स्यात् । परेण तद्ग्रहणे तु "उरऋत्" इत्यृकारेण सवर्णस्य ऋकारस्यापि ग्रहणाद्भवति तस्य स्थानित्वप्रसक्तिः ।

न च विधीयमानत्वादेवात्र ग्राहकत्वानुपपत्त्या परेण ग्रहणेऽपि तपरत्ववैयर्थ्यम् । विकाराभावमात्रपर्यवसितत्वात् । तथा च वृत्तिकारः । "न चायं भाव्यमानोऽण् किं त्वादेशान्तरानिवृत्त्यर्थं स्वरूपेणाभ्यनुज्ञायते" इति । तपरत्वसामर्थ्यात्तु दीर्घस्थाने भाव्यमानताऽपि लभ्यतइत्यन्यत् ।

इण्प्रत्याहारस्तु सर्वत्र परेणैव । "अचि श्नु"इति सूत्रे य्वोरिति इकारोकारयोः स्वरूपेण निर्देशात् । अन्यथा इण इत्येवावक्ष्यत् । संहितायां यथान्यासे हलोरर्द्धमात्राद्वयम् मात्राद्वयं चौकारस्येति मात्रात्रयम् । इण इत्युक्ते तु सार्धमात्राद्वयम् । पदच्छेदेऽपि अर्द्धमात्रात्रयं द्वे च मात्रे इति सार्द्धमात्रात्रयं मात्रात्रयं चेति क्रमेण लाघवात् । "रलो व्युपधाद्" इत्यत्र उकारेकारयोः स्वरूपेण निर्देशस्तज्ज्ञापक इति न्यासकृत् ।

तस्माद् "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् १" इतिपरिभाषाज्ञापनाय पुनर्णकारानुबन्ध इति सिद्धम् । सन्देहश्च सर्वत्र स्वरूपांशविषयक एवेति न नियमः । "भस्याढे तद्धिते" इत्यत्र "अग्नेर्ढक्" इत्यस्यैव भेदप्रतियोगित्वेनान्वयो व्याख्यानान्न तु स्त्रीभ्यो ढक इति प्रामाणिकग्रन्थदर्शनात् । किं तु प्रकृतिविशेषविहितत्वादिप्रकारकोऽप्यनया निवर्त्यतइति सर्वमवदातम् ।

ञमङणनम् ७। झभञ् ८।

अत्र भाष्यं मकारोऽत्र नानुबन्धनीयः । यम् ङम् अम् इति प्रत्याहारत्रयस्य ञकारेणैव निर्वाहात् । तथा हि—"हलो यञां यञि लोपः" इति सूत्रणीयम् । न च झकारभकारयोस्तन्मध्यवर्त्तिनोर्लोपापत्तिः । झकारभकारोत्तरवर्त्तिनोर्झकारभकारयोः कुत्राप्यभावात् । "पुमः खय्यञ्परे" इति पाठ्यम् । न चातिप्रसङ्गः । खय्परयोस्तयोरसम्भवात् । एवं "ङञो ह्रस्वादचि ङञुण्नित्यम्" इति वाच्यम् । न चातिप्रसङ्गः । पदान्ते झभयोरप्रसिद्धेः । उज्झेस्तु संयोगान्तलोपे उदित्येव रूपम् । लभादीनां तु जश्त्वस्यावश्यकत्वात् । अन्यत् प्रागेवोक्तम् ।

नन्वेवमपि "ञमन्ताड्डः" इत्युणादौ तदावश्यकम् । अन्यथा झान्तभान्तधातोरपि डप्रत्ययापत्तेः, सत्यम् । तत्रापि ञन्तादित्येव पाठ्यम् । ञमन्तेभ्योऽपि सर्वेभ्यो डप्रत्ययानुत्पत्त्या बाहुलकस्यावश्याश्रयणीयतया तत एव झान्तभान्तेभ्योऽपि प्रत्ययवारणसम्भवादिति केचित् ।

वस्तुतस्तु ञकारङकारान्तधातूनामप्रसिद्ध्या मणनाड्ड इत्येव सूत्रं कार्यमिति भाष्याशयः ।

घढधष् ९। जबगडदश् १०। खफछठथचटतव् ११। कपय् १२। शषसर् १३। हल् १४।

इति माहेश्वराणि प्रत्याहारसूत्राणि । अत्र प्राञ्चः—

एकस्मान्ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ॥

अत्र वदन्ति । चतुर्दशसूत्रीस्थैर्हलिभारिद्भिः कृतानामष्टाध्याय्यां व्यवहृतानां प्रत्याहाराणामयं संग्रहः । तेन सुप्तिङादेः रप्रत्याहारस्य "ञमन्ताड्डः" "यमिञमन्तेषु" इति उणादिव्याघ्रभूतिकारिकयोर्व्यवहृतस्य ञम्प्रत्याहारस्य "चयो द्वितीया" इति वार्त्तिककृद्व्यवहृतस्य चय्प्रत्याहारस्य चाधिक्येऽप्यदोष इति ।

अस्यार्थः । ङकार एकस्मादेव परो ग्राह्यः । "एङि पररूपम्" इति । " षिद्भिदादिभ्योऽङ् " इत्यादौ अङिति तु न प्रत्याहारः। "आदिरन्त्येन" इत्यत्र ग्रहणकसूत्रादप्रत्यय इत्यनुवृत्तेः । नचैवम् "इको यणचि" इत्यादावनुपपत्तिः । तत्र प्रत्याहारसाहचर्यात् ।

यद्वा भिदादौ रेखालेखादीनां गुणनिपातनान्ङित्त्वाभावे तद्वैयर्थ्यापत्तेः । " शास इदङ्हलोः " इत्यत्रापि अङादौ हलादौ चेत्यर्थे विशेषणवैयर्थ्यात् । अङादौ हलादौ चेति व्याख्याने हि अङ्हलोरिति व्यर्थं स्यात् । अङादिहलादिव्यतिरिक्तानां क्ङित्प्रत्ययानामसिद्धेः क्ङितीत्येव ब्रूयात् । परस्मैपदे अजादिक्ङित्प्रत्ययानामभावाच्च । कर्मव्यतिहारे तु व्यतिशासै इत्यत्र आटा सहैकादेशस्य क्ङित्त्वाभावात् । स्थानिवद्भावेनाङादित्वाच्च । " ऋदृशोऽङि " इत्यत्रापि " ऋच्छत्यृताम् " इत्यत्र ऋकारान्तेषु गुणविधानान्न प्रत्याहारः । " सनि च " " इङश्च " इत्यपि न प्रत्याहारः । " सनि च " इति इणः पृथग्गम्यादेशविधानसामर्थ्यात् । न च बोधने इणो गम्यादेशपर्युदासार्थं पृथगुपादानमिति वाच्यम् । तावन्मात्रस्य "इङो

गाङ् लिटि " " विभाषा लुङ्लृङोः " " णौ च संश्चङोः " "सनि गमिः" " इणोऽबोधने " " णौ च गा लुङि " इत्येतादृशन्यासेनाप्युपपत्तेः । " इणो गा लुङि " " णौ गमिरबोधने " " सनि च " " इङश्च " इत्यादिन्यासापेक्षया गौरवाभावात् । णिचं सनं चोद्दिश्य गम्यादेशविधानापेक्षया णिचमुद्दिश्य विधानस्य सनं णिचं चानूद्य पर्युदासस्यैव लघुत्वात् । सूत्रत्रये इणनुसन्धानापेक्षया सूत्रद्वये तस्य लघुत्वाच्च । "इको झल्"इति कित्त्वविधानात् "अज्झनगमां सनि"इति दीर्घविधानाच्च इङन्तानां गम्यादेशे उक्तसूत्रयोर्निर्विषयकत्वापत्तेरिति केचित्।

एवं " किरश्च पञ्चभ्यः " इत्याद्यानां चतुर्णां ऋकारान्तानां सनि परे इड्विधानमपि ज्ञापकं बोध्यम् । इङन्तानां गम्यादेशे तत एव इट्सिद्धेः । " परिमाणाख्यायां सर्वेभ्यः " " इङश्च " इत्यपि न तथा । इकारोकारऋदन्तानां प्रत्ययान्तएव रुद्धतया एजन्तानां च प्रागेवात्त्वोत्पत्त्या ऋदन्तमात्रार्थत्वे च स्वरूपेण तन्मात्रनिर्देशापत्त्या सामान्यसूत्रेणैव घञ्सिद्ध्या च विधिवैयर्थ्यापत्तेः । अजप्प्रत्ययाभ्यां सह घञ्विकल्पार्थत्वे तु " ऋदोरप् " " एरच् " इत्यत्रैव वा ग्रहणापत्तेः । "क्रीङ्जीनां णौ " इत्यपि न प्रत्याहारः । एजन्तानामात्वस्य सूत्रान्तरसिद्धतया इक इत्येव सिद्धेः । क्रीज्योः पृथगुपादानानुपपत्तेश्च । एतेन इकारान्तानां मध्येऽनयोरेवेति नियमार्थत्वशङ्काऽप्यपास्ता ।

न च इङंशे आत्वविधानस्य णौ एजन्तयोः सामान्यतः प्राप्तात्वनिवृत्त्यर्थत्वं स्यादिति वाच्यम् । तथाऽपि " ओः पुयण्ज्यपरे " इत्यभ्यासोकारस्येत्वविधानसामर्थ्यात् । " इङ्धार्योः शत्रकृच्छ्रिणि " इत्यपि न तथा । स्वरूपतो धातुना धारि-

णा साहचर्यात् ।

वस्तुतो धारेः पृथगुपादानसामर्थ्यात् । तस्मादेङित्येक एव ङकारेण प्रत्याहारः । एवं ञकारोऽप्येकस्मादेव । " अतो दीर्घो यञि " इति । अञ् इञ् यञ् इति तद्धितेषु कुतो नैवम् इति चेत् " आदिरन्त्येन" इत्यत्राप्रत्यय इत्यनुवर्तितत्वात् । आद्यो णकारोऽप्येकस्मादेव । यथा ग्रहणकशास्त्रातिरिक्ते अण्-ग्रहणेषु । वकारो "नश्छव्यप्रशान्"इति । टकारो यथा " अट्-कुप्वाङ् " इति । " इट ईटि " इति न प्रत्याहारः। ईटि परे स-कारपूर्ववर्त्तिन इकारान्यस्वरस्य क्वचिदप्यसम्भवात् ।

न च अयासीदित्यादौ तत्प्रसिद्धिः । प्रत्याहारपक्षेऽपि तद्बहिर्भावात् । एजन्तानामप्युपदेशएवाऽऽत्वविधानात् । नाम-धातूनां चानिट्त्वानुपपत्तेः । हकारान्तानां चानिटां क्सादे-शविधानेन ईट एवाप्रसिद्धेः। सेटां तु इकारस्यैवावश्यकत्वात् । षङणन्तानां चानिटामप्रसिद्धत्वात् । हलन्तानां तु प्रत्याहार-पक्षेऽप्यनुपस्थानात् । इगन्तानां चानिटां वृद्धेरावश्यकत्वात् । विधावपि इट् न प्रत्याहारः । षष्ठीटित्त्वाभ्यामवयवावयविभा-वबोधात् । द्वाभ्यां षः । यथा "एकाचो बशो भष् झषन्तस्य " इति। कस्त्रिभ्यः। "अकः सवर्णे" "इको यण्" "इसुसुक्तान्तात्" इति । द्वितीयणकारोऽपि त्रिभ्यः।"अणुदित् सवर्णस्य" इत्येक एवाण् " इणः षीध्वम् " " इको यण् " । मकारो-ऽपि । यथा अम्, यम्, ङम्, । चकारश्चतुर्भ्यः । " इको यणचि " " इच एकाचोऽम् " " एचोऽयवायावः " "वृद्धिरादैच्" । यकारोऽपि तथा " अनुस्वारस्य ययि " "मय उञः, " " झयो हः " " पुमः खयि " इति । रः पञ्चभ्यः । " यरोऽनुनासिके " " झरो झरि " " खरिच " "अभ्यासे

चर्चे " " वा शरि " । शः षड्भ्यः । " योऽशि " "हशि च" "नेड् वशि" "झलाञ्जश् झशि" "एकाचो बशो" इति । एवं लः । " अलोऽन्त्यस्य " " हलि सर्वेषाम् " " लोपो व्योर्वलि " " रलो व्युपधात् " " झलाञ्जश् " " शल इगुपधाद् " इति । एकादिषडन्तसंख्यानां क्रमेण निवेशः उक्तिवैचित्र्यार्थः ।

स्यादेतत् । अनुबन्धानां प्रत्याहारान्तर्भावादजादीनां साङ्कर्यापत्तिः । णादयो हि उभयत्रोपदेशादुभयसंज्ञाः स्युः । एवम् अकारोऽपि । लकारस्थस्य इत्संज्ञासम्बन्धोक्तेः । तथा च दधि णकारीयतीत्यादौ यणादि रुचीनामित्यादौ "अड्व्यवायेऽपि" इति णत्वादिकं च स्यादिति प्राप्ते हयवरट्सूत्रे वार्त्तिकम् ।

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥

अनुबन्धानां णकारादीनां कथं नेत्यत्राक्षेप्याभावप्रतियोगित्वेन ग्रहणस्यैवान्वयः । अच्पदं प्रत्याहारमात्रपरम् । "आदिरन्त्येन" इतिसूत्रेणाव्यवहितोत्तरत्वसम्बन्धेन किञ्चिद्वर्णवतोऽनुबन्धस्य तन्मध्यवर्त्तिसमुदायघटकतत्तद्वर्णव्यक्तिविशेषमात्रे सङ्केतितत्वे अकारादीनामपि ग्रहणानापत्त्या उपस्थापकवर्णविशेषेऽपि सङ्केतस्यावश्यकत्वात् मध्यगतानामनुबन्धानां स्वरूपघटकानुबन्धस्य च ग्रहणस्य दुर्वारत्वादितिशङ्का । पूर्वार्द्धस्यार्थः । समाधानं त्वाह—आचारादिति । आचार्यप्रयोगात् । "उणादयः" " तृषिमृषिकृषेः " " ङसिङसोश्च " इत्यादौ अनुबन्धानां तत्तत्प्रत्याहारान्तर्भावप्रयुक्तकार्यप्रयोजकत्वविरहात् । कार्याभावप्रयोजकाभावप्रतियोगित्वेन तेषामजादिशब्दावाच्यत्वं शास्त्रकृतः संमतम् । अतश्च " आदिरन्त्येन" इतिसङ्केतस्य तत्साधारण्ये प्रमाणाभावात् । अजादिशब्दा-

नामनुबन्धान्यत्वे सति तत्समुदायघटकवर्णत्वं विषयतावच्छेदकम्। सत्यन्तेन मध्यगतानुबन्धवत्संज्ञाघटकस्यापि निरासः।

केचित्तु अनुनासिक इतिनिर्देशोऽपि ज्ञापकः। "प्रत्ययस्थाद्" इतिसूत्रं हि प्रतिषेधारम्भसामर्थ्यात् कृति तद्धिते च प्रवर्त्ततइति निर्बाधम्। तत्रानन्तरस्येतिन्यायेन "यस्येति" लोप एव बाध्यतइतिपक्षे "इको यणचि" इति दुर्वारम्। नासधातोः क्वुनि नासिकाशब्दस्य व्युत्पन्नत्वात्।

येननाप्राप्तिन्यायेन यणादेश एव बाध्यतइतिस्वीकारे तु नासाशब्दात्के प्रत्यये यस्येति लोपो दुर्वारः। अनुबन्धानां प्रत्याहारान्तर्भावे कप्रत्ययस्य अजादितद्धितप्रत्ययसत्त्वेन पूर्वस्य भसंज्ञत्वात्। न च वचनसामर्थ्यादुभयं बाध्यम्। तदपेक्षया प्रत्याहारेष्वितां न ग्रहणमित्यस्यैव ज्ञापयितुमुचितत्वादित्याहुः। तच्चिन्त्यम्। "केऽणः" इति ह्रस्वविधानसामर्थ्यात्कप्रत्यये परे भसंज्ञा न भवतीति कल्पयितुं शक्यत्वात्। अकारेकारयोः यस्येतिलोपावश्यकत्वे उकारस्यैव तद्विधानप्रसङ्गात्।

वस्तुतस्तत्राप्योर्गुणप्रङ्गेन विशेषाभावात्।

समाधानान्तरमाह—अप्रधानत्वादिति। संज्ञास्वरूपत्वप्रतिपत्तिमात्रार्थमनुबन्धोपादानात्संज्ञिनामेव प्राधान्याद्ग्रहणम्। प्रधानाप्रधानयोरितिन्यायात्। न चैवमकारादेरपि तदनापत्तिः। स्वं रूपमित्यनुवृत्त्या आदेरपि संज्ञित्वात्। न च स्वशब्देनानुबन्धोऽपि गृह्यतामिति वाच्यम्। इतेति तृतीयया इतोऽप्राधान्यलाभात्। सर्वनाम्नां च प्रधानपरामर्शित्वस्यौत्सर्गिकत्वात्।

इदं त्वभ्युच्चयमात्रम्। प्राधान्यं यदि संज्ञित्वमेव, तदा पर-

स्पराश्रयः । अथ संकेतग्रहणकशास्त्रजन्यबोधे विशेष्यत्वम् । तन्न । तस्याकिञ्चित्करत्वात् । घटत्वविशिष्टो घटो घटशब्दवाच्य इत्यादौ विशेषणेऽपि शक्तिग्रहाच्च । मीमांसकानां नागृहीतविशेषणेतिन्यायेन विशेषणे एव शक्तिग्रहाच्च । मध्यगतानुबन्धानां ग्रहणस्योक्तरीत्याऽपि दुर्वारत्वाच्च ।

समाधानान्तरमाह—लोपश्चेति । बलवत्तर इति स्वार्थे तरप् । इत्संज्ञायां कृतायां णकारादीनामच्संज्ञालोपयोः प्राप्तौ लोपविधेर्बलवत्त्वात् लोपे कृते संज्ञाप्रवृत्तिकाले तेषामभावान्न संज्ञा । भूतपूर्वन्यायेनान्त्यसहितस्यादेः संज्ञासम्भवात् । अन्यथा वचनवैयर्थ्यात् ।

इदमपि न वास्तवम् । संज्ञाप्रवृत्तिकालसत्त्वस्य शक्तिग्रहेऽनुपयुक्तत्वात् । अत एव वृद्धिसूत्रे कैयटः—

सत्यसति वा संज्ञिनि बुद्धया विषयीकृते शब्देन पूर्वं निर्दिष्टे संज्ञा प्रवर्त्ततइति ।

अत एव " हलन्त्यम् " इतिसूत्रे " लस्येत्संज्ञा " इतिभाष्यादयः । तस्मात् पूर्वोक्त एव तात्पर्यमिति दिक् ॥

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य
प्रथमे पादे द्वितीयमाह्निकम् ।

वृद्धिरादैच् ।

आकार ऐकार औकारश्च आदेशानादेशसाधारण्येन वृद्धिसंज्ञः स्यात् । प्रदेशा विधौ "वृद्धिरेचि" इत्यादयः । अनुवादे तु "वृद्धिर्यस्याचाम्" इत्यादयः । अत्र छन्दोवत्सूत्राणि भवन्तीत्यतिदेशाद् " अयस्मयादीनिच्छन्दसि " इति भसंज्ञत्वात्पदान्तनिमित्तककुत्वाभावः । जश्त्वोपयोगिनी तु पदसंज्ञाऽस्त्येवेति " वृद्धिरादैजदेङ्गुणः " इति संहितया पाठे जश्त्वं भवत्येव । यथा ससुष्टुभा स ऋक्वता गणेनेत्यत्रेति भाष्यम् । दृष्टान्ते कुत्वोपयोगिनी पदसंज्ञाऽस्ति, न तु जश्त्वोपयोगिनीति तु विशेषः । इह तपरत्वमैजर्थम् । तेन त्रिमात्रादीनां न संज्ञेति पूर्वमुक्तम् ।

नचैवं पदान्तत्वाभावाद्दत्वं न स्यादिति वाच्यम् । असन्देहार्थतया पूर्वशेषत्वस्यापि सम्भवात् । दकारस्य तत्कालग्राहकत्वमपि पूर्वं निर्णीतम् ।

स्यादेतत् । कृतमनयोः साधुत्वमितिभाष्यस्वरसाद् आदैच् इति समस्तमेव । अनयोः पदयोरिति तदर्थात् । यद्यपि वृद्धिः आत् ऐजिति पस्पशायां पृथक्पदत्वमप्युक्तम्, तथाऽपि तदभ्युच्चयमात्रम् । अनयोः सूत्रखण्डयोरिति व्याख्यानापत्तेः । तस्य च "वृधिरस्मै अविशेषेणोपदिष्टः प्रकृतिपाठे तस्मात्स्त्रियां क्तिन्प्रत्ययः, आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः" इतिभाष्यविरुद्धत्वात् । चकाराध्याहारप्रसङ्गाच्च । तथा च समाहारे "द्वन्द्वाच्चुदषहान्ताद्" इति समासान्तस्य, इतरेतरयोगद्वन्द्वे

तु द्विवचनस्यापत्तिरिति, सत्यम् । समासान्तविधेरनित्यत्वात् समाहारद्वन्द्वस्यैव निर्दोषत्वात् । तत्र ज्ञापकं तु "प्रतेरंश्वादयस्तत्पुरुषे" इतिसूत्रे अंश्वादिगणे राजन्शब्दपाठः । प्रतेः परे अंश्वादयोऽन्तोदात्ता इति तदर्थः । "राजाहःसखिभ्यः" इति टचो नित्यत्वे तु चित्त्वादेवान्तोदात्तत्वं स्यात् ।

एवमपाचेत्यनुवर्तमाने "स्फिगपूतवीणाञ्जोध्वकुक्षिसीरनामनाम च" इत्यन्तोदात्तविधौ अध्वशब्दोपादानमपि लिङ्गम् । "उपसर्गादध्वनः" इति समासान्तस्य नित्यत्वे अचैव सिद्धेः ।

केचित्तु "द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ" इतिसूत्रे समासान्तरहितमूर्द्धग्रहणमिह लिङ्गम् । द्विमूर्द्धा त्रिमूर्द्धा इत्यत्रान्तोदात्तत्वविकल्पार्थं हि तत् । "द्वित्रिभ्यां ष मूर्द्ध्नः" इतिसमासान्तस्य नित्यत्वे तु नान्त उक्तबहुव्रीहिरप्रसिद्ध एव स्यात् । द्विमूर्द्ध इत्यादेरकारान्तत्वात् । समासान्तानां समुदायावयवत्वात् । न च समासान्तानामुत्तरपदान्तावयवत्वद्वारा समासान्तत्वमित्यस्यापि भाष्यरूढत्वात् षप्रत्ययविशिष्टस्यापि मूर्द्धन्शब्देन ग्रहणं सम्भवत्येवेति द्विमूर्द्धस्त्रिमूर्द्ध इति अकारान्तएव बहुव्रीहौ विकल्पार्थं तदिति वाच्यम् । तत्पक्षस्याभ्युच्चयमात्रत्वात् । मूर्द्धेष्वित्यपहाय बहुव्रीहिगर्भगुरुन्यासारम्भात्सूत्रकृत्संमतत्वाभावाच्च । न च द्वौ पादयति द्विपात् द्वयोर्दन्तान् द्विदतः पश्येति तत्पुरुषवारणाय बहुव्रीहिग्रहणावश्यकत्वे मूर्द्धेषु इतिन्यास एव गौरवमिति कथं ज्ञापकत्वमिति वाच्यम् । समासान्तविशिष्टमूर्द्धशब्दसाहचर्येण पाद्दच्छब्दयोरपि बहुव्रीह्यवयवयोरेव ग्रहणसम्भवे बहुव्रीहिग्रहणस्यानावश्यकत्वात् ।

एतेन "द्वित्रिभ्यां पाद्दन्" इतिसूत्रे बहुव्रीहिग्रहणमेवोक्तपरिभाषाज्ञापकम् । अन्यथा पाद्दन्मूर्द्धेष्वित्येव निर्दिशेत् ।

कृतसमासान्तशब्दप्रक्रमाच्च । बहुव्रीहिभिन्नं च समासान्तविरहादेव वारयिष्यते, इति कौस्तुभोक्तिर्निरस्ता ।

यथान्यासेऽपि षप्रत्ययान्ते उक्तसूत्रस्याप्रवृत्तेरुक्ततया तस्य लक्ष्यत्वमङ्गीकृत्य बहुव्रीहिग्रहणस्य ज्ञापकत्वोक्तेरसङ्गतत्वात् । लक्ष्यभेदाभ्युपगमेन ज्ञापकत्वोक्तेरसाम्प्रदायिकत्वात् ।

यदपि द्विदतः पश्येत्यत्र कथं दद्भावः, "पदन्नोमास्" इति सूत्रे तदन्तविध्यभावादित्याशङ्क्य ष्यङः सम्प्रसारणसूत्रस्थपूर्वपक्षन्यायेन "सिद्धं त्ववयवानन्यत्वाद्" इत्याष्टमिकभाष्यवार्त्तिकन्यायेन चावयवस्य कार्यलाभादिति तत्रोक्तम् । तदपि चिन्त्यम् । शसादिषु परतः पूर्वेषां पादादीनां पदाद्यादेशविधानाच्छङ्कोत्तरयोरसङ्गतत्वात् ।

एतेन "द्वित्रिभ्यां ष मूर्ध्नः" इति षचं विहाय षप्रत्ययविधानमपि ज्ञापकम् । तद्धि षचश्चित्त्वसामर्थ्यलभ्यमन्तोदात्तत्वम् "बहुव्रीहौ प्रकृत्या" इति पूर्वपदप्रकृतिस्वरवत् "द्वित्रिभ्यां पाद्दन्मूर्द्धसु" इति अन्तोदात्तविकल्पमपि मा बाधिष्टेत्येतदर्थं विकल्पस्य क्वचित् सावकाशत्वे सत्येव सङ्गच्छते । अवकाशश्च समासान्तानामनित्यत्वएव लभ्यते । त्रिमूर्द्धानं सप्तरश्मिं गृणीषे इतियथा इत्यपि परास्तम् ।

द्विमूर्द्ध इत्यादौ कृतसमासान्ते तत्सूत्रस्य न प्रवृत्तिरित्युक्तत्वात् । चित्त्वसामर्थ्यलभ्यान्तोदात्तत्वस्य तद्विकल्पबाधकत्वशङ्कानुपपत्तेः । अस्तु वा तत्र विकल्पप्रवृत्तिः, तथाऽपि नोक्तज्ञापकत्वम् । चित्स्वरस्य "बहुव्रीहौ सक्थ्यक्ष्णोः" इतिपूर्वसूत्रविषये फलकसक्थो विशालाक्ष इत्यादौ चरितार्थत्वाद्विकल्पबाधकत्वानुपपत्तेः । न च "द्वित्रिभ्याम्" इति षचो यच्चित्त्वं तदचरितार्थमेवेति वाच्यम् । पूर्वसूत्रीयस्यैवात्रा-

नुवृत्तेः । अन्यथा प्रत्याहाराह्निके "आत" इति कप्रत्ययकित्त्वमाकारैकदेशस्यातो लोपो न भवतीत्यत्र न ज्ञापकम्, "तुन्दशोकयोः परिमृजापनुदोः" इत्युत्तरसूत्रे चरितार्थत्वाद् इतिभाष्योक्त्यनुपपत्तेः । न चैवं षप्रत्ययविधानवैयर्थ्यमेव स्यादिति वाच्यम् । उक्तान्तोदात्तविकल्पस्य समासान्ताभावपक्षएव प्रवृत्तेर्व्यवस्थापितत्वात् । "द्वित्रिभ्याम्" इत्यत्रापि षच्प्रत्ययविधाने चित्त्वबललभ्यान्तोदात्तत्वस्य निरपवादत्वात् द्विमूर्द्ध इत्यादौ तदेव स्यात् । षप्रत्यये तु पूर्वपदप्रकृतिस्वर एवेति वैषम्येन तत्सार्थक्यादित्याहुः ।

तत्रेदं चिन्त्यम् । समासान्ताभावपक्षएवोक्तान्तोदात्तविकल्प इति तावदाकरविरुद्धम् । यद्यत्र षच् स्यात्तदा नित्यमन्तोदात्तत्वं स्यात् । "द्वित्रिभ्याम्" इति विभाषाऽन्तोदात्तत्वं तु यदा समासान्तविधेरनित्यत्वात् द्विमूर्द्धेति समासान्ताभावः, तदा सावकाशम् । षे तु सति समासान्तपक्षेऽपि पक्षेऽन्तोदात्तत्वम् पक्षे पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिति स्वरद्वयसिद्धिरिति तत्रत्यभाष्यकैयटयोरुक्तत्वात् । तथा चोक्तकल्पनं निर्मूलत्वादेव हेयम् । मूर्द्धस्विति निर्देशस्योक्तज्ञापकत्वं तु भाष्यादावेव स्पष्टम् । अत एव मूर्द्धस्विति न्यासानारम्भादुत्तरपदावयवाः समासान्ता इतिपक्षस्य सूत्रानाभिमतत्वमिति निरस्तम् । समासान्ताभावपक्षेऽपि विकल्पप्रवृत्त्यर्थतया तादृशन्यासपरित्यागोपपत्तेः । अत एव षप्रत्ययविधानादपि तत्पक्षस्य सूत्रानाभिमतत्वमित्यपास्तम् । समासान्तपक्षेऽप्यन्तोदात्तविकल्पार्थत्वात् ।

यदप्युक्तम्—"समासान्ताः" इतिसूत्रे समासान्तानां साक्षादेव समासान्तत्वमितिपक्षस्य भाष्ये व्यवस्थापितत्वात्

द्विधुरी त्रिधुरीत्यत्र "अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते" इतिवार्त्तिकानुरोधेन समासार्थादुत्तरपदात्समासान्तः क्रियतइतिपक्षस्य लिखितत्वेऽपि "समासान्ताः" इतिसूत्रे अकारान्ताद् द्विगोरित्युत्तरपदशब्दरहितवार्त्तिकपाठेन द्विधुरीत्यादेः साक्षात्समासान्तत्वपक्षेऽपि साधितत्वात्। वार्त्तिकगतोत्तरपदशब्दमात्रमूलकस्य समासान्तानामुत्तरपदावयवत्वपक्षस्याश्रयेण द्विमूर्द्ध इत्यादावन्तोदात्तविकल्पप्रवृत्तिकल्पनमपेक्ष्य साक्षात्समासान्तत्वपक्षमाश्रित्य द्विमूर्द्ध इत्यादौ कृतसमासान्ते तद्विकल्पप्रवृत्तिर्नैत्येव कल्पयितुमुचितत्वादुक्तरीत्यैव गुरुसूत्रन्यासषविधानयोः सार्थक्यमिति।

तदप्यसत्। तत्पक्षावलम्बनेन कृतसमासान्तेऽपि विकल्पप्रवृत्त्यैव भाष्याद्युक्तया गुरुन्याससार्थक्यात्। "सरूपाणाम्" इतिसूत्रे उत्तरपदान्ताः समासान्ता इतिपक्षस्यापि भाष्यसंमतत्वेन कैयटोक्तत्वाच्च। "गोस्त्रियोः" इतिसूत्रे "कपि प्रतिषेधः" इतिवार्त्तिकप्रत्याख्यानाय भाष्यकृता उक्तपक्षस्य साक्षादेव लिखितत्वाच्च।

यदप्युक्तं "द्वित्रिभ्यां पाद्दन्" इतिसूत्रभाष्यपर्यालोचनया तत्पक्षस्य द्विमूर्द्ध इत्युदाहरणस्य च भाष्यानभिमतत्वं स्पष्टमेव। तथा हि। अकारान्तस्य ग्रहणे नकारान्तस्योपसंख्यानम्, नकारान्तग्रहणे त्वकारान्तस्य। उत्तरपदस्य कार्यित्वे समासान्ते कृते उत्तरपदे विधीयमानस्यान्तोदात्तत्वस्य प्रत्यये प्राप्त्यभावादित्युक्त्वा द्वितीयपक्षे उत्तरपदान्तोदात्तत्वे शेषनिघातेन प्रत्ययस्यानुदात्तत्वे टिलोपे उदात्तनिवृत्तिस्वरेण प्रत्ययोदात्तत्वम्। न चोत्तरपदान्तोदात्तत्वात्पूर्वमव परत्वाट्टिलोप इति वाच्यम्। समासान्तात्पूर्वमेव परत्वादन्तोदा-

त्तप्रवृत्तेः । तदा च टिलोपप्राप्त्यभावात् । न च कृताकृतप्रसङ्गितया नित्यत्वात्पूर्वं समासान्तः । अन्तोदात्तस्यापि तथात्वात् । न च कृते समासान्ते उत्तरपदान्तोदात्तत्वं न प्राप्नोति, परत्वात् टिलोपेन बाधादिति वाच्यम् । लोपेन तन्निमित्तविघातेऽपि समासान्तेन तदविघातात् । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यत्वमिति स्वीकारादिति ।

तदपि चिन्त्यम् । किमत्र उत्तरपदान्ताः समासान्ता इतिपक्षो नास्तीत्यभिमतम्, किं वा द्विमूर्द्ध इत्यादौ नोक्तविकल्प इति । नाद्यः । यदा कृते समासे समासान्त इतिपक्षः, तदेयं सम्प्रधारणा, यदा तु समासार्थादुत्तरपदात्समासान्तः क्रियते इतिपक्षः तदा सम्प्रधारणैव नास्तीति कैयटेनैवोक्तत्वात् । नान्त्यः । तदुत्तरमेव हि कैयटेन व्याख्यातम्—

यदि नित्यः समासान्तः स्यात्तदा कार्यिविशेषसन्देहव्यावृत्तये प्रक्रमाभेदाय वा समासान्त एवोच्चार्येत । तदनुच्चारणात्तु समासान्तस्यानित्यत्वं ज्ञाप्यते । तत्र यदा समासान्तो नास्ति तदा समासस्योत्तरपदस्य वा कार्यित्वे विशेषाभावः । यदा तु समासान्तः क्रियते तदा समासस्य कार्यित्वे समासान्तस्योदात्तत्वम् । यदाऽप्युत्तरपदस्य कार्यित्वम्, तदा परत्वादन्तोदात्तत्वे कृते समासान्तः । तत्र टिलोपे उदात्तनिवृत्तिस्वरेणापि सिद्धम् । ननु प्रत्ययस्वरेण समासान्तस्य भाव्यम्, नैतदस्ति । बहुव्रीहिस्वरेण तस्य बाधात् । बहुव्रीहिस्वरस्याप्यनेनेति ।

अनेन च द्विमूर्द्ध इत्यादौ पाक्षिकोदाहरणत्वस्यापि लाभात् । अत एव षप्रत्यये पूर्वपदप्रकृतिस्वर एवेत्यपि कल्पनं निरस्तम् ।

यदप्युक्तम् । मूर्द्धसु बहुव्रीहौ" इति गुरुनिर्देशस्योक्तपक्षावलम्बनेन कथंचित् सार्थक्येऽपि षप्रत्ययविधानस्य तदसम्भवः ।

षचश्चित्त्वसामर्थ्यलभ्यान्तोदात्तस्य पूर्वसूत्रविषये चरितार्थस्य द्विमूर्द्ध इत्यादौ परेणान्तोदात्तविकल्पेन बाधसम्भवात् । न च चित्त्वप्रयुक्तमन्तोदात्तत्वं पूर्वपदप्रकृतिस्वरमेव बाधते न तूक्त-विकल्पमित्यत्र विनिगमकाभावः । कक्षया कक्षा निमातव्येति-भाष्योक्तन्यायेन तत्सिद्धेः । पूर्वकक्षाप्राप्तानामुत्तरकक्षाप्राप्ता बाधका इति तदर्थात् । अत एव प्रथमकक्षाप्राप्तयोर्यण्गुणयोः सवर्णदीर्घः, तस्य च "अतो गुणे" इति तृतीयकक्षाप्राप्तं पररूपं बाधकम् । प्रकृतेऽपि प्रथमकक्षायां "समासस्य" इत्यन्तोदात्तत्वम्, द्वितीयायां पूर्वपदप्रकृतिस्वरत्वम्, तस्य च षचश्चित्त्वसामर्थ्य-लभ्यमन्तोदात्तत्वम् उक्तविकल्पश्चेति तृतीयकक्षागतं बाधक-द्वयम् । तत्रापवादविप्रतिषेधे परत्वादन्तोदात्तविकल्प एव भ-विष्यतीति प्रकृतेन षचैव सिद्धेरिति ।

तदपि चिन्त्यम् । षचो विधाने तस्य च नित्यत्वे विकल्पस्य चित्स्वरनिर्मुक्तविषयाभावेन विप्रतिषेधायोगात् । समासान्ता-भावपक्षे विकल्पस्य सावकाशत्वमित्युक्तौ तु तस्य समासान्त-पक्षविषयकत्वे प्रमाणाभावात्समानविषयकत्वाभावेन तदयो-गात् । नित्यविधेर्वैकल्पिकविधिविषये प्रवृत्त्यसम्भवात् । तथा च निरवकाशत्वादेव विकल्पसिद्धौ षप्रत्ययविधानं विकल्पस्य सावकाशत्वमाक्षिपत् तत्प्रयोजकतया समासान्तविधेरनित्यत्वं ज्ञापयतीति दिक् ।

नन्वत्र कुत्वप्राप्तिरेव नास्ति । लौकिकवैदिकशब्दानामेव व्युत्पाद्यत्वाद् इति चेत् अत्राहुः—

अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियो-गान्नित्यत्वाच्च सर्वसंज्ञानां लौकिकत्वादादैच्छब्दस्यानुकरण-शब्दत्वाज्जातिशब्दत्वाद्वा शास्त्रप्राप्तिरस्तीति ।

लौकिकत्वादादैच्छब्दस्य शास्त्रप्राप्तिरस्तीति सम्बन्धः । तत्र नित्यत्वादिति हेतुः । आदैच्छब्दस्य आकारादौ तद्भिन्ने च साङ्केतिकशक्तेः सत्त्वात् । नन्वेवं संज्ञाविधानवैयर्थ्यम् । अतः शक्त्यवच्छेदेनेति । स च शक्तिसङ्कोचः । इदं पदमेतदर्थं बोधयत्वितिव्यक्तिविशेषबोधकत्वप्रकारकेच्छाविशेष्यत्वमिति यावत् । संज्ञिनि उक्तेच्छायां विशेष्यतासम्बन्धेन विशेषणीभूते बोधे विशेष्यतासम्बन्धेन विशेषणीभूतायां व्यक्तौ विनियोगात् । उक्तसङ्केतज्ञानसहकारेण तद्विषयकशाब्दधीजनकत्वव्यवस्थापनात् । उक्तं च—

व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित् ।
नित्य एव तु सम्बन्धो डित्थादिषु गवादिवत् ॥
वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः ।
अकृत्रिमोऽभिसम्बन्धो विशेषणविशेष्यवत् ॥

तथा चात्र शास्त्रे वृद्धिशब्देनादैच एव बोध्या इतिनियमार्थं संज्ञाविधानमित्यर्थः । नित्यत्वादित्युपपादयति— अनेकशक्तेरिति । अनेकस्मिन्ननेका वा शक्तिर्यस्य अर्थगतप्रवृत्तिनिमित्तविशेषानपेक्षतया वक्तृतात्पर्यविषययत्किञ्चिद्व्यक्तिबोधनसमर्थस्य । न च "न कोपधायाः" इति पुंवद्भावनिषेधः । तद्धितवुग्रहणस्य तत्र वक्ष्यमाणत्वात् । अनेकविषया शक्तिर्यस्येति विवरणवाक्यं तु सप्तम्यर्थो विषयत्वमित्यभिप्रायकम् + अवच्छेदकभेदेऽपि लाघवादेकैव शक्तिः । औपाधिकभेदस्योपाधिभेदमात्रे पर्यवसानादित्याद्यः पक्षः । शक्तिभेदपक्षे द्वितीयः । ननु न सन्ति यदृच्छाशब्दा इति ऋऌक्सूत्रे वार्त्तिके व्यवस्थितत्वात्कथमेतत्—

अतः अनुकरणेति । नन्वनुकार्यानुकरणयोरभेदाविवक्षायां

सुबनुत्पत्तौ पदत्वाभावात्कुत्वाप्राप्तिः । भेदविवक्षायां तु प्रदेशान्तरप्रयुक्तस्यैवादैच्छब्दस्यात्र प्रत्ययादाकारादीनामग्रहणात्संज्ञित्वानुपपत्तिः—अतः जातिशब्दत्वादिति । ऐकारादिव्यक्तिद्वये ऐजित्यनुगतप्रत्ययादैच्त्वम् ऐकारादिनिष्ठप्रातिस्विकजातिद्वयव्यापकः सामान्यविशेषः । द्रव्यत्वादिवदेतत्स्वीकारेऽपि बाधकाभावादिति । तन्न । देवदत्तीयत्वाद्यनुमापकजातिविशेषैः सह साङ्कर्यात् । गुणगतजातौ तन्न दोष इत्यस्य निर्मूलत्वात् । अनुगतप्रत्ययस्य "आदिरन्त्येन" इत्येतत्सूत्रविहितसंज्ञौपाधिकत्वेनातिरिक्तविषयकत्वाभावाच्च ।

यदपि सिद्धान्ते व्यक्तिविशेषोपहितसत्ताया एव जातित्वस्वीकारादिहापि साऽस्तु । व्यक्तिविशेषाश्च स्वरूपसत्ताऽतद्भेदेनानुगतीकृताः ।

सत्तोपधायकास्तस्यां सर्वे शब्दा व्यवस्थिताः ।

इति हरिवचनादिति, तदपि तथैव । तन्मतेऽपि जातिबाधकानामनुसरणीयत्वात् । कल्पकस्यापेक्षणीयत्वाच्च । न हि तार्किकाणामेव स कुलधर्मः । सौगतैरप्युपगमात् । तदुक्तं कुसुमाञ्जलौ—

जात्योरतद्व्यावृत्त्योर्वा समाविष्टयोः परापरभाव एवेति । न चानुमापकजातीनां नानात्वस्वीकारपक्षे सङ्करोऽनवकाश इति वाच्यम् । तथाऽप्यतिरिक्तजातिकल्पने मानाभावात् । तस्मादनुकार्यनिष्ठामैत्वादिजातिमेवादाय जातिशब्दत्वम् । ऐत्वादिसामान्यमस्तीति विवरणस्याप्यत्रैव तात्पर्यम् । कुत्वशब्देऽपि कुशब्दस्य तद्वर्गीयवर्णमात्रे संकेतितत्वेन तदुत्तरत्वप्रत्ययस्य कत्वादिजातिपञ्चकं वाच्यम् । प्रकृत्यर्थप्रकारस्य त्वशब्दार्थत्वात् । तथा च प्रकृते कतरासमवेतत्वे सति सकलककारसमवेतत्वरू-

पकत्वत्वेन कत्वोपस्थितौ बाधबलाच्चकारे कत्वजातेरापादयितुमशक्यत्वात् स्वाश्रयव्यक्तिद्वारैवाऽऽपत्तिपर्यवसानात् चकारस्य ककार आदेशः कुतो न भवतीति भाष्यार्थः । एवं सर्वत्रावसेयम् ।

स्यादेतत् । शाब्दबोधे प्रथमनिर्दिष्टमुद्देश्यम् परनिर्दिष्टं विधेयमिति सर्वसिद्धम् ।

यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् ।
तच्छब्दयोगः पश्चात्त्वं साध्यत्वं च विधेयता ॥

इत्याभियुक्तोक्तेः । तत्कथमत्र आदैजुद्देशेन वृद्धिसंज्ञा विधीयतइति चेत्, उच्यते । आदैच्शब्देन प्रदेशेषु व्यवहाराभावात् तस्य निर्ज्ञातार्थत्वात् वृद्धिशब्दस्य च वैपरीत्यात् उद्देश्यत्वासम्भवात् वृद्धेरेव संज्ञात्वे निर्णीते विपरीतानुपूर्वीकल्पनेन वृद्धिसंज्ञाविधानम् । न चैवं पौरुषेयत्वेन तस्याप्रामाण्यापत्तिः । शास्त्रतात्पर्यविषयत्वस्यैव तत्प्रयोजकत्वात् । अन्यथाऽश्वाभिधानीमादत्तइत्यादेर्गर्दभाभिधान्यादिव्यावृत्तौ प्रामाण्यानापत्तेः । "डः सि धुट्" इत्यादावुभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति पञ्चम्या कल्पितस्य सप्तम्यन्ते सीतिशब्दे षष्ठ्यन्तत्वस्य तथात्वापत्तेश्च । मङ्गलार्थं चात्र वृद्धिशब्दस्य प्राक्प्रयोगात् । न चाचार्यस्य मिथ्याज्ञानवासनाराहित्येन दुरितसामान्यशून्यत्वात्तद्विशेषविघ्नाभावस्य सुतरां तत्र सत्त्वादलौकिकज्ञानवत्त्वेनास्मदादिवद्विघ्नसन्देहस्याप्यभावाच्च किमर्थं तदिति वाच्यम् । तथाऽपि परमकारुणिकतया सर्वसिद्धशिष्टत्वकस्वाचारविषयत्वेन हेतुना शिष्याणामभिमतकर्मारम्भसमये मङ्गलस्यावश्यकर्त्तव्यत्वानुमितिसिद्ध्यर्थं तेषामेवाऽऽनुषङ्गिकमङ्गलसम्पत्तिनिबन्धनस्वग्रन्थाध्ययनसिद्धिमूलकवैदुष्यवशात्

पूर्वोक्तरीत्याऽनेककर्माधिकारे यजमानस्य ऋत्विक्प्रयुक्तदृष्टादृष्टानेकफलसम्पत्त्यर्थं निष्कामकृतैश्च तैरेव कर्मभिरन्तःकरणशुद्धिद्वारा परमपुरुषार्थापवर्गसिद्ध्यर्थं च तदुपपत्तेः ।

यत्तु "व्यवहाराय नियमः" इतिपक्षे अत्र शास्त्रे वृद्धिशब्देनादैच एव बोध्या इति यथाश्रुतमेव सम्यगिति । तन्न । विधिसमानानुपूर्वीकत्वस्य नियमेऽप्यपेक्षितत्वात् । प्राप्तार्थत्वेन तदितरव्यावृत्तौ तात्पर्यमित्येतावतैव तत्र भेदात् । अन्यथा "अदेङ्गुणः" इत्यादौ विपरीतानुपूर्वीकल्पनापत्तेः । व्रीहीनवहन्तीत्यादावपि व्रीह्युद्देशेनैवावघातस्य विधेयत्वात् ।

यदपि "यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते" इतिपक्षेऽपि कार्यकालपक्षमाश्रित्य "मृजेर्वृद्धिः" आदैचो भवन्तीत्यर्थाद् यथाश्रुतमेव साधु । तत्र च तपरत्वमनुपयुक्तमेव । भाव्यमानत्वेन सवर्णग्राहकत्वाप्रसक्तेः । यथा ज्योतिष्टोमराजसूयादिशब्दानां यागविधावेव सामानाधिकरण्यान्नामधेयत्वावगतिः न तु वाक्यान्तरेण, तथा अस्मिन् पक्षे वृद्ध्यादिशब्दानामपि । "वृद्धिरादैच्" इति तु "इको गुणवृद्धी" इतिवत् पदोपस्थापकम् । उपस्थाप्यस्य संज्ञितया तु संज्ञासूत्रत्वव्यवहारः । न च "वृद्धिर्यस्याचाम्"इत्यादावनुवादे आदैचां सवर्णग्राहकत्वं स्यादिति वाच्यम् । तादृशलक्ष्याभावात् । अनेकशक्तिकल्पनापत्तेश्च । विधिवाक्यस्य प्राधान्यात्तत्र निर्णीतस्यैवार्थस्यान्यत्र ग्रहणाच्चेत्यादि ।

तदपि चिन्त्यम् । ऋकारस्थाने त्रयाणामादेशानां प्रसङ्गात् । अन्यथा विध्यर्थानिष्पत्तेः । अत एव "भाव्यमानत्वादैचो ग्राहका न भविष्यन्ति, नैतदस्ति, नह्यत्र संज्ञाविधावैचो भाव्यन्ते" इति कैयटः । "कार्यकालपक्षाश्रयेण शङ्का, यथोद्देशपक्षेण परिहारः" इति विवरणकृतः ।तस्मादत्र यथोद्देशपक्ष एव ग्राह्यः ।

अत्रेदमवधेयम् । वृद्धिशब्दो वृद्धिशब्दवाच्ये लाक्षणिकः । न च तस्य प्रथममनुपस्थितिः । वृद्धिपदं किञ्चिदर्थवाचकमितिज्ञाने कश्चिदर्थो वृद्धिशब्दवाच्योऽस्तीति सामान्यतस्तदुपस्थितिसत्त्वात् । तस्याभेदः संसर्गः । तथा च आदैचो वृद्धिशब्दवाच्याभिन्ना इतिधीः । ततश्चास्यां बुद्धौ वाच्यत्वं यत्र विशेषणं स संज्ञी । वाच्यत्वे यद्विशेषणं सा संज्ञा । "इन्द्रो मरुत्वान्मघवा" इत्यादावप्ययमेव प्रकारः । एकपदशक्तिग्रहस्य प्रकारान्तरेणावश्यमपेक्षितत्वात् । तत्पर्यायमात्रशक्तिज्ञानशून्यस्य कोशादितोऽपि शक्तिग्रहाभावात् ।

यत्तु आकारादयो वृद्धिं प्रत्यभेदसंसर्गेण विशेष्या इति । तन्न । वृद्धिं प्रतीत्यस्य हि कोऽर्थः । वृद्धिशब्दं प्रति वृद्धिशब्दार्थं प्रति इति वा । नाद्यः । लक्षणां विना तदलाभात् । लक्षणां विनैवोपपत्तेरित्युत्तरग्रन्थासङ्गतेश्च । न च वृद्धिशब्दवाच्यं किञ्चिदस्तीतिज्ञाने शब्दस्य विशेषणत्वेनोपस्थित्या तस्य लक्षणां विनाऽपि लाभ इति वाच्यम् । स्वतन्त्रोपस्थितये तदावश्यकत्वात् । अभ्युपेत्यापि ब्रूमः । वृद्धिशब्दस्य विशेषणतायामभेदस्य च संसर्गत्वे आदैचो वृद्धिशब्दाभिन्ना इतिबोधः स्यात् । न चेष्टापत्तिः । अयोग्यत्वात् । न च वाच्यत्वं संसर्गः । समविभक्तिकपदोपस्थाप्ययोर्भेदान्वयासम्भवात् । अत एव न द्वितीयः । न च वृद्धिशब्दवाच्यत्वस्याप्युक्तरीत्योपस्थितिसत्त्वात्तस्यैवाभेदेन विशेषणमास्त्विति वाच्यम् । तस्याप्यर्थविशेषं प्रति विशेषणीभूतत्वात् ।

वस्तुतस्तु शाब्दिकमतेऽपि पदस्यैव प्रकारताऽभ्युपगमाद् वाच्यत्वस्य च संसर्गत्वात् वृद्धिपदजन्यः सामान्यशक्तिग्रहमूलको बोधो वाच्यत्वसंसर्गक एव । तथा च वृद्धिपदजन्यायामुपस्थितौ संसर्गतापन्ने वाच्यत्वे पदार्थानामाकारादीनां कथमन्वयः ।

वाच्यत्वस्य पदजन्योपस्थित्यविषयत्वात् । अन्यथा पर्वतो वह्निमान्गुण इत्यपि स्यात् । संसर्गतापन्ने संयोगे गुणस्याभेदान्वयसम्भवात् ।

ननु वृद्धिशब्दस्य आदैज्वाचकताया अनेकशक्तेरितिन्यायेन सत्त्वाद् घटो नील इत्यादिवत्तदर्थस्यैवाभेदसम्बन्धेनादैचोरन्वय इत्युक्तग्रन्थाभिप्राय इतिचेन्, मैवम् । तथा सत्युद्देश्यतावच्छेदकविधेययोरभेदापत्त्या निराकाङ्क्षत्वाद् घटो घट इतिवाक्यवत् । अत एव शब्दाश्रय आकाशमित्यादिवाक्ये आकाशपदं तद्वाच्यपरम् । व्युत्पन्नं प्रति तद्वाक्यानुपयोगादित्युपायादावुक्तम् ।

यदप्युक्तम् । लक्षणाऽङ्गीकारे विशिष्टविधिपक्षे मत्वर्थलक्षणादोषम् उक्त्वा नामधेयत्वमुद्भिदादिपदानां व्यवस्थापितम् । तन्न स्यात् । नामधेयत्वेऽपि लक्षणायास्तुल्यत्वादिति । तदपि मन्दम् । गुणविधिपक्षे मत्वर्थलक्षणायां गुणांशस्य तद्गतलिङ्गसंख्याकारकादेश्च प्रमाणान्तरानवगतत्वात् तत्सिद्ध्यर्थं विशेषणविधिकल्पनप्रसङ्गात् । नामधेयस्य तु श्रोत्रोपस्थितस्यैव नामार्थत्वाभावाद्वाच्यत्वसम्बन्धेन धात्वर्थयागान्वय इति न तदंशे विधिकल्पनमितिपक्षे शङ्काया एवानवकाशात् ।

नामलक्षणापक्षेऽपि उद्भिच्छब्दस्य तृतीयार्थे वाच्यत्वे तस्य धात्वर्थे यागेऽन्वयकल्पनेऽपि विशेषणविधिकल्पकत्वाभावेन लाघवात् । अन्यथा त्वत्पक्षे सोमेन यजेतेत्यादावपि मत्वर्थलक्षणाऽपेक्षया लक्षणां विनैव नामत्वसिद्धिरिति सोमादिपदमपि नामधेयमेव स्यादिति गुणविधिमात्रोच्छेद इत्यलम् पल्लवितेन ।

वृद्धिपदशक्तिज्ञानस्य चैतत्त्रितयवृत्तितत्तद्धर्मान्यतरप्रका-

रकज्ञानत्वं कार्यतावच्छेदकम् । न तु तदन्यतरप्रकारकत्वाभाववदवृत्तितदन्यतमप्रकारकत्ववज्ज्ञानत्वम् पुष्पवन्तपदस्येव सूर्यत्वप्रकारकत्वाभाववदवृत्तिचन्द्रत्वप्रकारकत्ववज्ज्ञानत्वम् । तत्र—

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ।

इति प्रमाणसत्त्वादत्र च तदभावात् । प्रत्युत "वृद्धिरेचि" इत्यादौ "एकः पूर्वपरयोः" इत्येकस्यैव विधेयत्वावगमात् । "वृद्धिर्यस्याचामादिः" इत्यादेश्च । नह्युक्तवर्णत्रयमव्यवधानेन कस्यचित् पदस्यादौ वर्त्तते । "मालादीनां च" इति विरोधाच्च । अन्यथाऽवृद्धत्वात् पूर्वसूत्रेणैव पूर्वपदप्रकृतिस्वरासिद्धेः । एवमुत्तरत्रापि । इदमेव "प्रत्येकं वाक्यपरिसमाप्तिः" इत्युच्यते । यत्र तु समुदायपर्याप्तशक्तिप्रमाणम्, यथा "उभे अभ्यस्तम्" इति, तत्र नावयवमात्रस्य वाच्यत्वम् । किं त्वेकवर्णविषयकत्वाभाववदवृत्त्यन्यवर्णविषयकत्ववज्ज्ञानत्वमेव कार्यतावच्छेदकम् । अत एव तत्र उभेग्रहणम् । अन्यथौत्सर्गिकत्वेन मिथोऽनपेक्षयोर्द्वयोरेव तत्संज्ञाप्रसङ्गात् । अतस्तात्पर्यग्राहकप्रमाणान्तरसत्त्वएव समुदाये वाक्यपरिसमाप्तिरिति सिद्धम् ।

प्रकृतमनुसरामः । ननु आदैचां स्वरूपेण वृद्धिसंज्ञा, उत तन्त्रावृत्त्येकशेषाणामन्यतमेन वृद्धिशब्देन ये विहितास्तेषामेव । नाद्यः । सर्वभास इत्यादौ "उत्तरपदवृद्धौ सर्वं च" इति पूर्वपदान्तोदात्तत्वापत्त्या समासान्तोदात्तत्वस्यासिद्धेः । तावतीभार्याऽस्य तावद्भार्य इत्यादौ "वृद्धिनिमित्तस्य च तद्धितस्य" इति पुंवद्भावनिषेधापत्तेश्च । "आ सर्वनाम्नः" इत्यात्वं प्रति वतुपो निमित्तत्वात् । नान्त्यः । शालीयो मालीय इत्यादौ "वृद्धाद्" इतिच्छप्रत्ययासिद्धेः । आम्रमयं शालमयमित्यादौ

"नित्यं वृद्धशरादिभ्य" इति मयट्प्रत्ययानुपपत्तेश्च ।

किं च आम्रगुप्तायनिः शालगुप्तायनिः इत्यत्र "उदीचां वृद्धादगोत्राद्" इति वृद्धलक्षणः फिञ् न स्यात् ।

यद्यपि "प्राचामवृद्धात् फिन् बहुलम्" इति फिनाऽपीष्टसिद्धिः । "ञ्नित्यादिर्नित्यम्"इति स्वरेऽपि भेदाभावात् । आम्रगुप्तायनीभार्य इत्यत्र प्रागुक्तसूत्रेण पुंवद्भावनिषेधस्तु नावश्यकः । "जातेश्च" इत्यतोऽपि सिद्धेः । "गोत्रं च चरणैः सह" इति पारिभाषितजातेस्तत्र सत्त्वात् । आम्रगुप्तायनेश्छात्रा इति वृद्धाच्छप्रत्ययविवक्षायां "फक्फिञोरन्यतरस्याम्" इति लुग्विकल्पेन आम्रगुप्तीयाः आम्रगुप्तायनीयाः इति द्वैरूप्यं तु सिद्धान्तेऽपि नेष्टम् । "फक्फिञोः" इत्यत्र यूनीत्यनुवृत्तेः । "शिवादिभ्यः" इत्यणन्ताद्यास्कशब्दाद् "अणो द्व्यचः" इति फिञ्, यास्कस्यापत्यं युवा यास्कायनिः, तस्यच्छात्रा यास्कीया यास्कायनीयाः इत्येव तत्रोदाहृतत्वादिति फिञो न कश्चिद्विशेषः । तथाऽपि प्राचामुदीचामिति आचार्यविशेषमतगर्भसूत्रस्वारस्यभङ्गात् । "ऋतो भारद्वाजस्य" इतिसूत्रे प्रकारान्तरेण समाधाने अयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवतीतिभाष्योक्तेर्मतप्रच्यवस्यापि दूषणत्वात् ।

किं च फिन्पक्षे आम्रगुप्तायनेरपत्यं कुत्सितमित्यर्थे फिञन्तात्सौवीरगोत्रादपत्येऽर्थे छठकौ कुत्सने गम्ये इत्यर्थकेन "फेश्छ च" इतिसूत्रेण छठकोरप्रवृत्तौ आम्रगुप्तायनीयः आम्रगुप्तायनिकः इतिरूपद्वयं न स्यात् । वृद्धादित्यधिकारेण फिञ एव तत्रोपादानात् ।

यमुन्दश्च सुयामा च वार्ष्यायणि फिञः स्मृताः ।

इतिपरिगणनस्य पौरुषेयत्वात् । अन्यथा सौवीरगोत्र-

पदप्रत्युदाहरणत्वेन तैकायनिः इतिग्रन्थलेखनविरोधात् । उक्तत्रयमध्ये तैकायनिशब्दस्य तत्रापरिगणितत्वात् ।

अपि च आम्रगुप्तायनेरपत्यं युवा "प्राग् दीव्यतोऽण्" तस्य "ण्यक्षत्रियार्षञितो यूनि लुगणिञोः" इति लुकि आम्रगुप्तायनिः पिता आम्रगुप्तायानिः पुत्र इतिरूपद्वयं फिना न स्यात् । ञित्त्वाभावेनोक्तलुगप्रवृत्तेः । अब्राह्मणगोत्रमात्राद्युवप्रत्ययोपसंख्यानस्य च ब्राह्मणगोत्रे प्रवृत्त्यभावात् । एवमेतत्पक्षे "मालादीनां च" इति व्यर्थं स्यात् । अवृद्धमित्येव सिद्धेः । एवं वृद्धिशब्दे तन्त्राद्याश्रयणेऽपि गौरवम् । संज्ञाया विधानं विहितानां च संज्ञेतिपरस्पराश्रयवारणाय सूत्रशाटकवद्भाविसंज्ञाविज्ञानेऽपि गौरवमिति प्राप्ते उच्यते—

आदैचामविशेषेण वृद्धिसंज्ञा । उक्तदोषाप्रवृत्तेः । "उत्तरपदवृद्धौ सर्वं च" इत्यत्रोत्तरपदाधिकारविहिताया एव वृद्धेर्ग्राह्यत्वात् सर्वभासादौ दोषाभावात् । अन्यथा सर्वः कारकः सर्वकारक इत्यादौ वृद्धिशब्देन विहिता या वृद्धिस्तद्वत उत्तरपदस्य सत्त्वादुक्तस्वरापत्तेः । उत्तरपदग्रहणमेव च तदाधिकारविहितवृद्धिग्रहे लिङ्गम् । अन्यथा आदैज्मात्रस्योत्तरपदत्वाभावात्सामर्थ्यादेव वृद्धिमदुत्तरपदलाभे तद्वैयर्थ्यापत्तेः । तस्मात्सर्वपाञ्चाल इत्यादावेव तत्प्रवृत्तिः । "सुसर्वार्द्धाज्जनपदस्य" इति वृद्धेः । तावद्भार्येऽपि नातिप्रसङ्गः । वृद्ध्यात्मकतद्धितस्याभावेनाभेदान्वयानाप्त्या वृद्धितद्धितस्येत्येतावन्मात्रेणापि वृद्धेस्तद्धित इति षष्ठीसमासेन वृद्धिनिमित्तत्वलाभेऽपि निमित्तशब्दोपादानसामर्थ्याद्वृद्धेर्निमित्तं यस्मिन्निति व्यधिकरणबहुव्रीहिमाश्रित्य ञकारणकारककाररूपेत्संज्ञाप्रतियोगित्वसम्बन्धेन वृद्धेर्निमित्तं यत्रास्ति अण् अञ् फक् इत्यादौ तस्यैव तद्धितस्य तत्र पुंवद्भावनिषे-

ध इतिव्याख्यानात् । आकारस्य च स्वरूपतो विधानेऽपि वतुप्रत्ययस्योक्तवृद्धिनिमित्तत्वाभावात् ।

न च अर्शसा भार्याऽस्येत्यत्र मत्वर्थाच्प्रत्ययोत्तरटाबन्ते अर्शसाशब्दे तद्धितस्त्रीप्रत्यययोरेकादेशस्य परं प्रत्यादिवद्भावात्तद्धितग्रहणेनापि ग्रहणात् तत्र वृद्ध्यात्मकस्तद्धितः सम्भवत्येवेति कथं निमित्तशब्दोपादानसामर्थ्यमिति वाच्यम् । तथाऽप्यरक्तेतिपर्युदाससामर्थ्यात्कर्मधारयशङ्काऽनुपपत्तेः । रक्तविकारार्थकप्रत्ययस्य वृद्ध्यात्मकत्वाभावेन तत्र प्रसक्त्यभावात् ।

अन्ये तु वृद्धिशब्देन विहिताया वृद्धेर्यन्निमित्तमिति तस्यार्थः। वृद्धिशब्दे तन्त्राद्याश्रयणात् । तादृशी च ञिणित्किन्निमित्ता सर्वैव वृद्धिः । न च वैयाकरणभार्यः सौवश्वभार्य इत्यादावतिप्रसङ्गः, अणो यथोक्तवृद्धिनिमित्तत्वादिति वाच्यम् । फलोपहितत्वस्य निमित्तशब्दार्थत्वात् । तत्र च "न य्वाभ्याम्"इति वृद्धिनिषेधात् । न च ऐचौ आदायात्रापि फलोपधानम् । स्वरूपेणैव तयोर्विहितत्वादित्याहुः ।

अपरे तु यावद्वृद्धिजननयोग्यत्वे सति किञ्चित्फलोपहितस्तद्धितो निमित्तशब्देन विवक्षणीयः । वैयाकरणभार्य इत्यादौ तु ऐज्भ्यामणो न फलोपधानम् । वृद्धिनिषेधसन्नियोगशिष्टयोस्तयोरण्निमित्तकत्वे मानाभावात् । निषेधप्रतियोगिवृद्धिनिमित्तकत्वेऽपि ऐजागमं प्रत्यणो निमित्तत्वायोगादित्याहुः ।

तदुभयमपि चिन्त्यम् । योग्यत्वं हि योग्यतावच्छेदकरूपवत्त्वमेव । तच्चात्र शास्त्रमात्रगम्यतया ञित्त्वणित्त्वकित्त्वरूपमेव । फलोपधानमपि तद्रूपेणैव वाच्यम् । फलोपहितनिष्ठान्यथासि-

द्ध्यनिरूपकधर्मावच्छेदेन योग्यताग्रहनियमात् । तथा च वैयाकरणभार्य इत्यत्र कथं नातिप्रसङ्गः । अणो णित्त्वेन प्रकृत्यन्तरे वृद्धिरूपफलोपहितत्वात् । न च यत्प्रकृत्युत्तरं या अणादिव्यक्तिः प्रयुज्यते, तत्र फलोपधानं विवक्षितमिति वाच्यम् । यावद्वृद्धिजननयोग्यत्वस्य दुर्ग्रहत्वापत्तेः । न हि दाक्षिरित्यादौ इञादिव्यक्तेः स्वप्रकृतिपुरस्कारेण तद्व्यक्तित्वेन फलोपधानविवक्षायामौपगवादिशब्दगतवृद्धौ तत्स्वरूपयोग्यत्वं ग्रहीतुं शक्यम् । अदन्तभिन्नानां तत्प्रकृतित्वाभावात् । धर्मान्तरेण योग्यत्वं धर्मान्तरेण च फलोपधानमित्यस्य वक्तुमशक्यत्वात् । अत एव विशेष्यभागवैयर्थ्यम् । क्वचित्फलानुपधाने योग्यताया एवाभावात् । एवं च क्वापि पुंवद्भावनिषेधो न स्यात् । ञिदादिप्रत्ययत्रयमध्ये सर्वेषामन्यतमप्रकृतिकत्वनियमाभावात् । अत एव वृद्धिशब्दविहिताया वृद्धेर्निमित्तमित्यपि प्रागुक्तमतं परास्तम् । फलोपधानस्य योग्यतावच्छेदकधर्मावच्छेद्यत्वानियमेन तत्राप्युक्तदोषावतारादिति ।

तस्मादिदमत्र तत्त्वम् । अनिषिद्धवृद्धिप्रकृतिकत्वे सति वृद्धियोग्यत्वं वृद्धिनिमित्तत्वम् । तेन विशेष्यभागेन तावद्भार्ये विशेषणभागेन च वैयाकरणभार्येऽतिप्रसङ्गाभावः । इदं च विशेषणांशानुरोधेन प्रकृतिविशेषोत्तरतादृशतद्धितमात्रसाधारणमिति दिक् ।

इदमप्यत्रावधेयम् । "व्यक्तिः पदार्थो भेदकाश्च गुणाः" इतिदर्शने यद्गुणविशिष्टस्योच्चारणं तदन्यगुणभाजां संज्ञा । नन्वयं प्रसङ्गाद्गुणान्तरयुतानामपि संज्ञार्थं तपरत्वमिति वार्तिकमतम् । तपरसूत्रस्यात्र पक्षेऽनणामपि ग्राहकत्वमिति विध्यर्थत्वात् । वेदे ह्युदात्ते कर्त्तव्येऽनुदात्तोच्चारणे दृष्टादृष्टदोषदर्शनात्

नियमतो गुणानां भेदकत्वात् ।

भाष्ये तु "एकोऽयमात्मा उदकं नाम तस्य गुणभेदादन्यत्वं भवति, अन्यदिदं शीतमन्यदिदमुष्णम्" इत्युक्तम् । तत्र जलत्वजात्यभिप्रायेणैक्यं न विवक्षितम् । व्यक्तिभेदादेवान्यत्वसंभवे गुणभेदप्रयुक्तभेदोदाहरणत्वानुपपत्तेः । अन्यो घट इत्युक्ते घटान्तरप्रतियोगिकस्यैव भेदस्य बोधात् ।

किं त्वेकभाजनस्थत्वेन तत्तदुपाध्यवच्छिन्नएव तत्र गुणान्तरयोगाद्भेदव्यवहार इत्यर्थ इति कैयटः ।

क्वचिदभेदकत्वपि । मुण्डेन चौर्ये कृते कुन्तलित्वावस्थायामपि चौरोऽयमिति व्यवहारात् । एतच्छास्त्रे तु किं न्याय्यमित्याकाङ्क्षायां सिद्धान्तमाह भाष्यकारः—

अभेदका एव गुणा इति ।

अत एवानङुदात्त इत्यादि सङ्गच्छते । गुणरहितस्योच्चारयितुमशक्यत्वान्नान्तरीयकतयोच्चार्यमाणोऽपि गुणः प्रयत्नविशेषं विना न विवक्ष्यते। अन्यथा ह्युदात्तमेवोच्चारयेत् इति वाक्ये च न तूदात्तग्रहणं कुर्यादिति शेष एवकारस्यार्थ इति केचित् ।

अन्ये तु एकश्रुत्या सूत्रपाठः । अवच्छेदकत्वेनानुपात्तश्च स्वरूपमात्रेण सन्नपि गुणो न भेदकः। अरुणया क्रीणातीत्यादावेव तस्य अवच्छेदकत्वम्, न तु गां दद्यादित्येतावन्मात्रोक्ताविति निर्विवादत्वात् ।

भाष्ये च एवकारस्य "न त्वेकश्रुतिमुच्चार्योदात्तग्रहणं कुर्यात्" इति शेषे तात्पर्यम् । अन्यथा स्पष्टार्थमुदात्तग्रहणं न कुर्यादित्येव ब्रूयात् । हन्त्यादेशस्य वधेः स्थानिवद्भावादनुदात्तत्वादिट्प्रतिषेधे प्राप्ते वध्यादेशे उदात्तनिपातनं करिष्यते । "एकाच उपदेशे" इति सूत्रे एकाज्ग्रहणं च न कर्त्त-

व्यमिति भाष्यासङ्गतेश्च । चतसर्याद्युदात्तनिपातनं करिष्यतइति भाष्यविरोधाच्च ।

एतेन "स्थानेऽन्तरतमः" इतिवचनादादेशस्य यः स्वरः प्राप्तस्तस्मिन्नेवोच्चारणीये उदात्तोच्चारणं यत्नाधिक्याद्विवक्षार्थमिति कैयटकल्पनमपास्तम् । चतुर्शब्दस्य अव्युत्पत्तिपक्षे "त्रः संख्यायाः" इति व्युत्पत्तिपक्षे तु उरन्प्रत्ययान्ततया "ञ्नित्यादिर्नित्यम्" इत्युभयथाऽप्याद्युदात्तत्वात् । अस्थ्यादीनामप्याद्युदात्तत्वाच्छेषनिघातेन इकारस्यानुदात्ततया तदादेशस्यानङोऽप्यनुदात्तत्वस्यैव प्राप्त्या उदात्तोच्चारणं विवक्षार्थं स्यादित्युदात्तग्रहणवैयर्थ्यञ्च । प्रत्युत यत्नाधिक्येऽप्यविवक्षाज्ञापकत्वापत्तिः । एकश्रुत्या सूत्रपाठे तु स्वरविशेषोपादानं विवक्षार्थमेवेत्यदोषः ।

यत्तु कौस्तुभे उदात्तग्रहणस्य स्वशब्दानुपात्तो गुणो न भेदक इति ज्ञाप्यम् उत यत्नविशेषविरहेण तथेति । नाद्यः । निपातनस्वरस्य विवक्षापत्तेः । नान्त्यः । उदात्तोच्चारणस्यैव विवक्षाहेतौ यत्नविशेषे स्थिते मूलशैथिल्येन ज्ञापकानुत्थानात् । स्वोपादानवैयर्थ्यप्रयोजकस्यार्थस्य ज्ञाप्यत्वानुपपत्तेरिति । तदसत् । एकश्रुत्या पाठ इत्यस्यैव ज्ञाप्यत्वात् । उपात्तगुणानां भेदकत्वस्य लोकसिद्धत्वात् । भाष्ये तथैवोक्तत्वाच्च । उपादानं चात्र द्वेधा । स्वरूपेण शब्दविशेषावच्छेदकतया उदात्त इत्यादिशब्दैश्च ।

एतेन वैकल्पिकमैकश्रुत्यमङ्गीकृत्य "पक्षान्तरैरपि परिहारा भवन्ति" इतिन्यायेन तत्राद्युदात्तनिपातनं करिष्यते इत्युक्तम् । इह तु त्रैस्वर्येण सूत्राणां पाठमाश्रित्य स्वरूपेणोपात्तस्य गुणस्य नान्तरीयकत्वादविवक्षामसङ्गादुदात्तग्रहणं

ज्ञापकमित्युक्तम्। अतो न पूर्वोत्तरभाष्ययोर्विरोध इत्यपास्तम्। गुणानां भेदकत्वस्याप्यवश्याश्रयणीयत्वात्। एकश्रुत्या सूत्रपाठेनैव प्रकृतभाष्यस्य योज्यत्वात्। अत एव गुणभिन्नानां यवलानां संग्रहाय ग्रहणकशास्त्रेऽणूग्रहणं सङ्गच्छते। अत एवाष्टन आत्वे इदमस्त्यदाद्यत्वे च नानुनासिकः। इदं च सर्वमेकश्रुत्या पाठपक्षं पश्चादुपन्यस्यता कैयटेनैव ध्वनितमित्यास्तां विस्तरः।

अदेङ् गुणः २।

अकार एकार ओकारश्चाविशेषेण गुणसंज्ञः स्यात्। प्रदेशा विधौ "आद्गुणः" इत्यादयः। अनुवादे "अतो गुणे" इत्यादयः। अन्यत्पूर्ववदूह्यम्।

इको गुणवृद्धी ३।

गुणवृद्धिशब्दयोर्यत्र विधेयसमर्पकत्वं तत्र स्थानिविशेषानभिधाने इक इति षष्ठ्यन्तं पदं स्थानिसमर्पकमुपस्थितं बोध्यम्।

इदं च गुणवृद्धिशब्दयोः प्रकृतत्वेऽपि पुनर्गुणवृद्धिग्रहणात् शब्दव्यापाराश्रयेण लभ्यते। अन्यथा इक इत्येव ब्रूयात्।

यत्तु तथाऽपि "इकस्तौ" इत्येव वक्तव्यम्। वस्तुत इक इत्येव। संपूर्णं पूर्वसूत्रद्वयमनुवर्त्य वृद्धिरित्यादैचौ यत्र विधीयेते गुण इति च अदेङौ तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते इति व्याख्यानात्। तत्र च लिङ्गम् "इतोऽत्सर्वनामस्थाने" इत्यत्र इद्ग्रहणम्। अकारस्य स्वरूपेण विधानेऽपि इक्पदोपस्थितौ तद्वैयर्थ्यादिति, तच्चिन्त्यम्। सर्वनाम्नामुत्सर्गतः प्रधानप-

रामर्शितया तच्छब्देन गुणवृद्ध्योर्ग्रहणानुपपत्तेः । औत्सर्गिकव्युत्पत्त्यनुसारेणैवापत्तेः कल्प्यत्वात् । उक्तलिङ्गस्य च ऋश्लुक्षिशब्दगतऋकारोकारव्यावृत्त्यर्थतयाऽन्यथासिद्धत्वात् । वाक्यानुवृत्तौ च तस्य विशिष्टार्थान्तरपरत्वेन प्रकृतार्थान्वयानुपपत्तेः । न च शब्दाधिकारेण निर्वाहः । पदमात्रे तदङ्गीकारात् । वाक्यार्थस्य परमतात्पर्यविषयतया तद्भङ्गस्यानुचितत्वात् । पदार्थस्य तु स्वातन्त्र्येण तदविषयतया वाक्यान्तरान्वयेऽपि तद्भङ्गाभावात् । तद्वाक्यार्थबुद्धावेतत्समभिव्याहारस्य प्रतिबन्धकत्वे गौरवात् । तत्तत्पदार्थान्तरनिरूपिताकाङ्क्षादिज्ञानान्तरकल्पने गौरवाच्च ।

इग्ग्रहणं किमर्थमिति भाष्यादिकं तु अवयवद्वारा सूत्राक्षेपपरम् । प्रधानाक्षेपे गुणाक्षेपस्यार्थसिद्धत्वात् । अत एव "प्राक् कडारात्समासः" इत्यत्र प्राग्वचनं किमर्थमितिभाष्ये अवधित्वद्योतकाक्षेपद्वारेणावधेरप्ययमाक्षेप इति कैयटः । गुणवृद्ध्यधिकारे पुनर्गुणवृद्धिग्रहणसामर्थ्यादितिभाष्यादिस्वरसाच्च ।

एतेन सम्पूर्णसूत्रद्वयानुवृत्तिसामर्थ्यपरतया उक्तग्रन्थं व्याख्याय पूर्वोक्तव्याख्याने शब्दस्वारस्याननुगुणत्वदोषोद्भावनमपास्तम् । विपरीतत्वात्स्वरसस्येति दिक् ।

इदं च सूत्रं न विध्यात्मकम् । पुनर्गुणवृद्धिग्रहणवैयर्थ्यात् । नाप्यधिकारः । तथा सति नञोऽप्यत्रैव पाठापत्तेः । प्रतियोगिभूतयोर्गुणवृद्ध्योरत्रोपादानं निषेधस्य तूत्तरत्रेतिवैषम्ये बीजाभावात् । इक्स्थानिकगुणवृद्धिनिषेधस्योत्तरत्र विधेयतयोपस्थितिसिद्ध्यर्थत्वे विशिष्टस्यैवाधिकर्त्तुमुचितत्वात् "सर्वस्य द्वे" इत्यादिवत् । "प्रत्ययः" "परश्च" इत्यादौ विभज्य पाठस्तु विधेयभेदादुपपन्नः । आद्येन प्रत्ययसंज्ञा विधीयते परेण तु

प्रकृत्यपेक्षया परत्वमिति । तस्मात्परिभाषैवेयम् ।

एतदुपस्थितौ लिङ्गं च गुणवृद्धिशब्दाभ्यां तद्विधानं स्थान्यन्तरनिर्देशाभावविशिष्टम् न तु गुणवृद्धिपदमात्रम् । "अचो ञ्णिति" इत्यादावतिप्रसङ्गादित्यग्रे निरूपयिष्यामः ।

उदाहरणं चेता स्तोता कर्त्ता अचैषीत् अस्तौषीत् अहार्षीत् इति । प्रत्युदाहरणं तु याता, ग्लायति उम्भिता इति । अत्र आकारस्य अकारः ऐकारस्य एकारः मकारस्य स्थानसाम्यादोकारश्च गुणो मा भूत् । यद्वार्त्तिकम्—

इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्त्यर्थम् इति ।

स्यादेतत् । पचतीत्यादौ धात्वकारस्य शपमाश्रित्य " पुगन्तलघूपधस्य " इति, प्रत्ययाकारस्य च " सार्वधातुकार्द्धधातुकयोः " इति तिपमाश्रित्य गुणे कृतेऽपि विशेषाभावः । न च चिकीर्ष अक इतिस्थिते अकारस्य वृद्ध्यापत्तिः । " ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन" इति वार्त्तिकोक्त्या अतो लोपस्य बलवत्त्वात् । सिद्धान्तेऽपि "अचो ञ्णिति" इति वृद्धेर्निर्दिष्टस्थानिकत्वेन उक्तपरिभाषाया अप्रवृत्त्या उक्तरीत्यैव समाधेयत्वात् । अयासीदित्यादौ तु आकारस्य "सिचि वृद्धिः" इति वृद्धावपि न दोषः । "यमरमनमातां सक् च" इति सगिड्भ्यां परत्वेन तद्बाधाच्चेति केचित् ।

येननाप्राप्तिन्यायेनापवादत्वात्तद्बाध इत्यन्ये ।

याता वातेत्यादौ गुणस्तु गापोष्टकः कित्त्वेन ज्ञापकेनैव वर्णैकदेशानां वर्णग्रहणेन ग्रहणमितिपक्षप्रस्तावोक्तरीत्या निरस्त एव । अन्यथा द्वयोरकारयोः पररूपेणैव सिद्धौ आतोलोपप्रवृत्त्यर्थकित्त्वस्य वैयर्थ्यापत्तेः । अतो लोपेन तु न तत्र निर्वाहः । "अ-

नुदात्तोपदेश" इत्यत उपदेशपदानुवृत्त्या आर्द्धधातुकोपदेशकाले यददन्तं तस्यैव लोपविधानात् । गाधातोस्तु टप्रत्ययोत्पत्तिवेलायामादन्तत्वात् । अन्यथा गत इत्यादौ मकारलोपे कृतेऽदन्तत्वेन लोपापत्तेः ।

अथात्र आभीयत्वेन मलोपादेरसिद्धत्वमाश्रीयेत, तथाऽपि अय पय गतावित्याभ्यां क्विपि अत् पत् इतिरूपं माधवादिसंमतं न सिद्ध्येत् । "लोपो व्योः" इत्यस्य आभीयत्वाभावात् । नचैवं धिवि प्रीणने कृवि हिंसाकरणयोश्चेत्येतयोरिदित्त्वान्नुमागमे "धिन्विकृण्व्योर च" इति वकारस्याकारादेशे उप्रत्यये च कृते अतो लोपो न स्यात्, उप्रत्ययोत्पत्तिवेलायामदन्तत्वाभावादिति वाच्यम् । उप्रत्ययवेलायामेव तत्संनियोगशिष्टतया अस्यापि बुद्ध्यारोहात् इति केचित् ।

यौगपद्येऽपि उप्रत्ययोपदेशवेलायामदन्तत्वं नास्त्येवेत्येतदस्वरसेन निर्देशक्रमात्प्रथममत्वं ततश्चशब्दाकृष्ट उप्रत्यय इत्यन्ये।

तस्मादाकारनिवृत्त्यर्थं नैतत्सूत्रमारभ्यम् ।

नापि ऐज्निवृत्त्यर्थम् । ऐकारोपदेशसामर्थ्यादेव तद्वारणात् । अन्यथा एकारमेवोच्चारयेत् । न चैवमायादेशोऽपि न स्यादिति वाच्यम् । गुणं प्रति ह्यैकारोपदेशः स्ववैयर्थ्यापत्त्या बाधकः आयादेशे तु ऐकार एव निमित्तमिति वैषम्यात् । तदाहुः—

यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमेव नासौ बाध्यते इति ।

न च ग्लायृ इत्येव पठितुं शक्यम् । त्वया ग्लायते इत्यादौ यकारद्वयापत्तेः । आदन्तत्वाभावे जग्लावित्यादेरसिद्धेश्च । नन्वेवम् "आदेच उपदेशेऽशिति" इत्यात्वमपि बाध्येत ।

एङन्तत्वोपदेशेऽपि आत्वसम्भवेन ऐजुपदेशस्य तन्निमित्तत्वाभावात्। शिति प्रत्यये गुणस्य शिद्भिन्ने त्वात्वस्य ऐज्विरोधित्वे तुल्ये ऐजुपदेशेन गुण एव बाध्यते न त्वात्वमिति विनिगन्तुमशक्यत्वात्। धेट् पानइत्याद्येङन्तेषु आत्वविधेरपि सावकाशत्वात्। आत्वविधावेज्ग्रहणस्य तु "मीनातिमिनोतिदीङां ल्यपि च" इत्युत्तरार्थत्वात्। वार्त्तिकमते एजन्तानां दीङादीनामात्वविधानस्य घुसंज्ञासूत्रे वक्ष्यमाणत्वात्।

अत्र कैयटादयः। "न ध्याख्या" इतिसूत्रे कृतात्वस्य ध्यायतेर्निर्देश एव आत्वं न बाध्यतइत्यत्र विनिगमक इति।

यत्तु एज्ग्रहणसामर्थ्यादप्यात्वं भवति। न हि तस्योत्तरार्थत्वं शङ्क्यम्। भाष्यमते "मीनाति" इतिसूत्रेण गुणवृद्धिनिमित्ते प्रत्यये विवक्षिते सत्युपदेशावस्थायामेवात्वं विधीयते न तु गुणवृद्ध्योः कृतयोरितिसिद्धान्तात्। अन्यथा दाय इत्यत्र इकारान्तत्वाद्धञं बाधित्वा अच् स्याद्, ईषदवदान इत्यादौ "आतो युच्" न स्यात्, अवदाय इति "श्याद्व्यध" इति आदन्तत्वलक्षणो णश्च न स्यात्। इदं च एङ्निमित्तप्रत्ययविवक्षायां दीङादीनामात्वविधानेनापि सिध्यति। न च ञितां णितां च प्रत्ययानां वृद्धिनिमित्ततया एङ्निमित्तत्वं नास्तीति घञ्णिजादिविवक्षायामात्वं न स्यादिति वाच्यम्। वृद्ध्या गुणबाधेऽपि तेषां गुणं प्रति स्वरूपयोग्यत्वानपायात्। एज्विषये प्रागेवात्वाभ्युपगमे फलोपधानविवक्षायामसंभवादिति। तन्न। अपवादविषयपरिहारेणैवोत्सर्गप्रवृत्त्या णिजादेरेचं प्रति स्वरूपयोग्यत्वे मानाभावात्। तस्मादैचो न गुण इति सिद्धम्।

नापि व्यञ्जननिवृत्त्यर्थम्। "सप्तम्यां जनेर्डः" इति डप्रत्ययस्य डित्करणेन व्यञ्जनस्य गुणो न भवतीतिज्ञापितत्वा-

त् । अन्यथाऽर्द्धमात्रिकव्यञ्जनस्थाने अकारे गुणे मात्रिके कृते प-रूपेण सिद्धौ तद्वैयर्थ्यात् । न च नकारस्य सानुनासिक एवाकारो गुणः स्यादिति वाच्यम् । पर इत्येव सिद्धे रूपग्रहणस्य यद्गुणविशिष्टं परस्य रूपं तादृगेव यथा स्यादित्येतदर्थत्वात् । अत्र भाष्यम्—

डित्करणं न ज्ञापकम् ।

" अन्येभ्योऽपि दृश्यते " इत्यनेन "गमश्च" "अन्तात्यन्ताध्वदूरपार " इतिप्रकरणाधीतेन वार्त्तिकेन गमेरपि डप्रत्ययस्य वाच्यत्वात् । तत्र च गुणस्वीकारे मकारस्य स्थाने ओष्ठस्थानतया ओकारस्य गुणस्यापत्तौ नगोऽग इत्यादीनामसिद्धेः ।

यद्यपि "सप्तम्यां जनेर्डः " इतिप्रकरणादन्यत्रैवायं डप्रत्ययः, तथाऽपि "जनेर्डः " इतिप्रकरणे "अन्येष्वपि दृश्यते इतिसूत्रस्थापिशब्दगर्भित एवार्थो वार्त्तिकेनोक्तो न त्वपूर्वः ।

अस्तु वा तद्वार्त्तिकमेव व्यर्थमिति भाष्याभिप्रायः इति केचित् ।

ननु "गमेर्डोः" इति डोप्रत्ययविधानं मकारस्य ओकारो गुणो न भवतीति ज्ञापकम्, अन्यथा विचैव गुणे कृते गोरूपसिद्धेः, यद्वा इदमेव व्यञ्जनस्य गुणाभावज्ञापकं स्यादितिचेन्, नैवम् । मकारस्थाने सानुनासिकस्य अकारस्य व्यावृत्तये डोप्रत्ययविधेः सार्थक्यात् ।

अथ तथाऽपि " तनोतेर्डउः सन्वच्च " इति डित्करणं ज्ञापकं व्यञ्जनस्य गुणो न भवतीति । अन्यथा नकारस्य गुणेन प्रत्ययाकारेण सह पररूपेण च सिद्धौ तस्य वैयर्थ्यात् ।

किं च स्थानप्रयत्नाभ्यामन्तरतमे चेता अचैषीदित्यादौ

चरितार्था गुणवृद्धिविधयः केवलस्थानकृतान्तर्येण व्यञ्जनादिषु न प्रवर्त्तिष्यन्ते। न चैवं नेता अनैषीदित्यादौ स्थानगुणप्रमाणैस्त्रिभिरान्तरतम्यात्तत्र चारितार्थ्ये, ह्रस्वे तत्प्रवृत्तिर्न स्यादिति वाच्यम्। "मृग्रस्यदः क्मरच्" इति कित्करणेन प्रमाणत आन्तर्यस्याविवक्षितत्वज्ञापनात्। न च ईहिता ईशितेत्यत्र कण्ठ्यतालव्ययोर्विवृतयोश्च हकारशकारयोः स्थानगुणाभ्यामान्तरतम्याददेतौ स्यातामिति वाच्यम्। ऊष्मणामीषद्विवृतत्वस्य वक्ष्यमाणत्वात्। इकारादीनां विवृतत्वमेव। एकारादीनां विवृततरत्वस्य शिक्षान्तरोक्तत्वेऽपि सूत्रभाष्याद्यसंमतत्वात्। उक्तकित्वेन इकारादिषु गुणप्रवृत्त्यनुमानाद्वा। तस्मादात्संध्यक्षरव्यञ्जनानां गुणवृद्ध्योरभावस्योक्तरीत्यैव सिद्धौ सूत्रमेतद्व्यर्थमिति पूर्वपक्षः।

सिद्धान्तस्तु "क्ङिति च" इतिसूत्रे निषेध्याया वृद्धेरिग्लक्षणत्वसंपादनायेदम्। न ह्येतत्परिभाषां विना इग्लक्षणगुणवृद्धिनिषेधः शक्यः। प्रतियोगितावच्छेदकाप्रसिद्धेः। सति त्वस्मिन् इक इतिशब्दमुच्चार्य विहितत्वलक्षणमिग्लक्षणत्वं प्रसिद्ध्यति। तत्रत्यचकारस्य इतिशब्दार्थकतया तदर्थलाभात्। न च तदविशेषितयोरेव तयोः स निषेधोऽस्त्विति वाच्यम्। "नडादिभ्यः" फकि लैगवायन इत्यत्र ओर्गुणस्यापि निषेधापत्तेः। न च विधानसामर्थ्यम्। औपगव इत्यादौ तस्य चरितार्थत्वात्। पौरोहित्यमित्यादौ तु यकि परे "क्ङिति च" इति आदिवृद्धिर्भविष्यत्येव। विधानसामर्थ्यात्। निषेधस्य तद्धितभिन्ने किति चरितार्थत्वात्। अत एव इक्स्थानिकगुणनिषेधेनापि न निर्वाहः। उक्तगुणस्य उकारस्थानीयतासत्त्वात्। तस्मान्निषेधे प्रतियोगितावच्छेदकीभूतमिग्लक्षणत्वं तत्प्रसिद्ध्यर्थमिदम्।

गुणवृद्धी पुनः सर्वत्रैव तद्व्यतिरेकेणापि इक्स्थानिके एव पर्यवस्यतः ।

तथा हि । "सार्वधातुकार्द्धधातुकयोः" "जुसि च" इति गुणश्च अलोऽन्त्यपरिभाषया अन्त्यवर्णे प्राप्तौ पूर्वोक्तज्ञापकवशादिक्ष्वेव विश्राम्यतः । "मिदेर्गुणः" "पुगन्तलघूपधस्य च" इत्यादिषु तु स्थान्यपि निर्दिष्ट एव । मिद इर्मिदिस्तस्य गुणः । पुकि अन्तः पुगन्तः । पुकीति विषयसप्तमी । पुकि विवक्षिते सति योऽन्त इत्यर्थः । तेन पुगव्यवाहितपूर्ववर्त्तिन इति पर्यवसितम् । लघ्वी चासावुपधा चेति कर्मधारयः । ततः पुगन्तश्च लघूपधा चेति समाहारद्वन्द्वे क्लीबत्वम् । वापयतीत्यादौ त्वादन्तसन्निपातकृतस्य पुकस्तद्विघातकगुणाप्रवर्त्तकत्वात् । "ऋच्छत्यॄताम्" इत्यत्रापि ऋशब्दऋच्छब्दयोर्द्वन्द्वः, ऋच्छतिशब्दस्य ऋकारेण षष्ठीसमासं कृत्वा पूर्वपदे तत्पुरुषगर्भे उत्तरपदे द्वन्द्वगर्भो द्वन्द्वः ।

यद्वा उक्तरीत्या पूर्वपदे तत्पुरुषगर्भे ऋकारेण ऋच्छशब्देन च त्रिपदो द्वन्द्वः । तेन ऋच्छतेर्ऋकारस्य स्थानित्वलाभः । आरिवानित्यादौ गुणसिद्ध्यर्थमृधातोः संग्रहाय मध्ये चतुर्थोऽपि ऋकारः प्रश्लेष्यः । अन्यथा क्वसोः कित्त्वसामर्थ्याद् गुणो न स्यात् । प्रश्लेषे तु विशिष्य विधानसामर्थ्याद् गुणसिद्धिः । "ऋदृशोऽङि" इत्यत्र "उरङि गुणः" ततो "दृशः" इति पृथग्योगः । उरित्यनुवृत्त्या व्यधिकरणषष्ठ्या च दृशिसंबन्धिन ऋकारस्य गुण इत्यर्थः । "स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः" इत्यत्र योगविभागः । "स्थूलदूरयुवह्रस्वानां यणादिपरम्" इत्येको योगः । "क्षिप्रक्षुद्रयोः पूर्वस्य च गुणः" इति द्वितीयः । युवपर्यन्तानां लकाररेफवकाराणां

स्वोत्तरवर्त्यकारेण सह लोपे "ओर्गुणः" इत्युकारस्य गुणे अवादेशे च स्थवीयान् दवीयान् इत्यादि सिद्धम् । यण आदिर्यणादिः ततः परमिति समासः । तेन क्षिप्रक्षुद्रयोर्यण आदी रेफपूर्वौ पकारदकारौ, ततः परस्य रशब्दस्य लोपस्ताभ्यां पूर्वस्य इकारस्य उकारस्य च गुण इत्यर्थः ।

एवं गुणमात्रमिक्षु विश्रान्तम् । "मृजेर्वृद्धिः" इत्यत्र तु अचः इत्यपकृष्य मृजेः संबन्धिनः अचो वृद्धिः स्यात् । ततो "ञ्णिति" इति । अच इत्यनुवृत्त्या यथान्यासवदेवास्य योगस्यार्थः । अमार्ट् इत्यादौ अटो वृद्धिस्तु न भवति । लादेशोत्तरमडितिपक्षे परत्वाद्वृद्धेः प्रवृत्तेः । सकृदेव शास्त्रस्य चरितार्थत्वात् । यदा तु लावस्थायामेवाट्, न चैवमध्यैयातामित्यत्र अधि आ इ आतामितिस्थिते "अचि श्नुधातुभ्रुवाम्" इति इयङं बाधित्वा "एरनेकाचः" इति यण् स्यात्, आटो धात्वाद्यवयवत्वेनानेकाच्त्वादिति वाच्यम्, "एरनेकाचः" इति विभज्य "इणो यण्" इत्यनुवर्त्य अनेकाचश्चेद्यण् तर्हि इण एवेतिनियमेन तद्वारणादितिपक्ष आश्रीयते, तदा "क्ङिति च" इति निषेधाद् वृद्धेर्लावस्थायां दुर्लभत्वेनान्तरङ्गत्वादडागमस्यैवोत्पत्त्या तस्य वृद्धिप्रसङ्गेऽपि "अन्त्यबाधेऽन्त्यसदेशस्य" इति परिभाषया समाधानसंभवात् ।

तत्प्रत्याख्यानपक्षे तु अङ्गाक्षिप्तेन प्रत्ययेनाज्विशेषणात्प्रत्यये परे तद्विधानात् । अव्यवहितप्रत्ययाभावेनैकवर्णव्यवधानेऽपि ऋकारस्यैव वृद्धिर्न त्वटः । अनेकव्यवधाने प्रवृत्तौ मानाभावात् । "येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्" इतिन्यायात् । "सिचि वृद्धिः परस्मैपदेषु" इत्यत्रापि अचिकीर्षीदित्यकारवृद्धिनिषेधार्थं नैतत्सूत्रम् । अल्लोपस्य वि-

प्रतिषेधेन बलवत्त्वस्य उक्तत्वात् । आकारेऽप्युक्तः समाधिः । एजन्तं तु नास्त्येव । अनैमित्तिकस्य आत्वस्य प्रागेव प्रवृत्तेः । रैनौग्लौशब्दानामाचारक्विबन्तानां वृद्धिसत्त्वासत्त्वयोर्न विशेषः ।

न च उदवोढामित्यत्र पूर्वं ढलोपे तत्र ओदन्तत्वाद् वृद्धिप्रसङ्गः । तस्यासिद्धत्वात्पूर्वं हलन्तलक्षणा वृद्धिः, ततो ढलोपः, "असिद्धं बहिरङ्गमन्तरङ्गे" इत्यसिद्धत्वान्न ओदन्तत्वमितिसमाधानात् । न च गोशब्दात्क्विपि अगवीदित्यत्र वृद्धिनिषेधार्थः । " ऋत इद्धातोः " इत्यतोऽनुवृत्तेन धातुना सिजाक्षिप्तस्य धातोरभेदेन विशेषणाद्धातुरेव यो धातुर्न तु कथंचित्प्रातिपदिकमितिव्याख्यानादिति कौस्तुभे ।

माधवस्तु कविविधुपितृशब्दानां क्विपि लुङि अकवायीत् अविधावीत् अपितारीदित्याह ।

तस्यायमाशयः—धातुरेवेत्यस्य कोऽर्थः, प्रत्ययान्तरेऽपि धातुसंज्ञक एव, धातुत्वानिबन्धनप्रत्ययप्रकृतित्वाभाववान्वा । नाद्यः। तत्र हि भेदप्रतियोगितावच्छेदकतया प्रत्ययत्वसाक्षाद्व्याप्यो धर्मो निवेश्यते उत कथञ्चित्प्रत्ययत्वव्याप्यः । न प्रथमः । तिङ्त्वाद्यवच्छिन्नभेदवति कृत्प्रत्ययादौ क्विबन्तस्यापि धातुत्वात् । नान्त्यः । तिप्त्वावच्छिन्नभिन्ने तसादावपि तस्य धातुत्वात्तद्व्यावृत्तेरभावात् । न द्वितीयः । क्विबन्तानां हरतिकरोत्यादीनां स्वादिप्रकृतित्वेन व्यावृत्त्यापत्तेः । न च तुग्विशिष्टानामेव स्वादिप्रकृतित्वमिति वाच्यम् । तावताऽपि धर्मिभेदानुपपादनात् । लू इत्यादिक्विबन्तसमानाकाराणां शुद्धल्वादीनामप्यलावीदित्यादौ वृद्ध्यनापत्तेश्च । न च प्रातिपदिकत्वानुत्तरधातुसंज्ञाकइति वाच्यम् । "उपदेशे एवानुब-

न्धलोपे कृते ततो धातुसंज्ञा" इतिग्रन्थदर्शनाद्धातुप्रत्ययभिन्नत्वे सत्यर्थवत्त्वोत्तरमेव हृप्रभृतीनामपि धातुसंज्ञत्वात् । अनुबन्धसत्त्वासत्त्वयोस्त्वकिञ्चित्करत्वात् ।

अथौपदेशिकधातुग्रहणार्थं द्वितीयधातुग्रहणमिति नामधातुव्यावृत्तिरितिकैयटोक्त्यनुसारेणोच्यते, तथाऽपि इगन्ते क्विबन्तधातौ सिचि वृद्धिर्वारयितुं न युक्ता । इक्परिभाषारम्भे तस्या इष्टतया तदनारम्भेऽपि तथात्वात् । तादृशस्यैवार्थस्य प्रकारान्तरेण साधनीयत्वात् । तस्मादोकारान्तव्यावृत्त्यर्थमेव यतनीयमितिस्थिते केचित्तावदाहुः—

धातोरितिवद् "ओतः" इत्यप्यनुवर्त्त्य ओदन्तस्य धातोश्चेद् वृद्धिर्भवति तर्हि धातोरेव धातोर्न तु नामधातोरिति व्याख्येयमिति । तच्चिन्त्यम् । नामधात्वन्यस्य ओदन्तस्य धातोरप्रसिद्धेः । तेषामात्वस्य प्रागेव प्रवृत्तेः । ओदन्तत्वोपलक्षितस्य आकारान्तत्वदशायां वृद्धौ सत्यामसत्यां वा विशेषाभावस्योक्तत्वात् । तस्माद् "नेटि" इत्यत्र नेतियोगं विभज्य "ओतः" इत्यनुवर्त्य ओकारान्तस्य वृद्धिनिषेधः ।

यद्वा बहुलग्रहणमनुवर्त्त्य ओदन्तस्य वृद्ध्यभावो बाहुलकेन साधनीय इत्येव तावद्रमणीयम् । एवं हलामपि न सिचि वृद्धिप्रसङ्गः । येननाप्राप्तिन्यायेन हलन्तलक्षणवृद्धेस्तावद्बाधकत्वसम्भवात् । न चैवमकोषीदमोषीदित्यादौ "वदव्रजहलन्तस्याचः" इति वृद्धेः "नेटि" इति निषेधेन निरपवादत्वात् "सिचिवृद्धिः" इतिसूत्रेण हलो वृद्धिप्रसङ्ग इति वाच्यम् । वृद्धिमात्रस्य "नेटि" इति निषेध इत्यभ्युपगमात् । तस्मात् "क्ङिति च" इति निषेधे इग्लक्षणत्वस्य वृद्धिविशेषणत्वलाभार्थमियं परिभाषेति सिद्धम् ।

अथ तथाऽपि कृतं छिन्नमित्यादौ "सार्वधातुकार्द्धधातुकयोः" इति पुगन्तेतिगुणस्य च निषेधाय गुणग्रहणमेवास्तु, न तु वृद्धिग्रहणम् । न च मृष्ट इत्यादौ वृद्धिनिषेधाय तस्या इग्लक्षणतां सम्पादयितुं तदिति वाच्यम् । "मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते" इति भाष्योक्त्या "अजादौ क्ङिति वा" इतिवचनस्य "मृजेर्वृद्धिः" इत्येतदुत्तरमावश्यकतया तत्र "अजादौ क्ङिति" इतियोगं विभज्य क्ङिति चेद्भवत्यजादावेवेतिनियमेन तद्व्यावृत्तेः साध्यत्वादितिचेत्, अत्राहुः—

णू स्तुतौ धू विधूनने इति कुटादिपठितयोर्लुङि अनुवीत् अधुवीदितिरूपामिष्टम् । तत्र "गाङ्कुटादिभ्यः" इति ङित्त्वातिदेशेन "क्ङिति च" इति सिचिवृद्धेर्निषेधार्थं तस्या इग्लक्षणत्वसंपादनाय वृद्धिग्रहणमिति ।

स्यादेतत् । अन्तर्भूतसिज्मात्रापेक्षत्वात्सिच्परस्मैपदेत्युभयसापेक्षबहिरङ्गवृद्ध्यपेक्षयाऽन्तरङ्गस्योवङो वृद्धेः प्रागेव प्रवृत्तौ हलन्तत्वाद् "नेटि" इति वृद्धिनिषेधस्सिद्ध एव । न च "सिच्यन्तरङ्गं नास्ति" इतिसिद्धान्तान्नैवमिति वाच्यम् । तस्य निर्युक्तिकत्वात् । न चैवमचैषीदित्यादौ अन्तरङ्गत्वात्सिचि वृद्धिं बाधित्वा गुण एव स्यादिति वाच्यम् । तस्यैव वृद्धिसंभवेनेष्टापत्तेः । पूर्वपक्षे वृद्धेरिक्स्थानिकत्वे नियमाभावात् । उक्तपरिभाषायां वृद्धिग्रहणानुपादानस्यैव प्रक्रान्तत्वात् ।

नन्वस्तौषीदित्यादौ गुणस्य न वृद्धिसंभवः । ओकारान्ते वृद्धिनिषेधस्य स्थापितत्वात् । बाहुलकेनानिगन्तस्य वृद्धिर्नेतिपक्षे तु पूर्वोक्तेऽपि तथैवेतिचेद्, मैवम् । ओतो धातोरेव धातोर्न तु नामधातोरितिपक्षे दोषाभावादिति केचित् ।

तच्चिन्त्यम् । तस्य दूषितत्वात् । न च वृद्ध्यवस्थाया-

मोदन्तो नामधात्वन्यधातुरत्रैव प्रसिद्ध इति वाच्यम् । प्रत्ययोत्पत्तिवेलायां ह्योदन्तत्वमपेक्षितं न तु यदाकदाचित्, अविधावीदित्यादावपि निषेधापत्तेः । तस्यापि विधवतीत्यादौ ओदन्तत्वात् । सिच्यन्तरङ्गस्वीकारे तत्रैव ओदन्तत्वाच्च । नचेष्टापत्तिः । पूर्वोक्तदोषग्रस्तत्वात् । अन्यथा तत्कृतस्य कैयटमाधवयोरविरोधस्याप्यनुपपन्नत्वात् ।

तस्मादेवं व्याख्येयम् । "सिचि" इतियोगं विभज्य "ओत" इति "बहुलम्" इति चानुवर्त्त्य व्यवस्थितबाहुलकं चाश्रित्य सिचि ओदन्तस्य वृद्धिः स्यात् व्यवस्थितत्वाच्च बाहुलकस्य नामधातौ न भवतीति । एवं चाकवयीत् अकवायीत् इति मतद्वयपुरस्कारेण रूपद्वयदर्शनं सिद्धान्तकौमुद्यां निर्युक्तिकमेव । तदंशे उभयोरप्यैकमत्यस्यैव व्यवस्थापितत्वात् । न चैवम् अविधावीदित्यनुपपत्तितादवस्थ्यम् एतत्पक्षे तत्रापि प्रागेव गुणस्य वाच्यत्वादिति वाच्यम् । स्वाभाविकौदन्तस्यैव निषेधोपगमादिति । अकार्षीदित्यादौ गुणे कृते "वदव्रजहलन्तस्य" इति वृद्धिः ।

न चैवमतारीदित्यादौ गुणे कृते "नेटि" इति हलन्तलक्षणवृद्धिनिषेधात् "अतो हलादेर्लघोः" इति वृद्धिविकल्पापत्तिरिति वाच्यम् । तदपवादभूताया "अतो ल्रान्तस्य" इतिनित्यवृद्धेः सम्भवात् । न च तथाऽपि अलावीदित्यत्र विकल्पापत्तिरेवेति वाच्यम् । "ल्रान्तस्य" इत्यत्र "लोपो व्योः" इति वकारं प्रश्लिष्य तदन्तस्यापि नित्यवृद्धिविधानस्य वाच्यत्वात् । न चैवं मा भवानवीदमवीदित्यादावपि नित्यवृद्ध्यापत्तिरिति वाच्यम् । "ह्म्यन्तक्षण" इतिसूत्रे णिश्विग्रहणमपहाय तत्स्थाने अविमव्योः प्रक्षेपेण निषेधसिद्धेः ।

एतत्पक्षे औनयीदश्वयीदित्यादावन्तरङ्गत्वाद् गुणायादेशयोः कृतयोः यान्तत्वादेव निषेधापत्त्या तत्रेष्टविकल्पासिद्धिरिति वाच्यम् । वकारप्रश्लेषनिबन्धननित्यवृद्धेरेव अविमव्योः प्रक्षेपेण निषेधात् । "अतो हलादेः" इति विकल्पस्य मवेः संभवात् । "मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान्" इतिन्यायात् ।

न चैवमजागरीदित्यत्रापि विकल्पापत्तिः, एकसूत्रोपात्ततया तदंशेऽपि "अतो हलादेः" इत्यस्य बाधायोगादिति वाच्यम् । तत्र बाध्यसामान्यचिन्तया स्वविषयप्राप्तस्य वृद्धिमात्रस्य बाधात् । अगत्या वैषम्यस्य सत्त्वात् । यद्वा "अतो ल्रान्तस्य" इति वृद्धेरेवास्तु निषेधः । न चैवमजागरीदमवीदित्युभयत्रापि "अतो हलादेः" इत्यस्यापत्तिः । तदपवादनित्यवृद्धिनिषेधेऽपि मवतौ उत्सर्गभूतविकल्पप्रवृत्तिः जागर्तौ तु नेति स्वीकारात् । अपवादनिषेधे पुनरुत्सर्गप्रवृत्तेर्लक्ष्यानुरोधेन वैकल्पिकत्वात् । तस्मात्सिच्यप्यन्तरङ्गपरिभाषाप्रवृत्तिस्वीकारादुवङेव । अनुवीदित्यादौ "क्ङिति च" इतिनिषेधप्रवृत्त्यर्थं सिचिवृद्धेरिग्लक्षणत्वसंपादकत्वेनापि नात्र वृद्धिग्रहणसार्थक्यमितिचेत् अत्राहुः—

अतो ल्रान्तस्य इत्यत्र वकारस्य प्रश्लेषे शवधातोरपि नित्यं वृद्धिप्रसंगः । न च तत्र मानाभावः । शवतिर्गतिकर्मा कम्बोजेषु भाष्यते, विकारएनमार्या भाषन्ते इति भाष्यनिरुक्तकृद्भ्यामुक्तत्वात् । न च अविमाविवक्तस्यापि तत्र पाठः कार्य इति वाच्यम् । णिश्वीतिद्वयं त्यक्त्वा त्रयप्रक्षेपे गौरवापत्तेरिति दिक् ।

अत्रेदं बोध्यम् । नैतदनुरोधेन "सिच्यन्तरङ्गं नास्ति" इति

स्वीकारो न्याय्यः । वकारप्रश्लेषानभ्युपगमात् । न चालावीदित्यत्र विकल्पापत्तिः । "वदव्रज" इत्यत्र वदअव्व्रजेति प्रश्लिष्य अवादेशस्यापि वृद्धिविधानस्य व्याख्यातुं शक्यत्वात् । न च धातुसाहचर्याद्धातोरेव अचो ग्रहणं स्यादिति वाच्यम् । "द्विस्त्रिचतुर्" इतिसूत्रे कृत्वोऽर्थग्रहणेन साहचर्यस्य सर्वत्रानियामकत्वस्य ज्ञापितत्वात् । "नेटि" इतिनिषेधस्य च हलन्तलक्षणवृद्धिमात्रप्रतियोगिकत्वस्य सर्वसिद्धत्वात् । एतेन अविधावीदित्यादावपि नित्यवृद्ध्या प्रागुक्तग्रन्थमतविरोधोऽपि निरसितुं शक्यः । एवं च "ह्म्यन्तक्षण" इति सूत्रे णिश्विग्रहणं न कर्त्तव्यमेव । सुतरां तत्स्थाने अविमव्योः प्रक्षेपः । प्रागेव तु श्वतेः, प्रयोजनाभावात् । गुणे कृते यान्तत्वेनैव णिश्व्योर्निषेधसिद्धेः । अव्यादिप्रक्षेपस्य च वकारप्रश्लेषकृतातिप्रसङ्गवारणमात्रमूलकत्वेन तत्परित्यागे मूलोच्छेदेनैव छिन्नत्वात् । एवं च तत्रत्यम् अंशभेदेन बाध्यसामान्यविशेषचिन्ताश्रयणवैषम्यमपि नापद्यते ।

यदपि कैयटादयः । चिरि जिरि इति हिंसायां स्वादौ पठ्येते । ताभ्यां सिचि अचिरायीदजिरायीदितीष्टम् । एवं चिनोतेर्नयतेश्च यङ्लुगन्तात्सिचि अचेचायीदनेनायीदिति । सिच्यन्तरङ्गस्वीकारे तु गुणायादेशाभ्यां यान्तत्वापत्त्या "ह्म्यन्तक्षण" इति वृद्धिनिषेधे अचिरयीदित्यादिकमेव स्यादतः सिज्विषयेऽन्तरङ्गपरिभाषा न प्रवर्त्ततइत्यावश्यकमिति ।

तदपि चिन्त्यम् । हकारमकारसाहचर्येण यकारस्याप्यौपदेशिकस्यैव ग्रहणेन अयादेशे तन्निषेधो न प्रवर्त्ततइति कल्पयितुं शक्यत्वात् । णिश्विग्रहणं च तत्सूत्रे स्थाप्यतएव । तदेव च औपदेशिकयकारान्तस्यैव निषेध इत्यत्र ज्ञापकम् ।

अन्यथा गुणायादेशयोः कृतयोः यान्तत्वादेव निषेधसिद्धौ तद्वैयर्थ्यापत्तेः । एवं च साहचर्यस्य नियामकत्वं न सार्वत्रिकमित्यादि कुचोद्यमप्यनवकाशम् । एवं च णिश्विग्रहणस्य "सिच्यन्तरङ्गं नास्ति" इत्यत्र ज्ञापकत्वेनोपन्यासोऽप्यनुपपन्नः । अस्मद्रीत्याऽपि तद्वैयर्थ्याभावात् ।

एतेनोक्तलिङ्गोपष्टम्भेनैव "सत्यपि संभवे बाधनं भवति" इतिन्यायमाश्रित्य अन्तरङ्गं वृद्ध्या बाध्यते । अन्यथा तक्रेण दधि न बाध्येत । श्नमकजादिभिश्च शप्कप्रत्ययादयो न बाध्येरन् । "मिदचोऽन्त्यात्परः" इति श्नमो धातोरन्त्यादचः शपश्च प्रकृत्यवयवमात्रात्परत्र संभवात् । अकचश्च टिमध्यगतत्वेन कप्रत्ययस्य च तद्बहिर्भावेन देशभेदसत्त्वात् । न च मध्येऽपवादन्यायेन उवङेव वृद्ध्या बाध्येत न तु गुणः तस्य पश्चात्पठितत्वादिति वाच्यम् । बाध्यसामान्यचिन्तायां स्वविषयप्राप्तस्यापवादभिन्नस्य सर्वस्य बाधाभ्युपगमात् । अन्यथा "अचि र ऋतः" इति तिसृचतसृ इत्यनयोर्ऋकारस्य रेफादेशः प्रथमयोः पूर्वसवर्णदीर्घमुत्वं च बाधेत, न तु "ऋतो ङिसर्वनामस्थानयोः" इतिगुणम् । परपठितत्वात् । बाध्यसामान्यविशेषचिन्ते च लक्ष्यानुरोधाद्व्यवतिष्ठेते इत्यादिकमप्यपास्तम् ।

प्रकृते कल्पकस्यान्यथैवोपपादितत्वात्कल्पनाया मूलोच्छेदलक्षणबाधग्रस्तत्वात् । यदपि भगवद्भिर्भाष्यकारचरणैरुक्तम् ।

यच्च करोत्यकारग्रहणं लघोरिति कृतेऽपि इति ।

तस्यायमाशयः । "अतो हलादेर्लघोः" इत्यत्र अद्ग्रहणं तावन्न संध्यक्षरव्यावृत्त्यर्थम्, लघोरित्यत एव सिद्धेः । इकारोकारऋकारास्त्ववशिष्यन्ते अचेतीत् अमोषीत् अनर्त्ती-

दित्यादौ।

यदि तु सिच्यन्तरङ्गं स्यात्तर्हि अन्तरङ्गत्वेनैव गुणसिद्धौ तत्र वृद्ध्यप्रवृत्त्यर्थम् "अत "इति व्यर्थं स्यात्। पारिशेष्यादेव तस्याकारमात्रविषयकत्वसिद्धेः। तत्रापीदं चिन्त्यम्। अकुटीदपुटीदित्यादौ "गाङ्कुटादिभ्यः "इति ङित्त्वेन गुणस्याप्रवृत्त्या तत्र वृद्धिर्मा भूदिति अद्ग्रहणं सार्थकमेव। न च तत्र वृद्धिरपि ङित्त्वेनैव न भविष्यतीति वाच्यम्। "लघोः" इति निर्दिष्टस्थानिकतया इग्लक्षणत्वाभावेन तदप्रवृत्तेः।

यत्तु वृद्धावन्तरङ्गेण गुणेन वाधितायां ङित्त्वेन गुणबाधेऽपि न वृद्धेः प्रवृत्तिः। न हि देवदत्तस्य हन्तरि हते देवदत्तस्य पुनरुन्मज्जनं भवतीति न्यायादिति। तन्न। यदि अकारसार्थक्ये आग्रहस्तर्हि अपवादनिषेधे पुनरुत्सर्गस्य प्रवृत्तिरित्याश्रीयताम्। अन्यथा तु तत्परित्यागेऽपि क्षातिविरहात्। अत एव "वदव्रज" इत्यत्रास्मत्पक्षे वकारप्रश्लेषाधिक्यमपि न दोषावहम्। वृद्धिग्रहणस्य त्यागेन लाघवात्। "नान्तःपादम्" इत्यत्र तु सुजातेअश्वसूनृते इत्येतात्सिद्ध्यर्थं पूर्वरूपे निषिद्धे अयादीनामप्रवृत्तिरित्युक्तम्। अत्र त्वचिरायीदित्यादीनां फलानामन्यथैव साधितत्वेन वैषम्यात्। फलव्यतिरेकेणापि शब्दसार्थक्यमात्राय यत्किञ्चिदर्थज्ञापनोक्तेश्चानुचितत्वादित्यलमतिप्रसङ्गेन।

तस्मादिह वृद्धिग्रहणं नोपयुज्यतएवेतिस्थितम्। इदं तु गुणग्रहणसाधारण्येन।

वस्तुतस्तु सिद्धान्ते यथा तथाऽस्तु। इक्परिभाषायां वृद्धिग्रहणानुपादानपक्षे तु इग्लक्षणवृद्धेरप्रसिद्ध्या अकुटीदित्यादौ वृद्धिवारणायैवात इत्यस्य सार्थक्यम्। पूर्वपक्षे वृद्धिमात्रस्यैव

निषेध्यत्वात् । हलादेरित्यस्य च कुटादिभिन्नस्थले सावकाशत्वादित्यलमतिप्रसङ्गेन ।

इदं तु गुणग्रहणसाधारण्येन वाच्यम् । उक्तरीत्याऽनेककुसृष्टिकल्पनया गुणवृद्ध्योरिक्स्थानिकत्वसिद्धावपि तदपेक्षया "इको गुणवृद्धी" इत्येवाश्रयितुमर्हम् । "सेयं महतो वंशस्तम्बाल्लट्वाऽनुकृष्यते" इतिन्यायसाम्यादिति सूत्राद्यभिप्रायः ।

परमप्रकृतमनुसरामः । शब्दव्यापाराश्रयणं किम् । द्यौः पन्थाः इममित्यादौ "दिव औत्" "पथिमथ्यृभुक्षामात्" "त्यदादीनामः" इत्यौत्वमात्वमत्वं च अलोऽन्त्यपरिभाषया अन्त्यस्यैव यथा स्यादिति ।

यत्तु भाष्ये स इममित्युदाहृतम्, तत्र स इमं मन्त्रमपश्यदितिब्राह्मणवाक्यावयवत्वेन स इत्यंशः संपातायातः । न तूदाहरणप्रविष्टः । तच्छब्दे इकोऽसंभवान्नियमप्रवृत्तिशङ्काऽनुत्थानादिति केचित् ।

अन्ये तु "त्यदादीनामः" इत्यत्र इक इत्यस्योपस्थितौ द्विशब्दे इदंशब्दे च अत्वं स्यान्न त्वन्येषाम् । गणनिर्देशस्य "तदोः सः सौ" इत्यत्रानुवृत्त्यर्थत्वसंभवात्स इत्यप्युदाहरणमेवेत्याहुः ।

वस्तुतस्तु तथा सति "इदमो मः" इतिसूत्रं व्यर्थं स्यात् । तस्य मकारस्थाने त्यदाद्यत्वबाधमात्रार्थत्वात् । उक्तरीत्या च मकारेऽत्वप्रसक्तिविरहात् । एवम् "इदोऽय् पुंसि" इत्यपि व्यर्थम् । इकारस्य त्यदादित्वादत्वे दो य् पुंसि इति विधानादेव सिद्धेः । द्विशब्दमात्रार्थत्वे तु अलोऽन्त्यपरिभाषयैव गतार्थत्वम् ।

अस्यां च परिभाषायां तच्छेषतदपवादपक्षौ पूर्वपक्षतया

संभाव्येते पदोपस्थितिपक्षस्तु सिद्धान्त इति । तत्राद्यो यथा "सार्वधातुकार्द्धधातुकयोः" इत्यत्र अङ्गगुणशब्दयोरनुवृत्त्या अङ्गस्येति षष्ठीनिर्देशाल्लिङ्गादलोऽन्त्यपरिभाषा गुणपदाच्च इक्परिभाषोपतिष्ठते । तत्र इक्पदमङ्गस्य विशेषणम् इगन्तस्याङ्गस्य गुणो भवतीति । स च भवन् "अलोऽन्त्यस्य" इत्यनयाऽन्त्यस्य भवतीति । तदाऽलोऽन्त्यपरिभाषा अस्याः शेषः ।

अथ त्वङ्गस्येतिषष्ठी अलोऽन्त्यपरिभाषया अन्त्ये अलि स्थापिता, अङ्गान्त्यस्य गुण इति, पश्चादिका अन्त्यो विशेष्यते अङ्गान्त्यस्य इको गुणः स्यादिति, तदा इयमेव तस्याः शेषः । सोऽयं तच्छेषपक्षः ।

तत्पदम् अलोऽन्त्यपरिभाषापरमिति पक्षद्वयसंग्रहः । बहुव्रीहितत्पुरुषाभ्यामुभयपरत्वात् । तत्प्रवृत्त्युत्तरप्रवृत्तिकत्वं तच्छेषत्वमुभयसाधारणं बोध्यम् । एतेनोक्तपरिभाषाद्वयैकवाक्यत्वस्य तच्छेषशब्दार्थत्वे राजकीयमित्यादौ अलोऽन्त्यपरिभाषाप्रवृत्त्यनापत्तिः, भिन्नदेशयोः परस्परानिराकाङ्क्षयोर्विध्युपकारकयोरेकवाक्यताऽनुपपत्तिश्चेत्यपास्तम् । द्वयोरेकविधौ प्रवृत्तिसंभवे तदितरपरिष्कृतविधिपरिष्कारकत्वस्य विवक्षितत्वात् ।

अथ गुणवृद्धिविधौ अङ्गस्येति न स्थानषष्ठी, किं त्विक इत्यपेक्षयाऽवयवषष्ठी, अङ्गावयवस्य इक इति, तदा स्थानषष्ठीरूपलिङ्गाभावादलोऽन्त्यपरिभाषा नोपतिष्ठते । ततश्चाङ्गावयवस्य यत्र तत्र स्थितस्य इको गुणवृद्धी स्त इति तदपवादपक्षः । न हि वस्तुतः शास्त्रेण प्राप्तस्य बाधसंभवः, किं तु बाधकत्वाभिमतशास्त्रेण बाध्यत्वाभिमतशास्त्रस्य स्वविषये प्राप्त्यभाव एव ग्राह्यते असत्यस्मिन्नत्रापि तत्प्रवर्त्तेतेति । उत्सर्गस्य स्वविषयाविषयकत्वकल्पनमेव बाध इति सर्वसिद्धान्तः ।

समुच्चयस्तु न संभवति, अन्त्यस्य इकश्च द्वयोरपि गुणः परिभाषाद्वयप्रामाण्यात्, तथा च "मिदेर्गुणः" इत्यत्र अन्त्यस्य इकश्च द्वयोरपि गुण इति । अङ्गस्येति सकृदुच्चरितषष्ठ्याः स्थानेयोगावयवयोगरूपार्थद्वयबोधनासंभवात् । स्थानेयोगव्यतिरेकेण च लिङ्गाभावादलोऽन्त्यपरिभाषाऽनुपस्थानात् । आवृत्त्यादौ च प्रमाणाभावात् ।

अत एव मिदेरन्त्यस्य इको वा गुण इति विकल्पोऽप्यनुपपन्न इत्याशयेन भाष्ये नैतावाशङ्कितौ । तत्राद्ये "मिदेर्गुणः" इत्यादौ दोषः । अन्त्यस्य इक्त्वाभावात् इकश्चान्त्यत्वाभावात् । ततश्च भवतीत्यादौ परिभाषाद्वयस्य सावकाशत्वादत्र विनिगमकाभावादुभयपरित्यागे गुणस्य सर्वादेशत्वापत्तिः । यद्वार्त्तिकम्—

वृद्धिगुणावलोऽन्त्यस्येतिचेन्मिदिमृजिपुगन्तलघूपधच्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं कर्त्तव्यम् । सर्वादेशप्रसङ्गश्चानिगन्तस्येति ।

उक्तस्थलेषु सर्वादेशप्रसङ्गात्तत्तत्स्थलेषु इग्ग्रहणं कर्त्तव्यम् । चकारस्य हेत्वर्थकत्वात् ।

यदि त्वत्रपूर्वोक्तक्कुकल्पनाऽनुसारेण सर्वत्र इकां स्थानित्वं परिशेष्येत, तदा प्रतिपत्तावत्यन्तं गौरवम् । भिन्नमित्यादौ इग्लक्षणत्वाभावाद्गुणनिषेधानापत्तिश्च ।

यदि तु क्क्ङोः क्त्विवाज्ज्ञापकादिग्लक्षणत्वाभावेऽपि लघूपधलक्षणस्य निषेधः, न तु गुणमात्रस्य, अतो लैगवायन इत्यादौ गुणस्य न निषेध इति कल्प्यते, तर्हि तदपेक्षया लाघवात्पदोपस्थितिपक्ष एव स्वीक्रियताम् । तदपवादपक्षेऽपि अजुहवुरित्यादिवत् अनेनिजुः पर्यवेविषुरित्यादावपि "जुसि च" इति गुणः स्यात् । भवतीत्यादिवदीहितेत्यादावपि "सार्वधा-

तुकार्द्धधातुकयोः” इति गुणः स्यात् । अग्ने इतिवदग्निचिदित्यादावपि “ह्रस्वस्य गुणः” इति संबुद्धिगुणः स्यात् । अग्नय इतिवदग्निचित इत्यादावपि “जसि च” इति गुणः स्यात् । कर्त्तरीतिवत्सुकृतीत्यादावपि “ऋतो ङिसर्वनामस्थानयोः” इति गुणः स्यात् । अग्नये इतिवदग्निचिते इत्यादावपि “घेर्ङिति” इति गुणः स्यात् । बाभ्रव्य इतिवत्सौश्रुत इत्यादावपि “ओर्गुणः” इति गुणश्च स्यात् । तथा च वार्त्तिकम्—

इङ्मात्रस्येतिचेज्जुसिसार्वधातुकार्द्धधातुकह्रस्वाद्योर्गुणेषु अनन्त्यप्रतिषेध इति ।

ह्रस्वादीति तद्गुणसंविज्ञानो बहुव्रीहिः । आदिपदं “जसि च” इत्यादिगुणत्रयपरम् । तथा च तदपवादपक्षे उक्तातिप्रसङ्गवारणायानन्त्यस्येको गुणो न भवतीति वचनान्तरं कल्प्यं स्यादिति गौरवमित्यर्थः ।

ननु सम्बुद्धिजसिगुणयोः “ ऋतो ङि” इति गुणस्य च ह्रस्वस्येति ऋत . इति च निर्दिष्टस्थानिकत्वात्कथमिक्परिभाषोपस्थितिः । अग्निचिते इत्यत्र च चिच्छब्दस्य घिसंज्ञाविरहादेव नातिप्रसङ्ग इतिचेत् अत्राहुः—

आद्ययोर्ह्रस्वेनेग्विशेषणात् । न चात्र परिभाषोपस्थानमेव दुर्लभम्, तस्या आनियमप्रसङ्गे नियमार्थत्वात्, अकारस्य गुणप्रवृत्तावपि वर्णान्तरापत्त्यभावेन क्षतिविरहादिति वाच्यम् । ह्रस्वस्याङ्गे विशेषणतया तस्य चावयवावयविभावसम्बन्धेन इग्विशेषणतया ह्रस्वान्तं यदङ्गं तदवयवस्य इको गुणः स्यादिति तदा सूत्रार्थः स्यात् । ततश्चाग्निचिदित्यादौ ह्रस्वान्तत्वाभावात् । अतिप्रसङ्गाभावेऽपि उपगोरित्यादौ उकारादेरपि गुणः स्यात् ।

यद्वा ह्रस्वाङ्गयोर्विशेषणविशेष्यभावनिरासार्थमङ्गपदोत्तरषष्ठ्याः स्थानेयोगत्वबाधनायानन्त्यस्यापि गुणसिद्ध्यर्थमिक्-परिभाषोपस्थितिः स्यात्। तथा च अङ्गं ह्रस्वं च इक एव विशेषणम्। आद्यस्यावयवत्वमन्त्यस्याभेदः संसर्ग इतिविशेषः। ततश्चाङ्गावयवस्य ह्रस्वाभिन्नस्य इको गुणः स्यादित्यर्थः। तथा च "ह्रस्वस्य" "जसि च" इत्युभयोरतिप्रसङ्गः सुघटः। एवम् "ऋतो ङि" इत्यत्र अङ्गावयवस्य ऋदभिन्नस्येति। "ओर्गुणः" इत्यत्र अङ्गावयवस्य उकाराभिन्नस्य इक इत्यर्थः। अग्निचिते इत्यादौ तु वर्णनिष्ठैव घिसंज्ञा न तु पदनिष्ठेतिपक्षे "घेर्ङिति" इत्यस्यातिप्रसङ्ग इति।

नन्वङ्गावयवस्य इको गुण इतिपक्षे भेत्तेत्यादावपि गुणे सिद्धे "पुगन्तलघूपधस्य" इति नियमार्थम्, तथा च ईहितेत्यादौ न दोष इति चेत्, अत्राहुः—

यदि सार्वधातुकार्द्धधातुकयोर्लघूपधस्यैवेतिनियमः, तर्हि "ह्रस्वस्य गुणः "ओर्गुणः" इत्यत्र अतिप्रसङ्गदोष एव। न हि तत्र गुणः सार्वधातुकादिनिमित्तः।

अथ लघूपधस्य सार्वधातुकार्द्धधातुकयोरेवेति, तर्हि ईहितेत्यादौ दोष एव। न ह्यत्र गुणो लघूपधस्य। न च नियमद्वयेन निस्तारः। एकस्मिन्वाक्ये तदलाभात्।

अथावृत्त्यादिकमाश्रीयते, तथाऽप्यनेनिजुरित्यत्रातिप्रसङ्गः। लघूपधाङ्गस्य सार्वधातुकस्य च तत्र सत्त्वात्। हे बुद्धे बुद्धयः पिचव्य बुद्धये इत्यादीनां लघूपधत्वाभावात् तत्रातिप्रसङ्गस्य सर्वथैव दुर्वारत्वाच्चेति कैयटः। तस्मात्तदपवादपक्षो दुष्ट एवेति स्थितम्।

अत्र वदन्ति—अङ्गाक्षिप्तेन प्रत्ययेन अङ्गमेव विशेष्यतइति

उक्तदोषप्रसङ्गः।

यदि तु प्रत्ययेन श्रूयमाणेन जुसादिना च इग्विशेष्यते यथाश्रुति प्रत्ययपरस्य जुसादिपरस्य च इको गुणः स्यादिति, एवं ङिसर्वनामस्थानपरस्य ऋदन्ताङ्गावयवस्येक इत्यादि, तदा न कोऽपि दोष इति, तच्चिन्त्यम्। अङ्गप्रत्यययोः परस्परमुत्थिताकाङ्क्षत्वात्। न च अङ्गस्य इग्विशेषणतापन्नत्वेन तदन्वयापेक्षया प्रत्ययस्य विशेष्ये इक्येवान्वय उचित इति वाच्यम्। विशिष्टस्य वैशिष्ट्यमित्यन्वयात्, सर्वनामस्थानपरं यदृदन्तमङ्गं तदवयवस्य इक इति। अन्यथा रक्तत्वादेरपि दण्डाद्यन्वयानापत्तेः। स्वसमवायिसंयोगेन पुरुषएवान्वयापत्तेः।

अथ लक्ष्यानुरोधेन आकाङ्क्षां कल्पयित्वा इगन्वयः कल्प्येत, तथाऽपि पदोपस्थितिपक्षेण सह तारतम्यविचारदशायां गौरवस्य दुर्वारत्वात्। कथंचिदुपपत्तिमात्रस्याकिञ्चित्करत्वात्। प्रतिपक्षापेक्षलाघवस्यैव पक्षव्यवस्थापकत्वाच्च। एतेन मिद इः मिदिरित्यादिकल्पनाभिप्रायेण तच्छेषपक्षोपपत्तिकथनमप्यपास्तम्।

अथास्तु पूर्वविप्रतिषेधेनालोऽन्त्यपरिभाषाबाधिकेयमिक्परिभाषेति क्रोष्ट्रीयाचार्यसंमतः पक्षः। न च विषयान्तरे लब्धावकाशयोरेव द्वयोर्विप्रतिषेधः, इक्परिभाषा त्वनवकाशा, अलोऽन्त्यपरिभाषानिर्मुक्तविषयाभावादिति न तत्सम्भव इति वाच्यम्। रामेभ्य इत्यत्र एकस्य स्थानिन आदेशद्वयस्येव मेद्यत इत्यत्र द्वयोः स्थानिनोरेकस्यादेशस्याप्यसम्भवादसम्भवमात्रस्यापि विप्रतिषेधपदार्थत्वादिति, तन्न। परिभाषाद्वयेन इकारदकारयोर्भिन्नविषयावच्छेदेन प्राप्त्या अस्ति च सम्भवो यदुभयं स्यादितिपक्षे तच्छेषादिपक्षाविशेषात्। सत्यपि सम्भवे

बाधनं भवतीतिपक्षे तु एतत्परिभाषाऽनारम्भे "अलोऽन्त्यस्य" इति दकारस्यैव गुणः स्याद् । अतो येननाप्राप्तिन्यायेन तदपवादत्वमेवेति उत्सर्गापवादयोः विप्रतिषेधासम्भवात् । अप्रसिद्धविप्रतिषेधपदार्थकल्पनाया अनुचितत्वाच्चेति ।

तस्मात्पदोपस्थितिपक्ष एव श्रेयान् ।

इक इतिपदस्य "जुसि च" इत्यादावुपस्थाने पदैक्यवाक्यतया तदन्वयोऽन्तरङ्गः । अलोऽन्त्यपरिभाषा तु विधाववान्तरवाक्यार्थबोधोत्तरं वाक्यैकवाक्यतया तत्र सम्बध्यतइति तदन्वयो बहिरङ्गः । अवान्तरवाक्यार्थबोधं विना स्थानषष्ठीत्वानिर्णयाभावादित्याहुः ।

तच्चिन्त्यम् । विधिवाक्येष्ववान्तरवाक्यार्थबोधाभावे इक्परिभाषोपस्थितेरपि दुर्घटत्वात् । गुणादिपदमात्रस्य तदुपस्थापकत्वे स्थानिविशेषनिर्देशस्थलेऽपि प्रवृत्त्यापत्तेः । अङ्गस्य गुणः स्यादित्यवान्तरवाक्यार्थबोधेऽङ्गगुणयोरुद्देश्यविधेयभावावगतौ सत्यामेव तत्प्रवृत्तेः । न च तथाऽपि तद्दोषतादवस्थ्यम् । स्थानिविशेषस्योपलक्षितत्वात् । न चैवं "सार्वधातुकार्द्धधातुकयो" इत्यादावङ्गस्येतिस्थानिनिर्देशादिक्परिभाषोपास्थित्यनुपपत्तिः । स्थान्यन्तरजिज्ञासानुत्थापकस्थानिनिर्देशाभावस्य विवक्षितत्वात् । नचैवं गुणपदादिक्परिभाषोपास्थितिरितिग्रन्थविरोधः । विशिष्टस्यैव तेनाभिमतत्वात् । अत एव गुणवृद्धिपदाभ्यां यत्र गुणवृद्धी विधीयेते इति व्याचख्युः ।

एतेनानुवादे परिभाषाऽनुपस्थानादेव "वृद्धिर्यस्य" इत्यादावनुवादे इक्पदानुपस्थितिसम्भवात् फलितार्थकथनमात्रं तादित्यपास्तम् । विधेयत्वाक्षिप्तस्य उक्ताभावस्य लिङ्गताऽवच्छेदकतया लिङ्गकोटौ प्रवेश इति

तदभिप्रायात् । तस्मात्प्रथममवान्तरवाक्यार्थबोधः । तत इक्परिभाषोपस्थितिः । तत इक्पदैकवाक्यतया महावाक्यार्थबोधः । तत्र तु प्रथमं विधिवाक्यार्थबोधः । ततः स्थानषष्ठ्या अलोऽन्त्यपरिभाषोपस्थितिः । ततो विधिवाक्ये श्रुतायाः स्थानषष्ठ्या अन्त्ये अलि उपसंहारः। न तु शाब्दमेकवाक्यत्वम् । तथा चावान्तरवाक्यार्थबोध उभयोरप्युपजीव्यः ।

नन्वेवम् "मिदेर्गुणः" इत्यादौ इक्परिभाषाया एव बहिरङ्गत्वापत्त्या अलोऽन्त्यपरिभाषाया एवोपस्थितिः स्यात्, सत्यम् । स्थानत्वस्यादेशनिरूपिततया तत्रापि विधेयविशेषस्य लिङ्गान्तर्भावावश्यकत्वात् । आदेशविशेषानवगाहिनः स्थानत्वप्रत्ययस्यानुपपत्तेः तत्परिभाषाप्रवृत्त्यनुपयोगित्वाच्च । न चैवमपि इक्परिभाषामात्रस्य तत्र प्रवृत्तौ नियामकाभाव इति वाच्यम् । उक्तरीत्या अन्तरङ्गबहिरङ्गभावाभावेऽपि अलोऽन्त्यपरिभाषाऽपवादस्य वाच्यत्वात् तावदपवादपरिहारपूर्वकप्रवृत्तिकतया तावदपवादप्रवृत्तिनिश्चयं विना तद्विषयपरिहारज्ञानस्यानुपपत्त्या तदधीनत्वादलोऽन्त्यपरिभाषाप्रवृत्तिनिश्चयस्य तस्या बहिरङ्गत्वानपायात् । एतेन "अलोऽन्त्यस्य" इत्यत्रापि पदोपस्थितिपक्षस्वीकारे उभयोः साम्यमिति निरस्तम् । तत्पक्षस्य भाष्याद्यनारूढत्वाच्च।

केचित्तु तत्पक्षे "आदेः परस्य" इत्यत्राल्पदस्यार्थपरत्वं न स्यात् । तथा चासमासनिर्देशवैयर्थ्यम्, द्वीपमित्यत्र समस्ताप्शब्दस्य ईत्वापत्तिश्च, "आदेः परस्य" इत्यत्रापि पदोपस्थितिपक्षस्यैव तेन वाच्यत्वात् अल्पदस्यार्थपरत्वानुपयोगात् न कोऽपि दोष इति वाच्यम् । तथाऽपि पदद्वयान्वयस्य वाच्यतया बहिरङ्गत्वानपायादित्याहुः ।

तत्र इकोऽङ्गस्येतिसामानाधिकरण्यान्वयस्य न्याय्यत्वादिक्पदार्थस्याङ्गविशेषणत्वे इगन्तस्याङ्गस्येतिवाक्यार्थे स्थानेयोगार्थकषष्ठीरूपालिङ्गस्य तादवस्थ्यादलोऽन्त्यपरिभाषोपतिष्ठतएव । "मिदेर्गुणः" इत्यादौ तु हलन्तत्वात् इको मिद इतिसामानाधिकरण्यायोगात् मिदेरवयवस्य इक इति वैयधिकरण्येनान्वये स्थानेयोगषष्ठीरूपलिङ्गाभावादलोऽन्त्यपरिभाषोपस्थित्यभावात् अनन्त्यस्यैव गुणसिद्धिः । न चात्रापि इक इति स्थानषष्ठ्यैवालोऽन्त्यपरिभाषोपस्थितिः स्यादिति वाच्यम् । तत्र इक इत्यस्योपस्थित्यनन्तरमलोऽन्त्यपरिभाषोपस्थाने अन्त्यस्य इक इत्यस्य इगवयवस्यान्त्यस्येत्यस्य चार्थस्य बाधितत्वात् । मिदेरन्त्यस्य इक्त्वाभावात् । अन्त्यस्य दकारस्य इगवयवत्वासम्भवाच्च । इकः स्थानित्वबोधे स्वातन्त्र्येणान्त्यस्य गुणविधाने चोपजीव्यविरोधात् । अङ्गस्येत्यादौ त्ववयवद्वारा अङ्गस्य स्थानित्वनिर्वाहान्नोपजीव्यविरोध इति वैषम्यम् । तस्मात्प्रकृत्यर्थनिष्ठस्थानित्वाविरोधिन्येव षष्ठी अलोऽन्त्यपरिभाषायां लिङ्गमिति सिद्धम् ॥

इति श्रीसिद्धान्तसुधानिधौ प्रथमाध्यायस्य प्रथमे पादे
तृतीयमाह्निकम् ॥

न धातुलोपआर्द्धधातुके ४ ।

धात्ववयवलोपप्रयोजकमार्द्धधातुकं निमित्तीकृत्य प्राप्ते इको गुणवृद्धी न स्तः । लोलुवः पोपुवः मरीमृजः । लोलूयादिभ्यो यङन्तेभ्यः पचाद्यच् । "यङोऽचि च" इति यङो लुक् । तत्र "सनाद्यन्ता धातवः" इति यङन्तस्य धातुसंज्ञतया तदवयवयकारलोपनिमित्तमच्प्रत्ययं निमित्तीकृत्य "सार्वधातुकार्द्धधातुकयोः" इति गुणः प्राप्तः स एतद्वचनेन निषिध्यते । ऐक्यंचात्र निमित्तीभूतव्यक्तेरेव, न तु निमित्ततावच्छेदकस्यापि । अन्यथा धात्ववयवलोपेऽच्त्वं गुणे त्वार्द्धधातुकत्वमच्प्रत्ययस्य निमित्ततावच्छेदकमिति निषेधाप्रवृत्तिप्रसङ्गात् ।

इह धातुपदं तदवयवे लाक्षणिकम् । यद्यपि दुःखेन ईयते गम्यते इति "दुरीणो लोपश्च" इति दुःशब्दे उपपदे इण् गतावित्यस्माद्रक्प्रत्ययः, धातोश्च लोपः, ततः "रो रि" इति उपसर्गान्त्यरेफलोपे "ढ्रलोपे" इति दीर्घ च दूरमित्यत्र समस्तस्यापि धातोर्लोपोऽस्ति, तथाऽपि तत्र गुणादिप्राप्तिविरहेण तन्निषेधवैयर्थ्यात् । धातुलोप इत्यत्र षष्ठीतत्पुरुषपक्षे त्रयः कल्पाः सम्भवन्ति । आर्द्धधातुकग्रहणस्य लोपविशेषणत्वं निषेध्यविशेषणत्वमुभयविशेषणत्वं वेति । तत्राद्ये आर्द्धधातुकनिमित्ते धात्ववयवस्य लोपे गुणवृद्धी न स्त इत्यर्थः । तत्रान्यनिमित्तयोरपि गुणवृद्ध्योर्निषेधापत्त्या प्रपूर्वादिन्धेः क्तप्रत्यये "अनिदिताम्" इति नलोपस्य क्तप्रत्ययरूपार्द्धधातुकनिमित्तकत्वेन प्र इद्ध इति आद्गुणो न स्यात् । त-

स्योभयस्थानिकत्वेऽपि इक्स्थानिकत्वानपायात् । न चेकइति-शब्दमुच्चार्य विहितत्वाभावान्न निषेधः । उत्तरत्र चशब्दबला-त्तथात्वेऽपि इह शब्दस्वरूपपरत्वे मानाभावात् । इक इत्यस्या-र्थमात्रपरत्वात् । अन्यथा तु तृतीयपक्षीयमेव दूषणं योज्यम् ।

नन्वत्र "पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण" इति-पक्षे प्रथमोपनतक्तप्रत्ययापेक्षो नलोप एवान्तरङ्गः, पूर्वमुपसर्गेण पश्चात्साधनेनेतिपक्षे तु गुण एव तथा, सर्वथाऽपि गुणो निरप-वादः, "असिद्धं बहिरङ्गमन्तरङ्गे" इतिन्यायेन गुणस्या-सिद्धतया निषेधानर्हत्वात्, बहिरङ्गतया निषेधस्यासिद्धत्वे गुणस्य निरपवादत्वात्, सत्यम् । नास्त्येवायं प्रकृते दोषः, किं तु भेद्यते इत्यादि तृतीयपक्षे वक्ष्यमाणमेव दूषणमत्रापि बोध्यम् इति कैयटानुसारिणः ।

हरदत्तानुयायिनस्तु "नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः" इति निषेधाद् "असिद्धं बहिरङ्गम्" इत्यस्य नेह प्रवृत्तिः । द्वयोर्मध्ये एकत्र अजानन्तर्यापेक्षायाम् "असिद्धम्" इति न प्रवर्त्ततइति तदर्थात् । अत्र च आद्गुणं पौर्वापर्यस्य अज्घटितत्वेन अजा-नन्तर्यापेक्षणात् । अतः प्रेद्धमित्यस्यासिद्धिरप्यत्र दूषणमित्या-हुः । इदं च "अचः परस्मिन्" इतिसूत्रे विवेचयिष्यामः ।

आर्द्धधातुकस्य निषेध्यविशेषणत्वे तु यत्किञ्चिन्निमित्तके धातुलोपे सति आर्द्धधातुकनिमित्तके गुणवृद्धी न स्त इति स्यात् । ततश्च क्नूयी शब्दे इत्यस्माण्णिचि पुकि "लोपो व्योः" इति यलोपे च पुगन्तलक्षणो गुणोऽपि न स्यात् । "चेले क्नोपेः" इत्या-दिज्ञापकेन निषेधवारणे तु गौरवम्, वक्ष्यमाणदोषश्च । तन्त्रादि-नोभयविशेषणत्वे तु तदेव गौरवम् ।

आर्द्धधातुकनिमित्ते धातुलोपे आर्द्धधातुकनिमित्ते गुण-

वृद्धी न स्त इत्यर्थे कृतेऽपि यत्रार्द्धधातुकसंज्ञं व्यक्तिद्वयं लोपस्य गुणादेश्च निमित्तं तत्रापि निषेधः स्यात् । ततश्च भिदेर्ण्यन्तात्कर्मणि यकि भिद् इ य इति स्थिते नित्यत्वाद् "णेरनिटि" इति यकं निमित्तीकृत्य णिलोपे कृते प्रत्ययलक्षणेन लुप्तं णिचमाश्रित्य क्रियमाणो लघूपधगुणोऽपि न प्रवर्त्तेतेति भेद्यतइति न स्यात् । णेर्यकश्चोभयोरार्द्धधातुकत्वात् ।

न च प्रत्ययमात्रसापेक्षस्य गुणस्य तद्विशेषार्द्धधातुकसापेक्षणिलोपापेक्षयाऽन्तरङ्गत्वात्प्रागेव गुणः स्यादिति वाच्यम् । अकृतव्यूहपारिभाषया तदप्रवृत्तेः । णिलोपस्य जनिष्यमाणतया गुणनिमित्तस्यार्द्धधातुकस्य विनाशोन्मुखत्वात् । "उपसंजातनिमित्तोऽप्युत्सर्ग उपसंजनिष्यमाणनिमित्तेनाप्यपवादेन बाध्यते" इतिन्यायाच्च । णिलोपे सति धात्ववयवलोपसम्पत्त्या एतन्निषेधस्य प्रवर्त्तिष्यमाणत्वात् ।

केचित्तु उक्तन्यायोऽप्यकृतव्यूहन्यायएवान्तर्भूतः । अपवादविषयाभावस्यापि निमित्तकोटिप्रवेशादित्याहुः ।

तस्माद्धातोर्लोपो यस्मिन्नार्द्धधातुके तन्निमित्ते गुणवृद्धी न स्त इत्येवार्थः । लोपगुणाद्योरेकार्द्धधातुकव्यक्तिनिमित्तकत्वलाभादिति सिद्धमिष्टम् ।

अत्र यद्यपि पदोपस्थितेः पूर्ववाक्यार्थत्वेनात्र[1] निषेधप्रतियोग्याकाङ्क्षायां तस्या एवान्वयापत्त्या उक्तस्थले इक्पदं नोपतिष्ठतइति सूत्रार्थः स्यात्, तथा च लोलुवादौ गुणनिषेधो न स्यात्, प्रत्युत भेद्यत इत्यादौ व्यञ्जनस्य गुण एव प्रसज्येत, तथाऽपि "दीधीवेवीटाम्" इतिसूत्रस्य तत्र इक्पदोपस्थितिनिषेधकत्वे इक्परिभाषाऽलोऽन्त्यपरिभाषयोः फले विशेषाभावेन पदो-

---

१ इको गुणवृद्धी इत्येतत्सूत्रवाक्यार्थत्वेनेत्यर्थः ।

पस्थितिनिषेधस्य वैयर्थ्यापत्त्याऽत्रापि पदोपस्थितेर्न निषेध्यत्वम् । किं त्वौत्सर्गिकतया भवत इत्यस्योपस्थितौ गुणवृद्धी न भवत इति वाक्यार्थः । धातुलोपइति किम् । आर्द्धधातुकएव विहितप्रतिषिद्धत्वादगत्या विकल्पो मा भूत् । आर्द्धधातुकइति किम् । तोतोर्त्ति मोमोर्त्तीत्यादौ सार्वधातुकसंज्ञे तिपि परे "राल्लोपः" इति छ्वोर्लोपात्तत्र तिबाश्रयस्य लघूपधगुणस्य निषेधो मा भूत् । रेफात्परयोश्छकारवकारयोर्लोपः स्यात्क्वौ झलादावनुनासिकादौ च प्रत्यये परे इत्यर्थे इदमुदाहरणम् । यदा तु तत्र झलादावित्यस्य क्ङितीति विशेषणमितिपक्षः, तदा तोतोर्मीत्यादि । तत्रानुनासिकादिप्रत्ययपरत्वेन तत्प्रवृत्तेः । इक इति स्थानिविशेषनिर्देशः किम् । अभाजि रागः इत्यत्र भञ्जिरञ्जिभ्यां चिण्घञोः कृतयोः "भञ्जेश्च चिणि" "घञि च भावकरणयोः" इति च नकारलोपे कृते "अत उपधायाः" इति वृद्धिनिषेधो मा भूत् ।

इदन्त्ववधेयम् । यङन्तात्पचतेः पापच्य इत्यस्माद् ण्वुलि "यस्य हलः" इत्यनेन हलः परस्य यस्य लोपविधाने "आदेः परस्य" इतिपरिभाषया परस्य यद्विहितं तत्तस्यादेर्बोध्यमित्यर्थिकया व्यञ्जनमात्रस्य लोपे "अतो लोपः" इत्यकारस्य पृथग्लोपे "अचः परस्मिन्" इति अकारलोपस्य स्थानिवद्भावे धात्वकारस्योपधात्वव्याघाताद् वृद्ध्यभावे पापचक इतिरूपम् । यङ्लुकि तु समुदायलोपस्वीकारेण अज्झलादेशस्य स्थानिवत्त्वाभावाद्भवत्येव वृद्धिः पापाचक इति । इग्लक्षणत्वाभावात्प्रकृतनिषेधस्यापि तत्राप्रवृत्तेः । यथा नोनावेत्यत्रेति ।

अत्र भाष्यकृतः— इदं सूत्रं नारभ्यमेव । यङ्लुक्यपि पृथगल्लोपं स्वीकृत्य स्थानिवद्भावे अङ्गस्य इगन्तत्वाभावादेव

गुणवृद्धिविरहसिद्धेः । न च "यङोऽचि च" इति लुक् येनना-प्राप्तिन्यायेन अतोलोपस्य बाधकः स्यादिति वाच्यम् । "यस्य हलः" इत्यत्र यस्येतियोगं विभज्य अतोलोप इति चानुवर्त्त्य यशब्दाकारस्य लोपविधानेन व्यञ्जनमात्रलोपस्य "यङोऽचि च" इत्येतद्विधेयत्वात् । ततश्च अकारस्य लोपः यकारस्य लुगिति विषयभेदेन येननाप्राप्तिन्यायाभावात् । एवं चाल्लोपस्य स्थानिवत्त्वेनैव निर्वाह इति सूत्रं व्यर्थमेव । न चैवं कृष्णो नोनाव वृषभमित्यत्र नोनावेत्यस्य वृद्धिर्न स्यात्, एवं पापाचक इत्यपि न स्यात्, अल्लोपस्य स्थानिवद्भावादिति वाच्यम् । अज्निमित्तकस्यैव लुको व्यञ्जनमात्रप्रतियोगिकत्वस्वीकारात् ।

यस्तु चकाराद्बहुलग्रहणेन अच्प्रत्ययव्यतिरेकेणापि यङो लुक् स त्वनैमित्तिकत्वात्प्रत्ययोत्पत्तेः प्रागेव प्रवर्त्तते । प्रत्ययापेक्षप्रवृत्तिकेभ्यो बहिरङ्गेभ्योऽतोलोपादिभ्योऽन्तरङ्गत्वात् । स तु समुदायप्रतियोगिक एव । तस्य च न स्थानिवद्भावः । अज्झलादेशत्वात् । अज्मात्रस्थानिकस्यैवादेशस्य स्थानिवद्भावविधानात् ।

अथैवं गुणवदुवङादयोऽपि न स्युः । अकारस्य स्थानिवत्त्वे अच्प्रत्ययस्याव्यवहितपरत्वाभावादिति चेत्, अत्र कैयटादयः—

स्थानिवद्भूतमकारमेवाश्रित्य तत्र उवङादयः, न तु पचाद्यचं-निमित्तीकृत्य । उक्तयुक्तेः । न च यङवयवस्य केवलाकारस्य प्रत्ययत्वं नास्तीति वाच्यम् । यकारलोपोत्तरं तस्यापि प्रत्ययत्वात् । न च यकारस्थितिकाले अकारस्य प्रत्ययत्वाभावाद्यकारापेक्षया प्रागेव लुप्ततया यकारलोपोत्तरमपि प्रत्ययत्वानन्वयात् कथं तस्य प्रत्ययत्वम्, स्थानिनिष्ठात्यन्ताभावप्रतियोगिनो धर्मस्यातिदेशेनाप्यलाभादिति

वाच्यम् । सम्भवमात्रेणाप्यतिदेशस्वीकारात् । यकारलोपोत्तरं यद्यकारस्य लोपो न स्यात्तदा तस्य स्यादेव प्रत्ययत्वमिति योग्यतया लुप्तेऽपि तत्र सम्भावितस्य प्रत्ययत्वस्यातिदेशे बाधकाभावात् ।

वरे निषेधश्चेह लिङ्गम् । यङन्ताद्यातेर्वरचि "अतो लोपः" इति "लोपो व्योर्वलि" इति अल्लोपयलोपयोः कृतयोरल्लोपस्य स्थानिवद्भावेनाकारं निमित्तीकृत्य प्राप्तः "आतो लोप इटि च" इत्याकारलोपो मा भूदित्यतस्तत्र स्थानिवद्भावनिषेधारम्भात् । स्थानिनि दृष्टस्यैवातिदेशे तु अकारस्य स्थानिवद्भावेऽपि प्रत्ययत्वाभावे सुतरामार्द्धधातुकत्वाभावात् वरप्रत्ययस्य चानजादित्वादकारेण व्यवधानाच्च आतोलोपस्यैवाप्रसक्त्या तद्वैयर्थ्यापत्तेः ।

अत्र हरदत्तादयः । ह्रस्वदीर्घान्तेषु इयङुवङोः कृतयोर्लघूपधगुणो दुर्वारः । न चाल्लोपस्य स्थानिवद्भावेन उकारस्योपधात्वव्याघात इति वाच्यम् । उकारस्यानादिष्टादचः पूर्वत्वाभावात् । अल्लोपानन्तरमेवोवङः प्रवृत्तेः । तथा जङ्गम इत्यत्र "गमहन" इत्युपधालोपः स्यात् । यदि त्वनङीति निषेधः, तर्हि दरीदृश इत्यत्र "ऋदृशोऽङि" इति गुणः स्यात् । देय इत्यत्र "दीङो युडचि" इति युट् स्यात् । सनीस्रंसो दनीध्वंसः । "अनिदिताम्" इति लोपः स्यात् । याया वावा इत्यादौ "आतो लोप" इत्याकारलोपः स्यात् । तस्मात्समुदायलोपस्वीकारस्यावश्यकतया लोलुवादिसिद्धये सूत्रमारभ्यमिति ।

यत्तु स्थानिद्वारकस्यानादिष्टादचः पूर्वत्वस्य सत्त्वात्स्थानिवद्भावान्न गुणप्रसङ्ग इति, तन्न । स्थानिद्वारा उवङोऽनादिष्टादचः पूर्वत्वेऽप्युकारस्यातथात्वात् । लोलूय इत्यस्यामवस्था-

यामुकारे दृष्टस्य अकारात्पूर्वत्वस्योवङि सम्भवेऽपि तस्यात्र कस्यचिद्विधेरप्रवर्त्तनीयत्वात् । उकारमात्रस्य त्वादेशत्वपर्याप्त्यनधिकरणतया ऊकारनिष्ठस्यानादिष्टादचः पूर्वत्वस्य तस्मिन्नतिदेशायोगात् ।

यदप्युक्तम्—" सर्वे सर्वपदादेशाः " इतिन्यायेनार्थवत्येव स्थान्यादेशभावाविश्रामादुवङ्द्वारा लोलू इत्यस्य स्थाने लोलुव् इत्यादेशः, स च स्थानिवद्भावादनादिष्टादचः पूर्वः, तस्य गुणद्वारा लोलोव् इत्यादेशे कर्त्तव्ये अल्लोपः स्थानिवदिति युक्तमेवेति, तदप्यसत् । तथा सति लोलूय इत्यस्य स्थाने यलोपाल्लोपद्वारा लोलू इत्यादेशपर्यवसाने विशिष्टस्यैव स्थानिकोटिप्रवेशाद् अकारापेक्षया स्थानिद्वारकस्यापि पूर्वत्वस्य दुर्लभत्वात् ।

वस्तुतस्तु स्थानिद्वारकमनादिष्टादचः पूर्वत्वमाश्रित्य स्थानिवद्भावो निर्बीज इति तत्रैव वक्ष्यामः ।

यदप्याहुः—"अङ्गवृत्ते पुनर्वृत्तावविधिः" इतिपरिभाषया उवङि कृते न गुणप्रवृत्तिरिति, तदप्यसत् । चेक्षियः तोष्टुवः इत्यादेस्तथाऽप्यसिद्धेः । तथा हि "अन्तरङ्गानपि" इतिन्यायेन "अकृत्सार्वधातुकयोः" इति दीर्घं बाधित्वा यङो लुक् । ततोऽल्लोपस्य स्थानिवत्त्वेऽपि चेक्षि अ अ तोष्टु अ अ इति स्थान्यकारमन्त्यं कृत्वा लघूपधमङ्गमच्प्रत्ययपरं जातमिति लघूपधगुणः स्यादित्याशङ्क्य अन्तरङ्गत्वेन इयङुवङोः प्रवृत्तिरिति स्वयमप्युक्तम् । यस्मिन्नङ्गकार्ये सत्येवाङ्गकार्यमन्यत् प्राप्नोति तत्र कृते तन्न भवतीति चोक्तपरिभाषाऽर्थः । न चात्र लघूपधगुण उवङि सत्येव प्राप्नोति । पूर्वमपि तत्प्राप्तेः ।

यदपि जङ्गम इत्यत्रोपधालोपो नापादनीयः । अनङीतिपर्युदासेनाङ्सदृशे श्रूयमाणाजादौ तद्विधानादिति, तन्न । तत्र

प्रसज्यप्रतिषेधस्यैवावश्यकत्वात् । न त्वङीति स्वयमेव व्याख्यातत्वाच्च । अन्यथा श्रूयमाणत्वस्यैवानर्थकत्वस्यापि तत्त्वावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वस्वीकारापत्त्या जग्मेत्यादौ मध्यमपुरुषबहुवचनादावप्युपधालोपानापत्तेः । स्वाभाविकाजादित्वस्यापि तथात्वापत्त्या जग्मुष इत्यादावपि तदनापत्तेश्च । भेदप्रतियोगिवृत्तीनान्तत्प्रतियोगितावच्छेदकातिरिक्तानां धर्माणां मध्ये श्रूयमाणत्वस्यैव भेदानुयोगितावच्छेदकत्वमित्यत्र नियामकाभावात् ।

यदप्युक्तम्—देद्य इत्यत्र "दीङः" इत्यनुबन्धनिर्देशान्न युडागमापत्तिः, तदुक्तम्—

शितपा शपाऽनुबन्धेन निर्दिष्टं यद् गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥

इति । तदप्यसत् । अत्र यङो लोपप्रतियोगित्वेन निर्देशात् तद्भिन्नस्य कार्यं न भवतीत्यर्थप्रतीतेः । निमित्तकोटिप्रविष्टस्य कार्यानन्वयात् । प्रवेशश्च साक्षादन्यथा वेत्यन्यदेतत् ।

अत एव "सुप्तिङन्तम्" इतिसूत्रे कृत्तद्धितेत्यत्र तदन्तग्रहणाभावे "केवलानामेव कृत्तद्धितानां संज्ञापत्त्या भिदित्यादीनां संज्ञा न स्यात्, अधातुरिति निषेधाद् अर्थवत्सूत्राप्रवृत्तेः । नापि क्विबादीनाम्, अश्रूयमाणत्वात्" इत्यनन्तरं कैयटेनोक्तम्—"नापि प्रत्ययलक्षणेन प्राप्नोति,प्रत्ययनिमित्तमन्यस्य यत् कार्यं विधीयते तत् प्रत्ययलोपे भवति, न तु प्रत्ययस्यैव यत् कार्यं तदपि, न ह्यसत् कार्यित्वेन वचनशतेनापि शक्यमाश्रयितुमिति ।

तत्र विधिरत्र निषेध इति परं विशेषः । शितपेत्यादिज्ञापकस्यापि यङ्भिन्नकार्यविषयकत्वात् । तच्च "एकाचः" इत्येकग्रहणं तत्तदंशे तत्तन्निर्देशो वेत्यन्यदेतत् ।

एतेन " दीङः " इत्यनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थ इति तत्रत्यहरदत्तोक्तेरत्रत्यतदुक्तिविरोधोद्भावनमप्यपास्तम् । प्रत्ययान्तरसम्बन्धियुडागमवारणार्थतायास्तत्रोक्तत्वात् । यङवयवमकारमाश्रित्यात्र तदापादनस्याविरुद्धत्वात् ।

नन्वेवमपि यङकारमाश्रित्य युडापत्तिरसङ्गतैव,दीङः परस्याजादेः क्ङित आर्द्धधातुकस्य युटो विधानादस्यापि यङ्कार्यत्वानपायात्, स्वविधौ स्थानिवत्त्वाभावाच्च इति चेत्, सत्यम् । भवदीयस्य " शितपाशपा " इत्यादिवचनोपन्यासस्याप्यसङ्गतितादवस्थ्यात् ।

मिश्राणां त्वयमाशयः—अल्लोपानन्तरं यल्लोप इत्यत्र मानाभावः । लुकः सर्वापेक्षया बलवत्त्वमितिस्वीकारात् । अत एव गोमत्प्रिय इत्यादौ "सुपो धातुप्रातिपदिकयोः" इति सोर्लुगेव, न तु हल्ङ्यादिलोपः । प्रत्ययलक्षणेन नुमादिप्रसङ्गादिति सिद्धान्तः ।

न च अच्प्रत्ययस्य यङकारेण व्यवधानात्कथं पूर्वं यस्य लुगिति वाच्यम् । निर्देश्यतावच्छेदकयङ्त्वावच्छिन्नापेक्षया व्यवधानस्य सत्त्वात् । योगविभागसामर्थ्याच्च यलोपो व्यञ्जनमात्रे पर्यवस्यतीत्यन्यदेतत् । वस्तुगत्या यत्र कार्यविश्रामस्तदपेक्षस्यैवाव्यवधानस्योपादाने तु "क्ङिति च" इतिसूत्रस्थकैयटग्रन्थविरोधात् । स्थानिवद्भूतेनाकारेण व्यवधानात्पश्चादपि कथमिति तुल्यत्वाच्च । श्रुतिकृतमेवाव्यवधानं वचनप्रामाण्यादाश्रीयतइति चेत्, तर्हि यलोपस्य परनिमित्तकत्वं कुतो निर्णीतम् । अचीतिसप्तम्याः सतिसप्तमीत्वेनैवोपपत्तेः । अल्लोपस्य तु स्थानिवद्भावार्थं परनिमित्तकत्वस्वीकार इति वैषम्यम् । प्रयोजनं विनाऽपि परसप्तमीत्वस्वीकारे प्रमाणाभा-

वात् । लोलूयतइत्यादावपि यकारलोपापत्तिवारणार्थमचः सत्तामात्रस्वीकारात् ।

न च तथाऽपि निर्दिष्टपरिभाषोपस्थानं दुर्वारमिति वाच्यम् । "श्नान्नलोपः" इतिसूत्रे क्ङितीत्यनुवृत्तिपक्षे हिनस्तीत्यत्र नलोपो न स्यादित्यापत्तेः सतिसप्तम्या भाष्ये समाधानात् । ननु तत् पूर्वपक्षाभिप्रायवर्णनमात्रम्, परत्वाभिमतसप्तमीस्थलेऽपि सप्तम्या भावलक्षणत्वात्, परत्वार्थकसप्तम्या विशिष्य विध्यभावात् "इको यणचि"इत्यादावपि निर्दिष्टपरिभाषाऽनुपस्थानप्रसङ्गात् । सत्यम् । तथाऽपि विषयसप्तमीत्वस्वीकारात् तत्र तदनुपस्थानस्य सिद्धान्तासिद्धत्वात् । तथा च श्रूयमाणतादशायामेव युडापत्तिः ।

न च तदपेक्षया लोपस्यैव पूर्वं प्रवृत्तिरिति वाच्यम् । ङिदुद्देशेन विहितस्य युडागमस्यानवकाशतया बलवत्त्वात् । दीङः परस्याजादेर्ङित आर्द्धधातुकस्यान्यस्य दुर्लभत्वात् । न च ङिदित्यंश उत्तरार्थ एवेति वाच्यम् । सति सम्भवे केवलोत्तरार्थत्वस्य दुर्वचत्वात् । अत एवाकृतव्यूहपरिभाषाया अपि नावतारः । कार्यिणो निनित्तत्वाभावाच्च ।

नन्वेवं चेक्षिय इत्यादौ गुणोऽपि श्रूयमाणतादशायामेवापाद्यताम्, किं स्थानिवद्भूतमकारमाश्रित्य तदापादनेनेतिचेत्, सत्यम् । सार्वधातुकेत्यादिगुणस्य "क्ङिति च"इति निषेधात्, लघूपधगुणस्य च तमाश्रित्यापादयितुमशक्यत्वात् । तमादायैव लघूपधत्वसम्पत्तेः । अनयोरन्यत्र चरितार्थतया तत्र लोपस्यैव प्राथम्याच्चेति वैषम्यात् ।

प्रकृतमनुसरामः । यत्तु वदन्ति—"यस्य हलः" इति लोपस्य त्वयाऽप्यवयवमात्रप्रतियोगिकत्वं स्वीकृतम् । तत्र यद्यपि

देद्यक इत्यत्र युट् स्यादिति नापादनार्हम्, हलः परत्वाभावेन यल्लोपानुपपत्त्या देदीयक इति रूपाभ्युपगमात्, सनीस्रसक इत्यादौ नलोपोऽपि सर्वसंमतत्वादेव नापाद्यः, याद्यायकः, वावायकः, इत्यादावातो लोपोऽपि नापाद्यः। यलोपविरहेणा-जादिक्ङिदार्द्धधातुकपरत्वाभावात्, तथाऽपि गमेर्यङन्तात् ण्वुलि जङ्गमक इत्यत्राल्लोपस्य स्थानिवद्भावाद् वृद्ध्यभावो यथा तथा उपधालोपोऽपि स्यात्।

अथात्र "अनङि" इति प्रतिषेधः, तर्हि दरीदृशक इत्यत्र "ऋदृशोऽङि" इति गुणः स्यात्।

अथात्राङ्गवृत्तपरिभाषया "संज्ञापूर्वको विधिरनित्यः" इति वा समाधानम्, तर्हि यङ्लुक्यपि सनीस्रंस इत्यत्र नलोपो याया वावा इत्यादावातो लोपश्च न शङ्क्यः। समाधानस्य तु-ल्यत्वादिति।

तदपि चिन्त्यम्। "यस्य हलः" इति लोपेऽपि सङ्घातप्रति-योगिकत्वस्यैव स्वीकर्तव्यत्वात्। न च हलः परस्य यस्य लोपः स्यादार्द्धधातुके इत्यस्य "आदेः परस्य" इतिपरिभाषया व्यञ्जन-मात्रे व्यवस्थापितत्वात् कथं समुदायलोप इति वाच्यम्। येनना-प्राप्तिन्यायेन "यङोऽचि च" इति लोपस्यातोलोपापवादत्वात्तत्रापि तत्र कथमवयवलोप इत्यस्य तुल्यत्वात्। न चोक्तयोगविभागेन निर्वाहः। अत्रापि "अतो लोपः" इत्यस्मादत इत्यनुवर्त्य अकारा-न्तस्य यस्येतिव्याख्याने विशेषणसामर्थ्याद् "आदेः परस्य" इति न प्रवर्त्ततइति समाधेरुक्तत्वात्। व्यञ्जनाकारयोः समाहारद्वन्द्वं कृत्वा द्वयोर्लोपविधानसामर्थ्यात्तदप्रवृत्तेरपि च सुवचत्वात्। यस्येतिसङ्घातग्रहणमितिवामनग्रन्थदर्शनाच्च। बेभिदिता मरी-मृजिता इत्येतत्सूत्रोदाहरणतया प्राचीनलेखनस्वारस्याच्च।

प्रकृतनिषेधे इक इत्यनुवृत्त्या पापाचक इत्यत्र "अत उपधायाः" इति वृद्धेर्नायं निषेध इत्युक्तत्वाच्च । यङ्लोपस्य सङ्घातप्रातियोगिकत्वं विना तत्रोक्तवृद्धिप्रसङ्गस्य दुरुपपादत्वात् ।

यत्तु यकाराकारसमुदायान्तर्गतस्यैव यकारस्य लोपो न तु अहर्यीद् अमव्यीदित्यादौ केवलस्यापीति वामनवाक्यव्याख्यानम्, तच्चिन्त्यम् । निर्देशे ताद्दशत्वस्य वारणीयत्वाभिमतेऽपि सत्त्वात् । लोपप्रवृत्तिवेलायां तथात्वस्य संग्राह्येऽप्यभावात् । तन्मतेऽप्यतोलोपस्य प्रागेवोपगमात् ।

हरदत्तीयतथाव्याख्यानस्य च परकीयव्याख्यानानुवादमात्रतया तत्सम्मतत्वाभावात् । अत एव प्रकाशकारैः "यस्य" इति लोपस्यावयवलोपत्वे यङ्लुकोऽवयवलोपपक्षे हरदत्तोक्तदोषानतिदिश्योपसंहृतम् । तस्मात्सूत्रं स्थापयितुं प्रवृत्तैर्लुकीव लोपेऽपि समुदायनिवृत्तिरेवैष्टव्या । उक्तयुक्तीर्वामनवाक्यं चोपष्टभ्य हरदत्तादिग्रन्थोपमदार्थमेव प्रवृत्तत्वादिति ।

तेषां ह्ययमभिप्रायः–हरदत्तांशे ग्रन्थोपमर्दो "यस्य" इति लोपस्यावयवलोपत्वे तात्पर्याभाव इति व्याख्यानम्, उभयत्राप्यवयवलोपवादिनां तु दूषणमेवोपमर्द इति ।

एतेन पापाचक इति यङन्तात्ण्वुलि वृद्धिर्भाष्यविरुद्धेत्यपास्तम् । एतत्सूत्रप्रत्याख्याने भाष्यतात्पर्यविरहे "यस्य" इति संघातलोपे अज्झलादेशस्य स्थानिवत्त्वाविरहाद् "अत उपधाया" इति वृद्धेः सुस्थत्वात् । एतन्निषेधस्तु इग्लक्षणत्वाभावान्न प्रवर्त्ततइत्युक्तम् ।

किं च "अचः परस्मिन्" इतिसूत्रेऽनाश्रीयमाणायां प्रकृतौ स्थानिवद्भाव इति पक्षे नपदान्तसूत्रे द्विर्वचनवरेयलोपानां ग्रहणं कर्त्तव्यमिति भाष्ये वक्ष्यते । आश्रीयमाणायां प्रकृताविति

पक्षे हि द्विर्वचनेऽनचीतिपर्युदासेन तत्सदृशस्य हल एवाश्रयणम्, न त्वचः । वरे त्वाकारलोपे विधीयमाने प्रकृतिराश्रितैवाचि क्ङितीति, तत् कथं वरेशब्दग्रहणमापाद्यते इत्याशङ्क्य कैयटेनोक्तम्—

यङ एव समुदायस्य प्रत्ययत्वं न तदवयवस्याकारस्येति । अजादौ प्रत्यये परे आकारलोपस्य विधानादत्राप्रसङ्ग एवेति । तथा चात्र कथं तदाश्रय उवङ्, कथं वा सम्भावितस्याप्यतिदेश इत्यत्र भाष्यकारादीनां तात्पर्यम् ।

अपि च जङ्गम इत्यादावुपधालोपादीनां ङित्त्वोपजीविनामापादनमुभयेषामप्यनुपपन्नम् । ङकारस्य याङि समुदायानुबन्धत्वात् । अकारमात्रस्य स्थानिवद्भावेऽपि तस्य यङ्रूपताया दुर्लभत्वात् । अत एव रमायै इत्यादौ "वृद्धिरेचि" इत्येव वृद्धिर्न तु " आटश्च " इति दीक्षितैरेवोक्तमित्यवहितैर्विभावनीयमिति दिक् ।

क्ङिति च ५ ।

इग्लक्षणे गुणवृद्धी यं प्रत्ययमाश्रित्य ते तस्य गित्त्वे कित्त्वे ङित्त्वे च सति न स्तः । ककारात्पूर्वं चर्त्वेन गकारस्यापि प्रश्लेषात् ।

यत्तु किदादिकं निमित्ततयाऽऽश्रित्य ये प्राप्नुत इति व्याख्यानम्, तच्चिन्त्यम् । निमित्तादिपदान्वयिपदजन्यबोधे प्रकारतया भासमानस्य धर्मस्य निमित्ततावच्छेदकत्वेन प्रतीतिनियमात् । दण्डः कारणमित्यादौ दण्डत्वादेः कारणतावच्छेदकत्वस्य, घटः कार्यमित्यादौ घटत्वादेः कार्यतावच्छेदकत्वस्य च प्रत्ययात् । अन्यथा तादृशशब्दात्कारणत्वाद्यग्रहापत्तेः । ततश्च कित्त्वाद्यवच्छिन्नकारणतानिरूप्यकार्यत्वस्य गुणवृद्ध्योः

शाब्दविषयत्वे वृत्तेरप्रमाणत्वापत्तेः । तत्र शास्त्रस्यापि तात्पर्ये तु षोडशिग्रहणाग्रहणवद्विकल्पापत्तेरित्यास्तान्तावत् ।

गित् । जिष्णुः । "ग्लाजिस्थश्च" इति ग्स्नुः । कित् । स्तुतः स्तुतवान् । ङित् चिनुतः सुनुतः । "सार्वधातुकमपित्" इति ङित्त्वम् । इग्लक्षणे इति किम् । लैगवायनः । "ओर्गुणः" इति निर्दिष्टस्थानिकत्वात् इक्पदानुपस्थितया फकः कित्त्वेऽपि तन्निमित्तको गुणो यथा स्यात् । अत एव कामयतइत्यत्र कमेर्णिङो ङित्त्वेऽपि तमाश्रित्य "अत उपधायाः" इति वृद्धिर्धात्वकारस्य भवत्येव । आश्रित्येति किम् । छिन्नम् भिन्नम् इत्यादौ लघूपधगुणोऽपि यथा न स्यात् ।

अत्र इक इत्यनुवर्त्तते गुणवृद्धी इति च । तत्र क्ङितीत्यनेन इको विशेषणे क्ङिति परतो य इगित्यर्थे "तस्मिन्निति निर्दिष्टे पूर्वस्य" इतिपरिभाषोपस्थितौ निर्दिष्टशब्दस्याव्यवहितोच्चारितार्थकतया चितम् स्तुतम् इत्यादौ किदाद्यव्यवहितपूर्ववर्तिन एव इको गुणनिषेधः स्यात्, न तु भिन्नमित्यादौ । दकारेण व्यवहितत्वात् । तस्मात्क्ङितीति गुणवृद्धिविशेषणमेव । ततश्च नेयं परसप्तमी, क्ङिति परे गुणवृद्ध्योरविहितत्वात्, अन्यथा विकल्पापत्तेः, किं तु निमित्ततामात्रे । तच्च इगन्तेऽव्यवधानेन लघूपधे व्यवधानेनेति यथाप्राप्तं गृह्यते । अनुवादस्य यथाप्राप्तपरत्वनियमात् । निमित्तत्वमपि सार्वधातुकत्वादिना तत्तद्विधौ श्रूयमाणेन धर्मेण । क्ङिदादौ निषेधसामर्थ्याद्विधिवाक्येषु तदनुल्लेखाच्च । यद्यपि निमित्तत्वं सप्तम्यर्थो विशिष्य नोक्तः, तथाऽपि क्ङिति सति प्राप्ते ये गुणवृद्धी इति सम्बन्धे अर्थात्तत्प्रत्ययस्य निमित्तत्वं पर्यवस्यतीत्याहुः ।

रलो व्युपधाद् इत्यादिना किच्वातिदेशश्चात्र मानम्। अन्यथा व्यवधानेन गुणनिषेधाप्रवृत्तौ तदर्थकित्त्वस्य वैयर्थ्यापत्तेः।

वस्तुतः क्ङितीत्यत्र विशेष्याकाङ्क्षायां पूर्वसूत्रस्थार्द्धधातुकपदेन तिङ्शिद्भिन्नत्वे सति धात्वधिकारोक्तप्रत्ययत्वेन रूपेण तत्समर्पणेऽपि विशिष्टस्यात्र विशेष्यत्वस्वीकारे "सार्वधातुकमपित्" इत्यादीनां व्यर्थत्वापत्त्या सत्यन्तम्परित्यज्य धात्वधिकारोक्तप्रत्ययत्वमेव विशेष्यतावच्छेदकम् विशिष्टवाचकपदानां सति बाधके विशेष्यमात्रपरत्वस्य लक्षणां विनैव स्वीकारात्। "श्रोतव्यः श्रुतिवाक्येभ्यः" इत्यत्र श्रुतिशब्दस्य प्रमाणशब्दमात्रपरत्वस्वीकारात्। ततश्च प्रत्ययेनाङ्गस्योपस्थित्या लघूपधस्याङ्गस्याव्यवधानादुभयत्रापि निषेधसिद्धिः। अङ्गापेक्षस्यैवाव्यवधानस्य स्वीकारात्। इदञ्चात्रैव कैयटे स्पष्टम्।

इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते क्ङित्यचि वा इति पूर्वसूत्रे भाष्यम्। संक्रमो गुणवृद्धिप्रतिषेधहेतुभूतः क्ङित्प्रत्ययः। पूर्वाचार्यसङ्केतात्। अजादौ क्ङिति प्रत्यये परे मृजेर्विकल्पेन वृद्धिर्भवतीति तस्यार्थः। मृजन्ति मार्जन्ति।

अत्र हरदत्तः—"यस्मिन्विधिस्तदादावल्ग्रहणे" इतिपरिभाषयैव सिद्धौ अजादाविति वचनं मुख्याजादिग्रहार्थम्। तेन व्यपदेशिवद्भावेनाजादौ न भवति। यथा यूयं ममृज त्वया ममृजे इति।

अत्र केचित्। तथाऽपि ममृजेत्यत्र विकल्पो दुर्वारः। "लिटि मध्यमपुरुषबहुवचनस्य थस्य स्थाने विधीयमानोऽकारादेशोऽन्त्यस्य प्राप्नोति। न चैवं विधिवैयर्थ्यम्, थकारोत्तराकारस्य तत्र स्वत एव सत्त्वादिति वाच्यम्। णलादीनां य-

थासङ्ख्यसम्पादनेन सार्थक्यादित्याशङ्क्य अकारद्वयात्मकोऽयमादेशोऽनेकाल्त्वात्सर्वस्य, यद्वा–धातोरित्यधिकाराद्धातोः परस्य थस्याकारविधाने "आदेः परस्य" इति परिभाषया थकारस्यैवाकारः, उभयथाऽपि "अतो गुणे" इति पररूपमिति भाष्ये स्पष्टम् । तस्य स्थानिवद्भावेन मुख्याजादित्वमस्त्येवेति ।

अन्ये त्वाहुः–व्यपदेशिवद्भावनिबन्धनाजादित्वस्येव स्थानिवत्त्वनिबन्धनस्यापि तस्य गौणताया वक्तुं शक्यत्वान्नेदं साधीयः । किं तु अजादाविति न विधिवाक्यशरीरम्, येनोक्तमर्थं ज्ञापयेत् । किं तु "क्ङित्यचि वा" इति तदुत्तरभाष्यपठितमेव । पूर्वभाष्यस्थमजादिपदं तु अचीत्यस्य "यस्मिन्" इतिपरिभाषासिद्धार्थानुवादमात्रम् । अतो न हरदत्तोक्तं युक्तम् । अत एव ममृजेत्यत्र गणपाठादेव वृद्ध्यभाव इति आत्रेयः । धातुवृत्तिष्वपि यूयं ममृज ममार्ज इत्युदाहृतमिति ।

इदं चान्यदवधेयम् । क्ङित्येव विकल्पारम्भात् धात्वंशलोपनिमित्तत्वेन वृद्धिनिषेधहेतावच्प्रत्यये नायं विकल्प इत्यत्रोक्तम् । तत्सूत्रप्रत्याख्यानप्रस्तावे तु अतोलोपस्य स्थानिवद्भावमाश्रित्य यथोत्तरं मुनीनां प्रामाण्येन वृद्धिविकल्पो भवत्येवेत्युक्तम्, तच्चिन्त्यम् । सूत्रारम्भपक्षे यथारूपं तथैव तत्प्रत्याख्यानेऽपीति तत्र भाष्याभिप्रायस्यावश्यकत्वात् । तस्य चात्र हरदत्तोक्ताभिप्रायेणैव सिद्धेरिति दिक् ।

नन्वचिनोत् अमार्ट् इत्यादौ स्थानिवद्भावेन तिबादेर्ङित्त्वाद् गुणवृद्धिनिषेधापत्तिः । न चानल्विधाविति तन्निषेधः शङ्क्यः । अनुबन्धकार्येषु तदप्रवृत्तेः । युक्तं चैतत् । अनुबन्धानामित्संज्ञकत्वेन आदेशात्पूर्वमेव लोपेन स्थानिन्यसंनिधानात् । आदेशप्रयोज्यनिवृत्तिप्रतियोगिन एव स्थानित्वात् । लकारा-

नुबन्धनिवृत्त्योश्च भावाभावरूपादेशप्रयोज्यत्वात्। "अनेकान्ता अनुबन्धा" इति पक्षे तु तेषां स्थानिकोटिप्रवेशस्य दूरापास्तत्वात्। ज्ञापकं चात्र "न ल्यपि" इति ईत्वनिषेधः। क्त्वानिष्ठकित्त्वस्य स्थानिवद्भावेन ल्यप्यप्रवृत्तौ कित्त्वाभावादेव ईत्वाप्रसक्त्या तद्वैयर्थ्यापत्तेरिति चेत् अत्र वार्त्तिकं तावत्—

लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेत्, यासुटो ङिद्वचनात्सिद्धमिति।

अन्यथा लिङ्वद्भावप्रयुक्तङित्त्वेन तदादेशानां ङित्त्वे तदवयवस्य यासुटोऽपि तत्त्वात् " यासुट् परस्मैपदेषूदात्तो ङिच्च " इति ङिद्वचनं व्यर्थं स्यात्। न च स्तुयादित्यादौ "उतो वृद्धिर्लुकि हलि" इत्यस्या उत इति निर्दिष्टस्थानिकत्वेनानिग्लक्षणाया वृद्धेः, चिनुयुरित्यादौ "क्ङिति च" इतिनिषेधापवादस्य "जुसि च" इति गुणस्य च प्रतिषेधार्थं ङिद्वचनमस्तु, पुनर्ङित्त्वसामर्थ्यं विना स्थानिवत्त्वप्रयुक्तङित्त्वमात्रेण तन्निषेधस्यानुपपत्तेरिति कथं तस्य ज्ञापकत्वमिति वाच्यम्। उत औदित्येव सिद्धे वृद्धिग्रहणेन "संज्ञापूर्वको विधिरनित्यः" इति वृद्धिनिषेधसिद्धेः। "क्सस्याचि" इत्यस्मादचीत्यनुवर्त्य अजादौ जुसि गुणविधानात् यासुटि कृते च जुसो हलादित्वसंपत्तेः। यद्वा "मिदेर्गुणो जुसि च" इति संहितापाठे अजुसीति छित्वा अजादावुसि गुणविधानात्।

यत्त्वेवं चक्रुः जहुः इत्यादावतिप्रसङ्ग इति, तन्न। तस्य अजादित्वव्यभिचाराभावेन विशेषणवैयर्थ्यापत्त्या तत्सामर्थ्येन जुस्येव पर्यवसानात्।

वस्तुतस्तु अचासावुस् चेति न कर्मधारयः। उकारसकारात्मकसमुदाये अजभेदस्य बाधितत्वात्। न च अच्पदमजादौ

लाक्षणिकम् । गौरवात् । न चात्र "यस्मिन्विधिस्तदादावल्ग्रहणे" इति निर्वाहः । यस्मिन्निति सप्तम्यन्तानुकरणेन अलः सप्तम्यन्तत्वएव तत्प्रवृत्तेः । अत्र च विशेष्येणान्वये तद्विभक्त्याऽस्य सप्तम्यन्तत्वे परिभाषाप्रवृत्तिः । तस्यां चाजादिपरत्वेन योग्यतासंपत्त्या विशेष्यान्वय इत्यन्योन्याश्रयात् । एतेन उजुसीतिच्छेदोऽपि निरस्तः । अत एवाचीति सप्तम्यन्तानुवृत्तिपक्ष एव सप्तमे भाष्यकृता सिद्धान्तित इति दिक् ।

न चैवं जुसि गुणे यासुट्प्रतिषेध इति तत्रत्यवार्त्तिकवैयर्थ्यम् । उक्तरीतावेव तस्य तात्पर्यस्य तत्रोक्तत्वादिति । न चैवमपि ब्रूतादित्यत्र "ब्रुव ईट्" इतीडागमापत्तिः, तातङः स्थानिवत्त्वेन पित्त्वादिति वाच्यम् । "अनित्यमागमशासनम्" इति परिहारात् ।

भाष्यमते तु "सार्वधातुकमपित्" इत्यत्र अपिदिति योगो विभज्यते, ङिदिति चानुवर्त्तते । पर्युदासवृत्तिं नञं च पृथक्कृत्य ङित् पिन्न भवतीति आवृत्त्या वाक्यद्वयं कल्प्यते । तथा च ङित्त्वपित्त्वयोः परस्परात्यन्ताभावव्याप्यत्वलाभे अर्थादौपदेशिकेनातिदेशिकस्य बाधः फलति । तेन ब्रूतादित्यत्र इण्न । तातङ औपदेशिकेन ङित्त्वेनातिदेशिकस्य पित्त्वस्य बाधात् । अचिनोदित्यादौ तु पित्त्वस्यौपदेशिकत्वाद्वैपरीत्यमिति गुणादिसिद्धिः । अत्र यासुटो ङिद्वचनं लिङाश्रयातिदेशिकङित्त्वस्य तिबाद्याश्रयपित्त्वेन बाधिततया पुनर्ङित्त्वस्य विधायकमेव । ततश्चोभयोरप्यौपदेशिकत्वे सावकाशनिरवकाशन्यायेन चिनोतीत्यादौ सावकाशस्य पित्त्वस्यानवकाशेन ङित्त्वेन बाधः । प्रायणीयादिभिन्नाग्नीषोमीयप्राचीनपदार्थविषये सावकाशस्य यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्तीत्यस्येव निरव-

काशैर्यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूया-न्मन्द्रम् प्रायणीयायां मन्द्रतरमातिथ्यायामुपांशूपसत्सूच्चैरग्नीषो-मीये इत्येतैः। अतः स्तुयादित्यत्र पिति हलि विहिता वृद्धिर्न। चिनुयुरित्यत्र तूक्त एव समाधिः।

नन्वेवं भविषीष्टेत्यत्र ङित्त्वं स्यात्। आतिदेशिकङित्त्व-बाधकाभावात्। एवं करिष्यमाणेत्यत्र लृडादेशस्य शानचो-ऽतिदेशेन उगित्त्वाट्टित्त्वाच्च ङीबापत्तिः, इति चेत् अत्राहुः— "हलः श्नः" इत्यत्र शानचः शित्त्वेन क्वचिदनुबन्धकार्येऽप्य-नल्विधाविति निषेधप्रवृत्तिर्ज्ञाप्यते। अतो नोक्तदोषः। एवं च ब्रूतादित्यत्र वार्त्तिकमतेऽपि न ईडागमापत्तिरिति।

दीधीवेवीटाम् ६।

दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। आदीध्य-नम् आदीध्यकः आवेव्यनम् आवेव्यकः अकणिषम् अरणिषम् कणिता श्वः रणिता श्वः अङ्गसंज्ञायां तदादि-ग्रहणेन मिबादेशममं प्रति सिजन्तमङ्गं तिबादेशं डाशब्दं प्रति च कणित् इत्यङ्गम्। तत्रोक्तादेशद्वयसार्वधातुकं निमित्तीकृत्य प्रस-क्तस्य लघूपधगुणस्यायं निषेधः। तृजन्तादौ इटः प्रत्ययाव-यवत्वेन तदुत्तरप्रत्ययान्तराभावादङ्गानन्तर्गतत्वेन च गुणाप्र-सक्त्या लुडन्तत्वद्योतनाय श्व इत्युक्तम्। डादेशं प्रति तास्यन्त-स्याङ्गतया तास्यवयवस्य इटो गुणप्रसक्तिसंभवात्।

न च दीङ् क्षये धीङ् अनादरे वेञ् तन्तुसन्ताने वी गत्यादिषु एषामेव ग्रहणं स्यादिति वाच्यम्। "अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी" इतिन्यायात्। तन्मात्रतात्पर्यग्राहका-नुपूर्व्यन्तरपरित्यागसामर्थ्याच्च। इट् चागम एव। न तु इट गता-

विति धातुः । क्त्वोऽर्थग्रहणेन साहचर्यस्य नियामकत्वानियमभङ्गस्य ज्ञापितत्वात् ।

अत्र वदन्ति । दीध्यको वेव्यक इति शुद्धयोरेव दीधीवेव्यो रूपम्, न तु ण्यन्तयोः । आदीधकः आवेवकः इत्येव रूपयोस्तत्र स्वीकारात् ।

यत्तु हरदत्तेनोक्तम्—वर्णग्रहणसामर्थ्यात् श्रूयमाणएव इवर्णे लोपो न लुप्ते, तेन ण्यन्ताभ्यां ण्वुलि णिलोपस्य पूर्वविधौ स्थानिवत्त्वेऽपि श्रूयमाणत्वाभावाल्लोपाभावे यणि कृते दीध्यको वेव्यक इति शुद्धसमानाकारकमेव रूपमिति, तच्चिन्त्यम् । "नाग्लोपि" इतिसूत्रगतभाष्यविरोधात् । तत्र वर्णग्रहणं लुप्तेऽपीवर्णे यथा स्यादित्येवमर्थमित्याशङ्क्य स्थानिवद्भावेन सिद्धेरन्तरङ्गत्वाण्णिलोपात्प्राग् "यीवर्णयोः" इति लोपसिद्धेश्च वर्णग्रहणस्य प्रत्याख्यातत्वात् । भाष्यकारानुरोधेन च साधुत्वस्वीकारादिति ।

भाष्यवार्त्तिकयोस्त्वेतत्सूत्रं प्रत्याख्यातम् । दीधीवेव्योश्छान्दसत्वेन लोके प्रयोगानर्हत्वात् । छन्दसि च गुणदर्शनात् । तथा च—प्रजापतिर्वै मनसा यत्किञ्चिन्नादीधेत्, हौत्राय वृतः कृपयन्नदीधेत्, अदीधयुर्दासराज्ञे वृतास इत्यादि । छान्दसत्त्वेनैतत्समाधानापेक्षया च क्वचिच्छ्रूयमाणगुणाभावस्यैव तेन साधयितुं युक्तत्वात् ।

इटोऽपि ग्रहणं व्यर्थम् । इड्विधौ "नेड्वशि कृति" इतिसूत्रादिड्ग्रहणमनुवर्त्य एकस्य इट्पदस्य विकाराभाववत्परत्वेन इट् विकाराभाववानेवेति व्याख्यानेन गुणाभावस्य सिद्धत्वात् ।

न चैवं पिपठीरित्यादौ "र्वोरुपधाया दीर्घ इकः" इति दीर्घोऽपि न स्यादिति वाच्यम् । तस्य नियमं प्रत्यसिद्धत्वात् । यद्वा नियमस्याङ्गाधिकारीयत्वात्तत्रत्यस्यैव विकारस्य निय-

मेन व्यावृत्तिरित्युक्तदीर्घद्वयं निर्बाधमिति भाष्यकृतः ।

अपाठीदित्यत्रापि "सिज्लोप एकादेशे सिद्धो वक्तव्यः" इति ज्ञापकात्सवर्णदीर्घः । न च "ग्रहो लिटि" इत्यस्याप्याङ्गत्वान्निषेधापत्तिः । आरम्भसामर्थ्यादिति कैयटादयः ।

वस्तुतस्तु विकारपदस्य इकारवृत्तिभेदप्रतियोगितावच्छेदकजातिमत्परतया तादृशविकारस्य एकारादिरूपस्यैव निषेधो न तु दीर्घस्य । इत्वावच्छिन्नत्वात्तस्यापीति रहस्यम् ।

स्यादेतत् । पिपठींषि ब्राह्मणकुलानीत्यत्र "सान्त महतः संयोगस्य" इति दीर्घो न स्यात् । सिद्धत्वात्, आङ्गत्वात्, अन्यत्र चरितार्थत्वाद्, वैजात्यानवच्छिन्नत्वाच्चेति ।

अत्राहुः— असाधुरेवोक्तप्रयोगः । अतोलोपस्य स्थानिवद्भावेन झलन्तत्वाभावात्तल्लक्षणस्य नुमो दुर्लभत्वात् । न च तर्ह्यजन्तत्वादेव नुम् स्यादिति वाच्यम् । अजन्तत्वप्रयुक्तस्य नुमः सकारोत्तरमेव प्रसक्तेः । सान्तसंयोगाभावेन तथाऽपि दीर्घाप्रसक्तेः । अनादिष्टादचः पूर्वत्वाभावेन तस्य स्थानिवत्त्वासम्भवात् । पिपठिष इत्यजन्तस्य लोपपूर्वदशायामकारापेक्षया पूर्वत्वाभावात् । न ह्यकारविशिष्टस्याकारात्पूर्वत्वम् । बाधात् ।

न च "क्वौ लुप्तं न स्थानिवद्"इतिअतोलोपस्य स्थानिवत्त्वाभावाज्झलन्तलक्षणो नुम् स्यादेवेति वाच्यम् । क्वौ विधिं प्रति न स्थानिवदित्यस्यैवार्थस्य व्यवस्थितत्वात् । लवमाचक्षाण इत्यर्थे तत्करोतीति ण्यन्तात् लवशब्दात् क्विपि "णेरनिटि"इति णिलोपे कृते वकारस्य ऊठि कर्त्तव्ये णिनिमित्तकस्यातोलोपस्य स्थानिवद्भावो मा भूदित्यर्थकत्वात् । सुखीयतिसुतीयतिभ्यां

१ अकारकाले सर्वनामस्थानपरकत्वाभावेन नुमोऽप्राप्तेः । अल्लोपस्यान्तरङ्गत्वात्पूर्वमेव प्रवृत्तेरिति भावः ।

क्विपि अल्लोपयलोपयोः कृतयोः अल्लोपस्य स्थानिवत्त्वेन यणादेशो मा भूदित्येतदर्थं क्वौ लुप्तमित्यस्याश्रयणेऽपि तस्यासार्वत्रिकत्वात् इति नपदान्तसूत्रे वक्ष्यमाणत्वात् । प्रकृते च नुमः क्विन्निमित्तकत्वाभावेन क्वौ विधिमित्यस्याप्रवृत्तेः ।

हलोऽनन्तराः संयोगः ७ ।

अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः । प्रदेशाः "संयोगान्तस्य लोपः" इत्यादयः । हलः किम् । तितउपदे संयोगान्तलोपो मा भूत् । न च " तनोतेर्डउः सन्वच्च " इत्यत्र उकारोच्चारणसामर्थ्यादेव तदभावसिद्धिरिति वाच्यम् । भसंज्ञास्थले संयोगान्तलोपप्रसक्त्यभावेन तत्र तत्सार्थक्यात् ।

ननु अन्तरशब्देन सहायं बहुव्रीहिरन्तराशब्देन वा । आद्ये अन्तरशब्दस्याधेयवाचितया हलपेक्षया विजातीयवर्णशून्यस्य संज्ञायामवग्रहेऽपि संयोगसंज्ञासिद्धिः । तत्र हि मतद्वयम् । मात्राकालव्यवधानेन वर्णान्तरमुच्चार्यते इत्येकम्, अर्द्धमात्राकालव्यवधानेनेत्यपरम्, उभयथाऽपि कालव्यवधानेऽपि वर्णान्तरव्यवधानाभावात् । द्वितीये तु आधारस्य कालस्यापि व्यवधाननिषेधात् अवग्रहे संयोगसंज्ञा न स्यात्, हलुच्चारणसमयध्वंसाधिकरणसमयध्वंसानाधिकरणसमयवृत्त्युच्चारणप्रतियोगित्वस्य अज्व्यवधाने इव कालव्यवधानेऽपि विरहात् इति विशेषसत्त्वादिति चेत्—

अत्र भाष्यकाराः-नैव दोषो नैव प्रयोजनमिति । पक्षद्वयमप्यदोषमिति तस्यार्थः । न चाप्सु इत्यादौ संयोगसत्त्वे गुरुत्वाद् "गुरोरनृतः" इति प्लुतो न त्वन्यथेति कथमुभयाभाव इति वाच्यम् । अधिकरणवृत्तेः तस्य दूराद्धूतसंबन्धाभावात् । विचार्यमाणाना-

मित्यादौ तु वाक्यस्य टेरेव प्लुतविधानेन गुरुसंज्ञाया अनपेक्षितत्वात्। न चाप्सु भवोऽप्सव्यः दिगादित्वाद्यत् "अपो योनियन्मतुपु" इति सप्तम्या अलुक्, तत्संबुद्धौ दूराध्दूतसंबन्धात्फलभेदापत्तिरिति वाच्यम्। एवंविधे विषये अवग्रहस्य पदकारैरकरणात्तथैव संप्रदायात्। न चाप्सु योनिर्वाऽश्व इत्यत्र विशेषः स्यादिति वाच्यम्। समासपदानामन्तोऽवगृह्यतइति पदकारसंप्रदायात्तत्रापि सुशब्दात्पूर्वमवग्रहाभावादिति कैयटादयः।

इयं च संज्ञा समुदायस्य, नावयवमात्रस्य, संयुज्यन्तेऽस्मिन्समुदाये वर्णा इत्यन्वर्थसंज्ञाविज्ञानात्।अन्यथा निर्यायादित्यादौ रेफयकारयोः प्रत्येकं संयोगसंज्ञायां यकारस्यापि संयोगादित्वाद् "वाऽन्यस्य संयोगादेः" इत्येत्वं स्यात्, ग्लेयादित्यादिवत्। न च सिद्धान्तेऽपि " अचो रहाभ्याम् " इति द्वित्वेन यकारद्वयसम्पत्त्या स्यादेवोक्तदोष इति वाच्यम्। तस्यासिद्धत्वेन संयोगसंज्ञाया अनिष्पत्तेः।

किं च प्रत्येकसंज्ञापक्षे संहृषीष्टेत्यत्र " ऋतश्च संयोगादेः " इति इट्, संह्रियतइत्यत्र " गुणोऽर्त्तिसंयोगाद्योः " इति गुणश्च स्यात्। चरमवर्णस्य संयोगतया ऋकारेकारयोः संयोगादित्वसंम्पत्तेः। दृषत्करोतीत्यत्र ककारस्य संयोगान्तस्य लोपः स्यात्। दकारस्य संयोगत्वे तदन्तत्वस्य सत्त्वात्। शक्ता वस्ता इत्यत्र "स्कोः" इति संयोगाद्योः सकारककारयोर्लोपः स्यात्। तकारस्य झलः परतः सत्त्वात्। निर्यातः इत्यादौ " संयोगादेरातो धातोर्यण्वतः " इति निष्ठानत्वं च स्यात्।

यदि तु "वाऽन्यस्य संयोगादेः" इत्यत्र संयोगादित्येतावतैव संयोगात्परो य आकारस्तदन्तस्याङ्गस्य एत्वमित्यर्थलाभादादिग्रहणसामर्थ्यादभेदैकत्वसंख्यैव वृत्तौ भासतइति नियमं ति-

रस्कृत्य संयोगावादी यस्येत्युपसर्जनार्थस्यापि द्वित्वावगतिरिति संयोगद्वयादेरेव एत्वमिति सूत्रार्थान्निर्यायादित्यत्र नातिव्याप्तिः । एवम् "ऋतश्च संयोगादेः" "गुणोऽर्तिसंयोगाद्योः" इत्यत्रापि व्याख्येयम्। "संयोगान्तस्य" इत्यत्रापि पूर्वन्यायेन संयोगद्वयान्तस्य लोपविधानान्न ईषत्करोतीत्यत्र दोषापत्तिः । "स्कोः संयोगाद्योः" इत्यत्रापि सकारककारगतद्वित्वापेक्षया संयोगयोरित्येव सिद्धे आदिग्रहणबलाद् झलि परतो यः संयोगः पदान्ते च यः संयोगः तस्यादिः समीपो यः ककारः सकारश्च तयोर्लोपविधानम्। तेन शक्ता वस्ता इत्यत्र नातिप्रसङ्गः। "संयोगादेरातः" इत्यत्रापि संयोगादात इत्येव संयोगात्परो य आकारस्तदन्ताद्धातोः परस्य निष्ठातकारस्य नत्वमित्यर्थेन सिद्धे आदिग्रहणवशात्संयोगद्वयादिलाभान्निर्यात इत्यत्र नोक्तदोष इति कल्प्यते । तथाऽपि प्रतिपत्तिगौरवम्, प्रत्येकं संयोगसंज्ञायाः क्वचिदप्यनुपयोगे तत्स्वीकारवैयर्थ्यं चेत्यवधेयम् ।

हल इति बहुत्वं चाविवक्षितम् । अन्यथा शिक्षेत्यादौ "गुरोश्च हलः" इत्यप्रत्ययानुपपत्तेः । न चैवमजव्यवहितस्यैकस्यापि संयोगसंज्ञापत्तिः । अवयवार्थानुरोधेन द्वयोरवश्यमपेक्षितत्वात् । यत्र तु बहूनां हलामव्यवधानं तत्राविशेषेण द्वयोर्बहूनां च संज्ञा ।

न चैकाज्द्विर्वचनन्यायः । समुदायकार्येणावयवानां कार्यसंपत्तेरेव तद्बीजत्वात् । निज् इत्यस्य द्विरुक्तौ तदन्तर्गतानां सर्वेषामेकाचां द्विर्वचननिर्वाहात् । इह च बहूनां संज्ञया द्वयोस्तत्कार्यासिद्धिरिति वैषम्यात् । तथा हि । संस्वर्यतइत्यत्र "गुणोऽर्ति" इति न स्यात् । गोमान्करोतीत्यत्र गोमान् त् स् क-

रोति इति स्थिते तकारस्य संयोगान्तलोपो न स्यात्। मङ्क्तेत्यत्र "मस्जिनशोर्झलि" इति नुमागमे मन् स् ज् इति स्थिते सकारस्य संयोगादित्वाभावात् "स्कोः" इति लोपो न स्यात्। निर्ग्लेयादित्यादौ रेफघटितसंयोगस्याङ्गादित्वाभावात् अङ्गादेश्च गकारलकारसमुदायस्य संयोगसंज्ञत्वाभावादेत्वं न स्यात्। एवं निर्ग्लान इत्यत्र नत्वं न स्यात्।

अथैवम् इन्दिद्रीयिषतीति न सिध्यति। तथा हि—तत्र नकारदकारघटित एकः दकाररेफघटितश्चान्य इति द्वौ संयोगौ उक्तरीत्या च नकारस्येव दकारस्यापि संयोगादित्वाद् "नन्द्राः संयोगादयः" इति द्वित्वनिषेधे रीशब्दस्यैव द्वित्वे इन्द्रिरीयिषतीति रूपं स्यादिति चेत्, सत्यम्। तत्र हि कर्मधारयोत्तरपञ्चम्यन्तमजादेरितिपदम् "अजादेर्द्वितीयस्य" इति सूत्रादनुवर्त्तते। आदिभूतादचः परे संयोगादयो नदरा द्विर्नोच्यन्तइति सूत्रार्थः। ततश्च दकारस्य संयोगादित्वेऽप्यादिभूतादचः परत्वाभावान्निषेधाप्रवृत्तौ द्रीशब्दस्य द्वित्वे हलादिःशेषेऽभ्यासस्य ह्रस्वे च सिद्धमिष्टम्। एवं च आदेरचः परस्यैकाचो द्वितीयत्वव्याप्यत्वात्तत्सूत्रे द्वितीयपदं नोपादेयमेवेति निष्कर्षः।

मुखनासिकावचनोऽनुनासिकः ८।

मुखयुतनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। अभ्र आँ अपः। "आङोऽनुनासिकश्छन्दसि" इति आ इत्यस्यानुनासिकः। प्राण्यङ्गत्वेन समाहारद्वन्द्वे क्लीबत्वेन नासिकवचन इत्यापत्तिवारणाय मध्यमपदलोपिसमासाश्रयणम्।

निपातनाद्यथाश्रुतस्य साधुत्वे तु मुखनासिकवचन इत्यसाधु। "अबाधकान्यपि निपातनानि" इति पक्षे तु तदपि साधु।

यद्वा– मुखनासिकपदं कृत्वा ईषदर्थकनञ्समासव्युत्पन्नेन तादृशाङ्पूर्वेण वा वचनपदेन समासः। भागस्य मुखेन भागस्य नासिकया चोच्चारणादीषत्त्वम्। इदं च पूर्वपरयोर्भागयोर्मध्ये एको भागो मुखेनोच्चार्यते द्वितीयस्तु नासिकया। तत्र नासिकावचनभागोपरागवशान्मुखवचनभागस्यापि नासिकावचनवद्भानम्। यथा सँय्यन्तेत्यादौ अनुनासिकयकाराद्युपरागादकारस्याप्यनुनासिकत्वेन प्रतीतिरिति मतमाश्रित्योक्तम्।

यदा तु मुखस्य नासिकायाश्चान्तरालवर्त्तिस्थानान्तरमेवैतदुच्चारणे निमित्तम्, तदा मुखोपसंहिता नासिकेति समासः। पदद्वयस्य स्वार्थान्तरालदेशे लक्षणात्। अर्द्धमन्तर्वेदि मिनोत्यर्द्धं बहिर्वेदीत्यस्येव तदन्तराले। तत्राद्यपक्षे प्रासादवासिन्यायः। यथा प्रासादवासिनस्तद्ग्रहणेन भूमिवासिनस्तद्ग्रहणेन केवलं गृह्यन्ते। उभयवासिनस्तु प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च गृह्यन्ते। ग्राहकतावच्छेदकधर्मद्वयावच्छिन्नत्वात्। उत्तरमतद्वये तु न तदवतार इति स्पष्टमेव।

अत्र पदसंस्कारपक्षे वचनपदं करणल्युडन्तम्। उच्यतेऽनेनेति व्युत्पाद्य पश्चान्मुखनासिकापदेन सम्बध्यते। अन्तरङ्गत्वात्प्रवृत्तश्च पदसंस्कारो बहिरङ्गेण पदान्तरान्वयदशायां प्रतीयमानेन स्त्रीत्वेन न बाध्यतइति ङीप्प्रत्ययो न भवति। प्रथममेव स्त्रीत्वविवक्षायां तु मुखनासिकावचनीक इत्यपि निर्बाधम्। एवं च मुखनासिका वचनं यस्य मुखनासिकमवचनं यस्येति वा बहुव्रीहिरिति भाष्यमतम्।

केचित्तु राजभोजनाः शालय इतिवत् कर्मणि ल्युप्रत्ययं

बाहुलकात् स्वीकृत्य कर्मषष्ठ्या समास इत्याहुः ।

अत्र मुखग्रहणं किम् यमानुस्वाराणामेव मा भूदिति भाष्यम् । अस्यार्थः— मध्यमदर्शने नासिकावचनपदेन उभयस्थानको वर्णो न गृह्येत, किं तु यमानुस्वारा एव । तेषां मतविशेषे एव केवलनासिकास्थानत्वात् । तथा च तैत्तिरीयप्रातिशाख्यम्—"नासिक्या नासिकास्थाना मुखनासिक्या वा" इति । तथा च "आङोऽनुनासिकः" इत्यादौ विधिस्थले तएव विधीयेरन् । "विड्वनोरनुनासिकस्याद्" इत्याद्यनुवादस्थले तु अनुवादस्य यथाप्राप्तविषयकत्वनियमात् यमानुस्वारपरस्य च विडादिप्रत्ययस्यासिद्धेरप्रतिपत्तिरेव स्यात् । अतस्तद्दर्शने मुखपदं सार्थकम् ।

आद्यमते तु नासिकावचनपदेनैव प्रासादवासिन्यायेन मुखवचनानामपि ग्रहणसंभवात्तद्र्थमेव । न च यमानुस्वारानादायातिप्रसङ्गः । अनुवादे यमानुस्वाराणामसंभवात्, विधौ च स्थानिनो मुखनासिकावचनत्वात् तदन्तरतमत्वेन मुखनासिकावचनस्यैवादेशत्वात्केवलनासिकावचनानां यमादीनामान्तरतम्याभावादेवातिप्रसङ्गभङ्गात् । तदुक्तं भाष्यकृता—

नैव दोषो नैव प्रयोजनम् इति ।

तथा च तेषामपि संज्ञाविधाने दोषाभावात् मुखपदं न देयमेवेति स्थितम् । नासिकापदत्यागे तु कचटतपानामपि स्यात् । ततश्च शक्त इत्यत्र ककारस्य पक्क इत्यत्र चकारस्य तप्तमित्यत्र पकारस्य च लोपः स्यात् । ओदनपगित्यादौ "अनुनासिकस्य क्विझलोः" इति दीर्घश्च स्यात् ।

अत्र वदन्ति । वर्गेष्वादितश्चतुर्णां पञ्चमे परे मध्ये पूर्ववर्णसमानाकारं वर्णान्तरं प्रातिशाख्ये स्वागमत्वेन विहितं यम-

संज्ञम् । यमलजातयोः प्रायेण सारूप्यदर्शनाद्यम इव यम इति गौण्येयं संज्ञा । यथा पलिक्क्नी चख्ख्नतुः अग्ग्निः अघ्ग्नन् इत्यत्र कखगघेभ्यः परभागे तत्तत्सदृशोऽयमागमः ।

इयन्तु यमोत्पत्तिरखण्डपदे एवेति तु प्रमाणाभावादुपेक्ष्यम् । परभागे इति मूलग्रन्थेन पूर्वावयवत्वस्यैव लाभात् । अत एव छान्दोग्यलक्षणप्रणेतुरौदव्रजिसंज्ञस्याचार्यस्य सूत्रम् "अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वस्य गुणः" इति । अनन्त्या आद्याश्चत्वारः । अन्त्या ङकारादयः । गुणः पूर्वस्य भक्तः, तदवयव इति यावत् ।

यत्तु विवरणकारैरुक्तम्—वर्गपञ्चमयुक्ताः प्रथमादयो यमा इति, तच्चिन्त्यम् । अयोगवाहत्वप्रतिपादकहयवरट्सूत्रीयभाष्यविरोधात् । केवलनासिकास्थानत्वपरोक्तभाष्यविरोधाच्चेति ।

अत्रेदं विचारणीयम् । चतुर्णामाद्यवर्त्तिनामेवानुनासिकगुणत्वेन भेदात्तज्जातीयत्वेऽपि सानुनासिकयकारादिवदणूसूपदिष्टैः स्वसवर्णैरगृहीतत्वाद्युक्तमेवायोगवाहत्वम् । न हि निरनुनासिकाः कादयोऽणूमध्ये पठ्यन्ते, येनैषामपि ग्रहणकशास्त्रेणैव संग्रहासिद्धौ अयोगवाहत्वप्रतिपादनविरोधः स्यात् । तस्मात्सानुनासिकनिरनुनासिकभेदेन कादीनां द्वैविध्यमित्येव भाष्यादितात्पर्यम्, न तु कादिवृत्तिवर्णत्वसाक्षाद्व्याप्यजात्यभाववत्तायाम् । मानाभावात् ।

अत एव कुँ खुँ गुँ घुँ इति न्यासादिग्रन्थाः सङ्गच्छन्ते । कुँ इत्यस्य तत्तद्वर्गाद्यक्षरपरत्वात् । खुँ इत्यादेश्च वर्गद्वितीयाद्यक्षरपरत्वात् । अनुनासिकत्वमात्रस्य चाधिकस्योपादानात् । नापि द्वितीयो विरोधः । अँ इत्यादीनां भागमात्रं नासिक्यम् । यमानुस्वाराणां तु मुखनासिक्यत्वेऽपि प्रासादवासिन्यायेनानुना-

सिकत्वमप्यस्ति, न तु तदीयं भागमात्रं तथा, इत्येवं परत्वस्य भवद्भिरेवोक्तत्वात् । एतेनादितश्चतुर्णां तदसम्भव एवेत्यपास्तम् । प्रमाणसत्त्वे बाधकाभावात् ।

ननु गुणानामभेदकत्वादेव तेषां प्रत्याहारान्तर्भावसम्भवादयोगवाहानामट्सूपदेशपरभाष्यवार्त्तिकविरोध एवेति चेत्, मैवम् । अयोगवाहपदेन तेषां संग्रहेऽपि विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वाराणामेव तत्रोपदेशप्रयोजनस्योक्तत्वेन यमानां प्रयोजनस्य तत्र कुत्राप्यनुक्तत्वात् तथाऽपि प्रत्याहारविशेषपुरस्कारेणैव तान्नियमसम्पादनार्थकत्वेन तदविरोधाच्च यमानां तत्रोपदेशे तात्पर्याभावनिर्णयात् ।

यत्तूक्तम्—नैव दोषो नैव प्रयोजनमिति भाष्यविरोधः, त्वन्मते यद् घ्नन्तीत्यादौ "यरोऽनुनासिके" इत्यस्य प्रवृत्त्या दोषस्योद्भटत्वादिति, तदप्यसत् । द्विर्वचनविध्येकवाक्यतापन्नयत्वस्यैव तेषु नियतत्वेन सत्यपि यमानां यरन्तर्भावे अनुनासिकत्वादिविध्येकवाक्यतापन्नयत्वस्य बाधाभ्युपगमात् । एवं च यमानां व्यञ्जनपरत्वनियमेन " अनचि च " इत्यस्य तत्र कदाचिदप्यप्रवृत्त्या फलतो यमांशे यत्वादिबाध एव पर्यवस्यतीति सिद्धम् । गुणानामभेदकत्वेऽपि यमानां न तत्तत्कार्यप्रवृत्तिरिति । तस्माद्यमानामयोगवाहत्वप्रतिपादकभाष्यस्य तेषां तत्तत्प्रत्याहारविशेषान्तर्भावप्रयुक्तकार्यानुदाहरणव्याजेन तत्तत्प्रत्याहारानन्तर्भावविधानएव तात्पर्यम् । अन्यथा अन्तर्भावप्रयुक्तकार्याभावे तद्विधानवैयर्थ्यात् । अप्रसक्तस्य च निषेधानर्हत्वात् । प्रसक्तेश्च वर्णान्तरत्वपक्षे वर्णसमाम्नायमध्यानुपदेशेनानुपपन्नत्वात् । ककारादिमध्यएवान्तर्भावः संमतः । तथा सति हि गुणानामभेदकत्वेन खफछठेत्यादिभिस्तत्संग्रहे प्रसक्ते

भवति निषेधोपपत्तिः । तस्मादन्यथाऽनुपपन्नमुक्तभाष्यग्रन्थमेव पुरस्कृत्य वक्ष्यमाणवाक्यानां वर्णान्तरत्वतात्पर्येण व्याख्यानं प्रत्यादेश्यम् ।

एकं ब्रह्मास्त्रमादाय नान्यं गणयतः क्वचित् ।
आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु ॥

इति न्यायात् । तथा हि—स्पर्शा यमा अनुनासिकाः स्वात्परेषु स्पर्शेष्वनुनासिकेषु इति प्रातिशाख्ये स्वपदस्य वर्गाद्यक्षरचतुष्टयपरत्वात् तत्परेष्वनुनासिकस्पर्शे वर्गान्त्यवर्णेषु अनुनासिकत्वविशिष्टाः स्पर्शाः प्रथमाद्याः यमसंज्ञा भवन्तीत्यर्थस्य स्पष्टतया स्पर्शसंज्ञया च कुत्र वर्णान्तरत्वे तात्पर्यम् । एतेन "प्रदोध्रुवच्छ्वशुषु" इत्यत्रोष्मसंज्ञकशकारादिषूपस्थानीयस्य छकारादेर्यमवारणाय प्रवृत्तेन "स्पर्शस्योष्मप्रकृतेः परस्ताद्यमापत्तिः" इतिसूत्रे परस्ताच्छब्ददर्शनाद्वर्णान्तरत्वमित्यपास्तम् । परस्ताच्छब्देनागमत्वमात्रलाभेऽपि वर्णान्तरत्वस्य लाभे उक्तिसम्भवाभावात् ।

यदपि नारदीयाशिक्षायाम्—

अनन्त्यश्च भवेत्पूर्वो ह्यन्त्यश्च परतो यदि ।
तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोः ॥

सवर्णः सदृशः । द्वित्वमपि विवक्षितम् । यज्ञ इत्यादौ जकारद्वयसत्त्वेऽपि "ज्मया अत्र वसवो रन्तिदेवा" इत्यादौ जकारद्वयाभावादिति तद्व्याख्यातार इति, तदप्यकिञ्चित्करम् । आगमे आगमिवृत्तिवर्णत्वव्याप्यजात्यभाववत्त्वरूपस्य वर्णान्तरत्वस्य ततोऽनवगमात् सावर्ण्यस्य गुणभेदेनैव निर्वाहात् । औदव्रजिसूत्रेऽपि गुणत्वस्यैव लाभात् । "अशरीरं यमं प्राहुः" इति गौतमशिक्षायाश्चार्थस्तैरेवोक्तः । अशरीरं स्वरभक्त्यादिवद्-

व्यञ्जकलिपिविशेषशून्यम् । लक्षणवशेनैव तदीयस्थलविशेषनिश्चयसम्भवाल्लिपिसम्प्रदायप्रवर्त्तकाचार्यैः स्वरभक्तेरिव यमस्यापि व्यञ्जकीभूता लिपिर्न कल्पितेति यावत् । "रलयोरूष्मणि परे मध्ये स्वरभक्तिः" इति शिक्षादिप्रसिद्धेः ।

यत्र तु नैवंविधलक्षणेन स्थलावधारणं कर्त्तुं शक्यते, तत्रागत्या लिप्यन्तरं प्रवर्त्तितम्, यथा विसर्गादाविति । न त्वेतावता वर्णान्तरत्वासिद्धिः । अन्वयदृष्टान्ते वर्णान्तरत्वेऽपि व्यतिरेकदृष्टान्ते तदभावात् । अन्यथा तदनुक्त्या शिक्षादौ विभागस्य न्यूनत्वापत्तेः ।

यदपि पाणिनीयाशिक्षायाम्—

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥
स्वरा विंशतिरेकश्च स्पर्शाः स्युः पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारविसर्गौ च ᳵकᳵपौ चापि पराश्रयौ ।
दुस्पृष्टश्चेति विज्ञेया ऌकारः प्लुत एव च ॥

तत्र अइउऋवर्णानां ह्रस्वदीर्घप्लुतभेदात् द्वादश, ऌकारस्य ह्रस्व एव, एचां दीर्घप्लुतभेदादष्टाविति अचामेकविंशतिः । स्पर्शाः कादयो मावसानाः । यरलवशषसहेत्यष्टौ । यमाश्चत्वारः । प्रथमत्वद्वितीयत्वतृतीयत्वचतुर्थत्वोपाधिभेदात् । अनुस्वारादयश्चत्वारः स्पष्टाः । दुस्पृष्टस्तु बाह्वृच्ये प्रसिद्धः । एवं त्रिषष्टिः, ऌकारस्य प्लुतत्वसम्भवात्तेन सह चतुःषष्टिरिति ।

अत्र यमानां पृथग्गणनात् स्पष्टमेव वर्णान्तरत्वमिति, तदप्यसत् । न ह्यत्र एकसंख्येयवृत्तिवर्णत्वव्याप्यजात्यभाववत्त्वं संख्येयान्तरस्य नियतम् । ह्रस्वाद्यकारादौ तादृश्या अत्वादिजातेः

सत्त्वात् । तथा च कुत्रचिज्जातिभेदेन कुत्रचिद् गुणभेदेन गणनस्यात्र दर्शनात् यमांशेऽपि कादिवृत्तिजात्यभावे प्रामाण्यमस्त्येवेति वक्तुमशक्यत्वात् ।

न चैवं यादीनामष्टत्वानुपपत्तिः, यवलानां गुणभेदेन द्वैविध्यादिति वाच्यम् । तत्रोभयसाधारणजातेरेव विभाजकत्वेनाभिमतत्वात् । स्वतन्त्रेच्छस्य महर्षेर्नियोगपर्यनुयोगानर्हत्वात् । तात्पर्यस्य चोक्तरीत्या विघटितत्वात् । तस्माद्विवरणमतमेव रमणीयमिति सूक्ष्ममीक्षणीयम् ।

तुल्यास्यप्रयत्नं सवर्णम् ९।

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्युभयं ययोर्वर्णयोस्तुल्यं तयोः परस्परं सवर्णसंज्ञा स्यात् । प्रदेशाः "अकः सवर्णे दीर्घः" इत्यादयः । उत्तरपदे द्वन्द्वगर्भः, तत्पुरुषगर्भः, पूर्वपदे तत्पुरुषगर्भः, त्रिपदो वा बहुव्रीहिरिति चत्वारोऽत्र पक्षाः । तत्राद्यो व्याख्यातः । आस्यं च प्रयत्नश्च आस्यप्रयत्नौ तौ तुल्यावस्येत्यर्थस्योक्तेः । आस्ये प्रयत्न आस्यप्रयत्नः । न च "अमूर्द्धमस्तकात्स्वाङ्गादकामे" इति सप्तम्या अलुगापत्तिः । तद्धितान्तस्यास्यशब्दस्य स्वाङ्गमात्रवाचित्वाभावात् । स तुल्योऽस्येति द्वितीयः । तुल्य आस्ये तुल्यास्यः, मयूरव्यंसकादित्वात्साधुः । तादृशः प्रयत्नो यस्येति तृतीयः । तुल्य आस्ये प्रयत्नो यस्येति चतुर्थः । अनेकपदोपादानसामर्थ्येन त्रिपदस्यापि बहुव्रीहेरङ्गीकारात् । तुल्यशब्दस्य तुलया संमित इति व्युत्पत्तावपि सदृशमात्रे रूढिः, प्रवीणादिवत् ।

आस्यशब्दे च नानाविधा व्युत्पत्तिः। अस्यन्ते उच्चार्यन्ते वर्णा अनेनेत्यास्यम्। बाहुलकात्करणे ण्यत्। यद्वा—आस्यन्दतेऽन्नं प्राप्य द्रवीभवतीत्यास्यम्। "अन्येष्वपि" इति डः। अथ वा अन्नेन द्रवीक्रियते इत्यास्यम्। अन्तर्भावितण्यर्थात्कर्मणि डः।

स्यादेतत्। एवमनियतावयवार्थप्रदर्शनपरेण भाष्येणास्यशब्दस्य मुखे रूढिर्विवक्षिता। तथा च रूढेर्बलवत्त्वाद् अवयवार्थमात्रेण ताल्वादीनां ग्रहणं न सम्भवति। "लौकिकमास्यम् ओष्ठात्प्रभृति प्राक्काकलकात्" इति भाष्योक्तेः। एवं च तदुपादानं व्यर्थम्। सर्ववर्णानामास्यएव निष्पत्तेः। न च नासिक्येषु व्यभिचारः। नासिका हि न बाह्या वर्णोत्पत्तौ निमित्तम्, तत्र जिह्वाग्रादिसंयोगाभावात्, किं तर्हि आस्यान्तश्चर्म विततमस्ति, तत्सम्बद्धा रेखा नासिका, तस्यां वाय्वभिघाताद्वर्णोत्पत्तिरिति सिद्धान्तात्। विसर्गस्य कैश्चिदुरःस्थानस्वीकारेऽपि तस्य सावर्ण्याभावेऽपि दोषाभावात्। प्रयत्नमात्रसाम्यविवक्षायां च जबगडदानां स्पृष्टप्रयत्नसाम्यात्सावर्ण्यापत्तिः। भाष्ये शकारस्याप्युपादानं तु संपातायातम्। विवृतत्वेन प्रयत्नभेदात्। ततश्च ऊर्ग्ज इत्यादौ "झरो झरि सवर्णे" इति लोपः स्यात्। ऊर्गन्नम्। "पञ्चम्यामजातौ" इति डः। एवं प्राप्ते न्यासभेदेन सिद्धान्तमाह वार्त्तिककारः—

सिद्धन्त्वास्ये तुल्यदेशप्रयत्नं सवर्णम् इति।

अस्यार्थः—आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञाः। उक्तस्थले तु देशभेदान्नातिव्याप्तिः। आस्येति प्रयत्नविशेषणार्थम्। तेन बाह्यप्रयत्नव्यावृत्तिः। तथा च देशांशे तस्य वैयर्थ्येऽपि न क्षतिः। बाह्यप्रयत्नाश्च विवारादयो महाप्राणान्ता अष्टौ भाष्ये कण्ठोक्ताः।

नन्वेवमप्यकारस्य सवर्णसंज्ञा न स्यात्, काकलकस्याधस्तादुपजत्रुस्थानमवर्णस्येति कैश्चिदङ्गीकारात्, तस्य चोक्तास्यबहिर्भावात् । मैवम् । सर्वमेव मुखमवर्णनिष्पत्तौ व्याप्रियत इत्यभ्युपगमात् । न च तथाऽपि तस्यास्यमेव देशो न त्वास्ये देश इत्युक्तानुपपत्तिसाम्यम् । व्यपदेशिवद्भावेन सिद्धेः । आस्यशब्दस्य सर्वावस्थाविशिष्टास्यपरत्वात् । देशशब्दस्य तु अवर्णोत्पत्तिहेत्ववस्थाविशिष्टतत्परत्वादिति ।

भाष्यकारास्त्वाहुः— आस्ये भवमास्यम्, शरीरावयवाद्यत् । "हलो यमाम्" इति यलोपः । न चाल्लोपस्य स्थानिवत्त्वम् । यलोपे तन्निषेधात् । तथा चास्यपदादेव स्थानलाभे सूत्रभङ्गो न युक्तः । न च बाह्यप्रयत्नभेदे सावर्ण्यानापत्तिः । प्रारम्भो यत्नस्य प्रयत्न इति व्युत्पत्त्यैव तद्व्यावृत्तेः । बाह्यानां वर्णोत्पत्तिपश्चाद्भावित्वस्य वक्ष्यमाणत्वात् ।

अस्तु वा प्रयत्नपदं यथाश्रुतमेव । बाह्यभेदेऽप्याभ्यन्तरसाम्येन सावर्ण्यसिद्धेः । यावत्प्रयत्नसाम्यविवक्षायां प्रयोजनाभावात् । स्थानैक्ये सति यत्किञ्चित्प्रयत्नसाम्यस्यैवानतिप्रसक्तत्वात् । न चैवमपि अवर्णस्य एङोश्च सावर्ण्यापत्तिः । पांसूदकवद्भागज्ञानाभावात् । न चैचोस्तेन सावर्ण्यापत्तिः, तत्र भागविवेकस्य सुस्थत्वादिति वाच्यम् । तयोरवर्णस्य विवृततरत्वात् एङामैचां च स्थानभेदादेव तदनापत्तेः । "एओङ्" इत्यादिसूत्रे पृथगनुबन्धसामर्थ्यादैचोः पृथङ्निर्देशाच्चेति तत्रैवोक्तम् । एतेन ऐचावपि व्याख्यातौ । स्थानभेदाच्च ।

न च तथाऽप्युदात्तानुदात्तानां सावर्ण्यं न स्यात्, प्रयत्नभेदादिति वाच्यम् । स्वरूपमात्रसतां गुणानामभेदकत्वमिति स्वीकारात् ।

यत्तु भाष्यकारस्य प्रौढिमात्रमेतत् । तथा हि— एजवयवावर्णेन सह सावर्ण्यमापाद्यतउत एज्भिरेव । नाद्यः। गव्यं नाव्यमित्यत्र "यस्येति च" इति लोपापत्तिरितिकैयटविवरणादिग्रन्थविरोधात् । उत्तरभागेन व्यवधानात् । कर्त्तॄणामित्यादौ णत्वार्थं "व्यवायेऽपि" इति योगविभागस्य भाष्यकारैरेवोक्तत्वात् । न चोत्तरभाग एवावर्णसदृश इति वाच्यम् । अग्ने एहीत्यादौ पूर्वरूपस्य भाष्यएवापादितत्वात् तद्विरोधात् । जात्यन्तरत्वस्यैव तत्र सिद्धान्तितत्वाच्च । नान्त्यः । प्रश्लिष्टावर्णावित्यादिहेत्वनुपपत्तेः । हेत्वन्तरस्यैव वाच्यत्वात् । अत एव इवर्णोवर्णयोरेचश्च न सावर्ण्यमिति ।

तत्रेदं वाच्यम्— किमवयवस्य सावर्ण्यमिति शङ्कैवात्रानवकाशा । अवर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोतीति स्पष्टमेव भाष्ये उक्तत्वात् । ननु सन्ध्यक्षरेषु प्रथमभागस्याकारेण सादृश्यात्सवर्णसंज्ञाप्राप्तिरिति कैयटोक्तायामापातनिकायां तथा प्रतीयतइति चेन्न । तद्द्वाराऽप्यवर्णस्य सादृश्यमस्तीति तद्भावमुक्त्वा नाव्यमित्यत्र यस्येतिलोपापत्तेः तदुक्ताद्यविवरणएव सङ्गमितत्वात् । तथा च कैयटाद्युक्तयस्येतिलोपप्रसङ्गविरोधेन भाष्यस्य प्रौढिवादत्वमुपपादयता कैयटोक्तापातनिकाया अवर्णपरत्वस्य शङ्कितुमप्यशक्यत्वात् । प्रश्लिष्टावर्णाविति हेत्वनुपपत्तिस्तु एङंशे ऐजंशे वा । नान्त्यः। एङोश्चेति प्रक्रम्यैव तदुक्तेः । ऐजंशे विवृततरावर्णावेताविति हेत्वन्तरस्यैवोक्तत्वात् । नाद्यः । तत्रावयवस्य पृथक्त्वेन ग्रहो नास्तीति हेतोः सुस्थत्वात् । ऐचोस्तु स्फुटोऽकारस्य प्रतिभासोऽस्तीति प्रत्याहाराह्निके भाष्यकैयटयोरेव स्थितत्वात् । एतेन तदवयवाकारस्यापि सावर्ण्यापत्तिर्निरस्ता । एवमिकारोकारयोः

रपीति बोध्यम् । तथा च तत्र भाष्यम्—

यदत्रावर्णं विवृततरं तदन्यस्मादवर्णात् ये अपीवर्णोवर्णे विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्यामिति ।

कैयटेनाप्युक्तम्— तदेवमाकारादिस्थस्यावयवस्य भेदेनाग्रहणादग्रहणम् , सन्ध्यक्षरस्थस्य त्वसावर्ण्यात् , ऋकारस्थस्तु भेदेन प्रतिभासाद् गृह्यतइति नुडादिसिद्धिरिति ।

आकारादीत्यादिपदमेङ्परम् । सन्ध्यक्षरपदमैच्परम् । गृह्यते रेफग्रहणेनेत्यर्थः ।

नन्वेवमवयवीभूताकारस्य सावर्ण्यापत्तिपरिहारेऽपि एचां तदापत्तौ समाधानानुक्तितादवस्थ्यमेवेति चेद्,मैवम्।तर्हि एचाम् अकारेण सावर्ण्यापत्तिरेव नास्तीत्युच्यताम्, कृतं समाधानानुक्त्युद्भावनेन । अवयवसावर्ण्यद्वारा तेषां सावर्ण्यापत्तिरस्तीति चेत्, तर्हि तत्परिहारद्वारा तेषां तत्परिहार इति सुस्थम् । तदेवं द्वन्द्वगर्भबहुव्रीहिपक्षो व्याख्यातः ।

ननूत्तरास्मिन्पक्षत्रये तुल्यपदस्य आस्यपदेन समन्वयाभावाद्भिन्नस्थानानामपि प्रयत्नसाम्यात्सावर्ण्यं स्यात्, मैवम् । तद्धितान्तास्यपदोपादानसामर्थ्यादास्यइत्येकत्वविवक्षायामेकस्मिन्नेव स्थाने ययोस्तुल्यः प्रयत्न इत्यर्थलाभात् । अन्यथा स्थानानामास्यवृत्तित्वनियमादास्यपदेनैव सर्वस्थानलाभे स्थानभेदेऽपि प्रयत्नैक्यमित्यर्थस्य सिद्धेः ।

नन्वेवमपि अन्येन सह तुल्यस्थानप्रयत्नस्यान्येन सावर्ण्यं स्यात्, प्रतियोगिविशेषस्यानुपात्तत्वात्, तद्वारणाय "तस्य" इति वक्तव्यम्, यो यस्य तुल्यस्थानप्रयत्नः स तस्य सवर्ण इत्यर्थलाभादुक्तातिप्रसङ्गसमाधानात्, मैवम् । तथा सति सवर्णसंज्ञाविधानवैयर्थ्यात् । सर्वेण सह सर्वस्य सावर्ण्यप्रसङ्गे च

व्यावर्त्यालाभात् । न च रेफोष्मणां किञ्चिन्निरूपितसावर्ण्याभावात्तन्निवृत्त्यर्थतया सार्थक्यम् । स्वनिरूपितसावर्ण्यस्य तत्रापि स्वीकारात् । रेफोष्मणां सवर्णा न सन्तीति प्रवादस्य विजातीयसवर्णाभावपरत्वात् ।

वस्तुतस्तु तुल्यशब्दस्य ससम्बन्धिकत्वादेवोक्तार्थसिद्धिः । "पिता शुश्रूषितव्यः" इत्यादौ यन्निरूपितं पितृत्वं तस्यैव शुश्रूषकत्वलाभात् । अत एव "तुल्याय कन्या देया" इत्यादौ यज्जात्यवच्छिन्ननिरूपितकन्यात्वं तज्जात्या तुल्यत्वं सम्प्रदानस्य लभ्यते ।

स्थानग्रहणं किम्, कचटतपानां मा भूत् । स्पृष्टप्रयत्नस्य तुल्यत्वात् । अन्यथा तर्प्तेत्यत्र "झरो झरि सवर्णे" इति पलोपः स्यात् । प्रयत्नग्रहणं किम्, चकारशकारयोर्मा भूत् । तालुस्थानस्य तुल्यत्वात् । स्पृष्टविवृतप्रयत्नभेदात्तु नातिव्याप्तिः । अन्यथा वाकुश्च्योततीत्यत्र पूर्वसूत्रेण शकारलोपः स्यात् । अत एवाभ्यन्तरत्वविशेषणस्यापि सार्थक्यम् । अन्यथा श्वासाघोषविवाराख्यबाह्यप्रयत्नत्रयसादृश्यसत्त्वादतिव्याप्तितादवस्थ्यात् । सर्वप्रयत्नसाम्यविवक्षायां कङयोरपि बाह्यप्रयत्नभेदादङ्कित इत्यादौ परसवर्णाद्यभावापत्त्या तस्याश्रयितुमशक्यत्वात् । चकारशकारयोरल्पप्राणमहाप्राणरूपबाह्यप्रयत्नभेदस्याकिञ्चित्करत्वात् ।

किं च "झरो झरि" इत्येवोक्ते "हलो यमां यमि" इतिवत् यथासंख्यापत्तौ शिण्ढीत्यादौ डलोपो न स्यादिति तत्र सवर्णपदग्रहणं कृतम् । यावत्प्रयत्नसाम्यविवक्षायां च डढयोरप्यल्पप्राणमहाप्राणरूपप्रयत्नभेदेन सावर्ण्यानुपपत्त्या डलोपाभावतादवस्थ्ये सवर्णपदमपि व्यर्थं स्यात् ।

वस्तुतस्तु अभित्था इत्यादौ सकारलोपार्थतया तत्र सवर्ण-

पदं सार्थकमेव। सकारथकारयोर्महाप्राणत्वेनापि साम्यात् । किन्तु निश्छद्मम् निष्ठुरम् निस्स्थानम् मधुलिट् स्थानम् इत्यादावपि लोपः स्यादिति बोध्यम् ।

अथ तथाऽपि ताद्धितान्तास्यशब्दबलादेव स्थानप्रयत्नोभयलाभसम्भवात् प्रयत्नपदं व्यर्थम्, ताल्वादिस्थानवत् प्रयत्नस्याप्यास्यभवत्वादिति चेन्न । प्रत्येकव्यापारानिरासार्थमुभयोरुपादानात् । तेनोभयसाम्ये सत्येव सावर्ण्यम् । न त्वन्यतरमात्रसाम्येऽपीति न दोषः ।

अथ स्थानप्रयत्नविवेकः— अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु। ऋटुरषाणां मूर्द्धा। लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य ।

केचित्तु वर्गपञ्चमानां स्वस्ववर्गापेक्षया नासिकास्थानमधिकमित्याहुः । अन्ये तु—

अनुस्वारयमानां च नासिकास्थानमिष्यते ।

इति पाणिनीयशिक्षायां पञ्चमानां नासिकास्थानानुक्तेर्न तथेत्याहुः । तदग्रे विचार्यम् ।

यत्नो द्विधा— आभ्यन्तरो बाह्यश्च । आद्यश्चतुर्द्धा । स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् । स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तस्थानाम् । विवृतमूष्मणां स्वराणां च। ह्रस्वस्यावर्णस्य प्रयोगदशायां संवृतत्वम्, प्रक्रियादशायां तु विवृतत्वं प्रतिज्ञायतइति प्रागुक्तम् । आभ्यन्तरत्वं चैषां वर्णोत्पत्तिपूर्वभावित्वात् । तथा हि— नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणवायुरूर्द्ध्वमाक्रामन्नुरःप्रभृतीनामन्यतमे स्थाने प्रयत्नेन विधार्यमाणः स्थान-

माहन्ति, ततो वर्णस्य तद्व्यञ्जकध्वनेर्वोत्पत्तिः । तत्र वर्णोत्पत्तेः पूर्वं जिह्वाग्रोपाग्रमध्यमूलानां तत्तत्स्थानैस्ताल्वादिभिः सह यदा सम्यक् स्पर्शः तदा स्पृष्टत्वम्, ईषत्स्पर्शे ईषत्स्पृष्टत्वम्, सामीप्यमात्रे संवृतत्वम्, दूरत्वे तु विवृतत्वमिति । इदं चात्र तत्त्वम्—

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥
सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।

वर्णाञ्जनयते, इत्यादिशास्त्रपर्यालोचनया अवच्छेदकतासम्बन्धेन वर्णं प्रति तादात्म्यसम्बन्धेन हेतुत्वं स्थानत्वमिति लभ्यते । अवच्छेदकता च कण्ठे अकार इत्याद्यभियुक्तप्रतीतिनियामकः स्वरूपसम्बन्धविशेषः, भेर्यां शब्द इत्यादिवत् । न हि तिष्ठन्त्यस्मिन्स्थानमिति व्युत्पत्त्या तदतिरिक्तः सम्बन्धो वक्तुं शक्यः । उत्पत्तिपक्षे वर्णानामाकाशसमवेतत्वात्, अभिव्यक्तिपक्षे च विभुत्वादवृत्तित्वात् । एतेन "आस्ये तुल्यदेशप्रयत्नम्" इत्यधिकरणत्वबाधकदेशपदगर्भं वार्त्तिकमपि व्याख्यातम् ।

करणपदं च किं पुनरास्ये भवं स्थानं करणं चेति भाष्यमुपादाय स्पृष्टतादिजिह्वाग्रमध्यमूलानि वेति कैयटेन व्याख्यातम् । तत्राद्यं स्पृष्टप्रयत्नेत्यादि व्यवहाराभिप्रायम् । न तु तात्त्विकम् । तथाहि— जिह्वाग्रादिप्रतियोगिकताल्वादिसंयोगस्य स्पृष्टादिपदात्प्रतीयमानस्य करणत्वमनुपपन्नम् । व्यापाररहितत्वात् । न ह्युक्तसंयोगेन किञ्चित् जनयित्वा वर्णा जन्यन्ते । मानाभावात् । एतेन तदभिव्यञ्जको ध्वनिरपि व्याख्यातः । जिह्वाग्रादीनां तु यथोक्तसंयोगं व्यापारमाश्रित्य युक्तमेव करणत्वम् । आत्ममनःसंयोगेनात्मनो ज्ञानकरणत्वस्य, चक्षुर्घटादिसंयोगेन च-

क्षुरादीनां चाक्षुषादिकरणत्वस्य च प्रसिद्धत्वात् । अत एव कण्ठाद्यभिघातस्य कत्वं कसाक्षात्कारत्वं वा कार्यतावच्छेदकमिति तान्त्रिकाणामुद्घोषः । अत्रावच्छेदकता कार्यतावच्छेदकः सम्बन्धः, समवायस्तु कारणतावच्छेदकः । भवति चावच्छेदकतया वर्णवति ताल्वादौ समवायेन जिह्वाग्रादिसंयोगः ।

एवं संयोगसम्बन्धेन जिह्वाग्रादीनां हेतुत्वम् । न चैवं करणैक्यापत्तिः । यद्वर्णोत्पत्तौ यत् स्थानमवच्छेदकं तदनुयोगिकजिह्वाग्रादिसंयोगस्य तत्र व्यापारतया तद्भेदेन करणतानां भेदात् । एवं च यद्येवं प्रयत्नग्रहणं न कर्त्तव्यम्, तस्याप्यास्यभवत्वात्, सत्यमेतत्, प्रत्येकं तु व्यापारनिरासार्थमुभयोरुपादानम्, तेन द्वयोस्तुल्यत्वे सवर्णसंज्ञा भवतीतिग्रन्थोत्थानमपि सङ्गच्छते । न ह्युक्तसंयोगस्यास्यभवत्वम् । आस्यसमवायनिरूपकत्वरूपस्य तस्य तदवयवे ताल्वादावेव सम्भवात् । उक्तसंयोगस्य त्वास्यावयवे एव समवेतत्वात् ।

यद्यपि जिह्वाग्रादीनामपि न साक्षादास्यसमवायनिरूपकत्वम्, जिह्वयैव सह तेषामवयवावयविभावात्, तथाऽप्यास्यनिरूपितसमवायनिरूपकत्वमुभयसाधारणं वाच्यम् । आस्यप्रतियोगिको यः समवायस्तदनुयोगित्वं ताल्वादौ, तदनुयोगिजिह्वाप्रतियोगिकसमवायानुयोगित्वं च जिह्वाग्रादाविति । न चैतत्पूर्वोक्तसंयोगे । जिह्वाग्रप्रतियोगिकसंयोगस्य अधिकस्य दानं विना तत्सङ्ग्रहाभावात् । यदि तु दन्तानां शरीरानवयवत्वात्तदसङ्ग्रह इति विभाव्यते, तदाऽऽस्यप्रतियोगिकेत्यत्र समवायस्थाने साक्षात्सम्बन्धेति वाच्यम् । संयोगसमवाययोरेव तथात्वात् । पक्षान्तरेऽप्येवमेव वाच्यत्वाच्च । तस्माद्यथोक्तमास्यभवत्वं तद्धितान्तस्य आस्यपदस्य लक्ष्यतावच्छेदकमिति शङ्काऽर्थः ।

प्रत्येकसाम्ये सवर्णत्ववारणाय पृथक्प्रयत्नग्रहणावश्यकत्वे च आस्यपदस्य न यथोक्तं लक्ष्यतावच्छेकम्, मानाभावात्, किंतु स्थानमात्रसाधारणम् । संग्राह्यानुरोधेनैव वृत्तिस्वीकारात् ।

वस्तुतस्तु आस्यसमवायनिरूपकत्वं लक्ष्यतावच्छेदकसम्बन्धः । लक्ष्यतावच्छेदकं तु अवच्छेदकतासंबन्धावच्छिन्नवर्णनिष्ठकार्यत्वप्रतियोगिककारणताशालित्वमेव । अन्यथा आस्यरूपादौ तदवयवान्तरे च तस्यातिप्रसक्तत्वात् ।

प्रकृतमनुसरामः । बाह्यप्रयत्नास्त्वेकादश—विवारः संवारः श्वासो नादो घोषः अघोषः अल्पप्राणो महाप्राण उदात्तः अनुदात्तः स्वरितश्चेति । एते च वर्णोत्पत्त्यनन्तरं मूर्द्ध्नि प्रतिघातान्निवृत्ते प्राणे जायन्त इति बाह्या उच्यन्ते । वायुना कण्ठे अभिहन्यमाने गलबिलस्य विकासाद्विवारः । तत्संकोचात् संवारः । अत एव दूरसमीपावस्थानात्मकाभ्यामाभ्यन्तरविवृतसंवृताभ्यामनयोर्भेदः । अन्येषां स्वरूपमाह न्यासकारः—

संवृते गलबिलेऽव्यक्तः शब्दो नादः, विवृते श्वासः । उपरिवर्त्तिनौ श्वासनादावनुप्रदानमिति केचिदाचक्षते । वर्णनिष्पत्तेरनु पश्चात्प्रदीयते इत्यनुप्रदानम् ।

अन्ये तु ब्रुवते—अनुप्रदानमनुस्वानम् । घण्टानिर्ह्रादवत्स्थानाभिघातजे ध्वनौ नादोऽनुप्रतीयते, तदा नादध्वनिसङ्गाद् घोषो जायते । यदा श्वासोऽनुप्रदीयते, तदा श्वासध्वनिसङ्गादघोषः । महति वायौ महाप्राणः । अल्पे वायावल्पप्राणः । यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति, तदा गात्रस्य निग्रहः, कण्ठविवरस्य चाणुत्वम्, स्वरस्य च वायोस्तीव्रगतित्वाद्रौक्ष्यं भवति, तमुदात्तमाचक्षते । यदा तु मन्दः प्रयत्नो भवति तदा गात्रस्य स्रंसनम्, कण्ठबिलस्य महत्त्वम्, स्वरस्य

वायोर्मन्दगतित्वात् स्निग्धता भवति, तमनुदात्तमाचक्षते । उदात्तानुदात्तसंनिकर्षात्स्वरितगुण इति ।

एषाञ्च सवर्णसंज्ञायामनुपयोगेऽपि आभ्यन्तरत्वविशेषणव्यावर्त्यतयोपस्थितत्वादान्तरतम्यपरीक्षायामुपयोगाच्चात्र व्युत्पादनमिति न दोषः । तदयं संग्रहः—

खरः ≍क≍पौ विसर्गश्च श्वासाघोषविवारकाः ।
हानुस्वारझशन्तस्था घोषवन्नादसंवृताः ॥
जश्चयोऽल्पासवोऽन्तस्था महाप्राणाः परेऽखिलाः ।
पञ्चमा जश्वदेव स्युरनुनासिकताऽधिकाः ॥

अयमर्थः—वर्गाणां प्रथमा द्वितीयाः शषसाश्च खरः, जिह्वामूलीयोपध्मानीया विसर्गाश्च श्वासाघोषविवारप्रयत्नाः । हकारानुस्वारौ वर्गाणां तृतीयचतुर्थां यरलवाश्च घोषनादसंवारप्रयत्नाः । वर्गाणां तृतीयप्रथमा यरलवाश्चाल्पप्राणाः । अन्ये सर्वे महाप्राणाः । वर्गपञ्चमास्तु तत्तद्वर्गतृतीयतुल्यप्रयत्नाः । अनुनासिकत्वं पुनरेषामधिको गुण इति ।

स्यादेतत् । उदात्तादीनां त्रयाणां कथं बाह्यत्वम् । तत्र विवारादीनामष्टानामेव भाष्ये पठितत्वात् । उदात्तादीनां सावर्ण्यप्राप्त्यभावमाशङ्क्य गुणानामभेदकत्वेन परिहृतत्वाच्च । उदात्तादीनां बाह्यत्वे च तत्साम्याभावेन सावर्ण्याभावस्यापादयितुमशक्यत्वात् । अभेदकत्वपक्षानुसारवैयर्थ्याच्चेति चेन्न । यद्यप्युदात्तादीनां बाह्यत्वमुक्तम्, तथाऽप्यभ्युपेत्याभ्यन्तरत्वशङ्केति विवरणकारैरेवोक्तत्वात् । "विवारादय एकादश प्रयत्नाः" इति कैयटोक्तेश्चेति दिक् ।

अत्र केचित्—आभ्यन्तरत्वमभ्युपगम्यापि सावर्ण्याभावशङ्कापरभाष्यमनुपपन्नमेव । उदात्तादिरूपप्रयत्नभेदेऽपि विवृतरूप-

तदैक्यात्सावर्ण्योपपत्तेः । यावत्प्रयत्नैक्यविवक्षायां च बाह्यप्रयत्नसाम्येऽप्याभ्यन्तरप्रयत्नभेदे सावर्ण्यं मा भूदित्येतदर्थमाभ्यन्तरग्रहणमित्याकरविरोधात् । आपत्तिस्थले यावत्प्रयत्नैक्यविरहात्तदनुपपत्तेः । तदर्थकप्रशब्दवैयर्थ्याच्च । स्थानेऽन्तरतमसूत्रस्थभाष्यादिबलात् शकारादिवद्वर्गद्वितीयचतुर्थानामप्यूष्मत्वप्रतीत्या विवृतमूष्मणामिति वाक्येऽपि तद्ग्रहणस्य दुर्वारतया स्पर्शविवृतोभयप्रयत्नानां वर्गद्वितीयचतुर्थानां केवलस्पृष्टप्रयत्नान् वर्गप्रथमतृतीयान् अपेक्ष्य प्रयत्नाधिक्येन सावर्ण्याभावे "चोः कुः" इत्यादौ तद्ग्रहणानुपपत्तेश्च । ककाराद्यपेक्षया ङकारादीनां नासिकास्थानाधिक्यात्सावर्ण्यानापत्तेश्च । प्रयत्नवत् स्थानेऽपि यावत्त्वस्य विवक्षणीयत्वापत्तेः । वैषम्ये बीजाभावात् ।

अस्मन्मते तु यावत्त्वविवक्षायां प्रमाणाभावान्नासिकास्थानसाम्येन ञमङणनानां परस्परं सावर्ण्ये त्वन्नयसीत्यादौ पर्यायेण पक्षे "वा पदान्तस्य" इति ञादयः प्रवर्त्तन्ते इति ।

अत्रेदं वक्तव्यम्— अयं ह्याकराभिप्रायः । आभ्यन्तरत्वमनन्तर्भाव्य प्रयत्नसाम्याविवक्षायां यो वर्णो यद्वर्णसमानस्थानकत्वे सति यद्वर्णसमानप्रयत्नकः स तस्य सवर्ण इति फलितम् ।

तत्र प्रयत्ने यावत्त्वं विवक्षितं न वा । नाद्यः । प्रथमतृतीयानां द्वितीयचतुर्थानां च सावर्ण्यानुपपत्तेः । अल्पप्राणमहाप्राणत्वाभ्यां भेदात् । नान्त्यः । खकारहकारादेः सावर्ण्यप्रसङ्गात् । कण्ठ्यत्वान्महाप्राणत्वाच्च । एवमन्यत्राप्यापाद्यम् । यदि त्वाभ्यन्तरप्रयत्नसाम्यमपि निवेश्यम्, ततस्तेनैवानतिप्रसङ्गे बाह्यप्रयत्नसाम्यनिवेश एव व्यर्थोऽप्रसङ्गसम्पादकश्चेति । एवं चास्यभवत्त्वमात्रेण बाह्यव्यावृत्तिविरहादाभ्यन्तरमात्रलाभाय प्रशब्दविशिष्टयत्नपदोपादानमावश्यकमिति ।

आस्यपदं स्थानमात्रपरम् । प्रयत्नपरत्वे प्रयोजनाभावात् । तथा च बाह्यप्रयत्नसाम्यस्य सावर्ण्यप्रयोजकत्वं विकल्प्य दूषयत आकरस्य प्रयत्ने यावत्त्वाविवक्षायां तद्विरहे वा तात्पर्याभावात् । उदात्तादीनामाभ्यन्तरत्वे तद्भेदेन सावर्ण्याभावशङ्कायास्तद्विरुद्धत्वात् ।

ननु तथाऽपि सिद्धान्ते आभ्यन्तरप्रयत्नस्यैव सवर्णसंज्ञोपयोगेऽपि तत्र यावत्त्वविवक्षणं किमर्थम्, येनोदात्तानुदात्तादीनां सावर्ण्याभावशङ्का स्यात्, तद्वर्णसमानस्थानत्वे तद्वर्णवृत्त्याभ्यन्तरप्रयत्नवत्त्वे च सति तद्वर्णवृत्त्याभ्यन्तरप्रयत्नान्तरवतो व्यावर्त्यवर्णस्याभावात्, उदात्तानुदात्तादीनां तु सावर्ण्यस्येष्टतया व्यावर्त्यत्वायोगात्, इति चेन्न । देवदत्तयज्ञदत्तौ तुल्यधनावित्यादावसति बाधकेऽन्यूनानतिरिक्तत्वस्यैव धनादौ प्रतीत्या तस्यौत्सर्गिकतया विवक्षानधीनत्वात् । राजमन्त्रिणौ तुल्यावित्यादौ तु प्रत्यक्षादेर्बाधकत्वात् । अत एवोक्तं भाष्ये—

किं सति भेदे, सतीत्याह । सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम् । कुत एतत्, भेदाधिष्ठाना हि सवर्णसंज्ञा । यदि हि यत्र सर्वं समानं तत्र स्यात् सवर्णसंज्ञाविधानमनर्थकं स्यात् इति ।

अस्य ह्ययमर्थः— आस्यपदेन बाह्यप्रयत्नस्यापि संग्रहे यावद्बाह्याभ्यन्तरप्रयत्नसाम्यं सवर्णसंज्ञानिमित्तम् इति लभ्येत, ततश्च स्वस्यैव स्वसावर्ण्यं स्यान्न तु वर्णान्तरस्येति संज्ञावैयर्थ्यम् । तत्परिहाराय विधानसामर्थ्यादौत्सर्गिकार्थत्याग इति ।

अत एव सति सङ्कोचे किञ्चिन्मात्रसाम्येऽपि स्यादित्याशङ्कापरः "यदि तर्हि सति भेदे किञ्चित् समानमिति कृत्वा सवर्णसंज्ञा भविष्यति शकारच्छकारयोः षकारठकारयोः सकारथकारयोः सवर्णसंज्ञा प्राप्नोति, एतेषां हि सर्वमन्यत्

समानं करणवर्जम्" इति ग्रन्थः सङ्गच्छते। श्वासाघोषविवारमहाप्राणरूपबाह्यप्रयत्नचतुष्टयस्य ताल्वादिस्थानस्य च तुल्यत्वात्। आभ्यन्तरप्रयत्नस्तु शरां विवृतत्वम्, छादीनां तु स्पृष्टत्वमिति भेदः।

एवं च प्रयत्नपदेनाभ्यन्तरस्य तस्यास्यपदेन च स्थानमात्रस्योपादाने तु नोक्तदोषः। औत्सर्गिकरीत्या प्रयत्नपदस्य यावदाभ्यन्तरपरत्वं तु दुर्वारम्। बाधकस्य दुर्वचत्वादिति। उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोतीति शङ्काऽभिप्रायः। अत एव गुणानामभेदकत्वेनैव निर्वाहे यत्किञ्चित्प्रयत्नपरत्वकल्पनयौत्सर्गिकार्थबाधो न युक्त इतिपरिहारोपपत्तिः। एतेन "अनुदात्तादेरञ्"इत्यादाविव भेदकत्वपक्षस्यैव युक्तत्वादित्यपास्तम्। वृद्ध्यादिसूत्रस्थसर्वग्रन्थविरोधात्। "आमुदात्तः" इत्यादिसूत्रविरोधाच्च। "अनुदात्तादेः" इत्यादौ त्वनन्तानुदात्तादिव्यक्तिपरिचायकत्वेन तद्विवक्षा। तावद्व्यक्तीनां विशिष्य निर्देशासंभवादनुदात्तग्रहणवैयर्थ्यापत्तेश्च।

यत्तु "स्थानेऽन्तरतमे" इत्यादि, तन्न। विवृतमूष्मणामित्यत्र हि किं पदे जुहोतीत्यनेन आहवनीये जुहोतीत्यस्येव सामान्यविशेषन्यायेन वर्गद्वितीयचतुर्थानां स्पृष्टत्वं बाधित्वा विवृतत्वं विधीयते उत सावकाशनिरवकाशन्यायेन स्पृष्टं प्रयत्नं स्पर्शानामित्यस्य प्रथमादिषु सावकाशत्वात् द्वितीयचतुर्थयोर्विवृतत्वं विधीयते स यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयादित्यादिनेव यत्किञ्चित् प्राचीनमग्नीषोमीयात्तेनोपांशु चरतीत्यादेः। नाद्यः। सामान्यविशेषभावो हि न विधेयांशे। स्पृष्टत्वविवृतत्वयोर्विरोधात्। नाप्यनुवाद्यांशे। शकारा-

दिषु वर्गप्रथमतृतीयेषु च स्पर्शत्वोष्मत्वयोः परस्परात्यन्ताभाव-समानाधिकरणत्वात् । न द्वितीयः । स्पृष्टत्वविधेर्वर्गविषमवर्णेष्विव विवृतत्वविधेरपि ऊष्मसु सावकाशत्वात् । न च द्वितीयचतुर्थानां स्पर्शत्वमेव नास्तीति वाच्यम् । " स्पर्शेषु यत्षोडशमेकविंशम् " इतिभागवतादिविरोधात् । " स्पर्शाः स्युः पञ्चविंशतिः " इतिशिक्षाविरोधाच्च । प्रथमतृतीयपञ्चमानां तत्सावर्ण्यानापत्तेश्च । न च स्पृष्टत्वमबाधित्वैव विवृतत्वं विधीयत-इति वाच्यम् । तयोर्विरुद्धत्वेन समुच्चयानर्हत्वात् । " न हि बाधितमर्थमागमोऽपि बोधयति " इति न्यायात् इति न किञ्चिदेतत् ।

यदप्युक्तम्—कङादीनां सावर्ण्यं न स्यादिति । तत्र केचित् तावदाहुः—वर्गपञ्चमानां नासिका स्थानं न भवति, शिक्षायां यमानुस्वाराणामेव तदुक्तेः, किं तु करणम् । तद्व्यापारेण तदुच्चारणात् । तावन्मात्रेण स्थानत्वे अकारादीनामपि नासिकास्थानत्वापत्तेः । तदकथनेन न्यूनतापत्तेश्च ।

यत्तु करणरूपाया अपि नासिकायास्तद्धितान्तास्यपदेन ग्रहणात्तद्भेदे सावर्ण्यमनुपपन्नमेव । आस्यपदस्य स्थानमात्रपरतया संकोचे बीजाभावादिति, तन्न । आस्यपदस्य करणपरत्वे मानाभावात् । संकोचस्य दूरापास्तत्वात् । वृत्तिविषयतावच्छेदकधर्मावच्छिन्नकिञ्चिद्व्यक्तिविषयकतात्पर्याभावकल्पनस्यैव संकोचत्वात् । एतेन किं पुनरास्ये भवं स्थानं करणं चेति भाष्यविरोध इत्यपि निरस्तम् । न हि करणमास्यभवं नेति ब्रूमः । किं तु आस्यपदार्थतावच्छेदकं प्रकृते स्थानत्वमेवेति ।

यदप्युक्तम्—एतेन तुल्यशब्दसंकोचापेक्षया पश्चादुपस्थितास्यशब्दसंकोच एव न्याय्य इत्यपास्तम् । कखगघङादीनां

स्वरूपतो भेदार्थं स्थानादाववान्तरभेदस्यावश्यकत्वेन सर्वस्थान-साम्ये सवर्णसंज्ञेति पक्षेऽपि तुल्यशब्दसंकोचावश्यकत्वाच्चेति । तदप्यसत् । आस्यशब्दस्य संकोचः करणव्यावृत्तलक्ष्यतावच्छेदकव्यवस्थापनमेव । तस्य च न्याय्यत्वम् । तत्साधारण्ये प्रमाणाभावात् । तुल्यशब्दसंकोचस्तु यत्किञ्चित्परत्वम् । तत्र चान्याय्यत्वम् । भाष्यादिभिरनुक्तत्वात् । कखेत्यादिकं तु व्यर्थमेव । स्थानतावच्छेदकरूपेण स्थानसाम्यविवक्षायां वस्तुसतोऽप्यवान्तरभेदस्य स्थानतानवच्छेदकतया दोषाभावात् । त्वन्मते उभयत्र संकोच इति वैषम्यसत्त्वाच्च ।

यदप्युक्तम्—तुल्यशब्दस्यान्यूनानधिकपरत्वेऽन्यतरैक्ये यावदास्यभवैक्याभावादप्राप्तौ प्रयत्नग्रहणवैयर्थ्यापत्तिः । एतेन प्रयत्नस्य पृथगुपादानात्तद्धितान्तास्यशब्देन नासिकारूपं करणं न गृह्यते इत्यपास्तम् । उभयत्रापि तुल्यत्वस्य वक्तुं शक्यत्वेनाऽऽनुमानिकवचनकल्पनापत्त्या संकोचस्यान्याय्यत्वेन च विनिगमनाविरहात्सर्वत्र प्रवृत्तौ तात्पर्यग्राहकतया प्रयत्नपदस्य व्याख्यातुं युक्तत्वाच्चेति, तदप्यसत् । आस्यपदस्य स्थानमात्रपरत्वेऽयं दोषः उतास्यभवपरत्वे । नाद्यः । प्रयत्नपदवैयर्थ्यानापत्तेः । नान्त्यः । तत्परत्वस्यानङ्गीकारात् । न च पदान्तरोपादानापेक्षयाऽऽस्यशब्दस्य तदुभयपरत्वमेव सम्यगिति वाच्यम् । प्रत्येकसाम्ये संज्ञाया अप्रवृत्त्यर्थं प्रयत्नपदसार्थक्यावश्यकत्वे आस्यपदस्योभयपरत्वकल्पनाया एव गुरुत्वात् । स्थानकरणोभयसाधारणस्य लक्ष्यतावच्छेदकस्य दुर्वचत्वाच्च ।

यत्तु त्वन्नयसीत्यादौ ङादयोऽपि भवन्तीति, तत् साहसमात्रम् । शाब्दिकमात्रानभिमतत्वात् । अत एव कौस्तुभेऽपि यावत्स्थानसाम्यविवक्षायां ञमङणनानां स्ववर्ग्यैः सावर्ण्यानापत्ति-

रित्येवोक्तम् । अन्यथा तेषां परस्परं सावर्ण्याभावोऽप्यापादितः स्यात् । किं बहुना नासिकायाः स्थानत्ववादिभिरपि यावत्स्थानसाम्यमेव विवक्षित्वा नासिकास्थानं सवर्णसंज्ञायामनुपयुक्तमित्येव स्वीक्रियते । तथा च तद्ग्रन्थार्थः—

ननु "शात्" इति सूत्रे शकारात्परस्य तवर्गस्य श्चुत्वनिषेधोऽव्यर्थः "स्तोः" इत्यत्र तुशब्देन नकारस्यानुपादानात्, नासिकास्थानाधिक्येन तस्य सवर्णत्वाभावाद्ग्रहणकशास्त्रप्रवृत्त्यविषयत्वात् । मैवम् । नासिकास्थानसाम्यं सवर्णसंज्ञायां नाद्रियते इत्यत्रेदं ज्ञापकम् । न च यत्किञ्चित्स्थानसाम्यं सावर्ण्यप्रयोजकमिति न तद्वैयर्थ्यमिति वाच्यम् । तथा सति त्वन्नयसीत्यादौ ङादीनां पर्यायेण प्रवृत्त्यापत्तेः ।

अन्ये तु अन्यूनस्थानत्वमेव तुल्यस्थानत्वम्, पञ्चमानां परस्परं नासिकास्थानसाम्येऽपि ताल्वादिसाम्याभावात् । स्ववर्ग्यैः समं त्वधिकस्थानत्वेऽपि न्यूनस्थानकत्वाभावात्सावर्ण्यम् । तेन त्वङ्करोषीत्यादौ ङकारादिसिद्धिः । न चाद्यानां पञ्चमसावर्ण्यं तथाऽप्यसिद्धमिति वाच्यम् । प्रयोजनाभावादिष्टापत्तेः । न च गौरि एहीत्यादौ सवर्णदीर्घः स्यात्, प्रकृतिभावश्च न स्यादिति वाच्यम् । एकारस्य विवृततरत्वमाश्रित्य प्रयत्नभेदोपगमात् । न च "तोर्लि" इत्यत्र ळकारेणाण्त्वाद्वकारोपस्थापने तद्वस्तु इत्यादौ दकारस्य वत्वापत्तिरिति वाच्यम् । द्वितीयळकारप्रश्लेषेण ळकारस्वरूपस्यैवोपादानात् । नापि " रलो व्युपधात् " इत्यत्र रलन्तर्गतळकारेण वकारस्यापि ग्रहणे देवित्वा दिदेविषतीत्यादौ पाक्षिककित्त्वापत्तिः । हयवरट्सूत्रे रेफस्य यात्पूर्वमपकर्षप्रस्तावे भाष्योक्तरीत्या अवकारादिति पदच्छेदेन समाधानसम्भवात् ।

यद्वा— स्थानतावच्छेदकपर्याप्त्याश्रयत्वं स्थानत्वम् । वकारस्य दन्तोष्ठमित्यत्र च द्वन्द्वनिर्देशादुभयत्वं स्थानतावच्छेदकम्, तच्च न प्रत्येकविश्रान्तमिति न वकारस्य ऌकारसावर्ण्यम् । " लुग्वा दुह " इति सूत्रे " उदोष्ठ्यपूर्वस्य " इति सूत्रे च दन्त्यत्वमोष्ठ्यत्वं च दन्तादिभवत्वमात्रं निवेश्यते, न तु तत्स्थानत्वम्। तत्र योगार्थेनैवोभयपरतया ग्रहणकशास्त्रानुपयोगेन सावर्ण्यस्यानपेक्ष्यत्वात् । तेन अदुग्धामित्यादाविव अदुह्वहीत्यादावपि क्सलोपः, पुपूर्षतीत्यादाविव सुस्वूर्षतीत्यादावप्युत्वं च सिद्धम् । तेन यल्ँलोकमित्यादौ अनुस्वारस्य परसवर्णे सानुनासिकवकारापत्तिरप्यनाशङ्क्या इत्याहुः ।

प्रकृतमनुसरामः। सर्वथाऽपि वर्गपञ्चमानां परस्परं सावर्ण्यं नेति सिद्धम् ।

यदप्युक्तम्—"वर्णोत्पत्तौ नासिकायाः पाके काष्ठादिवत्स्थाल्यादिवद्वा करणत्वम्। नाद्यः। "आस्ये तुल्यदेशप्रयत्नं सवर्णम्" इत्यधिकरणत्वबोधकदेशशब्दसहितवार्त्तिकेन तद्भाष्येण च विरोधात् । अधिकरणरूपप्रासादवासिन्यायप्रतिपादकभाष्येण मुखनासिकयोराधिकरणत्वबोधनाच्च । नान्त्यः। करणत्वेऽपि स्थानत्वस्य दुर्वारत्वात्" इति, तदप्यसत्। कण्ठादेरेव ङकारादिदेशत्वेन तद्विरोधाभावात्। न हि तेन नासिकाया ङकारादिदेशत्वमपि बोध्यते। प्रमाणप्रयोजनयोरभावात् । नासिकायाः सवर्णसंज्ञायामनुपयोगात् । प्रासादवासिन्यायस्य समस्त एव च वर्णो द्वाभ्यामुच्चार्यतइत्याद्यपक्षेऽवतारेऽपि एको भागो मुखेनोच्चार्यते द्वितीयस्तु नासिकया, यद्वा–तदुभयान्तरालवर्त्तिस्थानान्तरमेव तदुच्चारणे निमित्तमित्युत्तरपक्षद्वये तदनव-

काशात् । इदं च कौस्तुभेऽपि स्पष्टम् । यदप्युक्तम्—"यथा—

अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः ।

इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वादजादिग्रहणम् । "सुपां सुलुग्" इतिसूत्रस्थभाष्यादिप्रामाण्यादचामल्पप्राणत्वप्रतीतेः । यथा वा—"क्विन्प्रत्ययस्य" इतिसूत्रस्थकैयटादिप्रामाण्याद्वर्गचतुर्थानामल्पप्राणताऽपि दन्त्योष्ठ्यवकारस्य महाप्राणताऽपि । तथोक्तशिक्षायां चकारेण ञादीनामकारादीनां च ग्रहणं व्याख्येयम् । अत एव कौस्तुभे ञकारादीनां नासिकास्थानत्वं साक्षादुक्तम्" इति । तदप्यसत् । प्रकृते कल्पकाभावेन वैपम्यात् । ञादीनां परस्परं सावर्ण्यस्यापि कौस्तुभानभिमतत्वाच्चेति दिक् ।

वस्तुतस्तु तेषां सावर्ण्ये लण्सूत्रात्पूर्वं ञमङणनेष्वन्यतममेव मकारानुबद्धं पठेत् । अन्येषां तेनैव ग्रहणसिद्धेः । न च स्ववर्ग्याणामपि ग्रहणापत्तिः । तेषां पृथक्पाठसामर्थ्यात् । न चैवं तच्छ्लोकेनेत्यत्र छत्वं न स्यात्, लस्य अम्बहिर्भावापत्तेरिति वाच्यम् । छत्वमणीति वाच्यत्वात् अमीत्यस्मादधिकस्यान्तर्भावानापत्तेः । ग्रहणकशास्त्रादन्यत्र पूर्वेणैवाण्ग्रहणमित्यस्य यथाश्रुतपरत्वात् । न च यणि दोषः । आन्तरतम्येन व्यवस्थोपपत्तेः[1] । भवदभिमतत्वाच्च । एतेन रप्रत्याहारोऽपि व्याख्यातः ।

न च नस्य इणन्तर्भावे सुहिन्सु इत्यादौ षत्वापत्तिः । सिद्धान्तेऽपि तत्र "नुम्विसर्जनीय" इति षत्वप्रसक्त्या नुम्ग्रहणं तत्स्थानीयानुस्वारोपलक्षणार्थमित्यत्र व्याख्यानातिरिक्तस्य बीजस्य दुर्वचतया तस्य च साक्षान्नुमः परस्य सस्य

१ आन्तरतम्येन व्यवस्थाया उपपन्नत्वेनेत्यर्थः ।

षत्वं नास्तीत्येतन्निश्चयं विनाऽनुपपन्नतयाऽत्रापि तेनैव संकोचोपपत्तेः । नुमः साक्षादुपादाने तदादेशलक्षणया संकोचः । प्रत्याहारान्तर्भावे तु तदतिरिक्तपरत्वेनेत्यन्यदेतत् ।

यद्वा—वर्णोपदेशे "लण्" इत्यस्मादनन्तरमेव ञादिष्वन्यतमो मानुबद्धः पठनीयः । ग्रहणकसूत्रे तु अण्पदस्थाने अमित्येवास्तु, लाघवस्य भूयस्त्वात् । न चात्र "अचो ञ्णिति" "ञ्नित्यादिर्नित्यम्" इत्यादेर्मिदादावतिप्रसङ्गः । उभयोपादानसामर्थ्यात् । एवम् "ङ्णोः कुक्टुक् शरि" इत्यत्र योऽन्यम् । नापि "क्ङिति च" इत्यस्य । णलादौ वृद्ध्यर्थणित्त्वस्य वैयर्थ्यापत्तेः । न च "मिदचोऽन्त्यात्परः" इत्यस्य णलादौ । "अत उपधायाः" इत्यस्य वैयर्थ्यात् । ननु "मिदचोऽन्त्यात्परः" इत्यस्य नित्यातिप्रसङ्गः, एवं मोऽनुस्वारस्य णान्तादौ, "णो नः" इत्यस्य नकाराद्यादौ, "नोदात्तोपदेशस्य मान्तस्य" इत्यस्य नान्तादौ, "रषाभ्याम्" इति मादीनामपि णत्वं स्यात्, इति यथायोगमापाद्यमिति चेत्, सत्यम् । ङकारस्यैव पाठ्यत्वात् ञणनमानां सवर्णग्राहकत्वापत्त्यभावात् ।

अथैवमपि ग्रहिज्यादिसूत्रेण जग्राह ग्राह्यमित्यादौ संप्रसारणं स्यात्, ङितीति ङकारेण णकारस्यापि ग्रहणात् । मैवम् । भृज्जतीनां ङिति चेति संहितया ङकारमश्लेषेण स्वरूपतो-ङकारस्यैव ग्रहणात् । न च तथाऽपि "हलो यमां यमि लोपः" इत्यत्र ञकाराद्यंशे यथासंख्यं न स्यात् इति वाच्यम् । तत्रातिप्रसङ्गस्थलाभावेन क्षतिविरहात् । न च "ङमो ह्रस्वादचि ङमुण्नित्यम्" इत्यत्र ङमुटोऽप्यापत्तिरिति वाच्यम् । ङणनानामिति स्वरूपेणैव पठितव्यत्वात् । ङमुडित्यत्र द्वे इत्येव पाठ्यम् ।

यद्वा—वर्णोपदेशे न ङम् इति पाठ्यम् । तेन ङकारमकारौ

परस्परं ग्राहकौ नेति फलितम् । तेन "ङमो ह्रस्वाद्" इत्यत्र न दोषः । नापि "मिदचोऽन्त्यात्" इत्यस्य अणूफिन्फिञादिष्वतिप्रसङ्गः । ङित्त्वस्यानन्यार्थकङित्त्वस्थलएव प्रवृत्तिस्वीकारात् । स्वरवृद्ध्यर्थतया नित्त्वादीनामुपक्षीणतया तेषां प्रत्ययत्वात् परत्वोपपत्तेः । न च ताताङ्न्यायेन प्रवृत्त्यापत्तिः । तत्र ङकारस्य श्रूयमाणत्वात् प्रकृते सवर्णग्रहणं कृत्वाऽपवादबाधकल्पने मानाभावात् । यथान्यासमपेक्ष्य लाघवस्य भूयस्त्वात् । मय्प्रत्याहारस्थले ङयित्येव पठनीयम् । "तुभ्यमह्यौ ङयि" इत्यत्र तत्प्रकृतिकघञादिप्रत्ययबाधाद्विभक्तिप्रकरणाच्चानतिप्रसङ्गात् । वहूङ्क्षि इत्यादौ "अचो रहाभ्याम्" इति द्वित्वस्य सिद्धान्तेऽपीष्टतया "यणो मयः" इत्यस्य प्रवृत्तावप्यदोषात् ।

न च ञकारस्याधिकस्य संग्रहापत्तिः । पदान्ते ञकारस्याप्रसिद्धतया "मय उञः" इत्यत्राप्यदोषात् । तस्मात् ञादीनां मिथः सावर्ण्यं नेति सिद्धम् । अन्यथा सानुनासिकयवलानामपि मिथस्तदापत्तौ सँय्यन्ता इत्यादौ स्थलत्रयेऽपि पर्यायेण तेषामापत्तेः ।

किं च विवरणकारादिमते सानुनासिकककारादीनामपि यमत्वात्तेषां सावर्ण्यप्रसङ्गे त्वन्नयसीत्यादौ ककारादिरूपयमानामप्यादेशत्वं प्रसज्येत । यावत्स्थानसाम्ये सावर्ण्यस्वीकारपक्षे तेषां केवलनासिकास्थानत्वमाश्रित्य समाधानेऽपि मुखनासिकोभयस्थानत्वमादाय तत्तद्वर्गीययमापत्तेर्दुष्परिहरत्वात् "नासिक्या नासिकास्थाना मुखनासिक्या वा" इति वचनान्मुखपदेन तद्वर्गस्थानस्यैवोपादेयत्वात् । वर्णान्तरत्वमतेऽपि स्थानान्तरानुक्त्या स्ववृत्तिसादृश्यप्रतियोगिवर्णसमानस्थानप्रयत्नत्वस्यैव वाच्यत्वात् । तथा च "पञ्चमे परे यमोत्पत्तिः"

इत्यादिकमपि व्याकुलं स्यात्।

ननु तथाऽपि उक्तवचनान्नासिकायाः स्थानत्वं सिध्यत्येवेति चेत्, सत्यम्। अत्रत्यस्थानपदस्य तदुच्चार्यत्वमात्रपरत्वात्। मुखनासिक्या इति वाक्ये तु मुखावयवकण्ठादीनां प्रमाणान्तरेण स्थानत्वनिर्वाहात्। "मुखनासिकावचन" इत्यत्र वचनपदस्वारस्यान्मुखनासिकोच्चार्यत्वस्यैव प्रतीतेः। अत एव बाह्यप्रयत्नाभिधानोत्तरं "यथा तृतीयाः तथा पञ्चमा आनुनासिक्यवर्जम् आनुनासिक्यं तेषामधिको गुणः" इति भाष्यं संगच्छते। अन्यथा बाह्यप्रयत्नसाम्यकथनप्रस्तावे स्थानवैषम्याभिधानस्यानर्हत्वात्। उक्तरीत्या तु आन्तरतम्यमात्रपरीक्षोपयोगित्वेन तदौचित्यात्। न चानुनासिकत्वनिर्मुक्तङकारादीनामनुपलम्भात्कथं गुणत्वमिति वाच्यम्। जलपरमाणुरूपादीनां तद्गुणत्वानुपपत्तिप्रसङ्गात्। तन्निष्ठात्यन्ताभावप्रतियोगित्वस्य गुणलक्षणानुपयोगात्। "सत्त्वे निविशतेऽपैति" इत्यादेरन्यथैव व्याख्यास्यमानत्वात्।

अपि च अनुनासिकसंज्ञासूत्रे मुखस्य नासिकायाश्च तदुच्चारणे करणत्वं सर्वग्रन्थसिद्धम्। स्थानत्वं च करणप्रतियोगिकसंयोगानुयोगित्वम्। तत्र करणप्रतियोगिकत्वमुपलक्षणं विशेषणं वा। नाद्यः। जिह्वाग्रादीनामपि स्थानत्वापत्तेः। न चेष्टापत्तिः। तत्साम्यमादाय समानप्रयत्नानां सावर्ण्यापत्तेः। यत्किञ्चित्स्थानसाम्यस्यैव भवन्मते ऽपेक्ष्यत्वात्। नान्त्यः। स्वप्रतियोगिकत्वविशिष्टसंयोगानुयोगित्वस्य स्वस्मिन्ननङ्गीकारात् नासिकायाः स्थानत्वानुपपत्तेः स्थिरत्वात्। इत्यास्तामतिविस्तरः।

प्रकृतमनुसरामः। ऋऌवर्णयोः स्थानभेदादप्राप्तां सवर्णसंज्ञां विधातुं वार्त्तिकमारभ्यते—

ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यमिति ।

अत्र व्याचक्षते—आ च आ च रलौ, तौ च तौ वर्णौ चेति विग्रहः, उश्च उल् च ऋलोस्तयोरिति वा । प्रथमान्तेन परिनिष्ठितविभक्त्या वा विग्रह इति सिद्धान्तादिति ।

तत्राद्ये ऋ ऌ औ इति स्थिते "ऋत्यकः" इति प्रकृतिभावः । "ऋतो ङि" इति ऌकारस्य गुणः, तत ऋकारस्य यणादेशः । न चाकृतव्यूहन्यायात्प्रकृतिभावानुपपत्तिः । गुणे सत्यपि स्थानिवद्भावसंभवान्निमित्तविघाताभावात् । न चैवं यणोऽपि दौर्लभ्यम् । "ऋत्यकः" इत्यत्र "प्लुतप्रगृह्याः" इत्यतोऽचीत्यनुवर्त्य ऋकाररूपमचमाश्रित्य यत्कार्यं तस्यैव वारणात् । यणादेशस्तु अच्सामान्यमुपजीवतीति तद्व्यावृत्तिविरहात् ।

न च "अचः परस्मिन्" इत्यनेनाभावोऽप्यातिदिश्यतइति सिद्धान्तात् ऋकारकालीनस्य यणभावस्य गुणेऽप्यतिदेश इति वाच्यम् । "न पदान्त" इति तन्निषेधात् । अन्तर्वर्तिविभक्त्या पूर्वपदस्य सुबन्ततया पदसंज्ञत्वात् । द्वितीये तु ओसि गुणस्य दौर्लभ्यादकारोत्तरमुच्चारणार्थमकारं तन्निमित्तकयणं च स्वीकृत्य योज्यम् ।

ऋलोरिति वा पाठ इति । अत्रेदं बोध्यम्— ऋकाररूपाज्निमित्तकत्वं न तावदृत्वावच्छिन्ननिमित्तताकत्वम् । सवर्णदीर्घयणोरयादीनां च वारणानुपपत्तेः । तत्र ऋत्वेन निमित्तत्वविरहात् । "उपसर्गादृति धातौ" इत्यत्रैव प्रकृतिभावस्य कथंचित्प्रवृत्त्यापत्त्या धातुग्रहणं पाक्षिकप्रकृतिभावनिवृत्त्यर्थमित्यादिसकलव्याकोपप्रसङ्गात् । नापि ऋकारविश्रान्तनिमित्तताकत्वं यणादेशसाधारण्यात् ।

अथ यस्यां लक्ष्यव्यक्तौ ऋकारपरत्वाभावप्रयुक्तो यत्का-

र्याभावस्तदेव कार्यं प्रकृतिभावेन व्यावर्त्यते, इति चेन्न । गुणात्पूर्वं प्रकृते यणादेशस्याप्येतादृशत्वात्प्रवृत्त्यापत्तेः । तद्व्यक्तौ ऋकारपरत्वाभावस्याप्रसिद्ध्या यद्यत्र ऋकारपरत्वं न स्यात्तदा यणादेशो न स्यादित्येवंरूपस्यैव प्रयुक्तत्वस्य वाच्यत्वात् । तस्य चान्यत्र ऋकारपरत्वाभावेऽपि दध्यत्रेत्यादौ यणादेशाभावस्यादर्शनादापादकत्वानुपपत्तेः । एवं ब्रह्मऋषिरित्यादौ गुणस्यापि दुर्वारत्वं योज्यम् । एवं च प्रकृते गुणोत्तरम् ऋकारपरत्वव्यतिरेकप्रयुक्तो न यणादेशाभावः, आकारपरत्वेनापि तदुपपत्तेरिति कथञ्चित् आशङ्काऽपि निरवकाशा । आदेशाभावस्थले सवर्णदीर्घव्यावृत्तावपि यथायोगमादेशान्तरस्य दुर्वारत्वप्रसङ्गात् । तस्मादचीत्यनुवृत्तावपि यणादेशव्यावृत्तस्य निवर्त्यतावच्छेदकस्य दुर्वचत्वादुपरञ्जकत्वमात्रं तस्य, न तूपयुक्तत्वमपीति न किञ्चिदेतत् ।

यदप्युक्तम्—प्रकृतिभावाभावपक्षे "वार्णादाङ्गं बलीयः" इति गुणे कृते यणादेशसौलभ्यमिति, तदपि न। तयोर्युगपत्प्रवृत्तौ समाननिमित्ततायां च तन्न्यायप्रवृत्तेः कौस्तुभादौ स्पष्टत्वात् । एतेन तथात्वे न किञ्चिन्मानमिति निरस्तम् । व्याश्रयत्वे लक्ष्यानुरोधात्तत्प्रवृत्तिस्वीकारेऽपि प्रकृते लक्ष्यनिश्चयाभावेन औत्सर्गिकीं समानाश्रयप्रवृत्तिमाश्रित्य तदप्रवृत्तेरेव स्वीकर्त्तुमुचितत्वात्, क्वै लुप्तं क्वौ विधिं प्रति वा न स्थानिवदित्यादिवत् । तस्मात्प्रकृतिभावपक्षे ऋअलाविति ऋलोरिति च, तदभावे तु राविति रोरिति च रूपं यथायोगं बोध्यमित्यलं बहुना ।

सावर्ण्यप्रयोजनं तु होतृ ऌकार इति स्थिते सवर्णदीर्घो यथा स्यात्, होतॄकारः । उभयान्तरतमस्य ऌकारान्तरतमस्य च दीर्घस्यासम्भवादृकारान्तरतमो दीर्घऋकारः ।

अथ "अकः सवर्णे" इति सूत्रे "ऋति ॠ वा" "लृति लॄ वा" इति पठ्यते। अकः सवर्णे ऋति परे पूर्वपरयोः स्थाने ॠ इत्ययमादेशो वा स्यात्। ईषत्स्पृष्टो द्विमात्रश्चायम्। मध्ये द्वौ रेफौ तयोरेका मात्रा, उभयतोऽज्भक्तेर्द्वितीया। एवं द्वितीयवचनाविधेये लृकारेऽपि बोध्यम्। तत्र मध्ये द्वौ लकाराविति विशेषः। उभयोरपि प्रयत्नभेदादृल्लृवर्णाभ्यामगृहीतत्वेनाच्त्वाभावादप्राप्तयोरेव विधानम्।

तत्र वाशब्दस्य समुच्चयार्थत्वमङ्गीकृत्याप्राप्त एव दीर्घो विधीयताम्, किं सावर्ण्येन। न च द्वितीये सवर्णपदस्यानुवृत्तौ तत्संज्ञाया अप्यावश्यकत्वम्, अननुवृत्तौ तु दध्यलृकार इत्यादावतिप्रसङ्ग इति वाच्यम्। प्रथमवार्त्तिके ऋतीत्यपनीय "ऋतः" इति पञ्चम्यन्तस्य पाठ्यत्वात्। न च धात्रंश इत्यादावतिप्रसङ्गः। सवर्णे इत्यस्यानुवृत्तेः। द्वितीये तु ऋत इत्यस्यानुवृत्तिः, सवर्णइति निवृत्तम्। अतः सवर्णसंज्ञाविधानं व्यर्थम् इति चेत्, मैवम्। षाष्ठवचनद्वयस्यैव प्रत्याख्यातुमुचितत्वात्। तदारम्भपक्षेऽपि हि तद्विधेययोरीषत्स्पृष्टयोरच्त्वमवश्यमपेक्षणीयम्। अन्यथा विधानमात्रं तयोः स्यान्न तु प्लुतः। तस्याज्मात्रकार्यत्वात्। सति त्वच्त्वे ताभ्यां त्रिमात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञायां सत्यां प्लुतसिद्धिः।

न च विवृतस्थाने आन्तरतम्याद्विवृतावेव दीर्घौ स्याताम्, न त्वीषत्स्पृष्टाविति वाच्यम्। रेफद्वययुक्तस्य स्थानिनस्तादृगेवादेशः सुसदृश इत्यस्यापि सम्भवात् विनिगमकाभावेन उभयोः पाक्षिक्यां प्रवृत्तौ विवृतेषत्स्पृष्टयोरिष्टयोः सिद्धेः। न चैवं सावर्ण्यविधानपक्षे लृकारस्थानिकादेशस्यापि रपरत्व-

प्रसङ्गः। रप्रत्याहारग्रहणस्य व्याख्येयतया लपरत्वासिद्धेः। न च तथाऽपि "नाग्लोपिशास्वृदिताम्" "पुषादिद्युताद्य्लृदितः" इत्यादीनामनुबन्धकार्याणां सङ्करापत्तिः। भिन्नानुबन्धनिर्देशसामर्थ्यात्।

नाज्झलौ १।१।१०।

तुल्यस्थानप्रयत्नावप्यज्झलौ मिथः सवर्णसंज्ञौ न स्तः। अप्यन्तं प्रसक्तिप्रदर्शनमात्रार्थम्। सवर्णपदं संज्ञापरम्। पूर्वं विधेयतयोपस्थितत्वात्। तुल्यास्यप्रयत्नत्वस्य वस्तुधर्मतया निषेधानर्हत्वाच्च। तेन आनडुहं चर्म वैपाशो मत्स्य इत्यत्र हकारशकारयोर्लोपो न। अन्यथा "यस्येति च" इत्यत्र अकारेकाराभ्यां ग्रहणकसूत्रेण दीर्घादीनामिव हकारशकारयोरपि ग्रहणापत्तेः। ऋकारषकारयोर्लृकारसकारयोरपि सावर्ण्यं प्राप्तमत्र निषिध्यतइति कौस्तुभकृतः।

कैयटादयस्तु अकारहकारयोरिकारशकारयोश्चेति स्थलद्वयमेव दर्शयन्ति। तेषां चायमाशयः—बह्वृचप्रातिशाख्योक्तरीत्या ऋकारलृकारयोर्जिह्वामूलस्थानत्वात् मूर्द्धदन्तस्थानाभ्यां षकारसकाराभ्यां सावर्ण्यप्रसक्तिरेव नास्ति। न च तत्प्रातिशाख्यमात्रोक्तत्वादनादृत्यम्। पूर्वोक्तरीत्या सूत्रवार्त्तिकसंमतत्वात्। अत एव नाण्शलावित्येव सूत्रयितुं युक्तमिति प्रामाणिकाः।

एवं च "ग्रहणकशास्त्रादन्यत्र पूर्वेणैवाण्ग्रहणनियमात् कर्त्तृषट्कमित्यादौ सवर्णदीर्घः स्यात्। परेणाण्ग्रहणेऽपि अजपेक्षया व्यक्तिगौरवमेव। तस्मान्नाक्शलाविति सूत्रं युक्तम्" इत्यलग्नकं वेदितव्यम्। अत एवाग्रे पूर्वपक्षवार्त्तिके ऋकारसावर्ण्यप्रतिषेध

एवोक्तो न तु षकारादेः । एतेन "शकारग्रहणं शरामुपलक्षणम्" इत्युक्त्वा रामष्षष्ठः यशस्सारमित्युदाहरणान्तरकल्पनं च तेषामपास्तम् । आद्यन्तभाष्ये शकारमात्रस्यैव श्रवणादुपलक्षणत्वे मानाभावात् ।

स्यादेतत् । शकारस्यापि परस्परं सावर्ण्यनिषेधः स्यात् । स हि इकारादिभिर्गृहीतत्वादच्, स्वरूपतस्तु हल् । न चास्मादेव निषेधादिकारेण शकारग्रहणं नेति वाच्यम् । एतद्वाक्यार्थबोधौपयिक्यां पदार्थबुद्धौ पूर्वसूत्रप्राप्तसंज्ञामुपजीव्य ग्रहणकशास्त्रप्रवृत्तौ बाधकाभावात् । न हि तदानीं सावर्ण्यनिषेधधीरस्ति । तदुत्तरभावित्वात् । न चैतद्वाक्यार्थबोधात्पूर्वं तुल्यास्यसूत्रार्थबोध एव न भवतीति वाच्यम् । प्रतियोगिप्रसक्तिविरहे निषेधानुपपत्तेः । "यस्येति च" इत्यादौ तु एतद्वाक्यार्थबोधात्सावर्ण्याभावज्ञानान्न तद्ग्रहणमिति वैषम्यम् । अत एव ग्रहणकसूत्रस्थमण्पदं न सवर्णग्राहकम्, सूत्रान्तरस्थं तु सवर्णग्राहकमेवेति सिद्धान्तः । एवं "नाज्झलौ" इत्यस्यापि निषेधस्य न स्वस्मिन्प्रवृत्तिः । स्वात्मनि व्यापारविरोधस्य तुल्यत्वात् ।

परिहृत्यापवादविषयमित्यस्यापि नायं विषयः । अपवादस्यैवानवगतत्वात् । न चेष्टापत्तिः । परश्शतानि कार्याणीत्यत्र दोषापत्तेः ।

परश्शताद्यास्ते येषां परा संख्या शतादिकात् ।

इत्यमरः । "कर्तृकरणे कृता बहुलम्" इति बहुलोक्तेः शतात्पराणीति समासः । पारस्करादित्वात्सुट् । श्चुत्वेन शकारः । "अनाचि च" इति तस्य द्विर्वचनं च । तत्र "झरो झरि सवर्णे" इति लोपाप्रवृत्त्या शकारत्रयश्रवणं स्यात् । न च "अनचि" इति "शरोऽचि" इति वा

द्वित्वनिषेधो भविष्यतीति वाच्यम्। तत्र "नाज्झलौ" इति सावर्ण्यनिषेधेन ग्रहणकशास्त्राप्रवृत्त्या अच्पदेन शरामुपस्थानासम्भवात्। उक्तनिषेधयोर्नित्यत्वात्। तथा च वार्त्तिकम्—

अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वादिति।

प्रतिषेधे प्रकरणवशात्सावर्ण्यस्य प्रतियोगित्वेनान्वयः। सावर्ण्यप्रतिषेधो वक्तव्यः स्यादित्यर्थः।

किं च अवर्णस्य स्वभेदैः सह सावर्ण्यं न स्यात्। हकारेण तद्ग्रहणे सति हल्त्वात्स्वरूपेण त्वच्त्वात् इति प्राप्ते सिद्धान्तवार्त्तिकम्—

सिद्धमनच्त्वात्, वाक्यापरिसमाप्तेर्वा इति।

सूत्रप्रत्याख्यानाभिप्रायं प्रथममुत्तरम्। तथा हि—विवृतमूष्मणामिति योगे ईषदित्यनुवर्त्तते। स्वराणां चेत्यत्र विवृतमित्यस्यैवानुवृत्तिः, ईषदिति तु निवृत्तम्। तथा च प्रयत्नभेदात्सावर्ण्यप्रसक्तिरेव नास्तीति भावः। एवं चाकारस्य हल्त्वमपि नास्तीति दण्डाग्रमित्यादावपि न दोषः।

यथाश्रुतमभ्युपेत्याप्याह—वाक्यापरिसमाप्तेर्वेति। प्रथमं हि वर्णानामुपदेशः, तत इत्संज्ञा, ततः प्रत्याहारः, ततोऽपवादपरिहारेण सवर्णसंज्ञानिष्पत्तिः। ततो ग्रहणकशास्त्रप्रवृत्तिः। यद्यपि निषेधप्रतियोगिप्रवृत्त्यर्थम् "नाज्झलौ" इति वाक्यार्थबोधात्प्राक् सवर्णसूत्रार्थबोध आवश्यकः, तथाऽपि अपवादविषयांशे तद्वाक्यतात्पर्यज्ञानस्य अपवादवाक्यार्थबोधोत्तरमप्रामाण्यज्ञानसम्पादनद्वारा तदंशे उत्सर्गवाक्यस्य तात्पर्याभावव्यवस्थापनात्स बोधो न शास्त्रप्रवृत्तावुपयोगी। यदंशे शास्त्रतात्पर्यं तद्विषयकबोधस्यैव प्रमाणत्वात्। अन्यथा सर्वत्र बोधस्यानियतत्वेन व्यवस्थाभङ्गप्रसङ्गात्। तथा च भ्रमरूपप्र-

तियोगिप्रसिद्धिमादाय निषेधप्रवृत्तावपि न ग्रहणकशास्त्रस्य प्रवृत्तिसम्भवः । अतो निषेधोपयोगितुल्यास्यसूत्रार्थबोधदशाया-मिकारेण शकारस्यानुपस्थानाच्छकारस्याचूत्वं नास्तीति न तस्य तेनैव समं सावर्ण्यनिषेधापत्तिः । निषेधप्रवृत्त्युत्तरकाले च सावर्ण्याभावादेवानुपस्थानमिति समाधानतात्पर्यम् । अत एव भाष्ये प्रत्याहारोत्तरकाला सवर्णसंज्ञा, सवर्णसंज्ञोत्तरकालं सवर्णग्रहणमिति उक्तम् । " नाज्झलौ " इत्यस्य सवर्णसंज्ञाया-मेवोपयोगात् । हरिणाऽप्युक्तम्—

अनेकाख्यातयोगेऽपि वाक्यं न्यायापवादयोः ।
एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितम् ॥

इति । न्याय उत्सर्गः । भिन्नरूपमिव परस्परानपेक्षबोधजनक-मिव । अपवादज्ञानाभावे उत्सर्गस्य तात्पर्यभ्रमेण स्वतात्पर्यावि-षयकस्यापि बोधजनकत्वादप्रामाण्यापत्तौ स्वतात्पर्यविषयमा-त्रबोधजननार्थमपवादज्ञानस्य तेनापेक्षणीयत्वात् प्रमाणतावच्छेदकरूपसम्पत्तिः पश्चादेव भवतीति तदर्थात् । न चैवं " नाज्झलौ " इति सूत्रे सवर्णदीर्घोऽपि न स्यादिति शङ्क्यम् । तत्प्रकारकज्ञानस्य शास्त्रप्रवृत्तावनपेक्षितत्वात् । तदेवं द्वेधा समाधानम् ।

भाष्ये तु एकवाक्यतयाऽपि हेतुद्वयम् अपर आहेत्यादिना व्याख्यातम् । तथा हि—अनचूत्वादिति पूर्वोक्तदोषनिवृत्ति-सिद्धौ हेतुः, अनच्त्वे तु वाक्यापरिसमाप्तेरिति । सा च यथो-क्तरीत्यैव ।

नन्वेवं वाशब्दोऽसंगतः स्यात्, एकस्मिन्साध्ये हेतुद्वयस्य साधकत्वएव तत्संगतेः, इह तु साध्यभेदोक्त्या एकत्र द्वयोरसमावेशात् । न हि भवति पर्वतो वह्निमान् धूमात् आर्द्रेन्ध-

नाद्वेति। भवति तु धूमादालोकाद्वा इति चेत्, सत्यम्। अस्तु वा ग्रहणमिकारेण शकारस्येति वाक्यशेषमध्याहृत्य प्रतिज्ञाविकल्पार्थत्वेन वाशब्दोपपत्तेः। शकारस्य शकारेण समं सावर्ण्यनिषेधे इष्टापत्तिरिति तदर्थः। न चात्र पक्षे शकारयोः सावर्ण्यनिषेधात्परश्शतादावुक्तदोष इति वाच्यम्। रूपद्वयं हि तत्र इष्टमेव। तच्च "अनचि च" इति द्वित्वस्य वैकल्पिकत्वादेव सिध्यति। तत्र "यरोऽनुनासिके" इत्यतो विकल्पानुवृत्तेः।

न च "झरो झरि" इति लोपस्य नित्यत्वात् द्विशकारकमेव रूपमिष्यतइति वाच्यम्। तत्रापि "झयो होऽन्यतरस्याम्" इत्यतो विकल्पानुवृत्तेः। एतत्पक्षे स्वपरितोषो दण्डाग्रमित्यत्र सवर्णदीर्घासिद्धिरित्याहुः।

नन्वगृहीतसवर्णानामेवायं निषेध इति स्थिते दीर्घस्य ईकारस्य शकारेण सह सावर्ण्यनिषेधाभावात् कुमारी शेतइत्यत्र सवर्णदीर्घः स्यात् इति चेन्न। तत्राचीत्यनुवृत्त्या समाधानात्।

अथ तथाऽप्याकारस्य दीर्घस्य प्लुतस्य च हकारेण सह सावर्ण्यं स्यात्। तथा च विश्वपाभिरित्यत्र "होढः" इति ढत्वं स्यादिति केचित्।

अन्ये तु संयोगान्तलोप एवापाद्यः। ढत्वस्यासिद्धत्वात् पूर्वत्रासिद्धे विप्रतिषेधाभावादित्याहुः। एवं मालास्वित्यत्र षत्वम्, वागाशीरित्यत्र "झयो होऽन्यतरस्याम्" इत्याकारस्य घत्वम्, गासीध्वमित्यत्र "इणः षीध्वम्" इति धस्य ढत्वम्, दासीष्टेत्यत्र "दादेर्धातोः" इति घत्वम्, राम आयाहीत्यादौ "हशि च" इत्युत्वम्, देवा आयान्तीत्यादौ "हलि सर्वेषाम्" इति यलोपः, चाखायितेत्यादौ "यस्य हल" इति यलोपः। श्येनायितेत्यादौ "क्यस्य विभाषा" इति यलोपः, निचाय्ये-

त्यादौ "हलो यमाम्" इति यलोपश्च स्याद् इति चेद्—

अत्राहुः—आकारस्य अइउण्सूत्रोदाहृतशिक्षोक्तरीत्या विवृततरत्वाद्विवृतेन हकारेण न सावर्ण्यम् । मतान्तरे तु दीर्घप्लुताकारयोः सवर्णदीर्घं कृत्वा तत्सहितोऽच् आच् इति व्याख्याय दीर्घप्लुताकारयोरपि सावर्ण्यनिषेधो व्याख्येयः । अत्र लिङ्गं च "कालसमयवेलासु" इत्यादिनिर्देशः । प्लुतस्यापि प्रश्लेषात् यियासो इत्यादौ "गुरोरनृत" इति प्लुतादाकारात्परस्य सनः सस्य षत्वं नेति ।

वार्त्तिकमते तु हलामचां चोभयसाधारणैकवर्णत्वव्याप्यजात्यभावात् कुत्रापि नातिप्रसङ्गशङ्केति ॥

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ॥

ईदूदेद् द्विवचनं प्रगृह्यम् ११।

ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् । प्रदेशाः "प्लुतप्रगृह्या" इत्यादयः। हरी एतौ। विष्णू इमौ। गङ्गे अमू। नन्विह तपरत्वं किमर्थम्। व्यक्तिपक्षे ईदूतोर्दीर्घत्वादनण्त्वेन सवर्णग्राहकत्वाभावेन तत्कालग्रहणार्थत्वायोगात् । न च उदात्तानुदात्तस्वरितगुणयुक्तानां दीर्घाणामीदूतां ग्रहणार्थमिति वाच्यम् । गुणानामभेदकत्वादेव तदुपपत्तेः। जातेः पदार्थत्वपक्षेऽपि दीर्घोच्चारणसामर्थ्यादेव ह्रस्वव्यावृत्तेः। प्लुतव्यावृत्तेश्च सिद्धान्तेऽप्यनिष्टत्वाद् इति चेत्। अत्र भाष्यम्—

व्यक्तिः पदार्थो भेदकाश्च गुणा इति पक्षे उदात्तादिगुणयुक्तानां दीर्घाणां संग्रहाय तपरत्वमिति।

न च व्यक्तावेव पदार्थे एकारस्याण्त्वाद् ग्रहणकशास्त्रेण प्लुतग्रहो मा भूदित्येतदर्थं तपरत्वमिति वाच्यम् । तपरसूत्रेऽणपदमनुवर्त्त्य तथाऽर्थस्यापि वक्ष्यमाणत्वात्।

अत्र वदन्ति—तथाऽपि तात्परत्वेनैव ऊकारस्य गुणान्तरयुक्तदीर्घसंग्राहकत्वसिद्धेरेकारस्य तु अण्त्वादेव तत्सिद्धेरुभयत्र तपरत्वमसन्देहार्थमेव । तद्वरं गुणानामभेदकत्वपक्षमाश्रित्य इकारांशे तपरत्वमसन्देहार्थमेवास्तु इत्याशयेन सर्वत्र तपरत्वमसन्देहार्थमिति वृत्तिकृतः।

वस्तुतस्तु पञ्चमीसमासेन तात्परस्य तत्कालग्राहकत्वे मानाभावादूकारे तपरत्वम्, एकारस्त्वतपर एव निर्दिष्ट इति सुवचमिति।

तत्र एकारः केवल एवेत्येतत् " किमर्थम् ईदादीनां तपराणां प्रगृह्यसंज्ञा " इतिभाष्यविरुद्धम् । तेन त्रयाणामपि तपरत्वनिर्देशप्रतीतेः ।

ननु प्रगृह्यसंज्ञां प्रति प्लुतस्यासिद्धत्वात् द्विमात्र एव प्रगृह्यसंज्ञेति प्लुतानुपसंग्रहेऽपि न क्षतिः । न च "प्लुतप्रगृह्या अचि" इति प्रकृतिभावेन स्वरसन्धिप्रकरणे प्लुतस्य सिद्धत्वज्ञापनाद्दोषो दुर्वार इति वाच्यम् । प्लुतशब्दस्य लक्षणया तत्स्थानिपरत्वसम्भवे ज्ञापकत्वायोगात् । श्रुतार्थापत्तिमूलकवाक्यान्तरकल्पनापेक्षया लक्षणाया एव युक्तत्वात् । प्लुतत्वप्रयुक्तप्रकृतिभावे प्लुतस्य सिद्धत्वज्ञापनेऽपि प्रगृह्यत्वप्रयुक्तप्रकृतिभावेऽसिद्धत्वात् । मैवम् । प्लुतस्यासिद्धत्वे "अप्रगृह्यस्य" इतिपर्युदासाप्रवृत्तौ " अणोऽप्रगृह्यस्यानुनासिकः" इत्यनुनासिकस्य दुर्वारत्वात् ।

अथात्रैकारस्याणत्वेन प्लुतग्राहकत्वेऽपि ईदूतोः कथं तत्, दीर्घाणामनण्त्वेन सवर्णग्राहकत्वाभावात् । न च जातिपरो निर्देशः । ह्रस्वेष्वतिप्रसङ्गापत्तेः । दीर्घव्यक्तिसमवेतैव जातिर्विवक्षितेति चेद्, न । प्लुतानुपग्रहतादवस्थ्यात् । न चेष्टापत्तिः । अग्नी ३ इति इत्यादौ "अप्लुतवदुपस्थिते" इत्यनेन लौकिकइतिशब्दे परे प्लुतस्याप्लुतवद्भावविधानेन प्लुतनिमित्तकप्रकृतिभावनिषेधेऽपि प्रगृह्यत्वनिबन्धनस्य प्रकृतिभावस्येष्टत्वात् । तथा च षष्ठे वार्त्तिकम्—

वद्वचनं प्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधे हि प्रगृह्यप्लुतनिषेधप्रसङ्गोऽन्येन विहितत्वात् इति ।

प्लुतकार्यप्रकृतिभावानिषेधे स्वरसन्धेरावश्यकतया प्लुतस्य श्रवणाभावध्रौव्यात् प्लुत एव निषिध्यताम्, किमतिदेशा-

र्थेवद्वचनेनेति तत्र शङ्काऽर्थः । उभयनिमित्तकप्रकृतिभावप्राप्त्या प्लुतप्रयुक्ततन्निषेधेऽपि प्रगृह्यत्वप्रयुक्तप्रकृतिभावसत्त्वात्प्लुतश्रवणासिद्धिः, प्लुतानिषेधे तु श्रवणं न स्यादिति समाधानार्थः । न चैवम् "अप्लुतवद्" इत्यस्य वैयर्थ्यापत्तिः, प्लुतनिमित्तकप्रकृतिभावमात्रनिषेधस्य विशेषानुपपादकत्वादिति वाच्यम् । यत्र प्रगृह्यसंज्ञा नास्ति तत्र चरितार्थत्वात् । यथा सुश्लोका३इति सुश्लोकेति । अत्र भाष्यम्—

यथोद्देशं संज्ञापरिभाषमिति पक्षे प्रगृह्यसंज्ञां प्रति प्लुतस्यासिद्धतया द्विमात्रत्वबुद्धेरविघातात्सिद्धा प्रगृह्यसंज्ञा, कार्यकालपक्षे तु प्रगृह्यसंज्ञायाः " अणोऽप्रगृह्यस्य" इत्येतत्समानदेशतया तां प्रति प्लुतस्यासिद्धत्वाभावादनुनासिकप्रवृत्तिः स्यात् ।

ननु संज्ञापरिभाषस्य कार्यार्थत्वात् कार्यकालपक्ष एव न्याय्य इति चेत्, अत्राहुः–"प्रयोजनविशेषानवगमेऽपि सामान्यतः किञ्चित्प्रयोजनवत्ताज्ञानमात्रेण यथोद्देशपक्षोपपत्तिः । यथा — विशिष्याश्रूयमाणभाव्यकेषु विधिषु इष्टसामान्यस्य भाव्यत्वमादायांशत्रयवैशिष्ट्यं भावनायाः सम्पाद्य तदुत्तरमार्थवादिकः कल्पितो वा इष्टविशेषो व्यवस्थाप्यते तद्वत्, महावाक्यार्थपर्यालोचनया तु कार्यकालपक्ष" इति ।

अत्र हरदत्तः– संज्ञां प्रति प्लुतस्यासिद्धत्वेऽपि अनुनासिकपर्युदासं प्रति न तथा । ततश्च यस्यानेन संज्ञा कृता द्विमात्रस्य न सोऽनुनासिकविधौ स्थानी, किं तु त्रिमात्रः । न च स्थानिवद्भावेन त्रिमात्रस्यापि प्रगृह्यत्वम् । अल्विधौ तदयोगात् । ईकारान्तद्विवचनस्य प्रगृह्यसंज्ञतया विशेषणतया ईकारादिरूपाल्सापेक्षत्वात् ।

किं चावश्यं "सिद्धः प्लुतः स्वरसंधिषु" इत्याश्रयणीयम्,

दण्ड आढकमिति प्लुतस्य दीर्घेण निवृत्तिर्यथा स्यात् । अत एव सुश्लोका ३ इति सुश्लोकेति इत्यत्र गुणो भवन् प्लुतमेव निवर्त्तयति, न स्थानिनम् । आदेशे प्लुतश्रवणप्रसङ्गात् । तत्कथं यथोद्देशपक्षेऽपीष्टसिद्धिरिति । अत्र कैयटः—

"शास्त्रासिद्धत्वाश्रयणाच्च प्लुतबुद्धावसत्यां प्रगृह्यत्वे विधीयमाने द्विमात्रविषया बुद्धिः प्रवर्त्तते"इति ।

अयमर्थः–द्विमात्रस्य त्रिमात्रेणापहारेऽपि "पूर्वत्रासिद्धम्" इत्यनेन शास्त्रासिद्धत्वबोधनात् त्रिमात्रएव द्विमात्रत्वबुद्ध्या प्रगृह्यसंज्ञा क्रियते, न तु द्विमात्रे कृतां प्रगृह्यसंज्ञां त्रिमात्रे अतिदिशामः, येनाल्विधित्वात्तदभावशङ्का स्यात् । एवं च त्रिमात्रएव प्रगृह्यसंज्ञाप्रवृत्तिः । द्विमात्रत्वबुद्ध्या संज्ञाप्रवृत्तावपि वस्तुतो धर्मिणस्त्रिमात्रतया तत्रैव विश्रामात्, रजतभ्रमजन्यप्रवृत्तेः शुक्तिविषयकत्ववत् । न चाहार्यारोपेण कथं शास्त्रप्रवृत्तिः । शास्त्रेणैव तस्य शास्त्रप्रवृत्तिप्रयोजकत्वोक्तेः । शास्त्रस्य वस्तुतोऽसिद्धत्वासम्भवात् । एतेन सुश्लोकेतीत्यादावादेशे प्लुतः श्रूयेतेत्यप्यपास्तम् । द्विमात्रबुद्ध्यैव क्रियमाणेन गुणेन तद्बुद्धिविशेष्यप्लुतस्यैव निवृत्तेरर्थसिद्धत्वादिति दिक् ।

चत्वारोऽत्र पक्षाः सम्भवन्ति । ईदादीनां विशेष्यत्वं द्विवचनस्य च विशेषणत्वम्, द्विवचनसंज्ञं यदीदादि तत् प्रगृह्यमित्यर्थ इत्याद्यः । प्रत्ययग्रहणपरिभाषया द्विवचनपदं द्विवचनान्तपरम्, ईदादीनां विशेषणत्वात्तदन्तविधिः, ईदाद्यन्तं द्विवचनान्तमिति द्वितीयः । ईदाद्यन्तं यद् द्विवचनं तदन्तमिति तृतीयः । द्विवचनमेव संज्ञि वक्ष्यमाणयुक्तेः, ईदाद्यन्तं द्विवचनं प्रगृह्यसंज्ञमिति वाक्यार्थ इति चतुर्थः ।

तत्राद्ये पचेते इत्यादौ संज्ञा न स्यात्, एकारस्य द्विवच-

नावयवत्वेऽपि द्विवचनत्वाभावात् । न च मुख्यानुपपत्त्या शास्त्रप्रामाण्याद्गौणे प्रवृत्तिः । गङ्गे इत्यादौ "अन्तादिवच्च" इत्यादिवद्भावेन एकारस्य मुख्यद्विवचनत्वेन तत्र चारितार्थ्यात् । द्वितीयेऽपि कुमार्योरगारं कुमार्यगारम् वध्वोरगारम् वध्वगारमित्यादावतिप्रसङ्गः । प्रत्ययलक्षणेन द्विवचनान्तत्वात् । स्वरूपत ईदूदन्तत्वाच्च । तृतीयेऽपि अशुक्ले शुक्ले सम्पद्येतां शुक्ल्यास्तां वस्त्रे इत्यत्र प्रथमाद्विवचनस्य "नपुंसकाच्च"इति शीभावे च्विप्रत्यये "सुपो धातुप्रातिपदिकयोः" इति शीलोपे "अस्य च्वौ" इति शुक्लशब्दान्त्याकारस्य ईत्वे तद्धितान्तत्वादुत्पन्नस्य सुप्रत्ययस्याव्ययत्वाल्लुकि कृते शीशब्द ईकारान्तं द्विवचनं प्रत्ययलक्षणेन च पदं तदन्तमित्यतिप्रसङ्गः ।

ननु पक्षद्वयेऽपि न दोषः । "ईदूतौ च सप्तम्यर्थे" इत्यत्र सप्तमीत्येवोक्तेऽपि प्रत्ययलक्षणेन "सोमोगौरी अधिश्रित" इत्यत्र प्रगृह्यसंज्ञासिद्धौ अर्थग्रहणेन प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापयितुं शक्यत्वात् । शुक्ल्यास्तामित्यत्र "अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते"इति न्यायादौकारस्यैव लोपेन शीभावाप्रवृत्तेः प्रत्ययलक्षणे सत्यपि दोषाभावाच्च । ईदाद्यन्तत्वस्य तावताऽप्यलाभाद् इति चेत्, मैवम् । तथाऽपि तदन्तग्रहणदौर्लभ्यादेव पक्षद्वयस्य दुष्टत्वात् । "संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति" इति "सुप्तिङन्तं पदम्" इत्यन्तग्रहणेन ज्ञापितत्वात् । तस्मादीदूदेदन्तं यद्द्विवचनमित्येव युक्तम् । सन्निधानेन द्विवचनस्यैव संज्ञित्वप्रतीतेः ।

न चैवं यथोक्तोदाहरणेषु ईदादिस्वरूपेषु तदन्तत्वं नास्तीति वाच्यम् । व्यपदेशिवद्भावेन तदन्तत्वसम्भवात् ।

अत्र "मणीवादीनां प्रतिषेधो वक्तव्यः" इति पठित्वा म-

णीव रोदसीव दम्पतीवेति वृत्तिकृतः ।

कैयटादयस्तु भाष्यवार्त्तिककाराभ्यामपठितत्वादप्रमाणमेतत् । मणीवोष्ट्रस्येति तु प्रयोगो वाशब्दस्योपमानार्थस्य । रोदसीवेत्यादिस्तु छान्दसः प्रयोग इत्याहुः ।

एवं च न्यायसाम्यान्मुनित्रयानुक्तानां "तुरीयस्येष्टिः" "शंसिदुहिगुहिभ्यो वा" "क्रमेके छन्दसि भाषायां च" इत्यादीनां वृत्तिकृन्मात्रोक्तानामियमेव गतिः । नन्वेवम्—

स्फुटोत्पलाभ्यामलिदम्पतीव तद्विलोचनाभ्यां कुचकुड्मलाशया ।
निपत्य बिन्दू हृदि कज्जलाविलौ मणीव नीलौ तरलौ विरेजतुः ॥

इति नैषधस्य का गतिः, वाशब्दस्यात्रासङ्गतेः पौरुषेयत्वाच्चेति चेत्, अत्राहुः— इवार्थस्य वाशब्दस्यायं प्रयोगः । न च तत्र मानाभावः ।

वं प्रचेतसि जानीयादिवार्थे च तदव्ययम् ।

इतिविश्वदर्शनात् । "कादम्बखण्डितदलानि व पङ्कजानि" इत्यादिप्रयोगात् । "व वा यथा तथैवैवम्" इत्यमरव्याख्यायाम् "शात्रवं व पपुर्यशः" इति कालिदासप्रयोगस्य तद्व्याख्यातृभिरुदाहृतत्वाच्च ।

यत्तु अमरे अयमेव पाठो युक्तः, न तु वद्वेति क्षीरस्वाम्युक्तः । प्रातिपदिकप्रक्रमे तद्धितस्य वतेरननुगुणत्वात् । अपत्यसमूहादिपर्यायमध्ये अण्फिञ्वुञादीनामनुक्तेश्चेति । तच्चिन्त्यम् । तद्धितत्वमात्रेण प्रक्रमविरोधे यथेत्यादीनामप्यनुपादानप्रसङ्गात् । प्रकृतिनिर्मुक्तस्य तथात्वे तु प्रकृतिविशेषस्य नियतत्वस्योपाधित्वात् । थादीनां प्रकृतिविशेषोत्तरमेव विहितत्वात् । वतेस्तु तदभावात् । अत एव अणादीनामित्यादिकमपास्तम् । तेषामपत्यसमूहाद्यर्थविशेषासाधारणरूपाभावात् ।

प्रकृतिविशेषगर्भतया तु "गार्भिणं गणे" इत्यादिना तत्तत्प्रकरणे बहुशो दार्शितत्वात् । वतेश्च सादृश्यएव विधानात् ।

अदसो मात् १२ ।

अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते । मात्किम् । अमुकेऽत्र । न चात्र एकारस्याननुवृत्तेरेव नातिप्रसङ्ग इति वाच्यम् । माद्ग्रहणसामर्थ्यादेवैकाराननुवृत्तिलाभात् । अदश्शब्दसम्बन्धिमकाराव्यवहितोत्तरस्य तस्यासम्भवात् । न च अमू आसाते इत्यत्र पूर्वेणैव सिद्धिरिति वाच्यम् । तत् प्रति मुत्वस्यासिद्धतया औकारान्तत्वात् । न चैवमनेनाप्यनिर्वाहः । आरम्भसामर्थ्यादत्र मुत्वस्यासिद्धत्वाभावात् । यद्वार्त्तिकम्—

आश्रयात्सिद्धत्वं यथा रोरुत्वे इति ।

किं च स्त्रीनपुंसकयोर्द्विवचने मुत्वस्यासिद्धत्वेऽप्येकारान्तत्वमेवाश्रित्य पूर्वेण प्रगृह्यत्वासिद्धिः । तत एव प्रकृतिभावानुनासिकपर्युदासावपि सिद्धौ । कार्यकालपक्षे तु "अणोऽप्रगृह्यस्य" इत्यत्रोपस्थितेन सूत्रेण संज्ञायां क्रियमाणायां मुत्वस्य सिद्धत्वाल्लिङ्गत्रयेऽपि द्विवचनेऽनुनासिकपर्युदासः पूर्वेणैव सिद्धः । एतत्सूत्रं तु बहुवचनार्थं पुंसि द्विवचने प्रकृतिभावार्थं चेति विवेकः ।

शे १३ ।

अयं प्रगृह्यः । अस्मे इन्द्राबृहस्पती । न युष्मे वाजबन्धवः । आद्ये चतुर्थीबहुवचनस्य द्वितीये द्वितीयाबहुवचनस्य च

स्थाने " सुपां सुलुग् " इत्यादिसूत्रेण शे आदेशः । शित्त्वात्सर्वादेशत्वम् । "शेषे लोपः" इति टिलोपः । न चान्त्ये संज्ञावैयर्थ्यम् । पदपाठकाले इतिशब्दप्रयोगे सार्थक्यात् । एवम् " अस्मे धत्त वसवो वसूनि " इत्यादिकमपि बोध्यम् । काशे कुशे वंशे इत्यादौ लोमादित्वात् शप्रत्ययान्ते हारिशे बभ्रुशे इत्यादौ च लक्षणप्रतिपदोक्तपरिभाषया न दोषः ।

निपात एकाजनाङ् १४ ।

आङ्भिन्न एकाच् स्वरूपो निपातः प्रगृह्यसंज्ञः । अ अवद्य । इ इन्द्रः । उ उमेशः । अ निषेधाधिक्षेपयोः । इ विस्मये । उ जुगुप्सादिषु । अत्रैकाच्शब्दे कर्मधारयः, लाघवात् । "व्याहरति मृगः" इत्यादिनिर्देशाच्च । तेन प्रेदं ब्रह्मेत्यादौ नातिप्रसङ्गः ।

नन्वेवं एकग्रहो व्यर्थः । निपातस्याचः संज्ञयैव सिद्धेः । न चाजन्तस्य निपातस्येत्यर्थवारणाय तदिति वाच्यम् । विशेषणवैयर्थ्यापत्तेः । हलन्तस्य प्रगृह्यत्वे सत्यपि क्षत्यभावात् । न च पुरोऽस्तीत्यादौ सकारान्तस्य प्रकृतिभावे रोरुत्वं न स्यादिति वाच्यम् । संज्ञां प्रति रुत्वस्यासिद्धत्वात् । न चैकदेशविकृतन्यायेन रेफान्तस्य संज्ञाप्रसङ्गः । प्रकृतिभावं प्रत्यपि रुत्वस्यासिद्धत्वात् । सिद्धकाण्डस्थकार्यात्परस्य च सकारान्ते प्रसक्त्यभावात् । न चाजन्तस्यैव संज्ञा, न त्वज्मात्रस्येत्यर्थलाभाय विशेषणं स्यादिति वाच्यम् । " आद्यन्तवदेकस्मिन् " इति अज्मात्रस्याप्यजन्तत्वात् ।

न च विशेषणसामर्थ्याद्व्यपदेशिवद्भावपरित्यागः । तदन्तविधिपरित्यागेनापि तस्य चारितार्थ्यसम्भवात् । न च विनिगमकाभावः । "अनाङ्"इत्यस्यैव तत्त्वात् । व्यपदेशिवद्भाव-

मात्रबाधे हि तद्व्यर्थं स्यात् । आङः केवलाच्स्वरूपत्वेन प्राप्तेरेवाभावात् । अचो विशेष्यत्वे तु तदन्तविधिशङ्काऽपि नेति किमेकपदेनेति प्राप्ते । भाष्यकृतः–

अच्समुदायग्रहणशङ्कानिरासायैकग्रहणं कुर्वन्नाचार्यो ज्ञापयति–वर्णग्रहणेषु व्यक्तिसंख्या न विवक्ष्यते, किं तु जातिरेव निर्दिश्यतइति ।

तेन " हलन्ताच्च " इति सूत्रे यद्वक्ष्यति वार्त्तिककारः—

दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति,

तत् सूत्रेणैव संगृहीतं भवति । तस्यार्थो हि दम्भेः सिद्धमित्यन्वयः । कित्त्वमिति शेषः । तत्र हेतुः हल्ग्रहणस्य जातिवाचकत्वादिति । दम्भेः सन् । "सनीवन्त" इत्यादिविकल्पादिडभावः । "दम्भ इच्च" इति इत्वम् । पक्षे ईत्वश्च । "अत्र लोप" इत्यभ्यासलोपः । दिन्भ्सति दीन्भ्सति इति स्थिते–" हलन्ताच्च " इति सनः कित्त्वमिष्यते । इकः समीपो यो हल् ततः परः सन् कित्स्यादिति तस्यार्थः । प्रकृते च इकः परत्वं नकारे, न तु ततः परः सन् । भकारेण व्यवधानात् । भशब्दात्तु परः सन्, न तु भशब्द इकः परः । नकारेण व्यवधानादिति कित्त्वं न स्यात् । जातिवाचकत्वे तु नकारभकारयोर्हल्त्वरूपैकधर्मावच्छिन्नतया इष्टसिद्धिः । ततः कित्त्वान्नलोपः । भष्भावेन दस्य धत्वम् । भकारस्य चर्त्वेन पकार इति धिप्सति धीप्सतीति सिद्धम् ।

ननु अच्समुदायनिवृत्त्यर्थमेवैकपदं स्यात् । अइउ अपेहीत्यत्र हि समुदायस्यैव संज्ञा स्यात्, न तु पूर्वयोरिति तत्र गुणादिकं स्यादिति चेत्, अत्राहुः—

संज्ञाया विधेयत्वात् प्राधान्यम्, संज्ञिनस्तु गुणत्वमिति प-

शुना यजेतेतिवदेकत्वस्य विवक्षयैव समुदायनिरास इति ।

यद्यपि समुदायकार्येणावयवानां कार्यनिर्वाह एकाज्द्विर्वच-नन्याये बीजम्, न चात्र तथा, समुदायसंज्ञयाऽवयवानां प्रकृति-भावानिर्वाहादिति न तस्यात्र विषयः, तथाऽपि समुदायग्रहण-शङ्कानिरासायैव कृतमेकग्रहणं ज्ञापकमिति बोध्यम् । निपात इति किम् । चकारात्र । णलोऽकारस्य प्रकृतिभावो मा भूत् । न चार्थवद्ग्रहणन्यायेन निर्वाहः । अन्वयव्यतिरेकाभ्यां प्रत्ययस्या-प्यर्थवत्त्वात् । केवलयोः निपातप्रत्यययोरप्रयोगस्यापि तुल्य-त्वात् । एवम् अत सातत्यगमने "अन्येभ्योऽपि" इति डप्रत्य-यः, टिलोपः, अ आगच्छेत्येतदपि प्रत्युदाहरणम् । यद्यपि नञिवयुक्तन्यायेनापि आङ्भिन्नो निपात एव गृह्यते, तथाऽपि तन्न्यायस्य व्यभिचारित्वान्न दोषः । भेदप्रतियोगितावच्छेदक-तया ङकारानिर्देशस्तु ङितः प्रगृह्यसंज्ञा यथा स्यादित्येतदर्थः । तद्विवेकस्तु भाष्ये—

ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

आ उष्णम्, ओष्णम् । आङीषदर्थ इति ङिन्निर्दिष्टः । आ इतः, एतः । प्रादौ ङित्पठितः । आ उदकान्तात्, ओदकान्तात् । आ अ-हिच्छत्रात्, आहिच्छत्रात् । "आङ् मर्यादाऽभिविध्योः" विना तेने-ति मर्यादा । सह तेनेत्यभिविधिः । परिच्छेद्यमध्ये अवधेरनन्तर्भावे अन्तर्भावे चोभयम् । तथा चावधित्वार्थकपदसमभिव्याहृतपदस्य स्वार्थतदुत्तरोभयव्यवच्छेदपरत्वे मर्यादा, स्वार्थोत्तरमात्रव्यव-च्छेदपरत्वेऽभिविधिरिति बोध्यम् । अत्र ङित्त्वात् न प्रकृ-तिभावः ।

अङित्तु यथा—आ एवं नु मन्यसे । पूर्वप्रक्रान्तवाक्यार्थस्या-

न्यथात्वद्योतनार्थ आकारः। पूर्वमेवं नामंस्थाः, सम्प्रति त्वेवं म-न्यसे इत्यर्थः। वाक्यारम्भसूचनायाकारः इत्यपरे। आ एवं किल तत्। स्मृतेः सूचक आकारः। ततः स्मृतोऽर्थो निर्दिश्यते। अत्र च वाक्यस्मरणयोरङित्त्वे एव तात्पर्यम्। तेन ईषदर्थादि-चतुष्टयानन्तर्भावेऽपि उभयभिन्ने ङित्त्वमेव। तेन अभ्र आँ अप इत्यत्र सप्तम्यर्थवृत्तेरप्याकारस्य "आङोऽनुनासिकः" इति सि-ध्यतीति ग्रन्थकृतः। अत एवैतच्छब्देन पूर्वार्द्धोक्तार्थचतुष्टयपरा-कारपरामर्शात् ङिद्द्विधावुद्देश्यपरामर्शकत्वाभावान्नान्वादेशत्व-मित्येनादेशविरहः सङ्गच्छते। उभयाभिन्नार्थे ङित्त्वस्यैव चतु-र्थचरणानुसारेणार्थसिद्धत्वात्।

केचित्तु पूर्वमेतच्छब्देनानुपादानान्नान्वादेशत्वमित्याहुः। तन्न। शब्दान्तरेणाप्यन्वादेशत्वस्य भाष्यकृता वक्ष्यमाणत्वात्। त-स्मादीषदर्थादिषु वर्ततइति वृत्तिर्न विधेया, किन्तु परिचायक-तामात्रेणोपात्तेति न तथेति दीक्षिताः इत्यन्यत्र विस्तरः।

अत्र वदन्ति—"अनाङ्"इत्यस्य पर्युदासत्वं न युक्तम्। त-था हि। अशब्दो वासुदेवार्थकः। "आङ् मर्यादाऽभिविध्योः" इत्यव्ययीभावः। आ आत् अं "ह्रस्वो नपुंसके प्रातिपदिकस्य" इति ह्रस्वः। अशब्दस्य स्वाभाविकमाङ्भिन्नत्वं स्थानिवद्भाव-कृतं निपातत्वं चाश्रित्य अ इतः एत इत्यत्र प्रगृह्यसंज्ञाप्रसङ्गात्। "आसमुद्रक्षितीशानाम्" इतिवत्समासः। न च आङ्भावाति-देशे आङ्भिन्नत्वव्यपदेशनिवृत्तिः। गुरुवद् गुरुपुत्रे वर्तितव्य-मित्यत्र गुरुत्वस्येव आङ्वद्भावेन आङ्त्वस्यानतिदेशात्। अति-देशे वा "आङ्यमकारः" इत्याहार्यबुद्धेराङ्भिन्नोऽयमिति बुद्धा-ववरोधात्। अतिदेशानां च स्वाश्रयानिवर्त्तकत्वात्। ब्राह्मण-वदस्मिन्क्षत्रिये वर्तितव्यमित्यत्र क्षत्रियत्वव्यपदेशनिवृत्त्यभावात्।

अस्तु वा एकादेशेऽपि स्थानिवद्भावेनैव परावर्णगतस्या-ङ्गभिन्नत्वस्याश्रयणम् । कैयटादावपि परादिवद्भावेनैकादेशस्या-ङ्गभिन्नत्वाश्रयणात् । तस्मात्प्रसज्यप्रतिषेध एव युक्तः । वाक्य-भेदासमर्थसमासाश्रयणस्य कार्यानुरोधेनादोषत्वात्, "अनचि" "आशिति" इत्यादिवत् । अत एवोत्तरसूत्रे प्रतिषिद्धार्थोऽ-यमारम्भ इति भाष्यं सङ्गच्छते इति ।

इदं त्ववधेयम् । पर्युदासपक्षे नञिवयुक्तन्यायबलादेव निपातलाभसम्भवेऽपि निपातपदोपादानं स्वयमेव यो निपात-स्तस्यैव प्रगृह्यत्वम्, न तु स्थानिवद्भावप्रयुक्तनिपातत्वकस्येत्येत-दर्थकम् । तेन नोक्तदोषः । अतिदेशेनैव तत्र निपातत्वस्यानीय-मानत्वात् । निपातग्रहणस्य चोत्तरार्थत्वेऽपि "इहाकिञ्चित्रपो इति" इति न्यायेनात्रोपादानस्यापि प्रयोजनसम्भवे सति त्यागायोगा-त् । एवम् एकग्रहणस्याप्यत्र पूर्वोक्तरीत्या प्रयोजनाभावान्मु-ख्यार्थकमेवैकपदं व्याख्यायताम् । "एके मुख्यान्यकेवलाः" इत्यमरोक्तेः । तच्चौपदेशिकत्वरूपमत्र ग्राह्यम् । तेन मुख्यत्वस्य सामानाधिकरण्येन निपातत्वलाभादातिदेशिकनिपातत्वमाश्रित्य नोक्तदोषः । न चैवं "वर्णग्रहणे जातिग्रहणम्" इत्यत्र ज्ञापकानु-पपत्तिः । अपृक्तसंज्ञासूत्रे एकग्रहणस्यापि भाष्यएव तज्ज्ञापक-त्वोक्तेः । एतेन तत एव सिद्धावत्रत्यमेकग्रहणं व्यर्थमित्यपि शङ्काऽन्तरं परास्तम् । विनिगमकाभावाच्च । वक्ष्यति तत्र तथै-व कैयटः ।

नन्वेवमपि "प्रतिषिद्धार्थम्" इति भाष्यविरोधो दुर्वार इति वाच्यम् । अदोऽभवदित्यत्रातिप्रसङ्गशङ्काया लक्षणप्रतिपदोक्तप-रिभाषया समाधानस्य च तदुक्तस्यानुपपत्त्या तद्ग्रन्थस्य प्रौढि-वादत्वात् । न चोत्तरग्रन्थ एव प्रौढिवादो लक्षणप्रतिपदोक्तप-

रिभाषाया वर्णग्रहणेष्वप्रवृत्तेरिति वाच्यम् । तथाऽपि गोऽभवदित्यत्रातिप्रसङ्गशङ्कादेरनुपपत्तेः। "अनाङ्" इत्यत्र प्रसज्यप्रतिषेधपक्षे वाक्यभेदासमर्थसमासाश्रयणापत्तेश्च । आङ्भावातिदेशेन तद्भिन्नत्वव्यपदेशानिवृत्तावपि तत्कार्याणां निवृत्तेश्च । गुरौ गुरुभिन्नत्वव्यपदेशसत्त्वेऽपि गुरुत्वप्रयुक्तकार्यप्रवृत्तेः । आहार्यबुद्धेरपि शास्त्रप्रामाण्येन कार्यनियामकत्वात् । असिद्धस्थले तथैव क्लृप्तत्वात् ।

ओत् १५ ।

ओकारान्तो निपातः प्रगृह्यः । आहो इति । उताहो इति । निपात इति किम् । " नियुत्वान्वायवायाहि " " विष्णउरुगायेव ते सोमः " इत्यादौ मा भूत् ।

वृत्तिकृतस्तु गवित्ययमाहेत्यपि प्रत्युदाहरन्ति ।

अत्र वदन्ति—"तत्र प्रगृह्यसंज्ञासत्त्वेऽपि न क्षतिः । प्रकृतिभावविधौ पदान्ताधिकारादेव तदप्रसक्तेः । गवित्ययमाहेत्यत्र च विभक्तिश्रवणाभावादनुकार्यानुकरणयोरभेदविवक्षयाऽर्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तेरनुत्पत्त्या पदान्तत्वाभावात् । "अपदं न प्रयुञ्जीत" इत्यस्य चापरिनिष्ठितप्रयोगनिषेधार्थत्वात् । प्रकृते च गो इति स्वरूपस्यैव परिनिष्ठितत्वात् । अत एवेह " लोपः शाकल्यस्य " इति न प्रवर्तत इति । न चैवं "हेऽलयो हेऽलय इति कुर्वन्त" इत्यत्र कथं रुत्वयत्वयलोपा इति वाच्यम् । तत्र भेदाविवक्षया सुप्रत्ययं कृत्वा " हल्ङ्याब्भ्यः " इति विभक्तिलोपेन "प्रकृतिवदनुकरणम्" इत्यतिदेशेन वा पदान्तत्वात् । तस्मात्प्रकृतिभावविधौ पदान्तग्रहणानुवृत्तिर्नास्तीत्यभिप्रायेण वृत्तिग्रन्थो योज्यः" इति । नन्वाहो इत्यादयो निपा-

तसमुदायाः, आह उ आहो, उत आह उ उताहो इत्यादि, ततः पूर्वेणैव संज्ञा सिद्धा आदिवद्भावेन । न च आहो इतीत्यादौ " उञ ऊँ " इत्यस्यापात्तिः । ञकारानुबन्धस्यैव तत्र ग्रहणात् । न च निरनुबन्धउकारे मानाभावः । तत्रैव भाष्ये वक्ष्यमाणत्वात् । न च आ उ इत्यनयोरेकादेशे ओ इत्यत्रान्तवद्भावेन आङ्ग्रहणेन तद्ग्रहणेन "अनाङ्"इति प्रतिषेधः स्यादतस्तन्निरासायेदम् । अन्यथा "ओषु यातं मरुतः" "ओषु यातं बृहती शक्करी च" "ओचित्सखायं सख्यावन्त्याम्" इत्यादौ प्रगृह्यसंज्ञाऽनापत्तेः । न चाच्परत्वाभावात्तत्सत्त्वेऽपि न विशेष इति वाच्यम् । कस्याश्चिच्छाखायाम् ओ अयातमिति पाठे विशेषसम्भवात् । प्रतिषेधार्थोऽयमारम्भ इति भाष्यस्यैव च तत्र प्रमाणत्वात् । न च नैतद्भाष्यकृतो विवक्षितम्, अदोऽभवदित्यादावतिप्रसङ्गस्याग्रे शङ्कितत्वात्, प्रतिषिद्धार्थत्वे तत्र प्रसक्तेरेवाभावादिति वाच्यम् । उभयार्थत्वेऽप्यविरोधात् । विध्यर्थत्वात्परत्वाद् "अनाङ्" इति प्रतिषेधबाधकत्वस्य च सम्भवादिति समाहितत्वात् ।

अस्तु वा "अनाङ्" इति पर्युदास एव, तथाऽपि आङ्नाङोरेकादेशस्यादिवद्भावेन अनाङ्ग्रहणेन ग्रहणात् । तत्किमर्थमिदं सूत्रमिति चेत्, अत्र भाष्यम्—

एकनिपाता इमे इति ।

अखण्डा एव, न तु निपातसमुदायाः । अतोऽपूर्वविधिरेवायम् । अत एव "ओषु यातं मरुतः" इत्यादौ पदपाठकाले ऐकपद्येनैव पाठः । एवम् आम् आहो देवदत्तेतीत्यत्र " आम एकान्तरमामन्त्रितम् " इति निघातप्रतिषेधोऽपि ।

अथ तथाऽपि अदश्शब्दात् च्विप्रत्यये " ऊर्यादिच्विडाचश्च " इति गतिसंज्ञायां " कुगतिप्रादयः " इति समासे

अनदः अदः अभवत् अदोऽभवत् इत्यत्रातिप्रसङ्गः । गतिसंज्ञाविधेः "प्राग्रीश्वरान्निपाताः" इत्यधिकारान्तर्भावेन च्विप्रत्ययान्तानां निपातत्वात् । न च लक्षणप्रतिपदोक्तपरिभाषया निर्वाहः । वर्णग्रहणेषु तदप्रवृत्तेः । अन्यथा हरये इत्यादौ "एचोऽयवायावः" इत्यस्याप्रवृत्त्यापत्तेः । चक्रे इदम् इत्यादौ चारितार्थ्यात् ।

किञ्च तथाऽपि अगौर्गौरभवत् गोऽभवद् इत्यादौ दोषो दुर्वारः । "गमेर्डोः" इति ओकारस्य स्वरूपत उच्चारणेन प्रतिपदोक्तत्वात् इति चेत्, अत्र भाष्यम्—

गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति ।

तद्यथा—"गौरनुबन्ध्योऽजोऽग्नीषोमीयः" इति न वाहीकोऽनुबध्यतइति । अयमर्थः । "स्वं रूपम्" इत्यत्र रूपग्रहणेनार्थग्रहणस्यापि ज्ञापितत्वात् अर्थवतः कार्येण भवितव्यम् । अर्थश्च द्वेधा, मुख्यो गौणश्च । तत्पदशक्तिविषय आद्यः । गौणस्तु सादृश्यनिमित्तकवृत्तिविषयः । गुणनिमित्तकवृत्तिसम्बन्धित्वेन शब्दवदर्थेऽपि स्वारसिकगौणपदप्रयोगात् । तत्र प्राथम्यान्मुख्यार्थस्यैव ग्रहणम् । वृत्त्यन्तरस्य तद्बाधएव समुल्लासात् । शक्यार्थभानस्यापि तत्राभ्युपगमेन तत्पूर्वकत्वाच्च । शक्यसमवेतगुणप्रकारकबोधत्वस्यैव स्वशक्यगुणवत्तारूपवृत्तिज्ञानकार्यतावच्छेदकत्वोपगमात् । ततश्च गोऽभवादित्यत्र प्रकृतेरेव कर्तृत्वम् । "सङ्घीभवन्ति ब्राह्मणाः" "पटीभवन्ति तन्तवः" इत्यादौ वचनव्यवस्थायाः "त्वद्भवति देवदत्तः" "मद्भवासि त्वम्" "त्वद्भवाम्यहम्" इत्यादौ पुरुषव्यवस्थायाश्च तत एवोपपत्तेः ।

प्रकृतित्वमत्रारोपविषयत्वं बोध्यम् । तत्र च गोत्वादिकमारोपितमेव, न मुख्यमिति । न च गौणे-

ऽपि गुणानामेव प्रवृत्तिनिमित्तत्वाभ्युपगमात्कथं वाहीकादौ गोत्वारोप इति वाच्यम् । स्वोत्प्रेक्षाप्रभवारोपविषयीभूतार्थवृत्तित्वं गौणत्वमिति मतेन तदुक्तेः । अत्र हि शब्दस्य स्वाभिधेयं विनाऽन्यत्र गुणयोगमात्रेण प्रवृत्त्यभावात् । आरोपविषये विषयितावच्छेदकधर्मस्यैवारोपः । न च विविक्तत्वेन तदनुपपत्तिः । शुक्तिकादौ चाकचक्यादिसादृश्येन रजतत्वाद्यारोपवत् "योषा वाव गौतमाग्निः" इति पञ्चाग्निविद्यायां रेतोमयहविःप्रक्षेपरूपहोमाधिकरणत्वसादृश्येन योषायामग्नित्वारोपवत् जाड्यक्रूरत्वादिसादृश्येन वाहीकमाणवकादौ गोत्वसिंहत्वाद्यारोप इत्यास्तां प्रासङ्गिकम् । तस्मान्न गौणे प्रगृह्यसंज्ञेति । नन्वेवं गौस्तिष्ठति गामानयेत्यादौ गौणे वृद्ध्यात्वादिकमपि न स्यादिति चेत् , अत्र कैयटहरदत्तादयः—

पदकार्येष्वयं न्यायो न प्रातिपदिककार्येषु इति ।

तथा हि । स्वार्थे वृत्तात्प्रातिपदिकाद्विभक्तावुत्पन्नायां कार्येषु कृतेषु शब्दान्तरसन्निधानाद्गौणत्वं प्रतीयते । गोऽभवदित्यत्र तु गौणत्वं विना च्विप्रत्यय एव दुर्लभ इति वैषम्यम् ।

किञ्च गुणक्रिययोः श्रौतः क्रियासम्बन्धः " श्वेतं छागमालभेत " इत्यादौ वाक्यीयात्तु न्यायात्परस्परेण श्वेतस्य आश्रयापेक्षायां व्यक्तिवचनन्यायेन छागपरत्वम्, छागस्य च गुणाकाङ्क्षायां श्वेतपरत्वमिति पार्ष्ठिकः परस्परावच्छेदः । शाब्दान्वयस्तु क्रियायामेवेति भाट्टसिद्धान्तः । एवं गां वाहीकमानयेति पूर्वं क्रियासम्बन्धापेक्षया विभक्तावुत्पन्नायां पश्चात्सामानाधिकरण्याद्द्‍ गौणार्थप्रादुर्भावो भवतीति । तदेतदुक्तं भाष्यकृद्भिः—

यत्तु शब्दाश्रयं तच्छब्दमात्रे भवति, शब्दाश्रये च वृद्ध्यात्वे इति।

यत्तु वाक्यसंस्कारपक्षे वृद्ध्यात्वप्रवृत्तितः प्रागेव गौणार्थावगतेः आद्यमयुक्तमिति, तदसत्। गौणार्थावगतिमात्रस्याकिञ्चित्करत्वात्। तस्य कार्यप्रवृत्तावनुपयुक्तत्वात्। अन्यथा गामानयेति मुख्यार्थे वृद्ध्यादेरप्रवृत्तिप्रसङ्गात्।

यदपि "किञ्चेत्यादिकं न युक्तम्, ब्रूते पाठयेत्यादिक्रियान्वयायैव गौणताया आश्रयणीयत्वात्" इति, तदप्यसत्। "अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यादावपि अरुणया क्रीणातीति वाक्ये गुणमात्रस्य क्रयसाधनत्वानुपपत्त्या तदर्थं प्रागेव क्रयसाधनद्रव्यसम्बन्धेन क्रयान्वयापत्तौ तत्सिद्धान्तभङ्गप्रसङ्गात्। अयोग्यताज्ञानस्य शाब्दधीप्रतिबन्धकतया तदभावेन स्वरूपसतैवारुण्यस्य क्रयभावनायामन्वये ज्ञाते पश्चादेव योग्यताकाङ्क्षायाममूर्तत्वेन साक्षादयोग्यत्वेऽपि द्रव्यपरिच्छेदरूपव्यापारद्वारा करणत्वयोग्यतानिर्णयः। प्रथमं तु कारकान्तरवदेव भावनायामारुण्यस्य सम्बन्ध इत्यादेस्तत्र निरूपितत्वात्। प्रकृतेऽपि तद्रीत्या पूर्वं गौणत्वप्रत्यये बीजाभावात्।

यदप्युक्तम्, "कटोऽपि कर्म भीष्मादयोऽपि" इति पक्षे उक्तिसम्भवेऽपि सामानाधिकरण्याद्भीष्मादेर्द्वितीयेति भाष्योक्तपक्षान्तरे त्वदुक्तन्यायावतारो नास्तीति, तदप्यसत्। पार्ष्ठिकपरस्परावच्छेदावस्थाभिप्रायेणैव तदुपपत्त्या पूर्वं गौणत्वप्रत्ययस्यानावश्यकत्वात्। एतत्पक्षे पूर्वं सामानाधिकरण्यस्यैवानङ्गीकारात्।

यदप्याहुः— महद्भूतश्चन्द्रमा इत्यादौ "आन्महतः" इत्यात्वं विशिष्टरूपग्रहणेन क्रियमाणं गौणे न भवतीति युक्तम्,

इह तु "ओद्" इति वर्णपुरस्कारेण विधीयमाना प्रगृह्यसंज्ञा कथं गौणार्थवृत्तेर्न भवेत्। निपातसंज्ञा तु तस्यापि मुख्यैव । अत एव श्वशुरसंज्ञस्य कस्यचिदपत्ये श्वाशुरिरित्यत्र "अत इञ्" प्रवर्त्तते । वर्णाश्रयत्वात् । न तु "राजश्वशुराद्" इति यत्। विशिष्टरूपोपादानात् । अन्यथा इञ्यतोस्तुल्ययोगक्षेमतैव स्यात्। गोशब्दे वृद्ध्यात्वे अपि वर्णाश्रयत्वादेव, न तु प्रातिपदिककार्यत्वात् । "गोतः" इति तपरत्वस्य ओकारान्तोपलक्षणार्थत्वात् इति, तदपि चिन्त्यम् । अकारादीनामैक्यपक्षे बाहुक इत्यादौ चरितार्थानां "नौह्यचः" इत्यादीनां घटिक इत्यादौ प्रवृत्तिर्न स्यादित्याशङ्कापराणाम् अइउण्सूत्रस्थभाष्यादिग्रन्थानां विरोधात् । प्रकृतसूत्रस्थोक्तभाष्यविरोधाच्च ।

यत्तु "राजश्वशुरात्" इत्यादि, तदसत् । श्वशुरपदस्य हि भार्याभर्त्रन्यतरजनकत्वे सति पुँस्त्वं शक्यतावच्छेदकम्, संज्ञाश्वशुरस्य तु व्यक्तिस्वरूपं शक्यम्, शब्दस्वरूपं च शक्यतावच्छेदकम्। आद्यं प्रसिद्धिवशाच्छीघ्रोपस्थितिकम्, न त्वन्त्यमिति विशेषः । श्वशुरशब्दस्य स्वरूपेणोपादानस्थले शीघ्रोपस्थित्यर्थवाचके चरितार्थं शास्त्रं द्वितीये न प्रवर्तते । "अत इञ्" इत्यत्र त्वकारान्तस्य संज्ञाश्वशुरेऽपि सत्त्वात्कथं न इञ् प्रत्ययः प्रवर्त्तेत । तदुपस्थितौ प्रथमश्वशुरपदार्थबोधस्यानपेक्षितत्वेन तच्छब्दस्य प्रथमोपस्थितत्वाभावात् ।

प्रकृते तु ओकारान्तनिपातस्य प्रगृह्यसंज्ञाविधाने ओदन्तत्वविशिष्टनिपातत्वावच्छिन्नतया च्विप्रत्ययान्तगोशब्दोपस्थितौ गौणार्थज्ञानस्य शक्यार्थज्ञानपूर्वकत्वनियमेन च्व्यन्तगोशब्दस्य गौणत्वं प्रागेव प्रतीयतइति वैषम्यम् । ननु तथाऽप्युद्देश्यतावच्छेदकरूपानपायाद् दुर्वारैव संज्ञेति चेन्न । निपातत्वं ह्यत्रोद्दे-

श्यतावच्छेदकम्, ओदन्तत्वं तूद्देश्यतावच्छेदकतावच्छेदकम्। तद्घटकसम्बन्धो यदि सामानाधिकरण्यमात्रं तर्हि "अथोपयन्त्रा सदृशेन युक्ताम्" इत्यत्रैकादेशस्य पूर्वान्तत्वेन ग्रहणादोकारान्तत्वं निपातत्वं चास्तीति "अथातो ब्रह्मजिज्ञासा" इत्यादावप्यथशब्दस्य प्रगृह्यसंज्ञा स्यात्। तथा च यस्यां व्यक्तौ ओदन्तत्वनिपातत्वयोः समनियतत्वं तत्रोक्तविधिप्रवृत्तिरिति वक्तव्यम्। गोशब्दे च निपातत्वाभावदशायामप्योदन्तत्वमस्त्येवेति न प्रवृत्तिः। अहो इत्यादौ उभयमप्यस्तीति नाव्याप्तिः। एतेन निपातसंज्ञा तस्यापि मुख्यैवेत्यपास्तम्। उक्तरीत्या उद्देश्यतावच्छेदकरूपवैकल्यात्। संज्ञामात्रस्याकिञ्चित्करत्वात्। एतेन "गौणमुख्ययोः" इति भाष्यं व्याख्यातम्। यस्य ओदन्तस्य निपातत्वाभावः कदाऽपि नास्ति सोऽत्र गृह्यतइत्यर्थात्।

सम्बुद्धौ शाकल्यस्येता-वनार्षे १६।

ऋषिर्वेदः। "तदुक्तमृषिणा" इत्यादिदर्शनात्। "ऋषिर्वेदे वसिष्ठादौ" इत्यभिधानाच्च। अवैदिके इतिशब्दे परे सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्यः। विष्णो इति। विष्णविति। अनार्षे किम्। ब्रह्मबन्धवित्यब्रवीत्। इतौ किम्। विष्णोऽत्र।

उञ ऊँ १७।

इह त्रैरूप्यमिष्टम्। आदेशविकल्पे प्रगृह्यत्वविकल्पे च ऊँ इति। उ इति। विति। उभयाभावपक्षे यणादेशः। तच्चैकस्मि-

न्सूत्रे न सिध्यति । उञ इत्यस्य श्रुतेनादेशेन सम्बन्धे शाकल्यपदानुवृत्त्या आदेशविकल्पे तदभावपक्षे "निपात एकाजनाङ्" इति प्रगृह्यसंज्ञाया नित्यतया रूपद्वयस्यैवापत्तेः । अतो योगविभागं कृत्वा व्याख्येयम् । "उञः" शाकल्यस्येति इतौ प्रगृह्यमिति चानुवर्तते । अस्य इतिशब्दे परे प्रगृह्यसंज्ञा वा स्यात् । उ इति । विति । ततः "ऊँ" इति द्वितीयो योगः । अत्र यदि प्रगृह्यस्य शाकल्यस्येत्युभयमपि नानुवर्त्तेत, तदा प्रगृह्यस्य उञ ऊँ आदेशे उञ इति समुदायाश्रयेणाल्विधित्वाभावेन स्थानिवत्त्वेन तस्य प्रगृह्यत्वे ऊँ इतीत्येकमिष्टम् । अप्रगृह्यस्य ऊँ आदेशे यणि कृते आन्तरतम्येन सानुनासिकवकारयुक्तं द्वितीयं त्वनिष्टमपि रूपं स्यात् ।

यदि तु प्रगृह्यस्य उञ इत्येवानुवर्त्तेत, तदा प्रगृह्यस्य उञो नित्यमादेशविधाने ऊँ इति विति इति च द्वे एव रूपे स्याताम् ।

यदि तु शाकल्यग्रहणमात्रमनुवर्त्तेत, तदा प्रगृह्याप्रगृह्ययोरादेशविकल्पे ऊँ इति उ इति द्वे प्रगृह्यस्य । अप्रगृह्यत्वपक्षे च आदेशस्य यणादेशे सानुनासिकवकारयुक्तं शुद्धस्य यणादेशे च निरनुनासिकवकारयुक्तं चेति द्वे रूपे इति मिलित्वा रूपचतुष्टये सानुनासिकवकारयुक्तं रूपमनिष्टं स्यात् । अत उभयानुवृत्त्या प्रगृह्यस्यादेशविकल्पे सति इष्टरूपत्रयसिद्धिः । तेन प्रगृह्यस्य उञ ऊँ आदेशो वा स्यादित्यर्थः । ननु शाकल्यस्यैव मते प्रकृतिभावः, तत्रैव ऊँ इत्यादेशः । ततश्च उ इति इत्येतद्रूपं न स्यात् । आदेशनिर्मुक्ते प्रगृह्यसंज्ञायां मानाभावादिति चेत्, मैवम् । शाकल्यपदस्य विकल्पमात्रतात्पर्यकत्वात् । एतदर्थमेव योगविभागाश्रयणात् । अत एव "ऊँ वा शाकल्यस्य" "शाकल्यस्याचार्यस्य मते वा ऊँ अयमादेशः" इति भाष्यं शाकल्य-

श्रुतेरेव फलं वाग्रहणेन प्रतिपादयतीति व्याख्यातम् ।

केचित्तु शाकल्यग्रहणस्य यथाश्रुतत्वेऽपि "निपात एकाज्" इत्येव सिद्धे "उञः" इति सूत्रं नियमार्थम्, शाकल्यभिन्नमते उञः प्रगृह्यत्वं नेति तदर्थः । "ऊँ" इति सूत्रे च प्रगृह्यस्य उञ इत्येतावतैव शाकल्यलाभे पुनः शाकल्यानुवृत्त्या इतरेषामपि मते पाक्षिकप्रगृह्योऽस्तीत्यनुमीयते । अत उ इतीति सिद्धमित्याहुः, तच्चिन्त्यम् । श्रौतानियमाविरुद्धानुमानस्य मूलोच्छेदपराहतत्वात् । तद्विरोधेनानुवृत्तावपि मानाभावप्रसङ्गात् ।

यदप्याहुः । "ऊँ" इति सूत्रे पुनः शाकल्यानुवृत्तिसामर्थ्यात् शब्दाधिकाराश्रयणात् पूर्वसूत्रानुवृत्तशाकल्यादन्य एव शाकल्यो गृह्यते । शकलस्य ऋषेरपत्यद्वयसत्त्वे बाधकाभावात् । न च द्वितीयशाकल्यमते प्रगृह्यसंज्ञाया अनुक्तत्वात् आदेशस्य प्रगृह्यत्वं न स्यादिति वाच्यम् । प्रगृह्यस्य उञ आदेशविधानेऽनुवादसामर्थ्यादेव तल्लाभात् । "ढ्रलोपे" इत्यादौ अगत्याऽनुवादसामर्थ्यादपि पदार्थप्राप्तेः स्वीकारादिति, तदपि चिन्त्यम् । श्रुत्यैव लाभे तत्पर्यन्तानुसरणानौचित्यात् । "यदेतनूँ इति पदकारैरुच्यते" इत्यनुकरणे "यरोऽनुनासिके" इत्यनुनासिकादेश इति हरदत्तः ।

ईदूतौ च सप्तम्यर्थे १८ ।

विकल्पस्य इतिशब्दस्य च निवृत्तिः । सप्तम्यर्थे वर्त्तमानम् ईदूदन्तं शब्दरूपं प्रगृह्यसंज्ञं स्यात् । अध्यस्यां मामकीतनू । उभयत्र "सुपां सुलुक्" इति सप्तम्या लुक् । पदपाठकाले इतिशब्दस्य तदुत्तरं प्रयोगादुदाहरणत्वम् । "सोमोगौरी अधिश्रितः"

इति। संहितायामप्युदाहरणत्वम्। ईदूताविति किम्। प्रियः सूर्ये प्रियो अग्ना भवाति । अग्निशब्दात्सप्तम्या डादेशः । सप्तम्यर्थे किम् । धीती । मती । सुष्टुती । तृतीयाया ईकाररूपः पूर्वसवर्णः । अत्र वार्त्तिकम्—

ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत् ।
पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते ॥
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥

अयमर्थः। ईदूतौ सप्तम्यामित्येवास्तु किमर्थमर्थग्रहणम्, सप्तमीसहचरितं यदीदूदन्तम्, यद्वा—सप्तम्यां परतस्तत् प्रगृह्यसंज्ञमित्यर्थे "सोमोगौरी अधिश्रितः" इत्यादौ लुप्तायामपि सप्तम्यां प्रत्ययलक्षणेन प्रगृह्यत्वसिद्धेरिति प्रश्नः । संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावादर्थग्रहणं विना सप्तम्या एव संज्ञिनीत्वाल्लुप्तायाश्च कार्याभावात् प्रत्ययं निमित्तीकृत्यान्यस्य कार्यविधानएव-प्रत्ययलक्षणानुशासनात्स्वकार्ये तदभावाच्च गौरी इत्यत्र प्रगृह्यसंज्ञा न स्यादतोऽर्थग्रहणम् । तेन च संज्ञाया अर्थनिबन्धनत्वेन प्रत्ययश्रवणानपेक्षत्वाल्लुप्तायामपि सप्तम्यां प्रकृतिभावस्य संज्ञेत्यभिप्रायेणोत्तरं लुप्तइति ।

ननु गौरी इत्यत्र न सप्तम्या लोपः, किन्तु धीती मती सुष्टुतीत्यादाविव "अकः सवर्णे" इति एकादेशः । तस्य चादिवद्भावाद्भवत्येव ईकारः सप्तमीति नेदं प्रयोजनमित्याह— पूर्वस्यचेदित्यादि । दूषयति— आडाम्भाव इति। एकादेशं बाधित्वा परत्वादाङ्गत्वाच्च "आण्नद्याः" इत्याद् । "ङेराम्नद्याम्नीभ्यः" इति सप्तम्या आमित्यादेशश्च स्यादित्यर्थः । ननु सप्तमीलोपं विना ईदूदन्तत्वाभावादन्यत्र च संज्ञा-

याः प्रयोजनाभावादेतादृशस्थले तल्लोपस्य सार्वत्रिकत्वात्तत्र प्रवृत्तिं विना संज्ञाया वैयर्थ्यप्रसङ्गात्तत्सामर्थ्यादेव लुप्तायामपि सप्तम्यां संज्ञा भविष्यत्येवेत्याह—वचनादिति । यत्र सप्तम्या-श्छान्दस ईकारादेशः, तत्रैव संज्ञाविधानस्य चरितार्थत्वापत्या सामर्थ्यस्योपक्षीणत्वात्सप्तमीलोपस्थले संज्ञा न स्यादेवेत्याह–यत्र दीर्घत्वमिति । यथा–"दृतिं न शुष्कं सरसी शयानम्" इत्यत्र सरःशब्दात्परस्य सप्तम्येकवचनस्य "इयाडिया-जीकाराणामुपसंख्यानम्" इति ई इत्यादेशः । तत्र सप्तम्याः श्रूयमाणत्वेन संज्ञाविधानस्य चारितार्थ्यादिति ।

ननु तत्रापि न सप्तम्या ईकारादेशः । प्रयोजनाभावात् । किन्तु सरसीशब्दोत्तरसप्तम्या लोप एवेति संज्ञाविधेः सामर्थ्य-मस्त्येवेत्याह–तत्रापीति। यदि इत्यसंदेहे सन्देहः, "शास्त्राणि चेत्प्रमाणं स्युः" इत्यादिवत् । "सरसी तु महासरः" इति शब्दार्णवात् । "दक्षिणापथे महान्ति सरांसि सरस्य इत्युच्यन्ते" इति भगवदुक्तेः । "साधर्म्यं दधति गिरां महासरस्यः" इत्यादिदर्शनाच्च । ननु तथाऽपि सरसीशब्दस्यैव लुप्तसप्तमीकस्यायं प्रयोगो, न तु सरःशब्दस्येत्यत्र किं मानम् , तन्मात्रार्थमर्थपदोपादानस्य सन्दर्भविरुद्धत्वादिति चेत् , अत्राहुः—

सरसीशयानमित्यत्रान्तोदात्तपाठ एव मानम् । गौरादिमध्ये "पिप्पल्यादयश्च" इति पाठात्तदन्तःपातिनो ङीषन्तसरसीशब्दस्यैव अन्तोदात्तत्वात् । असुन्प्रत्ययान्तस्य सरःशब्दस्य नित्स्वरेणा-द्युदात्तत्वापत्तेरिति । तस्मादर्थग्रहणं माऽस्त्विति सिद्धम् । ननु प्रगृह्यसंज्ञाप्रकरणे प्रत्ययलक्षणं नास्तीति ज्ञापनार्थमेतत्स्यादि-त्याह–ज्ञापकं स्यादिति । उक्तार्थस्येति शेषः । तस्य प्रयोजन-माह–तदन्तत्वे इति । "ईदूदेद् द्विवचनं प्रगृह्यम्" इति सूत्रे ईदूदेद-

न्तं द्विवचनान्तमिति, ईदूदेदन्तं यत् द्विवचनं तदन्तमिति पक्षश्च सिद्धो भवतीत्यर्थः । ननु तत्र तदन्तविध्यभावादेव तत् पक्षद्वयं-निरस्तम् । अत एतदर्थज्ञापनमनुपयुक्तमेवेत्यत आह—मावेति । पूर्वपदस्येति । वाप्यामश्वो वाप्यश्वः नद्यामातिर्नद्यातिरिति-समासे लुप्तसप्तमीकयोः वापीनदीशब्दयोः प्रत्ययलक्षणेन सप्त-म्यन्तत्वात्प्रगृह्यत्वं मा भूदित्यर्थं सार्थकमेवार्थग्रहणमित्यर्थः । न-न्वर्थग्रहणेऽपि तत्रातिव्याप्तिर्दुर्वारा । सप्तम्यर्थस्य प्रतीयमान-त्वात् इति चेत्, मैवम् । जहत्स्वार्थवृत्तिपक्षे समासे विशिष्टशक्ति-स्वीकारेण पूर्वपदस्यानर्थकत्वात् ।

अजहत्स्वार्था वृत्तिरितिपक्षेऽपि पूर्वपदे सप्तम्यर्थे लक्षणै-व । अर्थपदोपादाने तु विशेष्यतासम्बन्धेन सप्तमीपदजन्यो-पस्थितिमत्त्वस्य लाभात् । समासे प्रतीयमानस्याधिकरणत्वादे-स्तथात्वाभावादेव तद्वारणं बोध्यम् ।

अत्रेदमवधेयम् । अयं योगश्छान्दस एव । तेन ययीपपीवा-तप्रमीशब्दानां सप्तम्येकवचने ईकारान्तानामपि न प्रगृह्यसंज्ञा । अन्यथा एषामेव श्रूयमाणसप्तमीकानामीदन्तत्वसम्भवेन "तत्रा-पि सरसी यदि" इत्येतत्पर्यन्तानुधावनवैयर्थ्यापत्तेः । एतेन उकारान्तस्य भाषायामसम्भवात्तदनुसार इत्यपि निरस्तम् ।

हरदत्तोऽप्येवम् । अत एव प्रसादकारेण वैदिकप्रक्रियाया-मेवेदं सूत्रमुपन्यस्तम् ।

दाधा घ्वदाप् १९ ।

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युः दाब्दैपौ विना । प्रदेशाः "नेर्गदनद" इत्यादयः । दारूपाश्चत्वारः । डुदाञ्

दाने। दाण्। दो अवखण्डने। देङ् पालने। धारूपौ द्वौ। डुधाञ् धारणपोषणयोः। धेट् पाने। एजन्तानाम् "आदेच उपदेशे" इत्यात्वेन दारूपत्वम्। अनैमित्तिकमात्वं शिति तु प्रतिषेध इति सिद्धान्तात्। न चानुकरणस्य धातुत्वं नास्तीति वाच्यम्। "प्रकृतिवदनुकरणम्" इत्यतिदेशेन तत्सम्भवात्। न च प्रकृतावेव कृतात्त्वानामनुकरणमस्तु किमतिदेशेनेति वाच्यम्। तेषामात्वाभावस्थले प्रणिद्यति प्रणिदयतइत्यादौ घुसंज्ञाऽनापत्तेः। ततश्चतुर्णां दारूपाणां द्वयोश्च धारूपयोरेकशेषोत्तरं द्वन्द्वः। प्रातिपदिकसंज्ञां प्रति अतिदेशाप्रवृत्त्याश्रयेण विभक्त्यन्तत्वात्। "निरनुबन्धकग्रहणे न सानुबन्धकस्य" इत्यस्या लक्षणप्रतिपदोक्तपरिभाषायाश्च नेह प्रवृत्तिः। विशिष्यैव सर्वेषामुपादानात्। अदाविति किम्। दाप् लवने। दातं बर्हिः। छिन्नमित्यर्थः। "दो दद् घोः" इति ददादेशाभावः। दैप् शोधने। अवदातं मुखम्। घुत्वाभावाद् "अच उपसर्गात्तः" इत्यस्य न प्रवृत्तिः। उद्देश्यसमर्पके दा इत्यत्र अनयोरप्यनुकरणशङ्कानिरासार्थश्चेदम्। तेनानयोरनुकृतत्वाभावेऽपि न क्षतिः। न च दीङोऽपि कथमत्र नोपादानम्, "मीनातिमिनोतिदीङां ल्यपि च" इति तस्याप्यादन्तत्वादिति वाच्यम्। तत्स्वरूपानुकरणे आत्वानुपपत्तेः। तेन हि गुणोत्तरमात्वं विधीयतइति वार्तिकमतम्।

गुणादिनिमित्ते प्रत्यये परे इति तु भाष्यमतम्।

उभयथाऽपि नैमित्तिकतया अनुकरणे प्रवृत्त्यभावात्। "आदेचः" इत्यात्वं तु अनैमित्तिकत्वादनुकरणेऽपि प्रवर्ततइति वैषम्यम्।

वार्तिककृतस्तु एजन्तानुकरणत्वे प्रमाणाभावाद्गौरवाच्च

प्रयोगएव ये आकारान्ताः प्रयुज्यन्ते तदनुकरणानामेवायमेकशेषेण निर्देशः, "दाधा" इति पृथक्पदं वा सामान्यानुकरणम् । नन्वेवं प्रणिद्यति प्रणिदयते इत्यादौ घुसंज्ञाऽभावे णत्वं न स्यात् । शिति आत्वनिषेधात् कृतात्वानामेव च त्वया घुसंज्ञास्वीकारात् इति चेत्, सत्यम् । वचनेनैव समाधेयत्वात् । तथा च कात्यायनवार्त्तिकम्—

घुसंज्ञायां प्रकृतिग्रहणं शिदर्थमिति ।

भारद्वाजीयास्तु शिद्विकृतार्थमिति पठन्ति । अयमर्थः—"दाधाप्रकृतयो घुसंज्ञाः" इति सूत्रं कार्यम् । दाधा इत्यंशेन प्रयोगे आदन्तानां घुसंज्ञा । प्रकृतिपदं च सन्निधानात् दाधाप्रकृतिपरम् । तथा च तत्स्थले आत्वाभावेऽपि येषामात्वं यत्र क्वचिद्विहितं तेषामपि घुसंज्ञा । आत्वानुपधानेऽपि तत्प्रकृतित्वस्य आत्वादेशस्थानितावच्छेदकरूपवत्त्वस्य सत्त्वात् । तेन प्रणिद्यति इत्यादि सिद्धम् ।

भाष्यकृतस्त्वाहुः—"नेर्गद" इति सूत्रे घुमास्यतीत्यत्र घुशब्दाव्यवहितोत्तरप्रकृतिपदमवश्यं पठनीयम्, घुप्रकृतिमेति । अन्यथा प्रणिमयतइत्यत्र णत्वानुपपत्तेः । लाक्षणिकत्वेन मेङो माशब्देन ग्रहीतुमशक्यत्वात् । प्रकृतिग्रहणे तु प्रकृतिपदस्य सन्निधानान्माप्रकृत्यर्थकत्वेन मेङ्ग्रहणसिद्धेः । न चैवं मीनातिमिनोत्योरपि "मीनातिमिनोति" इत्यादिना कुत्रचिदात्वविधानेन तयोरपि माप्रकृतित्वाण्णत्वापत्तिः । माङिति ङकारानुबन्धस्यापि पाठ्यत्वात् । अन्यथा मा माने इत्यस्यापि ग्रहणापत्तेः । एवं घुमाङ्प्रकृतीति पाठमपहाय "घुप्रकृतिमाङ्" इत्यादि पठनीयम् । घुश्च प्रकृतिश्च माङ् चेति द्वन्द्वे प्रकृतिपदं सन्निहितत्वात्पूर्वोत्तरोभयप्रकृतिपरम् । एवं च घुप्रकृतीत्युक्ते घुश-

ब्देन दाधारूपाणामुपस्थितौ तत्प्रकृतित्वेन धातुस्वरूपलाभात् प्रणिद्यति प्रणिदयतइत्यादौ घुसंज्ञां विनाऽपि णत्वं सिद्धमिति घुसंज्ञायां प्रकृतिग्रहणं व्यर्थम् ।

यत्तु भारद्वाजीयैरुक्तम्, "विकृतार्थम्"इति, तदपि न । "गामादाग्रहणेष्वविशेषः" इति परिभाषया लाक्षणिकस्यापि दारूपस्य घुसंज्ञासिद्धेः । अस्यां च दैपः पित्त्वमेव लिङ्गम् । तद्धि अदाबित्यत्र पर्युदासप्रतियोगिकुक्षौ दैपोऽपि निवेशोऽस्तु इत्यर्थम् । लक्षणप्रतिपदोक्तपरिभाषया दाग्रहणेऽप्रवृत्तौ तु दैप आत्वस्य लाक्षणिकतया तस्य प्रतियोगिबहिर्भावस्तदवस्थ एव स्यादिति तद्वैयर्थ्यमेव स्यात् । ननु तथाऽपि धेटो घुसंज्ञा न स्यात् । न चेष्टापत्तिः । प्रकृतिशब्देन णत्वसिद्धावपि घुसंज्ञाप्रयुक्तकार्यान्तराणामसिद्धिप्रसङ्गात्, सत्यम् । "दो दद् घोः" इत्यत्र धेटो निवृत्त्यर्थं कृतेन द इत्यनेन तस्यापि घुसंज्ञाज्ञापनात् । घुत्वाभावे स्थानितावच्छेदकानाक्रान्तत्वादेव तस्य दद्भावाप्रसक्तौ तन्निवृत्त्यर्थयत्नानौचित्यात् । न च दधाति निवृत्त्यर्थत्वेन सार्थक्यम् । "दधातेर्हिः" इति तस्य ह्यादेशविधानात्सामान्यविशेषन्यायेनैव घुशब्दस्य दधात्यन्यपरत्वोपपत्तेः । न च दृङ्धृङोर्णिचि दारयति धारयतीत्यत्र दाधारूपत्वात् तत्रातिप्रसङ्गः, वृद्ध्या आकारे कृते दाधा इत्येतयोरर्थवत्त्वात्,रपरत्वस्य पश्चादेव प्रवृत्त्या तदङ्गभूतत्वेन तदन्यत्वाप्रवर्तकत्वात् इति वाच्यम् । "सिद्धं तु प्रसङ्गे रपरत्वाद्"इति वार्त्तिकरीत्या आर् इत्यादेशस्यैव वृद्ध्या विधानात् दार् धार् इत्यनयोरेवार्थवत्त्वात् तदवयवयोर्दाधा इत्यनयोरत्राग्रहणात् । "अर्थवद्ग्रहणे नानर्थकस्य" इति न्यायात् । दापयति धापयतीत्यादौ तु पुगागमात्पूर्वमेव घुसंज्ञाप्रवृत्तौ पुग्विशिष्टस्यापि

घुग्रहणेन ग्रहणम् ।

अभ्युपेत्यापि ब्रूमः—दार् धार् इत्येतदवयवयोर्दाधारूपयोर्घुसंज्ञायामपि प्रनिदारयतीत्यादौ न णत्वप्रसङ्गः । घुसंज्ञानिरूपितं यस्योपसर्गत्वं ततः परस्य नेर्णत्वविधानात् । तत्र च रेफविशिष्टं प्रत्येवोपसर्गत्वम्, न तु तन्निर्मुक्तपूर्वभागनिरूपितम् । यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति नियमात् ।

नन्वेवं दापयतिधापयत्योरपि तन्न स्यादिति चेत्, न । पूर्वप्रवृत्तसंज्ञाया आगमोपजनेऽपि तदवस्थत्वात् । यदा तु उपसर्गस्य ण्यर्थविशेषकत्वम्, तदा दाधारूपं प्रत्युपसर्गत्वाभावान्नित्यं णत्वं न भवत्येव, किन्तु "शेषे विभाषा" इति वैकल्पिकमेवेति । तदेवं मतत्रयं पर्यवसन्नम् । "पूर्वोक्तास्त्रय आदन्तास्त्रयश्च एङन्ता विशिष्य घुसंज्ञाः" इति सूत्रकारस्य, "प्रयोगे आकारान्तानां दाधारूपाणां तत्प्रकृतीनां च" इति वार्त्तिककारस्य, "प्रयोगे आकारान्तानामेव संज्ञा, तत्प्रकृतीनां तु णत्वविधौ प्रकृतिग्रहणाण्णत्वमात्रम्, न तु घुसंज्ञा" इति भाष्यकारस्य मतमिति । एवं स्थिते उपदिदीषतइत्यत्र दीङस्सन्प्रत्यये "सनि मीमाघुरभ" इत्यादिना इस्भावः स्यात् । "मीनातिमिनोतिदीङां ल्यपि च" इति दीङ आत्वविधानेन तस्य दाप्रकृतित्वात् वार्तिकमते घुसंज्ञत्वात् । अन्यमतद्वये तु नायं दोष इति स्पष्टमेवेति चेत्, उच्यते—

यदि ईकारान्तस्यैव दीङ आत्वविधानम्, तदाऽयं दोषः स्यात्, न त्वेवम्, किन्तु गुणे कृते एकारान्तस्यैव आत्वं विधीयते । ततश्च दाप्रकृतित्वं दे इत्यस्यैव, न तु दी इत्यस्य । उपदिदीषतइत्यत्र च एजन्तत्वाभावेन दाप्रकृतित्वं नास्तीति

घुसंज्ञाविरहात् । दाभावनिरूपितस्थानित्वस्य तत्प्रयोज्यनिवृत्तिप्रातियोगित्वरूपस्य एजन्तएव विश्रान्तेः ।

न चैवम् आदन्तत्वनिमित्तकयुच्प्रत्ययाद्यसिद्धिः। "आकारान्तलक्षणः प्रत्ययविधिः" इति विशिष्यैव वार्त्तिककृता तस्य विहितत्वात् । नन्वेवमपि वार्त्तिकभाष्यकारयोर्मते उपादास्तेत्यत्र "स्थाघ्वोरिच्च" इति इत्वं स्यात्, प्रयोगे आदन्तत्वस्यात्र सत्त्वेन भाष्यमतेऽपि घुसंज्ञत्वात्, इति चेत्, अत्र वार्त्तिकं तावत्—

दीङः प्रतिषेधः स्थाघ्वोरित्त्वे इति ।

तथा च वाचनिक एव तदभावः ।

भाष्यकृता तु संनिपातलक्षणन्यायेन समाहितम् । तथा हि—पूर्वोक्तरीत्या एजन्तानामात्वविधानाभ्युपगमे युच्प्रत्ययादिसिद्ध्यर्थं वार्तिकान्तरकरणे गौरवात् एज्विषये आत्वं विधीयते । गुणवृद्धिनिमित्तकप्रत्यये विवक्षिते इति यावत् । तथा च प्रत्ययोत्पत्तिपूर्वमेव दीङादीनामादन्तत्वात्सिद्धस्तल्लक्षणप्रत्यय इति लाघवम् । एवं सति आत्वे अकित्त्वसन्निपातो निमित्तम् । कित्त्वे सति गुणवृद्धिनिषेधेन एज्विषयानुपपत्तेः । ततश्चाकित्त्वसंनिपातकृतमात्वं सिचः कित्त्वप्रवर्तिकां घुसंज्ञां न प्रवर्तयति । कित्त्वेन एज्विषयापहारे घुसंज्ञानिमित्तस्य आत्वस्य निमित्तविघातापत्तेः ।

स्यादेतत् । सूत्रमते प्रणिदातेत्यादौ दीङ आत्वे कृते णत्वं न भवति, घुसंज्ञाविरहात् । भाष्यवार्त्तिकमते तु णत्वापत्तिः, प्रयोगे आदन्तत्वात् दाप्रकृतित्वाच्च घुसंज्ञासत्त्वादिति द्वयोः सूत्रकृता सह विरोधः । एवं प्रणिदीयते प्रणिदीन इत्यादौ भाष्यमते "नेर्गद" इति नित्यं णत्वम्, तत्र प्रकृतिग्रहणेन घुसंज्ञाया अनपेक्षितत्वात् ।

वार्त्तिकमते तु "शेषे विभाषा" इति वैकल्पिकम्। एजन्तानामेव दाप्रकृतित्वोपगमेन ईदन्तस्याप्रकृतित्वादिति द्वयोः परस्परविरोधो दुर्वार इति चेत्, अत्राहुः—

भाष्यरीत्या सर्वत्र दीङो नित्यं णत्वमिति स्थिते सूत्रवार्तिकमतेऽपि "शेषे विभाषा"इत्यस्य दीङंशे व्यवस्थितविकल्पत्वमाश्रित्य नित्यणत्वमेव स्वीकार्यम् । "यथोत्तरं मुनीनां प्रामाण्यम्" इति सिद्धान्तात् इति । नन्वदाविति पर्युदासप्रतियोगित्वं दाप् लवनइत्यस्यैव स्यान्न तु दैपः, पकारविशिष्टस्यात्वायोगादिति चेत्, मैवम् । अनुबन्धानामनेकान्तत्वपक्षे पकारस्यानवयवत्वेन धातोरेजन्तत्वानपायात् । एकान्तत्वपक्षेऽपि "उदीचां माङो व्यतीहारे" इति कृतात्वस्य मेङो निर्देशेन "नानुबन्धकृतमनेजन्तत्वम्"इत्यस्य ज्ञापितत्वात्। उभयथाऽप्यात्वप्रवृत्तौ बाधकाभावात् । न चायं माङ् माने इत्यस्यैव निर्देशः स्यादिति वाच्यम् । तस्य कर्मव्यतीहारविवक्षायामेव व्यतीहारे वृत्तेः । मेङस्तु स्वभावादेव तद्वृत्तित्वात् । तस्मादेव व्यतीहारे क्त्वाप्रत्ययस्यानेन विधानात् । प्रणिदानव्यतीहारशब्दयोरेकार्थत्वात् । भाष्यबलात्पूर्वकालान्यार्थक्त्वाप्रत्ययस्य मेङोऽनभिधाननिर्णयाच्च । एवं च मेङ इति पठनीये माङ इति पाठस्य ज्ञापकत्वमव्याहतम् ।

वस्तुतस्तु दैपः पित्त्वमेवात्र ज्ञापकम् । तद्धि पर्युदासे दैपो ग्रहणार्थमेव । आत्वाप्रवृत्त्या तत्पर्युदासाभावे तु तद्वैयर्थ्यापत्तेः । लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिज्ञापनेनैव तच्चरितार्थमिति चेन्न । उद्देश्यासिद्धितादवस्थ्ये तावन्मात्रस्य व्यर्थत्वात् ।

भाष्यकृतस्तु दाबेवायं न दैबस्तीत्याहुः । न चैवं दायतीति रूपं न स्यादिति वाच्यम्। दिवादिषु पाठात् श्यन्प्रत्ययेन

तत्संभवात् । न ह्यत्र स्वरे भेदः । दायतीत्यादौ उभयथाऽप्याद्युदात्तत्वात् । "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः" इति सूत्रेण अदुपदेशाभ्यां शप्श्यन्भ्यां परस्य तिबादेरनुदात्तत्वविधानात् । न च ताच्छीलिके चानशि दायमान इत्यत्र स्वरभेदः स्यात्, चानशो लादेशसार्वधातुकत्वाभावेन अनुदात्तत्वाभावात्, श्यनि नित्स्वरेण धातोराद्युदात्तत्वम्, शपि तु पित्त्वात्तस्यानुदात्तत्वम्, चानशस्तु चित्स्वरेणान्तोदात्तत्वमिति वाच्यम् । श्यन्स्वरस्य सतिशिष्टत्वेऽपि "अन्यत्र विकरणेभ्यः" इति पर्युदासेन तत्राप्यन्तोदात्तत्वात् । "सतिशिष्टोऽपि विकरणस्वरः सार्वधातुकस्वरं न बाधते, यदयं तासेः परस्य लसार्वधातुकस्यानुदात्तत्वं शास्ति, लसार्वधातुक एव तज्ज्ञापकं स्यान्नेत्याह, अविशेषेण ज्ञापकम्" इति "आत्ममाने खश्च" इति सूत्रे भाष्यदर्शनात् । ततश्च यथा तत्र खश्स्वरेण श्यन्स्वरस्य बाधः, एवमिह चानश्स्वरेणापि इत्यर्थप्रतीतेरित्याहुः ।

न चैवमपि दापयतीत्यस्यापि पर्युदासापत्तिः । यथोद्देशपक्षे अन्तरङ्गत्वात्पुगागमात्पूर्वमेव घुसंज्ञाप्रवृत्तेः । ननु कार्यकालपक्षे णत्वघुसंज्ञयोः समानदेशत्वात्पुकं प्रति तयोरसिद्धत्वेन "अन्तरङ्गबहिरङ्गयोः" इतिन्यायानवतारात् प्रागेव पुक्, ततो घुसंज्ञा न स्यादिति चेत्, अत्र भाष्यम्—

दाधा घ्वपिदिति वक्ष्यामीति ।

तथा च भेदप्रतियोगितावच्छेदकपित्त्वस्य दापयतीत्यत्राभावान्न दोषः ।

यद्वा— उक्तधातू बकारान्तावेव । सूत्रमपि बकारान्तम् । चर्त्वेन तु पकारश्रवणम् । अतो न दोष इति ।

आद्यन्तवदेकस्मिन् २० ।

असहायेऽपि आदाविवान्तइव च कार्यं स्यात् । एकस्मिन्नित्युपमेये सप्तमीदर्शनादाद्यन्तवदिति सप्तमीसमर्थाद्वतिः । मथुरावत् पाटलिपुत्रे प्राकार इत्यादौ तथादर्शनात् । एकशब्दश्चासहायवाची, न तु सङ्ख्यावाची । एकत्वस्य वस्तुमात्रे सत्त्वेनाव्यावर्त्तकत्वात् । असहायत्वं चात्र तत्कार्योद्देश्यतावच्छेदकधर्मपर्याप्त्याश्रयत्वे सत्येकत्वरूपं ग्राह्यम् । न संख्यावाचीत्यस्य चोक्तविशेषणांशविनिर्मुक्तसंख्याया वाच्यत्वव्यवच्छेदे तात्पर्यम् । भवति हि आद्युदात्तविधावुद्देश्यतावच्छेदकस्य प्रत्ययत्वस्य पर्याप्त्याश्रयः औपगव इत्यादौ अकारादिः । तव्यदादौ तु तावद्वर्णा इति विशेष्यदलेन तद्वारणम् ।

तत्रादिवत्त्वे प्रयोजनानि । प्रत्ययाद्युदात्तत्वम्, तैत्तिरीय इत्यादौ इव औपगव इत्यादावपि यथा स्यात् । "ञ्नित्यादिर्नित्यम्" आहिचुम्बकायनिः आग्निवेश्य इत्यादाविव गार्ग्यः कृतिरित्यादावपि स्यात् । "आर्द्धधातुकस्येड् वलादेः" इतीट् करिष्यतीत्यादाविव जोषिषदित्यादावपि स्यात् । "यस्मिन्विधिस्तदादावल्ग्रहणे" इति अजादौ विधीयमानौ इयङुवङौ श्रियो भ्रुव इत्यादाविव श्रियौ भ्रुवौ इत्यादावपि स्याताम् । "आडजादीनाम्" ऐक्षिष्टेत्यादाविव अध्यैष्टेत्यादावपि यथा स्यात् ।

अथान्तवत्त्वे प्रयोजनानि । "ईदूदेद् द्विवचनम्" इति प्रगृह्यत्वं पचेते इत्यादाविव खट्वे इत्यादावपि यथा स्यात् । "नपुंसकस्य झलचः" इति नुम् "मिदचोऽन्त्यात्परः" इत्यनेन कुण्डानीत्यादाविव यानीत्यादावपि अन्ते यथा स्यात् । "अचोऽन्त्यादि टि" इति संज्ञया "टित आत्मनेपदानां टेरे"

इत्येत्वं कुर्वीते इत्यादाविव कुर्वे इत्यादावपि स्यात्। "सुपि च" इत्यकारान्तस्याङ्गस्य दीर्घत्वं घटाभ्यामित्यादाविव आभ्यामित्यादावपि यथा स्यात्। "येन विधिः" इत्यजन्तस्य विधीयमानो यत् जेयमित्यादाविव अध्येयमित्यादावपि यथा स्यात्।

तथा हि—"परस्मिन् सति यस्मात्पूर्वं नास्ति स आदिः" "पूर्वस्मिन्सति यस्मात्परं नास्ति सोऽन्यः" इति निरूढो व्यवहारः। एतदनुसारेण वर्णानामाद्यन्तत्वयोर्निरूप्यमाणयोः स्ववृत्तिधर्माश्रयप्रागभावाधिकरणकालवृत्तित्वे सति तद्धर्माश्रयध्वंसानधिकरणकालवृत्तित्वम् आदित्वम्। स्ववृत्तिधर्माश्रयध्वंसाधिकरणकालवृत्तित्वे सति तद्धर्माश्रयप्रागभावानधिकरणकालवृत्तित्वं चान्तत्वं फलति। स्वपदं लक्ष्यत्वाभिमततत्तद्व्यक्तिपरम्। तद्वृत्तिधर्मश्च तद्विधावुद्देश्यतावच्छेदकीभूतो ग्राह्यः। तद्धर्माश्रयश्च तत्तत्प्रत्ययव्यक्त्यन्तर्गत एव ग्राह्यः। अन्यथा तदप्रसिद्ध्यापत्तेः। मध्यस्थेऽतिव्याप्तिवारणाय उभयत्र विशेष्यम्। तच्च इयादावस्ति न त्वकारमात्रे। अतो मुख्ये चरितार्थं शास्त्रम् अनुत्तरत्वापूर्वत्वरूपं गौणमादित्वमन्तत्वं चादाय केवले न प्रवर्त्तेत। अत इदं सूत्रम्। यत्तु वार्त्तिकम्—

अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्निति।

अपूर्वत्वमेवादित्वम्, अनुत्तरत्वमेवान्तत्वम्, तेन सर्वत्रापि मुख्यत्वादेव सिद्धेः सूत्रमेतद्व्यर्थमिति, तत्र भाष्यम्—

गोनर्दीयस्त्वाह—

सत्यमेतत्, सति त्वन्यस्मिन्निति।

तथा च स्वारसिकप्रतीत्यनुरोधादुक्तविशिष्टधर्म एव आद्यन्तपदशक्यतावच्छेदक इत्युक्तवार्त्तिकमयुक्तमित्यर्थः। एकस्मिन्निति किम्। सभासंनयने भवः साभासंनयनः। अत्र

भशब्दोत्तरमाकारमाश्रित्य " वृद्धिर्यस्याचामादिः " इति वृद्धसंज्ञा मा भूत् ।

अथ " वृद्धिर्यस्याचामादिः " इतिवृद्धसंज्ञासूत्रस्थेनैव आदिपदेनात्र दोषो नास्तीति चेन्न । तत्रत्यादिशब्दस्य मुख्यादिपरत्वाभावात् । अन्यथा जानातीति ज्ञा ब्राह्मणी इत्यादौ ज्ञापदस्यापि वृद्धत्वानापत्त्या ज्ञीय इत्यत्र छप्रत्ययानापत्तेः । इहैकग्रहणे तु मध्यावसानस्थानां आदित्वातिदेशविरहात् तद्व्यावर्त्तकतया तत्रत्यस्य आदिशब्दस्य सार्थक्यात् ।

अत्र न्यासकारः– अतिदेशसूत्रे एकग्रहणाभावे वृद्धसंज्ञासूत्रगतमादिग्रहणमनातिदेशिकप्रतिपत्यर्थं सत् असहायानां ज्ञादीनामेव वृद्धसंज्ञां वारयेत् । सभासन्नयने तु स्यादेव, स्वोत्तरगतानामचां चतुष्टयमपेक्ष्य अनातिदेशिकस्य आदित्वस्य तत्र सत्त्वादिति ।

तत्र वदन्ति– अत्रैकग्रहणाभावे यत्र मुख्यमादित्वं नास्ति स सर्वोऽप्यतिदेशविषयः स्यात् । ततश्च यथा ज्ञादीनां न वृद्धत्वं तथा सभासन्नयनस्यापि न स्यात् । असहायवन्मध्यगतेऽपि मुख्यादित्वव्यवहाराभावात्, तत् कथमुक्तवैषम्यमिति ।

न्यासकृतस्त्वयमभिप्रायः— व्यवहारानुरोधेन लक्षणकरणम् । तदुक्तमाचार्यैः—

सिद्धानुगममात्रं हि कर्तव्यं तु परीक्षकैः ।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम् ॥

इति । ततश्चायमादिरित्युक्ते तदुत्तरस्य अन्त इत्युक्ते च पूर्वस्य नियमत आकाङ्क्षा, न तु पूर्वाभावस्योत्तराभावस्य चेति सर्वसिद्धम् । पूर्वत्वान्तत्वयोरुत्तरपूर्वत्वमात्रनिरूप्यत्वात्, कादाचित्कापेक्षायाश्च शब्दशक्त्यव्यवस्थापकत्वात् ।

एतच्च न्यासेऽपि स्पष्टमेवोक्तम्—"द्वितीयादिकं सहायमपेक्ष्याद्यन्तशब्दौ प्रवर्तेते । तथा हि— लौकिकः सति परस्मिन्सहाये पूर्वमादिरिति व्यवहरति" इत्यादिना । अत एव "दैशिकयोः परत्वापरत्वयोः तृतीयापेक्षत्वम्, कालिकयोस्तु परस्पराश्रयापेक्षत्वम्" इति दीधितिकारादयः । न हि भरतो लक्ष्मणात्पूर्वः लक्ष्मणो भरतात्कनिष्ठ इत्यनयोर्गौणत्वम् । न चैवमाद्युदात्तत्वं मध्यमस्यापि स्यादिति वाच्यम् । प्रत्ययादिपदसमभिव्याहारादेव प्रत्ययत्वाद्युपाध्यवच्छिन्नादिप्रतीतेः, दशरथस्याद्यपुत्र इत्यादौ तदन्यतत्पुत्रत्वावच्छिन्नापेक्षया तत्प्रत्ययवत् । इत्यास्तां प्रासङ्गिकम् ।

ननु "व्यपदेशिवदेकस्मिन्" इत्येव युक्तम् । इयाय आरेत्यादौ इणृधातोश्च धात्ववयवत्वं प्राथम्यं एकाच्त्वं चाश्रित्य इकारऋकारयोर्द्वित्वं यथा स्यात् । "एकाचः" इति हि बहुव्रीहिः । एवं "स देवान्यक्षद्" इत्यादौ यजेः पञ्चमलकारे "सिब्बहुलं लेटि" इति सिप्, तस्य षत्वं च यथा स्यात् । प्रत्ययस्यावयवो यः सकारस्तस्य षत्वविधानात्, "आद्यन्तवद्" इत्युक्त्या च आदित्वान्तत्वप्रयुक्तकार्यसिद्धावप्युक्तकार्याणामसिद्धेः । व्यपदेशस्तु मुख्यो व्यवहारः, स यस्य निमित्तवशादस्ति स व्यपदेशी, यस्तु व्यपदेशहेत्वभावेऽपि कार्यं प्रति तद्वद्वर्तते स व्यपदेशिवत् । तथा च एकस्मिन्नपि मुख्यइव कार्यं स्यादिति वचनार्थः इति चेत्, अत्र भाष्यकाराः—

अवचनाल्लोकविज्ञानात्सिद्धमिति ।

वचननिरपेक्षाल्लोकव्यवहारात्सिद्ध्या "आद्यन्तवद्" इति "व्यपदेशिवद्" इति चोभयमपि नारम्भणीयम् । इण्धातुर्हि प्रयोगभेदाद्बहुरूपः, एति इतः यन्तीत्यादिः । इयायेत्यत्रत्य

इकारस्तदवयव इव भासते ।

यद्वा—अर्थवतो धातोर्वर्णरूपोऽयमेकोऽच् इति क्रियावाचकतावच्छेदकतदन्यधर्माभ्यां भेदव्यपदेशः । एवं सिप्रत्ययो जोषिषदित्यादाविट्सहितः, वक्षदित्यादौ केवलोऽपीति प्रत्ययस्यायं सकार इति । लोकेऽपि बहुपुत्रवदेकपुत्रेऽपि अयं मे ज्येष्ठः पुत्रोऽयं मध्यमोऽयं कनिष्ठ इति । असूतायामसोष्यमाणायां च प्रथमगर्भेण हतेति व्यवहरन्ति ।

नन्विमे गौणा व्यवहाराः । आद्यस्य पुत्रान्तरव्यावृत्तितात्पर्यकत्वात्, द्वितीयस्य च तद्गर्भध्वंसासमानकालीनगर्भेणेत्यर्थात् । शास्त्रं च मुख्ये चरितार्थं कथं गौणे प्रवर्त्तेतेति चेन्न । निरूढतया मुख्यतुल्यकक्षत्वात् । "ऋदोरप्" इति अनुदात्तार्थपित्त्वाच्च । आद्युदात्तत्वाप्रसक्तौ तद्बाधनार्थस्य तस्य वैयर्थ्यात् । "इट ईटि" इति ज्ञापकाच्च । अन्यथा सिचः सकारमात्रस्य वल्रूपत्वेन वलादित्वाभावादिटोऽनुपपत्तेः ।

तरप्तमपौ घः २१ ।

एतौ घसंज्ञौ स्तः । रचयति रुचिः शोणीमेतां कुमारितरा रवेः । घरूपेत्यनेन "तसिलादिषु" इति प्राप्तं पुंवद्भावं बाधित्वा ह्रस्वः । नद्यास्तरो नदीतर इत्यत्र तु न । तमप्प्रत्ययसाहचर्यात् । तमशब्दस्यापि प्रातिपदिकस्य सम्भवे तु पकारानुबन्धसामर्थ्यात् ।

वस्तुतस्तु घसंज्ञायां सत्यामपि न क्षतिः । समानाधिकरणे स्त्रीलिङ्गे परे ह्रस्वविधानात् । सामानाधिकरण्यं च स्वार्थिकस्यैव, न तु तरतीति व्युत्पन्नस्य तरादेः ।

भाष्ये तु "यदा सैव नदी स एव तरस्तदा प्राप्नोति" इत्यु-

क्तम्। तत्र भावे स्त्रियां क्तिन्प्रत्यये तीर्णिरिति भाव्यमित्याशङ्क्य कैयटः—"तीर्यते तर इति सामान्येन पदं व्युत्पाद्य पश्चान्नद्या विशेष्यते"इति। तत्र परिहारः—"स्त्रीलिङ्गेषु घादिष्वित्येवं तद्" इति। तरशब्दस्य च स्त्रीत्वाभावात्। अन्यथा महिषीव रूपं महिषीरूपमित्यत्रापि ह्रस्वापत्तेः। "सुप्सुपा" इति समासः। महिषीवेयमाकृतिरित्यर्थः।

अत्र वदन्ति—आतिशायनिकप्रत्ययप्रकरणएव "तादी घः" "पितौ घः" इति वा सूत्रमपहाय प्रकरणपरित्यागेनोक्तसूत्रारम्भः स्वार्थिकोऽपि तरप्रत्ययोऽस्तीति ज्ञापनार्थः। तेन "अल्पाच्तरम्" इत्यादि सिध्यतीति।

केचित्तु सामान्यापेक्षज्ञापकमाश्रित्य ईयसुनोऽपि स्वार्थिकत्वम्। तेन "अहो महीयस्तव साहसिक्यम्" इत्यादि सिद्धमित्याहुः।

वामनस्तु काव्यालङ्कारे शब्दशुद्धिप्रकरणे महत्त्वप्रतियोग्यपेक्षायामप्यातिशायनिका इत्याह।

यदपेक्षयाऽतिशयः प्रत्याय्यते तदप्रयोगेऽपि तस्य गम्यमानत्वमात्रेण भवन्तीत्यर्थः। "देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे" इत्यत्र "छान्दसस्तमप्." इति भाष्यं तस्यानुकूलम्। अन्यथा स्वार्थिकत्वेनैवोपपत्तेः।

बहुगणवतुडति संख्या २२।

एते संख्यासंज्ञाः स्युः। बहुकृत्वः। संख्यायाः क्रियाऽभ्यावृत्तिगणने कृत्वसुच्। बहुधा। संख्याया विधार्थे धा। बहुभिः क्रीतो बहुकः। संख्याया अतिशदन्तायाः कन्। बहुशः। "संख्यैकवचनाच्च वीप्सायाम्" इति शस्। एवमुत्तरेषु

"यत्तदेतेभ्यः परिमाणे वतुप्" "आ सर्वनाम्नः" इत्यात्वम् । यावत्कृत्व इत्यादि । किमः संख्यापरिमाणे डति च । कतिकृत्व इत्यादि ।

ननु एकादिशब्दानामपि संज्ञेयं विधेया । अन्यथा प्रदेशेषु "कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः" इति न्यायेन पारिभाषिकसंख्यैव गृह्येत, न तु लोकसिद्धा । सर्वार्थप्रत्यायनशक्तिमतः शब्दस्यार्थविशेषे व्यवहाराय नियमे तन्मात्रपरत्वात् । अन्यथा संज्ञाविधानवैयर्थ्यापत्तेः । न चैवं "नदीपौर्णमास्याग्रहायणीभ्यः" इत्यत्रापि तथापत्तिः । पौर्णमास्यादिशब्दोपादानसामर्थ्येन तत्र कृत्रिमनद्या अनुपादानात् । मैवम् । संख्याकार्यातिदेशार्थत्वादस्य सूत्रस्य संज्ञाविधायकत्वाभावात् । वतिमन्तरेणापि बहुशस्तदर्थप्रत्ययात् ।

यद्वा—अत्रापि तथानियमाभावात् । "कर्तरि कर्मव्यतिहारे" "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे" इत्यादौ व्यभिचारात् । न च तत्र सामर्थ्यात्तथात्वम् । अत्रापि यत्नविशेषसद्भावात् । "संख्याया अतिशदन्तायाः कन्" इत्यत्र तिशब्दान्तायाः शच्छब्दान्तायाश्च संख्यायाः पर्युदासेन लौकिकसंख्याग्रहणस्य ज्ञाप्यत्वात् । विंशतीत्यादेः त्रिंशदित्यादेश्चापारिभाषिकत्वात् । पारिभाषिक्यास्तस्यास्तदन्तत्वविरहात् । न च कतीति पारिभाषिक्येव संख्या तिशब्दान्ताऽस्तीति वाच्यम्। अर्थवद्ग्रहणपरिभाषया डतिप्रत्ययैकदेशतिशब्दस्य भेदप्रतियोगित्वेनानुपादानात् । तदुक्तम्—

उभयगतिरिह शास्त्रे भवतीति ।

अत एव बहुगणशब्दयोर्वैपुल्यसङ्घार्थयोर्नेह ग्रहणम्, किन्तु संख्यार्थयोरेव । स च नियमार्थः—अनियतबहुत्ववाचकानां

मध्येऽनयोरेव संख्यासंज्ञा, न तु भूयादीनाम् । तेन बहुत्ववाचकत्वाभाववतोरेकद्विशब्दयोर्नियतबहुत्ववाचिनां त्र्यादीनां च न व्यावृत्तिः । विशेष्यविशेषणभावाभ्यां तेषां निर्धारणप्रतियोगितावच्छेदकानाक्रान्तत्वात् ।

भाष्यकृतस्त्वाहुः—"बहुपूगगणसङ्घस्य तिथुक्" "वतोरिथुक्" "षट्कतिकतिपयचतुरां थुक्" इति सूत्रैः डटि परे आगमानां विधानसामर्थ्यात्तेषां संख्यात्वं ज्ञाप्यते । अन्यथा संख्यात्वं विना डट एवानुपपत्तेः । तथा चेदं सूत्रं न कर्तव्यमेवेति ।

न चैवं पूगादीनामपि कृत्वसुजादिकमपि संख्याकार्यं स्यात्, बहुगणशब्दयोः कार्यसामान्ये संख्यात्वं ज्ञाप्यते, पूगादीनां तु विशेषापेक्षमेवेति वैषम्ये मानाभावादिति वाच्यम् । लक्ष्यानुरोधेन तदङ्गीकारात् ।

एतदनुरोधात्सूत्रमेतदावश्यकमिति कौस्तुभकृतः ।

अत्र शब्दान्तराणामपि संख्याकार्यविशेषसिद्ध्यर्थानि वार्तिकानि ।

अध्यर्द्धग्रहणं च समासकन्विध्यर्थम् ।

अर्द्धेनाधिकमध्यर्द्धम् । एकदेशार्थकार्द्धशब्दस्याधिशब्देन समासे यौगिकार्थप्रत्ययेन संख्याप्रत्ययाभावात्त्रिभागादिशब्दवत्संख्यावाचित्वाभावादिदं विध्यर्थम् । अध्यर्द्धेन शूर्पेण क्रीतम् अध्यर्द्धशूर्पम् । "दिक्संख्ये" इत्यनुवर्तमाने "तद्धितार्थोत्तरपदसमाहारे च" इति क्रीतार्थकतद्धितविवक्षायां शूर्पशब्देन सह समासः । ततः "शूर्पादञन्यतरस्याम्" इति अञ् ठञ् वा । "अध्यर्द्धपूर्व" इति तस्य लुक् । अध्यर्द्धेन क्रीतमध्यर्द्धकम् । "संख्याया अतिशदन्तायाः" इति कन् । समासविध्यर्थमिति,

सम्बन्धसामान्ये षष्ठी । तेन समासस्य समासनिमित्तककार्यस्य वा विधेयत्वे इत्यर्थः । तेन द्विगुनिमित्तो लुगपि सिद्धः । एवं च "अध्यर्द्धपूर्वाच्च द्विगोः" इत्यत्राध्यर्द्धग्रहणं प्रत्याख्येयम् । द्विगुत्वादेव सिद्धेः । तदुक्तम्—

लुकि चाग्रहणमिति ।

अन्ये तु एकः अध्यर्द्धः द्वौ इत्यादिरीत्या लोके गणनदर्शनादध्यर्द्धशब्दोऽपि संख्यार्थ इत्याहुः ।

तद्रीत्या सार्द्धादीनां शब्दानां संख्यात्वव्यावृत्त्यर्थतया "अध्यर्द्ध" इति वार्तिकं नियमार्थम् । वाक्यभेदेन च द्वितीयो नियमः—उक्तकार्यद्वयएव संख्यात्वं न तु कार्यान्तरेषु । तेन कृत्वसुजादयो नेति कैयटः ।

अर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः ।

संख्यापदं समासकन्विध्यर्थमिति चानुवर्तते । पूरणप्रत्ययान्ते उत्तरपदे अर्द्धशब्दे च पूर्वपदे यत्र तादृशसमासरूपपूर्वपदस्य शब्दान्तरेण समासे कनि च कार्ये संख्या संज्ञा इत्यर्थः । अर्द्धपञ्चमैः शूर्पैः क्रीतम् अर्द्धपञ्चमशूर्पम् । अर्द्धपञ्चमेन क्रीतम् अर्द्धपञ्चमकम्, पूर्ववत्समासादि ।

अधिकग्रहणञ्चालुकि समासोत्तरपदवृद्ध्यर्थम् ।

अधिकपदस्य संख्याविशेषणत्वेऽपि संख्यात्वाभावादयमप्यपूर्वाविधिः। अधिकया षष्ट्या क्रीतोऽधिकषाष्टिकः। अधिकसाप्ततिकः । "तद्धितार्थ" इति समासः । प्राग्वतेष्ठञ् । अलुकीति वचनात् लुकि कर्त्तव्ये संख्यासंज्ञा नास्तीति "संख्यापूर्वो द्विगुः" इति न द्विगुसंज्ञा । तेनाध्यर्द्धपूर्वेति ठञो न लुक् । "संख्यायाः संवत्सरसंख्यस्य च" इत्युत्तरपदवृद्धिः । अन्यथा षष्टिशब्दस्य संख्यापरत्वाभावात्तदप्रवृत्तेः । ननु उत्तरपदवृद्ध्यर्थमित्यत एव

लुगभावस्याक्षेपसम्भवात्पृथक् तद्ग्रहणं व्यर्थमिति चेत्, अत्राहुः—

अर्हत्यर्थात्परेष्वर्थेषु ये प्रत्ययास्तेषां लुगप्रसङ्गेन तत्रैवोत्तरपदवृद्धेः सावकाशतया तन्मात्रेणालुक् आक्षेप्तुमशक्यत्वादिति।

ष्णान्ता षट् २३।

षान्ता नान्ता च सङ्ख्या षट्संज्ञा स्यात्। षट् तिष्ठन्ति। षट् पश्य। पञ्च सप्तेत्यादि। "षड्भ्यो लुक्" इति जश्शसोर्लुक्। सङ्ख्येति किम्। विप्रुषः। पामानः।

नन्वत्र संख्यापदं नास्ति। न च पूर्वसूत्रात्तदनुवृत्तिः। तस्य संज्ञात्वेन लौकिकसंङ्ख्यावाचकत्वाभावात्। उच्यते—

अतिदेशपक्षे संख्यापदानुवृत्तेः सुस्थत्वात्। संज्ञापक्षेऽपि "ष्णान्ता" इत्यत्र स्त्रीलिङ्गविशेष्यस्याकाङ्क्षितत्वादस्वरितस्यापि सङ्ख्यापदस्यानुवृत्त्या शब्दाधिकारेणात्र तस्याभिमतार्थपरत्वसिद्धेः। एतच्च पूर्वसूत्रे भाष्ये स्पष्टम्।

नन्वत्र "उपदेश" इति वक्तव्यम्। प्रत्ययोत्पत्तिकाले इति तदर्थः। अन्यथा शतानि सहस्राणीत्यादौ नुमः पूर्वावयवत्वेन संख्याया नान्तत्वसम्पत्त्या षट्संज्ञायां जसादेर्लुक्प्रसङ्गादिति चेन्न। सर्वनामस्थानसंनिपातकृतस्य नुमस्तल्लोपप्रवर्तकषट्संज्ञां प्रति निमित्तत्वानुपपत्तेः।

अथ तथाऽपि अष्टन् आम् इति स्थिते परत्वान्नित्यत्वाच्च "अष्टन आ विभक्तौ" इत्यात्वे कृते नान्तत्वाभावात् षट्संज्ञाऽनुपपत्त्या "षट्चतुर्भ्यश्च" इति नुडागमो न स्यादिति तदर्थमेवोपदेशग्रहणमावश्यकमिति चेन्न। यथोद्देशपक्षे अन्तरङ्गतया विभक्त्युत्पत्तेः प्रागेव षट्संज्ञाप्रवृत्तौ तस्या एव स्थानिवद्भावेनाकारान्ते सुलभत्वात्।

अथ कार्यकालपक्षे नुड्विध्येकवाक्यतापन्नायाः षट्संज्ञाया अपि विभक्तिसापेक्षतयाऽन्तरङ्गत्वाभावादात्वस्यैव प्रथमं प्रवृत्तेर्दोषतादवस्थ्यम्, यथोद्देशपक्षेऽपि षट्संज्ञायां नकारस्योपजीव्यत्वादलृविधित्वादतिदेशदौर्लभ्यमिति चेत्, सत्यम् । "अष्टनो दीर्घात्" इति स्वरसूत्रे दीर्घग्रहणेन कृतात्वस्यापि षट्संज्ञाज्ञापनात् ।

तथा हि—अष्टन्शब्दस्य "त्रः संख्यायाः" इत्याद्युदात्तप्रसङ्गेऽपि घृतादिपाठादन्तोदात्तत्वम् । तस्य अष्टभिरिति मध्योदात्तम्, अष्टाभिरित्यन्तोदात्तं चेति रूपद्वयमिष्टम् । तत्र च "षट्त्रिचतुर्भ्यो हलादिः" इति विभक्तेरुदात्तत्वं प्राप्तम्, तद्बाधित्वा च "झल्युपोत्तमम्" इति मध्योदात्तत्वं प्राप्तम्, षट्त्रिचतुर्भ्यः परा या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवतीति तस्यार्थः । तद्बाधनार्थम् "अष्टनो दीर्घाद्" इति सूत्रम् । दीर्घान्तादष्टनः परा सर्वनामस्थानभिन्ना विभक्तिरुदात्ता स्यादिति तदर्थः । आत्वाभावपक्षे तत्प्रवृत्तिर्मा भूदिति दीर्घपदोपादानम् । यदि त्वात्वपक्षे षट्संज्ञा न स्यात्तदा "अष्टनः" इति विभक्त्युदात्तस्य तत्रैव सावकाशतया आत्वाभावपक्षे "झल्युपोत्तमम्" इत्यनेन परत्वादेव विभक्त्युदात्तबाधोपपत्तौ दीर्घादित्यस्य वैयर्थ्यं स्यात् । आत्वपक्षेऽपि षट्संज्ञायां तु विभक्त्युदात्तस्य "झल्युपोत्तमम्" इत्येतन्निर्मुक्तविषयाभावाद् येननाप्राप्तिन्यायेन तदपवादत्वादात्वाभावपक्षेऽपि मध्योदात्तबाधः स्यात्, अतो "दीर्घाद्" इत्युक्तम् । तथा चाष्टभिरित्यत्र विभक्त्युदात्तस्य प्राप्त्यभावात् "झल्युपोत्तमम्" इति मध्योदात्तसिद्धिः ।

न चाष्टावित्यत्रान्तोदात्तत्वं सावकाशम्, तत्र विभक्तेर्झलादित्वाभावेन मध्योदात्तप्रसक्त्यभावादिति वाच्यम् । "एका

देश उदात्तेनोदात्तः" इत्यनेनैव गतार्थत्वात् । अष्टन्शब्दोऽन्तोदात्त इत्युक्तत्वात् । "अष्टनः" इति सूत्रे अन्तोदात्तादुत्तरपदादित्यतोऽन्तोदात्तपदानुवृत्तेराकरसंमतत्वात् । एतेन "कदष्टन्नित्यस्याव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वात्कदष्टात्रिति शासि विभक्त्युदात्तत्वं सावकाशम्" इति शङ्काऽप्यपास्ता । तत्रान्तोदात्तत्वाभावेन "अष्टनः" इति विभक्त्युदात्तस्य प्रवृत्त्यनुपपत्तेः ।

यद्यपि मनोरमादौ "अष्टनो दीर्घाद्" इति सूत्रे अन्तोदात्तपदं नानुवर्तते, उत्तरत्र मण्डूकप्लुत्या तदनुवृत्त्युपपत्तेः" इत्यप्युक्तम्, तथाऽपि तदभ्युपेत्यवादमात्रं बोध्यम् ।

एतेन षट्संज्ञापेक्षया लाघवात्कृतात्वस्याष्टनः षट्स्वरस्यैव ज्ञाप्यताम्, ज्ञापकस्य स्वरप्रकरणस्थत्वात् , तत्र षट्संज्ञाया अनुपस्थितत्वात्, बाधकषट्स्वरनिमित्ततया तदुपस्थितौ तु षट्स्वरस्यैव प्रथमोपास्थितत्वाच्च । अर्थापत्तेः साक्षादुपपादकाविषयताया औत्सर्गिकत्वात् , इत्यपि निरस्तम् । यद्व्यतिरेकेणानुपपत्तिप्रतिसन्धानं तस्यैवार्थापत्त्या कल्प्यत्वात् । तदुक्तम्—

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः ।

इति । आत्वपक्षे यदि षट्संज्ञा न स्यात्तदा दीर्घादिति व्यर्थं स्यात् इत्येवोपपत्तेः । न च यदि षट्स्वरो न स्यादित्येवापादकमस्त्विति वाच्यम् । षट्संज्ञानिमित्तकस्वराभावस्य षट्संज्ञाव्यतिरेकप्रयुक्ततया तस्या एव प्रथमोपस्थितत्वात् । षट्स्वराभावस्यापादकत्वे तु तदभावस्यैव साध्यत्वं स्यात् । अन्यथा विपर्ययपर्यवसानात् । आपादकव्यतिरेकसाध्यकप्रमाणएव तर्कस्य सहकारित्वात् । तच्च प्रमाणमनुमानमर्थापत्तिर्वेत्यन्यदेतत् ।

तथा च यदि षट्स्वर एव अर्थापत्तिविषयस्तदा "दीर्घाद्" इत्यस्य वैयर्थ्यमेव स्यात् । आत्वपक्षे मध्योदात्तरूपस्य षट्स्वरस्यानिष्टत्वात् । इष्टत्वे "अष्टनः" इति सकलस्यैव सूत्रस्य वैयर्थ्यापत्तेश्च । तस्मात्षट्संज्ञैव ज्ञाप्यते । तन्निबन्धनस्वरप्रसक्तेः "अष्टनः" इतिसूत्रोपयुक्तायास्तत एव निर्वाहात् । नुट्प्रवर्तकतया तद्वैयर्थ्याभावाच्चेति सर्वनिर्वाहात् । अत एव "भवत्यात्वे कृते षट्संज्ञा"इत्येव भाष्यकारैरुक्तम् । अत एव च पूर्वसूत्रे "डटि परे विधीयमाना आगमा डटो निर्वाहकं संख्यात्वं ज्ञापयन्ति" इत्येवोक्तम् । अन्यथा तत्र डट एव ज्ञापनापत्तेः । आकारान्ते षट्स्वरसत्ताज्ञापने प्रयोजनाभावाच्च । अष्टाभिरित्यादौ "अष्टनः" इति विभक्त्युदात्तस्यैव प्रवृत्तेः । प्रियाष्टाभिरित्यादौ च गौणत्वात्षट्स्वरानुपपत्तेः । "षट्त्रिचतुर्भ्यः" इति बहुवचननिर्देशात् । अन्यथा समाहारे द्वन्द्वं कृत्वैकवचनमेव ब्रूयात् । "झल्युपोत्तमम्" इत्यत्राप्यर्थाधिकारेण षडर्थप्राधान्यएव प्रवृत्तेरुचितत्वात् । अत एव "चतुरः शसि" इति सूत्रे "षड्भ्यः परयोर्जश्शसोर्लोपविधानाद् बहुवचनान्तराणां च हलादित्वनियमात् तदर्थं "षट्त्रिचतुर्भ्यः" इतिसूत्रस्थस्य हलादिरित्यस्य नोपयोगः" इत्युक्तं भाष्यकृद्भिः । गौणेऽपि तत्प्रवृत्तौ त्वजादिवचनान्तरव्यावृत्त्यर्थत्वसम्भवात्तदसङ्गत्यापत्तेः । परमाष्टाभिरित्यादावपि षडादिभ्यो विहितत्वाभावादप्रवृत्तेः । "षट्त्रिचतुर्भ्यः" इत्यत्र विहितविशेषणस्य हरदत्तेनोक्तत्वात् इत्यादेः स्वयमेवोक्तत्वात् ।

वस्तुतस्तु दीर्घग्रहणेन कृतात्वस्थले षट्स्वरसत्ताज्ञापनपक्षे प्रियाष्टाभिरित्यादि प्रयोजनं स्यादेव । एतज्ज्ञाप्यस्वरप्रवृत्तौ षडर्थप्राधान्यादेरनपेक्षितत्वात् । "झल्युपोत्तमम्" इत्यनेन स्व-

रविधानएव तस्यापेक्षितत्वात् ।

अथ षट्संज्ञैवानेन ज्ञाप्यते, ततो " झल्युपोत्तमम् " इत्यनेनैव स्वरप्रवृत्तिराशङ्क्यते इति चेत्तर्हि सिद्धमस्मदिष्टम् । तस्मादुक्तयुक्त्यैव षट्स्वरप्रवृत्तिर्न ज्ञाप्यतइति बोध्यम् ।

यत्तु आत्वपक्षे षट्स्वरस्येव तदभावे तदभावज्ञापनेनापि "दीर्घाद्" इत्यस्य सार्थक्याद्विनिगमनाविरहादुभयज्ञापनापत्तिरिति, तच्चिन्त्यम् । "स्वरतिसूतिसूयति" इत्यत्र लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्" इत्यस्येव "लुग्विकरणस्यैव ग्रहणम्" इत्यस्यापि ज्ञापनापत्तेः । तेनाप्युभयनिर्देशवैयर्थ्योद्धारात् । इष्ट एवार्थो ज्ञाप्यते इत्यस्याप्युभयसाधारणत्वात् । यत्किञ्चिदर्थज्ञापनेन सर्वज्ञापकानामपि सार्थक्यसम्भवात् । सर्वत्रापि ज्ञापकानां तत्तदर्थविशेषविषयकत्वोच्छेदापत्तेश्च ।

यदप्युक्तम् । "दीर्घाद्" इत्यस्य योगविभागार्थतया सार्थक्यम् । तत्र हि दीर्घेति लुप्तपञ्चम्यन्तम् । आदिति प्रथमान्तम् । दीर्घादित्यनुवृत्तस्याष्टनो विशेषणम् । अत एव "दीर्घादष्टनः" इति न सूत्रितम् । आदिति प्रथमान्तेन विशेषणविशेष्ययोर्दीर्घाष्टनोर्व्यवधानापत्तेः । " दीर्घाद् " इति सूत्रेऽष्टनो ऽनुवृत्तेरसम्भवाच्च । दीर्घान्तादष्टन्शब्दात्परस्य असर्वनामस्थानविभक्तेराकार उदात्त इत्यर्थः । इदञ्चाष्टानामित्यत्रान्तोदात्तार्थमिति । तदत्यन्तमसत् ।

इदं हि " अष्टन आ विभक्तौ " इत्यत्र हलीत्यपकर्षपक्षे तदभावे वा । नाद्यः । नान्तत्वसन्निपातकृतस्य नुटस्तद्विघातकमात्रं प्रति निमित्तत्वानुपपत्तेः । न च तस्या अनित्यत्वान्न दोषः । अकृतव्यूहपरिभाषया नुटो दुर्लभत्वात् । भा-

विना आत्वेन निमित्तस्य विनाशोन्मुखत्वात् । "नोपधायाः" इति दीर्घेण नकारलोपेन च पञ्चानामित्यादिवदष्टानामित्यस्यापि सिद्ध्या संनिपातन्यायाप्रवृत्तिस्वीकारवैयर्थ्याच्चेति तस्य दूष्यत्वात् । एतेनोक्तयोगविभागोऽपि निरस्तः । "षट्त्रिचतुर्भ्यो हलादिः" इत्यनेनैव विभक्त्याकारस्योदात्तत्वसिद्धेः ।

यत्तु उक्तयोगविभागंआदित्यनेन "अष्टन आ विभक्तौ" इत्यात्वस्य ग्रहणम्, प्रतिपदोक्तत्वात्, न तु "नोपाधायाः" इत्यस्य, विलम्बितप्रतीतिकत्वात् । तच्च संनिपातपरिभाषायाः प्रवृत्तौ दुर्लभमिति नात्र सन्निपातपरिभाषायाः प्रवृत्तिरिति, तदसत् । "अष्टनः" इत्यात्वपरत्वानुरोधेन सन्निपातन्यायो बाध्यताम् उत "नोपधायाः" इति दीर्घेऽप्येतत्प्रवृत्त्याऽसिद्धत्वं बाध्यतामित्यत्र विनिगमकाभावात् । न चैवं लक्षणप्रतिपदोक्तपरिभाषाया असिद्धत्वस्य चेत्युभयोर्बाधापत्तिः । त्वन्मतेऽप्यकृतव्यूहसन्निपातपरिभाषयोर्बाधात् ।

यदप्युक्तम् । नलोपस्यासिद्धत्वेनाष्टनो दीर्घान्तत्वाभावात् "नोपधायाः" इति दीर्घपक्षे नोक्तयोगप्रवृत्तिरिति, तदप्यसत् । "नलोपः सुप्स्वर" इत्यादिनियमात् । न चायं स्वरविधिर्भवत्येवेति वाच्यम् । नकारान्तस्य स्वरे विधेयएव तदङ्गीकारात् । पञ्चार्ममित्यादौ तथैव दृष्टत्वात् । कार्यान्तराणामपि तत्राङ्गसम्बन्धित्वात् । अत्र च विभक्त्याकारस्य स्वरविधानेन वैषम्यात् । नापि द्वितीयः । तत्र "नोपधायाः" इति दीर्घस्यैव वाच्यतया प्रतिपदोक्तस्य आत्वस्य दुर्लभत्वात् । स्वेच्छया योगविभागे छान्दसत्वकल्पने बीजाभावात् । असर्वनामस्थानविभक्तिपदयोः प्रथमान्तयोः षष्ठीकल्पनेऽपि प्रमाणाभावात् ।

इदं चाभ्युपेत्योक्तम् । अष्टानामित्यत्र विभक्त्याकारोदात्तस्योक्तरीत्यैव सिद्धत्वादुक्तयोगविभागएव बीजाभावात् । तत्प्रवृत्तिविचारस्य निरवकाशत्वात् ।

यत्तु आम्पराष्टन्शब्दे षट्स्वराप्रवृत्तिज्ञापनमस्य फलम् । तस्याप्यात्वाभावपक्षेऽन्तोदात्तत्वाभाव इति । तदसत् । अप्रामाणिकफलानुरोधेन कल्पनाऽनुल्लासात् । अन्यथा स्वेच्छया योगविभागं कृत्वाऽनेकेषां फलानां ज्ञापयितुं शक्यत्वात् । तस्मात्कृतात्वस्य षट्संज्ञैव ज्ञाप्यते इति सिद्धम् ।

नन्वेवं दीर्घग्रहणेन आत्वाविकल्पज्ञापनानुपपत्तिः । उक्तरीत्या चरितार्थत्वात् । मैवम् । स्ववैयर्थ्यप्रयोजकव्यतिरेकप्रतियोगिन एकस्यानेकस्य वा ज्ञाप्यत्वात् । उभयज्ञापनं विना दीर्घग्रहणवैयर्थ्यानुद्धारादात्वाभावपक्षे मध्योदात्तबाधो मा भूदित्येतदर्थस्य दीर्घग्रहणस्य आत्वाभावपक्षं विना वैयर्थ्यतादवस्थ्यादिति दिक् ।

यद्वा आकारप्रश्लेषोऽप्यत्र बोध्यः । षकारो नकार आकारश्चान्ते यस्य इत्यर्थः । नन्वेवं द्वाभ्यामित्यादौ "झल्युपोत्तमम्" इत्यस्य त्र्याचि पदे प्रवृत्त्यभावात् "षट्त्रिचतुर्भ्यः" इति विभक्त्युदात्तेनान्तोदात्तत्वं स्यात् । न चेष्टापत्तिः । "आ द्वाभ्यां हरिभ्यामिन्द्र याहि" इत्यादावाद्युदात्तस्यैव पठ्यमानत्वात् । मैवम् । नकारस्थानिकस्यैवाकारस्य संज्ञायामुपादानात् । न चात्र प्रमाणाभावः । संनिधानस्यैव तथात्वात् । अत एव घुसंज्ञासूत्रे "नेर्गद" इत्यत्र "घुप्रकृतिमाङ्" इति पाठे प्रकृतिपदेन पूर्वोत्तरप्रकृतिपरामर्श इति सिद्धान्तः ।

वस्तुतस्तु "हलो यमां यमि लोपः" इति द्वितीयनकार-

प्रश्लेषेण नकारस्थानिक आकारोऽत्र व्याख्येयः । उक्तस्वरदोषोपन्यासपरभाष्यं त्वभ्युपेत्यवादमात्रम् । एतेनैकादेशेऽतिप्रसङ्गशङ्कापरग्रन्थोऽपि व्याख्यातः ।

अथवा सप्तमे योगविभागः कर्त्तव्यः । " षड्भ्यो लुक् " इत्यत्र " षड्भ्यः " इति, " अष्टाभ्य औश् " इत्यत्राष्टाभ्य इति । षड्भ्यो यदुक्तं तत्कृताकारादष्टनोऽपि भवतीति तदर्थः । तेन नुट् सिद्धः । न च यदुक्तमित्यध्याहारे मानाभावः। भाष्यस्यैव मानत्वात् । न चैवं जश्शसोर्लुगप्यतिदिश्येतेति वाच्यम् । औश्त्वविधानवैयर्थ्यापत्तेः । एतेनानुमानिकवचनकल्पनापेक्षया आकारान्ते षट्संज्ञाविरहकल्पनमेव युक्तमिति निरस्तम् । अतिदेशस्य लुग्विषयकत्वं नास्तीत्यस्यैव कल्प्यत्वात् । नान्तत्वावस्थायामेव लुग्वारणार्थं त्वन्मतेऽपि विधिसामर्थ्यस्यावश्याश्रणीयत्वात् । न चाष्टनो यदुक्तं तत्षड्भ्योऽपि स्यादिति विपरीतार्थापत्तिः । योगविभागस्येष्टसिद्ध्यर्थत्वनियमात् । अन्यथा योगविभागमात्रोच्छेदापत्तेः ।

यद्वा " अष्टन आ विभक्तौ " इत्यनन्तरं " रायः " इति योगं विभज्य " हलि " इत्युभयशेषतया व्याख्येयम् । तेन हलादावेव विभक्तौ परत आत्वविधानात् नुट एव प्राथम्यम् । न चैवं जश्शसोरात्वं न स्यादिति वाच्यम् । " अष्टाभ्यः " इत्यात्वविशिष्टनिर्देशेन तत्र तदनुमानात् । अन्यथा अष्टा इति अष्ट इति वा ब्रूयात् ।

न चैवं प्रियाष्टौ प्रियाष्टा इत्यत्रानुपपत्तिः । प्रियाष्टानौ प्रियाष्टान इत्यादेरेव साधुत्वादिष्टापत्तेः । यद्भाष्यम्—

यथालक्षणमप्रयुक्ते इति ।

तदत्र मा भूदात्वमित्यर्थ इति कैयटः ।

केचित्तु भवत्येवात्रात्वमिति भाष्यार्थ इत्याहुः, तच्चिन्त्यम्। शङ्काया अपकर्षपक्षाविषयकत्वेन तत्रैव समाधानस्य युक्तत्वात्। तत्र च हलादित्वाभावेन आत्वप्राप्तिविरहेण कैयटव्याख्याया एव युक्तत्वात्। तदयं फलितार्थः। प्रथमं तु यथोद्देशादीर्घादाकारतो विभागाभ्याम् अष्टानामितिशब्दे समाधयः पञ्च पर्यवस्यन्ति। अयं चात्र विशेषः।

औङष्टान्तेष्वाम्ङिदोष्षु नात्वं गौणे मतेऽन्तिमे।
भवत्येव तु तत्रात्वमाद्ये पक्षचतुष्टये॥

तथा हि—हलादिविभक्तावात्वविधानमिति पक्षे प्रियाष्टा इति बहुव्रीहौ औङमारभ्य टापर्यन्तम् आमि ङेङसिङस्ङिषु ओस्द्वये च आत्वं न प्राप्नोति। एषामजादित्वात्। न च "ग्रहणवता प्रातिपदिकेन" तदन्तविधिनिषेधादत्रात्वप्रसक्तिरेव नेति वाच्यम्। "पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च" इत्यनेन तत्सत्त्वात्। न च लुङ्लुटोरिवात्वस्यापि गौणे न प्रवृत्तिरिति वाच्यम्। तद्विधौ बहुवचननिर्देशादर्थप्राधान्यलाभः, आत्वविधौ तु एकवचननिर्देशान्नेति वैषम्यात्। तदिह कुत्र भाष्यतात्पर्यमिति चेत्, मैवम्। आत्वविधावेकवचननिर्देशात्स्वरूपस्य ग्रहणं मार्थस्य, तेनोपसर्जनेऽप्यष्टनि भवति। "तत्रापि विकल्पितत्वात्प्रियाष्टा प्रियाष्टानौ प्रियाष्टान इत्यपि भवति" इति वदता हरदत्तेन हलीत्यपकर्षे भाष्यस्य तात्पर्यं नास्तीति स्पष्टमेवोक्तत्वात्।

यत्तु "अष्टाभ्यः" इति सूत्रे "तदन्तग्रहणात्परमाष्टौ इत्युक्त्वा प्रियाष्टान इत्यत्रात्वस्याभावादौश् न भवतीतिवृत्तिग्रन्थविरोधाद्यथा पुनर्गौणतायामात्वं न भवति। तथा तद्विधावेव वक्ष्यत इति तत्रत्यहरदत्तग्रन्थविरोधाच्चोक्तहरदत्तग्रन्थो न युक्त इति। तच्चिन्त्यम्। वक्ष्यते इत्यत्र वृत्तिकारेणेत्यस्य विवक्षित-

त्वात् । आत्वाभावप्रयोजकश्च हलीत्यपकर्षस्तत्र स्पष्ट एव । यथाश्रुतवृत्तिग्रन्थस्य चानुपपन्नत्वात् । "अष्टाभ्यः" इत्यर्थप्राधान्यनिर्देशेन बहुव्रीहौ गौणत्वमेवौश्त्वाभावप्रयोजकम्, न त्वात्वाभाव इत्यस्य स्पष्टत्वात् । आत्वाभावस्यौशभावं प्रत्यप्रयोजकत्वात् । ननु तथाऽपि हलीत्यपकर्षे भाष्यतात्पर्यं नास्तीत्यस्य कथं सिद्धिरिति चेत्, उच्यते—

पक्षचतुष्टयविरोधस्यैव तत्र हेतुत्वात् । बहुभिर्गम्यमानस्य तात्पर्यस्यैकेन बाधानुपपत्तेः । जघन्यानामपि भूयसामनुग्राह्यतया समानकक्षाणां सुतरामेव तथात्वात् । न हि चरमोक्तं बलवदित्ययं नियमः । "कर्तुः क्यङ्" इति सूत्रे "सलोपोऽप्सरस एव पयस्यतइत्येव भवितव्यम्" इत्यस्य पश्चादुपन्यासेऽपि "न त्वयं स्थितः पक्षः" इति कैयटेनोक्तत्वात् । लाघवानुगृहीते प्रमाणतात्पर्यस्य कपिञ्जलाधिकरणादौ व्यवस्थितत्वाच्च । हलीत्यपकर्षपक्षे च सन्निपातपरिभाषादिबाधस्योक्तरीत्या स्पष्टत्वात् । दीर्घग्रहणेन कृतात्वस्य षट्संज्ञा ज्ञाप्यते इति पक्षे च तदभावात् ।

यत्त्वाकारान्ते षट्संज्ञायां फलाभावः । न च नुडेव फलम् । हलीत्यपकर्षेण नुटः पूर्वमात्वाप्रवृत्तेः । प्रियाष्ट्न इत्यर्थं तस्यावश्यकत्वादिति । तदसत् । हलीत्यपकर्षे विप्रतिपद्यमानं प्रति उक्तयुक्तेरुद्भावयितुमशक्यत्वात् । अन्यथा आकारान्तस्य षट्संज्ञयैव सिद्धौ "हालि" इत्यपकर्षे फलाभाव इत्यस्याप्यनिवार्यत्वात् । प्रियाष्ट्न इत्यस्य आत्वाभावपक्षउपपत्तेः ।

वस्तुतो "हालि" इत्युभयशेषत्वविवक्षायाम् "रायष्टनोरा हालि विभक्तौ" इत्येकमेव सूत्रं कुर्यात् । भाष्यस्याप्येतत्पक्षे निर्भरतायां तथैव न्यासः कार्यत इत्येवावक्ष्यत् ।

यत्तु "रैशब्दश्छान्दसः" इति पक्षे अष्टनोऽपि छन्दस्येवात्वं स्यादिति, तन्न। छान्दसशब्दसहचरितशब्दान्तरस्यापि छन्दस्येव कार्यमित्यत्र मानाभावात्। सम्बुद्धौ नलोपनिषेधस्यापि छन्दस्येवापत्तेः। "क्यजन्त एव रैशब्दः छान्दसः" इति कैयटोक्तेश्च।

यदपि रैशब्देऽप्यात्वविकल्पापत्तिरिति। तदप्यसत्। विकल्पबोधकपदाभावात्। दीर्घादिग्रहणेन ज्ञाप्यमानस्य त्वात्वविकल्पस्य लिङ्गलिङ्गिनोः सामानाधिकरण्यनियमात् अष्टन्शब्दमात्रविषयकत्वात्। गौरादिषु मातामहशब्दपाठेन "पितां ङीषनित्यः" इति ज्ञापितेऽपि गौरादिङीषस्तथात्वानङ्गीकारात्। एतेन "अष्टन आ विभक्तौ" इति सूत्रे "हलि" इत्युपादाने "रायः" इत्यत्र तदनुवृत्तिर्न स्यात्। "योऽचि" इत्यज्ग्रहणेनोत्तरत्र हल्पदाननुवृत्तेर्ज्ञापितत्वात्। "युष्मदस्मदोरनादेशे" इत्यात्वस्य हलादिविभक्तिविषयकत्वार्थं तदुपादानादित्यपि निरस्तम्। एकयोगत्वे उक्तदोषानवतारात्।

वस्तुतो यत्वमुत्सर्गस्तस्य हलादावात्वमपवाद इति तत्रत्यमज्ग्रहणं प्रत्याचक्षाणेन भाष्यकारेण "युष्मदस्मदोः" इत्यत्र हल्पदानुवृत्तिरेव ज्ञाप्यतइति बोध्यम्।

यदप्याहुः। आत्वाभावपक्षे अल्लोपे ष्टुत्वे च प्रियाष्ट्णः इति रूपमिति हरदत्तोक्तिरपि चिन्त्या। पूर्वस्माद्विधावल्लोपस्य स्थानिवद्भावादकारेण व्यवधानात् ष्टुत्वस्य दुर्लभत्वात्। न च "पूर्वत्रासिद्धीये न स्थानिवत्" इति वाच्यम्। "तस्य दोषः संयोगादिलोपलत्वणत्वेषु" इति निषेधाण्णत्वविधौ तदप्रवृत्तेः। न च तत्र "रषाभ्याम्" इति प्रतिपदोक्तमेव णत्वं गृह्यते, ष्टुत्वविधिलभ्यस्य विलम्बितप्रतीतिकत्वादिति वाच्यम्। मूर्द्धन्य-

ग्रहणानुवृत्त्या तत्रत्यणग्रहणस्य भाष्ये प्रत्याख्यातत्वात् । न चैवं पूष्ण इत्यादावपि णत्वानुपपत्तिः । "अट्कुप्वाङ्" इत्यनेनैव तत्र णत्वसिद्धेरिति । तच्चिन्त्यम् । णत्वमात्रविश्रान्तविधेयतावच्छेदकताकत्वेन तथाऽपि प्रतिपदोक्तत्वस्य सुलभत्वात् । यस्य विधौ णशब्दोपादानं तस्यैव णत्वस्य प्रतिपदोक्तत्वम् इति णकारप्रत्याख्यानेऽपि सत्त्वाच्च । प्रत्याख्यानाभावविशिष्टोपादानस्याप्रयोजकत्वात् । वचनविशेषपरिचायकत्वमात्रेण तस्योपयोगात् । प्रत्याख्यातानामपि वचनानां ज्ञापकतया भाष्यकारैरुपन्यासात्सत्त्वनियमानपेक्षस्योपलक्षणत्वस्य सुतरामुपपत्तेः । "निष्ठायां सेटि" इति सूत्रस्य भाष्यकृता प्रत्याख्यातस्यापि तत्रत्यसेटीतिपदस्य पूर्वस्माद्विधौ स्थानिवत्त्वमनित्यमित्येतज्ज्ञापकतायाः सर्वसंमतत्वात् । अपदान्तस्थानिकादेशसाहचर्याच्च । संयोगस्य पदान्तत्वापेक्षायामपि लोपस्य तत्प्रतियोगिनोः सकारककारयोश्चापदान्तत्वात् ।

न च निलयतइति लत्वं पदान्तस्थानिकमपीति वाच्यम् । तत्र स्थानिवद्भावतत्प्रतिषेधयोरप्रवृत्तेः । साहचर्यस्य नियामकत्वमनित्यमित्युक्तौ तु पञ्चमीसमासस्यापि तथात्वमिति तुल्यत्वात् । प्रवृत्तेरौत्सर्गिकत्वमित्यस्याप्युभयसाधारण्यात् । "पूर्वविधौ" इति पञ्चमीसमासस्य "तस्य दोषः" इत्यत्र णत्वग्रहणस्य च भवद्भिरेव निरस्तत्वाच्च । न च "असिद्धं बहिरङ्गमन्तरङ्गे" इत्यल्लोपस्यासिद्धत्वात्तथाऽपि न ष्टुत्वमिति वाच्यम् । यथोद्देशपक्षे तस्याः ष्टुत्वविधावप्रवृत्तेः । ष्टुत्वस्य तां प्रत्यसिद्धत्वात् ।

यत्तु फलैक्याय कार्यकालपक्ष एवेह न्याय्य इति । तन्न । फलैक्यं हि "रषाभ्याम्" इत्यत्र णग्रहणतत्प्रत्याख्यानयो-

र्वा। "तस्य दोषः" इत्यत्र णत्वग्रहणतत्प्रत्याख्यानयोर्वा। "अचः परस्मिन्" इत्यत्र पञ्चमीसमासतत्प्रत्याख्यानयोर्वा। नाद्यः। णग्रहणेन लक्षणप्रतिपदोक्तपरिभाषया तदभावे च "तस्य दोषः" इति णत्वप्रत्याख्यानेन ष्टुत्वस्य सुलभत्वात्। न द्वितीयः। णत्वग्रहणे प्रतिपदोक्तपरिभाषया तदभावे च बाधकाभावादेव ष्टुत्वस्य निश्चितत्वात्। न तृतीयः। पञ्चमीसमासपक्षे प्रतिपदोक्तन्यायेन तदभावे च तत एव ष्टुत्वस्य प्रमितत्वात्। तदैक्यसंपादकतया यथोद्देशपक्षस्यैवात्र युक्तत्वात्।

वस्तुतस्तु "न पदान्त" इति सूत्रे "द्विर्वचनादीनि वरेयलोपस्वरवर्जम्" इति वार्त्तिकभाष्याभ्यां वक्ष्यते। तथा च णकारादिसाधारणधर्मो यत्र विधेयतावच्छेदकस्तस्यापि "तस्य दोषः" इत्यत्र णत्वपदेनोपादाने शिण्ढीत्यादावपि तत्प्रवृत्त्यापत्त्या "पूर्वत्रासिद्धे न स्थानिवत्" इत्यस्य प्रवृत्त्यनुपपत्तौ तदाश्रित्य सवर्णग्रहणप्रत्याख्यानं न स्यात्। "अनुस्वारस्य ययि परसवर्णः" इत्यत्र णकारस्यापि विधेयत्वेन भवद्रीत्या णत्वविधिः स्यात्। तथा च यत्र णत्वावच्छिन्नव्यक्तिमात्रपर्यवसन्नमादेशत्वम्, तदेव णत्वपदेन गृह्यते। तच्च "रषाभ्याम्" इत्यत्र णकारग्रहणे मूर्द्धन्यानुवृत्तौ वा तुल्यमेवेति दिक्।

डति च २४।

डत्यन्ता संख्या षट्संज्ञा स्यात्। कति सन्ति। कत्यद्राक्षीः। "षड्भ्यः" इति जश्शसोर्लुक्। अत्र भाष्यम्—

"बहुगणवतु संख्या" "डति च" "ष्णान्ता षट्" इति न्यासः कर्तव्यः। यथान्यासे उभयत्र डतिग्रहणेन गौरवात्।

"डति च" इत्यत्र संख्येत्यनुवर्त्तते । "ष्णान्ता षट्" इत्यत्र तु संख्या डतीत्युभयम् । न चैवं "पातेर्डतिः" इत्यौणादिकस्यापि संख्याप्रसङ्गे पतय इत्यादौ विभक्तेर्लुक् स्यादिति वाच्यम् । संख्यासाहचर्येण तद्धितस्यैव डतेर्ग्रहणात् । यथान्यासेऽप्येवमेव वाच्यत्वात् ।

क्तक्तवतू निष्ठा २५ ।

एतौ निष्ठासंज्ञौ स्तः । कृतः । कृतवान् । "निष्ठा" इत्युभयोर्विधानम् । विहितयोः संज्ञा, संज्ञया च विधानमित्यन्योन्याश्रयं तत्रैव परिहरिष्यामः । सानुबन्धयोर्ग्रहणं किम् । लोतः गर्त इत्यादेर्मा भूत् ।

स्यादेतत् । अनुबन्धानां कार्यार्थमुपादानम्, न तु प्रयोगसमवायः । तथा चानुबन्धलोपे कृते यत्रावशिष्टभागस्यात्यन्तसारूप्यम्, तत्र तत्प्रयुक्तकार्यव्यवस्था न स्यात् । न च यथा उत्पतितेऽपि काके देवदत्तगृहस्येतरव्यावृत्तिबुद्धिः, तथाऽत्रापि स्यादिति वाच्यम् । तत्र संस्थानविशेषादेरिवात्रोपलक्ष्यतावच्छेदकस्य रूपान्तरस्याभावात् । व्यावर्त्यवृत्तिधर्मान्तरोपस्थानद्वारा व्यावृत्तधीहेतोरेवोपलक्षणत्वात् । तदुक्तम्—

निष्ठासंज्ञायां समानशब्दप्रतिषेधः इति ।

मैवम् । कालकारकविशेषादयोऽर्था एवात्र संस्थानविशेषादिस्थानीयाः । तद्दर्शनादनुबन्धस्मृतौ सत्यां तत्तदनुबन्धनिबन्धनानां कार्याणां साधुत्वं विज्ञायते । तथा हि—"देवदत्तेन लूनः शालिः" इति प्रयुक्ते लक्षणज्ञस्य कर्मभूतकालावगमात् क्तप्रत्ययोऽयमिति धीरुदेति, "लोतमालभेत" इत्युक्ते तु मेषवाची लोतशब्द इति ।

"हसिमृग्रिणवाऽमिदमिलूपूधूर्विभ्यस्तन्" इत्युणादिसूत्रात् । अथ "अञ्जिघृसिभ्यः क्तः" इत्युणादौ अक्तं घृतं सितमित्यत्र विहितस्य क्तस्यापि संज्ञा स्यात् । न चेष्टापत्तिः । "निष्ठा च द्व्यजनात्" इत्युदात्तापत्तेः । निष्ठान्तं द्व्यच्कं संज्ञायामाद्युदात्तम् न चेदाकार आदिरिति तदर्थः । न चेष्टापत्तिः । घृतं मिमिक्षइत्यादावन्तोदात्तपाठविरोधात् । अत्राहुः—

उणादयः क्वचिद् व्युत्पत्तिकार्यं न लभन्ते ।

"अतः कृकमि" इति सूत्रे कमेः स इति व्युत्पन्नस्य कंसशब्दस्य कमेः पृथगुपादानात् । यद्वा "घृतादीनां च" इत्यन्तोदात्तमिति ॥

इति श्रीसिद्धान्तसुधानिधौ प्रथमाध्यायस्य
प्रथमे पादे पञ्चममाह्निकम् ॥ ५ ॥

सर्वादीनि सर्वनामानि२६ ।

सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः । प्रदेशाः " सर्वनाम्नः स्मै " इत्यादयः । ननु सर्वशब्दस्य संज्ञा न स्यात् । तदादौ सर्वशब्दपाठाभावात् । सत्यम् । सर्वं आदौ येषां तानि सर्वादीनीति बहुव्रीहिः । सर्वश्चासावादिश्च सर्वादिरिति कर्मधारयः । अत्रादिशब्दस्य प्रयोजनाभावेऽपि सारूप्यसम्पादनमात्रार्थमुपादानम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्, कर्मधारये त्वन्तोदात्तत्वम् । "स्वरभिन्नानां यत्परं तच्छिष्यते " इति बहुव्रीहितत्पुरुषयोरेकशेषे तत्पुरुषलोपः ।

वस्तुतस्तु तद्गुणत्वाद् बहुव्रीहेः सिद्धम् । अत एव "जन्माद्यस्य यत " इति सूत्रे " जन्मनोऽपि ब्रह्मलक्षणत्वम् " इति भगवत्पादादयः । अधिकं बहुव्रीहिसंज्ञासूत्रे वक्ष्यामः ।

अत्र हि उद्भूतावयवभेदः समुदायः समासार्थः । तस्य च युगपत्प्रयोगाभावात्कार्यार्थत्वव्याप्यायाः संज्ञायास्तदवयवेषु निवेशादविशेषात्सर्वशब्देऽपि निवेशः । अत एव " सर्वादीनि " इति बहुत्वं सङ्गच्छते । समुदायस्य संज्ञित्वे एकवचनप्रसङ्गात् । महासंज्ञाकरणमन्वर्थत्वविज्ञानार्थम् । तेन संज्ञोपसर्जनानां व्यावृत्तिः । तेषां धर्मिविशेषमात्रबोधकत्वात् ।

ननु किमिदं सर्वनामत्वम् । न यावदर्थबोधकत्वम् । पूर्वादिपदानां घटाद्यवाचकत्वात् । न च पूर्वत्वादिरूपेण तद्बोधजनकत्वात्तदर्थकत्वम्, केनाचिद्रूपेण यावदर्थबोधजनकत्वस्य विवक्षितत्वादिति वाच्यम् । विशुद्द्रव्याणां गुणादीनां च पूर्व-

"हसिमृग्रिणवाऽमिदमिलूपूधूर्विभ्यस्तन्" इत्युणादिसूत्रात्। अथ "अञ्जिघृसिभ्यः क्तः" इत्युणादौ अक्तं घृतं सितमित्यत्र विहितस्य क्तस्यापि संज्ञा स्यात्। न चेष्टापत्तिः। "निष्ठा च द्व्यजनात्" इत्युदात्तापत्तेः। निष्ठान्तं द्व्यच्कं संज्ञायामाद्युदात्तम् न चेदाकार आदिरिति तदर्थः। न चेष्टापत्तिः। घृतं मिमिक्षइत्यादावन्तोदात्तपाठविरोधात्। अत्राहुः—

उणादयः क्वचिद् व्युत्पत्तिकार्यं न लभन्ते।

"अतः कृकमि" इति सूत्रे कमेः स इति व्युत्पन्नस्य कंसशब्दस्य कमेः पृथगुपादानात्। यद्वा "घृतादीनां च" इत्यन्तोदात्तमिति॥

इति श्रीसिद्धान्तसुधानिधौ प्रथमाध्यायस्य
प्रथमे पादे पञ्चममाह्निकम्॥ ५॥

सर्वादीनि सर्वनामानि २६ ।

सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः । प्रदेशाः " सर्वनाम्नः स्मै " इत्यादयः । ननु सर्वशब्दस्य संज्ञा न स्यात् । तदादौ सर्वशब्दपाठाभावात् । सत्यम् । सर्व आदौ येषां तानि सर्वादीनीति बहुव्रीहिः । सर्वश्चासावादिश्च सर्वादिरिति कर्मधारयः । अत्रादिशब्दस्य प्रयोजनाभावेऽपि सारूप्यसम्पादनमात्रार्थमुपादानम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्, कर्मधारये त्वन्तोदात्तत्वम् । "स्वरभिन्नानां यत्परं तच्छिष्यते " इति बहुव्रीहितत्पुरुषयोरेकशेषे तत्पुरुषलोपः ।

वस्तुतस्तु तद्गुणत्वाद् बहुव्रीहेः सिद्धम् । अत एव "जन्माद्यस्य यत " इति सूत्रे " जन्मनोऽपि ब्रह्मलक्षणत्वम् " इति भगवत्पादादयः । अधिकं बहुव्रीहिसंज्ञासूत्रे वक्ष्यामः ।

अत्र हि उद्भूतावयवभेदः समुदायः समासार्थः । तस्य च युगपत्प्रयोगाभावात्कार्यार्थत्वव्याप्यायाः संज्ञायास्तदवयवेषु निवेशादविशेषात्सर्वशब्देऽपि निवेशः । अत एव " सर्वादीनि " इति बहुत्वं सङ्गच्छते । समुदायस्य संज्ञित्वे एकवचनप्रसङ्गात् । महासंज्ञाकरणमन्वर्थत्वविज्ञानार्थम् । तेन संज्ञोपसर्जनानां व्यावृत्तिः । तेषां धर्मिविशेषमात्रबोधकत्वात् ।

ननु किमिदं सर्वनामत्वम् । न यावदर्थबोधकत्वम् । पूर्वादिपदानां घटाद्यवाचकत्वात् । न च पूर्वत्वादिरूपेण तद्बोधजनकत्वात्तदर्थकत्वम्, केनाचिद्रूपेण यावदर्थबोधजनकत्वस्य विवक्षितत्वादिति वाच्यम् । विभुद्रव्याणां गुणादीनां च पूर्व-

त्वादिरूपेणाप्यबोधनात् । आत्मपरेषु स्वयुष्मदस्मत्पदेष्वव्याप्तेश्च । अत एव कैयटेन "सर्वेषां नामानि" इति भाष्यव्याख्यायां "स्वविषयापेक्षया सर्वनामत्वम्, यथा जात्यादेः स्वविषयापेक्षया सर्वगतत्वम्" इत्युक्तम् । नाप्यनेकार्थबोधकत्वम् । सर्वपदस्यापि संज्ञाभूतस्य तथात्वात् । तद्वाच्यव्यक्तीनामवस्थाभेदेन भिन्नत्वात् । नापि विजातीयानेकबोधकत्वम् । स्वादिपदेष्वव्याप्तेः । आत्मत्वेन तेषां साजात्यात् । प्रियसर्वौ चैत्रमैत्रावित्युपसर्जनसर्वपदस्यापि तथात्वादतिव्याप्तेश्च । तस्मात्संज्ञोपसर्जनव्यावृत्तमवयवार्थतावच्छेदकं दुर्वचमिति चेत्, सत्यम् । अन्वर्थसंज्ञयैवोभयव्यावृत्तिरिति न भाष्याभिप्रायः, किन्तु तत्र तात्पर्यग्राहकत्वमात्रम्, व्यावृत्तिस्तु "संज्ञोपसर्जनप्रतिषेधः" इति वार्त्तिकवचनादेव । न च तत्राप्युक्तानुयोगः । आधुनिकसङ्केतः संज्ञा, वृत्तिप्रवेश उपसर्जनत्वमित्युभयसंमतत्वात् । अत एवाग्रे कैयटो वक्ष्यति—

उपसर्जनप्रतिषेधो वार्त्तिककारस्य, न सूत्रकारस्य । "न बहुव्रीहौ" इत्यस्यारम्भादिति ।

संज्ञायास्त्वन्वर्थत्वाश्रयणादपि व्यावृत्तिरिति तदभिप्रायः । ननु सर्वनामपदे "पूर्वपदात्संज्ञायाम्" इति णत्वं स्यात् । निपातनस्वीकारे सणत्वस्यासाधुत्वापत्तेः । न चोभयप्रामाण्यादुभयोः साधुत्वम् । निषेधस्थलेऽपि विकल्पापत्तेः । विशेषशास्त्रेण सामान्यशास्त्रसङ्कोचस्य तुल्यत्वात् । सत्यम् । सणत्वस्यासाधुत्वमेव । उक्तन्यायात् । न च "क्रियासातत्ये" इत्यनेन सन्ततशब्दबाधापत्तिः । एकदेशानुमतिद्वारा "लुम्पेदवश्यमः कृत्ये" इति पूर्वाचार्यश्लोकस्यैव ज्ञाप्यत्वात् । न च "पुराणप्रोक्तेषु" इति नुडागमाभावनिपातनात्पुरातनशब्दस्यासाधु-

त्वापत्तिः । इष्टत्वादिति केचित् ।

पृषोदरादिषु तस्य पाठ्यत्वादिति कैयटः ।

कौस्तुभकारास्तु पुराणेति निर्देशेन आगमशासनस्य अव्ययानां भमात्रे टिलोपः"इत्यस्य चानित्यत्वमात्रं ज्ञाप्यत इत्याहुः। तेन "पुरातनं त्वां पुरुषं पुराविदः"इत्यादि सिद्धम् ।

संज्ञोपसर्जनयोः संज्ञाप्रतिषेधप्रकारमाह वार्त्तिककारः ।

पाठात्पर्युदासः पठितानां संज्ञाकरणमिति ।

अयमर्थः—संज्ञोपसर्जनानां सर्वादिमध्ये पाठो नास्तीति वचनमारभ्यते । तेषां पाठबहिर्भावं कृत्वा पठितानां संज्ञा विधेयेति । यद्वा—नेदं संज्ञासूत्रम्, किन्तु गणशुद्धिमात्रफलकम् । यथा "तिङ्गो गोत्रादीनि कुत्सनाभीक्ष्णययोः"इति सूत्रे यानि कुत्सनाभीक्ष्ण्यवृत्तीनि गोत्रादिशब्दस्वरूपाणि तान्येव गोत्रादिगणे पठ्यन्ते, न त्वन्यादृशानीति । तेन "चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः" "कुत्सने च सुप्यगोत्रादौ" इत्यत्र तादृशानामेव ग्रहणम्, न त्वर्थान्तरवृत्तीनाम् । एवमिहापि यानि सर्वादिवाचकानि तान्येव सर्वादिगणे पठितानि, न तु संज्ञोपसर्जनीभूतानि। तेषां विशेषवृत्तित्वात् । तथा च तेषां गणपाठाभावादेव न संज्ञाप्रसक्तिरित्यर्थः । न चैवं संज्ञाप्रयुक्तकार्यासिद्धिः । सर्वनाम्न इत्यादौ यौगिकार्थस्यैव ग्रहणात् ।

वस्तुत एवं सकलकृत्स्नादिशब्देष्वतिव्याप्तिः। तस्मात् "सर्वादीनि" इत्यत्रोभयत्राप्येकशेषः । यानि सर्वेषां नामानि तान्येव सर्वादीनीति गणशुद्ध्यर्थमेकवाक्यम् ।

वार्त्तिककृता वचनान्तरेण पूर्वं गणशुद्धिः कृता ।

भाष्यकृता त्वनेनैव प्रकारेणेति विशेषः । यानि सर्वादीनि तानि सर्वनामसंज्ञानीति संज्ञार्थं द्वितीयमिति न कोऽपि दोषः ।

न चैवं सहविवक्षाविरहादेकशेषानुपपत्तिः, अर्थद्वयस्योद्देश्यविधेयभाववैपरीत्येनान्वयादिति वाच्यम् । जातिपक्षे प्रत्याख्यातस्य सरूपसूत्रस्य प्रक्रियादशायां सहभावविवक्षाविरहेऽप्येकशेषविधायकत्वस्वीकारात् । येषां सर्वनामत्वं नेष्यते तेषां "न बहुव्रीहौ" इत्यत्र नेतियोगविभागेन संज्ञानिषेधो व्याख्येय इति चतुर्थे वक्ष्यमाणं भाष्यारूढं समाधानमप्यत्र संचारणीयम् ।

वार्त्तिकमते " एकद्रव्योपवेशिनी संज्ञा " इति संज्ञासंज्ञया सर्वनामसंज्ञा बाध्यते इति एकसंज्ञाधिकारे वक्ष्यमाणरीत्याऽपि संज्ञांशे समाधेयमिति दिक् ।

तेन तेषां संज्ञाकार्यमन्तर्गणकार्यं च न । संज्ञाकार्यं यथा—सर्वो नाम कश्चित् तस्मै सर्वाय । अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वाय । अन्तर्गणकार्यं यथा–तद् नाम कश्चित् "त्यदादीनामः" इत्यत्वं न । तमतिक्रान्तोऽतितत् "अद्ड्डतरादिभ्यः" इत्यद्ड्डादेशो न । न च संज्ञायां गौणमुख्यन्यायादेव वारणात्पर्युदासवैयर्थ्यम् । इष्टापत्तेरिति हरदत्तादयः ।

तस्य पदकार्यमात्रविषयकत्वादिति कैयटः ।

" युष्मदस्मद्भ्यां ङसोऽश् " इत्यादिकं त्वतियुष्मदित्यादौ भवत्येव । शब्दस्वरूपमात्राश्रयतया गणपाठानपेक्षत्वात् । न च " युष्मद्युपपदे " इत्यादावप्यापत्तिः । " अभिव्यक्तपदार्था ये " इति न्यायात्प्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः । तत्र च शब्दपरत्वात् । अत्र भाष्यम्—

संज्ञाप्रतिषेधो व्यर्थः, पूर्वपरावरेत्यत्रासंज्ञायामिति योगं विभज्य तस्य पूर्वोत्तरशेषतया व्याख्यानात् ।

एवमुपसर्जनस्यापि "अनुपसर्जनात्" इति सूत्रस्य प्रत्याख्यानात्, तदधिकारे प्रयोजनाभावात् । तच्च तत्रैव वक्ष्यामः ।

किन्तु तदन्यथा व्याख्येयम् । "अनुपसर्जन" इति षष्ठ्यन्तम्, छान्दसत्वात्तल्लोपः । अश्च अच्च आत् उक्तादेशौ अनुपसर्जनस्य भवत इत्यर्थः । न चैवम् अतियुष्मदित्यस्यासिद्धिः । अकारान्तरं प्रश्लिष्य तेन पूर्वोक्तादेशयोर्विशेषणात् अकारात्परौ यौ अकारात्कारौ इति व्याख्यानात् त्यदाद्यत्वमद्ड्डादेशश्चाकारात्परतो विधीयेते इति तत्र परिभाषोपस्थानम्, न त्वतियुष्मादित्यत्र "पञ्चम्या अत्" इत्यद्भावस्य । युष्मदस्मद्भ्यां परस्य ङस्यादेर्विधानात् । तयोश्चाकारान्तत्वाभावात् ।

नन्वेवं प्रियौ द्वावस्येति बहुव्रीहौ प्रियद्विरित्यत्र त्यदाद्यत्वं स्यात् । इकारस्थानिकस्याकारादेशस्य वकारात्परत्वादकारात्परतो विधानाभावादुक्तपरिभाषाया अप्रवृत्तेः । एवम् "तदोः सः सावनन्त्ययोः" इति सत्वमप्युपसर्जने स्यात् । उक्तपरिभाषायां सकारस्यानुपादानात् । मैवम् । "त्यदादीनामः" इत्यत्रोक्तपरिभाषयाऽनुपसर्जनग्रहणे सिद्धे साहचर्यात्तथाभूतस्यैव द्विशब्दस्योपादानात् । सत्वविधावप्यर्थाधिकारेण तथाविधानामेव त्यदादीनां ग्राह्यत्वात् ।

यद्वा—अङ्गाधिकारेष्वर्थद्वारकविशेषणमाश्रयणीयम् । तदुक्तम्—

अङ्गाधिकारे यदुच्यते गृह्यमाणाद्विभक्तेस्तद्भवतीति ।

गृह्यमाणानां त्यदादीनाम् उत्तरादीनां चार्थद्वारेण सम्बन्धिनी या विभक्तिस्तदर्थगतसंख्याकर्मत्वादिवाचिनी तस्या इत्यर्थः ।

गृह्यमाणाद्विहिता विभक्तिरित्यर्थे तु परमपञ्चेत्यादौ लुक् न स्यात् । तथा च सर्वनामार्थवृत्तिसंख्याकारकाभिधायिनो ङेः स्मै स्यादित्यादिरर्थः । प्रियविश्वायेत्यादौ त्वन्यपदार्थवृत्तय एव संख्यादयो विभक्त्योच्यन्ते, न तु सर्वशब्दार्थवृत्तय इत्यदोषः । परमसर्व इत्यादौ तु सर्वशब्दार्थवृत्तय एवेति नाव्याप्तिः ।

ननु "द्वन्द्वे च" इति ज्ञापकात्सर्वनामसंज्ञायां तदन्तविधिरस्ति। तथा च तदन्तस्यापि प्रियविश्वादेः सर्वनामत्वात्सर्वनामार्थवृत्ति-संख्याद्यभिधायित्वं विभक्तेरक्षतमिति चेत्, सत्यम्। सर्वादिगण-पठितत्वे सति सर्वनामत्वस्यात्र निवेशात्। तदन्तस्य च स-त्यामपि संज्ञायां तदभावात्। न चैवं विहितविशेषणेनैव तत्सि-द्धिरिति वाच्यम्। उपायस्योपायान्तरानपवादकत्वात्।

अन्ये त्वेतदपरितोषादेवान्वर्थसंज्ञाश्रयणमित्याहुः।

वस्तुतस्तु अन्वर्थसंज्ञापक्षे उपसर्जनव्यावृत्तस्यावयवार्थस्य दुर्वचत्वात् तत्र भाष्यस्य न तात्पर्यम्। "द्वन्द्वे च" इत्यनेन ज्ञाप्यमानस्तदन्तविधिस्तु यत्र सर्वनाम्नः प्राधान्यं तत्रैव। ल-क्ष्यानुरोधात्। धर्मिग्राहकप्रमाणानुरोधाच्च। तेनातिसर्व इत्यादौ नातिव्याप्तिः। "न बहुव्रीहौ" इति सूत्रं तु अलौकिकवाक्ये संज्ञानिषेधार्थं प्रत्याख्येयं वेत्यन्यदेतत्।

यस्त्वङ्गाधिकारलभ्यतदन्तविधिप्रयुक्तोऽतिप्रसङ्गः स तत्रैव विहितविशेषणेन परिहरिष्यते। अन्यथा तेनापि तत्परिहारानुपप-त्तेः। तत्र विहितविशेषणेन तद्दोषपरिहारस्य च सर्वाभिमतत्वात्। अन्यथाऽवयवसंज्ञानिषेधार्थतयैव वचनोपपत्त्या तदन्तविधि-ज्ञापकत्वानुपपत्तेः। कैयटस्याप्ययमेवाभिप्रायः।

अतिसर्वायेत्यादौ त्वविशेषकार्यमपरिहृतमेवेति दोषस्य "अनुपसर्जनाद्" इति पूर्वोक्तपक्षमेव प्रक्रम्य तेन लिखितत्वात्। अर्थद्वारकविभक्तिविशेषणपक्षे तद्दोषाभावस्य तदभिमतत्वात्। अविशेषकार्यं सर्वनामसंज्ञाप्रयुक्तमित्यर्थः। तस्मादर्थद्वारकवि-भक्तिविशेषणएव भाष्यस्य तात्पर्यम्।

ननु पञ्चकाः शकुनय इत्यत्र प्रत्ययस्य स्वार्थिकत्वात् षडर्थप्रा-धान्यात् षड्भ्यो लुक् स्यादिति चेन्न। प्रत्ययविशिष्टस्य शब्दान्त-

रत्वान्नान्तत्वाभावाच्च पद्संज्ञाविरहात् । ननु "युष्मदस्मद्भ्यां ङसोऽश्" इत्यादिकमप्युपसर्जने न स्यात्, युष्मदाद्यर्थनिष्ठसंख्याद्यनभिधायकत्वात्तत्रत्यविभक्तेरिति चेन्न । तत्प्रकरणे अङ्गस्यार्थद्वारा युष्मदस्मद्भ्यां च परत्वमात्रेण विभक्तेर्विशेषणीयत्वात् । अङ्गनिष्ठसंख्याभिधायिन्या युष्मदस्मद्भ्यां परस्या ङसादिविभक्तेरशादयो भवन्तीत्यर्थः । "अद्ड् डतरादिभ्यः" इत्यत्र त्वङ्गाधिकाराभावाद् डतरादिभ्यो यो विहित इत्यर्थद्वारकं विधानमाश्रयणीयम् । तेन परमकतरदित्यादौ अतिकतरमित्यादौ च नाव्याप्त्यतिव्याप्ती । "अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः" "त्यदादीनामः" इत्यादौ तु "अङ्गस्य" इति षष्ठ्या अपि सत्त्वादस्थ्यादिभिरङ्गेन वा विभक्तिर्विशेष्यत इत्युभयसम्भवात् अस्थीत्यादौ अङ्गस्य विभक्तावस्थ्यादीनामनङ् स्यादिति वाक्यार्थः । तेन प्रियसक्थ्नेत्यादौ नाव्याप्तिः । अत्र शकटावयववाची सक्थिशब्दः। अन्यथा "बहुव्रीहौ सक्थ्यक्ष्णोः" इति षच्प्रसङ्गात् । "त्यदादीनामः" इत्यादौ तु त्यदादिकं विभक्तेर्विशेषणम्, अङ्गस्येत्यकारस्य । त्यदाद्यर्थनिष्ठसंख्याद्यभिधायिन्यां विभक्तावङ्गस्याकारोऽन्तादेशः स्यादित्यर्थः । तेन अतिस अतितद् इत्यादौ नाव्याप्त्यतिव्याप्ती । लक्ष्यानुरोधेनैव व्याख्यानप्रवृत्तेरित्यास्तां विस्तरः ।

उभशब्दः पर्याप्त्या द्वित्वविशिष्टस्य वाचकः । अत एव नित्यं द्विवचनान्तः ।

नन्वेवं सर्वादिपाठोऽस्य व्यर्थः । एकबहुवचनयोरेव सर्वनामसंज्ञाप्रयुक्तकार्यविशेषदर्शनात् । उभाभ्यां हेतुभ्यामिति तृतीययोश्च " निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् " इति हेताविति सूत्रस्थसर्वनामसंज्ञानपेक्षवार्त्तिकादेव सिद्धेः । काकचोश्च

विशेषाभावादिति चेत्, सत्यम्। उभकावित्यकजर्थोऽत्र पाठः। न ह्येतत्कप्रत्ययेनेष्टं सिद्ध्यति।

अयचा उभयकावित्यापत्तेः। द्विवचनातिरिक्तस्थले उभशब्दादयजुत्पत्तिनियमात्। तथा हि—"उभादुदात्तो नित्यम्" इत्यत्र उभादिति योगो विभज्यते। अवयववृत्तेः सङ्ख्यावाचिनः उभशब्दादवयविन्यर्थेऽयच्स्यात्। उभयो मणिः। श्यामलोहिताभ्यां भागाभ्यामारब्ध इत्यर्थः। ततो नित्यम्। उभशब्दान्नित्यमयच्स्यात्, अर्थविशेषानिर्देशात्स्वार्थे। उभौ पुत्रौ यस्यासावुभयपुत्रः।

न चैवं द्विदण्ड्यादिषूभाहस्तीत्यस्यानुपपत्तिः। तत्र पाक्षिकायजभावनिपातनेन तत्सिद्धेः। तदुक्तं वार्तिककृता—

अन्याभावो द्विवचनटाब्विषयत्वाद्, उभयोऽन्यत्रेति।

अन्यत्र द्विवचनपरत्वाभावे इत्यर्थः। तथा च कप्रत्ययेन व्यवधानाद्द्विवचनपरत्वाभावात् अयच् स्यात्। अकचि तु तस्य मध्यपातित्वादुभशब्दस्य द्विवचनपरत्वमस्त्येवेति न तत्प्रसङ्गः।

भाष्यकृतस्त्वाहुः—स्वार्थिकत्वादुभशब्दतुल्यार्थकत्वात्तद्रूपद्विवचनपरत्वमस्त्येवेति अवश्यं वक्तव्यम्। एवं च कप्रत्ययस्यापि द्वित्वार्थकप्रकृतिकस्य द्वित्वाभिधायकप्रत्ययत्वरूपद्विवचनत्वसद्भावात् तस्मिन्परे अयचो न प्रसङ्गः। पारिभाषिकद्विवचनमात्रस्योक्तवार्त्तिकेऽनुपादानात्। अत एव "णेरणौ" इत्यत्र कर्मशब्देन क्रियाग्रहणम्। अत उभयशब्दोऽत्र न पठनीय एवेति। एवं च "नित्यम्" इतियोगविभागस्य व्याख्याने वृत्तिमात्रे इत्यस्य प्रक्षेपो निर्मूल इति बोध्यम्।

यस्त्वेवम्—उभयत उभयत्रेत्यादावप्ययचोऽनुपपत्तिः। न च तत्र तसो विभक्त्यन्ताद्विधानाद्विभक्त्यर्थस्याप्यधिकस्याभिधा-

नात् द्वित्वमात्रवाचकत्वं नास्तीति वाच्यम् । कप्रत्ययस्याप्य-ज्ञाताद्यर्थबोधकत्वात् । पञ्चकं प्रातिपदिकार्थ इति पक्षेऽधिक-वाचकत्वाच्च इति । तच्चिन्त्यम् । द्वित्वमात्रवाचकत्वं हि न द्विवचनत्वम् । कर्मत्वादेरपि ततो बोधात् ।

अथ द्वित्ववाचकतावच्छेदकरूपेण द्वित्वान्यावाचकत्वं द्वि-त्वमात्रवाचकत्वम् । तत्र तु द्वितीयात्वादिना कर्मत्वादिवाच-कत्वम्, औत्वादिना तु द्वित्ववाचकत्वमिति चेत् कप्रत्ययस्यापि द्वित्वार्थकप्रकृतिकत्वेन द्वित्ववाचकत्वं तदर्थविहितत्वेनाज्ञाताद्य-र्थवाचकत्वमिति साम्यात् ।

वस्तुतस्तु त्रतसोरव्ययत्वाद्द्वित्वाभिधानसामर्थ्यं नास्तीति कैयटोक्तेर्न तयोर्द्विवचनत्वम् । स्वार्थिकत्वेऽपि स्वस्वभावविरोधि-नोऽर्थस्याभिधानानर्हत्वात् । तत्प्रकृत्यर्थबोधस्य स्वार्थिकताया-मनुपयोगात्प्रमाणाभावात् । प्रकृतभाष्यस्य बाधकत्वाच्च ।

उभयशब्दस्तु व्याख्यातः । स चावयवद्वयारब्धेऽवयविनि वर्त्तते ।

तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ।

मित्रत्वामित्रत्वरूपधर्मावच्छिन्ना इत्यर्थः । धर्मद्वयं च विशेष्यतावच्छेदकावच्छिन्नव्यक्तिभेदसामानाधिकरण्येन भास-ते, न तु परस्परसामानाधिकरण्येनेति विशेषः । "उभ-यमेव वदन्ति मनीषिणः" इत्यादौ तु इन्द्रदशरथरूपमवय-वद्वयमादाय तदुभयसमुदाय उभयशब्देन विवक्षितः । यदा तु उभयो मणिरिति व्युत्पाद्य तादृशं मणिद्वयं सह विवक्ष्यते, तदा एकशेषेण द्विवचनं प्राप्तमनभिधानान्निवारणीयम् । "तद्धि-तश्चासर्वविभक्तिः" इति सूत्रे उभयशब्दस्य द्विवचनानुत्पा-दादसर्वविभक्तित्वमिति कैयटोक्तेः । तथा च तस्याव्ययत्ववार-

णाय परिगणनं कर्त्तव्यमिति तदर्थः ।

हरदत्तस्तु पचतिकल्पमित्यादिवारकत्वेन परिगणनसामर्थ्यस्योपक्षीणत्वात् उभयशब्दाद्द्विवचनं भवत्येवेत्यूचे । ननु अयचस्तयप्प्रत्ययादेशत्वेन प्रथमचरमेत्यादिसूत्रेण जसि सर्वनामसंज्ञापत्तिरिति चेत्, मैवम् । व्यवस्थितविकल्पात् पूर्वविप्रतिषेधाद्वा तत्र नित्यैव संज्ञेति केचित् । विभक्तिनिरपेक्षत्वादन्तरङ्गया नित्यसंज्ञया विभक्तिसापेक्षत्वाद्बहिरङ्गा विभाषा बाध्यतइत्यन्ये ।

भाष्यकृतस्त्वाहुः—अयच् स्वतन्त्र एव प्रत्ययः । तद्विधौ तयपो ऽनुवृत्तौ मानाभावात् । न चैवमुभयीत्यत्र "टिड्ढाणञ्" इति सूत्रेण तयबन्तत्वप्रयुक्तो ङीब् न स्यादिति वाच्यम् । तत्रत्ये मात्रच्पदे मात्रशब्दमारभ्य अयचश्चकारपर्य्यन्तं प्रत्याहारग्रहणे तदन्तर्भावादयचोऽपि स्वातन्त्र्येण ङीप्सिद्धेः । एवं च तयग्रहणमपि तत्र न कर्त्तव्यम् । उक्तप्रत्याहारान्तर्भावादेव सिद्धेः।

यद्वा—द्वयसजिति प्रत्याहारस्तेन दघ्नञ्मात्रचोर्ग्रहणमपि न कार्यम् । " प्रमाणे मात्रज्द्वयसज्दघ्नचः" इति सूत्रपाठे तु मात्रजित्येव प्रत्याहारः । न चैवं कति स्त्रिय इत्यादौ ङीबापत्तिः, डतेरपि तदन्तःपातादिति वाच्यम् । "न षट्स्वस्रादिभ्यः" इति निषेधात् । "टिड्ढाणञ्" इत्यत्र अत इत्यनुवृत्तेश्च । न चैवमपि तैलमात्रेत्यादौ अतिप्रसङ्गः, प्रत्याहारपक्षे चकारस्य मात्रशब्दं प्रत्यविशेषणत्वात् चकारान्तमात्रपदग्रहणे प्रमाणाभावेन "हुयामाश्रुवसिभसिभ्यस्त्रन्" इत्यस्य त्रन्प्रत्ययान्तमात्रपदस्यापि ग्रहापत्तेरिति वाच्यम् । सदृशस्यापि प्रत्याहारेऽनन्तर्भावात् । प्रमाणे वर्त्तमानाद्विहितस्य प्रमेयवृत्तेरेव मात्रशब्दस्य ग्रहणात् । प्रत्ययानुकरणतया मात्रशब्दस्य यथोक्तप्रातिपदिकपरत्वाभावात् ।

ननु "व्यर्थां द्वयेषामपि मेदिनीभृताम्" इत्यत्र कथं सर्वनामसंज्ञेति चेत्, सत्यम् । उभयेत्यर्थपरो निर्देश इति केचित् ।

गुरुद्वयाय गुरुणोः इत्यादिविरोधान्नेदं युक्तम्, किन्तु द्वयं द्वैधमिष्णन्ति गच्छन्तीति द्वयेषस्तेषां द्वयेषामिति कथंचित्समाधेयमित्यपरे । चाक्रवर्मणव्याकरणे द्वयशब्दस्यापि सर्वनामताऽभ्युपगमात्तदिति त्वन्ये । युक्तं चैतदेव । "कर्तृकर्मणोः कृति" "गतिकारकोपपदात्" इति च सूत्रे धातोर्हि द्वये प्रत्यया विधीयन्ते इति महाभाष्यस्वारस्यात् । अत एव—

यवादिशब्दाः किं द्व्यर्था नो वाऽऽर्यम्लेच्छसाम्यतः ।
दीर्घशूकप्रियङ्ग्वाद्या द्वयेऽप्यर्था विकल्पिताः ॥

इति यववराहाधिकरणे माधवाचार्यप्रयोगः । न च तदेकदेशत्वात् "प्रथमचरम" इति तत्सिद्धिः । अयच्च प्रत्ययान्तरमेवेति भाष्यसिद्धान्तात् ।

डतरडतमौ प्रत्ययौ । ततश्च तदन्ताः शब्दाः ग्राह्याः । संज्ञाविधौ प्रत्ययग्रहणे तदन्तविध्यभावेऽपि केवलयोः संज्ञाविधानवैयर्थ्यात् ।

अन्यपदमन्योऽन्याभाववदर्थकम् । तदेकदेशे समभिव्याहृतपदार्थस्य घटादेरन्वयाद् घटादन्य इत्यादौ बोधः ।

अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् द्विबहुविषये निर्धारणे वर्त्तेते इति पस्पशायां कैयटः । तत्र द्वितीयस्य सर्वनामसंज्ञाविरहान्न तत्कार्यम् । अत एव "न तावत्सामान्यादिष्वन्यतमं तमः" इत्यादिप्रयोगः । शाकटायनेन "डतरडतमान्तत्वेन तयोर्व्युत्पादनेऽपि अन्यतरशब्दपाठस्य नियामकत्वादन्यतमशब्दस्य गणकार्याद्यभावः" इति व्याख्यानात् ।

इतरस्त्वन्यनीचयोः इत्यमरः । अथ कथं "पक्षेतरेऽतिव्याप्तेश्च"

इति उपाधिवादे नैयायिका इति चेत् ,सत्यम् । पक्षमितरयतीति कृदन्तमितरपदमिति तत्र प्राञ्चः ।

पक्ष इतरो यस्मादिति बहुव्रीहौ न सर्वनामत्वमित्यन्ये । पक्षेतरपदं पक्षेतरत्वे पारिभाषिकम् । ततश्च आधुनिक्या इतर-संज्ञाया इवास्यापि न सर्वनामत्वमिति मिश्राः ।

एतेन "वन्येतरा जानपदोपदाभिः" इत्यादि व्याख्यातम् ।

त्व त्व इति द्वावप्यकारान्तौ अन्यपर्यायौ । " एतं त्वमन्ये ददृशयन्नमुत्सम् " इत्युदात्तस्य "उत त्वः पश्यन्" इत्यादिरनु-दात्तस्येति केचित् ।

प्रथमस्तकारान्तः। "तरीरुत त्वद्भवति सूत उत त्वद्" इति मन्त्रे त्वादिति सर्वनामसु पठितोऽनुदात्तोऽन्यपर्यायः" इति वेदभा-ष्योक्तेः। "त्वदधरमधुरमधूनि पिबन्तम्"इति जयदेवप्रयोगाच्च। त्वत्तोऽन्यस्या अधर इत्येत्र तदर्थात् । " पश्यति दिशि दिशि रहसि भवन्तम् " इति पूर्ववाक्यालोचनया तवाधरस्त्वदधर इतिविग्रहायोगादित्यन्ये ।

एवमेषां प्रामाण्येऽपि " उतो त्वस्मै तन्वं विसस्रे " इत्य-नुदात्तस्य स्मायादिदर्शनात्तस्य सर्वादित्वनिर्णयः ।

उदात्ताकारान्तस्य तकारान्तस्य वाऽत्र पाठे तु सन्देहः। आद्यस्य स्मायादिकं उत्तरस्य त्वकजादिकं क्वचिच्छाखायां दृष्ट्वा तु निर्णयम् ।

वस्तुतो भिन्नस्वरयोरप्यकारान्तयोरेकश्रुत्या तन्त्रेणैव पाठ-सम्भवादुभयपाठसामर्थ्येन प्रथमस्य तकारान्तत्वमेव युक्त-मिति केचित् ।

नेम इत्यर्द्धार्थः। "प्रनेमस्मिन् ददृशे सोम" इति दर्शनात् । समसिमशब्दौ सर्वपर्यायौ। "मा नः समस्य दूढ्यः" "उरु-

ष्याणो अघायतः समस्माद्" इत्यादिदर्शनात् । "आद्रात्रीवासस्तनुते सिमस्मै" इति दर्शनाच्च । "त्वत्त्वसमसिमेत्यनुच्चानि" इति फिट्सूत्रादनुदात्तत्वे प्राप्ते "सिमस्याथर्वण उदात्तः" इति वचनादुदात्तत्वम् । आथर्वणपदस्योपलक्षणार्थतया व्याख्यातत्वात् । तुल्यपर्यायसमशब्दस्य तु नेयं संज्ञा । "यथासंख्यमनुदेशः समानाम्" इति ज्ञापकात् ।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः ।

पूर्वादयः पञ्च दिक्कालयोः तदवच्छिन्ने च । पूर्वस्यां दिशि पूर्वस्यां वाप्यां पूर्वस्मिन्काले पूर्वस्मिन्गुरावित्यादि । दक्षिणाधरशब्दौ दिशि तदवच्छिन्ने च । "दिशः सपत्नी भव दक्षिणस्याः" । न चार्थनियमे मानाभावः । व्यवस्थायामित्यस्यैव मानत्वात् । स्वाभिधेयापेक्षोऽवधिनियमो हि व्यवस्था । पूर्वादीनां चोक्तार्थस्य नियमेनावधिसाकाङ्क्षत्वात् । पूर्व इत्यादावुक्ते कस्मादित्याकाङ्क्षाया उत्पत्तेः । दक्षिणस्या इत्यत्रापि वस्तुतोऽवधिरस्त्येव, प्रसिद्धेस्तु तदप्रयोगः । न च संज्ञायामिति निषेधः । आधुनिकसङ्केत एव हि संज्ञा, न च दिक्षु साऽस्तीति पञ्चमे व्याख्यातारः । व्यवस्थायां किम् । दक्षिणाः गाथकाः । प्रवीणाः । अधरे ताम्बूलरागः । ओष्ठे । उत्तरे शक्तः । प्रतिवाक्ये इत्यादिरर्थः ।

अथ कथम् "तथा परेषां युधि च" इति कालिदासादय इति चेत्, सत्यम् । व्यवस्थाविषयस्यैव परादिशब्दस्य लक्षणया वैर्यादौ प्रयोगः । न चैवमुपसर्जनता । स्वार्थविशिष्टार्थान्तरपरत्वस्यैवोपसर्जनत्वात् । अत्र च लक्षणया वैरित्वादिप्रकारकबोधेऽपि शक्यार्थस्य तत्रानन्वयात् । अत एव

पक्षेतरे इत्यत्रेतरपदस्य भावप्रधानत्वेऽपि सर्वनामकार्यापातात् "बहुव्रीहिं कृत्वैव भावप्राधान्यमाश्रयणीयम्" इति दीधितिव्याख्यातारः।

यत्तु तस्माद्वह्निमानित्यादौ ज्ञानलक्षणापक्षेऽपि सर्वनामकार्यमिति, तच्चिन्त्यम्। धूमादितिहेतुघटकधूमपदेषु लक्षणास्वीकारेऽपि तस्मादिति सर्वनाम्ना शक्त्यैव धूमज्ञानस्य बोधयितुं शक्यतया तत्र लक्षणायां मानाभावात्। "तत् त्वमसि" इत्यत्र तत्पदेन पूर्वोपक्रान्तस्यात्मन एव परामर्शात्तत्सदृशे लक्षणा नैयायिकैरुच्यत इत्यविरोधः।

यत्तु शत्रुत्वादिप्रकारकबोधो मानस एव, शाब्दस्तु देशान्तरनिष्ठत्वादिप्रकारक एवेति। तच्चिन्त्यम्। तदुत्तरं मानससामग्रीनियमाभावात्। असंज्ञायां किम्। उत्तराः कुरवः। सुमेरुमवधीकृत्योत्तरशब्दस्य कुरुषु वृत्तावपि संज्ञात्वान्न सर्वनामत्वम्। न च दिक्षु संज्ञा नास्ति कुरुष्वस्तीत्यत्र मानाभावः। अविच्छिन्नसम्प्रदायमूलकव्याख्यातृवचनस्यैव मानत्वात्।

स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने।

इत्यमरः। आत्मनीत्यस्य पुंलिङ्गशब्देनान्वयः। ज्ञातिधनयोः संज्ञानिषेधादात्मन्यात्मीये च वाच्ये सर्वनामत्वम्। आख्याग्रहणसामर्थ्यादात्मीयत्वेन ज्ञातिधनयोर्बोधतात्पर्ये सर्वनामत्वमेव। यथा स्वे पुत्राः। स्वे गावः। विशेष्यतासम्बन्धेन ज्ञातिधनयोः स्वपदजन्यबोधवत्त्वं यत्र तत्रैव तन्निषेधात्।

यत्तु "निराकृतः स्वस्यां सततमितरस्यां प्रणयवान्" इति कैश्चित्प्रयुक्तम्, तदपि तनावित्यादिस्त्रीलिङ्गविशेष्यपदाध्याहारेण आत्मीयार्थकतयैव कथञ्चिद्व्याख्येयम्।

केचित्तु "स्वमात्मात्मीययोः" इत्येव पठनीयम्। न च "स्वा-

मिन्नैश्वर्ये" इति सूत्रे ऐश्वर्य्यस्यापि तदर्थत्वात्तदसंग्रहापत्तिः । तस्य तन्मात्रविषयकत्वात्तदर्थे मत्वर्थीयमामिन्प्रत्ययं विना प्रयोगानर्हत्वादित्याहुः ।

अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये ।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ॥

तस्यार्थद्वये संज्ञा । तत्र बहिरित्यनावृतो देश उच्यते । तेन सह योगो बाह्यस्य भवति । अन्तरे अन्तरा वा गृहाः । नगरबाह्याश्चण्डालादिगृहा इत्यर्थः । बहिःशब्दस्य तद्देशवृत्तिपरत्वे तु बहिर्वर्त्तिना सहाभ्यन्तरस्य योगात् नगराभ्यन्तरा गृहा इत्यर्थः । उभयस्याप्यत्र ग्रहणम् । उपसंव्यानशब्दोऽपि करणव्युत्पत्त्या उत्तरीयं कर्मव्युत्पत्त्या त्वन्तरीयमभिधत्ते ।

अपुरीति वक्तव्यम् । अन्तरायां पुरि । अत्र सर्वनामत्वाभावान्न तत्कार्यम् । लिङ्गविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वाऽत्र प्रसक्तिः । न चैतद्वार्त्तिकं जसि विभाषाविधेरेव शेषः, तत्रैव पठितत्वादिति वाच्यम् । अदन्तत्वाभावादेव टाबन्ताज्जसः शीभावाप्रसङ्गात् । प्राकाराद्भ्यन्तरे बहिश्च देशभेदात् पुनः क्रियमाणत्वादुभयोपपत्तिः । उपसंव्यानग्रहणमनर्थकं बहिर्योगेण कृतत्वात् । उत्तरीयपरत्वे बहिर्योगशब्दस्याद्यमर्थम् । अन्तरीयपरत्वे तु द्वितीयमर्थमादाय सिद्धमित्यर्थः ।

न वा शाटकयुगाद्यर्थम् ।

समानप्रमाणे शाटकयुगे अपरिहिते किमुत्तरीयं किमन्तरीयमित्यनवबोधादपरिधानदशायां बहिर्योगेण अनिर्वाहादुपसंव्यानग्रहणमिति वार्तिकाभिप्रायः ।

भाष्यकारास्तु उपसंव्यानत्वमप्यपरिधानदशायां नास्ति,

बुद्ध्या व्यवस्थापनं तु बहिर्योगस्यापि तुल्यमित्युपसंख्यानग्रहणं व्यर्थमित्याहुः ।

केचित्तु शाटकानां त्रये शरीरे साक्षात्संयुक्तस्य स्वसंयुक्तसंयुक्तेन बाह्येन तृतीयेन सह योगो नास्ति । न च मध्यवर्त्तिनोऽपि तदपेक्षया बाह्यत्वात् तद्योगेनोपपत्तिः । यावान्समुदायो यत्र बुद्धिस्थः तदपेक्षया बाह्यत्वस्य ग्राह्यत्वात् । एवं बाह्यस्य शरीरसंयुक्तेनाभ्यन्तरेणापि योगो नास्ति । मध्यवर्त्तिन उक्तन्यायेनाभ्यन्तरत्वाभावात् । एवं चतुष्टयेऽपि योज्यम् । शाटकयुगाद्यर्थमिति आदिशब्दोपादानेन वार्त्तिकस्यैतादृशाभिप्रायलाभादित्याहुः ।

भाष्यस्य त्वयमाशयः—बहिर्योगेत्यस्य स्वरितत्वात् तेन च गौणार्थस्यापि ग्रहणात्परम्परासम्बन्धमादाय तत्रापि बाह्याभ्यन्तरयोगोपपत्तिरिति अन्तरशब्दस्यार्थद्वये सर्वनामत्वम् ।

त्यद् तद् एतौ पूर्वोक्तपरामर्शकौ । आद्यश्छान्दसः "एषस्य वाजि" इत्यादिप्रयोगाल्लोके चादर्शनादिति केचित् । "स्यश्छन्दसि" इति सूत्रे छन्दोग्रहणसामर्थ्याल्लोकेऽपीत्यन्ये ।

यत्पदम् उद्देश्यार्थकम् । एतादिदमौ प्रत्यक्षोपस्थिते । अदस् व्यवहिते ।

एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा ।
साधारणे समाने च संख्यायां च प्रयुज्यते ॥

"प्रजामेका रक्षत्यूर्जमेका" इत्यत्रान्यार्थः । "एकवीरः" इत्यादौ प्रधानार्थः। "एकेऽल्पप्राणाः" इत्यादौ प्रथमार्थः । "अत एकहल्मध्ये" इत्यादौ असहायरूपकेवलार्थः । "एतावेकधनौ द्वौ" इत्यादौ साधारणार्थः । "तेनैकदिक्" इत्यादौ समानार्थः । "एको द्वौ" इत्यादौ संख्यार्थ इति । "ष्णान्ता

षट्" इति सूत्रे संख्यायामसहायत्वे अन्यत्वे चेत्यर्थत्रयमस्य भाष्ये उक्तम् । "एके मुख्यान्यकेवलाः" इत्यमरे मुख्यत्वमप्युक्तम् । तदन्यत्र लक्षणया प्रयोगः । शक्तौ मानाभावात् । अत एवाद्वैतचन्द्रिकायाम् "एकमेवाद्वितीयं ब्रह्म" इत्यस्य व्याख्यायां समानाद्यर्थवाचकत्वं निरस्तम् । "तेनैकदिक्" इति सूत्रे एकजातीयत्वेन समाने गौणपदप्रयोगः । सुदाम्ना एकदिक् सौदामनी, सुदामाख्यपर्वतयुक्तादिक् । सदृशदिग्युक्तेति यावत् । चैत्रमैत्रावेकधनौ इत्यत्रापि यथेष्टविनियोगार्हत्वरूपसादृश्येन चैत्रो मैत्रीययथेष्टविनियोगार्हधने यथेष्टं विनियोक्तेति यावत् । इत्युक्तत्वात् ।

सम्बोधनविषयो युष्मदर्थः । उच्चारयितृर्थस्तु अस्मच्छब्दः । अलिङ्गत्वन्तूभयत्र समानम् । उच्चारकत्वं च यत्र वाक्यमनन्यवक्तृतात्पर्यकम् तत्रैव । तेन "वाच्यस्त्वया मद्वचनात्स राजा" इत्यादौ मच्छब्देन कालिदासपरामर्शाभावेऽपि न क्षतिः । सीताभिप्रायेण तद्वाक्यसमुल्लेखात् । अत एव कुसुमाञ्जलौ—

स्यामभूवं भविष्यामीत्यादिसंख्या च वक्तृगा इत्याचार्यैः—

तदैक्षत बहु स्याम् इत्यादौ उत्तमपुरुषस्यास्मदर्थसामानाधिकरण्यनियमात्तदाक्षेपेऽहं बहु स्यामित्यनन्यतात्पर्यकास्मच्छब्दत्वेन हेतुना तस्य वक्तृपरत्वं साधयित्वा ईश्वरः साधितः । "गृभ्णामि ते सौभगत्वाय हस्तम्" इत्यादौ व्यभिचारवारणायानन्यतात्पर्यकत्वप्रवेश इति वर्द्धमानादौ स्पष्टम् ।

भवच्छब्दस्तु युष्मच्छब्दसमानार्थः । परन्तु लिङ्गयोगी । अत्र भवच्छब्दादौ सम्बोधनव्यभिचारी चेति विशेषः । "भातेर्डवतुः" इति व्युत्पादितः । नन्वस्य हलन्तत्वेन स्मायादीनामभावः, तृतीया तु "निमित्तकारण" इत्यादिनैव गतार्थेति चेत् । अत्राहुः—

फिञ्द्रिमयटः पूर्वनिपातः ठक्छसौ तथा आत्वशेषष्यञ्विरहाः अकच्च भवतः फलम् ।

अत्राकजात्वैकशेषा भाष्ये कण्ठोक्ताः । अन्ये उपलक्षणतया संगृहीता इति । भवतोऽपत्यं भावतायनिः । त्यदादित्वेन वृद्धसंज्ञायाम् " उदीचां वृद्धाद् " इति फिञ् । भवन्तमञ्चतीति भवद्र्यङ् । " विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये " इति चकारेण सर्वनामग्रहणाट्टेरद्र्यादेशः । भवन्मय इत्यत्र " नित्यं वृद्धशरादिभ्यः " इति मयट् । भवन्मित्रः । " सर्वनामसंख्ययोः " इति पूर्वनिपातः । " भवतष्ठक्छसौ " इत्यत्र शतृप्रत्ययान्तभवच्छब्दनिवृत्त्यर्थं वृद्धाद् इत्यनुवर्त्तनात् । भवतोरिति पाठेनापि निर्वाहान्नेदं नियतमिति तु बोध्यम् । भवानिव दृश्यते भवादृक् । "आ सर्वनाम्नः" इत्यात्वम् । देवदत्तश्च भवाँश्च भवन्तौ । " त्यदादीनि सर्वैः " इत्येकशेषः । भवतो भावो भवत्तेत्यत्र सर्वनामसंज्ञया गुणवचनसंज्ञाबाधात् "गुणवचनब्राह्मणादिभ्यः" इति ष्यञभावः । "गुणवचनसंज्ञा ऽसर्वनामसंज्ञा" इत्येकसंज्ञाधिकारे वार्त्तिककृता पठितत्वात् । भवकानित्यत्र " अव्ययसर्वनाम्नाम् " इत्यकच् । कप्रत्यये भवत्क इत्येव स्यात् । "सर्वनाम्नो वृत्तिमात्रे " इति भाष्यवचनात्पुंवद्भावोऽपि फलम् । "भवन्मयो ध्यायति नावनीपतिः " इति श्रीहर्षः ।

किंशब्दः प्रश्नाक्षेपयोः । प्रश्नो द्विविधः, जिज्ञासामूलको विप्रतिपत्तिमूलकश्च । आद्यो यथा—

किमेकं दैवतं लोके किं वाऽप्येकं परायणम् ।

इति । द्वितीयो यथा—ईश्वरसद्भावे किं प्रमाणमिति । अयमेव कथाप्रवृत्तिहेतुः । आद्यस्योपदेशमात्रेण जिज्ञासानिवृत्तौ

विश्रामात् । आक्षेपो यथा—"को नामायं सवितुरुदयः" इति । द्विदैवाक्षेपः । "खट्वा ऽऽक्षेपे" इत्यादौ दर्शनात् । खण्डने तु किं प्रमाणमित्युपन्यस्य किंशब्दोऽयमाक्षेपार्थो वा कुत्सितार्थो वा वितर्कार्थो वा प्रश्नार्थो वा स्यादिति विकल्पचतुष्टयमुक्तम् । अभावप्रतिपादनार्थत्वं दुष्टत्वप्रतिपादनार्थत्वं सन्देहार्थत्वं जिज्ञासाविषयत्वप्रतिपादनार्थत्वमिति च क्रमेण तद्व्याख्यातम् । ईश्वरसद्भावे प्रमाणं नास्तीत्याद्ये, कुत्सितं प्रमाणमिति द्वितीये, प्रमाणमन्यद्वेति तृतीये, प्रमाणं जिज्ञासाविषय इति चतुर्थे अर्थपर्यवसानं तत्फलितार्थमादायेति बोध्यम् । वृत् सर्वादिगणो वृत्तः, समाप्त इत्यर्थः । गणपाठे वृच्छब्दस्य समाप्तौ परिभाषितत्वात् ।

यत्तु "यदिन्द्राग्नी अवमस्यां पृथिव्यां, मध्यमस्यां, परमस्यामुतस्थ" इत्यादाववमादिपदानामपि सर्वनामकार्यं दृश्यते तच्छान्दसत्वादेवेति कैयटादयः । इतरेतरस्मात् अन्योऽन्येषामित्यादौ तु द्विःप्रयोगो द्विर्वचनमिति पक्षे तदन्तविधिना सिद्धम् । "द्वन्द्वे च" इति ज्ञापकेन सर्वनामसंज्ञायां तदन्तविधेरङ्गीकारात् । स्थानेद्विर्वचनपक्षे तु स्थानिवद्भावेन सर्वनामत्वम् । सन्नियोगशिष्टत्वेनान्तरङ्गमपि द्वित्वं बाधित्वा "अन्तरङ्गानपि" इति न्यायेन "समासवच्च बहुलम्" इति समासवत्त्वप्रयुक्तस्य लुकः पूर्वं प्रवृत्तेः । अन्यथा सुबन्तस्य द्वित्वे स्थानिनः सर्वनामत्वाभावेन तदादेशेऽपि तदनुपपत्तेः । न चैवं पदत्वाभावात्तदधिकारीयद्वित्वानुपपत्तिः । प्रत्ययलक्षणेन तथात्वात् । अङ्गाधिकारीयत्वाभावाद् "न लुमता" इति निषेधाप्रवृत्तेः । अन्योऽन्येषामित्यत्र तु समासवत्त्वाभावेऽपि पूर्वपदस्य "प्रथमैकवचनान्तत्वम् द्वितीयादयस्तु परपदस्य" इति वचनबलात्प्रकृति

प्रत्ययविभागसिद्धेः ।

अत्रेदमधिकमनुसंधेयम् । तदादिसर्वनाम्नां बुद्धिस्थत्वरूपेण शक्तिः । न चैवं बुद्धिस्थत्वप्रकारक एव बोधः स्यात्, न तु घटत्वप्रकारकः, शाब्दबोधस्य शक्यतावच्छेदकप्रकारकत्वनियमादिति वाच्यम् । अत्र तत्परित्यागात् । कल्पनायाः फलानुरोधित्वात् । अत एव सर्वनाम्नि न लक्षणेति प्रवादः । शक्त्यैव तत्प्रकारकबोधादिति प्राञ्चः ।

अन्ये तु घटत्वादयो धर्मा एव शक्यतावच्छेदकाः, नानार्थत्वस्येष्टत्वात् । न च लघुसमनियतगुरुधर्मप्रकारकशाब्दस्थले लक्षणापत्तावुक्तप्रवादविरोधः, कम्बुग्रीवादिमत्त्वस्य घटत्वाद्यपेक्षया गुरुत्वेन स्वशक्यतानवच्छेदकत्वात्, तत्र निष्प्रकारकव्यक्तिबोधोपगमे च पदान्निर्विकल्पकानङ्गीकारनियमविरोधादिति वाच्यम् । पदान्निर्विकल्पकस्वीकारपक्षएव तदवतारात् । तद्भङ्गेऽपि क्षतिविरहाच्चेत्याहुः ।

मिश्रास्तु हरिपदवन्नानार्थत्वे प्रमाणाभावाद् बुद्धिस्थत्वमुपलक्षणीभूय शक्यतावच्छेदकानामनुगमकम् । बुद्धिविषयतावच्छेदकावच्छिन्नमेषां शक्यमित्येव शक्तिग्रहात् । एवं च यद्धर्मे यदा यत्पुरुषीयबुद्धिविषयतावच्छेदकत्वं गृह्यते, तदा यथोक्तशक्तिग्रहजन्यसंस्कारस्य तद्धर्मांशउद्बोधात्तद्धर्मप्रकारकावेव पदार्थस्मृतिशाब्दबोधौ । एवं च घटत्वादिनिष्ठप्रकारतानां बुद्धिविषयत्वरूपप्रकारतावच्छेदकैक्यादनुगमः । विशिष्य घटत्वादीनां शक्यतावच्छेदकत्वे तु तन्निष्ठप्रकारतानामानन्त्येन गौरवं स्यात् । शक्यतावच्छेदकैक्यवत् शक्यतावच्छेदकतावच्छेदकस्यापि शक्त्यैक्यसम्पादकत्वादित्याहुः ।

अन्ये तु एवमपि कदाचिद् घटत्वप्रकारको बोधः कदाचित्तु

पटत्वप्रकारक इत्येतदुपपत्त्यर्थं घटत्वप्रकारकबोधं प्रति बुद्धिस्थत्वावच्छिन्नघटत्वप्रकारकशक्तिज्ञानस्य हेतुता वाच्या । एवमन्यत्रापीत्युक्तहेतुताकोटौ बुद्धिस्थत्वावच्छिन्नत्वनिवेशे गौरवम् । तदपेक्षया नानार्थत्वमेव स्वीकृत्य बुद्धिस्थत्वस्य प्रयोगोपाधित्वकल्पनमेव युक्तमित्याहुः ।

नन्वेवमपि सर्वेषां सर्वनाम्नां पर्यायत्वं स्यादिति चेन्न । बुद्धिविशेषेण तदभावात् । सर्वपदस्य उद्देश्यतावच्छेदकत्वे सति यावतां प्रकाराणां बुद्धिविषयत्वम् तेषु शक्तिः । न चोद्देश्येत्यस्य वैयर्थ्यम् । विधेयानां तदर्थत्वाभावात् । न चैवमपि यत्पदपर्यायत्वापत्तिः । तत्र तत्पदघटितवाक्यसाकाङ्क्षाया अवान्तरवाक्योद्देश्यबुद्धेर्विवक्षितत्वात् । अत्र प्रकारस्यानेकत्वेन विशेषणाद्वा । य आकाशः स शब्दाश्रय इत्यादौ यत्पदजन्यबुद्धिप्रकारस्यानेकत्वव्यभिचारात् । एतेन तत्पदसाधारण्यमपि निरस्तम् । अत्र पदान्तरसमभिव्याहारस्यापि नापेक्षा । सर्वे ब्राह्मणा इत्यत्र ब्राह्मणत्वावच्छिन्नपरत्वस्य सर्वे इत्यादौ प्रमेयत्वावच्छिन्नपरत्वस्य च दर्शनात् ।

प्रश्नप्रत्येकबुद्धिविषयावच्छिन्ने किंपदस्य शक्तिः । न न्वज्ञाते इच्छानुदयात् ज्ञाते च जिज्ञासानुत्पत्तेः कथं प्रश्न इति चेन्न । "किमेकं दैवतं लोके" इत्यादौ प्रश्नजनकज्ञाने उत्तरवाक्यजन्यज्ञाने च विषयतावच्छेदकधर्म एक एव तथाऽप्येकदैवतत्वव्याप्यधर्मप्रकारकं ज्ञानं ममेच्छाविषय इति प्रश्नवाक्यार्थः । अत्र विष्णुत्वनिष्ठा प्रकारता एकदैवतत्वावच्छिन्ना, विष्णुर्दैवतमित्यत्र त्वनवच्छिन्ना । तथा च तद्धर्मांशे निरवच्छिन्नप्रकारताकज्ञानेच्छया प्रश्नवाक्यं तदंशे किञ्चिदवच्छिन्नप्रकारताकज्ञानजन्यमिति न दोषः । किमयं

स्थाणुः पुरुषो वेति संशयाभिलापे कोऽयमित्याक्षेपे च यद्यपि यथोक्तमव्याप्तम्, तथाऽपि तत्र शक्त्यन्तरं कल्प्यम्।

तत्पदघटितवाक्यसाकाङ्क्षावान्तरवाक्योद्देश्यबुद्धिविषयप्रकारावच्छिन्ने यत्पदस्य, यत्पदघटितवाक्यसाकाङ्क्षावान्तरवाक्योद्देश्यबुद्धिविषये तत्पदस्य शक्तिः। न च यो गतः स आगत इत्यादावव्याप्तिः। तच्छब्दसमानार्थकपदस्य विवक्षितत्वात्।

अयं तु विशेषः। प्रक्रान्तप्रसिद्धानुभूतार्थकस्तच्छब्दो न यच्छब्दसाकाङ्क्षः। क्रमेण यथा—

कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम्।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः॥

अत्रातिथिसंज्ञो राजा प्रक्रान्तः।

द्वयं गतं संप्रति शोचनीयतां
समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतः
त्वमस्य लोकस्य च नेत्रकौमुदी॥

अत्र चन्द्रकला प्रसिद्धा।

उत्कम्पिनी भयपरिस्खलितांशुकान्ता
ते लोचने प्रतिदिशं तरले क्षिपन्ती।
क्रूरेण दारुणतया सहसैव दग्धा
धूमाकुलेन दहनेन न वीक्षिताऽसि॥

सागरिकानेत्रे वत्सराजेन पूर्वमनुभूते।

इति काव्यप्रकाशे। किं च उत्तरवाक्यान्तर्गतो यच्छब्दो नियमेन पूर्ववाक्ये तच्छब्दोपादानं नापेक्षते।

उदयति स्म तदद्भुतमालिभिर्धरणिभृद्भुवि तत्र विमृश्य यद्।

इत्यादौ तत्सत्त्वेऽपि—

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिके ।

इत्यादौ तदभावात् । अत्र केचिदुक्तस्थलेऽपि तच्छब्दाक्षेप इत्याहुः ।

अन्ये तु अत्र पृथगेव शक्तिः । अवान्तरवाक्योद्देश्यविषये तत्पदमित्येव मिश्रैरुक्तम् । "साधु चन्द्रमसि" इत्यादौ यत्पदेनोद्देश्यबोधे तदुत्तरमेव प्रथमपादजन्यबोधान्महावाक्यार्थबोधः। तत्पदाक्षेपेण पुनः प्रथमपादजन्यबोधकल्पने गौरवात् । एवम्—

उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन ।

इत्यादावपि तत्पदाध्याहारे इन्दुत्वविशिष्टोपस्थितौ पौनरुक्त्यापत्तेः । न च विनिद्रनलिनीदर्शनाभावविशिष्टत्वेन तत्पदाद् बोधः । यत्पदार्थस्यैव दर्शनविशेषणत्वात् । यन्मीलितमित्यत्र यत्पदेनापि मीलितस्यैवोक्तेः । सम्भेदे चान्यतरवैयर्थ्याभावात् । न च यत्पदवैयर्थ्यम् । "यच्छब्दयोगः प्राथम्यम्" इति रीत्योद्देश्यत्वलाभार्थत्वादित्याहुः ।

समीपवर्त्तिनि प्रत्यक्षविषयतावच्छेदकावच्छिन्ने इदमेतत्पदयोः शक्तिः। अत एव "प्रत्यञ्जलि वाक्यावृत्तिः। उपादास्यमानपयस इदमा निर्देशानुपपत्तेः" इति वर्द्धमानोपाध्यायः ।

तादृशप्रत्यक्षयोग्यधर्मावच्छिन्ने शक्तिः । उपादास्यमानाञ्जलीनामप्येतदिति निर्देश इति निबन्धकारोक्तेरेकमेव वाक्यमित्यन्ये ।

मानसप्रत्यक्षविषयेऽपीदानीं घट इत्यादौ काले इदम्पदप्रयोगादुपादास्यमानपयस इदमा निर्देशः सम्भवत्येव । परं तु तदातनत्यागेन तत्र स्वत्वध्वंसो न भवति । उपादानपूर्वकाले तत्र स्वत्वानुत्पत्त्याऽनुत्पन्नस्य ध्वंसायोगात् इत्यपरे ।

व्यवहितवर्त्तिनि प्रत्यक्षविषयतावच्छेदकावच्छिन्ने अदस्-

पदस्य शक्तिः। व्यवधानं तु देशकालाभ्याम्। इदमादिना यो बोध्यते ततो विप्रकृष्टे तत्प्रयोगात्। प्राथमिकप्रत्यक्षविषये अयमिति प्रयोगात्। द्वितीयप्रत्यक्षविषयेऽसाविति प्रयोगाच्च। उभयत्र यथायोगं प्राथमिकत्वं द्वितीयत्वं च प्रत्यक्षे विशेषणमिति केचित्।

यद्धर्मावच्छिन्ने सम्बोध्यत्वबुद्धिः तद्धर्मावच्छिन्ने युष्मत्पदस्य यद्धर्मावच्छिन्ने यद्वाक्योच्चारयितृत्वबुद्धिः तद्धर्मावच्छिन्ने अस्मत्पदस्य शक्तिः। अभिमुखीकरणानुकूलज्ञानविशेषविषयत्वं सम्बोध्यत्वम्। तत्तत्पदोत्तरत्वेन तत्तत्पदानुसन्धानमुच्चारणम्। तदनुकूलव्यापारवत्त्वमुच्चारयितृत्वम्। मौनिसाधारण्यात्। उच्चारणं च अनन्यतात्पर्यकत्वगर्भमिति प्रागेवोक्तम्।

अथैवं काव्यादावचेतने त्वत्पदप्रयोगो न स्यात्। एवं वयं गच्छाम इत्यादावपीति चेत्, सत्यम्। उच्चारयितृत्वविषयकं यदुच्चारयितृतात्पर्यं तद्विषयतावच्छेदकधर्मवत्त्वस्य विवक्षितत्वात्। उच्चारयितृत्वारोपस्य तत्रापि सम्भवात्।

अन्ये तु सम्बोध्यतावच्छेदकावच्छिन्ने उच्चारयितृतावच्छेदकावच्छिन्ने च युष्मदस्मदोः शक्तिः। तदवच्छेदकत्वं च चैत्रादिशरीरावच्छिन्नात्मत्वम्। असम्बोध्यादेस्तद्भ्रमाच्छाब्दबाधस्तु शक्तिभ्रमेण समर्थनीयः। अत एव तस्याप्रामाण्यम्।

कस्त्वम्भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्।

इत्यादौ भ्रमासम्भवे लक्षणा, मुख्यार्थान्वयानुपपत्तेः। "सर्वोऽप्यहं गुणीति वेत्ति" इत्यादावपि तथा। सम्बोध्यत्वोच्चारयितृत्वप्रतिपत्तेर्यथायोगं प्रयोजनत्वात्। वयं गच्छाम इत्यादौ महार्णवोक्तो विरूपैकशेष इत्याहुः।

ननु चैत्रत्वादिना बोधे "अनयोरात्ममात्रशक्तत्वम्"

इतिग्रन्थविरोधः । "तत् त्वमसि" "अहमात्मा गुडाकेश" इति श्रुतिस्मृत्योरात्मन्येव प्रयोगाच्च । चैत्रत्वादेः शरीरवृत्तिजातित्वात् । जातस्य नाम कर्म करोतीति शरीरस्यैव नामकरणविधानात् । चैत्रः पण्डित इत्यादेश्च भाक्तत्वात् । अत एव मृतस्यापि चैत्रादिपदेन निर्देशः । गोत्रान्वयार्थमुक्तप्रकारस्यावश्यकत्वात् । सत्यम् । शरीरघटितपरम्परासम्बन्धेन चैत्रत्वादेरात्मवृत्तित्वोपपत्तेरिति दिक् । सर्वादिगणव्याख्यानं सम्पूर्णम् ।

विभाषा दिक्समासे बहुव्रीहौ २७।

अत्र सर्वनामसंज्ञा वा स्यात् । उत्तरस्याः पूर्वस्याश्च दिशोऽन्तरालम् उत्तरपूर्वा । "दिङ्नामान्यन्तराले" इति बहुव्रीहिः । तस्यै उत्तरपूर्वस्यै उत्तरपूर्वायै । प्रतिपदोक्तदिक्समासग्रहणान्नेह । या पूर्वा सोत्तरा यस्योन्मुग्धस्य स उत्तरपूर्वः । तस्मै उत्तरपूर्वाय देहि ।

यत्तु योत्तरा सा पूर्वा यस्येत्येव विग्रहो युक्तोऽन्यथा पूर्वनिपातवैपरीत्यापत्तिरिति । तन्न । वस्तुतो या पूर्वा सा यस्योत्तरत्वप्रकारकज्ञानविषय इत्यत्र उत्तरेत्यस्यैव विशेषणत्वात् । उत्तरविशेष्यकपूर्वत्वप्रकारकभ्रमाविवक्षायां तु पूर्वोत्तरेत्यस्यापि इष्टत्वात् । एवं च बहुव्रीहाविति न कार्यम् । दक्षिणोत्तरपूर्वाणामिति द्वन्द्वस्य प्रतिपदोक्तपरिभाषयैव वारितत्वात् ।

ननूत्तरसूत्रे बहुव्रीहिरेव यो बहुव्रीहिस्तत्रैव निषेधो यथा स्यान्न त्वतिदिष्टबहुव्रीहावित्येतदर्थं तत् । अन्यथा एकैकस्मै देहीत्यादौ "एकं बहुव्रीहिवत्" "आबाधे च" इति द्विर्वचने-

ऽपि निषेधप्रसङ्गात् । मैवम् । समासपदानुवृत्त्यैव समास एव यो बहुव्रीहिरित्यर्थलाभात् ।

न बहुव्रीहौ २८।

बहुव्रीहिसंज्ञाप्रवृत्तिविषयीभूते पदे सर्वादेरुक्तसंज्ञा न स्यात् । न च तस्य बहुव्रीहिपदार्थत्वाभावः । तादर्थ्यात्तच्छब्दोपपत्तेः । न चैवं लौकिकविग्रहेऽपि निषेधापत्तिः । तस्य बहुव्रीह्यर्थप्रदर्शनपरत्वेऽपि तादर्थ्याभावात् । एकार्थीभावे वृत्तिरेव, व्यपेक्षायां तु वाक्यमेवेति सिद्धान्तात् । अलौकिकवाक्य एव समासप्रवृत्तिस्वीकारात् । तथा च कैयटेनोक्तम्—

अप्रयोगसमवायि यत्प्रक्रियावाक्यं तत्रायं प्रतिषेधो न लौकिकवाक्ये प्रयोगार्हे तस्य पृथगेव प्रयोगादिति ।

नन्वेवम् अलौकिकविग्रहेऽपि प्रतिषेधवैयर्थ्यम् । उपसर्जनत्वादेव प्राप्त्यभावात् । न च तस्यान्वयबोधाजनकत्वात्तदर्थकस्य कथमुपसर्जनत्वमिति वाच्यम् । समासे उपसर्जनत्वदर्शनेन तत्रापि तदनुमानात् । अन्यथा सामर्थ्यस्याभावात्तत्र समासप्रवृत्त्यनुपपत्तेरिति वक्ष्यमाणत्वात् । न च सामर्थ्यमेव तत्रानुमीयते "अनेकमन्यपदार्थे" इत्यादिशास्त्रीयानुवादसामर्थ्यात्, न तूपसर्जनत्वमपि, तस्य समासप्रवृत्त्यनुपयोगितयाऽर्थापत्त्यविषयत्वादिति वाच्यम् । एकार्थीभावातिरिक्तस्य सामर्थ्यस्य दुर्वचत्वात् । तदाक्षेपादेवोपसर्जनत्वस्याप्याक्षेपसिद्धेः । समासोत्तरं सामर्थ्यस्वीकारे प्रयोजनाभावात् । सत्यम् । समासान्यथा ऽनुपपत्त्याऽलौकिकवाक्येऽपि समुदायएव सामर्थ्यमनुमीयते न तु पदेषु प्रत्येकप्रयोज-

नकल्पकयोः । अन्यतरस्याप्यनवतारात् । तथा चावयव-मात्रस्यानुपसर्जनत्वात्संज्ञाप्रसक्तौ प्रतिषेधोपपत्तेः ।

मुख्यएव बहुव्रीहावयं निषेध इति पक्षोऽपि भाष्ये प्रथममुपन्यस्तः । त्वकं पिता यस्य त्वत्कपितृकः । अहकं पिता यस्य मत्कपितृकः । अत्र सर्वनामसंज्ञायाम् "अव्ययसर्वनाम्नामकच् प्राक् टेः" इत्यकच् स्यात् । तस्य कप्रत्ययापवादत्वात् । एवं द्वकौ पुत्रौ यस्य स द्विकपुत्र इत्यप्युदाहार्यम् । व्यञ्जनान्तेषु काकचोर्विशेष इति भाष्ये अकारान्तभिन्नत्वस्योपलक्षितत्वादिति कैयटः । तथा च त्वकत्पितृको मकत्पितृको द्वकिपुत्र इत्यादिकं प्रसज्येतेति प्रतिषेधोऽयमारभ्यते ।

नन्वेवमपि अकच्प्रसङ्गः । संज्ञानिमित्तकत्वेन तस्यान्तरङ्गत्वात् । पदान्तरसंनिधाने वर्त्तिपदार्थविशेषणान्यपदार्थविवक्षायां प्रवर्त्तमानस्य बहुव्रीहेर्बहिरङ्गत्वात् । तथा च समासात्प्रागेव प्रवृत्तस्याकचः समासानन्तरप्रवृत्तिकेनोक्तनिषेधेन बाधितुमशक्यत्वात् । न च यथा "प्रत्ययोत्तरपदयोश्च"इति लिङ्गाद् बहिरङ्गोऽपि समासाश्रयो लुक् अन्तरङ्गानामपि बाधकः, एवमुक्तनिषेधसामर्थ्यात्समासोऽप्यकचं बाधित्वा प्रवर्त्ततइति वाच्यम् । प्रियविश्वायेत्येतदर्थमप्येतदुपपत्तेः । "वा प्रियस्य" इति प्रियस्य पूर्वनिपातः । एवं द्व्यन्याय त्र्यन्याय । "सर्वनामसंख्ययोः सन्निपाते परत्वात्संख्यायाः पूर्वनिपातः" इति वक्ष्यमाणत्वात् । अत्र हि कार्यकालपक्षे सर्वनामसंज्ञायाः स्मायाद्यादेशविधिभिरेकवाक्यत्वात् विश्वशब्दस्य सर्वनामसंज्ञामुपजीव्य तदन्तविधिना प्रियविश्वशब्दस्य संज्ञा स्यात्, सा मा भूदिति विश्वशब्दस्यैव संज्ञा निषिध्यते । अत्र बहुव्रीहिसंज्ञोत्तरकालं प्रसक्तसंज्ञानिषेधेनोक्तवचनस्य चरितार्थत्वात् उक्तार्थज्ञापनानुपपत्तेः ।

मैवम् । उपसर्जनप्रतिषेधेनाप्येतावन्मात्रसिद्धेः यथोक्तज्ञापनस्य सुस्थत्वात् । इममेव पक्षमाश्रित्य प्राञ्चो व्याचख्युः—

बहुव्रीहौ सर्वादेः सर्वनामता न स्यात् । प्रियसर्वाय । सूत्रकारमते बहुव्रीहौ न सर्वनामता, भाष्यकारमते गौणत्वमात्रे । त्वत्कपितृको मत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः सर्वनामत्वादनङ्गकार्यत्वेनाकच् स्यात् स मा भूत् कप्रत्यय एव स्यादित्येतदर्थमिदं सूत्रमिति न्यासकृन्मतमिति । अवयवस्य संज्ञानिषेधोऽत्र विवक्षितः । तेन किं समुदायस्यायं निषेध इति विकल्पकोटिर्निरस्ता । सर्वादेः सर्वनामता न स्यादिति ग्रन्थं प्रकृत्य तत्तच्छङ्काऽनवतारात्।

नन्ववयवस्यापि कथं संज्ञाप्रसक्तिः, उपसर्जनानां पाठात्पर्युदासस्य वार्त्तिककृतोक्तत्वात् । सत्यम् । सूत्रकारेण तदनङ्गीकारात् । तदाह—सूत्रकारमतइति । अत्र चैतत्सूत्रारम्भस्यैव ज्ञापकत्वात् । जहत्स्वार्थवृत्तिपक्षेऽपि स्वार्थवाचकत्वस्य संज्ञोपयोगिनो वृत्तावपि सत्त्वात् । एतेन त्वत्कपितृक इत्यस्य व्याख्यायाम् " समासान्तःपातिनोर्युष्मदस्मदोः सर्वार्थवाकचकत्वेन " इति प्रसादग्रन्थः, " समुदायो हि विशेषे वर्त्तते, पूर्वपदं तु सर्वार्थताया अनपेतमेव " इति न्यासग्रन्थश्च व्याख्यातः । एतेन " अन्वर्थसंज्ञाबलादेव सूत्राक्षरैरेवोपसर्जनपर्युदासलाभ" इत्यपि निरस्तम् । "ननु चात्रान्वर्थसंज्ञाकरणादेव संज्ञानिरासे कृतेऽकच् न भविष्यति, विशेषविषयत्वाद्" इत्याशङ्क्य नैतदस्ति समुदायो हीत्यादिग्रन्थावतारात् । उक्तरीत्या तु नावयवव्यावृत्तिरिति तदभिप्रायात् । तथा हि—किमिदं विशेषविषयत्वम् । न तावच्छक्यतावच्छेदकयावद्धर्मप्रकारकबोधानुपधायकत्वम्, त्वकं पिता यस्येत्यादावपि तथात्वात् ।

युगपत्तावत्प्रकारकबोधाभावात् । बुद्धिविषयतावच्छेदकीभूतकिञ्चिद्धर्मप्रकारकबोधस्याप्युभयत्रैव जायमानत्वात् । अत एव शक्यतावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नयावद्व्यक्तिबोधाजनकत्वमप्यनाशङ्क्यम् । सर्वे घटा आनीता इत्यादावभावात् । सर्वत्वमाधिकारिकमिति न्यायात् । नापि विशेषधर्मावच्छिन्नशक्यताकत्वम् । सर्वनाम्नां सर्वेषामेव तथात्वात् । नाप्यन्यधर्मानवच्छिन्नशक्यताकत्वे सति तत् । अवयवसाधारण्यात् । नापि संज्ञोपसर्जनोभयभिन्नत्वम् । पारिभाषिकत्वापत्त्याऽन्वर्थसंज्ञालभ्यत्वानिर्वाहात् ।

नन्वेकार्थीभावरूपायां वृत्तौ अवान्तरपदविभागानभ्युपगमात्कथमेवमिति चेत्, मैवम् । प्रक्रियादशायामेव व्युत्पत्तिकार्याणां प्रवृत्तिस्वीकारात् परिनिष्ठितपदे तदप्रवृत्तेः । अन्यथा परिनिष्ठितत्वव्याघातात् । "तद्धि अप्रवृत्तानित्यविध्युद्देश्यतावच्छेदकधर्मानाक्रान्तत्वम् । निहते तिङन्तादावव्याप्तिवारणाय अप्रवृत्तेति । वैकल्पिकेडागमोद्देश्यतावच्छेदकाक्रान्ते सेद्धेत्यादावव्याप्तिवारणाय नित्येति" इति स्वयमेव निरूपितत्वात् । अत एव "द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्" इति वार्तिकं सङ्गच्छते । अन्यथा अवान्तरतत्पुरुषस्य महाविभाषया वैकल्पिकत्वापत्तेः । तदंशे वार्त्तिकं न्यायसिद्धार्थानुवादमात्रमिति तु तत्रैव निराकरिष्यामः ।

"एतेन जहत्स्वार्थायां वृत्तौ समासावयवयोरर्थ एव नास्ति । अजहत्स्वार्थायामपि स्वार्थविशिष्टार्थान्तरवृत्तित्वेनोपसर्जनत्वं स्पष्टमेव" इति निरस्तम् । प्रक्रियोपयोगिनोऽर्थस्य जहत्स्वार्थायामपि सत्त्वात् । कृत्तद्धितेत्यादौ तथैव भाष्यादिभिः सिद्धान्तितत्वात् । अन्यथा "द्वन्द्वे च" इत्यस्यानु-

पपत्तेः। वृत्त्यन्तर्गतस्यानर्थकत्वादेव सर्वनामत्वाभावे तदन्तविधिना समासे तत्प्रसङ्गस्य दुर्घटत्वात् । तस्याप्यलौकिकविग्रहपरताया दुर्वचत्वात् । समुदायस्यायं प्रतिषेध इति सिद्धान्तात् । कथं वा परमसर्वे इत्यादौ सर्वनामत्वम् । द्वन्द्वकर्मधारययोरवयवस्याप्यर्थवत्त्वम्, न तु बहुव्रीह्यादाविति वैषम्ये बीजाभावात् । वृत्तेरुभयत्र साधारण्यात् । पूर्वोत्तरपदत्वभेदस्य त्वकिञ्चित्करतायाः स्वयमेवोक्तत्वात् । एवं "त्यदादिप्रधानोऽयं समासः" इति भाष्यमप्यवधेयम् । "उपसर्जनप्रतिषेधेनाप्येतत् सिद्धम्" इति प्रतिभाष्यस्याप्ययमेवाभिप्रायः । अन्यथाऽनर्थकत्वादेव नात्र संज्ञाया अकच्प्रसक्तिरित्येव ब्रूयात् । अपिशब्दस्य त्वयमर्थः–प्रियविश्वायेत्यत्रैतत्प्रतिषेधस्य चरितार्थत्वात्त्वत्कपितृक इत्यादौ कथमकचो निवृत्तिः । समासात्प्रागेवान्तरङ्गत्वात्तदापत्तेः उक्तत्वात् ।

यदि तु प्रतिषेधसामर्थ्यात्पूर्वमप्यकचो न प्रवृत्तिरित्यस्य रक्षार्थं प्रियविश्वायेत्यत्र उपसर्जनप्रतिषेध आश्रीयते, तदा त्वत्कपितृक इत्यत्राकजपि तेनैव न भविष्यतीत्युक्तनिषेधवैयर्थ्यम् । अलौकिकवाक्यएव अकचो निषेधार्थमारम्भ इति स्वीकारे तु द्वितीयपक्षएव पर्यवसानम् ।

अजहत्स्वार्थायामपीत्यादावपि प्रष्टव्यम्—किं स्वार्थस्यान्यविशेषणतापन्नत्वादुपसर्जनत्वमिति विवक्षितम्, उत स्वस्यार्थान्तरे लाक्षणिकत्वादिति । नाद्यः । सर्वस्मै इत्यादावपि तदापत्तेः । विभक्त्यर्थविशेषणतापन्नत्वात् । नान्त्यः । न हि लाक्षणिकत्वमुपसर्जनत्वमिति स्वपरग्रन्थविरोधात् । बहुव्रीहौ पूर्वपदस्यैवान्यपदार्थे लक्षणेति पक्षे प्रकृतोपयोगस्याप्यभावाच्च ।

प्रकृतमनुसरामः । ननूपसर्जनपर्युदासानभ्युपगमेऽतिस-

र्वायेत्यादावतिप्रसङ्ग इत्यत आह—भाष्यकारेति । वृत्तिप्रवेशसाम्येऽपि यत्र सर्वनामार्थस्य विशेषणत्वं न तत्र संज्ञा, यत्र तु विशेष्यत्वं तत्रास्त्येव । यथा परमसर्वे इत्यादाविति भावः । ततश्च त्वत्कपितृक इत्युदाहरणानुपपत्त्याऽलौकिकविग्रहे प्रतिषेधपरमेतत्सूत्रमिति भाष्याभिप्राय इति प्राचामाशयः ।

न्यासकारस्त्वाह—प्रियविश्वायेति नोदाहरणम् । समुदायस्यासर्वनामत्वात् । संज्ञायां ज्ञापकलभ्यस्य तदन्तविधेश्च सर्वनामार्थप्राधान्यविषयकत्वात् । तदवयवानां च विश्वादीनां सर्वनामकार्यप्रसक्त्यभावात् । स्मैप्रभृतीनामङ्गाधिकारीयत्वात् । न च "अङ्गाधिकारे तस्य च तदुत्तरपदस्य च" इति सिद्धान्तात्सर्वनामान्तादङ्गात्परत्वमाश्रित्य तदापत्तिः । विहितविशेषणाश्रयणात् । सर्वनाम्नोऽङ्गाद्विहितस्य ङेप्रभृतेरित्यर्थात् । "द्वन्द्वे च" इत्यत्र दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोगस्य तत्र प्रमाणत्वात् । एकवाक्यस्यैकरूपेणैव सर्वत्र प्रवृत्तेः । न च सर्वनामान्तादङ्गाद्विहितस्येत्यर्थप्रसङ्गादतिप्रसङ्गतादवस्थ्यम् । विहितविशेषणवैयर्थ्यापत्तेः । अङ्गात्सर्वनाम्न इत्येव सर्वनाम्नो विशेष्यत्वस्वीकारात् । तेन च तदन्तविधेरप्रवृत्तेः । अत एवोक्तं प्रकाशकारैः—

अवयवमात्रस्य सत्यपि सर्वनामत्वे दोषाभावादिति ।

एवं च "न बहुव्रीहौ" इति निषेधस्य प्रियविश्वायेत्यत्रानपेक्षितत्वात्तत्सामर्थ्यादन्तरङ्गोऽप्यकच् समासात्पूर्वं न प्रवर्त्तते इति त्वत्कपितृक इत्याद्युदाहणं सुस्थमेव । तात्सिद्धं कृते बहुव्रीहाववयवसंज्ञानिषेधार्थमेवैतत्सूत्रमिति । तदेतदुपन्यस्यति, त्वत्कपितृक इत्यादिना । तथा च सूत्रकारमतइत्यनेनोपसर्जनप्रतिषेधानङ्गीकारादेतत्सूत्रारम्भ इत्युक्तम् । वार्त्तिकमते तूपसर्जनप्रतिषेधादेव

सिद्धमित्यर्थः । विषयजिज्ञासायां तु भाष्यमतेऽलौकिकविग्रहेऽयं निषेधः ।

न्यासकृन्मते तु बहुव्रीहावत्रयवानामिति विवेक उक्तः । न चास्य भाष्येऽपि प्रथमं लिखितत्वात्कथं न्यासकारीयत्वेनोपन्यास इति वाच्यम् । आद्ये उपसर्जनप्रतिषेधेन प्रियविश्वायेत्यादीनामन्यथासिद्धिरुक्ता । द्वितीये तु संज्ञामभ्युपगम्य प्रकारान्तरेणेति विशेषात् ।

एवं सूत्रे व्याख्याते प्रत्याख्यानाभिप्रायेणाह भाष्यकारः । गोनर्दीयस्त्वाह—

अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयौ ।

त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति । स्वरः " स्वाङ्गशिटामदन्ताम् " इत्याद्युदात्तत्वम् । यथोत्तरं मुनीनां प्रामाण्याद्भाष्यानुसारादेव साधुत्वव्यवस्था ।

तृतीयासमासे २९ ।

सर्वनामसंज्ञा न स्यात् । मासपूर्वाय देहि । पुनः समासग्रहणं वाक्यभेदेन समासार्थकवाक्येऽपि निषेधलाभार्थम् । मासेन पूर्वाय । न च त्वयका कृतम् त्वकत्कृतमित्यादावप्यापत्तिः । प्रतिपदोक्तस्य "पूर्वसदृश" इतिसमासस्यैवोपादानात् ।

यद्वा असमासे इत्यन्यो योगः । पर्युदासेन समाससदृशस्य लौकिकवाक्यस्य ग्रहणम् । न च पूर्वसूत्रवदस्याप्यलौकिकवाक्यपरत्वमेवास्त्विति वाच्यम् । अदन्तेषु काकचोरविशेषात् । तकारान्तानां च प्रातिपदोक्ततृतीयासमासाभावाद्वैयर्थ्यप्रसङ्गात् ।

द्वन्द्वे च ३० ।

सर्वनामसंज्ञा न स्यात् । पूर्वापराधराणाम् ।समुदायस्यायं निषेधो न त्ववयवानाम् । न च समुदाये संज्ञाप्रसक्त्यभावः । उक्तनिषेधेनैव तदनुमानात् । प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वार्त्तिकाच्च ।

नन्वयमवयवस्यैव संज्ञानिषेधः कुतो न स्यादिति चेद्, मैवम् । फलाभावात् । त्यदादिभ्यः पूर्वेषामकारान्तत्वेन काकचो विशेषाभावात् । त्यदादीनां चैकशेषविधानेन द्वन्द्वस्यैवाप्रसिद्धेः । द्वन्द्वापवाद एकशेष इति वक्ष्यमाणत्वात् । दक्षिणोत्तरपूर्वाणामित्यत्र पुंवद्भावस्य चेष्टत्वात् । "सर्वनाम्नो वृत्तिमात्रे" इत्यत्र यस्य कुत्रचित्सर्वनामसंज्ञा तस्योपादानात्संज्ञानिषेधेनापि तस्य दुर्वारत्वाच्च । न च त्वच्छब्दस्तान्त इति पक्षे तत्राकचो निवृत्त्यर्थ एव निषेधोऽस्त्विति वाच्यम् । शास्त्रस्याल्पविषयकत्वापत्तेः । नन्वेवमपि अवयवस्य संज्ञानिषेधानङ्गीकारे उक्तस्थलेऽङ्गाधिकरीयतदन्तविधिना सुट् स्यात् । न च निषेधवैयर्थ्यम् । अङ्गाधिकारबहिर्भूतस्य त्रतासिलादेर्व्यावृत्त्या सार्थक्यात् । अत्राहुः—

अङ्गकार्येषु विहितविशेषणान्न दोष इति ।

विभाषा जसि ३१।

जसादेशे शीभावे कार्ये द्वन्द्वे उक्ता संज्ञा वा स्यात् । वर्णाश्रमेतरे । वर्णाश्रमेतराः । जसीति कार्यापेक्षयाऽऽधारत्वम् । यद्यप्यादेशेन जसोऽपहाराद्भिन्नकालीनयोर्नाधाराधेयभावः । तथाऽपि आदेशप्रवृत्तिप्रयोजकप्रसङ्गप्रतियोगित्वरूपं गौणं तद्बोध्यम् ।

केचित्तु जस इरिति षष्ठीसमासः । जसीति सौत्रः सप्तमीलोपः । ग्रहणकशास्त्रेण च दीर्घ ईकारो लभ्यत इत्याहुः ।

अन्ये तु कार्यकालपक्षे "जसः शी" इत्यत्रैव एतत्संज्ञोपस्थानमित्याहुः इति सर्वं कैयटे स्पष्टम् । सर्वथाऽपि शीभावं प्रत्येव विकल्पः । अन्यत्र पूर्वेण निषेध एव । तेन वर्णाश्रमेतरका इत्यादावकच् न, किं तु कप्रत्यय एव । अकाचि तु तन्मध्यपतितन्यायेन पक्षे जसः शी स्यात् । तथा च भाष्यम्—

जसः कार्यं प्रति विभाषा, अकज् हि न भवतीति ।

प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च ३२।

शीभावे कार्ये वा सर्वनामसंज्ञा । नेमस्य प्राप्तेऽन्येषां त्वप्राप्ते विभाषेयम् ।

"ये भूताः प्रथमे पुराणचरितास्तेषामयं धूर्वहः" इति भवभूतिः ।
"बभूवुर्न प्राञ्चस्त्वमिव भवितारो न चरमे"
"पश्यामः श्रवसी कृते च शृणुमस्तद्वक्तुमल्पे वयम्"
"वैदेहीकुचपत्रभङ्गिरचनावैदग्ध्यमर्द्धे कराः"
"संवर्तव्रतदृत्तयः कतिपये पीयूषभानोः कराः"
इति च मुरारिः । सुगममन्यत् ।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ३३।

स्वमज्ञातिधनाख्यायाम् ३४।

अन्तरं बहिर्योगोपसंव्याननयोः ३५।

इयन्त्रिसूत्री गणव्याख्यायामेव व्याख्याता । समानाकारत्वात् । यादृशेऽर्थे तत्र नित्या संज्ञा विहिता तस्मिन्नेव जसि विभाषाविधानार्थमारम्भः । पूर्वे पूर्वाः इत्यादि । अत्र वार्तिकम्—

अवरादीनां च पुनः सूत्रपाठे ग्रहणानर्थक्यं गणे पठितत्वात्।

अस्यार्थः—अवरादीनामित्यादिशब्दस्य प्रकारार्थत्वात्पूर्वपरयोरपि लाभः । तथा च पूर्वादीनां यथोक्तार्थविशेषपुरस्कारेणैव नित्यसंज्ञाऽर्थं गणे पठितत्वात् "पूर्वादीनि नव" इत्येव सूत्रणीयम् । तेषामेवात्र प्रत्यभिज्ञानात् । तत्रैवार्थनिर्देशः पाठविशेषणं, यथा—"तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः" इत्यत्र कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादिपाठस्य । एतेनार्थविशेषनिर्देशार्थमिह प्रत्येकं पाठ इत्यपि निरस्तम् ।

"पूर्वादीनि नव"इति अत्रत्यसूत्रं च प्राप्तविभाषा भविष्यतीति। ननु नियतसंनिवेशव्यवस्थितगणपाठोत्तरं सूत्रपाठ इत्यत्र प्रमाणाभावः। सर्वादीनीत्यादिशब्दस्य प्रकारार्थत्वमपि सम्भवति । तत्प्रदर्शनायाभियुक्तैर्गणाः पठ्यन्ते । श्रेण्यादयः पठ्यन्ते । कृतादिराकृतिगणः इति दर्शनात् । कृतादीनां च वृत्तिकारैर्निदर्शनार्थं पठितत्वात् । "मध्यमस्याम् अवमस्याम्" इत्यादिप्रयोगाणामपि वेदे दर्शनाच्च । मैवम् । "पूर्वादिभ्यो नवभ्यो वा"इति नवग्रहणेन गणपाठस्य पूर्वत्वज्ञापनात्। अन्यथा त्यदादिव्यवच्छेदार्थस्य नवग्रहणस्यानुपयोगात् । तेन सर्वादीनीत्यादिश-

न्दो व्यवस्थाऽर्थः। अन्यथा सकलादिपदेष्वतिव्याप्तेः। मध्यमस्यामित्यादेश्च छान्दसत्वात्।

अथ त्यदादिपाठानन्तरं कैश्चित् पूर्वादीनि पठ्यन्ते। तत्र पूर्वादिभ्यस्त्रतसिलादीनां प्रतिषेधः प्राप्नोति। "किंसर्वनामबहुभ्यः" इत्याधिकारेऽद्व्यादिभ्य इति पर्युदासात् द्व्यादिभिन्नेभ्य एव सर्वनामभ्यस्तद्विधानात्। अतः पुनः सर्वनामसंज्ञाविधानार्थमयं प्रतिपदपाठः। तेन सामर्थ्यात्पर्युदासो बाध्यते। यथा—"अनुर्लक्षणे" इति पुनर्विधानेन हेतुतृतीया। न चैवं जसि विभाषा न लभ्येतेति वाच्यम्। वाक्यभेदेन तस्या अपि विधानात्। यथा—"अमि पूर्वः" "संप्रसारणाच्च" इत्यत्र "वा छन्दसि" इति वाक्यभेदेन सम्बन्धाच्छन्दसि पूर्वरूपविकल्प इति चेत्। मैवम्। "पूर्वत्रासिद्धं जश्भावादिति चेदुत्तरत्राभावादपवादप्रसङ्गः" इतिसूत्रवार्तिकप्रयोगादेव पूर्वादिष्वद्व्यादिभ्य इति पर्युदासो न प्रवर्ततइति ज्ञापयितुं शक्यत्वात्। तस्मादर्थविशेषविशिष्टानां पूर्वादीनां प्रतिपदपाठवैयर्थ्यमिति प्राप्ते सिद्धान्तमाह भाष्यकारः—

जसि विभाषां वक्ष्यामीति।

अस्यार्थः—यद्यत्र "पूर्वादीनि नव" इत्येव सूत्र्येत तदा गणपाठेऽर्थनिर्देशस्य नित्यसंज्ञाविधानएवोपयोगात्पाठविशेषणे प्रमाणाभावादर्थान्तरे पूर्वादीनामप्राप्तविभाषेयं स्यात्। न च तथाऽपि प्राप्तविभाषैवेयमस्त्विति वाच्यम्। उक्तानुवाददोषादप्राप्तविभाषायामपूर्वविधानात्। तथा हि—अर्थनिर्देशस्य पाठविशेषणत्वाभावे अर्थविशेषानवच्छिन्नानामेव पूर्वादीनां सर्वादौ पाठः। अर्थनिर्देशस्तु नित्यविभाषायामेवोपयुक्तः। तथा च व्यवस्थादौ नित्या संज्ञा। जसि विभाषा तु व्यवस्थादिवृत्तीनां

पूर्वादीनाम् उत अर्थान्तरवृत्तीनामिति वीक्षायां आद्येऽनुवाददोषः, प्राप्तत्वाज्जस्यपि संज्ञायाः । द्वितीये त्वप्राप्तैव संज्ञा विधीयतइति नानुवादः । न चात्राप्यभावकोटावनुवादः भावकोटौ विधिः, प्राप्तविभाषायां तु भावकोटावनुवादो निषेधकोटौ विधिरिति वाच्यम् । भावपरत्वानुपपत्तावेवानायत्या विधेर्निषेधे तात्पर्यकल्पनात् । अर्थान्तरवृत्तीनाम् अप्राप्तसंज्ञाविधानसम्भवे तदनौचित्यात् । अतो विभाषायामप्यर्थविशेषपुरस्कारेण पूर्वादीनां प्रतिपदपाठः । तद्बलाच्च प्राप्तविभाषात्वमर्थविशेषपुरस्कारेण विहितत्वादर्थान्तरे विकल्पप्रवृत्तेरनुपपत्तेः ।

अत्र वदन्ति–गणे एवोक्तात्रिसूत्र्यनन्तरं "विभाषा जसि" इति पठनीयम् । अर्थविशिष्टानां पूर्वादीनामनुवृत्त्या विकल्पलाभात् । न च सर्वादीनामप्यनुवृत्त्यापत्तिः । नेमस्य जसि विभाषारम्भात् । न च नेमपर्यन्तानामननुवृत्तेस्तेन ज्ञापितत्वेऽपि समासिमयोरनुवृत्तिर्दुर्वारेति वाच्यम् । समसिमनेमेति पाठेनापि निर्वाहात् ।

यद्वा–" जसङसिङीनां शीस्मात्स्मिनः " " पूर्वादिभ्यो नवभ्यो वा " " औङ आपः शी " " नपुंसकाच्च " इति सप्तमे न्यासः कर्त्तव्यः । संज्ञाविकल्पविधानापेक्षया शीशब्दस्य द्विरुपादानेऽपि यथान्यासापेक्षया लाघवस्य भूयस्त्वात् ।

यद्वा–यथान्यासएव " पूर्वादिभ्यो नवभ्यो वा " इत्येतद् " जसः शी " इत्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयम् । एभ्यः परस्य जसो वा शीभावः स्यादिति । तस्मादुक्तात्रिसूत्री अष्टाध्याय्यां न पाठ्येति ।

अत्रेदं चिन्त्यम् । जसि संज्ञाविकल्पानारम्भे पूर्वा इत्यादौ शभावाभावपक्षेऽपि सर्वनामसंज्ञासद्भावादाद्युदात्तत्वप्रसङ्गः ।

यथान्यासे तु तत्रान्तोदात्तत्वमिति फलवैषम्यमिति ।

* विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम् ।

*द्वितीयस्मै द्वितीयायेत्यादि। एवं च "विभाषा द्वितीयातृतीयाभ्याम्" इति सूत्रं नारभ्यम्। लिङ्गविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा स्त्रीलिङ्गेऽपि सिद्धेः । न च विनिगमकाभावः । स्त्रीलिङ्गोपादानेन पुंनपुंसकयोः कार्यासिद्धेः । जात्यन्तात् छ बन्धुनि । ब्राह्मणजातीयाय। प्रकारवचने जातीयर्। पटुजातीयाय। तसन्ताभ्यां मुखपार्श्वशब्दाभ्यां गहादित्वाच्छः। मुखतीयाय। पार्श्वतीयाय। अत्र न सर्वनामत्वम्। लाक्षणिकत्वात् । अनर्थकत्वाच्च। " पूरणाद्भागे तीयादन् " इति अन्प्रत्यये "यस्येति च " इत्यकारलोपे च कृते तृतीयाय भागायेत्यत्रापि न भवति । लाक्षणिकत्वात्। न चैकदेशविकृतन्यायः। अन्नन्तस्यान्यत्वात् । अनो विकारत्वाभावात्।

इति सर्वनामसंज्ञाप्रकरणम् ।

स्वरादिनिपातमव्ययम् ३६ ।

स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। समाहारे द्वन्द्वः । निपाताश्च " प्राग्रीश्वरात् " इत्याधिकृत्य " अधिरीश्वरे " इत्येतत्पर्यन्तं वक्ष्यन्ते । ननु स्वरादीनपि चादिष्वेव पठित्वा अव्ययप्रदेशेषु च निपातशब्दमेवोपादाय अव्ययसंज्ञा नारभ्येति चेन्न। चादीनां हि असत्त्ववाचिनामेव निपातसंज्ञा। "लोधं नयन्ति पशु मन्यमानाः"इत्यत्र सम्यगर्थपशुशब्दस्यैव स्यात्, न तु "पशूंस्तांश्चक्रे" इत्यादौ सत्त्ववाचिनोऽपि, स्वरादीनां तु सत्त्ववाचिनामप्यव्ययसंज्ञा, स्वः पश्येत्यादिदर्शनात् इति वैषम्यात् ।

अथैवमपि " प्राग्रीश्वरान्निपाताः " " स्वरादीनि " चादयोऽसत्त्वे " इति न्यासः क्रियतामिति चेन्न । "निपात एकाजनाङ्" इति प्रगृह्यसंज्ञायाः स्वरादीनामप्येकाचां प्रसङ्गात् । " किमोऽत् " इत्यत्प्रत्ययस्य " दक्षिणादाच् " इत्याच्प्रत्ययस्य च ताद्धितस्य केन्प्रभृतीनाञ्च कृतामेकाचां स्वरादिषु सत्त्वात् । न च " चादिरेकाजनाङ् " इत्येव पठनीयमिति वाच्यम् । चादीनामसत्त्ववाचित्वविशेषणाभावे कामवाचकस्य इशब्दस्य सम्बुद्धौ एऽवेत्यत्रापि प्रगृह्यत्वापत्तेः । निपात इत्युक्ते तु असत्त्ववाचिनामेव चादीनां तत्संज्ञत्वमिति अतिप्रसङ्गाभावात् । अव्ययेत्यन्वर्थसंज्ञाविज्ञानादुपसर्जनानां संज्ञा न । विविधं विकारं न गच्छति, सत्त्वधर्मान् लिङ्गसंख्याकारकादीन् न गृह्णातीति यावत् । तेन अत्युच्चैसौ अत्युच्चैस इत्यत्र अव्ययसंज्ञाविरहान्न सुपो लुक् । अतिक्रान्तप्राधान्येन सत्त्वधर्मग्राहित्वात् । न चात्र संज्ञायाः प्रसक्तिरेव नास्तीति वाच्यम् । तदन्तविधेरप्यन्वर्थसंज्ञयैव ज्ञापनात् । अन्यथोपसर्जने प्रसक्त्यभावे तद्व्यावृत्त्यर्थायास्तस्या अनुपपत्तेः । परमस्वरित्यादौ उत्तरपदार्थप्राधान्ये तु भवत्येव । आथर्वणे प्रणवविद्यायां भाष्योदाहृता श्रुतिरप्यत्र मानम् ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥"

सादृश्यं च लिङ्गविशेषप्रतिपादने सामर्थ्याभावात् ।

केचित्तु लिङ्गविशेषानन्वयेऽपि लिङ्गसामान्ययोगोऽव्ययानामस्त्येवेत्याहुः । तन्न । लिङ्गसामान्ये प्रमाणाभावादिति कैयटः । विभक्तिषु कारकेषु । साधनप्रधानानामव्ययानां शक्त्यन्तरानावेशात्, क्रियाप्रधानानां च शक्तिसम्बन्धाभावात् ।

वचनेष्वेकबहुत्वादिषु। अव्ययीभावस्य तु लिङ्गसंख्यायोगेऽपि वचनादव्ययत्वम्, सुप्रभृतीनां कर्मप्रवचनीयसंज्ञावत्।

अथ स्वरादयः। स्वरिति स्वर्गपरलोकयोः। स्वर्गे—"स्वारसातलभवाहवशङ्की"। परलोके—"समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः"। अन्तरिति मध्ये। "अन्तःपांसुलहेमकेतकदलाद्रोणीदुरापाश्रियः"। प्रातरिति प्रभाते। "प्रातः पश्य सखे दरिद्रवदभून्निर्मुद्रमम्भोरुहम्"। स्वःशब्द स्वरितः। "न्यङ्स्वरौ स्वरितौ" इति फिट्सूत्रात्। अन्तरिक्षमथो स्वरिति प्रयोगाच्च। द्वावन्तोदात्तौ। "प्रातरग्निं प्रातरिन्द्रं हवामहे" इत्यादौ तथादर्शनात्। पुनरित्यप्रथमे विशेषे च। अप्रथमे- "अनुभवपुनरुक्तां मुञ्च नस्तोत्रचर्याम्"। विशेषे—"किं पुनर्नवमीयुक्ता"। आद्युदात्तोऽयम्। सनुतरित्यन्तर्द्धाने। "सनुतश्चोरो गच्छति"। उच्चैरिति महति। "उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथाऽयं तथा"। नीचैरित्यल्पे। "नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति"। शनैरिति क्रियामान्द्ये। "शनैश्चिद्यन्तो अद्रिवः"। ऋधागिति सत्ये। वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये। ऋधगित्थासमर्त्यः। ह्यस् इति अव्यवहितपूर्वेऽह्नि। श्वस् इत्यव्यवहितोत्तरेऽह्नि। "श्वस्तस्याः प्रियमाप्तुमुद्धुरधियो धाराः सृजन्त्या रयात्" दिवेति दिवसे। "न शोभनं यद्दिवा स्वपिषि"। रात्राविति निशि। "रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा"। सायमिति निशामुखे। "सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितम्"। चिरमिति बहुकाले। "चिरं स्वेच्छस्पर्शैरमृतशिशिरैर्यः परिचितः"। मनागिति ईषदर्थे। "गन्धेन स्फुरता मनागपहृतो भक्तस्य सर्पिष्मतः"। ईषदित्यल्पे। "तदीषद्विस्तारि स्तनयुगलमासीन्मृग-

द्दशः"। जोषमिति सुखे मौने च। सुखे—"जोषमास्ते जितेन्द्रियः"। मौने—"जोषं जोषं जोषमेवावतस्थे"। तूष्णीमिति मौने। "बभूव तूष्णीमहितापकारकः"। बहिस् अवस् इति बाह्ये। "बहिः पुरोऽभूत्पुरुहूतपौरुषः"। समयेति समीपे मध्ये च। निकषेत्यन्तिके। "विलङ्घ्य लङ्कां निकषा हनिष्यति"। स्वयमित्यात्मनेत्यर्थे। "स्वयं त्यक्तास्त्वेते शमसुखमनन्तं विदधति"। वृथेति व्यर्थे। "वृथा परीहास इति प्रगल्भता"। नक्तमिति रात्रौ।

नक्तं रत्नमयूखपाटवमिलत्काकोलकोलाहलः।
त्रस्यत्कौशिकभुक्तकन्दरतया सोऽयं गिरिः स्मर्यते॥

नञ् इति निषेधे। "तथाऽऽद्रियन्ते न बुधाः सुधामपि"। हेताविति निमित्तार्थे। इद्धेति प्राकाश्ये। अद्धेति स्फुटावधारणयोः। तत्त्वातिशययोरित्येके। "तत्त्वे त्वद्धाऽञ्जसा द्वयोः" इत्यमरः। "अद्धा श्रद्धाकरमिह करच्छेदमप्यस्य पश्य"। सामीत्यर्द्धजुगुप्सितयोः। "पूर्वं गाधिसुतेन सामिघटिता मुक्ताऽनुमन्दाकिनी"। ह्यस्प्रभृतयः साम्यन्ता द्वाविंशतिरन्तोदात्ताः इति काशिका। "वृथा सृजत्पार्थिभिः" "नक्तं ददृश्रे कुहचिद्दिवेयुः" इत्यादयस्त्वाद्युदात्ताः प्रयुज्यन्ते" इति कौस्तुभे।

वत्। वत्प्रत्ययान्तमव्ययसंज्ञम्। तुल्यार्थे इवार्थे च विहितस्य वतेरुपादानमविशेषात्। न तु "उपसर्गाच्छन्दसि धात्वर्थे" इति विहितस्य। सत्त्वार्थकत्वात्। यदुद्वतो निवतः। उद्गतान् निगतानित्यर्थः। सना सनत् सनात् एते नित्ये। सनातनः। सनत्कुमारः। अत एव सनत्सुजातपदव्याख्यायां श्रीनारायणसर्वज्ञाः—"सनत्पदं नित्यार्थम्, सनत् वाजसनामिति छन्दसि तथा दर्शनात्। सुष्ठु जातः स्वधर्माविर्भूतदेहत्वादिति""अधीहि भगव इत्युपससार सनत्कुमा-

रं नारदः" इति छान्दोग्योपनिषत्। "इमा गिर आदित्येभ्यो घृ-तस्नूः सनाद्राजभ्यो जुह्वा जुहोमि" इति मन्त्रे "चिरञ्जुह्वा जुहोमि चिरं राजभ्य इति चेति निरुक्तिकृता चिरार्थोऽप्युक्तः। तिरसिति अन्तर्द्धौ तिर्यगर्थे च। अन्तर्द्धौ–"लावण्यप्रसरतिरस्कृताङ्गलेखा-म्"। "तिरस्कृतस्तस्य जनाभिभाविना" इत्यादौ परिभूते तूप-चारात्। एते आद्युदात्ता इति काशिका। अन्तोदात्तौ स-नातिरःशब्दौ वेदे दृश्येते इति कौस्तुभे। अन्तराऽन्तरेणेति मध्ये विनार्थे च। अऽन्तोदात्तः। मध्ये–"द्यामन्तरा वसुमतीमपि गाधिजन्मा"। "मृणालसूत्रामलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः"। विनाऽर्थे–"त्वामन्तरा तामरसायताक्षि" "कर्णारुन्तु-दमन्तरेण रणितं गाहस्व काक स्वयम्।

ज्योगिति कालभूयस्त्वे प्रथमे शीघ्रार्थे संप्रत्यर्थे च। "सर्व-मायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या" इति छान्दोग्योपानिषत्। कमिति वारिमूर्द्धनिन्दासुखेषु। क्रमेण यथा—कञ्जं पद्मम्। कञ्जाः कचाः। कन्दर्प्पः। कंयुः। "कंशंभ्यां युः" इति मत्वर्थीयो युः। शमिति सुखे। शंयुः। सहसेत्याकस्मिकाविमर्शयोः। "एष प्रोषार्त्तयोषिज्जन इव सहसैवोत्थितोऽन्तःपुरोऽग्निः" "क्रूरेण दारुणतया सहसैव दग्धा"। स्वधेति पितृदाने। "स्वधा कृतं यत्तनयैः पि-तृभ्यः। अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु। "चलन्नलं-कृत्य महारयं हयम्"। "पठत्सु तेषु प्रातिभूपतीनलम् विनिद्ररोमाऽजनि शृण्वती नलम्" "ग्रन्थानधीत्य व्याकर्तु-मिति दुर्मेधसोऽप्यलम्"। "एतावताऽलमघनिर्हरणाय पुंसाम्"। "अलं विलम्ब्य त्वरितं हि वेला"। वषट् वौषट् श्रौषट् एते हविर्दाने। "वैतानेषु कुपीटयोनिषु पुरोडाशं वषट् कुर्वते"।

"तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं वषट्कारं च" इति ब्राह्मणम् । विनेति वर्जने । "तव रूपमिदं तया विना" । नानेत्यनेकविनाऽर्थयोः । श्रियो नानास्थानभ्रमणरमणीयां चपलताम्" । "नाना नारीं निष्फला लोकयात्रा"।"नेह नानाऽस्ति किञ्चन" इत्यत्र नानाशब्दो नञ्समानार्थकतया अन्योऽन्याभावार्थः । "विनञ्भ्यां नानाञौ नसह" इति स्वार्थिकनाञ्प्रत्ययान्तनञ्पदव्युत्पन्नत्वात् । तस्य च धर्मिपरतया भिन्नं नास्तीत्यर्थ इत्यौपनिषदाः । स्वस्ति इति मङ्गले । "स्वस्ति न इन्द्रो वृद्धश्रवाः" । अन्यादित्यन्यार्थे । देवदत्त आयातोऽन्यच्च यज्ञदत्तः । अस्तीति सत्तायाम् । "अस्ति वाम्यभरमस्ति कौतुकम्" । उपांशु इत्यप्रकाशोच्चारणरहस्ययोः । "उच्चैर्ऋचा क्रियते नीचैर्यजुषा उपांशु साम्ना" इति श्रुतिः। क्षमेति क्षान्तौ । "क्षमाकरोतु भवान्" । विहायसेति वियदर्थे । "विहायसा रम्यमितो विभाति" । दोषेति रात्रौ । "दोषाऽपि नूनमहिमांशुरसौ किलेति" । मृषा मिथ्येति द्वौ वितथे । "मृषा निशानाथमहः सुधा वा" । "मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे" । मुधेति व्यर्थे । "भजन्ति हि मुधा बुधा अहह कुक्षितः कुक्षितः" । "क्त्वातोसुन्कसुनः" "कृन्मकारसंध्यक्षरान्तः" "अव्ययीभावश्च" इमानि गणसूत्राणि अष्टाध्यायीस्थात्रिसूत्रीसमानार्थानि। अर्थस्तत्रैव वक्ष्यते।

स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा ।

इत्यमरः ।"उपाध्यायेन पुराऽधीयते"। अविरतमपाठीत्यर्थः । "स्मरेण मुक्तेषु पुरा पुरारौ" इत्यादौ अतीतकालार्थः । "पुरा विकुरुते मायाम्" । समनन्तरं विकरिष्यतीत्यर्थः । मिथो मिथस् इति रहःसहार्थयोः । "कथाप्रबन्धेषु मिथः

सखीमुखात्"। सहार्थोऽन्योऽन्यार्थः।"मिथोऽन्योऽन्यं रहस्यपि" इत्यमरः । प्रायस् इति बाहुल्ये । क्वाचित्कव्यभिचारविशिष्ट-सहचारबाहुल्ये इत्यर्थः ।

मृगेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः ।

मुहुस् इति पुनरर्थे । " मुहुर्व्यजनवीजनैर्बहलचन्दनासेवनैः"। प्राहुकमिति समकाले ऊर्द्ध्वार्थे च । प्रवाहिकेति केचित् । आर्यहलमिति बलात्कारे । " आर्येति प्रतिबन्धे हलमिति प्रतिषेधविवादयोः " इति शाकटायनः । अभीक्ष्णमिति पौनः-पुन्ये । " अभीक्ष्णमुष्णैरपि तस्य सोष्मणः " । साकं सार्द्ध-मित्येतौ सहार्थे ।

"उत्क्षिप्तं सह कौशिकस्य पुलकैः सार्द्धं मुखैर्नामितम्" ।

"भूपानां जनकस्य संशयधिया साकं समास्फालितम्" ।

नमस् इति नतौ।"नमस्ते रुद्र मन्यवे"। हिरुगिति वर्जने। "य इन्दुदर्शी हिरुगिन्नु तस्मात्" । धिगिति निन्दाभर्त्सनयोः । "धिग्दैवदुर्विलसितं यदयं हिमांशुरभ्युद्यतश्च तमसा कवलीकृतश्च"।

"प्रियमपि ततो धिग्ब्राह्मण्यं धिगङ्गिरसः कुलम्" । तासि-लादिस्तद्धित एधाच्पर्यन्तः, शस्तसी, कृत्वसुच्, सुच्, आस्-थालौ, च्व्यर्थाश्चेति गणसूत्राणि ।

अयमर्थः । " पञ्चम्यास्तसिल् " इत्यारभ्य " एधाच्च " इत्येतदन्तैः सूत्रैर्विहितो यस्ताद्धितस्तदन्ताः शब्दाः स्वरादिषु बोद्धव्याः । " बह्वल्पार्थात् " इति विहितः शस् । प्रतियोगे पञ्चम्यास्तासिः । " संख्यायाः क्रियाऽभ्यावृत्तिगणने कृत्व-सुच् " । "द्वित्रिचतुर्भ्यः सुच्" । "इण आसिः" इत्युणादिसू-त्रेण विहितः आसिः। अया इति यस्य रूपम् । " प्रत्नपूर्ववि-श्वेमात्थाल्छन्दसि " इति सूत्रेण विहितः थाल् । " तं प्रत्नथा

पूर्वथा विश्वथेमथा" । "सम्पद्यकर्तरि च्विः" "विभाषा साति कात्स्न्यें" "देये त्रा च" "अनितौ डाच्" एतदन्ता अपि ग्राह्याः। अम् "अमु चच्छन्दसि" इति विहितः । आम् इत्यङ्गीकारे ।

आं जानीमो गमनसमये हन्त कान्तारसीम—

न्येकाकिन्याः कुवलयदृशो लुण्ठिता लोचनश्रीः ।

"किमेत्तिङव्ययादाम्" "कास्प्रत्ययादाममन्त्रे लिटि" इति विहितोऽपीत्यन्ये । प्रताम् इति ग्लानौ । प्रशान् इति सादृश्ये । प्रशान्देवदत्तो यज्ञदत्तेन । प्रतानिति विस्तारे । मा इति निषेधे ।

"मा जानीत विदर्भजामविदुषीं कीर्त्तिर्मुदः श्रेयसी" ।

माङिति निषेधाशङ्कयोः । "मा ते मलीमसविकारघना मतिर्भूत्" । आकृतिगणत्वात्स्वरादेरन्येषामपि संग्रहः । कामं स्वाच्छन्द्ये अनास्थायां च ।

कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वंसहे ।

प्रकामाः । निकाममित्यातिशये ।

"निकामं क्षामाङ्गी सरसकदली गर्भसुभगा" । भूय इति पुनरर्थे । "भूयोऽपि नामाधरसाम्यगर्वम्" । सांप्रतमिति न्याय्ये ।

" रामाल्लब्धसमस्तहेतिगुरुणो वीर्यस्य यत्सांप्रतम् " ।

परमिति किन्त्वर्थे । "वक्तुं विशेषः परमस्ति विशेषः" । साक्षादिति प्रत्यक्षे । "तदेव साक्षादमृतांशुमाननम्" । व्यवधानरहितत्वेऽपि । यथा साक्षात्कारणम् । साचीति तिर्यगर्थे ।

"काकुव्याकुलवाचि साचिहसितस्फूर्जत्कपोलश्रिया" ।

सत्यमित्यर्द्धाङ्गीकारे । "सत्यं मनोरमाः रामाः सत्यं रम्या विभूतयः" ।

मङ्क्षु आशु इति द्वौ शैघ्र्ये। संवत् इति वर्षे। अवश्यमिति निश्चये। "अवश्यं यातारश्चिरतरमुषित्वाऽपि विषयाः"। सपदीति शैघ्र्ये। "तव सपादि समीपमानयेताम्"।

बलवदिति अतिशये। "बलवत्तु द्रवमाणं प्रत्याययन्तीव मे हृदयम्"। प्रादुराविरिति प्राकाश्ये।

"वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा"।

"आविर्भूतप्रणयसुमुखाश्चातका वा भजन्ते"।

अनिशं नित्यदा सदा अजस्रं सततम् एते सातत्ये। "लवणमम्बु सदैव महोदधेः"। "अजस्रमभ्याशमुपेयुषा समम्"। उषेति रात्रौ। रोदसी द्यावापृथिव्यर्थे। ॐमिति ब्रह्मण्यङ्गीकारे च। "ॐ नमः सर्वभूतानि"। "ॐमित्युक्तवतोऽथ शार्ङ्गिण इति व्याहृत्य वाचं नभः"। भूर्भुवःस्वरिति पृथिव्यन्तरिक्षलोकयोः। "द्रष्टुं वीर चिरस्य धाम भवतस्तद् भूर्भुवःस्वस्त्रयी"। हृन्मर्मव्रणरोपणौषधमिमौ वाहू बहूत्ताम्यतः। झटिति झगिति तरसा इति शैघ्र्ये। "झटिति कुरुते दृष्टः कोऽयं दृशाममृताञ्जनम्"। "कालामच्छाक्षमालां झगिति भगवतो भैरवस्यार्पयामि"।

स्राक् झटित्यञ्जसाऽह्नाय द्राङ् मङ्क्षु सपदि द्रुते।

इत्यमरः। "मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्नाय वः। सुष्ठु प्रशंसायाम्। "ये वर्तन्ते तव च हृदये सुष्ठु सम्बन्धयोग्याः"। कु इति कुत्सितेषदर्थयोः। "धिक् तस्य मन्दमनसः कुकवेः कवित्वम्" "द्रागेतच्छुरिकारयेण ठणिति च्छिन्नापसर्पच्छिराः"। अञ्जसेति तत्त्वे शैघ्र्ये च। अ इति बहिरर्थे। मिथुनम् इति द्वावित्यर्थे। मिथुनं त्रपेते। विष्वगिति समन्तादित्यर्थे। "वात्यासंवेगविष्वग्विततवलयितस्फीतधूम्यामकाशः"। भाजगिति शैघ्र्ये। भाजक् पचति। अन्वगित्यानुकूल्ये।

चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः ।
आदिपदं चिरं चिरेण चिरादितिपरम् ।

"चिराय रात्रिश्चर वीरचक्रमाराङ्कवैज्ञानिकपश्यतस्त्वाम्"।
"दीक्षितं चिररात्राय श्रुत्वा तं तु युधिष्ठिरः" ।

" सुचरितपरिपाकात्प्राप्तश्चिरस्य समागमः " । " चिरेण लब्धा बहुभिर्मनोरथैः " । " उदश्चदुच्चारणचारुणश्चिरात् " । अस्तमिति विनाशे । "राज्यमस्तमितेश्वरम्" । आनुषगित्यानुपूर्व्ये । "आनुषक् प्रविशतीत्याह वन्द्युत" । दान्तोऽयमिति केचित् । ह्रस्वादिरयमनुमाने इति शाकटायनः । अम्नस् इति शीघ्रसाम्प्रतिक्रयोः । अम्नरेव । स्थाने इति युक्ते । " तस्यार्थे गरुडामरेन्द्रममरः स्थाने समानेऽजनि " । वरमिति ईषदुत्कर्षे । "स्वाधीना वचनीयताऽपि हि वरं बद्धो न सेवाञ्जलिः" । दुष्ठ इति निष्कृष्टार्थे । बलादिति हठार्थे । "भित्त्वा प्रसरति बलात्" । शु इति पूजायाम् । "शुनासीरः" "शुतुद्रि स्तोमं सचता परुष्ण्या" । अर्वागिति प्राचीने सुदि शुक्लपक्षे वदि कृष्णपक्षे इत्यादि प्रयोगानुसारेण ज्ञेयम् ।

तद्धितश्चासर्वविभक्तिः ३७।

यस्माद्वचनत्रयं नोत्पद्यते,किन्त्वेकवचनमेव स तद्धितान्तः शब्दोऽव्ययसंज्ञः स्यात् । तत्र । ततः। तद्धित इति किम् । एकः द्वौ बहवः। तेषां नियतवचनत्वेन वचनत्रयानुत्पत्तेः । विशेषणं किम् । औपगवः। इह यदि यस्य तद्धितस्योत्पत्तौ सर्वविभक्तिर्न निमित्तम्, किंतु विभक्तिविशेषपुरस्कारेणैव तदुत्पत्तिः,तस्याव्ययसंज्ञा । यथा- "सर्वैकान्यकिंयत्तदः काले दा " इति दाप्रत्ययस्य सप्तम्येवो-

त्पत्तिनिमित्तमिति व्याख्याने विना नाना इत्यादीनामव्ययसंज्ञा न स्यात्, तदुत्पत्तौ कस्याश्चिदपि विभक्तेरनपेक्षितत्वादित्यव्याप्तिः। दाक्षिरित्यादौ "तस्यापत्यम्" इति षष्ठ्या एव निमित्तत्वेनाश्रयणादतिव्याप्तिश्च । एवं त्रलादीनामप्यव्ययत्वं न स्यात् । न च "पञ्चम्यास्तसिल्" "सप्तम्यास्त्रल्" इति तेषाम् एकैव विभक्तिर्निमित्तमिति वाच्यम् । "इतराभ्योऽपि दृश्यन्ते" इति विभक्त्यन्तरेऽपि तद्विधानात् ।

अथाश्रूयमाणसर्वविभक्तिकः शब्दोऽव्ययम् । न च दधि मधु इत्यादावतिप्रसङ्गः । विभक्त्यन्तरस्य श्रूयमाणत्वादिति । तदाऽन्योऽन्याश्रयः । अव्ययत्वाद्विभक्तिलोपः, तस्मिंश्च सति अव्ययत्वमिति ।

यदि तु लिङ्गसङ्ख्यारहितत्वमव्ययत्वम् । न चात्रान्योऽन्याश्रयः । लिङ्गसंख्याऽनन्वयस्य शब्दस्वाभाव्याधीनत्वेन वाचनिकत्वाभावात् इत्युच्यते, तदा सम्यगेवेति भाष्यमतम् ।

वार्तिककारस्तु—सिद्धं तु पाठात्, तसिलादयः प्राक् पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्यः, मान्तः कृत्वोऽर्थः तसिवती नानाञाविति ।

न च "प्रत्नपूर्व"इत्यादिना विहितस्य थाल्प्रत्ययस्यासंग्रहः । प्रकारवचने यः थाल् तस्यैव तत्र विधानात् । स्वरादौ पाठेन सङ्ग्रहाच्चेत्यपरे । मान्त इति । अम् आम् चेत्यर्थः । तसिपदेन "प्रतियोगे पञ्चम्यास्तसिः" "तेनैकदिक्" "तसिश्च" इति विहितौ द्वावपि गृह्येते । कृत्वोऽर्थः कृत्वसुच् सुच् च ।

स्यादेतत् । कारकविधीनां वचनविधीनां च स्वादिविधिनैकवाक्यत्वात् अव्ययेषु स्वादीनां प्राप्तिरेव दुर्घटा । कर्मत्वै-

कत्वाद्यभावेन तत्तदर्थेषु तत्तद्विभक्तिविधायकवचनानामव्ययेषु प्रवृत्तिविरहात् । सत्यम्—

चत्वारोऽत्र पक्षाः ग्रन्थेषु प्रतीयन्ते । अव्ययेभ्यः सप्तानामपि विभक्तीनां वचनत्रयं भवतीत्येकः । सप्तानामेकवचनमेवेति द्वितीयः । प्रथमायाः वचनत्रयमेवेति तृतीयः । एकवचनमेवेति चतुर्थः । तत्राद्यत्रयमभ्युच्चयमात्रम् । अन्त्यस्तु तात्त्विकः । ते च यथा—यद्वि कर्मणि द्वितीयैव, अभिहिते प्रथमैव, एकत्वे एकवचनमेवेत्यादिरर्थनियमः, यदि वा द्वितीया कर्मण्येव इत्यादिः प्रकृतार्थापेक्षो विभक्तिनियमः ।

सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा ॥

इति भाष्योक्तेः। अत्र तृतीयचरणेनाद्योऽन्तचरणेन च द्वितीयो नियम उक्तः । तदा "अव्ययादाप्सुपः" इति लोपविधानाज्ज्ञापकात् अविशेषेण सुम्मात्रसिद्धिः । यदा तु "द्विबह्वोर्द्विवचनबहुवचने" इति सूत्रं कृत्वा एकस्मिन्नित्यपहाय एकवचनमित्येव पृथक् सूत्र्यते, एवं च कर्मण्येव द्वितीया न करणादौ, द्वित्वबहुत्वयोरेव द्विवचनबहुवचने न त्वेकत्वे इति सजातीयापेक्षो नियमः । तत्राव्ययेभ्यः सर्वा विभक्तयः प्राप्नुवन्ति । उक्तनियमव्यावर्त्यार्थान्तरस्य तत्राभावात् । तत्तद्विभक्त्युत्पत्तौ बाधकाभावात् । तत्रैकवचनमिति सूत्रं नियमार्थम् एकवचनस्य द्विवचनादेश्च प्राप्तौ एकवचनमेव भवतीति ।

यद्वा—कर्मण्येव द्वितीयेति सामान्यापेक्षनियममाश्रित्य कर्मत्वाद्यभावे द्वितीयादेरप्राप्तौ "एकवचनम्" इति सूत्रं विध्यर्थमेव । तस्य च ङ्याप्सूत्रैकवाक्यतया ङ्याबादिभ्यः कर्मा-

दिष्वेकवचनं सिद्धमेवेति सूत्रसामर्थ्याद्व्ययेभ्य एव तत्सिद्धिः। तिङन्तेभ्योऽपि तदुत्पत्तिवारणार्थं च ङ्याप्सूत्रैकवाक्यत्वम्। प्रदेशान्तरे पाठश्च, तदा द्वितीयः पक्षः।

अथ द्वितीया कर्मण्येवेत्यादिः सामान्यापेक्षः प्रत्ययनियमः। प्रथमा प्रातिपदिकार्थएवेति नियमेन च कर्माद्याधिक्यस्थलएव तन्निषेधादव्ययेभ्यः प्रथमैव। "द्व्येकयोः" इत्यादिकं तु यथान्यासमेव। एकत्वे एवैकवचनं न तु द्वित्वादौ इति सजातीयापेक्षः प्रत्ययनिमपक्षः, तदा तृतीयः। अव्ययानां निःसंख्यत्वात्। तेभ्यः प्रथमाया वचनत्रयोत्पत्तावपि स्वस्वार्थसङ्ख्याभिन्नसङ्ख्यायां तदनुत्पत्तिसत्त्वेन नियमविरोधाभावात्।

यदि तु द्वितीयपक्षरीत्या सकलविभक्त्येकवचनप्राप्तौ एकवचनमित्येकत्वविवक्षया प्रथमोपस्थितत्वेन प्रथमैकवचनमेवेति, तदा चतुर्थः।

परं तु आद्यपक्षत्रये पचतिरूपमित्यादावतिव्याप्तिः। प्रथमैकवचनस्यैव तत्रेष्टत्वात्। प्रथमान्तदेवदत्तादिपदसामानाधिकरण्यानुरोधात्। तद्रीत्या च विभक्त्यन्तरस्यापि प्रसङ्गात्। पचतिरूपम् पचन्तिरूपमित्यादावपि द्विवचनाद्युत्पत्तौ प्रयोजनाभावात्। आख्यातादेव द्वित्वाद्युपस्थितिसत्त्वात्। अतोऽन्तपक्ष एव सिद्धान्त इति।

कृन्मेजन्तः ३८।

मान्त एजन्तश्च यः कृत्तदन्तमव्ययसंज्ञं स्यात्। स्वादुंकारं भुङ्क्ते। वक्षे रायः। "स्वादुमि णमुल्"। "तुमर्थे से" इति वचेः सेप्रत्ययः।

इह यदि मेजन्तेन कृतं विशेष्य तदन्तविधिः, तदा उक्तप-

क्षः । यदि तु कृता तदन्तविधिं कृत्वा कृदन्तमित्येतत् मेजन्तेन विशेष्यते, तदा कृदन्तं यन्मेजन्तं तदव्ययसंज्ञं स्यादित्ययं पक्षः । संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावेऽपि "प्रयोजनं सर्वनामाव्ययसंज्ञायाम्" इति वचनात्तदन्तविधिः, अन्वर्थसंज्ञा-बलाद्वा । केवलप्रत्ययस्य प्रयोगानर्हस्य च नानावचनादिरू-पविविधगमनानुपपत्तेस्तन्निषेधायोगात् ।

नन्वाद्यपक्षे कारयाञ्चकारेत्यामन्तस्य संज्ञा न स्यात् । लिटस्तिङादेशाभावेन "कृदतिङ्" इति कृत्संज्ञत्वेऽपि मान्तत्वा-भावात् । आमश्च कृत्संज्ञत्वाभावात् । सत्यम् । स्वरादिषु "आम्" इति पाठेन रूपसिद्धेः ।

अथ तत्र तद्धितस्यैव आमो ग्रहणम्, तदा कृत्त्वात्स्वाद्यु-त्पत्तावपि "आम" इति सूत्रेण लुक्सिद्धिः । न च तत्र लेरि-त्यस्यानुवृत्तिः । प्रयोजनाभावात् । न च तरबादेरपि लुगाप-त्तिः । संख्याकारकादिविषयकोत्थिताकाङ्क्षत्वरूपादपरिसमा-प्तार्थत्वात् तरबादीनामनुत्पत्तेः तदर्थम् अनुप्रयोगस्यावश्य-कतया ऽनुप्रयुज्यमानधातूत्तरोत्पन्नतरबादिनैवामन्तार्थगतोत्कर्ष-प्रतीतेः । अत एव " कृञ्चानुप्रयुज्यते " इत्यत्र व्यवहितनिवृ-त्यर्थं चेति वक्ष्यते ।

यद्वा—पूर्वसूत्रोक्तासिद्धान्तरीत्या सोरेवोत्पत्तौ तस्य हल्-ङ्यादिलोप इति दीक्षिताः ।

अथ द्वितीये प्रतामौ प्रताम इत्यत्रातिव्याप्तिः । प्रत्ययल-क्षणेन कृदन्तत्वात् स्वरूपेण च मान्तत्वादिति चेन्न । स्वरादिषु प्रशाञ्छब्दस्य पाठेन प्रत्ययलक्षणेन कृदन्तत्वमाश्रित्याव्यय-संज्ञा न भवतीति ज्ञापितत्वात् । न च " मो नो धातोः " इति नत्वे कथमेतन्मान्तमिति वाच्यम् । नत्वस्यासिद्धत्वात् ।

न चैवं कारयाञ्चकारेत्यस्यापि आमन्तस्य संज्ञा न स्यात्, प्रत्ययलक्षणेनैव तस्य कृदन्तत्वादिति वाच्यम् । नियमस्य सजातीयापेक्षतया धातोरेव व्यावर्त्तितत्वात् । आमः प्रत्ययलक्षणेन कृदन्तत्वे बाधकाभावात् । न च प्रशानिति शान तेजने इत्यस्य चुरादित्वस्वीकारात्सन्नन्तत्वनियमाभावेन तस्यैव क्विबन्तस्य स्वरादौ पाठ इति कथं ज्ञापकतेति वाच्यम् । ज्ञापकत्वोपन्यासकभाष्यप्रामाण्येन तस्मात् क्विन्प्रत्ययोऽनभिधानान्न भवतीति निर्णयात् । न च गौग्लौनौरित्येतेषामप्यव्ययसंज्ञा स्यादिति वाच्यम्। उणादीनामव्युत्पन्नत्वात् । व्युत्पत्तिपक्षेऽपि "च्विरव्ययम्" इत्युणादिसूत्रेण डोडौप्रत्ययान्ताश्च्व्यन्ता एवाव्ययसंज्ञा इति नियमितत्वात् । नन्वाधये चिकीर्षवे चिकीर्षोः इत्यादीनामप्यव्ययत्वापत्तिरिति चेत् । अत्र वार्तिकम्—

अनिकारोकारप्रकृतिरिति वक्तव्यम् ।

अत्र त्विकारोकारप्रकृतिकत्वान्न दोष इति। यदि त्वेवमपि कुम्भकारेभ्यो नगरकारेभ्य इत्यादावतिव्याप्तिः, तर्हि अनन्यप्रकृतिरिति वक्तव्यम् । तेन आदेशमात्रस्य व्यावृत्तिः ।

भाष्यकृतस्त्वाहुः—"सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य " इति परिभाषाया आवश्यकत्वात् तत एव नातिप्रसङ्गः । सुप्सन्निपातकृतस्य एजन्तत्वस्य तद्विघातकाव्ययसंज्ञाया-मनिमित्तत्वात् । सत्यां हि तस्यां सुलोपापत्त्या एजन्तत्वनिमित्तस्य विघातः स्यादिति ।

अयमर्थः—सन्निपातः संबन्धः लक्षणं निमित्तं यस्य तादृशो विधिः तद्विघातकस्य स्वनिमित्तसंबन्धविघातकस्य कार्यस्य निमित्तं न भवतीति ।

न्यायसिद्धं चैतत् । उपजीव्याविरोधेनैव उपजीवक-

स्य प्रवृत्तेः । न चैवं वह्न्यादेस्तृणादिविघातकत्वं न स्यादिति वाच्यम् । कल्पनाविषयत्वादुक्तन्यायस्य अन्यत्र यथाप्रमाणमेव व्यवस्थापनात् । अत एवानुभवस्य स्मृतिकारणत्वे संस्कारस्य कारणत्वं न सिद्ध्यति । कार्याव्यवहितपूर्ववर्त्तित्वाभावेनानुभवस्य स्मृतिं प्रति कारणत्वानिर्वाहात् तन्निर्वाहार्थमेव संस्कारकल्पनयाऽनुभवकारणतायास्तदुपजीव्यत्वात् । अत एव " कष्टाय क्रमणे " इत्यादिना ह्रस्वांशे सन्निपातपरिभाषाबाध इति सिद्धान्तः । " कृन्मेजन्तः " इत्यादेस्तु स्वाभाविकएजन्तस्थले सावकाशत्वात् नोक्तस्थले एतत्परिभाषाबाधकत्वमिति ।

इदं पुनरवधेयम् । यत्रोपजीव्यतावच्छेदकधर्मो रूपान्तरापत्तावपि नान्यथा भवति, न तत्रोक्तन्यायप्रवृत्तिः । यथा करिष्यसीत्यत्र वलादित्वविशिष्टमार्द्धधातुकमिडागमस्योपजीव्यमिति तद्रूपादिणः परस्य सस्य षत्वं भवत्येव । षत्वे कृतेऽपि तस्य वलादित्वाविघातात् । एवं सर्वेषामित्यादावपि । सकारस्य एत्वनिमित्तत्वेऽपि एकारात्परत्वेन षत्वे कृतेऽपि झलादित्वाविघाताद् । "हलि सर्वेषाम्" इति निर्देशान्नात्र सन्निपातन्यायप्रवृत्तिरिति प्रवादस्तु अभ्युपेत्यैव बोध्यः । यद्रूपावच्छिन्नायां यस्यां व्यक्तौ निमित्तत्वं पर्यवस्यति तद्व्यक्तेरपि विघातो न भवतीत्यर्थं कल्पयित्वाऽनित्यत्वमाश्रित्य समाधेः संदर्भविरुद्धत्वात् ।

प्रसङ्गादस्याः प्रयोजनान्तराण्यप्युपन्यस्यन्ते । अमुनेत्यत्रासिद्धत्वेन मुत्वस्याकारान्तत्वेऽपि घिसंज्ञानिमित्तं नाभावमाश्रित्य " सुपि च " इति दीर्घो न । घिसंज्ञाव्याघातापत्तेः । " न मु ने " इत्यत्र नाभावे कर्त्तव्ये कृते च सति मुभावो नासिद्धः इति व्याख्यानं तु संभवमात्रेण । उक्तरीत्यैव सुस्थत्वात् ।

शकटिपद्धत्यादिभ्यः सप्तम्येकवचनस्य ङेरौकारादेशे तत्सन्नियोगेनेकारस्याकारादेशे च कृते अदन्तलक्षणष्टाप् न भवति । तयोरानन्तर्यस्य विघातापत्तेः । नन्वौकारादेशस्यानन्तर्यप्रयुक्तत्वेऽपि तत्सन्नियोगशिष्टे अत्वेऽपि तथात्वे मानाभाव इति चेत्सत्यम् । अत एवापरितोषात्सप्तमे भाष्यकारेण " औकारादेशो डित्कर्त्तव्य " इत्युक्तत्वान्न दोषः । डित्त्वेन टिलोपे हलन्तत्वेन टापः प्राप्तेरेवाभावात् ।

एवम् "इजादेश्च गुरुमत" इति सूत्रे इयेषेत्यादावपि आम्प्राप्तिमाशङ्क्य "उपदेशवचनात् सिद्धम्" इति वार्तिकं प्रत्याख्यातुं भाष्ये लिट्सन्निपातकृतस्य गुणस्य लिट्सन्निपातविघातकमामं प्रति न निमित्तत्वमित्युक्तम् । " आम " इति लेर्लुक्प्रसङ्गात् ।

एवम् " अचः परस्मिन् " इति सूत्रे पञ्चमीसमासानाश्रयणपक्षे मथितं पण्यमस्येत्यर्थे " तदस्य पण्यम् " इति ठकि तस्य इकादेशे " यस्येति च " इति अकारलोपे च कृते तान्तत्वात्कादेशो न । तस्य हि तान्तत्वं निमित्तम् । तत्र च इकप्रत्ययः । तस्मिन्परे अकारलोपोत्पत्तेः । तस्य कादेशे च तद्विघातापत्तेः । एवमन्यदप्यूह्यम् ।

दाक्षिरित्यादौ इञ्प्रत्ययस्योपजीव्याकारलोपनिमित्तत्वं तु उक्तपरिभाषाया अनित्यत्वादेव । तत्र च प्रमाणं प्रागेवोक्तम् ।

एवं "न यासयोः" इति सूत्रमपि तत्र प्रमाणम् । अन्यथा अकारसन्निपातकृतस्य टापस्तद्विघातकमित्त्वं प्रति निमित्तत्वानुपपत्त्यैव सिद्धौ इत्वनिषेधवैयर्थ्यात् ।

स्यादेतत् । अग्निशब्दोऽव्युत्पत्तिपक्षे फिट्स्वरेण व्युत्पत्तिपक्षे तु प्रत्ययस्वरेणान्तोदात्तः । ततो मतुप् । तस्यान्तोदात्तत्वात् ह्रस्वान्नुटश्च परस्य मतुप उदात्तत्वं स्यादित्यर्थकेन " ह्रस्व-

नुड्भ्यां मतुप्" इति सूत्रेण उदात्तत्वे कृते "अनुदात्तं पदमेकवर्ज्जम्" इति शेषनिघातेन प्रकृतिभागस्यानुदात्तत्वं न स्यात् । तदीयान्तोदात्तत्वस्य मतुबुदात्तोपजीव्यत्वात् । "ह्रस्वनुड्भ्यां मतुप्" इति सूत्रे "अन्तोदात्तादुत्तरपदाद्" इत्यतोऽन्तोदात्तादित्यस्यानुवृत्तेरिति । उच्यते—अनित्यत्वादेवात्र न दोषः । अत एव परमवाचा इत्यत्र "अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे" इति सूत्रेण अन्तोदात्तात्परस्या विभक्तेर्विधीयमानमुदात्तत्वं प्रकृतिभागस्य शेषनिघाते निमित्तं भवत्येव ।

यत्तु स्वरविधौ सन्निपातपरिभाषा न प्रवर्त्तते इति । तच्चिन्त्यम् । प्रमाणाभावात् । तथा हि । गोपायतमित्यत्र गुप् इति धातुस्वरेणान्तोदात्तः । आयप्रत्यय आद्युदात्तः । "सनाद्यन्ता धातवः" इति पुनर्धातुसंज्ञायामन्तोदात्ततया यकाराकार उदात्तः, न तु उकार आकारो वा । "सतिशिष्टस्वरबलीयस्त्वम्" इति न्यायात् । ततः शप्प्रत्ययः । "अनुदात्तौ सुप्पितौ" इत्यनुदात्तः । "अतो गुणे" इति पररूपम् । "एकादेश उदात्तेनोदात्तः" इति अकार उदात्तः । तमादेशो लसार्वधातुकस्वरेणानुदात्तः । "उदात्तादनुदात्तस्य" इति स्वरितः । तमाश्रित्य पूर्वस्य शेषनिघातः प्राप्नोति । सन्निपातपरिभाषया तु न भवति । उदात्तोपजीवकस्य स्वारितस्य तद्विघातकनिघाताप्रवर्त्तकत्वात् ।

यत्तु वदन्ति—यथोद्देशपक्षे शेषनिघातपरिभाषा त्रिपाद्यां न प्रवर्त्तते । अतः शेषनिघाते क्रियमाणे स्वरितस्यासिद्धत्वादेव न शेषनिघात इति तत्र सन्निपातपरिभाषायाः प्रयोजनाभावः । न च तस्या यथोद्देशमेव प्रवृत्तौ मानाभावः । "तव्यत्तव्यानीयरः" इति तव्यतस्तित्करणस्य प्रमाणत्वात् । तथा हि—तव्यमात्रस्यापि प्रत्ययस्वरेणाद्युदात्तत्वे शेषनिघाते च कृते

" उदात्तादनुदात्तस्य " इति स्वरितत्वाविशेषात्, शेषनिघातपरिभाषायाश्च कार्यकालमपि प्रवृत्तौ तस्या " उदात्तादनुदात्तस्य " इत्येतत्समानदेशतया स्वरितस्य शेषनिघातं प्रत्यसिद्धत्वाभावात् निघाते च कृते उभयत्रापि स्वरसाम्यात्तव्यतस्तित्त्वं व्यर्थं स्यात्। तस्या यथोद्देशमेव प्रवृत्तौ तु " उदात्तात् " इति स्वरितस्य शेषनिघातं प्रत्यसिद्धत्वात् तव्यप्रत्यये शेषनिघातो न भवति । तव्यत्प्रत्यये तु " तित्स्वरितम् " इत्यस्य षाष्ठत्वात्तस्य निघातं प्रत्यसिद्धत्वं नास्तीति भवत्येव शेषनिघात इति तित्त्वस्य सार्थक्यमेवेति ।

तदपि चिन्त्यम् । उदात्तोपजीवकस्य स्वरितस्य संनिपातन्यायेन तद्विघातकशेषनिघाताप्रवर्त्तकत्वादेव तव्यप्रत्यये तदप्रवृत्तेः। " तित्स्वरितम् " इत्यस्य तु उदात्तोपजीवकत्वाभावेन शेषनिघातनिमित्तत्वमव्याहतमिति फलभेदस्य स्पष्टतया तित्करणस्य वैयर्थ्याभावेन यथोक्तज्ञापकत्वानुपपत्तेः। सान्निपातपरिभाषायाः स्वरविधावप्रवृत्तिसिद्धिरित्यन्योऽन्याश्रयात् ।

एतेन " यतोऽनावः " इति सूत्रस्य शेषनिघातपरिभाषाया यथोद्देशमेव प्रवृत्तिरित्यत्र ज्ञापकत्वम् । तस्य हि यत्प्रत्ययान्तस्य नौशब्दभिन्नस्य द्व्यच आदिरुदात्त इत्यर्थः । अन्यथा यतस्तित्त्वेन स्वरितत्वात् तमाश्रित्य शेषनिघाते पूर्वस्यानुदात्तत्वमुक्तसूत्रं विनैव स्यात् । आद्युदात्ते कृतेऽपि शेषनिघातेनानुदात्तत्वे "उदात्तादनुदात्तस्य" इति स्वरितत्वे च कृते शेषनिघातेन पूर्वस्यानुदात्तत्वमेव भवतीति विशेषाभावात् " यतोऽनाव " इति सूत्रं व्यर्थमेव स्यात्। शेषनिघातपरिभाषाया यथोद्देशमेव प्रवृत्तौ तु " उदात्तादनुदात्तस्य" इत्यस्य शेषनिघातं प्रत्यसिद्धत्वाच्छेषनिघातो न भवतीति

सूत्रसार्थक्यमित्यपि परास्तम् ।

त्रैपादिकस्य स्वरितस्य उदात्तोपजीवकत्वेन तद्विघातक-शेषनिघातं प्रत्यप्रवर्तकतया सूत्रारम्भे फलभेदस्य सत्त्वात् । "अनावः" इति पर्युदासस्य विधेयं विनाऽनुपपत्त्या त-दर्थतयैव सूत्रसार्थक्याच्च । तस्मात्सन्निपातपरिभाषाया अनि-त्यत्वेनैव सर्वेष्टसिद्धौ शेषनिघातपरिभाषाया यथोद्देशमेव प्र-वृत्तिरिति नियमकल्पनमप्रामाणिकमेव । अत एव शब्द-कौस्तुभेऽप्यत्रैव सूत्रे अग्निमानित्यत्र सन्निपातपरिभाषाया अ-नित्यत्वादेव शेषनिघात इत्युक्तम् । तस्मादुक्तमनोरमादिग्रन्था निर्युक्तिका एवेति दिक् ।

क्त्वातोसुन्कसुनः ३९।

एतदन्तमव्ययसंज्ञम् । कृत्वा । पुरा सूर्यस्योदेतोः । पुरा वत्सानामपाकर्त्तोः । उदयादपाकरणाच्चेत्यर्थः । "भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्" । "पुरा क्रूरस्य विसृपो विरप्शिन्" "पुरा जत्रुभ्य आतृदः" । "सृपितृदोः कसुन्" इति कसुन् । द्वावेतौ छान्दसौ ।

अव्ययीभावश्च ४०।

अव्ययसंज्ञः स्यात् । परिगणनं कर्तव्यम् ।

लुकि मुखस्वरोपचारयोर्निवृत्तौ चेति ।

लुकि यथा—उपाग्नि । प्रत्यग्नि । "अव्ययादाप्सुपः" इति सुपो लुक् । मुखस्वरनिवृत्तौ यथा—उपाग्निमुखः । प्रत्यग्निमुखः । "मुखं स्वाङ्गम्" इति उत्तरपदस्याद्युदात्तत्वे प्राप्ते "नाव्य-यदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः" इति निषेधः । ततश्च

उपाग्नि अग्निसमीपे मुखं यस्येति उपाग्निमुख इत्यत्र "बहुव्रीहौ प्रकृत्या" इति पूर्वपदे प्रकृतिस्वर एव। स च समासत्वादन्तोदात्तः। विसर्गादेशस्य सकारस्य उपचारेति पूर्वाचार्यसंज्ञा। तन्निवृत्तौ यथा—उपपयःकारः। उपपयःकामः। "अतः कृकमि" इति सत्वे प्राप्ते "अनव्ययस्य" इति पर्युदासः। परिगणनं किम्। उपाग्न्यधीयान। पराङ्गवद्भावेन षाष्ठम् "आमन्त्रितस्य च" इत्याद्युदात्तत्वम्। अन्यथाऽव्ययानां पराङ्गवद्भावप्रतिषेधात्तन्न स्यात्। उपाग्निकमित्यादौ "अव्ययसर्वनाम्नाम्" इत्यकज् न। उपकुम्भम्मन्य इत्यत्र "अरुर्द्विषद्" इति मुम्। अन्यथा "अनव्ययस्य" इति प्रतिषेधः स्यात्। उपकुम्भीभूतः "अस्य च्वौ" इत्यत्राव्ययानामुपसंख्यानप्रतिषेधो न।

इदमवधेयम्। नाव्ययीभावादिति विशेषनिषेधादेव लुक् सिद्धः।"अतः कृकमि"इत्यत्र "अनुत्तरपदस्थस्य" इत्यनुवृत्त्यैव न सत्वम्। अतो मुखस्वरनिवृत्तिरेव प्रयोजनम्।

तत्र केचित्। मुखस्वर इष्ट एव। यत्रैतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयाद् "नाव्ययादव्ययीभावाच्च" इति भाष्यस्वारस्यात्।

अन्ये तु अनव्ययमव्ययं भवतीत्यन्वर्थसंज्ञाविज्ञानादेव मुखस्वरनिवृत्तिर्भविष्यतीति सर्वथाऽपि सूत्रमिदमनारभ्यम्। एवं "तद्धितश्च" इत्यादिसूत्रचतुष्टयमपि। स्वरादौ हि तासिलादिस्तद्धित एधाच्पर्यन्त इत्यादिरव्ययार्थश्चेत्यन्तेन औणादिकमासिं विहाय "तद्धितश्च" इति सूत्रस्यार्थः संगृहीतः, कृन्मकारसन्ध्यक्षरा इत्यनेन "कृन्मेजन्तः" इत्यस्य।

शि सर्वनामस्थानम् ४१।

जश्शसोरादेशः शीत्येतदुक्तसंज्ञम्। वारीणि। "सर्वना-

मस्थाने चासम्बुद्धौ ” इति दीर्घः । प्रदेशेष्वेव शिसुटोरित्युक्तौ तु नपुंसकेऽपि स्यात् । न च शिग्रहणसामर्थ्यम् । शसर्थत्वेनोपक्षयात् । तस्मात्संज्ञाऽऽरम्भ आवश्यकः । तस्या महत्त्वं तु पूर्वाचार्यसंप्रदायात् ।

सुडनपुंसकस्य ४२ ।

नपुंसकभिन्नप्रकृतिकानि स्वादिपञ्चवचनान्युक्तसंज्ञानि । राजा । राजानौ । राजानः । राजानम् । राजानौ । प्राग्वद्दीर्घः । अनपुंसकस्य किम् । सामनी । “विभाषा ङिश्योः” इत्यल्लोपाभावे संज्ञाविरहान्न दीर्घः । पर्युदासः किम् । नपुंसके विधिप्रतिषेधाभावाभ्यां पूर्वसूत्रेण प्राप्ता संज्ञा यथा स्यात् । तेन वनानीत्यादि सिद्धम् । न च तदारम्भसामर्थ्यम् । शसादेशे चरितार्थत्वात् ।

यद्वा प्रतिषेध एवायम् । न चोक्तदोषः । “ अनन्तरस्य विधिर्वा निषेधो वा ” इति तदभावात् । अन्यथा “सुट् स्त्रीपुंसयोः” इति प्रतिपत्तिलाघवार्थं ब्रूयात् । “ अनपुंसकस्य ” इति वचनेषु केषाञ्चिन्नञ्समासानामसामर्थ्येऽपि साधुत्वं ज्ञाप्यते । तेनाश्राद्धभोजीत्यादि सिद्धम् । असमर्थसमासो वाक्यभेदश्चेति गौरवं तु न दोषः । फलमुखत्वात् ।

नवेति विभाषा ४३ ।

निषेधविकल्पयोर्विभाषा संज्ञा स्यात् । इतिशब्दस्योभयान्वितत्वात् । स च पदार्थविपर्यासकृत् । लोके हि गवादिशब्दा अर्थपरा इतिकरणेन गौरित्याहेत्यादौ शब्दपराः सम्पद्यन्ते ।

व्याकरणे तु "स्वं रूपं शब्दस्य" इति परिभाषणात् स्वरूपपरत्वमुत्सर्गः, इतिकरणेन तु अर्थपरत्वमिति विशेषः। तस्मादर्थ एवात्र संज्ञा संज्ञी च। न च नवेत्यखण्डनिपातार्थस्य निषेधमात्रस्य संज्ञित्वापत्तिः। "विभाषा दिक्समासे" इति ज्ञापकात्। अन्यथा "न बहुव्रीहौ" इत्येव सिद्धेः। इतिशब्दाभावे तु "विभाषा श्वेः" इत्यादौ नवेतिशब्द एवादेशः स्यात्। अर्थस्य संज्ञात्वाद् अन्यतरस्याम् इत्यादिस्थलेऽपि वक्ष्यमाणरीत्या वैरूप्योद्धारः। तथा हि—उभयत्र विभाषायामेवास्योपयोगो नान्यत्र। "विभाषोपपदेन प्रतीयमाने" इति प्राप्तविभाषायाम् "स्वरितञितः" इत्यादिना नित्यमात्मनेपदे प्राप्ते पक्षे तन्निवृत्तिमात्रस्य विधेयत्वात्पक्षे भवतीत्यस्यानुवादत्वात्। "विभाषोर्णोः" इत्यप्राप्तविभाषायां च प्रौर्णुवीत्यत्र परत्वात् "सार्वधातुकमपित्" इति नित्यङित्त्वाभ्युपगमात् प्रौर्णवितेत्यादौ तदभावांशस्य स्थितत्वाद्भावांशमात्रस्य विधेयत्वात्। "विभाषा श्वेः" इत्युभयत्र विभाषायां तु विधिमुखेन प्रवृत्तौ पित्स्वेव विकल्पः स्यात्। कित्सु तु यजादित्वान्नित्यमेव सम्प्रसारणं स्यात्। निषेधमुखेन प्रवृत्तौ तु कित्स्वेव विकल्पः स्यात्, न तु पित्सु। तत्र प्रसक्तिविरहात्। उभयथा प्रवृत्तौ तु वैरूप्यलक्षणो वाक्यभेदः स्यात्। संज्ञारम्भे तु श्रुतक्रमवशान्नेति निषेधस्य प्रथमं कित्सु प्रवृत्तिः। ततः किदाकिति सर्वस्मिन् लिटि ऐकरूप्यापन्ने सति पक्षे भवतीति विधिमुखेनैव विकल्पः प्रवर्त्तत इति न वैरूप्यम्। आकृतौ पदार्थे समुदाये सकृल्लक्षणप्रवृत्त्या सूत्रमेतत्। व्यक्तिपक्षे तु "विभाषा श्वेः" इत्यादेः प्रतिलक्ष्यं भिन्नत्वात् क्वचिद्विधिमुखेन क्वचिच्च निषेधमुखेन प्रवृत्तिः। लक्षणभेदेन वैरूप्याभावादि-

त्यनारभ्यम् । तथा च वार्त्तिकम्—

अशिष्यो वा विदितत्वादिति ।

अत्र वदन्ति । आकृतिपक्षेऽपि प्रदेशेष्वेव " न वा श्वेः " इत्यादि पठनीयम् । अन्यथा अन्यार्थमप्यारब्धा संज्ञा "विभाषोर्णोः " इत्यत्र प्रवर्त्तेत । प्रतिषेधानां च बलीयस्त्वात् । प्रौर्णुवीत्यत्रापि प्रथमं ङित्त्वनिषेधः, ततश्च विकल्पः स्यात् इति ।

वस्तुतस्तु । "विभाषा" इत्येव प्रदेशेषु पठनीयम् । संज्ञापक्षेऽपि प्रथमं निषेधस्ततो विकल्पः प्रवर्त्ततइत्यावृत्तिलक्षणवाक्यभेदसत्त्वात् ।

अत्र भाष्यकृता " ग्रो यङि " " अचि विभाषा " इति वचनमप्राप्तविभाषासु पठितम् । तत्र प्रत्यवतिष्ठन्ते—त्रिसंशया इत्युपक्रमात् प्राप्तेऽप्राप्ते उभयत्र वेति संशयविषयीभूतविभाषाणामेव व्युत्पाद्यत्वाद् अत्र कोटित्रयस्योक्तिसम्भवाभावः । तथा हि—निजेगिल्यतइत्यत्र नित्यं लत्वम्, न तु विभाषाप्रसक्तिरिति न प्राप्तविभाषाऽवसरः । न च यङीत्यनुवर्तनाद्यङ्निमित्तस्य रेफस्याचि परे लत्वमिति व्याख्यानात्तत्सम्भव इति वाच्यम् । निजेगिर् य अच् इति स्थिते " ग्रो यङि " इत्यस्य प्राप्तिसमये अच्परत्वाभावेन विभाषाप्राप्त्यभावात् । न च विभाषारम्भसामर्थ्यात् यङ्लुकः पूर्वम् " ग्रो यङि " इति न प्रवर्त्ततइति कल्प्यम् । तथाऽपि उभयत्र विभाषात्वस्य दुर्लभत्वात् । विभाषाया गिरति गिलतीत्यादौ चरितार्थतया " ग्रो यङि " इत्यस्य यङ्लुकः प्रागेव प्रवृत्तेरुभयोरसमानकालीनत्वात् । न च लत्वस्यासिद्धतया दुर्बलत्वात्तत्पूर्वमेव लुगिति वाच्यम् । अन्तर्भूतयङपेक्षत्वेनान्तरङ्गलत्वं प्रति बहिर्भूतप्रत्ययापेक्षस्य लुकोऽसिद्धत्वात् । पूर्वाभावेन "पूर्वत्रा-

सिद्धम्" इत्यस्याप्रवृत्तेः ।

अत्राहुः—प्राप्तविभाषात्वमुक्तरीत्यैव । अप्राप्तविभाषात्वं त्वित्थम्–" अन्तरङ्गानपि " इति न्यायेन लत्वात्पूर्वं लुक् । न च लुग्निमित्तादच्प्रत्ययात्पूर्वमेव लत्वं स्यात्, तस्य कर्तृरूपार्थापेक्षत्वेन बहिरङ्गतयाऽसिद्धत्वात् पूर्वाभावे पूर्वत्रासिद्धत्वस्याप्रवृत्तेरिति वाच्यम् । कृतितुग्विधिग्रहणेन बहिरङ्गपरिभाषाया अनित्यत्वज्ञापनात् । धर्मिग्राहकमानेन लुक इव तदुपजीव्यानां समासप्रत्ययादीनामपि प्राबल्यसिद्धेश्च ।

ननु तथाऽपि निजेगिर् अच् इत्यत्र लत्वं दुर्लभम् । यङ्परत्वाभावात् । प्रत्ययलक्षणस्य च " न लुमता " इति निषेधात् । न च लत्वस्याङ्गाधिकारबहिर्भावान्न तत्प्रवृत्तिरिति वाच्यम् । अङ्गाधिकारबहिर्भूतं तदन्तर्भूतं वा वस्तुगत्या अङ्गस्य यत्कार्यं प्राप्नोति तन्न भवतीति तदर्थात् । तत् कथमुभयत्र विभाषासम्भव इति चेन्न । पृथगल्लोपाश्रयेण " अचः परस्मिन् " इति स्थानिवद्भावसम्भवात् । पूर्वत्रासिद्धे न स्थानिवदित्यस्य " तस्य दोषः संयोगादिलोपलत्वणत्वेषु " इति निषेधात् । न च तथाऽपि उभयत्र विभाषाऽनुपपत्तिः, " ग्रो यङि " इत्येतत् प्रति " अचि विभाषा " इत्यस्यासिद्धत्वात् न विप्रतिषेध इति वाच्यम् । "न मु ने" इत्यत्र नेतियोगविभागात् ।

यद्वा–योगे योगो नासिद्धः, किं तु "प्रकरणे प्रकरणम्" इत्याश्रयणात् । समुदायलोपपक्षे तु अजपेक्षयाऽन्तरङ्गत्वान्नित्यं लत्वमिति बोध्यम् । उक्तिसम्भवसमर्थनमात्रं चैतत् । सिद्धान्ते तु विभाषाया असिद्धत्वादेव नित्यं लत्वम् ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमाध्यायस्य प्रथमे पादे षष्ठमाह्निकम् ।

इग् यणः संप्रसारणम् ४४ ।

यणः स्थाने इग्भवतीत्येवंरूपो वाक्यार्थो, यण्स्थानिक इग्रूपो वर्णश्चेत्युभयं सम्प्रसारणसंज्ञम् । " ष्यङः सम्प्रसारणम् " इत्यादिविधिस्थले वाक्यार्थस्य ग्रहणम्, " सम्प्रसारणाच्च " इत्याद्यनुवादस्थले तु वर्णस्येति भेदः। इतिशब्दानुवृत्तेर्वाक्यार्थस्य संज्ञित्वम् । तदनारम्भे तु वाक्यस्यैव संज्ञा । न च तस्यैव विधेयत्वापत्तिः । "वाह ऊठ्" संप्रसारणमिति सामानाधिकरण्येन तदर्थस्यैव विधेयत्वात् । "ष्यङः सम्प्रसारणम्" इत्यादौ च उक्तज्ञापकस्य सामान्यापेक्षत्वकल्पनात् । न चैकवाक्ये वाक्यस्य तदर्थस्य वा संज्ञाऽस्तु, वर्णस्य तु कथमिति वाच्यम् । तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणात् । न च तत्र मानाभावः। विधेयानुवाद्यसमर्पकविभक्त्या सूत्रनिर्देशस्य तथात्वात्। तदुक्तम्—

विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्येति ।

हरिणाऽप्युक्तम्—

संप्रसारणसंज्ञायां लिङ्गाभ्यां वर्णवाक्ययोः ।
प्रविभागस्तथा सूत्रएकस्मिन्नेव जायते ॥

तथा " द्विर्वचनेऽचि " इति तन्त्रावृत्त्यादिलक्षणः एकशेषेण निर्देशो भाष्य एव समर्थितः । तन्त्रं द्विधा—शब्दतन्त्रमर्थतन्त्रं च । अर्थभेदाच्छब्दभेदे आद्यम् । शब्दैक्ये द्वितीयम् ।

यद्वा—वाक्यार्थ एव संज्ञी, अनुवादे तु तन्निर्वर्त्ये वर्णे लक्षणा।

अथ वा "वर्ण एव संज्ञी । विधिप्रदेशे सूत्रशाटकवद् भाविसंज्ञाऽऽश्रयणीया " इति भाष्यम् ।

अथ अवुहितरामित्यत्र लकारस्थाने उत्तमपुरुषस्यैकवच-

नमिट्, तस्य यण्स्थानिकत्वेन संप्रसारणसंज्ञायां "हलः" इति दीर्घोक्तिः। तरपं प्रति तिङन्तस्याङ्गत्वात्। अत्राहुः—

यथासंख्याश्रयणाद्यकारस्थानिकस्यैव इकारस्य संप्रसारणसंज्ञेति।

तथा हि—वाक्यार्थः संज्ञीति पक्षे तस्योद्देश्यविधेययोः संसर्गरूपतया यथासंख्यपरिभाषोपस्थितौ यणः स्थाने इक् स्याद्यथासंख्यमित्यवान्तरवाक्यार्थः। स संप्रसारणसंज्ञः स्यादिति महावाक्यार्थः। न चावान्तरवाक्यार्थं गृहीत्वा याति वातीत्यादावतिप्रसङ्गः। तस्य संज्ञासंबन्धमात्रे तात्पर्यात्। अन्यथा "ष्यङः संप्रसारणम्" इत्यादिवैयर्थ्यात्। अदुहीत्यादेस्तज्जत्वाभावाच्च। उभयसंज्ञापक्षेऽपि उपस्थितत्वाद्यथासंख्यप्रवृत्तवर्णस्यैव संज्ञित्वात्। इदं च कर्मकर्त्तरि शुद्धे कर्त्तरि वा रूपम्।

वर्णसंज्ञापक्षे तु न यथासंख्यम्। अनुवादे परिभाषाऽनुपस्थानात्। न चैवं स्थानेयोगोऽपि न स्यादिति वाच्यम्। "षष्ठी स्थानेयोगा" इत्यत्रानुवर्त्यास्य व्याख्येयत्वात्। तदुक्तम्—

सिद्धं तु षष्ठ्यधिकारे वचनादिति।

यद्वा—सिंहावलोकितन्यायेनात्रैव स्थानग्रहणमपकृष्यताम्, संप्रसारणस्येत्यत्र तन्त्रादिना तद्भावितग्रहणात्।

अथ वा कार्यकालपक्षे यणः संप्रसारणमिग्भवतीति वाक्यार्थान्नानुवादत्वमिति। यथासंख्यपरिभाषोपस्थितौ तत्प्रवृत्त एव वर्णः संज्ञी, स एव "संप्रसारणस्य" इत्यादावुपतिष्ठते।

अथ वा लौकिकन्यायसिद्ध एव स्थानक्रमेण संबन्धोऽनुवादेऽपि सुलभ इति द्युभ्यामित्यत्र "हलः" इति दीर्घो न। "दिव उत्" इति तपरकरणात्। एवं द्युलोक इत्यत्र "संप्रसार-

१ अदुहीति।

णस्य" इति दीर्घो न। न च दीर्घप्रवृत्त्या चरितार्थस्य तपरत्वस्य "भाव्यमानोऽप्युकारः सवर्णग्राहकः" इत्यत्र कथं ज्ञापकत्वमिति वाच्यम् । वाक्यार्थः संज्ञीति पक्षेण तदुक्तेः । "संप्रसारणस्य" इत्यत्र तद्भावितग्रहणाद्वा ।

पक्षान्तरे तु "ऋत उद्" इति ज्ञापकम् । न चाक्षद्युवौ अक्षद्युव इत्यादौ ऊठः संप्रसारणसंज्ञायां "संप्रसारणाच्च" इति औकारादेः पूर्वरूपापत्तिः । "संप्रसारणपूर्वत्वे समानाङ्गग्रहणम्" इति वार्त्तिकोक्तेः किन्निरूपिताया अङ्गसंज्ञाया धातुमात्रे विभक्तिनिरूपितायास्तु समासरूपे समुदाये विश्रान्तत्वात् । वार्णादाङ्गस्य बलवत्त्वाच्च । वाक्यार्थः संज्ञीति पक्षे तु पूर्वरूपप्रसक्तेरेव विरहात् । हूतो जीन इत्यादौ तु "हलः" इतिसूत्रसामर्थ्यात्संप्रसारणनिर्वृत्तस्यादेशेऽपि दीर्घः ।

वर्णः संज्ञीति पक्षेऽपि अल्विधौ स्थानिवद्भावासंभवादारम्भसामर्थ्यात्संप्रसारणादेशे कार्यप्रवृत्तेर्वाच्यत्वात् ।

आद्यन्तौ टकितौ ४५ ।

टित्कितौ यस्य विहितौ तस्य क्रमादाद्यन्तावयवौ स्तः । भविता । पाययति । न च "चरेष्टः" "गापोष्टक्" "व्रीहिशाल्योर्ढक्" इत्यादावतिप्रसङ्ग इति वाच्यम् । पुरस्तादपवादन्यायेन स्थानेयोगापवादस्यास्य "प्रत्ययः" "परश्च" इत्यनेन परेण बाधात् । परिभाषेयम् । परेण परिभाषाप्रकरणेन साहचर्यात् । यद्वा—

संज्ञैवेति भाष्यम् ।

तथा हि—टकिताविति कर्मधारयः । इत्संज्ञकौ टकारककारावाद्यन्तयोः संज्ञे स्तः । तेन "आर्द्धधातुकस्येड् वलादेः"

इत्यत्र इकारादिशब्दस्योपस्थितिः । इकारादिरिति बहुव्रीहौ इकार आदिर्यस्येति विग्रहः । स्थानेऽन्तरतमपरिभाषया तव्यस्य इतव्यादेशे सिद्धम् । तदाहुः—

अनागमकानां सागमका आदेशा भवन्तीति । एवं यापयतीत्यत्र या इत्यस्य याप् इत्यादेशः । न च "आद्यन्तौ टकितौ" इत्येवास्तु संज्ञायाः संज्ञिमत्यायकत्वमात्रेण स्वयं कार्यानन्वयादिति वाच्यम् । "आलजाटचौ" "ठस्येकः" इत्यादावतिप्रसङ्गात् । इत्संज्ञया तु देशविशेषस्योपलक्षणम् । तेन इत्संज्ञकस्य यो देशस्तत्रावस्थितौ टकारककारौ संज्ञे । आटचष्टकारः इकादेशस्य ककारश्च न तथेति न दोषः । न च अडागमस्थले भू इत्यस्य अभू इत्यादेशः स चोदात्त इत्यर्थे अलोऽन्त्यपरिभाषया अङ्गस्य अन्तोदात्तत्वं स्यादिति वाच्यम् । अ ट् उदात्तश्च यस्येति त्रिपदबहुव्रीहिणा उदात्ताकारादिरभू इत्यादेश इति व्याख्यानात् । उदात्तपदस्य विशेषणत्वेऽपि सौत्रः परनिपातः । न च तथाऽपि "आडजादीनाम्" इत्यत्र दोषः । उदात्तपदानुवृत्तावपि तेन सह श्रूयमाणस्याटो बहुव्रीह्ययोगादिति वाच्यम् । तत्सूत्रस्य प्रत्याख्यानात् । वक्ष्यति च वार्तिककृत्—

अजादीनामटा सिद्धमित्यादि ।

मिदचोऽन्त्यात्परः ४६ ।

अचां मध्ये योऽन्त्यादचः परो मित् स्यात् । स्थानेयोगस्य "परश्च" इत्यस्य चापवादः । वनानि । यशांसि । "रुधादिभ्यः श्नम्" । रुणद्धि । न च पूर्ववदस्य "परश्च" इत्येतद्बाधकत्वानापत्तिः । बाध्यसामान्यचिन्तायां स्वविषये प्राप्तं सर्वं बाध्यत-

इत्यभ्युपगमात् । अन्यथा श्नमो मित्त्ववैयर्थ्यात् । "तृणहः" इति निर्देशेन मकारस्य श्रवणार्थत्वानुपपत्तेः । अच इति निर्द्धारणे षष्ठी । जातावेकवचनम् । न चाच इति पञ्चम्येव, अन्त्यादिति पञ्चम्यन्तसामानाधिकरण्यादिति वाच्यम् । "शे मुचादीनाम्" इत्यादावन्त्यस्याचोऽसम्भवेन एतदप्रवृत्तौ अलोऽन्त्यपरिभाषायाः प्रवृत्त्यापत्त्या मित्त्ववैयर्थ्यात् । एवं चान्त्यादचः परो मित्स्यादिति प्राचां वृत्तिरप्येवमेव व्याख्येया ।

अन्ये तु तत्राच इति अस्तु पञ्चम्येव । किं तथा सति सर्वथैव नुम् न स्यादिति विवक्षितम् उतेष्टदेशे न स्यादिति । नाद्यः । वचनवैयर्थ्यात् । नान्त्यः । अन्त्यबाधेऽप्यचः परत्वसंभवात् । प्रधानबाधापेक्षया गुणबाधस्यैव कल्पयितुमुचितत्वादिष्टसिद्धेरिति । एतेन अजंशवैकल्येऽपि प्रवृत्तिः स्यादित्यपि निरस्तम् । अचो विशेष्यत्वात्तद्वैकल्ये प्रवृत्त्यनापत्तेरित्याहुः ।

पूर्वसूत्रे द्वन्द्वनिर्दिष्टस्यापि अन्तग्रहणस्यात्रानुवृत्तेर्मित् पूर्वान्तः । अभक्तत्वे तु "ता ता पिण्डानाम्" इत्यादौ "शेश्छन्दसि बहुलम्" इति शिलोपे नलोपो न स्यात् । प्रातिपदिकान्तत्वाभावात् । वहंलिह इत्यत्र मुमो मकारस्यानुस्वारो न स्यात् । अपदान्तत्वात् । आदिग्रहणानुवृत्त्या परादिरिति व्याख्याने तु वारिणे इत्यादौ "घेर्ङिति" इति गुणः स्यात्, वहंलिह इत्यनुस्वारो न स्यात् । अतिशयितः सखा येषां तानि अतिसखीनि ब्राह्मणकुलानि । अत्र "सख्युरसंबुद्धौ" इति णित्त्वाद्वृद्धिः स्यात् । न च गौणत्वात्तदभावः । गौणत्वेऽपि तत्प्रवृत्तेः । "अस्थिदधि" इत्यादिवत् । एवं त्रपूणीत्यादौ अङ्गस्य नान्तत्वाभावात् "सर्वनामस्थाने च" इति दीर्घो न स्यात् । तस्मात्पूर्वान्तपक्षः साधुः । अत्र वार्तिकम्—

अन्त्यात्पूर्वो मस्जेरनुषङ्गसंयोगादिलोपार्थम् ।

मग्नः । मग्नवान् । "ओदितश्च" इति निष्ठानत्वं तस्यासिद्धत्वात्कुत्वम् । "मस्जिनशोर्झलि" इति नुम्, तस्य त्वन्त्यादचः परत्वे "अनिदिताम्"इति अनुषङ्गलोपो न स्यात् । अनुषङ्ग इति नकारस्योपधायाः प्राचां संज्ञा । न च "स्कोः" इति सलोपे नकारस्योपधात्वाल्लोप इति वाच्यम् । तं प्रति सलोपस्यासिद्धत्वात् । बहूनां समवाये समुदायस्यैव संयोगसंज्ञेति पक्षे सकारस्य संयोगादित्वाभावाच्च । एवं मङ्क्ता मङ्क्तव्यमित्यादि बोध्यम् । "भर्जिमर्च्योश्च" अन्त्यात्पूर्वो मिदित्यनुवर्त्तते । भृजी भर्जने । औणादिके अचि कृते उमागमः । भरुजा । मर्च शब्दे चुरादिः । औणादिक इप्रत्ययः । ईमागमः । मरीचिः । निपातनात् सिद्धम् । उक्तवार्त्तिकप्रत्याख्यानमिदम् । अङ्गुल्यादिषु भरुजाशब्दस्य बाह्वादिषु च मरीचिशब्दस्य पाठात् । "मृकणिभ्यामीचिः" मरीचिः इति तूपायान्तरम् ।

एच इग् ह्रस्वादेशे ४७ ।

आदिश्यतइत्यादेशः । ह्रस्वेन कर्मधारयः । निर्द्धारणे सप्तमी । जातावेकवचनम् । आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात् । हेशब्दमतिक्रान्तं अतिहि कुलम् । चित्रगुः । अतिरि । अतिनु । संध्यक्षरान्तरतमस्य ह्रस्वस्याभावे एकदेशसादृश्येन प्रसक्तयोरिवर्णोवर्णयोर्निरासार्थमेतत् । वार्त्तिककारस्त्वाह—

सिद्धमेङः सस्थानत्वाद्, ऐचोश्चोत्तरभूयस्त्वादिति ।

अयमर्थः—शब्दपरविप्रतिषेधादेङ उत्तरभागान्तरतमौ इउवर्णावेव । तथा च षष्ठे कैयटः—

विप्रतिषेधे परं कार्यमिति नायं नियमो लक्षणयोर्विप्रतिषेधे परं भवतीति किं तर्हि एकलक्षणविहितयोरपि कार्ययोर्विप्रतिषेधे परशब्दविषयत्वात्परं कार्यं भवतीत्येषोऽप्यर्थ आश्रीयते इति ।

यद्वा--एकारः शुद्धतालव्य ओकारस्तु शुद्धौष्ठ्यः इति मते सिद्धम् । तथा च बह्वृचप्रातिशाख्यम्—

तालव्यावेकारचवर्गाविकारैकारौ यकारः शकार इति, शेष ओष्ठोपपाद्य इति च ।

पूर्वोक्तभिन्नो वर्णराशिरोष्ठाभ्यामुपपाद्यः । उकारः पवर्ग ओदौतौ उपध्मानीयश्च ओष्ठ्या इति वृत्तिकृत् । "शेष ओष्ठ्योऽपवाद्य" इति तद्भाष्ये पाठः । उत्तरसूत्रे वक्ष्यमाणान्विहायेत्यर्थः । स्पष्टार्थश्चेदम् । ऐक्षु समाधानान्तरमप्याह वार्तिककारः— ऐचोश्चेति । उत्तरभूयस्त्वाच्चेत्यन्वयः । अर्द्धमात्रा अवर्णस्य सार्द्धमात्रा त्विवर्णोवर्णयोरिति पक्षे मल्लग्रामादिवद् भूयसा व्यपदेशादपीकारोकारावादेशौ इति प्रकृतसूत्रमनारभ्यमिति । समप्रविभागपक्षोऽप्यष्टमे स्थितः, तत्र पूर्वोक्तसमाधानद्वयमेव ।

षष्ठी स्थाने योगा ४८ ।

योगोऽस्त्यस्या इत्यर्श आदित्वादच् भूमार्थे । अनेकसम्बन्धपरतया सम्भाव्यमानेति यावत् । अयोगेति छेदे त्वनिर्द्धारितसम्बन्धविशेषा षष्ठी स्थानप्रयुक्तसम्बन्धपरा बोध्या । स्थानं प्रसङ्गः । दर्भाणां स्थाने शरैः प्रस्तरितव्यमितिवत् । अस्तेर्भूः समीपोऽनन्तरो वेति संशये तत्स्थाने उच्चारणीय इत्यर्थात्सामीप्यादिनिवृत्तिः । योगेति किम् । " ऊदुपधाया

गोहः " " शास इदङ्हलोः " इत्यादौ मा भूत् । अन्यथा गोहिशासोः स्थाने धातुमात्रस्योपधाया ऊदितौ स्याताम् ।

यद्वा—स्थानेयोगेत्येकं पदम् । पूर्वपदे सप्तम्या तृतीयया वा बहुव्रीहिः । निपातनादलुगेत्वं वा । न च गोहः शास इत्यादावतिप्रसङ्गः । अनियमप्रसक्तौ नियमार्थमेव परिभाषाप्रवृत्तेः । उपधासन्निधानेन अवयवषष्ठीत्वनिर्णयादाकाङ्क्षाविरहात् । मार्गप्रश्ने वामदक्षिणपुरस्कारेण मार्गोपदेशेऽपि मार्गद्वैधस्थल एव तदुपस्थितेः ।

भाष्यकृतस्त्वाहुः—लक्ष्यानुरोधादन्तरङ्गत्वात् स्थानिवदादेश इति ज्ञापकाच्च इष्टस्थले स्थानेयोगत्वव्याख्यानसम्भवान्नायमेतद्वाक्यार्थः, किं तु षष्ठ्यन्तमुच्चार्यमाणमेव स्थानेन युज्यते, न तु प्रतीयमानमित्येव । तदुच्यते—

निर्दिश्यमानस्यादेशा भवन्ति इति ।

तेन "जराया जरस्" इत्यादौ जराशब्दान्तं यदङ्गं तदवयवस्य जराशब्दस्य जरसादेशो न तु निरित्यस्यापीति ।

यत्तु जराशब्दोत्तरषष्ठ्या स्वप्रकृत्यर्थभूतजराशब्दनिष्ठमेव स्थानित्वं बोध्यते, न तु निर्जरादिशब्दनिष्ठम् । तस्य प्रकृत्यर्थत्वाभावात् । न च तदन्तपरिभाषया सोऽपि प्रकृत्यर्थ इति वाच्यम् । जराशब्दरूपस्याङ्गस्य स्थाने इत्यर्थमुपजीव्य तत्प्रवृत्त्या तदविरोधेन अवयवद्वारैव निर्जरादिशब्दानां स्थानित्वस्य बोध्यत्वात् । अत एव " उदोष्ठ्यपूर्वस्य " इत्यादावोष्ठ्येत्यादिकं पदार्थैकदेशे ऋकारादौ विशेषणम् । अत एव सागमकस्य नादेशः । प्रक्रियादशायाम् "अनागमकानां सागमका आदेशा भवन्ति" इत्यस्यानुचितत्वात् । स्थानिवद्भावे तु स्थानिबुद्ध्यैव कार्यप्रवृत्त्या न निर्दिश्यमानस्येतिन्यायबाधः ।

अस्तु वा भाष्योक्तरीत्योक्तसूत्रनिष्पन्ना वाचानिकी "निर्दिश्यमानस्य" इति परिभाषा । सा च बहिरङ्गपदाङ्गाधिकारेत्यादीनां बाधिकेति ।

तच्चिन्त्यम् । तदन्तस्य स्थानित्वबोधनेऽपि जरारूपस्याङ्गस्य स्थानित्वबाधावश्यकत्वाद् उपजीव्यविरोधस्य दुर्वारत्वात् । वार्त्तिकमते जराशब्दान्तस्यैवाङ्गस्य स्थानित्वं व्यपदेशिवद्भावेन केवलजराशब्दस्याप्यादेशसिद्धेरिति सिद्धान्ताच्च । एवं निर्जरादिशब्दान्तर्गतजराशब्दस्याङ्गत्वाभावेऽपि तस्य स्थानित्वांशमादायोपजीव्यविरोधाभावस्य सुवचत्वात् । "उदोष्ठ्य" इत्यादौ तु विशेषणान्वयानन्तरमेव तदन्तविधिरिति सिद्धान्तात् । "अलोऽन्त्यस्य" "आदेः परस्य" इति तु द्वयमारम्भसामर्थ्यादस्य बाधकम् । "अनेकाल् शित् सर्वस्य" इत्यनेन सह त्वाविरोधात्समुच्चयः । एवं च तन्त्रादिना स्फुटप्रतिपत्त्यर्थं प्रागुक्तार्थोऽपि बोध्यः ।

अत्र वदन्ति । "इको गुणवृद्धी" इतिवदयं योगः पदोपस्थापक एवास्तु । इह शास्त्रे अनिर्द्धारितसम्बन्धविशेषा षष्ठी स्थानेशब्देन युज्यते । स्थाने इति सप्तम्यन्तं पदं तत्रोपतिष्ठते इति । स्थानेयोगोऽस्या इति विग्रहः । एवम् "अलोऽन्त्यस्य" "ङिच्च" इत्यादावपि ।

स्थानेऽन्तरतमः ४९ ।

प्रसक्तानां मध्ये सदृशतम आदेशः स्यात् ।

यदि त्वयं स्वतन्त्रो विधिः स्यात्तदा विधेयस्यादेशविशेषस्यानिर्देशात् दाधिशब्दस्य दाधिशब्द एवादेशः स्यात् ।तस्याप्यन्यः

स एवेत्यनवस्था स्यात् । प्रयोजनव्यतिरेकेण प्रवर्त्तमानस्य सकृत् प्रवृत्तौ नियामकाभावात् । तथा च पदमात्रस्य निवृत्त्युन्मुखत्वादर्थप्रत्यायनाय प्रयोगो न स्यात् । एवं बिसं मुसलम् इत्यादौ समुदायस्थाने समुदाये आदेशे तन्मात्रस्यानादेशत्वेऽपि सकारस्य सकारादेशे षत्वापत्तिः । तस्मात् प्रकरणात्परिभाषेयमिति भाष्यम् । तच्च चतुर्द्धा—

तत्र स्थानतो यथा—सुद्ध्युपास्यः । मध्वरिः । धात्रंशः । लाकृतिः । इकारादीनां तुल्यस्थाना यादयः । यथासङ्ख्यपक्षेऽप्यविरोधादेतत्प्रवृत्तेः । दैत्यारिः श्रीशः इत्यादिकमप्युदाहार्यम् ।

अर्थतो यथा—वातण्ड्ययुवतिः । "वतण्डाच्च" इत्यपत्ये यञ् । "लुक् स्त्रियाम्" इति लुक् । शार्ङ्गरवादित्वान्ङीन् । वतण्डी चासौ युवतिश्चेति विग्रहे "पोटायुवति" इत्यादिना समासः । "पुंवत्कर्मधारय" इति पुंशब्दातिदेशे वतण्डीशब्दस्यापत्यवाचिनोऽपत्यवाचक एव वातण्ड्यशब्द आदेशः ।

गुणतो यथा—पाकः । त्यागः । "चजोः" इति कुत्वेऽल्पप्राणस्याऽघोषस्य चकारस्य घोषवतो नादवतो महाप्राणस्य जकारस्य च यथाक्रमं तादृशावेव ककारगकारौ ।

प्रमाणतो यथा—अमुष्मै अमू अमून् । "अदसोऽसेः" इति विहित उकारो ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उकारः । पुनः स्थानग्रहणादन्योऽपि वाक्यार्थः । ताल्वादिस्थाने योऽन्तरतमः तत्प्रयुक्तान्तर्यवानिति यावत् । प्रसक्तानां मध्ये स स्यादिति । तदुक्तम्—

यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय इति ।

तेन चेता स्तोता इत्यादौ प्रमाणतोऽन्तरोऽप्यकारो न । वाक्यभेदे तमग्रहणस्य मानत्वात् । स्थानमात्रप्रयुक्तताद-

श्यविवक्षायां सादृश्यान्तरस्याप्रसक्त्या तद्व्यवच्छेदार्थस्य तमग्रहणस्यानुपयोगात् । तेन वाग्घरिरित्यादौ सोष्मणः सोष्माण इति द्वितीयानाम्, नादवतो नादवन्त इति च तृतीयानाम् प्रसक्तौ तमग्रहणादुभयवन्तश्चतुर्था भवन्ति । वर्गे वर्गे च प्रथमावघोषौ युग्मौ सोष्माणावनुनासिकोऽन्त्य इति बह्वृचप्रातिशाख्योक्त्या तेषां सोष्मत्वात् । शादय ऊष्माणः सस्थानेन द्वितीया हकारेण चतुर्था इति शिक्षान्तरम् । इत्थम्भूतलक्षणे तृतीया । हशषसाः खच्छादीनां द्वितीयानां सस्थानाः । यथा ते ऊष्माण एवं द्वितीया अपीत्यर्थः । फकारस्य सस्थान ऊष्मा नास्ति । तस्मात्तस्य विशेषत ऊष्मत्वं वक्तव्यम् । हकारेण चतुर्था इति । यथा हकार ऊष्मा एवं तेऽपीत्यर्थ इति हरदत्तः ।

न चैवम् इष्ट उप्त इत्यादौ आन्तर्यादर्धमात्रस्य यणः स्थाने तादृगेव इक् स्यादिति वाच्यम् । अर्द्धमात्रस्येकोऽप्रसिद्धेः । एतेन दध्यत्र सुध्युपास्य इत्यादौ मातृकद्विमातृकयोस्तादृगेव यण् स्यादित्याशङ्काऽप्यपास्ता । आपाद्यस्य लोकवेदयोरप्रसिद्धत्वात् ।

स्यादेतत् । संहितया पाठेऽन्तरतमे इति सप्तम्यन्तमेव । छिद्यताम् । षष्ठीत्यनुवर्त्तते । अन्तरतमे स्थानिनि षष्ठी उपसंहर्तव्येति सूत्रार्थः । तेन "अकः सवर्णे" इत्यत्र विधेयस्य अन्तरतमे स्थानिनि षष्ठ्या उपसंहारादिष्टं सिद्धम् । स्थानशब्दस्य ससम्बन्धिकतया विधेयप्रतियोगिकस्यैवान्तरतम्यलाभात् । प्रथमान्तच्छेदपक्षे तु " वान्तो यि " इत्यत्र ओदौतोरिति स्थानिनिर्देशः कर्त्तव्यः स्यात् । एच इत्यनुवृत्तौ तु एज्मात्रस्य वान्तादेशः स्यात् । स्थानितोऽन्तरतमनिर्वृत्तौ तु एच इति षष्ठ्या वान्तादेशस्यान्तरतमे स्थानिनि ओकारौकाररूपे उपसंहारात्सिद्धम् । अत्र भाष्यम्—

एवं सति आदेशान्तरतमः स्थानी ग्राह्य इत्यर्थे ह्रस्वानामेव यण् स्यान्न तु दीर्घाणाम् । अर्द्धमात्रिकस्य मातृक एवान्तरतम इति तत्रेक इति षष्ठ्या उपसंहारात् । "ल्वादिभ्यः" "प्वादीनां ह्रस्वः" इत्यादिज्ञापकानुसरणे तु प्रतिपत्तिगौरवम् । "इको गुणवृद्धी" "अचो ञ्णिति" इति षष्ठ्योरपि विधेयगुणवृद्ध्यन्तरतमेषु इक्ष्वक्षु चोपसंहारे नेता लविता नायको लावक इत्यादिदीर्घान्तस्थले एव "सार्वधातुकार्द्धधातुकयोः" "अचोऽञ्णिति" इति गुणवृद्ध्योः प्रवृत्तिः स्यात् । चेता स्तोता चायकः स्तावक इत्यादौ न स्यात् । विधेययोर्द्विमातृकतया ह्रस्वस्य तदान्तरतम्याभावात् । आदेशतोऽन्तरतमानिर्वृत्तिरिति पक्षे तु न दोषः । स्थानिषष्ठ्या असंकुचितत्वात् । न च एज्मात्रस्य वान्तादेशापत्तिः । "एचोऽयवायावः" इति सूत्रे यथासंख्यान्तरतमपरिभाषयोः प्रवृत्तेरर्थाधिकाराश्रयणाद्यादृशो वान्तादेशः पूर्वं दृष्टस्तादृशो यकारादौ प्रत्यये भवतीति सूत्रार्थात् । तादृशश्च ओकारस्थानिकोऽव् औकारस्थानिक आव् चेति ।

यद्वा—वान्त इति त्याज्यम् । "क्षय्यजय्यौ" इति योगं विभज्य कण्ठताल्व्यस्य चेद्भवति क्षिज्योरेवेति नियमं व्याख्याय चेयं नेयमित्यादावयादेशवारणात् । क्षिज्योः शक्यार्थ एवेति द्वितीयो योगः । तेनार्हाद्यर्थे तयोरपि नायादेशः । रायमिच्छति रैयतीत्यत्र तु रायिश्छान्दसः दृष्टानुविधिश्छन्दसि भवतीति भाष्यम् । क्यजन्तरैशब्द एवच्छान्दसः । अन्यादृशस्तु भाषायामपीति केचित् ।

क्यच् तु नास्ति गोसमानाक्षरनान्तादिति वचनात् ।
अन्ये तु भाषायां रैशब्दप्रयोग एव नेत्याहुः इति कैयटः ।

नन्वेवमपि "नृनरयोश्च" इति नरशब्दे ङीन्संनियोगेन विधीयमाना वृद्धिः "अलोऽन्त्यस्य" इत्यन्त्यस्य स्यात् । यस्येति लोपे च कृते वृद्धिविधानवैयर्थ्यम् । नृशब्दमात्रार्थत्वे "नुर्वृद्धिश्च" इति न्यासापत्तिः । न च परत्वाद् यस्येति लोपे कृते प्रथमाकारस्य वृद्धिः । प्रत्ययसन्नियोगशिष्टत्वेन वृद्धेरन्तरङ्गत्वात् । न चाङ्गगुणविरोधन्यायेनान्तरङ्गपरिभाषां बाधित्वा परत्वाद् यस्येति लोपे कृते वृद्धिः, वचनसामर्थ्याद्. वृद्ध्या लोपबाधे धर्मिबाधापत्तेरिति न दोष इति वाच्यम् । तथा ऽपि सप्तम्यन्तच्छेदस्यावश्यकत्वात् । तत्र हि स्थानितोऽन्तरतमनिर्वृत्तिरिति वृद्ध्यन्तरतमे स्थानिनि षष्ठ्या उपसंहारादकारस्य वृद्धिः । प्रथमान्तच्छेदपक्षे तु प्रकृतितोऽन्तरतमनिर्वृत्तिरिति अनन्तरसमादेशव्यावृत्तावपि स्थानिनियामकत्वाभावात् अलोऽन्त्यपरिभाषया रेफस्य स्यात् ।

अत्राहुः—सप्तम्यन्तच्छेदनिरासपरभाष्यप्रामाण्यान्नरशब्दपाठप्रत्याख्यानमेव तत्संमतम् । न च नरशब्दाज्जातिलक्षणे ङीपि नरीत्यापत्तिः । इष्टत्वात् । किन्नरीणां नरीणामिति दर्शनात् ।

यद्वा—नरशब्दो नियतपुल्लिँङ्गः । नरीति प्रयोगस्तु पुंयोगलक्षणे ङीपि । तस्य यथान्यासेऽपि दुर्वारत्वात् ।

यद्वा—" नृनरयोः " इत्यत्र " अजाद्यतष्टाप् " इति सूत्रादत इत्यनुवर्त्तते । " शार्ङ्गरवाद्यञ " इत्यादिशब्देन गणसूत्रस्याप्यस्य हृदयमानीतत्वात् । तच्च षष्ठ्या विपरिणतं नरशब्दे वैयधिकरण्येन सम्बध्यते, नरशब्दस्य योऽत् तस्य वृद्धिरिति । अतो न अलोऽन्त्यपरिभाषाप्रवृत्तिः ।

यद्वा—नर् इति रान्तं लुप्ताकारानुकरणम्, तस्य अः नरः

तस्य वृद्धिरिति चाद् गणपाठाच्च ङीन् ।

यत्तु स्थानितोऽन्तरतमानिर्वृत्तिरित्याश्रित्य हरदत्तेन नारीति रूपं साधितम्, तद् "उपेयप्रतिपत्त्यर्था उपायाः" इति न्यायमाश्रित्येत्यविरोधः ।

भाष्ये त्वेतत् सूत्रमेव प्रत्याख्यातम् । सभायामास्यताम् इत्युक्ते हि पण्डिताः कवयः शूराश्च स्वसजातीयैः पण्डितादिभिरेव सह समासते, न तु सङ्करेण । एवं गवां सङ्घं गौर्धावति, अश्वोऽश्वानामिति तिर्यक्ष्वपि दृश्यते । तस्मात् प्रथमवाक्यार्थलाभो नास्य प्रयोजनम् । स्थानत आन्तर्यस्य बलवत्त्वमपि लोकात्सिद्धम् । भूयःसहचरितयोर्गवोरश्वयोर्वा सजातीयान्तरसंवलने सत्यपि कृशत्वपाण्डुत्वादिगुणसदृशानपि हित्वा स्थानसाम्यपुरस्कारेणैव परस्परापेक्षा दृश्यते । तथा च लोकतः सिद्धमिति ।

उरण् रपरः ५० ।

ऋवर्णस्थानीयोऽण् प्रसङ्गावस्थायामेव रपरः स्यात् । र इति प्रत्याहारः । ऋ इति त्रिंशतः संज्ञा । आन्तरतम्यात् ऋकारस्थानीयो रपरः, ऌकारस्थानीयस्तु लपर इति व्यवस्था । कृष्णर्द्धिः । तवल्कारः ।

भाष्यस्तु ऋऌस्थानीयोऽणिति व्याचख्युः ।

यत्तु आ च आ च रलाविति विग्रहे उश्च उऌ च ऋलोरिति विग्रहे वा द्वन्द्वो दुर्लभः । विरूपाणामपि समानार्थानामेकशेषविधानादिति । तन्न । सूत्रस्थऋशब्दस्योभयपरत्वप्रदर्शनपरे वाक्ये ऋऌवर्णयोः परस्परग्राहकत्वस्यानभिमततया समानार्थकत्वाभावात् । शब्दस्वरूपमात्रपरत्वात् । "समाहा-

रसमूहयोरविशेषाद्" इति वार्त्तिके सर्वैस्तथैव व्याख्यानात् । अन्यथा " मिहिरारुणपूषण " इत्यादावप्येकशेषापत्तेः ।

इह वाक्यार्थचतुष्टयं सम्भवति । उः स्थाने रपरत्वविशिष्टोऽण् विधीयते इत्येकः । अणामनणां च प्रसङ्गेऽणेवेति नियमः, स च रपर इति वाक्यभेदेन रपरत्वविधिरिति द्वितीयः । ऋस्थानीयमणमनूद्य तस्य रपरत्वविधिरिति तृतीयः । प्रसङ्गावस्थायामेव रपरत्वं विधीयते इति चतुर्थः ।

तत्राद्ये इत्थं वचनव्यक्तिः । षष्ठीनिर्दिष्टमात्रस्य भवन्नादेशोऽन्तरतमः स्यात्, ऋवर्णस्य त्वण् रपर इति । ततश्च नाप्राप्तेषूदात्तादिषु विहितोऽण् तेषां बाधकः स्यात् । तथा च कृतिरित्यत्र "ञ्नित्यादिर्नित्यम्" इत्युदात्तो न स्यात् । प्रकृतं प्रहृतमित्यत्र " गतिरनन्तरः " इति प्रशब्दस्योदात्तत्वे शेषनिघातः " उदात्तादनुदात्तस्य " इति स्वरितश्च न स्यात् । नॄँः पाहीत्यत्रानुनासिको न स्यात् । सर्वत्र तत्तद्गुणावच्छिन्नस्य रपरस्याणः प्रसङ्गात् । ऋकारस्य चाण्त्वाभावात् । न च नॄनित्यत्र दीर्घोऽपि न स्यादिति कुतो नोक्तमिति वाच्यम् । " नॄन् पे " इति निर्देशात्तत्सिद्धेः ।

किं च कर्त्ता कारक इत्यत्र गुणवृद्धिबाधेन विहितोऽण् कदाचिदिकार उकारश्च स्यात् । अकार एवेतिनियमाभावात् । " ऋत इद्धातोः " "उदोष्ठ्यपूर्वस्य" इति प्रतिपदोक्तेषु इत्वोत्वादिषु च रपरत्वं न स्यात् । तेषामेतद्बाधकत्वात् ।

अथ द्वितीयः पक्षोऽस्तु । अणनणोः प्रसङ्गेऽणेवेति नियमात् कर्त्ता कारक इत्यादौ गुणवृद्ध्योर्दोषाभावात् । ननु ह्रस्व ऋकारस्य सर्वा वृद्धिरनन्तरतमा, वृद्धिमात्रस्य द्विमात्रत्वात्, दीर्घस्य तु सर्वाऽपि प्रमाणतोऽन्तरतमेति अविशेषादुभयस्थले

सकलवृद्धिप्रसङ्गे ऽणेवेति नियमोऽस्तु । गुणस्थले तु ह्रस्वस्य ऋकारस्य कर्तेत्यादौ मात्रिकत्वादकार एवान्तरतमः, तरितेत्यादौ दीर्घस्य तु द्विमात्रत्वादेङेवान्तरतमः इति उभयत्राप्यणनणोर्व्यवस्थयैव प्राप्त्या उभयत्रोभयोरप्रसक्त्या नियमप्रवृत्त्यभावे दीर्घस्य ऋकारस्य विधीयमानो गुण एङेव स्यात् । ह्रस्वस्य त्वकारो भवन्नपि रपरो न स्यात् । अणनणोः प्रसक्तावणेवेति यो नियम्यते, तस्यैव द्वितीयेन रपरत्वविधानात् । अतो गुणे दोषो दुर्वार इति चेत्, सत्यम् । स्थानेऽन्तरतमपरिभाषाया अवकाशः "चजोः कु घिण्ण्यतोः" इत्यादिः, एतस्यास्तु वृद्धिविधिः, गुणे तूभयप्रसङ्गे परत्वादियमेवेति दोषाभावात् । सत्यम् । उदात्तादिषु प्रतिपदोक्तेषु च दोषतादवस्थ्यात् ।

अथास्तु तृतीयः पक्षः । अन्तरतमपरिभाषासंस्कृतैरुदात्तादिविधिभिस्तत्तद्गुणावच्छिन्नस्य ऋकारस्यैव विधानात् तस्य चाण्त्वाभावेन रपरत्वप्रसक्त्यभावात् । प्रतिपदोक्तेषु इत्वादिष्वपि न दोषः । ऋकारस्थानीयाण्त्वस्य तत्रापि सत्त्वात् किरतीत्यादिषु रपरत्वसिद्धेः । मैवम् । गुणवृद्ध्योर्दोषस्य सत्त्वात् । कर्त्तेत्यत्र मात्रिकस्य ऋकारस्य मात्रिकत्वादकारे गुणे रपरत्वे च दोषाभावेऽपि तरितेत्यादौ द्विमात्रस्य दीर्घस्य स्थाने तादृशस्यैङ एव प्रसङ्गात् । वृद्धिस्थले तु पूर्वोक्तरीत्या वृद्धिमात्रस्य ह्रस्वान्तरतम्याभावात् दीर्घान्तरतम्याच्चोभयत्रापि त्रिविधवृद्धिप्रसङ्गे कारः तार इत्यादिसिद्धावपि पक्षे ऐचोऽपि प्रसक्त्या कायः कावः तायः ताव इत्यादेरनिष्टस्यापि प्रसङ्गात् ।

स्यादेतत् । पूर्वसूत्रे "अनान्तर्यमेवैतयोरान्तर्यम्" "सम्प्रयोगो वा नष्टाश्वदग्धरथवत्" इति भाष्यवार्तिककृद्भ्यामुक्त-

त्वाददुष्ट एवायं पक्षः । तथा हि—एकस्यान्तरतमा प्रकृतिर्नास्ति अपरस्याप्यन्तरतम आदेशो नास्ति अतोऽनुरूपप्रतिसम्बन्धिराहित्यरूपधर्मेणैवान्तरतम्यनिर्वाहः । न हि चतुर्विधमेवान्तर्यमिति नियमः । मुनित्रयानुक्तेः । प्रत्युत सोष्मणः सोष्माण इति भाष्यादौ स्वीकारात् । सम्प्रयोग इत्यादेस्त्वयमर्थः—"स्थानेऽन्तरतमः" इत्यस्य प्रत्याख्यानपक्षेऽपि उभयोरनुरूपप्रतियोगिरहितत्वात् परस्परापेक्षामूलकः स्थान्यादेशभाव इति। उच्यते । ऋत्वजात्यवच्छिन्नस्य स्थानिनोऽत्वजात्यवच्छिन्नस्य चादेशस्योक्तान्तरतम्यराहित्येऽपि व्यक्तिपुरस्कारेणान्तरतम्यपरीक्षायां दोषस्योद्भटत्वात् । ऋवर्णस्य मात्रिकस्य तादृशोऽकारोऽन्तरतमः, द्विमात्रस्य त्वेकारौकारौ इति अनुरूपप्रतियोगिकत्वस्य सुलभत्वात् । "स्वतन्त्रः कर्ता" इति निर्देशान्न विनिमयः । "ग्रो यङि" "अचि विभाषा" इत्यारम्भाच्च न विकल्प इति कल्पनेऽपि गौरवात् । तस्माच्चतुर्थो निर्दोषः । तदुक्तम्—

सिद्धन्तु प्रसङ्गे रपरत्वादिति ।

विधिवाक्यस्यैकवाक्यताविधानकाले एव अणो रपरत्वमित्यर्थः ।

ननु स्थानेशब्दस्यात्रानुवर्त्तमानस्य प्रसङ्गावस्थायामित्यर्थे ऋकारस्येति षष्ठ्याः स्थानमर्थो न स्यात् । अण् हि लक्षणान्तरेण विधीयते, न त्वनेन । तथा च "षष्ठी स्थानेयोगा" इति परिभाषा नोपतिष्ठतएव । विधौ परिभाषोपतिष्ठते नानुवादे इति न्यायात् । अत एव "उदीचामातः स्थाने यकपूर्वायाः" इत्यत्र स्थानेग्रहणम् । तथा च ऋकारस्य योऽण् स प्रसङ्गावस्थायामेव रपरः स्यादित्यर्थे ऋकारसमीपस्याप्यणो रपरत्वं स्या-

दिति चेन्न । द्वितीयस्यापि स्थानेशब्दस्यानुवृत्तेः । तथा चैकेनानुवादेऽपि स्थानसम्बन्धस्य सिद्धिः, द्वितीयेन तु प्रसङ्गावस्थायामेवेति कालविशेषस्य । "स्थानेऽन्तरतमः" इत्यत्र ताल्वादिपरत्वेन व्याख्यातस्यापि स्थानशब्दस्यात्र शब्दाधिकारेण प्रसङ्गपरतया व्याख्यानात् । तथा च स्थानेऽन्तरतमपरिभाषया कृतिरित्यादावृकारस्य ऋकार एव प्रवर्त्तते इत्यणः प्रसङ्ग एव नास्ति । गुणवृद्ध्योः प्राप्त्यवस्थायामेवाणां रपरत्वप्रसक्त्या व्याख्यानतोऽन्तरतमौ अर् आर्इत्येतौ ऋकारस्यादेशौ भवतः, न तु प्रमाणतोऽन्तरतमावेङैचाविति न दोषः। नन्वेवमादेशस्यानेकाल्त्वात्सर्वादेशः स्यादिति चेन्न । ऋस्थानीयत्वोपजीवकेन रपरत्वेनोपजीव्यविरोधिनः सर्वादेशत्वस्य प्रवृत्त्यभावात् । तथा च पूर्वसूत्रे वार्त्तिकम्—

सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात्, न वाऽनेकाल्त्वस्य तदाश्रयत्वादवर्णादेशस्याविघात इति ।

अण्ग्रहणं किम् । अकङ् लोप आनङ् अनङ् रीङ् रिङ् एषां रपरत्वं मा भूत् । सौधातकिरित्यत्र "सुधातुरकङ् च" इति ङित्त्वादृकारस्य अकङ् । पैतृष्वसेय इत्यत्र "ढकि लोपः" इति ऋकारलोपः । होतापोतरावित्यत्र "आनङ् ऋतो द्वन्द्वे" इत्यानङ् । कर्त्तेत्यत्र "ऋदुशनः" इत्यनङ् । मात्रीयतीत्यत्र "रीङ् ऋतः" इति रीङ् । क्रियतइत्यत्र "रिङ् शयग्" इति रिङ् । न च ढकि लोपे रपरत्वप्रवृत्तौ ऋकारलोपविधिवैयर्थ्यम्, यणाऽपि तादृशरूपासिद्धेरिति वाच्यम् । सामर्थ्यादलोऽन्त्यविधिं बाधित्वा सर्वादेशत्वप्रसङ्गात् । न च होतापोतारावित्यत्र रपरत्वेऽपि न क्षतिः, संयोगान्तलोपसंभवादिति वाच्यम् । तस्यासिद्धतया नलोपानुपपत्तेरिति कैयटः ।

यत्तु "संयोगान्तलोपे यणः प्रतिषेधः" "न वा झलो लोपाद्" इति पक्षद्वये तावद्रेफस्य लोपप्रसङ्ग एव नास्ति "नापि बहिरङ्गलक्षणत्वाद्" इति पक्षे उत्तरपदानिमित्तकस्यानङोऽन्तरङ्गसंयोगान्तलोपे कर्त्तव्येऽसिद्धत्वात् नकाररेफयोः श्रवणं स्यादिति दोषएव भाष्यस्य तात्पर्यमित्याहुः । तन्न । संयोगान्तलोपस्य संयोगपदोभयसंज्ञापेक्षत्वात् ।

न चोत्तरपदापेक्षायां पदसंज्ञापेक्षत्वमानङोऽपीति वाच्यम् । तस्य समासावयवमात्रस्यापेक्षितत्वात् । समासचरमभागस्याजादौ सुपि कुत्रापि पदसंज्ञानङ्गीकारात् । कौस्तुभेऽपि तथैव निर्णीतत्वात् । एवम् उदात्तादीनामपि ऋकाराणां रपरत्वं स्यादिति दिक् ।

स्यादेतत् । खट्वर्श्य इत्यादौ रपरत्वं न स्यात् । ऋमात्रस्थानिकत्वाभावात् । समुदायस्यैव तत्र स्थानित्वेनाश्रयणात् । न च "एकः पूर्वपरयोः" इत्यनेनोद्भूतावयवभेदस्य समुदायस्य निर्देशात् परस्परापेक्षयोरवयवयोरेव समुदायत्वादृकारस्थानीयत्वमक्षतमिति वाच्यम् । आनङोऽपि रपरत्वप्रसङ्गात् । अवयवस्य तत्राप्यणत्वात् । ऋकारतदन्योभयस्थानिकस्यैव अणनणुस्वरूपस्यापि रपरत्वस्य दुर्वारत्वात् । तदुक्तम्—

अवयवग्रहणात्तदिति चेदादेशे रान्तप्रतिषेध इति ।

न च उरित्यृवर्णग्रहणात् वर्णग्रहणे तदन्तग्रहणाद् ऋवर्णान्तस्य स्थाने योऽण् तस्य रपरत्वं न त्वत्रेति वाच्यम् । कर्त्ता इत्यादौ तदसिद्धेः । अङ्गस्येति षष्ठ्या अन्त्येऽलि उपसंहारात् । ऋवर्णस्यैव गुणविधानात् । तस्य च ऋदन्तत्वाभावात् । न च व्यपदेशिवद्भावः । अर्थवत्त्वाभावात् ।

तस्मादेकादेशस्योपसंख्यानं कर्तव्यम् । मातुरित्यादौ "ऋत

उद्” इत्यस्य च प्रतिषेध इति चेन्न । एकादेशोऽवयवयोरेव स्थानित्वात् ऋस्थानित्वस्य सत्त्वात् । अत एव स्थानिभेदादादेशभेदो मा भूदिति तत्रैकग्रहणम् । अत एव लोके देवदत्तस्य पुत्रो देवदत्तायाः पुत्र इत्युभाभ्यां व्यपदेशः । मातुरित्यत्र रपरत्वेऽपि दोषाभावात् । “ रात्सस्य ” इति सलोपे रेफस्य विसर्जनीये च रूपसिद्धेः । न चैवं मातुः करोतीत्यत्र “ इदुदुपधस्य चाप्रत्ययस्य ” इति षत्वापत्तिः । कस्कादिषु भ्रातुष्पुत्रशब्दपाठेन एकादेशशास्त्रं निमित्तं यस्य ततः परस्य विसर्गस्य षत्वं न भवतीति ज्ञापितत्वात् ।

इदमप्यत्रावधेयम् । पूर्वसूत्रादन्त इत्यनुवृत्तौ अयं पूर्वान्तः । आदिरित्यनुवृत्तौ परादिः । उभयानुवृत्तौ त्वभक्त इति सम्भवति । यद्यपि रपर इत्यत्रान्यपदार्थप्राधान्यम्, तथाऽपि विधेयतया रेफस्य प्राधान्यात्तस्यैवान्तत्वं विशेषणमिति बोध्यम् । न च प्रसज्यमानस्यैवाणो रपरत्वविधानात् रेफमात्रस्य कथं पक्षत्रयशङ्केति वाच्यम् । तृतीयपक्षमाश्रित्यैतदुपपत्तेः । तत्रान्त्यं प्रकृत्य वार्त्तिकम्—

अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिशेषविसर्जनीयप्रतिषेधः प्रत्ययाव्यवस्था चेति ।

गीः पूरित्यत्र दीर्घो न स्यात् । धातोः रेफान्तत्वाभावात् । रेफवकारान्तस्य पदस्येति व्याख्याने अग्निः वायुरित्यादावतिप्रसङ्गात् । न च रेफवकारान्तस्य पदस्येको धातोरित्यर्थः । प्रियग्रामणिः प्रियसेनानिरित्यादावतिप्रसङ्गात् । निजागिल्यतइत्यत्र “ ग्रो यङि ” इति लत्वं न स्यात् । ग्र इत्यस्यावयवषष्ठ्यन्तत्वात् । न चेयमानन्तर्ये षष्ठी । स्वर्जेगिल्यतइत्यत्राप्यापत्तेः । यदि यङाऽऽनन्तर्यं विशेष्यते,

यद्वा— ग्र इति पञ्चमीत्युच्यते, तदा न दोषः । गीर्यते पूर्यते स्वयमेवेत्यत्र "अचः कर्तृयकि" इति स्वरो न स्यात् । रेफेण व्यवधानात् । स्वरविधौ व्यञ्जनमविद्यमानवद्भवतीत्ययमपि न दोषः । एतेन "मा हि स्म ते पिपरुः" इत्यत्र "अभ्यस्तानामादिः" उदात्तः स्यादजादौ लसार्वधातुके इति स्वरोऽपि व्याख्यातः । वव्रते इत्यादौ हलादिःशेषेण रेफनिवृत्तिर्न स्यात् । अभ्यासावयवस्यानादेर्हलस्तद्विधानात् । नार्कुटो नार्पत्य इत्यादौ यस्मात् सुप्तिङ्ङिविधिस्तदादिसुबन्ते च रेफान्तस्य पदत्वाद्विसर्गः स्यात् । किरतो गिरत इति च न स्यात् । किरतीत्येकवचने हि नित्यत्वात्पूर्वं विकरणः । आङ्गन्त्वनित्यम्, अकृते विकरणे गुणस्य प्राप्तिः, कृते त्वित्त्वस्येति । द्विवचने तु द्वयोरपि नित्यत्वात्परत्वादित्वे रेफस्याभक्ततया धात्ववयवत्वाभावाद्विकरणो न स्यात् । धातोः परे तावतैव तद्विधानात् । न च विकरणात्परो रेफः । तथाऽपि ऋकारस्थानिकादणः परत्वानुपपत्तेः । न च परत्वं व्यवहितसाधारणम् । इष्टासिद्धितादवस्थ्यात् । पूर्वादित्वे तु "रोः सुपि" इत्यवधारणं कार्यम् । रोरेव सुपि नान्यस्य । सर्पिःषु धनुःषु इत्यादौ यथा स्यात्, गीर्षु पूर्षु इत्यादौ मा भूत् ।

अभक्तत्वेऽप्ययं दोषः । तदादिवचनात् प्रत्ययावधिकपूर्वभागस्यापि पदान्तत्वात् । परादित्वपक्षे तु सुब्भक्तत्वान्न पदान्तत्वम्, किं तु नार्कलिपारित्यत्र विसर्गापत्तिः । तदुक्तं भाष्ये—

कलिपपदसंघातभक्तोऽसौ नोत्सहतेऽवयवस्य पदान्ततां बाधितुमिति ।

नृकल्पशब्दादिञि वृद्धिः । रेफस्तु प्रत्ययसमुदायस्य कल्पिशब्दस्यावयवो न तु कल्पमात्रस्य । तथा च कल्प-

शब्दे परे विधीयमाना पदसंज्ञा तदादिवचनाद्रेफान्तस्य भवतीति विसर्गः स्यात् । पद्यतेऽर्थोऽनेनेति व्युत्पत्त्या भाष्ये पदेति प्रत्ययस्योक्तेः । कल्पशब्दे परे व्यवस्थितस्यापि रेफस्य तदवयवत्वाभावात्तयोः पौर्वापर्यसद्भावादात्मन एवावयवभूतस्य पदान्तत्वविघातकत्वानुपपत्तेः । कल्पपदसंघातेति पाठे तु कल्पपदसंबन्धि यत्पदं नार्कलिपिरिति तस्य पदस्य योऽवयवः प्रत्ययसंघातः कल्पिशब्दस्तद्भक्त इति व्याख्येयम् । तस्मादेतदर्थमप्युक्तनियम आरभ्यः ।

गीर्यतइत्यत्र "अचः कर्त्तृयकि" इति स्वरस्तु उपदेशेऽजन्तत्वव्याख्यानान्निर्बाधः । परादित्वपक्षे तु दोषानाह वार्त्तिककारः—

परादावकारलोप औत्वं पुक्प्रतिषेधः चङ्युपधाह्रस्वत्वमिटोऽव्यवस्थाऽभ्यासलोपोऽभ्यस्ततादिस्वरो दीर्घत्वं चेति ।

तथा हि—कर्ता हर्ता इत्यत्रातो लोपः स्यात् । न चोपदेशग्रहणानुवृत्तिः । धिनोतीत्येकवचने अकारलोपाभावेऽपि आद्गुणेन यद्वा उकारस्य गुणे पररूपेण सिद्धावपि धिनुतः कृणुत इत्यनुपपत्तेः । आर्द्धधातुकोपदेशे यदकारान्तमित्यर्थे तु न दोषः । चकार जहारेत्यत्र णल औत्वं स्यात् । "निर्दिश्यमानस्यादेशा भवन्ति" इत्ययं न दोषः । न च "आदेः परस्य" इति वचनाद्रेफस्य औत्वापत्तिः । णल इत्यनेन प्रयोगसमवायकारव्यक्तिविशेषस्य आकारान्तादङ्गात्परस्यादेशप्रवृत्तेः । सरेफस्य त्वनुमीयमानस्य नादेशः ।

भाष्ये तु प्रत्याय्यप्रत्यायकयोरभेदविवक्षया षष्ठीनिर्दिष्टस्येत्युक्तत्वात् अकारमात्रस्य च रेफेण व्यवधानात् ।

यदि तु प्रत्ययस्येति लिटीति वोच्येत तदा स्यादापत्तिः ।

कारयतीत्यत्र आदन्तत्वात्पुक् स्यात् । अचीकरदित्यत्र "णौ चङ्युपधायाः" इति ह्रस्वो न स्यात् । रेफस्य परादित्वा-दाकारस्योपधासंज्ञाऽनुपपत्तेः । आस्तरितेत्यादौ नित्यत्वाद् गुणे रपरत्वे च कृते "नेड्वशि कृति" इतीटो निषेधः स्या-त्, इट्प्रवृत्तौ वा रेफात्पूर्वमिट् स्यात् इति इष्टव्यवस्थादौर्ल-भ्यम् । उभयोरपि परादित्वात् । वबृते इत्यादौ हलादिःशेषो न स्यात् । अभ्यासानवयवत्वात् । " मा हि स्म ते पि-परुः " इत्यत्र लसार्वधातुकस्य उसो रेफादित्वेऽजादित्वाभा-वादभ्यस्ताद्युदात्तत्वं न स्यात् । प्रकर्ता प्रकर्त्तुमित्यादौ " ता-दौ च निति " इति स्वरो न स्यात् । उपदेशे तकारादौ कृती-ति व्याख्यानादयं न दोषः । गीः पूरित्यादौ अन्तरङ्गत्वाद्व-लोपइत्वे रपरत्वे सुबाद्यवयवो रेफ इति स्वीकारे " रात्स-स्य " इति सलोपे कृते तस्यासिद्धत्वाद्दीर्घो न स्यात् । तस्मा-त्पूर्वान्तपक्ष एव स्थितः । " रोः सुपि " इति नियमस्यारब्धत-याऽनापाद्यत्वात् ।

अलोऽन्त्यस्य ५१ ।

स्थानषष्ठीनिर्दिष्टं यदुच्यते तत् तदन्त्यस्यालो बोध्यम् । त्यदादीनामः । सः । यः । " षष्ठी स्थानेयोगा " इति सूत्र-स्यानुवृत्त्या स्थानषष्ठीलाभः । नन्वल इति प्रथमाबहुवचनान्तं व्याख्याय आदेशविशेषणमल्ग्रहणमस्तु, तथा च अलात्मक आदेशोऽन्त्यस्य भवतीत्यर्थाद् " अनेकाल्शित् सर्वस्य " इति सूत्रेऽनेकाल्ग्रहणं न कर्त्तव्यमिति लाघवम् । मैवम् । अ-न्त्यविशेषणमल्ग्रहणमिति पक्षेऽपि ङिच्च ङिदेवानेकालन्त्यस्य भवति, न त्वङिदिति नियममाश्रित्य तत्प्रत्याख्यानसंभवात् ।

विरजीकरोतीत्यादौ " अरुर्मनश्चक्षुश्चेतोरहोरजसाम् " इति विहितस्य लोपादेशस्यानल्त्वात्सर्वादेशत्वापत्तेः । एवं " पादशतस्य "ढे लोप" इत्यनयोर्बोध्यम् । अन्तस्यापि पदस्यादेशप्रसङ्गाच्च । तथा च "पदस्य" इत्यधिकृत्य विधीयमानं "वसुस्रंसु"इति दत्वं परमानडुद्भ्यामित्यत्र सर्वस्याप्यनडुच्छब्दस्य स्यात् । अनेकाल्ग्रहणं च पक्षद्वयेऽप्यावश्यकम् । अन्यथा "अतो भिस:" इति पञ्चमीनिर्देशेऽनेकालप्यादेशः " आदेः परस्य " इति वचनादादेरेव स्यात् । न च " आदेः परस्य " इत्यत्राल इति प्रथमान्तमनुवर्त्य परस्य विहितोऽल् आदेः स्यादिति व्याख्याय ऐसि दोषो निवार्यः, तस्यानल्त्वादिति वाच्यम् । बहोर्भावो भूमेत्यत्र इमनिच इकारस्य लोपानुपपत्तेः । तत्सत्त्वे च अपवादप्रतिषेधेन परत्वान्सर्वादेशसिद्धेः ।

अयं चात्रार्थः—स्थानेयोगत्वेन निर्णीता या षष्ठी साऽनेन अन्त्येऽलि अनुसंह्रियते ।

यद्वा–निश्चितो य आदेशः सोऽन्त्यस्यालः स्थाने इति । षष्ठीमात्रस्यानुसंहारे टित्किन्मितामप्यन्त्यावयवत्वप्रसङ्गात् । ततश्च " आर्द्धधातुकस्य " इति विहित इट् तृच ऋकारात्पूर्वम्, दापयतीति पुक् च आकारान्त्यावयवः स्यात् । ततश्च "अर्थवतो ह्यागम"इत्ययुक्तं स्यात् । अत एव"षष्ठी स्थानेयोगा" इत्यनेन सह अस्यैकवाक्यत्वम् । इह पाठस्तु "ङिच्च" इत्यादेः संबन्धार्थः । तथा च "शास्त्रे या षष्ठी साऽन्त्येऽलि सा च स्थानेयोगैवेत्यर्थः, स्थानेयोगत्वेन ज्ञानानन्तरम् अन्त्येऽलीत्यनुसंहारस्वीकारे प्रतिपत्तिगौरवात्" इत्यपि नाशङ्क्यम् । टित्किन्मित्सु दोषतादवस्थ्यात् ।

तथा हि–" आद्यन्तौ टकितौ " " मिदचोऽन्त्यात्परः "

इत्येताभ्यां स्थानेयोगत्वमेव बाध्येत । तुल्यजातीयतया संबन्धस्यैव बाध्यत्वात् । षष्ठीस्वरूपं तु अन्त्येऽलि व्यवस्थितमेवेति। अनुसंहारस्तु " आदेः परस्य " " अनेकाल्शित् सर्वस्य " इत्यनुसंहारान्तरेण बाध्यतइति न दोषः ।

ङिच्च ५२ ।

अनेकालपि ङिदन्तस्यैवादेशः स्यात् । दध्ना । "अस्थिदधि" इति इकारमात्रस्यानङ् । न चैवं तातङोऽप्यन्त्यादेशत्वापत्तिः । अनन्यार्थङित्त्वेष्वनङादिषु चरितार्थस्यास्य तातङि परत्वाद् "अनेकाल्शित् सर्वस्य " इत्यनेन बाधात् । न चोत्सर्गापवादयोः कथं विप्रतिषेध इति वाच्यम् । गुणवृद्धिप्रतिषेधार्थत्वेन ङित्त्वोपपत्त्या तत्रैतस्य प्रवृत्त्यनवधारणात् ।

न च सर्वादेशत्वं विना प्रत्ययत्वाभावात् गुणवृद्धिप्रतिषेधार्थत्वमेव दुर्लभम्, तथा चान्योन्याश्रय इति वाच्यम् । "एरुः" इत्यनन्तरं तादित्यादेशे कर्त्तव्ये ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वनिर्णयात् ।

आदेः परस्य ५३ ।

पञ्चमीनिर्देशेन यद्विहितं तदादेरलो बोध्यम् । ईदासः । "तस्मादित्युत्तरस्य" इत्युपतिष्ठते । तेन आकारस्येकारः । आसीनः । द्विर्गता आपोऽस्मिन्निति द्वीपम् । " ऋक्पूरब्धूः " इत्यकारः समासान्तः । " द्व्यन्तरुपसर्गेभ्यः " इति द्व्यादिभ्यः परस्यापशब्दस्य विधीयमानमीत्वमादेरकारस्य सिद्धम् ।

स्यादेतत् । " तस्मादित्युत्तरस्य " इति सूत्रे उत्तरशब्दस्य " आदेः परस्य " इत्यत्र परशब्दस्य च ग्रहणे गौर-

वात् " तस्मादित्युत्तरस्यादेः " इत्येव न्यासोऽस्तु । तत्र च आदेरिति पृथग् वाक्यम्। "उत्तरस्य" इत्यनुवर्तते । सा च षष्ठी स्थानेयोगा । अनुवादे परिभाषाऽनुपस्थानेऽपि स्थाने इत्यस्यानुवृत्त्याऽन्यत्र फलाभावाद्वा तल्लाभात् । तथा च पञ्चमीनिर्देशेन यत्कार्यं तदुत्तरस्य सम्बन्धि उत्तरस्य स्थाने विधीयमानमादेर्बोध्यमित्युभयैकवाक्यतयाऽर्थः । वाक्यभेदसामर्थ्याच्च "गाङ्कुटादिभ्यः" इत्यादौ द्वितीयांशवैकल्येऽपि प्रथमवाक्यार्थमात्रस्य प्रवृत्तिः । न च वाक्यभेदे मानाभावः । "उत्तरस्यादेः" इत्यसमासनिर्देशस्य मानत्वात् । अन्यथा उत्तरादेरित्येवावक्ष्यत् । न चैवम् प्रथमांशविकलस्य द्वितीयांशस्यापि स्वातन्त्र्येण प्रवृत्त्यापत्तौ "नित्यं ङितः" इत्यत्र सकारान्तस्य ङिदुत्तमस्य लोपः स्यादिति विधाने भवेव भवेम भूयास्व भूयास्मेत्यादौ उत्तमपुरुषेकारवकारादेर्लोपः स्यात्, न तु अलोऽन्त्यपरिभाषयाऽन्त्यस्य सकारस्येति वाच्यम् । द्वितीयवाक्यार्थबोधकाले प्रथमवाक्यार्थबोधस्योत्पत्त्या तत्त्यागे मानाभावेन प्रथमांशविकलस्य प्रवृत्त्यनुपपत्तेः । प्रत्यासत्त्या पूर्ववाक्यप्रापितस्यैवादेशस्य ग्रहणाच्च । तथा च "तस्मादित्युत्तरस्य" इति सूत्रएव आदेरिति पदमधिकं पाठ्यम् । "आदेः परस्य" इति च त्याज्यमित्यर्थः । न च "अनेकाल्शित् सर्वस्य" इति सूत्रात्पूर्वमेवोक्तन्यासोऽस्त्विति वाच्यम् । निर्दिष्टग्रहणानुवृत्त्यनापत्तेः । उक्तरीत्या तु " तस्मिन्निति निर्दिष्टे पूर्वस्य" इति सूत्रात्तदनुवृत्तिरिति वैषम्यम् । न च तस्याप्यत्रैवापकर्षोऽस्त्विति वाच्यम् । तथाऽपि "ङिच्च" इत्यादिसाहचर्येण सप्तमीपञ्चमीनिर्देशे षष्ठीनिर्दिष्टयोः पूर्वपरयोः स्थाने कार्यं बोध्यमित्यर्थप्रसङ्गात् । " सार्वधातुकार्द्धधातुकयोः " " गाङ्-

टादिभ्यः " इत्यादौ च दोषस्योद्भटत्वात् ।

अन्ये तु तथा सति " अनेकाल्शित् सर्वस्य " इत्यनेन " तस्मादित्युत्तरस्य" इत्यस्य बाधः स्यात्, परत्वात । ततश्च ब्राह्मणा अष्टावित्यत्र अष्टन्शब्दात् पूर्वयोर्जश्शसोरौशादेशापत्तिरिति वदन्ति ।

अपरे तु नेदं युक्तम् । जश्शस्भ्यामाक्षिप्तप्रकृतेरङ्गस्य च संनिधानादष्टन्नित्यस्यैव ग्रहणात् । "सर्वस्य"इत्यस्य प्रवृत्तावपि पूर्वस्य परस्य वेति सन्देहावश्यकत्वात् "तस्मादित्युत्तरस्य"इति परिभाषाप्रवृत्तौ बाधकाभावात् । "सर्वस्य"इत्यनेन एकादेशमात्रप्रतियोगिकत्वम्, "तस्मादित्युत्तरस्य" इत्यनेन च पूर्वप्रतियोगिकत्वं व्यावर्त्यमिति विषयभेदेन विरोधाभावाच्च । "तस्मिन्" इति " तस्माद् " इति च सूत्रयोरविषये " सर्वस्य " इत्यस्य चरितार्थत्वाविरहाच्च । "जराया जरस् " " अस्तेर्भूः " इत्यादौ "तस्मिन्" इत्यस्य "परस्मैपदानां णलतुसुस्" इत्यादौ च "तस्माद् इत्यस्य प्रवृत्तोरित्याहुः ।

तत्रेदं चिन्त्यम् । "अष्टाभ्य औश्" इत्यत्र " तस्मादित्युत्तरस्य"इत्यस्यानुपस्थानेऽष्टाभ्यः पूर्वस्य परस्य च जसादेरौशिति वाक्यार्थे द्वयोरपि तदादेशः स्यात् । द्वयोरपि स्थानित्वानिर्णये सन्देहाभावात् " तस्माद्" इत्यस्य प्रवृत्तेर्दुर्घटत्वात् । विषयभेदोऽप्ययुक्तः । अत्र ह्यादेरित्यंशस्य विषयसद्भावात्तत्प्रवृत्तौ तेन सह " सर्वस्य " इत्यस्य विरोधोऽस्त्येव । प्रथमांशविकलस्यादेरित्यस्य प्रवृत्त्यनभ्युपगमात्प्रथमांशेन सह "सर्वस्य"इत्यस्य पृथग्विरोधस्यानपेक्षितत्वात् । न च तदेकवाक्यतापन्नस्य प्रथमांशस्य विशिष्टबाधात " सर्वस्य " इत्यनेन बाधेऽपि पुनः स्वतन्त्रस्यैव प्रवृत्तिरिति वाच्यम् । "गाङ्कुटादिभ्यः"इत्या-

दौ द्वितीयांशविषयाभावात्तत्र प्रवृत्त्यैव चरितार्थस्य तस्य स्वैकवाक्यतापन्नद्वितीयांशबाधोत्तरं स्वातन्त्र्येण प्रवृत्तौ मानाभावात्। एतेन सूत्रद्वयाविषये "सर्वस्य" इत्यस्य चारितार्थ्याभावोद्भावनमप्यपास्तम् । तदेकवाक्यतापन्नाद्वितीयांशनिर्मुक्तस्थले "अस्तेर्भूः" इत्यादौ चरितार्थतायाः स्पष्टत्वात् । केवलस्य "तस्मादित्युत्तरस्य" इत्यस्य "सर्वस्य" इत्यनेन समावेशेऽपि क्षत्यभावात् । तद्विशिष्टद्वितीयांशनिर्मुक्तविषये प्रवृत्त्यैव प्रकृतदोषनिर्वाहात् । तस्मात् " तस्मादित्युत्तरस्यादेः " इति न्यासेऽपि दोषाभाव इति प्राप्ते उच्यते—

एवं सत्यादेरित्यंशः "सर्वस्य" इत्येतद्बाधकः स्यात्, परत्वात्। ततश्च औशित्यादेशः अकारमात्रस्य स्यात् । "सर्वस्य" इत्यस्य " जराया जरस् " इत्यादौ अस्य च "बहोर्लोप" इत्यादौ चरितार्थत्वात् ।

अनेकाल्शित् सर्वस्य ५४ ।

अनेकालादेशः शिच्चेत्यन्यतरः सर्वस्य स्यात् । अस्तेर्भूः । भविता । इदम इश् । इतः । अत्र "हलन्त्यम् " इतीत्संज्ञायां प्रत्ययत्वस्यानपेक्षणात्सर्वादेशत्वं विनाऽपि शित्त्वसिद्धेः । अनेकाल्ग्रहणमपवादप्रतिषेधार्थमिति प्रागुक्तम् ।

यत्तु "जश्शसोः शिः" इति शित उदाहरणम् । तच्चिन्त्यम् । सर्वादेशत्वव्यतिरेकेण शित्त्वस्यैवासिद्धेः । सर्वादेशत्वे हि स्थानिवद्भावेन प्रत्ययसंज्ञा प्रत्ययैकदेशस्य प्रत्ययत्वाभावेन तदादेशस्य प्रत्ययत्वानुपपत्तेः । ततो "लशक्वतद्धिते " इतीत्संज्ञा । ततो लोपः । अनेकाल्त्वसम्पादनेन शकारस्य चरितार्थत्वात् । तत एकाल्त्वेऽपि न सर्वादेशत्वक्षतिः । उपजीव्यवि-

रोधात् । तस्मादनेकाल्त्वादेवात्र सर्वादेशः । न चैवमिशादौ अपि अनेकाल्त्वादेव सिद्धौ शिद्ग्रहणवैयर्थ्यम् । "नानुबन्धकृतमनेकाल्त्वम्" इति ज्ञापनार्थत्वात् । तेन "दिव उत्" "अत्रणस्तृ" इत्यादौ न सर्वादेशत्वम् ।

अनेकान्ता अनुबन्धा इति पक्षे तु नोक्तज्ञापनं सफलम् । शिद्ग्रहणं तु "घ्वसोरेद्धावभ्यासलोपश्च" इत्यत्र "लोपः श्" इति छेदे लोपस्य सर्वादेशत्वसम्प्रत्ययर्थं संज्ञायां कृतस्य शित्त्वस्य तत्रानुपयोगेन संज्ञिन्युपयोगकल्पनात्, ङमुटष्टित्त्ववत् ।

वार्तिकमते तु "नानर्थकेऽलोऽन्त्यविधिः" इत्येव सिद्धम् । न चानभ्यासविकारइति पर्युदासः । "भृञामित्" इत्यादि भावरूपस्यैव विकारस्योपादानात् । लोपस्य त्वतथात्वात् । अत एव "लोपागमवर्णविकारः" इति पस्पशायां भाष्यं सङ्गच्छते । "द्वौ चापरौ वर्णविकारनाशौ" इति च पृषोदरादिसूत्रे कैयटः ।

यत्तु एकान्तपक्षेऽपि उपदेशावस्थायामेवान्तरङ्गत्वात्संज्ञा, उच्चरितप्रध्वंसिनां स्मर्यमाणानामेवानुवन्धानां कार्यनिर्वाहकत्वमिति सिद्धान्तात् । तथा च तृ औत् इत्यादेरादेशस्य प्रवृत्तिवेलायामेकाल्त्वान्न सर्वादेशत्वप्रसङ्ग इत्युक्तज्ञापनस्य वैयर्थ्यं, सुतरां शिद्ग्रहणस्य । न च इश् ईश् इत्यादीनामपि सर्वादेशत्वानापत्तिः । तत्र पूर्वं लोपाप्रवृत्तेः शकारोच्चारणसामर्थ्यात् । न च सर्वादेशे कृतेऽपि प्रयोजनाभावाच्छकारस्य इत्संज्ञाऽनापत्तिरिति हरदत्तोक्तदोषप्रसङ्गः । लोपस्यैव प्रयोजनत्वात् । न चोच्चारणवैयर्थ्यम् । सर्वादेशत्वसंपादनेन सार्थक्यात् । तस्मादिह सूत्रभाष्यकृतोरभिप्रायश्चिन्त्य इति । तच्चिन्त्यम् । स्मर्यमाणैरेवानुबन्धैः कार्यान्तरस्येवानेकाल्त्वस्यापि प्रसक्तेर्दुर्वारत्वात् ।

यदपि " नानेकाल्शिद्" इति पठित्वा अन्त्यस्यादेः इति चानुवर्त्यानुसंहारद्वयानिषेधे " सर्वस्य " इति शक्यमकर्त्तुमिति, तदपि चिन्त्यम्। प्रतिपत्तौ गौरवस्य दुर्वारत्वात्। तथा हि–स्थानषष्ठीनिर्देशेन विधीयमानं कार्यं विनिगमकाभावादेव सर्वस्य सिद्धम्। तद्बाधित्वा "अलोऽन्त्यस्य" इत्यनेनान्त्यस्य विधीयते। तस्य च "आदेः परस्य" "अनेकाल्" इति द्वावपवादौ। "अनेकाल्" इत्यस्य "ङिच्च" इत्यपवाद इति वस्तुस्थितिः। उक्तरीत्या न्यासे च अनेकाल् शिच्चादेशोऽन्त्यस्यादेश्च न स्यादिति वाक्यार्थेऽवयवमात्रप्रतियोगिकत्वनिषेधेऽपि पुनर्न्यायसिद्धस्य सर्वप्रतियोगिकत्वस्यानुसन्धानमावश्यकम्। अतो लाघवात् "सर्वस्य" इत्येव युक्तम् ॥

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य
प्रथमे पादे सप्तममाह्निकम् ॥

स्थानिवदादेशोऽनल्विधौ ५५।

आदेशः स्थानिना तुल्यं वर्तते । स्वयं तत्कार्यं लभते परकीयं च तत् प्रवर्तयतीति यावत् । कार्यभाक्त्वेन सादृश्याश्रयणात् । कार्यभाक्त्वं च तत्प्रतियोगित्वनिमित्तत्वोभयरूपम् । केन काभ्यामित्यादौ किमः कादेशोऽङ्गकार्यं लभते। वृक्षायेत्यादौ तु ङेर्यादेशोऽङ्गस्य दीर्घं प्रवर्तयतीति विवेकः । उपदेशप्रवृत्तिव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगी धर्मश्चेत्स्थान्यलोऽसाधारणो न भवतीत्यर्थः ।

ननु वृक्षायेत्यत्र स्थानिन एकारस्य अल्रूपत्वात्स्थानिवत्त्वं न स्यादिति चेन्न । अत्र हि यादेशस्य सुप्त्वाभावप्रयुक्तः "सुपि च" इत्येतत्प्रवृत्त्यभावः। तदर्थश्चातिदेशानुसारः । सुप्त्वं च यद्यपि एकाररूपेऽलि वर्त्तते, तथाऽपि अलोऽसाधारणं न भवति। भ्यामित्यादौ समुदायएव सुप्त्वस्य पर्याप्त्याऽल्मात्रवृत्तित्वाभावात् । नन्वलतिरिक्तवर्णावृत्तित्वं तथाऽप्यक्षतम् । तादृशवर्णाप्रसिद्धिश्चेति चेन्न । अल्त्वपर्याप्त्यधिकरणताव्याप्यस्वपर्याप्त्यधिकरणताकत्वस्य तदर्थत्वात् । न हि यत्र सुप्त्वपर्याप्त्यधिकरणता भ्यामादिसमुदाये तत्राल्त्वपर्याप्त्यधिकरणता । अल्त्वस्य प्रत्येकव्यासक्तत्वात् ।

ननु दीर्घत्वे यञादावित्यलाश्रयणात् तथाऽपि स्थानिवत्त्वं न स्यात्, मैवम् । अत एव स्थानिसम्बन्धित्वेन अलो विशेषितत्वात् । न ह्यत्र यादेशस्य यञादित्वव्यतिरेकप्रयुक्त उपदेशप्रवृत्तिव्यतिरेकः। तस्य स्वत एव यञादित्वात् । एतेन "अरु-

दितामरुदितमित्यादौ "रुदादिभ्यः सार्वधातुके" इतीडागमोऽपि व्याख्यातः । उपदेशप्रवृत्तिव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगिनः सार्वधातुकत्वस्य उक्तांशमात्रवृत्तित्वाभावात्, वलादित्वस्य च तामाद्यादेशेषु स्वाभाविकत्वात् । न चाविशेषादादेशसंबन्धिनोऽप्यल आश्रयणे उक्तनिषेधः स्यादिति वाच्यम् । अतिदेशेन सहैकवाक्यतामापन्नस्य प्रतिषेधस्यातिदेशिकीं प्राप्तिं प्रत्येव प्रवृत्तेः । अत एव "गुरुवद् गुरुपुत्रे वर्त्तितव्यमन्यत्रोच्छिष्टभोजनात्पादोपसङ्ग्रहणाच्च" इत्यतिदेशे उच्छिष्टभोजनादिनिषेधोऽतिदेशप्राप्तएवोच्छिष्टभोजनादौ प्रवर्त्तते. न तूपदेशप्राप्ते । गुरुपुत्रे गुरुत्वस्यापि सद्भावे तन्निमित्तकस्य तद्भोजनादेः प्रवृत्तेः । न च तत्रातिदेशस्यांशतोऽपि नाकाङ्क्षा, अत्र तु सार्वधातुकत्वाभावादिडागमप्रवृत्त्यर्थं तदपेक्षावश्यकत्वमिति वाच्यम् । अंशांशे उपजीव्योपजीवकभावस्याप्रयोजकत्वात् । प्रदीव्येत्यादौ तु ल्यबादेशस्य स्वतो वलादित्वाभावात् तत्प्रयुक्तोऽप्युपदेशप्रवृत्त्यभावः इति वलादित्वार्थमप्यातिदेशानुसारात्प्रतिषेधः । विशेषणतयाऽप्यलाश्रयणे तत्प्रवृत्तेर्वक्ष्यमाणत्वात् । न चैवं कित्त्वमपि न लभ्येतेति वाच्यम् । अनेकान्तपक्षेऽनुबन्धानां स्थान्यवयवत्वाभावात् । एकान्तपक्षेऽप्यन्तरङ्गत्वात्पूर्वमेव लोपात् आदेशकाले तदसम्बन्धात् । अत एव " न ल्यपि" इति निषेधः सङ्गच्छते । अन्यथा कित्त्वाभावादेवेत्वाप्रसक्तौ तद्वैयर्थ्यात् । इदमेव विशेषातिदेशेऽपि ज्ञापकम् । अन्यथा सामान्यातिदेशे विशेषस्यानतिदेशात् प्रदीव्येत्यादौ कित्वातिदेशो न स्यात् । कित्त्वं हि न क्त्वासामान्यधर्मः । "न क्त्वा सेट्" इति क्वचित्तत्प्रतिषेधात् । अत एव "आशंसायां भूतवच्च" इत्ययं लुङ एवातिदेशो, भूतसामान्ये तस्य विहितत्वात्,

न तु भूतविशेषविहितयोर्लुङ्लिटोरिति सिद्धान्तः ।

प्राञ्चस्तु अनल्विधाविति निषेध एव विशेषातिदेशे ज्ञापक इत्याहुः ।

यत्तु व्यूढोरस्केन क इष्ट इत्यादौ विसर्गत्वयत्वयोर्व्यापकं यद् अट्त्वं हश्त्वं च तयोर्निषेधेन चरितार्थोऽनल्विधाविति निषेध इति । तच्चिन्त्यम् । विसर्गत्वयत्वापेक्षया अट्त्वं हश्त्वं च विशेषधर्माविति तत्प्रसक्तेरेव विशेषातिदेशं विनाऽनुपपत्तेः । नन्वट्त्वहश्त्वे सामान्यधर्मौ, विसर्गत्वयकारत्वावच्छिन्नसकलवर्णव्यक्तिवृत्तित्वे सति तदतिरिक्तवृत्तित्वात् । विसर्गत्वयत्वे तु विशेषधर्मौ, अट्त्वहश्त्वावच्छिन्नो यो विसर्गयकारातिरिक्तवर्णस्तन्निष्ठात्यन्ताभावप्रतियोगित्वादिति चेन्मैवम् । न ह्यत्र तद्रूपावच्छिन्नकिञ्चिद्व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगित्वरूपसामान्यत्वम्, तद्रूपावच्छिन्नकिञ्चिद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगित्वरूपं च विशेषत्वं विवक्षितम् । मानाभावात् ।

किं त्वातिदेशवाक्ये वतिप्रकृत्यर्थतावच्छेदकत्वं सामान्यत्वम् । ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यादौ तथैव बोधात् । तथा च विसर्गवत्सकार इति पर्यवसितातिदेशवाक्ये विसर्गत्वादेरेव तथात्वात् अट्त्वादेर्नातिदेशः । स्थानित्वादेशत्वाभ्यां सूत्रे तत्तद्व्यक्तीनामनुगमेऽपि अतिदेशवाक्यानां स्थान्यादेशभेदेन भिन्नत्वात् ।

यत्तु कित्त्वं क्त्वासामान्यधर्मो न भवतीति, तन्न । "न क्त्वा सेट्" इत्यनेन कित्कार्यनिषेधेऽपि ककारस्य इत्संज्ञाया अनिषेधात् । अन्यथा तत्र ककारश्रवणापत्तेः । न च ककारस्यैवातिदेश्यत्वात् कित्कार्यप्रवर्तकत्वं न क्त्वासामान्यधर्म इति दोषतादवस्थ्यम् । ब्राह्मणत्वपुरस्कारेण प्रवृत्तानामपि धर्माणां

ब्राह्मणत्वावच्छेदेन प्रवृत्तिनियमाभावात् पतितब्राह्मणादावभावात्। बाधवशात्फलानुपधानेऽपि तत्तत्कार्यप्रयोजकरूपावच्छिन्नत्वं तत्रास्त्येवेत्यपि तुल्यत्वात् । तस्माद्वृक्षायेत्यादौ स्थानिवद्भावो भवत्येवेति सिद्धम् ।

यद्यपि कार्यकालपक्षे यादेशे सुप्संज्ञाया एवातिदेशः । तस्या अपि शास्त्रीयत्वात् । तत्र चाल्विधित्वशङ्कैव नास्ति । ततः "सुपि च" इत्युपदेशेनैव दीर्घसिद्धिः । तथाऽपि यथोद्देशपक्षमाश्रित्यैतदुक्तम् ।

अथ वत्करणं व्यर्थम् । परत्र परशब्दप्रयोगे विनाऽपि वर्ति तदर्थप्रत्ययात्। "असंयोगाल्लिट् किद्" इत्यादौ, मुखं चन्द्र इत्यादौ लोके,मासमग्निहोत्रं जुहोतीत्यादौ दर्शनान्तरे च तथा स्वीकारात् । न चादेशस्थानिपदयोः सामानाधिकरण्ये आदेशस्य स्थान्यादेशो भवतीति वाक्यार्थपर्यवसानसंभवादादेशस्य स्थानिरूपत्वापत्तिः । आदेशविधिवैयर्थ्यात्। न च वचनद्वयप्रामाण्याद्विकल्पः। "वा लिटि" इत्यस्य वैयर्थ्यात् । न च चक्षिङो लिट्येव ख्याञादेशविकल्प इति नियमार्थं तत् । "विभाषा लुङ्लृङोः" इत्यादौ विभाषाग्रहणवैयर्थ्यात् । अप्राप्तविभाषात्वेन ख्याञादेशविधानमात्रादेव सिद्धेः। अस्तिभूभ्यां रूपद्वयसिद्धौ "अस्तेर्भूः" इत्यादिवैयर्थ्याच्च ।

अत्राहुः–तथात्वे स्थानी आदेशस्य संज्ञा स्यात् । संज्ञासूत्राणां प्रस्तावात् । ततश्च "आङो यमहनः" इत्यात्मनेपदं वधेरेव स्यान्न तु हन्तेः । न च स्वरूपस्यापि ग्रहणम् । "अशब्दसंज्ञा" इति निषेधात्। न च तथा सत्यादेशस्य प्रथमनिर्देशापत्तिरुद्देश्यत्वादिति वाच्यम् । "व्यवहाराय नियमः" इति पक्षे संज्ञाया एवोद्देश्यत्वात् । न चैवं वधिग्रहणमेव कुर्यादिति वा-

च्यम् । वध हिंसायामिति भौवादिकस्यापि ग्रहणापत्तेः । स्थानिन आदेशसंज्ञेत्यर्थेऽपि "अस्यतिवक्तिख्यातिभ्योऽङ्" इत्यत्र ख्यातिपदेन चक्षिङ एव ग्रहणापत्त्या समचाक्षिष्टेत्यत्राङ् स्यात्, अख्यतेत्यत्र तु न स्यादित्यनिष्टं दुर्वारम् ।

अथैवं चक्षिङ् इत्येव ब्रूयादनुबन्धनिर्देशात् यङ्लुग्व्यावृत्तेरिति चेत्, सत्यम् । तथाऽपि गाङ्कुटादिसूत्रे "गाङः" इतीङो ग्रहणाय स्थानिमात्रग्रहणे इङित्येव वाच्यत्वात् । "गमेरिट् परस्मैपदेषु" इत्यत्र तु इण् गतौ इङ् अध्ययने इक् स्मरणे इत्येतेषामेव ग्रहणं स्यात् । स्थानिनां बहुतया विपरीतगौरवापत्त्याऽऽदेशग्रहणस्य स्वरूपतो गमेर्ग्रहणे लिङ्गत्वायोगात् । न चैवं प्रकरणान्तरएवेदं सूत्रमारभ्यताम्, वत्करणपरित्यागाधीनलाघवानुरोधादिति वाच्यम् । तथा सत्यादेशपदग्रहणावश्यकत्वे तस्यानुमानिकादेशसङ्ग्रहार्थत्वानुपपत्तेः। काममतिदिश्यतां वा सच्चासच्चेति वक्ष्यमाणस्यापि वत्करणं विनाऽनुपपत्तेश्च ।

स्यादेतत् । एवं सत्यन्यत्र संज्ञाप्रकरणे वतिं विना कथमतिदेशलाभः, कित्ङित् इत्यादाविति चेन्मैवम् । "न क्त्वा सेट्" इति निषेधेन कित्त्वस्य संज्ञात्वाभावसिद्धेः । तस्य कित्संज्ञाया अप्राप्ततया निषेधानर्हत्वात् । न च "मृडमृद" इत्यादिना प्रसक्ताया निषेधः, वचनद्वयप्रामाण्याच्च विकल्पोऽस्त्विति वाच्यम् । "मृड" इत्यादौ वावचनेनैव तत्सम्भवात् । "निष्ठा शीङ्" इत्यादिवैयर्थ्याच्च । तत्र केनापि कित्संज्ञाया अप्राप्तेः । अत एव ङित् इत्यप्यतिदेशः, कित्साहचर्यात् । तस्य संज्ञात्वे ग्रहिज्यादिसूत्रेऽस्यैव ग्रहणापत्त्या वावश्यतइत्यत्र सम्प्रसारणप्राप्त्यभावात् "न वशः" इति निषेधवैयर्थ्यापत्तेः ।

"कुङिति च" इत्यत्र क्ङितीत्यर्थावश्यकतया संज्ञास्वरूपानुच्चारणात् उक्तसंज्ञाया अग्रहणात्। "गाङ्कुटादिभ्यः" इत्यत्र कुटादिग्रहणवैयर्थ्याच्च। "बहुगण" इत्यत्र तु महासंज्ञाकरणानुपयोगादतिदेशः, "क्किनौ लिङ् च" इत्यादौ तु संज्ञाप्रकरणाभावादिति दिक्।

नन्वादेशग्रहणं व्यर्थम्। स्थानिशब्दस्य ससम्बन्धिकतया स्थानिवदित्येतावतैव लाभात्, पितृवदधीतइत्युक्ते पुत्रवत्। सत्यम्। तथा सति "अस्तेर्भूः"इत्यादेः प्रत्यक्षस्यैव आदेशस्य स्थानिवत्त्वं स्यात्, न त्वानुमानिकस्य तेस्तुरित्यादेः। आदेशग्रहणसामर्थ्याच्चूभयत्र स्थानिवद्भावः। तथा चैकदेशविकृतस्योपसंख्यानमनारभ्यमिति लाघवम्। तथा हि—"एरुः" इत्यत्रेकारोकाराभ्यां स्थान्यादेशाभ्यां तदन्तौ तावनुमीयेते। तथा च तेस्तुरिति फलितोऽर्थः। न च इकारमात्रस्योत्वेऽप्येकदेशविकृतस्यानन्यत्वात्पदसंज्ञा भविष्यतीति वाच्यम्। अर्थवत्येव स्थान्यादेशभावविश्रामात्। स्थानं प्रसङ्गरूपस्तस्य चानर्थकेऽनुपपत्तेः। प्रत्यायनार्थस्य प्रयोगस्यार्थवत्येव सम्भवात्। "च्लेः सिच्" इत्यादौ तदभावेऽपि सम्भवतस्त्यागायोगात्। तदुक्तं वार्त्तिककृता—

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥

पदेत्यर्थवत्परम्। तथा च वस्तुनो विकारो नास्त्येव। किन्तु तादृशप्रयोगेऽन्यादृशः प्रयोक्तव्य इति शास्त्रार्थे स्थान्यपगमः आदेशोपजनश्चेति बुद्धिमात्रमिति भावः। यद्वार्तिकम्—

कार्यविपरिणामाद्वेति।

कार्यपदं ज्ञानपरम्। तथा च तद्विधिप्रयुक्तव्यतिरेकप्रति-

योगित्वं स्थानित्वम्, तद्व्यतिरेकप्रयोजकविधिविधेयत्वं चादेशत्वमिति फलितोऽर्थः ।

अथैवमपवादेऽप्युत्सर्गकृतं स्यात् । अन्यप्रसङ्गेऽन्यविधानस्य तत्रापि सत्त्वेन स्थान्यादेशभावसत्त्वात् । तथा च कप्रत्ययान्तादप्यणन्तत्वप्रयुक्तो ङीप्स्याद्, एवमन्यत्रापीति चेद् अत्र वार्त्तिकम्—

सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनादिति ।

"षष्ठी स्थानेयोगा" इत्यतः षष्ठ्यनुवृत्तेरित्यर्थः। अपवादस्य च षष्ठीनिर्दिष्टस्थाने विध्यभावात् । "नाभि नभं च" इत्यादौ षष्ठ्यर्थे प्रथमा । विश्रवणरवणेत्यादयस्तु प्रत्ययविषया भिन्ना एव शब्दाः । विश्रवःशब्दात्तु न प्रत्ययोऽनभिधानात् । एतेन वृद्धिसंज्ञासूत्रे षष्ठीनिर्दिष्टस्य स्थाने आदेशा भवन्तीति भाष्यं यथाश्रुतमेव व्याख्यातम् । कैयटेन तु स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमित्येवंपरतया व्याख्यातम् । तस्यायमाशयः—

"सनाद्यन्ता" इति सूत्रे भाष्यकृतोक्तं स्थानिवदित्यत्र षष्ठीग्रहणं निवृत्तम् । न चापवादेऽप्युत्सर्गप्रसङ्गः । शबाद्यपवादानां श्यनादीनां शित्करणेन तदभावज्ञापनादिति । अन्यथा सनाद्यन्तसूत्रप्रत्याख्यानानुपपत्तेरिति । एतत्सूत्रेऽप्येवम् ।

अथ पित्त्वनिवृत्त्यर्थं शित्त्वमस्तु । ननु नित्त्वादेव तत्सिद्धिः । तद्ध्याद्युदात्तार्थम् । स्थानिवद्भावात्पित्त्वे तु विकरणस्यापि तथात्वादनुदात्तत्वे "तास्यनुदात्तेन्ङिददुपदेशाद्" इति लादेशसार्वधातुकस्यानुदात्तत्वे धातुस्वरेणैव परिशेषादाद्युदात्तत्वं स्यात् । दिवादिगणेऽनेकाचो धातोरभावात्तत्र धातुस्वरेणान्तोदात्तत्वप्राप्तावाद्युदात्तार्थं नित्त्वमिति वक्तुमशक्यत्वात् । न च वावृतु वर्त्तने इति धातुरनेकाच् । तत्र वाशब्दस्य श्यन्वि-

कल्पार्थकतया धात्वनन्तर्भावात् ।

ततो वा नृत्यमाना सा रामशालां निरैक्षत ।

इति भट्टिप्रयोगे इवार्थे वाशब्दमाश्रित्य कामयमानेवेत्यर्थात् । न च भूवादिपाठादेव तत्सिद्धिः । "वृद्भ्यः स्यसनोः" इत्याद्यन्तर्गणकार्यार्थतयाऽप्युपपत्तेः । मैवम् । ताच्छील्यादौ चानशि प्रकृतेराद्युदात्तार्थतया नित्त्वस्य सार्थक्यात् । तत्र लादेशत्वाभावादनुदात्तस्याभावे चित्स्वरादन्तोदात्तप्राप्तेः । न चैवं श्यनो नित्त्वेऽपि चित्स्वरस्य दुर्वारत्वम् । नित्स्वरस्य सतिशिष्टत्वात् । न च "अन्यत्र विकरणेभ्यः" इति पर्युदासः । "सौवर्यः सप्तम्यस्तदन्तसप्तम्यः" इति विकरणान्तस्यायं स्वरो, न तु विकरणस्येति तदप्रवृत्तेः । नन्वेवं "दावेवायं न दैवास्ति" इतिघुसंज्ञासूत्रस्थभाष्यविरुद्धम् । दायमान इति शप्यन्तोदात्तम्, श्यनि त्वाद्युदात्तमिति फलभेदापत्त्या दिवादिपाठस्य दुर्वचत्वात् । मैवम् । अनभिधानात् इह चानशेव नास्तीति ।

यद्वा—आद्युदात्तत्वमेवेष्टम् । "यथोत्तरं मुनीनां प्रामाण्यम्" इति स्वीकारात् । उक्तभट्टिप्रयोगाद्वाशब्दो धात्वन्तर्भूत इति मते तु तस्याद्युदात्तविषयकतया स्पष्टमेव चरितार्थत्वम् । न हि चानशि आद्युदात्तत्वं लभ्यते । पर्युदासस्य विकरणप्रयुक्तस्वरमात्रविषयकत्वमिति "आत्ममाने खश्च" इतिसूत्रस्थभाष्यकैयटसिद्धत्वात् । खशन्तइव चानशन्तेऽप्यन्तोदात्तत्वस्य दुर्लभत्वात् ।

यत्त्वत्र सूत्रे कैयटेनोक्तम्—दायमान इति चानशि प्रकृतेराद्युदात्तार्थं नित्त्वमिति, तद् अभ्युच्चयमात्रम् । तस्मान्नियमार्थं शित्त्वं पित्त्वनिवृत्त्यर्थमिति कथं तस्यापवादे उत्सर्गकृतं नेति ज्ञापकत्वमिति पूर्वपक्षः ।

अत्र कैयटः—लक्ष्यानुरोधात्सामान्यापेक्षज्ञापकमेव शित्त्व-

माश्रीयते, न तु नियमार्थमिति ।

यद्वा—कापवादस्य टकः कित्त्वमुक्तेऽर्थे प्रमाणम् ।

अनल्विधाविति किम् तेन तस्मात्तस्यत इमश्च विधौ मा भूत् । अला विधौ यथा-महोरस्केन।सकारस्य स्थानिवद्भावेन विसर्जनीयस्याट्कुप्वादेशाणत्वं स्यात् । अलः परस्य विधौ यथा—द्यौः पन्थाः सः । औत् आत् अकारश्चेत्येतेषां हल्स्थानीयत्वेन "हल्ङ्याब्" इति सुलोपः स्यात् । अलो विधौ यथा—द्युकामः । "दिव उद्" इत्युकारादेशस्य स्थानिवत्त्वेन वकाररूपत्वाद् "लोपो व्योः" इति लोपः स्यात् । न चोत्वविधानसामर्थ्यम् । अहर्विमलद्यु इत्यादौ वल्परत्वाभावे चरितार्थत्वात् । अलि परतो विधौ यथा—क इष्टः। इकारस्य स्थानिवद्भावेन सोर्हश्परत्वात् " हशि च " इत्युत्वं स्यात् । स इत्यत्र त्वकारस्य स्थानिवत्त्वे हल्परत्वात्सोर्लोपः स्यात् । उक्तानेकसमासलाभार्थं च विधिग्रहणम् । न चानल् इत्येवोच्यतां साधुत्वार्थं प्रथमाप्रयोगेऽपि तदर्थस्याविवक्षितत्वात् । यद्वा—अल इत्युच्यताम् । अनुवादतया स्थानेयोगाभावात्षष्ठ्याः सम्बन्धसामान्यार्थकतया उक्तविभक्त्यर्थोपसंग्रहसिद्धेरिति वाच्यम् । अप्राधान्येन अलाश्रयणे स्थानिवत्त्वनिषेधार्थं विधिपदोपादानात् । तेन प्रदीव्येत्यादौ वलादेरित्यार्द्धधातुकान्यपदार्थविशेषणतयाऽलाश्रयणेऽपि न स्थानिवत्त्वम् । अन्यथा " हशि च" इत्यादौ प्राधान्येन यत्रालुपात्तस्तत्रैव तन्निषेधात्। विधिग्रहणे त्वलाश्रयो विधिरल्विधिरिति उत्तरपदलोपाश्रयणात् विशेष्यतया विशेषणतया वाऽलाश्रये निषेधप्रवृत्तिः । आश्रीयतइत्याश्रयः, एरच् । "अलमाश्रयते" इति भाष्यं त्वर्थप्रदर्शनार्थं, कर्मण्यणः प्रसङ्गात् । अलाश्रयपरत्वादाश्रयशब्दस्य

गतार्थत्वादप्रयोग एव लोप इति कैयटः ।

नन्वेवं स्थान्यनुबन्धकार्याणामपि निषेधापत्त्या प्रदीव्ये- त्यादौ कित्त्वं न लभ्येतेति चेन्मैवम् । अनेकान्तत्वपक्षे तेषां स्थान्यल्त्वाभावात् । एकान्तत्वपक्षेऽपि पूर्वमेव लोपात् । " न ल्यपि " इति लिङ्गाच्च । अन्यत् प्रागुक्तम् ।

स्यादेतत् । तस्थानापन्नस्तद्धर्मं लभतइति न्याये नैव गतार्थत्वादिदं सूत्रमनारभ्यम् । अत एव नीवारेषु व्रीहिधर्मा अवघातादयः प्रवर्तन्ते । मैवम् । व्रीहीनवहन्तीत्यादौ व्रीह्यादिप- दानामपूर्वसाधने लाक्षणिकतया तदपूर्वसाधनत्वान्नीवारादौ तत्प्रवृत्तावपि " आङो यमहनः " इत्यात्मनेपदस्य हन्तिस्व- रूपमात्रविषयकतया वधादेशे प्रवृत्त्ययोगात् । " स्वं रूपं श- ब्दस्य" इति परिभाषितत्वात् । अन्यथा आतृणेढीत्यादावपि प्रसङ्गात् ।

स्यादेतत् । अस्तु ज्ञापकादेव गतार्थं सूत्रम् । " युष्मद- स्मदोरनादेशे " इत्यत्रानादेशग्रहणेनादेशः स्थानिवदित्यस्य " अदो जग्धिः " इति सूत्रे कितीत्यनेनैव सिद्धे ल्यब्ग्रहणेन चानल्विधावित्यंशस्य ज्ञापयितुं शक्यत्वात् । अत एव विशेषण- तयाऽप्यलाश्रयणे न स्थानिवदित्यस्यापि सिद्धिरिति । स- त्यम् । उत्तरसूत्रे स्थानिवदादेश इत्यस्यावश्यकतया योगविभा- गेन तदारम्भः, अर्थापत्त्यनुसारे गौरवात् । अनल्विधावित्यपि स्पष्टार्थम्, उत्तरसूत्रे द्वितीयविधिग्रहणानुवृत्त्यर्थं च । फलस्य तत्रैव वक्ष्यमाणत्वात् ।

स्यादेतत् । निमित्तशास्त्रव्यपदेशरूपतादात्म्यकार्याण्यति- देशभेदाः स्युः। पूर्ववत्कर्मवदादिवत्तृज्वत्पराङ्गवद्गुणिवद्दिति क्र-

मातवद् । " पूर्ववत्सनः " इति निमित्तातिदेशः । यद्यपि ब्राह्मणादेरग्रभोजननिमित्तस्य ब्राह्मणत्वादेः क्षत्रियादावतिदेशोऽशक्यः, तथाऽपि " पूर्ववत् " इति प्रकृतिगतं ङित्त्वं हि न सन्नन्तेऽतिदिश्यते, किं तु प्रकृतिगतमेव सन्व्यवधानेऽप्यात्मनेपदं प्रवर्त्तयतीत्येतावता निमित्तातिदेशव्यवहारः । न चायं कार्यातिदेश एवेति वाच्यम् । चिक्रंसते प्रचिक्रंसते इत्यादाविट्प्रसङ्गात् । निमित्तातिदेशे तु क्रमिरेव सना व्यवहितोऽप्यात्मनेपदप्रयोजक इति " स्नुक्रमोरनात्मनेपदनिमित्ते " इति नियमान्नेट् । फलोपहितनिमित्तस्यैव तत्र ग्राह्यत्वात् । शास्त्रातिदेशः "कर्मवत्कर्मणा" इत्यत्र पाक्षिकः । व्यपदेश "आद्यन्तवद्" इति । एकस्मिन्नादित्वान्तत्वप्रकारकव्यवहारेऽतिदिष्टे तत्तत्सूत्रैरेव कार्यसिद्धेः ।

तथा च प्राञ्चः—आद्यन्तवद्व्यपदेशो, निमित्तम् "पूर्ववत्सन" इति। रूपातिदेशस्तृज्वत् इति। क्रोष्टुशब्दस्थाने क्रोष्टृशब्दस्य विधानात् । तादात्म्यातिदेशः "सुबामन्त्रिते पराङ्गवत्स्वरे" इति । "यत्ते दिवो दुहितर्मर्तभोजनम्" इत्यत्र दिवोदुहितरिति समुदाये आमन्त्रितनिघातप्रवृत्तेः । कार्यातिदेशो " गोतो णित् " इत्यादि । तदेवं षोढाऽतिदेशे कार्यातिदेशोऽयमित्यत्र किं नियामकमिति। मैवम् । "सिद्धन्त्वात्मनेपदेन समानपदस्थस्येट्प्रतिषेधाद्" इतिवार्त्तिकरीत्या पूर्ववदित्ययमपि कार्यातिदेशः । क्रमेरात्मनेपदस्य च समानपदस्थलउक्तनियमप्रवृत्तिः । आत्मनेपदं तु प्रक्रंस्यतइत्यादौ "प्रोपाभ्यां समर्थाभ्याम् " इत्यनेन प्रचिक्रंसतइत्यादौ "पूर्ववत्सनः" इत्यनेन इति विशेषेऽप्येकपदस्थत्वस्य तुल्यत्वादुक्तनियमप्रवृत्तेः । आद्यन्तवदित्ययमपि तथा। हरदत्तादिस्वारस्यात् । कुरुते कुर्वे इत्यादौ "आ-

ग्धन्तव्यपदेशेऽपि अन्त्योऽच् आदिर्यस्येति बहुव्रीह्यर्थस्याभावा-त् टिसंज्ञाविरहे एत्वानुपपत्तेः कुर्वीतइत्यादिस्थलीयस्य टे-रेत्वाख्यकार्यस्यातिदेशादेव तत्रेष्टसिद्धेः।

शास्त्रातिदेशोऽपि पाक्षिक एव। तादात्म्यातिदेशस्तु आ-देशेन स्थानिनोऽपहाराद् बाधितः। तादात्म्यप्रतियोगिनोः स-मानकाल एव तत्प्रवृत्तेः। रूपातिदेशे त्वादेशविधिवैयर्थ्यम्। विकल्पस्य पूर्वोक्तरीत्याऽसम्भवात्। तस्मात्प्राधान्यात्कार्या-तिदेश एवायमिति स्थितम्।

न्यासकारस्तु व्यपदेशातिदेशः संज्ञापक्षे पर्यवसन्नः। स च वत्करणसामर्थ्यादेव नेत्याह। अत्र हरदत्तः—

"संज्ञापक्षे वधेरेवात्मनेपदं स्यान्न तु हन्तेः। शब्दसंज्ञात्वात् "स्वं रूपम्" इत्यस्याप्रवृत्तेः। एवं केन कस्मादित्यादावङ्ग-कार्यादीनि न स्युरिति दोषद्वयम्। व्यपदेशातिदेशे तु "स्वं रूपम्" इति हन्तिग्रहणम्, तद्व्यपदेशातिदेशाच्च वधेरपि। एवं स्थानिनिष्ठानां धात्वङ्गादिव्यपदेशानां काद्यादेशेऽतिदेशात्तत्का-र्यसिद्धिरिति वैषम्यात् न तथा" इति। अत्र वार्तिकानि—

तस्य दोषः-तयादेशउभयप्रतिषेधः। जात्याख्यायां वचना-देशस्थानिवद्भावप्रतिषेधः। ङ्याब्ग्रहणेऽदीर्घः। आहिभुवोरीट्-प्रतिषेधः वध्यादेशे वृद्धितत्वप्रतिषेधः इड्विधिश्च। आकारान्ता-न्नुक्पुक्प्रतिषेधः। लोडादेशशाभावजभावधित्वहिलोपैत्वप्रतिषे-धः। त्र्यादेशे स्रन्तस्य प्रतिषेधः। आम्विधौ च स्वरे वस्वादेशे प्रतिषेधः। गोः पूर्वत्वणित्वात्वस्वरेषु। करोतिपिबत्योःप्रतिषेधः।

तस्य स्थानिवदादेश इति लक्षणस्य। तत्र प्रथमवार्तिके यद्वक्तव्यं तत्सर्वादिसूत्रएवोक्तम्। द्वितीयमपि व्यर्थम्। न च व्रीहिभ्य इत्यत्रैकवचनस्थाने बहुवचनादेशविधानात्स्थानिवद्भा-

वात् "घड़िति" इति गुणापत्तिः । अर्थातिदेशस्यैव तत्रोक्तत्वात् ।

तृतीयस्य त्वयमर्थः—निष्कौशांबिः अतिखट्व इत्यत्र ङ्याब्ग्रहणात्सुलोपः प्राप्तो निषेध्यः स्यात् । तस्मान्ङी ई आ आप् इति प्रश्लिष्य दीर्घेति प्रत्याख्येयम् । अतिखट्वेनेत्यादावपि नातिप्रसङ्गः । आपो ग्रहणे सर्वत्राकारप्रश्लेषात् । न चैवमप्यतिखट्वायेत्यत्र याटः प्रसङ्गः । स्वाश्रयस्यात्वस्य स्थानिवद्भावेन चाप्त्वस्य सत्त्वादिति वाच्यम् । आबन्तं यदङ्गं ततः परस्य याडिति व्याख्यानात् । प्रत्ययग्रहणे यस्मात् स विहितस्तदादेरेव ग्रहणात् । उपसर्जनस्त्रीप्रत्यये तदादिनियमसत्त्वात् । अतिखट्वेत्येतत्समुदायस्य आबन्तत्वाभावात् । खट्वाइत्यस्याङ्गत्वाभावात् । अतिखट्वशब्दादेव तत्र सुबुत्पत्तेः । तथा चाङ्गत्वाबन्तत्वयोः सामानाधिकरण्याभावान्न दोष इति सिद्धम् । अत एवातिकारीषगन्ध्यापुत्र इत्यादौ सम्प्रसारणं न । हल्ङ्यादिसूत्रे तु विहितविशेषणाश्रयणे सेत्यादावव्याप्तिः । यः स इत्यादावतिव्याप्तिश्चेति न प्रश्लेषवैयर्थ्यम् । वार्तिकमतेऽपि "याडापः" इत्यादावाकारप्रश्लेषावश्यकत्वात् । अन्यथाऽतिखट्वायेत्यादावङ्गाधिकारात्समाधानेऽपि जरसा नसे पृते इत्यादौ दोषस्य दुर्वारत्वात् । सुनामिच्छन्सुनीरित्यादौ सुलोपापत्तेश्च ।

यद्वा—आकारमपि प्रश्लिष्य तत्सामर्थ्यान्मध्ये ह्रस्वतामापन्नस्य वारणमिति बोध्यम् ।

चतुर्थवार्तिकमपि व्यर्थम् । न चात्थेत्यत्राऽऽहादेशस्य स्थानिवद्भावेन "ब्रुव ईट्" अभूदित्यत्र अस्त्यादेशभुवः "अस्तिसिचोऽपृक्ते" इतीट् च स्यादिति वाच्यम् । "आहस्थः" इति झलि परे थत्वविधानाज्ज्ञापकात् । न च ईटि कृतेऽपि भूतपूर्व-

गत्या झलादित्वात् थादेश इति वाच्यम् । आथादेशस्यैव विधानापत्तेर्लाघवात् । तिबाद्यादेशानां णलादीनामपि भूतपूर्वगत्या झलादित्वात् तत्रापि थादेशस्य दुर्वारत्वात् । द्वितीयदोषस्यापि "अस्तिसिचोऽपृक्ते" इत्यत्र द्विसकारकनिर्देशेन सकारान्तादेवास्तेः परस्यापृक्तसार्वधातुकस्य ईडागमविधानमिति वारणात् ।

स्यादेतत् । अस् इत्यनन्तरं सकारप्रश्लेषे धातुत्वाभावात्तिब् न स्यादिति माधवोक्तदोषापत्तिः । धात्वन्तःपातिना सकारेण सिचोऽन्वयानर्हतया सिज्निमित्तकस्य ईटः प्रसङ्गश्च । न चैवमस्तेः सकारान्तत्वेन विशेषणवैयर्थ्यम् । तथाऽपि स्वतन्त्रे भवतौ दोषस्य तादवस्थ्यात् । एतेन सिच्च अस् च सिचस् समाहारद्वन्द्वे सौत्रः पञ्चमीलोपः । भत्वान्न कुत्वजत्वे । अस्ति विद्यमानं च तत्सिचस् चेति कर्मधारयः । तेन लुप्तात्सिचो भूभावेनापहृतादस्तेश्च परस्य नेति कल्पनं प्रत्युक्तम् । रूपसिद्धावपि भाष्योक्तेरनिर्वाहात् । अत एव सिचोऽल्पाच्कत्वाद्बहुविषयतयाऽभ्यर्हितत्वाच्च पूर्वनिपातप्राप्तावपि तदकरणं तन्त्रादिना विद्यमानसिच इत्यर्थलाभार्थम् । तिप्रयोगस्वारस्याच्च । अन्यथा सिचस्भ्यामित्येव ब्रूयात् । न चासत्यस्यत्योरतिप्रसङ्गः । विकरणव्यवधानेन ताभ्यां परस्यापृक्तसार्वधातुकस्यासंभवादिति माधवोक्तमप्यपास्तम् ।

अत्र वदन्ति । अस्तिसिचस्स् इतिच्छेदः । सान्तादस्तेः न तु कृतभूभावात् सान्तात्सिचः श्रूयमाणादिति यावत् । न चैवं "सिचोऽपृक्ते" इति संहितानुपपत्तिः । द्वितीयस्य संयोगान्तलोपात् संयोगान्तं यत्पदन्तस्येति पक्षे तदभावेऽपि संयोगान्तस्य पदान्तस्येति पक्षे सौलभ्यात् । तस्याप्याकरारूढत्वात् । न च

तस्यासिद्धत्वाद्रोरुत्वानापत्तिः । "संयोगान्तलोपो रोरुत्वे" इति सिद्धकाण्डे पाठात् । एतन्निर्देशस्यैव च तद्वार्त्तिकार्थे मूलत्वात् । यद्वा—माऽस्तु संयोगान्तलोपः द्वयोरेव सकारयो रुत्वे कृते "अतो रोः" इत्यनेन द्वयोरप्येक एव उकारः, पश्वेकत्ववद्विधेयविशेषणस्यैकत्वस्य विवक्षितत्वात् । न चोकारद्वयेऽपि सवर्णदीर्घानन्तरमाद्गुणो व्यारूयेय इति वाच्यम् । एकपदाश्रयत्वेनान्तरङ्गत्वात् सिच उ इत्यत्र गुणस्यैव सवर्णदीर्घं बाधित्वा प्रसङ्गात् । न च सकारद्वयस्याप्येक एव रुर्भवत्विति वाच्यम् । तद्विधौ पदस्येत्यनुवृत्तेरेकपदान्तत्वाभावात् । द्वितीयसकारस्य पृथक्पदत्वात् । न च पूर्वरुकारात्परो नाकारो द्वितीयात्तु न पूर्व इति कस्याप्युत्वं न स्यादिति वाच्यम् । रोरिति जातिनिर्देशोपगमात् । तत्र चोक्तनिर्देशस्यैव मानत्वात् । न च परत्वाद् "हशि च" इति पूर्वस्यैव उत्वापत्तिः । रुत्वस्यासिद्धतया परत्वाभावात् । न चाश्रयात्सिद्धत्वम् । स्थान्यंशे तथात्वेऽपि निमित्तांशे तदभावात् । तकारभिन्नस्यापि हशः सम्भवेनान्यथाऽनुपपत्त्यभावादिति ।

अत्रेदं वक्तव्यम्—द्वितीयः सकारः प्रथमान्तः पञ्चम्यन्तो वा निर्विभक्तिको वा । नाद्यः । सिच इति पञ्चम्यन्तविशेषणत्वानुपपत्तेः । न द्वितीयः । छान्दसत्वापत्तेः । नान्त्यः । पदत्वाभावे रुत्वानुपपत्तेः । एतेन संयोगान्तलोपोऽपि निरस्तः । एवं सिचः सकारान्तत्वेन विशेषणमपि व्यर्थम् । "आस्तिसिचोऽपृक्ते" इति द्विसकारको निर्देशः । अस्तेः सकारान्तादिति भाष्यकारैरस्तेरेव तद्विशेषणस्योक्तत्वात् । वार्तिकेऽपि भ्वादेशस्यैव ईड्प्रसक्तिप्रतिषेधयोरुक्तत्वात् । श्तिपः पूर्वं सकारप्रश्लेषएव भाष्यतात्पर्यात् । श्तिपः सौत्रत्वादुपपत्तेः । न चैवं सिचः प-

रत्वमाश्रित्य ईडागमापत्तिः। "गातिस्था"इति सूत्रे बहुलग्रहणमनुवर्त्य तस्य एवकारसमानार्थत्वं चाश्रित्य सिचो लुगेव भवति इति व्याख्यानात् स्थानिवद्भावनिषेधोपपत्तेः। एतेन पूर्वोक्तरीत्या सिचस् इति समाहारे तदुपरि स् इति छेदमाश्रित्य अस्तिग्रहणप्रत्याख्यानपरतयाऽपीदं भाष्यं योजयितुं शक्यमित्यपि परास्तम्। भत्वपञ्चमीलोपयोरुभयत्र छान्दसत्वकल्पने गौरवाच्च। एतेन जातिनिर्देशे इदमेव प्रमाणमिति निरस्तम्। तादृशनिर्देशएव मानाभावात्। वर्णग्रहणे जातिग्रहणमित्यस्य तु नायं विषयः। रोः इति समुदायाश्रयणाद्। द्वयोरुत्वमप्यनुपपन्नम्। रुत्वस्यासिद्धत्वात्। न चाश्रयात्सिद्धत्वम्। एक एव यत्र रुस्तत्र चरितार्थत्वात्। उत्वस्य सिद्धत्वं विना तदनुवादेनोत्वविधिवैयर्थ्यापत्तेरेव सिद्धत्वकल्पनात्। द्वितीयांशेऽसिद्धत्वबाधे प्रमाणविरहात्।

यद्वा—श्तिपं विनैव सूत्रं पाठ्यमिति भाष्याभिप्रायः। "अस्सिचोऽपृक्ते" इति तत्रैव सकारान्तरं व्याख्येयम्। अस्तेः सकारान्तादिति भाष्यं तु अस् इत्यंशव्याख्यापरम्। असत्यादावतिप्रसङ्गस्य माधवोक्तरीत्या निरस्तत्वात्। भाष्यस्य समाधानोपलक्षणतामात्रत्वे तु अस् इति लुप्तपञ्चमीकं स्ति इति अपृक्तविशेषणम्। असः सिचश्च परस्य सकारतकारादेरपृक्तसार्वधातुकस्य ईट् स्यात्। आभ्यां परस्यापृक्तसार्वधातुकस्य सकारतकारत्वरूपनियमात् विशेषणानुपयोगे येन रूपेणात्र निर्देशस्तद्रूपावच्छिन्नापेक्षया परत्वलाभाय तत्। तेन स्थानिवद्भावव्यावृत्तिरिति दिक्।

पञ्चमस्य त्वयमर्थः। "हनो ण्वुल्बहुलं तणि" इति वार्त्तिकेन संज्ञाछन्दसोर्वधादेशः। तस्य हल-

न्तत्वाद् " अत उपधायाः " इति वृद्धिः । " हनस्तोऽचिण्णलोः" इति तकारादेशश्च स्यात्, तयोः स्थानिवद्भावो निषेध्यः । आवधिषीष्टेत्यत्र स्थानिवद्भावेनाङ्गतया "एकाच उपदेशेऽनुदात्ताद्" इतीण्निषेधश्च स्यात् । अत्र स्थानिवद्भावेनाङ्गसंज्ञा न भवतीति वक्तव्यम् ।

इदमपि भाष्ये प्रत्याख्यातम्–अवधीदित्यत्र "अतो हलादेः" इति वृद्धिप्रसङ्गाद्वधादेशस्यादन्तत्वस्वीकारात् । वधक इति तु "हनो वधश्च"इत्यौणादिकः क्वुन् । तथा च वृद्धितत्वयोर्न प्रसङ्गो णित्त्वाभावात् । इटो निषेधोऽपि नास्ति । वधादेशआद्युदात्तनिपातनसामर्थ्यात्प्रकृतिस्वराप्रवृत्तेः । न च यदा वधिषीष्टेत्यत्र " निपातैर्यद्यदि " इति निघातप्रतिषेधात् इष्टः प्रत्ययस्वरो न स्यात्, सतिशिष्टेनाद्युदात्तेन बाधापत्तेरिति वाच्यम् । आर्द्धधातुकीयाः सामान्येन भवन्तीति प्रत्ययोत्पत्तेः पूर्वमेव वधादेशात् तदुत्तरं प्रत्ययोत्पत्त्या तत्स्वरस्यैव सतिशिष्टत्वात् ।

अत्रेदमवधेयम् । वार्त्तिकरीत्या "आर्द्धधातुके" इत्यस्य विषयसप्तमीत्वेऽपि लिङीत्यादीनां परसप्तमीत्वाभ्युपगमात् स्यसिच्सूत्रे " वधभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन " इत्युक्तम् । उभयोरपि परनिमित्तकत्वात् ।

भाष्यमते तु वधादेशस्य प्रत्ययोत्पत्तेः पूर्वमेव प्रवृत्त्या परनिमित्तकत्वाभावात् अन्तरङ्गत्वात् चिण्वद्भावस्य तु परनिमित्तकतया बहिरङ्गत्वादन्तरङ्गबहिरङ्गयोश्च विप्रतिषेधायोगात्कथश्चिण्वद्भाव इति शङ्कायां प्रतिपदविधित्वाच्चिण्वद्भाव इति कैयटः ।

स्यादेतत् । प्रतिपदविधित्वं किमनवकाशत्वम् उत सा-

क्षादुपात्तत्वम् । नाद्यः । स्यसिच्सूत्रे हनग्रहणस्य घानिष्यत इत्यादौ सीयुटो ग्रहणस्य तु कारिषीष्टेत्यादौ सावकाशत्वात् । न च स्यादीनां चतुर्णाम् अजन्तादिभिश्चतुर्भिरन्वयात्स्वरितत्वाभावेन च यथासंख्यविरहात् प्रत्येकं स्यादिभिरन्वयाद्धनः सीयुटि चिण्वद्भावविधानम् । तन्निरवकाशमेव । अन्तरङ्गत्वाद्वधभावे तस्य स्थानिवद्भावेन हन्तिना ग्रहणात्सीयुटि चिण्वदिटि कृते "ण्यल्लोपौ" इति पूर्वविप्रतिषेधेन अतो लोपे वधिषीष्टेत्येव रूपापत्तेरिति वाच्यम् । अन्तरङ्गत्वात्पूर्वं वधभावप्रवृत्तौ हनः सीयुडन्वयएव मानाभावात् । नान्त्यः । "हनो वध लिङि" इति साक्षादुपादानस्य वधादेशेऽप्यविशिष्टत्वात् । अन्तरङ्गत्वस्याधिक्याच्च ।

अत्राहुः—"चिण्वदिट् च" इति चकारेण हन्तेः सीयुटि चिण्वद्भावविधानात्तस्यानर्थक्यमेव प्रतिपदविधित्वम् । न च तस्यानुक्तसमुच्चयार्थत्वे मानाभावः । भाष्यकृतैव च भगवान् कृतवांस्तु तदर्थमित्युक्तत्वात् । यद्वा—लिङीति सामान्यं सीयुटीति विशेषः । हन्तेरित्युभयत्राप्यविशिष्टम् । तथा चापवादत्वादेव चिण्वदिट असंभवे चकारेणापि तद्विधानस्याशक्यत्वात् ।

यद्वा—असिद्धं बहिरङ्गमित्यनेन "अन्तरङ्गं बलवत्" इत्येतत्प्रत्याख्यानस्य वक्ष्यमाणत्वात्तस्य च कृतितुग्ग्रहणेनानित्यत्वज्ञापनात् लक्ष्यानुरोधेनेह त्यागाद् युक्तो विप्रतिषेधः । अथ वा लिङीति परसप्तम्येवास्तु । परत्वाच्चिण्वदिट् । आद्युदात्तनिपातनं तु माऽस्तु । न च कर्त्रेत्यादिवद्वधिषीष्टेत्यत्र इडनापत्तिः । हन्त्युपदेशे एकाच्त्वेऽपि वध्युपदेशेऽनेकाच्त्वात् । वधेर्द्वावुपदेशाविति भाष्यएवोक्तत्वात् । एकेति विशेषणस्यानेकाच्कोपदेशव्यावृत्त्यर्थत्वात् । न चाच इत्युक्ते तदन्त-

स्यैव स्यादिति वाच्यम् । पचादीनामनुदात्तेत्त्ववैयर्थ्यापत्तेः । एकत्वविवक्षामत्वर्थलक्षणाभ्यामच इत्येतावतैव एकाज्वतो लाभे एकग्रहणस्योक्तार्थपरत्वात् । उक्तार्थपरतयाऽपि "यत्रैकाज्ग्रहणं चैव" इति परिभाषाप्रवृत्तिसिद्धेः । न चैकपदस्योक्तरीत्या सार्थक्ये "श्तिपा शपा" इत्यादिपरिभाषाज्ञापकत्वानुपपत्तिः । शीङ्दीङादीनां गुणयुडादिविधावनुबन्धनिर्देशस्यैव तज्ज्ञापकत्वात् । तस्माद्वधेः परस्य इट् सिद्धः । अत एव व्याघ्रभूतिनाऽनिट्कारिकासु अदन्तपर्युदासः कृत इति ।

यत्तु प्रसादकृता घानिषीष्टेत्येव रूपं न तु वधिषिषीष्टेत्यपि । तदुक्तं भाष्ये—

अथेदानीं चिण्वद्भावे कृते पुनः प्रसङ्गविज्ञानाद्वधभावः कस्मान्न भवति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति, हनिणिङादेशप्रतिषेधश्चेति ।

तन्न । चिण्वद्भावपक्षे वधादेशविरहेऽपि तदभावपक्षे वधादेशप्रवृत्तौ बाधकाभावात् । हनिणिङादेशनिषेधस्य तु स्यादिषु चिण्वदित्यतिदेशेन यत्प्राप्तं तत्परत्वात् । लिङि प्राप्तस्य तदविषयत्वात् । अत एवाङ्गकार्याणामेवातिदेशमाश्रित्य तद् भाष्ये प्रत्याख्यातम् । प्रसादकारेणापि प्रथमं तथैवानूदितमिति । अत एव "एकाच" इति सूत्रे वधिषीष्टेति रूपं भाष्यएवोदाहृतम् । आकारान्तादित्यादिपश्च वार्तिकान्यपि अनारभ्याणि । तथा हि–विलापयति भापयति इत्यत्र नुक्पुकौ ली ई भी ई इतीकारप्रश्लेषादेव न भवतः । शिष्टात् हतात् भिन्तात् कुरुतात् स्तात् इत्यत्र परत्वात्तातङि कृते "शा हौ" "हन्तेर्जः" "हुझल्भ्यो हेर्धिः" "उतश्च प्रत्ययादसंयोगपूर्वात्" "ध्वसोरेद्धौ" इति शाभावो जभावो धित्वं हिलोप एत्वं चेति स्थानिवद्भावेन प्रसक्ताः, सकृद्गता-

क्षादुपात्तत्वम्। नाद्यः। स्यसिच्सूत्रे हनग्रहणस्य घानिष्यत-इत्यादौ सीयुटो ग्रहणस्य तु कारिषीष्टेत्यादौ सावकाशत्वात्। न च स्यादीनां चतुर्णाम् अजन्तादिभिश्चतुर्भिरन्वयात्स्वरितत्वाभावेन च यथासंख्यविरहात् प्रत्येकं स्यादिभिरन्वयाद्धनः सीयुटि चिण्वद्भावविधानम्। तन्निरवकाशमेव। अन्तरङ्गत्वाद्वधभावे तस्य स्थानिवद्भावेन हन्तिना ग्रहणात्सीयुटि चिण्वदिटि कृते "ण्यल्लोपौ" इति पूर्वविप्रतिषेधेन अतो लोपे वाधिषीष्टेत्येव रूपापत्तेरिति वाच्यम्। अन्तरङ्गत्वात्पूर्वं वधभावप्रवृत्तौ हनः सीयुडन्वयएव मानाभावात्। नान्त्यः। "हनो वध लिङि" इति साक्षादुपादानस्य वधादेशेऽप्यविशिष्टत्वात्। अन्तरङ्गत्वस्याधिक्याच्च।

अत्राहुः—"चिण्वदिट् च" इति चकारेण हन्तेः सीयुटि चिण्वद्भावविधानात्तस्यानर्थक्यमेव प्रतिपदविधित्वम्। न च तस्यानुक्तसमुच्चयार्थत्वे मानाभावः। भाष्यकृतैव च भगवान् कृतवांस्तु तदर्थमित्युक्तत्वात्। यद्वा—लिङीति सामान्यं सीयुटीति विशेषः। हन्तेरित्युभयत्राप्यविशिष्टम्। तथा चापवादत्वादेव चिण्वदिट असंभवे चकारेणापि तद्विधानस्याशक्यत्वात्।

यद्वा—असिद्धं बहिरङ्गमित्यनेन "अन्तरङ्गं बलवत्" इत्येतत्प्रत्याख्यानस्य वक्ष्यमाणत्वात्तस्य च कृतितुग्ग्रहणेनानित्यत्वज्ञापनात् लक्ष्यानुरोधेनेह त्यागाद् युक्तो विप्रतिषेधः। अथ वा लिङीति परसप्तम्येवास्तु। परत्वाच्चिण्वदिट्। आद्युदात्तनिपातनं तु माऽस्तु। न च कर्त्तेत्यादिवद्वधिषीष्टेत्यत्र इडनापत्तिः। हन्त्युपदेशे एकाच्त्वेऽपि वध्युपदेशेऽनेकाच्त्वात्। वधेर्द्वावुपदेशाविति भाष्यएवोक्तत्वात्। एकेति विशेषणस्यानेकाच्कोपदेशव्यावृत्त्यर्थत्वात्। न चाच इत्युक्ते तदन्त-

स्यैव स्यादिति वाच्यम् । पचादीनामनुदात्तेत्त्ववैयर्थ्यापत्तेः । एकत्वविवक्षामत्वर्थलक्षणाभ्यामच इत्येतावतैव एकाज्वतो लाभे एकग्रहणस्योक्तार्थपरत्वात् । उक्तार्थपरतयाऽपि "यत्रैकाज्ग्रहणं चैव" इति परिभाषाप्रवृत्तिसिद्धेः । न चैकपदस्योक्तरीत्या सार्थक्ये " श्तिपा शपा " इत्यादिपरिभाषाज्ञापकत्वानुपपत्तिः । शीङ्दीङादीनां गुणयुडादिविधावनुबन्धनिर्देशस्यैव तज्ज्ञापकत्वात् । तस्माद्वधेः परस्य इट् सिद्धः । अत एव व्याघ्रभूतिनाऽनिट्कारिकासु अदन्तपर्युदासः कृत इति ।

यत्तु प्रसादकृता घानिषीष्टेत्येव रूपं न तु वधिषिषीष्टेत्यपि । तदुक्तं भाष्ये—

अथेदानीं चिण्वद्भावे कृते पुनः प्रसङ्गविज्ञानाद्वधभावः कस्मान्न भवति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति, हनिणिङादेशप्रतिषेधश्चेति ।

तन्न । चिण्वद्भावपक्षे वधादेशविरहेऽपि तदभावपक्षे वधादेशप्रवृत्तौ बाधकाभावात् । हनिणिङादेशनिषेधस्य तु स्यादिषु चिण्वदित्यतिदेशेन यत्प्राप्तं तत्परत्वात् । लिङि प्राप्तस्य तदविषयत्वात् । अत एवाङ्गकार्याणामेवातिदेशमाश्रित्य तद् भाष्ये प्रत्याख्यातम् । प्रमादकारेणापि प्रथमं तथैवानूदितमिति । अत एव "एकाच" इति सूत्रे वधिषीष्टेति रूपं भाष्यएवोदाहृतम् । आकारान्तादित्यादिपञ्च वार्तिकान्यपि अनारभ्याणि । तथा हि—विलापयति भापयति इत्यत्र नुक्पुकौ ली ई भी ई इतीकारप्रश्लेषादेव न भवतः । शिष्टात् हतात् भिन्तात् कुरुतात् स्तात् इत्यत्र परत्वात्तातङि कृते " शा हौ " " हन्तेर्जः " " हुझल्भ्यो हेर्धिः " " उतश्च प्रत्ययादसंयोगपूर्वात् " " घ्वसोरेद्धौ " इति शाभावो जभावो धित्वं हिलोप एत्वं चेति स्थानिवद्भावेन प्रसक्ताः, सकृद्गता-

विति न्यायान्न । एतेन पुष्णीतादित्यत्र "हलः श्नः शानज्" इत्यस्याप्यप्रवृत्तिर्व्याख्याता । तिसृभावे कृते "त्रेस्त्रयः" इत्यपि-नादेशः । उक्तन्यायात् । एतेन चतस्रस्तिष्ठन्तीत्यत्र चतसृभा-वे कृते " चतुरनडुहोः " इत्याम्नेति व्याख्यातम् । विदुषः पश्येत्यत्र वस्वादेशस्य शतृग्रहणेन ग्रहणात् "शतुरनुमो नद्यजादी" इति सूत्रेणान्तोदात्तात्परत्वमुपजीव्य विभक्तेर्नोदा-त्तत्वम् । "अनुम" इत्यत्र "तनादिकृञ्भ्य उः" इत्युकारादार-भ्य नुमो मकारपर्यन्तमुम्प्रत्याहारमाश्रित्य तद्रहितस्येति व्या-ख्यानात् । वसोश्च तत्रान्तर्भावात् । न चैवं लुनता पुनतेत्यादा-वपि न स्यात्, श्नाप्रत्ययस्यापि तदन्तर्गतत्वादिति वाच्यम् । अनुम्ग्रहणं शतुर्विशेषणं न तु तदन्तस्येत्याश्रयणात् । शतरि परे श्नाप्रवृत्तावपि तस्य शतृप्रकृतिकत्वाभावात् । नुमित्यागमग्रह-णेऽपि तद्रहितस्य शतर्येव विशेषणत्वात् । तदन्तविशेषणत्वे मुञ्च-तीत्यादावपि निषेधापत्तेः । तदन्तस्य "शे मुचादीनाम्" इति सनुम्कत्वात् । अपत्यवार्त्तिकस्य त्वयमर्थः— चित्रग्वग्रामित्यत्र "सर्वत्र विभाषा गोः" इति पूर्वरूपं स्यात् । "नान्तः पादम्" इति पाठस्य भाष्यारूढतया सर्वत्रेति सूत्रस्यापि पूर्वरूपविधाय-कत्वौचित्यात् ।

कैयटस्तु प्रकृतिभावोऽनेन विधीयते, न पूर्वरूपम् । तस्माद् "एङः पदान्तादति" इति पूर्वरूपं प्राप्नोतीति भाष्यार्थ इत्याह । शा-कलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यतइति भाष्यदर्शनात् " प्रकृत्याऽन्तःपादम् " इति पाठ इति तस्याशयः । एङ इति तत्र वर्त्तते इति भाष्यस्याप्यत्रानुगुण्यम् । पूर्वमतं तु सर्व-त्रेत्यत्र तदनुवृत्तिपरतया नेयम् । न चैङ इत्यलाश्रयणान्न स्थानिवत्त्वमिति वाच्यम् । हे चित्रगो अग्रमित्यत्र तथाऽपि

दुर्वारत्वात् । स्वत एङन्ततया स्थान्यलोऽनाश्रयणात् । एवं चित्रगुरित्यत्र " गोतो णित् " इति णित्त्वाद्वृद्धिः स्यात् । चित्रगूनित्यत्र "आ गोतोऽम्शसोः" इति षाष्ठवार्त्तिकपाठादात्वं स्यात् ।

अत्र णित्त्वग्रहणं व्यर्थम् । तपरत्वेनैव तयोरप्रवृत्तेः । "औतोऽम्शसोः " इति पाठस्यैव स्थितत्वात् । न च अचिनवमित्यादावातिप्रसङ्गः । शसा साहचर्यात्सुप एवामो ग्रहणात् । बहुगुमानित्यत्र " ह्रस्वनुड्भ्यां मतुप्" इत्युदात्तस्य " न गोश्वन्त्साववर्ण " इति निषेधः स्यात् । ततः गोः पूर्वस्वरयोरिति वार्तिकं स्थितम् । बहुगुना इत्यादौ " अन्तोदात्तादुत्तरपदादन्यतरस्याम् " इति प्राप्तस्य " न गोश्वन् " इति निषेधः इति वृत्तिग्रन्थस्तु भाष्यादिविरोधाच्चिन्त्यः । द्वादशवार्तिकमप्यनारभ्यम् । न च कुरुपिबेत्यादौ स्थानिवत्त्वाल्लघूपधगुणापत्तिः । करोतौ तपरनिर्देशादकारस्य मात्रिकत्त्वादुकार एव न्याय्य इति तपरत्वस्य शास्त्रान्तरप्राप्तद्विमात्रानिवृत्त्यर्थत्वात् पिबेश्चादन्तत्वात् ।

अचः परस्मिन् पूर्वविधौ ५६।

परनिमित्तकोऽच आदेशः स्थानिवत्स्यात् तस्मात्पूर्वत्वेन दृष्टस्य दृष्टाद् वा निमित्तात् विधौ कर्त्तव्ये । अल्विध्यर्थमिदम् । वव्रश्च । उरदत्वस्य स्थानिवद्भावाद् " न संप्रसारणे " इति वकारस्य संप्रसारणनिषेधः । उरदत्वस्याङ्गाधिकारीयतयाऽङ्गाक्षिप्त प्रत्यये परे तद्विधानात् । न च प्रागभ्यासविकारेभ्योऽङ्गाधिकार इति वाच्यम् । आसप्तमसमाप्तेरित्यस्य सिद्धान्तितत्वात् । " गुणो यङ्लुकोः " इत्यत्र लुग्ग्रहणस्य कृतत्वात् । अत्र स्थानिभूतादच ऋकारात्पूर्वत्वेन दृष्टस्य व-

कारस्य संप्रसारणे कर्त्तव्ये स्थानिवद्भावः। एवमाचितीकः सुचितीकः बहुचितीक इत्यत्र "चितेः कपि" इति दीर्घः। "ह्रस्वान्तेऽन्त्यात्पूर्वम्" इति स्थान्यलाश्रयः स्वरः सिद्धः। स्वरविधौ स्थानिवद्भावनिषेधस्य लोपाजादेशमात्रविषयकत्वात्। अखट्वको बहुखट्वक इत्यादौ "आपोऽन्यतरस्याम्" इति ह्रस्वस्य स्थानिवद्भावान्नोक्तः स्वरः किं तु "कपि पूर्वम्" इत्युत्तरपदान्तोदात्तत्वमेवेत्यवधेयम्। तस्माद्विधौ यथा—तन्वन्ति तन्वते। यणादेशस्य स्थानिवद्भावान्नेट्। अन्यथा उकारस्यार्द्धधातुकतया यणि कृते वलादित्वात् स स्यात्। तन्नित्यं तत्र निमित्तं तच्चोकारात्पूर्वम्। अच इति किम्। विश्नः द्यूत्वा स्यूत्वा अभिगत्य आद्ययोश्छकारस्य शकारः। तस्य परनिमित्तकत्वात्स्थानिवद्भावे "छे च" इति तुक् मा भूत्। नन्वन्तरङ्गत्वात्पूर्वमेव तुका भाव्यम्। "वार्णादाङ्गं बलीय" इत्यस्य युगपत्प्राप्तिके समानाश्रयएव प्रवृत्तेः। करोतेर्णलि कृ अ इति स्थिते "अचो ञ्णिति" इति वृद्धेः गौरित्यादौ सावकाशत्वात्तद्बाधित्वाऽन्तरङ्गत्वात्प्राप्तस्य यणो बाधेन वृद्धेरेव प्रवृत्तिः। प्रश्न इत्यत्र तु शत्वस्य प्रत्ययोत्पत्त्यनन्तरं तुकस्तु प्रागेवेति प्राप्तिकाले वैषम्यात्। शस्य नङ् निमित्तम्, तुकस्तु छ इति समानाश्रयत्वाभावाच्च।

अत्रायं प्राचामभिप्रायः। "अभ्यासस्यासवर्णे" इत्यत्रासवर्णग्रहणं तावदस्या ज्ञापकमिति षष्ठे प्रथमाह्निकान्ते भाष्ये स्पष्टम्।

तथा हि—ईयतुः ऊषतुरित्यत्रातिप्रसङ्गवारणं न तदर्थः। अन्तरङ्गबलवत्तयैव गतत्वात्। सवर्णदीर्घस्यावयवमात्रापेक्षत्वात्। इयङुवङोरभ्याससंज्ञाऽङ्गसंज्ञा चेत्युभयापेक्षत्वात्। न

चेयङुवङोस्तदपवादत्वम् । येननाप्राप्तिन्यायेन यणं प्रत्येव तयोरपवादत्वात् । ननु इच्छत्येतिभ्यां णलि इष् अ इ अ इत्यत्र गुणवृद्ध्योः सत्योः "द्विर्वचनेऽचि" इति रूपातिदेशाद् इकारे द्वित्वप्रवृत्तिः । तत्र सवर्णदीर्घप्राप्तावप्येतदारम्भात्तन्निरूपितापवादत्वं दुर्वारम् । निन्यतुरित्याद्यनुरोधेन पूर्वप्रवृत्तकार्यस्य द्वित्वानन्तरमवस्थाननियमस्य वक्तुमशक्यत्वात् । अन्यथा पूर्वमियङ्प्रवृत्त्या द्वित्वानन्तरम् "एरनेकाचः" इति यण् न स्यात् । मैवम् । कृतेऽप्यसवर्णग्रहणे तस्य निर्विषयकत्वापत्तेः । न च तत्सामर्थ्यात्सवर्णदीर्घं बाधित्वा पुनर्गुणवृद्धिप्रवृत्तिः । इयर्तीत्यादौ चारितार्थ्यात् । न च असवर्णग्रहणाभावेऽपि येननाप्राप्तिन्यायेन इयर्तीत्यत्र यण्बाधे सिद्धे तदनुपादानापत्तिः । सामर्थ्यात् इयेषेत्यादौ गुणादिप्रवृत्तिस्वीकारेऽसवर्णग्रहणवैयर्थ्यतादवस्थ्यात् । "अर्त्तेश्च"इत्येव सूत्रयित्वा य्वोरित्यनुवर्त्य अर्त्तेरिकारस्य इयङि विधेये "अभ्यासस्य" इत्युक्तिसामर्थ्येनापि इयेषेत्यादिसिद्धेः । न चार्त्तेरिति पाठे अरियर्ति इति यङ्लुकि तदासिद्धिः । उरित्येव वाच्यत्वात् । इण्साहचर्याद्धातुग्रहणसिद्धेः । ऋकारस्याङ्गेन विशेषणाद्वा । तेन अत्रग्निरित्यादौ न दोषः । न चैवमियेषेत्यादिवदीषतुरित्यादावपि इयङापत्तिः । सवर्णदीर्घस्यान्तरङ्गत्वात् । इयेषेत्यत्र तु गुणसंभावनया अकृतव्यूहपरिभाषया दीर्घाप्रवृत्तेः । एतेन निन्यतुरित्यादौ इयङादेरप्रवृत्तिरपि व्याख्याता ।

तत्र च ज्ञापकं "समर्थानां प्रथमाद्वा" इति सूत्रे समर्थग्रहणम् । तद्धि सौत्थितिर्वैक्षमाणिरित्यादौ भाविन्या आदिवृद्ध्या अन्तरङ्गस्यापि सवर्णदीर्घस्य निमित्तविघातादप्रवृत्तिः स्यादिति सावुत्थितिर्वायीक्षमाणिरित्यनिष्टरूपवारणार्थम् । कृत-

सन्धिकार्यत्वरूपं परिनिष्ठितत्वं च तत्र समर्थशब्दार्थः । निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीति तत्परिभाषाऽर्थः । कृतमपि निवर्त्तयन्तीत्यस्य ज्ञाप्यत्वे तु फलसाम्येऽपि गौरवाधिक्यं बोध्यम् । तस्मादियेषेत्यादौ गुणे कृते सवर्णदीर्घानवकाशाद्याणि प्राप्ते तस्यैव इयङपवादः इत्यसवर्णग्रहणवैयर्थ्ये प्रसक्ते तत्र गुणाप्रवृत्त्युपपादकत्वेन वार्णादाङ्गस्य बलवत्त्वस्य ज्ञापकतया तत्सार्थक्यम् । न च गुणस्य स्थानिवद्भावाद् "असवर्णे" इति निमित्तस्याविघातात्कथम् अकृतव्यूहन्यायप्रवृत्तिः स्यादिति वाच्यम् । "न पदान्त" इति सवर्णविधौ तन्निषेधात् । तत्रत्यसवर्णादिग्रहणप्रत्याख्यानपक्षे तु पूर्वस्यैव विधौ स्थानिवद्भावो न तु स्वपूर्वैकादेशविधाविति वक्ष्यमाणत्वात्सवर्णदीर्घनिमित्तविघातो बोध्यः । तस्मात्समानाश्रये युगपत्प्राप्तौ चोक्तपरिभाषाज्ञापनात्तादृशविशेषविषयकत्वमप्यास्थीयते । लक्ष्यानुरोधात् ।

स्यादेतत् । समानाश्रयेत्यत्र कार्यिणोरैक्यं विवक्षितम्, निमित्तयोर्वा । नाद्यः । स्योन इत्यत्र सि ऊ न इति स्थिते इकारस्यैव गुणयणोः प्राप्त्या समानाश्रयत्वसत्त्वात् तदभावान्नोक्तपरिभाषाप्रवृत्तिरिति कैयटादिग्रन्थविरोधात् । आहु इत्यत्र आहु आ अ इति स्थिते आलोपपूर्वत्वयोरप्याकारोद्देश्यकत्वेन व्याश्रयत्वात्तदप्रवृत्तिकथनविरोधाच्च । न द्वितीयः । इ इ अतुस् इत्यत्र सवर्णदीर्घस्य इकारो निमित्तम्, यणस्तु प्रत्ययाकार इति समानाश्रयत्वानुपपत्तेः । श्वन्शब्दस्य भत्वे संप्रसारणे च शु अन् अस् इत्यत्र अल्लोपस्य भनिमित्तत्वात्पूर्वत्वस्य च तदभावाच्च । तथा हि--सिवेर्बाहुलकादौणादिके नप्रत्यये गुणो वलोप ऊठ् च प्राप्नोति । तत्रापवादत्वाद्वलोपं बाधित्वा ऊठ् ।

न चैवमपि गुणबाधे विनिगमकाभावः । गुणस्याङ्गसम्बन्धिनीं लघ्वीमिग्लक्षणामुपधामार्द्धधातुकं चापेक्षमाणस्य बहिरङ्गत्वात् । ऊठस्तु वकारान्तमङ्गमनुनासिकादिं च प्रत्ययमपेक्षमाणस्यान्तरङ्गत्वात् । सि ऊ न इति स्थिते लघूपधगुणयणोः प्राप्तौ वर्णमात्रापेक्षत्वेनान्तरङ्गत्वाद्यण् । ततः "सार्वधातुकार्द्धधातुकयोः" इति ऊकारस्य गुण इति स्योनेत्यस्य सिद्धिः । एवं "कविधौ सर्वत्र संप्रसारणिभ्यो ड" इत्युक्त्वाऽऽह्वः प्रह्व इत्युदाहृत्य कप्रत्ययेन सिद्धिमाशङ्क्य कप्रत्ययसंप्रसारणयोरुवङि कृते आहुवइति स्यात् । न च आलोपस्य स्थानिवद्भावान्नोवङ् । पूर्वत्वे कृते तत्प्राप्तेः । परत्वादाकारलोप एव स्यादित्युक्त्वा अन्तरङ्गत्वात्पूर्वत्वमित्याशङ्क्य "वार्णादाङ्गं बलीय" इत्याकारलोप इत्युक्त्का एवं तर्हीदमिह सम्प्रधार्यम् आकारलोपः क्रियतां संप्रसारणमित्युक्त्का परत्वादातो लोपः । ततः संप्रसारणे यणादेशे आह्वः प्रह्व इत्यादि सिद्धम्, इति भाष्यम् । एवं तर्हीत्यादिभाष्यस्यावतरणिकायाम् "वार्णादाङ्गं बलीय इत्यस्य" समानाश्रयएवाङ्गीकारादालोपपूर्वत्वयोश्च भिन्नाश्रयत्वात्तदप्रवृत्तिरिति कैयटः । तदनन्तरं च पूर्वत्वस्यान्तरङ्गत्वमिति भाष्यव्याख्यायां "वार्णादाङ्गं बलीय" इत्येतत्तु समानाश्रयविषयमेवेत्युक्तमिति तेनोक्तम् ।

एवम् अशब्दादाचारक्विबन्तात्लिटि अ अ् अतुस् इत्यत्राऽतोलोपस्य व्याश्रयत्वाद् "अतो गुणे" इति पररूपमेवेति मनोरमादिविरोधः । तथा हि—"उपेयिवान्" इति सूत्रे इणो द्विर्वचनेऽभ्यासदीर्घत्वे च कृते इयादेशो निपात्यतइत्युक्त्का "दीर्घ इण" इति दीर्घेण बाधादेकादेशो न स्यादित्याशङ्क्य दीर्घत्वं नैकादेशबाधकम्, किं तु "इणो यण्" इति विधीयमानो यण् । स च स्वप्राप्तावेव बाधकोऽत्र तु यणः प्राप्त्यभावादेकादेश एवेत्युक्तं भा-

ध्ये। तत्र कैयटेन ईयतुरित्यत्राभ्यासदीर्घत्वे एकादेशात्पूर्वम् "वार्णादाङ्गम्" इति यणि कृते स्थानिवत्त्वादेकादेशः प्राप्नोतीत्युक्तत्वेनाभ्यासदीर्घत्वमेकादेशबाधकं स्यादित्याशङ्क्य स्थानिवद्भावेन रूपानतिदेशात् रूपाश्रयस्यैकादेशस्य यकारेऽभावः। "वार्णादाङ्गम्" इति यणादेशेन बाधितस्यैकादेशस्य स्थानिवद्भावे कृते प्राप्त्यभाव इति व्याख्यातम्। इ इ अतुस् इत्यस्यामवस्थायां यथा इणो यणादेश एकादेशस्य बाधकः तथा स्थानिवद्भावानन्तरमप्येकादेशप्राप्तान्निति तदर्थः। तथा "संप्रसारणाच्च" इति सूत्रे "आटो वृद्धेरियङ्" इति वार्त्तिकेऽध्यैयातामित्यत्र "वृद्धिरन्तरङ्गा" इति भाष्यव्याख्यायां "वार्णादाङ्गं बलवद्" इत्यनाश्रित्येदमुच्यतइति कैयटाविरोधः। एवम् "आदेच" इति सूत्रे आयादेशे अलोऽन्त्यस्यात्वे ग्लानीयमित्यादिसिद्धिरिति पक्षे विवरणप्रस्तावे ग्लै अतुसित्यत्रायादेशे यकारस्य आत्वे ग्ला आ अतुसित्यत्र एकादेश आतोलोपश्च प्राप्तः। तत्रैकादेशस्य वर्णाश्रयत्वादन्तरङ्गत्वेऽपि "वार्णादाङ्गम्" इत्यातो लोपः। तस्याभीयत्वेनासिद्धत्वात्स्थानिवद्भावाच्च पूर्वस्यातोलोपो न स्यादिति दोषमुपन्यस्य "वार्णादाङ्गम्" इत्यनाश्रित्येदमुक्तमिति कैयटोऽप्यसङ्गतः स्यात्।

स्यादेतत्। एकनिष्ठकारणतानिरूपितैकवर्णनिष्ठोद्देश्यतानिरूपितोभयविधेयताकत्वं तत्। यथा कृ अइत्यादौ। उक्तं च कौस्तुभे—यत्र ह्येकमेव निमित्तीकृत्य युगपदाङ्गवार्णयोः प्राप्तिस्तत्रैव "वार्णादाङ्गं बलीय" इति विच्छ्न इत्यत्र तुक्शत्वयोः छकारनकाररूपनिमित्तभेदस्य स्पष्टत्वात्। अतः स्योन इत्यादौ न दोषः। तत्र गुणस्यार्द्धधातुकं निमित्तं यणस्त्वजिति कारणभेदात्। आह इत्यादावपि आलोपपूर्वत्वयोरेकोद्देश्यकत्वेऽपि लोपस्य अजादिरार्द्धधातुकं निमित्तं पूर्वत्वस्य तु नेति निमित्तैक्याभावात्।

श्चुन इत्यत्रापि न दोषः । संप्रसारणस्य भसंज्ञानिमित्तकत्वात् । संप्रसारणनिबन्धनपूर्वत्वस्यापि भसंज्ञानिमित्तकत्वे बाधकाभावात् । प्रयोजकसाधारणस्यैव निमित्ततया विवक्षितत्वात् ।

वस्तुतस्तु शुन इत्यत्र पूर्वत्वमेवेष्टं विप्रतिषेधसूत्रीयाकरग्रन्थप्रामाण्यात् । अल्लोपे उदात्तनिवृत्तिस्वराद्यापत्तिरिति तत्र निरूपयिष्यमाणत्वात् । अल्लोपपरासिद्धत्वत्सूत्रस्थकैयटादिग्रन्थस्य प्रौढिमात्रत्वात् । तेन द्यवतीत्यत्रापि नातिव्याप्तिः । यण्गुणयोरेकोद्देश्यकत्वेऽपि ऊकारसार्वधातुकरूपानिमित्तभेदात् । मैवम् । ईयतुरित्यत्र तदभावात् । सवर्णदीर्घे प्रथम इकार उद्देश्यो यणि तु द्वितीय इति कार्यिभेदात् । न च "एकः पूर्वपरयोः" इति द्वितीय इकारोऽपि सवर्णदीर्घे कार्यीति वाच्यम् । तथाऽपि यणि अतुसोऽकारो निमित्तम्, सवर्णदीर्घे तु अभ्यासोत्तर इकार इति भेदात् । ननु स्थानेद्विर्वचनपक्षेऽतुसोऽकारस्यापि द्वित्वनिमित्तत्वम् । चक्रतुरित्यत्र यणः स्थानिवद्भावार्थं साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकस्यैव द्वित्वनिमित्तत्वस्वीकारात् । लक्ष्यानुरोधादिहापि तथाश्रयणे बाधकाभावात् ।

तथा च अकारस्य द्वितीयेकारप्रयोजकतया सवर्णदीर्घनिमित्तत्वमप्यस्ति । यण्निमित्तत्वं तु तस्य स्पष्टमेवेति चेत् । मैवम् । स्योन इत्यत्र यण्निमित्ते ऊकारे तस्य निमित्ततया गुणेऽप्यार्द्धधातुकतया तस्य निमित्तत्वात् । आह्व इत्यत्र संप्रसारणं पूर्वत्वे निमित्तम्, तत्र च कित्त्वमिति किदार्धधातुकनिमित्तकमातोलोपं प्रत्यपि तस्य निमित्ततया समानाश्रयत्वापत्तेश्च । न चैकनिमित्तेत्यस्यैकधर्मावच्छिन्ननिष्ठनिमित्तत्वमर्थः । ईयतुरित्यत्र सवर्णदीर्घयण्निमित्तयोरिकाराकारयोरच्त्वरूपैकधर्मावच्छिन्नत्वादिति वाच्यम् । विश्न इत्यत्र शत्वतुगागमनिमित्तयोर्नकारच्छ-

कारयोरपि हल्त्वरूपैकधर्मावच्छिन्नत्वात् ।

किं च पूर्वोक्तरीत्या यणूसवर्णदीर्घयोः स्थानैक्यसंपादने "इजादेश्च" इति सूत्रे ऋ ऋ अतुस् इत्यत्र सवर्णदीर्घयणोः प्राप्तौ परत्वात्सवर्णदीर्घे ॠ अतुसिति स्थिते एकादेशस्यान्तादिवद्भावे ऋकारस्य धातुग्रहणेनोपादाने "ऋच्छत्यॄताम्" इति गुणे रपरत्वे च अरतुरिति, अभ्यासत्वेन ग्रहे तु "उरत्" इति अत्वे रपरत्वे हलादिः शेषे "अत आदेः" इति दीर्घे आतो लोपेऽतुरिति रूपं स्यादिति भाष्यकाराशङ्कायाम् ऋ ऋ अतुसित्यवस्थायामाङ्गत्वादुरदत्त्वमेव स्यादित्याशङ्क्य "वार्णादाङ्गम्" इत्येतत्समानाश्रयविषयकं वर्णद्वयाश्रयं तु सवर्णदीर्घत्वमिति भिन्नाश्रयत्वमिति कैयटविरोधः ।

अपि च "एकाचो द्वे" इत्यनेन प्रथमस्य "अजादेः" इति च द्वितीयस्य द्विर्वचनं विरोधाभावात्समुच्चीयतइति पक्षे द्वितीयद्विर्वचनस्यानर्थक्यम् । तथा हि—अटः सनि इटि च अटिस इति स्थिते—प्रथमद्विर्वचनम् । अट् अट् हलादिशेषेण टकारनिवृत्तौ द्वितीयद्विर्वचनम्, हलादिशेषः । अ अ अट् इति त्रयाणामकाराणां द्वयोरकारयोर्वा पररूपे विशेषाभावः । तत्र हलादिशेषात्पूर्वमेव द्वितीयं द्विर्वचनं स्यादित्याशङ्क्य कैयटेनोक्तम्—

नित्यत्वात्पूर्वं हलादिःशेषः । कृताकृतप्रसङ्गित्वात् । द्वितीयद्विर्वचनं तु शब्दान्तरप्राप्त्याऽनित्यम् । तद्धि कृते हलादिशेषे ऽटः प्राप्नोति अकृते तु टशब्दस्य । अन्तरङ्गत्वाच्च "अतो गुणे" इति पररूपं "सन्यतः" इतीत्वस्य बाधकम् । "सन्यत" इतीत्वं हि सनमभ्यासं चापेक्षमाणं बहिरङ्गम् । "प्रागभ्यासविकारेभ्योऽङ्गाधिकार" इति पक्षे इत्वमाङ्गं न भवति इति ।

वार्णादाङ्गं बलवत् इत्यपि नास्ति सत्यपि वा इत्वस्याङ्गत्वेनानाश्रयत्वादाङ्गवार्णयोरत्र परिभाषाऽनुपस्थानमितिउक्तरीत्या च सनो द्वित्वनिमित्ततया द्वितीयाकारसम्पादनद्वारा पूर्वाकारपररूपे निमित्तत्वमस्तीति इत्वपररूपयोरेकनिमित्तकत्वं स्यादिति दिक् ।

अत्रोच्यते । समाननिमित्तप्रयुक्तत्वमेव समानाश्रयत्वमिह विवक्षितम् । सनभ्यासाश्रयत्वादित्वस्य पररूपस्य वर्णमात्रापेक्षत्वाच्च भिन्नाश्रयत्वमिति कैयटोक्तेः । न चैवम् ईयतुरित्यत्र अभ्यासोत्तरस्य ईकारस्य दीर्घयणौ प्रति स्थानित्वेन समानाश्रयत्वमित्यादिग्रन्थविशेषलेखनमसङ्गतं स्यादिति वाच्यम् । तथा सत्यकारस्यैव पररूपमित्वं च प्रति स्थानित्वात्समानाश्रयत्वापत्तेः । न चोक्तस्थलेऽतिव्याप्तिपरिहारः कथमिति वाच्यम् । विवक्षितस्य तत्र सत्त्वात् । तथा हि—अङ्गकार्यप्रतियोगिकोद्देश्यत्वाधिकरणं सत् यद्वार्णकार्यनिमित्तत्वाधिकरणं तदपर्याप्तवार्णकार्योद्देश्यताकत्वम् । उद्देश्यत्वपर्याप्त्यधिकरणैक्ये सति एकधर्मिपर्याप्तत्वं चेत्यन्यतरवन्निमित्तताकत्वं तद् । व्याश्रयत्वेनोदाहृतेषु आङ्गकार्योद्देश्यत्वाधिकरणस्य वार्णकार्यनिमित्तत्वाधिकरणत्वाभावान्नातिव्याप्तिः । विच्छन इत्यत्राङ्गकार्यशत्वोद्देश्यस्य छकारस्य वार्णकार्ये तुकि निमित्तत्वात् अतिव्याप्तिरिति तदपर्याप्तवार्णकार्योद्देश्यत्वनिवेशः । इ इ अतुस् इत्यत्र आङ्गकार्यानुद्देश्यस्य द्वितीयस्य इकारस्य वार्णकार्ये सवर्णदीर्घे निमित्तत्वात्तदुद्देश्यत्वाच्चाव्याप्तिवारणायावृत्तित्वमपहाय अपर्याप्तत्वनिवेशः । पूर्वपरोभयपर्याप्तत्वान्न दोषः । आङ्गकार्यनिमित्तत्ववार्णकार्योद्देश्यत्वयोः सामानाधिकरण्यस्य समानाश्रयत्वेनोदाहृतेष्वभावादसम्भववार-

णाय आङ्गकार्योद्देश्यत्ववार्णकार्यनिमित्तत्वयोः सामानाधिकरण्यं निवेशितम्। आङ्गकार्यप्रतियोगिकोद्देश्यत्वाधिकरणं यत्तदपर्याप्तवार्णकार्योद्देश्यताकत्वमित्युक्ते यद्यपि सि ऊ नः पृच्छती त्यादौ चातिव्याप्तिः। गुणोद्देश्ये इकारे ऊकारे च यण्तुकोरुद्देश्यतायाः पर्याप्तेः, तथाऽपि ऋ ऋ अतुम् अटिटिषतीत्यत्र उरदत्त्वं "सन्यत" इतीत्वं चेत्युभयरूपाङ्गकार्यप्रतियोगिकोद्देश्यत्वाधिकरणयोरभ्यासऋकाराकारयोः सवर्णदीर्घरूपवार्णकार्यप्रतियोगिकोद्देश्यत्वपर्याप्त्यधिकरणत्वाभावादतिव्याप्तिः स्यादतः वार्णकार्यनिमित्तत्वाधिकरणेत्युक्तम्। तयोस्तु न वार्णकार्यनिमित्तत्वम्। द्वितीययोरेव तथात्वात्। तथा चाङ्गकार्योद्देश्यत्वसमानाधिकरणं यद्वार्णकार्यनिमित्तत्वाधिकरणं तस्यासिद्धत्वात्तत्र न दोषः। द्वितीययोराङ्गकार्यानुद्देश्यत्वादाद्ययोश्च वार्णकार्ये प्रत्यनिमित्तत्वात्। वार्णकार्यनिमित्तत्वाधिकरणं यद् तदपर्याप्तवार्णकार्योद्देश्यताकत्वमित्युक्तेः तत्रैवातिव्याप्तिः। द्वितीययोः सवर्णदीर्घोद्देश्यत्वपर्याप्त्यधिरणत्वात्। तन्निमित्तत्वाच्च। एवं पृच्छतीत्यादौ तथा तुको निमित्तस्य छकारस्य तुगुद्देश्यत्वाभावात् ह्रस्वस्यैव तथात्वात्। अत आङ्गकार्यप्रतियोगिकोद्देश्यत्वाधिकरणं सदित्युक्तम्। उक्तस्थले त्वाङ्गकार्यं प्रति तेषामनुद्देश्यत्वान्न दोषः। कृ अ इत्यत्राव्याप्तिवारणाय उद्देश्यत्वपर्याप्तीत्यादि। तत्र ऋकारमात्रे यण्वृद्ध्युभयोद्देश्यत्वस्याकारमात्रे च तदुभयनिमित्तत्वस्य पर्याप्त्या नातिव्याप्तिः इत्येषा दिक्।

अत्र वदन्ति। उक्तपरिभाषायास्समानाश्रयमात्रविषयकत्वमाकरानुरोधाद्वा कल्प्यते धर्मिग्राहकप्रमाणबलाद्वा। नाद्यः। "अजादेः" इति सूत्रे पूर्वपक्षे इयटिषतीतिरूपार्थं कैयटेन सामान्येन "वार्णादाङ्गं बलवत्" इत्या-

श्रीयते, न तु समानाश्रयाङ्गवार्णविषयमेवेतीत्वमेव प्रवर्तते न पररूपमिति इत्यभिहितत्वात् । नान्त्यः । असवर्णग्रहणसार्थक्यान्यथाऽनुपपत्तेः वार्णादाङ्गस्य बलवत्त्वज्ञापनमात्रेणोपक्षीणतया समानाश्रयमात्रविषयकत्वपर्यन्तं तदसामर्थ्यात् । विधेयद्वयस्यैकोद्देश्यकत्वरूपसमानाश्रयत्वस्यैव तद्विषयतया यथोक्तसमानाश्रयत्वासिद्धेश्च ।

किं चैवं सौत्थितिरित्यादौ समानाश्रये ज्ञापितत्वादकृतव्यूहपरिभाषाया अपि तद्विषयएव प्रवृत्तिः स्यात् । न चेष्टापत्तिः । सेदुषीमित्यादौ तदप्रवृत्तिप्रसङ्गात् । न च तत्र समानाश्रयत्वं नास्तीति वाच्यम् । समानाश्रयत्वेन "वार्णादाङ्गं बलीय" इति वृद्धिप्रसङ्गादिति कैयटेनोक्तत्वात् ।

एतेन युगपत्प्राप्तिस्थलमात्रविषयकत्वमस्या इत्यपि निरस्तम् । वृद्धेः प्रत्ययनिमित्तकतया पूर्वं प्राप्त्यभावात् ।

किञ्च विश्ववाह् अस् इत्यत्र सम्प्रसारणं बहिरङ्गं गुणे कार्येऽसिद्धमिति यस्यान्तरङ्गं कार्यं प्रसज्यते तस्यैव बहिरङ्गस्यासिद्धत्वं स्यात् । ततश्चाक्षद्यूरित्यादौ बहिरङ्गस्याप्यूठो यणप्राप्त्यभावादासिद्धत्वं न प्राप्नोतीति "नाजानन्तर्ये" इति तन्निषेधो भाष्यकारैरुपन्यस्तोऽनर्थकः स्यात् । अधीत्य प्रेत्येत्यत्र बाहिरङ्गस्यैकादेशस्यासिद्धत्वप्रतियोगिनः तुक्प्रसक्त्यभावादेवासिद्धपरिभाषाप्रवृत्तिविरहे "षत्वतुकोरसिद्धः" इत्यत्र तुग्ग्रहणेन "नाजानन्तर्ये" इति परिभाषाज्ञापनस्याप्यनुपपत्तेश्च । न चैवं यथोद्देशपक्षाविलयापत्तिः, ज्ञापकसमानदेशत्वस्यानुपपत्त्यविषयतया तदसिद्धेरिति वाच्यम् । लक्ष्यानुरोधेन तत्कल्पनात् । अन्यथा ज्ञापकसमानदेशत्वानियमे तवापि कार्यकालपक्षविलयापत्तेः । व्याश्रयेऽप्येत-

त्यप्रवृत्तौ "यजयाच" इत्यत्र नङो ङित्करणं ज्ञापकमिति सीरदेवादिभिरुक्तत्वाच्च । अन्यथा तुकोऽन्तरङ्गत्वात्प्रवृत्तौ लघूपधत्वाभावादेव गुणप्रसक्त्यभावात्तन्निषेधार्थङित्त्वस्य वैयर्थ्यापत्तेः । च्यवन्ते प्लवन्तइत्यादौ गुणे कृते एकादेश इति न्यासकारोक्तेश्च । शुन इत्यत्राल्लोपस्य कैयटेनोक्तत्वाच्च । न च तत्र समानाश्रयत्वमेव, आङ्गकार्येऽल्लोपे उद्देश्यस्य अकारस्यैव वार्णकार्ये "संप्रसारणाच्च" इति पूर्वरूपे निमित्तत्वात् संप्रसारणादचि परे पूर्वरूपमेकादेशः स्यादिति व्याख्यानात् तदपर्याप्तोद्देश्यताकत्वस्य च सत्त्वादिति वाच्यम्। तत्र निमित्ततावच्छेदकधर्मानवच्छिन्नत्वेनाप्युद्देश्यताया विशेषणीयत्वात् । उक्तपूर्वरूपे चाच्त्वस्यैव निमित्तत्वोद्देश्यत्वोभयावच्छेदकत्वात् । अन्यथा आह्व इत्यादौ आलोपपूर्वत्वयोर्व्याश्रयत्वाभिधानस्यासङ्गत्यापत्तेः ।

नन्वेवं विश्व इत्यत्र व्याश्रयस्यापि शादेशस्य सिद्धौ पूर्वोक्तव्याश्रयेषु दोषापत्तिरिति चेत्, सत्यम् । "वार्णादाङ्गम्" इत्यस्य अनित्यत्वात् न तत्र प्रवृत्तिः । तत्र च मानम् "च्छ्वोः" इति सतुक्कनिर्देशः । न चाच इत्यस्यानुपादाने स्थानिवत्त्वेन तुको निषेधार्थं तदिति वाच्यम् । अच इत्यस्यान्यार्थमावश्यकत्वात् । न च तत्र मानाभावः । षाष्ठभाष्यस्यैव तथात्वात् ।अन्यथा आङ्गत्वात् शत्वे कृते तुक्प्रसक्त्यभावात्तदसङ्गत्यापत्तेः । तेन पूर्वोक्तव्याश्रयेषु न दोषः । न च सतुक्कनिर्देशस्य प्रकृतपरिभाषायाः समानाश्रयमात्रविषयकत्वज्ञापकत्वमेवास्तु इति वाच्यम् । विषयविशेषावच्छेदेन सङ्कोचे गौरवात् । निरुक्तसमानाश्रयत्वस्य गुरुत्वाच्च । नन्वत्र तुक्प्रसक्तिरेव नास्ति, "अकृतव्यूह" इति न्या-

यात् । नैवम् । तस्याप्यनित्यत्वे सतुक्कनिर्देशस्य मानत्वात् । एवं च नङो ङित्त्वं गुणनिषेधार्थमेव । सीरदेवाद्युक्तिस्तु यथा-श्रुतार्थाभिप्राया ।

एतेन नङो ङित्त्वमेवाकृतव्यूहपरिभाषाज्ञापकम् । "समर्थानाम्" इति तु माऽस्तु । "समर्थसूत्रं कर्त्तव्यम्, क्रियते च समर्थानां प्रथमाद्वा" इति भाष्यस्वारस्यादित्यपि व्याख्यातम् ।

अथ "राल्लोपः" इत्यत्रापि सतुक्कस्यानुवृत्त्यापत्तौ हूः हुरौ इत्यादौ वितुक्कस्य छस्य लोपो न स्यात् । न चानुवृत्तिसामर्थ्याच्छुद्धशकारस्यैव तत्रोपादानम्, रेफोत्तरच्छकारस्य तुगभावनैयत्यादिति वाच्यम् । वकारमात्रानुवृत्तेः सम्भवात् छकारस्यानुवृत्तावेव मानाभावात् ।

अत्राहुः—सतुक्कवितुक्कौ द्वावपि निर्दिश्येते । न च समाहारद्वन्द्वे एकवचनस्य इतरेतरयोगे तु बहुवचनस्यापत्तिरिति वाच्यम् । छकारयोस्समाहारद्वन्द्वं कृत्वा वकारेण सह इतरेतरयोगे द्वन्द्व इति व्याख्यानात् । आदेशेऽपि द्वितीयशकारप्रश्लेषः।

यद्वा "न ध्याख्या" इति मूर्छेः परस्या ।निष्ठाया नत्वानिषेधाल्लिङ्गाच्छुद्धस्य छकारस्य "राल्लोप" इत्यत्रान्वयः । छलोपं विना रेफात्परत्वाभावेन नत्वप्रसक्तिविरहात् इति दिक्।

प्रकृतमनुसरामः । अच इत्यस्य प्रत्युदाहरणं तु द्यूत्वा स्यूत्वेति । अन्यथा ऊठः स्थानिवत्त्वाद्यण् न स्यात् । न चातिदेशानां स्वाश्रयानिवर्त्तकत्वात्स्वाश्रयमत्राच्त्वं भविष्यतीति वाच्यम् । विधिग्रहणसामर्थ्यात्स्वाश्रयनिवृत्तेः वतिनिर्देशादभावस्याप्यतिदेश इत्यस्य वक्ष्यमाणत्वात् । ननु आदेशत्वपर्याप्त्याश्रयस्य ऊठो न यण्निमित्तत्वम्, यण्निमित्तस्य ऊकारस्य च नादेशत्वपर्याप्त्याश्रयत्वम्, तस्य समुदाये पर्याप्तेरिति चेन्न । अ-

नुबन्धानामनेकान्तत्वाद् । एकान्तत्वेऽपि पूर्वप्रध्वंसित्वादूकारस्यैवादेशत्वपर्याप्त्याश्रयत्वात् । एवमाभिगत्येत्यत्रापि मकारलोपस्य परनिमित्तकत्वात् तस्य स्थानिवद्भावे "ह्रस्वस्य पिति कृति" इति तुक् न स्यात् । ननु अक्राष्टामित्यत्र सिचो लोपस्य परनिमित्तकत्वात्तस्य स्थानिवद्भावे "षढोः कः सि" इति कत्वं स्यादिति कुतो न प्रत्युदाहृतमिति चेन्न । "पूर्वत्रासिद्धे न स्थानिवत्" इत्यनेनैव निषेधात् । परस्मिन्निति किम् । युवजानिः । जायाया निङ् आकारादेशत्वात्पूर्वस्य यकारस्य "लोपो व्योः" इति लोपे कर्त्तव्ये स्थानिवद्भावो मा भूत् । व्याघ्रस्येव पादावस्य व्याघ्रपात् । "पादस्य लोपोऽहस्त्यादिभ्य" इत्यपरनिमित्तको लोपः । ततो गर्गादित्वाद्यञ् । वैयाघ्रपद्यः । "पादः पद्" इति पदादेशे कार्येऽकारलोपस्य न स्थानिवत्त्वम् । न च वचनसामर्थ्यम् । एकादेशस्यादिवद्भावेन पादेनेत्यादावप्यापत्तेः । द्विपदिका इत्यत्र पद्भावस्य चारितार्थ्याच्च । तत्र "पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च" इति वुन् अकारलोपश्च । न च तत्रापि स्थानिवद्भावः । "यस्येति च" इति लोपे सिद्धेऽपि पुनर्लोपवचनसामर्थ्यात्तस्य परनिमित्तकत्वाभावात् । "पादस्य लोपः" इत्यस्य तु न सामर्थ्यम् । व्याघ्रपादित्यादौ भसंज्ञाविरहे सावकाशत्वात् । "परस्मिन्" इत्युक्ते तु पादेनेत्यादौ न पद्भावः । वैयाघ्रपद्य इत्यादौ पद्भावस्य सावकाशत्वात् । तत्रैकादेशस्य स्थानिवद्भावात् । वर्णग्रहणे जातिग्रहणादचोरादेशेऽपि तत्प्रवृत्तेः । अत एव आयसौ गौमतौ चातुरौ आनडुहौ इत्यादावेकादेशस्यादिवद्भावेन प्रसक्तौ नुमामौ न । एवं "परस्मिन्" इत्यनुक्तौ औदवाहौ इत्यत्र एकादेशस्यादिवत्त्वात् भसंज्ञायां वाह् इत्यस्य ऊठ् स्यात् । उदकं वहतीति उदवाहः ।

कर्मण्यण् । उदकस्योदः संज्ञायाम् । बाह्वादित्वादिञ् । आदी-ध्ये आवेध्ये इत्यत्र इकारस्य टेरेत्वम् अपरनिमित्तकम्, तस्य स्थानिवत्त्वाद् “ यीवर्णयोर्दीधीवेव्योः ” इति लोपः स्यात् । पूर्वविधाविति किम् । नैधेयः । निपूर्वाद्धाञः किः । आतो लोपः । “ द्व्यचः ” “ इतश्चानिञः ” इति ढक् । आल्लोपस्य स्थानिवत्त्वात् त्र्यच्कत्वात् उक्तविध्यप्रवृत्तिर्मा भूत् । त्र्यच्के द्व्यच्कार्याणामप्रवृत्तेः । न च पूर्वस्येति पाठेऽपि कार्ये कर्त्तव्ये इत्यर्थस्याक्षेपसम्भवाद्विधिग्रहणवैयर्थ्यम् । पूर्वस्य पूर्वस्मादि-ति समासद्वयलाभार्थत्वात् । पञ्चमीसमासोदाहरणं तु तन्वन्ती-ति प्रागेवोक्तम् ।

ननु “ असिद्धं बहिरङ्गमन्तरङ्गे ” इत्यत एवैतद् गतार्थम् । न च “ नाजानन्तर्ये ” इति निषेधः । यत्रान्तरङ्गे अच आनन्तर्यम्, तत्रैव तदिति कैयटसिद्धान्तात् । अत्र तु बहिर-ङ्गे यणि अजानन्तर्यस्यापेक्षितत्वात् । मैवम् । यत्रान्तरङ्ग-बहिरङ्गयोर्मध्येऽन्यतरत्राजानन्तर्यं तत्र तन्निषेधप्रवृत्तेर्हरदत्तेन स्वीकारात् ।

अत्रेत्थं प्रत्यवतिष्ठन्ते । यत्रोत्तरकालप्रवृत्तिकेऽजानन्त-र्यापेक्षा तत्र “ असिद्धं बहिरङ्गम् ” इति परिभाषा न प्रवर्त्तत-इति कैयटमतमेव युक्तम्, न तु द्वयोर्मध्येऽन्यतरत्रेति हरदत्त-मतम् । पचावेदमित्यत्र “एत ऐ” इत्यप्रवृत्तिमाशङ्क्य बहिरङ्गत्वे-न गुणस्यासिद्धत्वादिति भाष्यहरदत्ताद्युक्तस्यासङ्गतिप्रसङ्गात् । पूर्वप्रवृत्तिके गुणेऽजानन्तर्यसत्त्वे निषेधापत्तेः । कैयटरीत्या तु गुणोत्तरप्रवृत्तिकऐत्वे अजानन्तर्यानपेक्षणेन निषेधाप्रवृत्त्या बहि-रङ्गत्वेनासिद्धत्वोपपत्तेः । “न धातुलोप” इति सूत्रे भेद्य इत्यत्र बहिरङ्गत्वेनासिद्धत्वमाश्रित्य समादधता भाष्येण विरोधाच्च ।

किं च "न पदान्त" इति सूत्रे दद्ध्यत्रेति वृत्तिग्रन्थमुपादाय स्थानिवत्त्वनिषेधसामर्थ्यान्न बहिरङ्गपरिभाषाप्रवृत्तिरिति हरदत्तोक्तिविरोधः । तद्रीत्या बहिरङ्गे यणि अजानन्तर्यसत्त्वेन "नाजानन्तर्ये" इति निषेधादेव तदप्रवृत्तिसिद्धौ सामर्थ्यानुधावनवैयर्थ्यात् ।

किं च "संयोगान्तलोपे यणः प्रतिषेधः" इत्यस्य बहिरङ्गपरिभाषया प्रत्याख्यानपरभाष्यवार्त्तिकविरोधः । बहिरङ्गे यण्यजानन्तर्यसत्त्वेन बहिरङ्गपरिभाषाया अप्रवृत्त्यापत्तेः । तस्माद्धरदत्तमतं पूर्वापरस्वग्रन्थविरोधात् भाष्यविरोधाच्चोपेक्ष्यमिति ।

अत्रेदं विचारणीयम् । यत्र कार्यविधावानन्तर्येणाचोराश्रयणं तत्र निषेधादनुपस्थानं परिभाषायाः, यथाऽक्षद्यूरिति । तत्र हि "इको यणचि" इति वचनादचोराश्रयणमिति । अस्मिंस्तु प्रतिषेधसूत्रे नास्त्यचोराश्रयणमिति तावद् नधातुलोपसूत्रे कैयटग्रन्थः । तत्र "अचोः" इति द्वित्वं विवक्षितं न वा । नाद्यः । धर्मिग्राहकमानविरोधात् । "षत्वतुकोरसिद्धः" इत्यत्रान्तरङ्गेऽद्वयानन्तर्यस्यानपेक्षितत्वात् । इणः परस्य सस्य षत्वविधानात् । ह्रस्वस्य तुग्विधानाच्च । न द्वितीयः । दद्ध्यत्रेत्यत्राप्यचः परस्य यरो द्वित्वविधानादजानन्तर्यसत्त्वादुक्तानिषेधापत्त्या स्थानिवत्त्वनिषेधसामर्थ्यानुसारस्यावश्यकत्वात् । न च यत्र परवर्त्तिनोऽचो निमित्तत्वं तत्रैव "नाजानन्तर्ये" इति निषेधप्रवृत्तिः, यथाऽक्षद्यूरित्यादौ, दद्ध्यत्रेत्यत्र तु पूर्ववर्त्तिन एव तथेति न तत्प्रवृत्तिरिति वाच्यम् । धर्मिग्राहकविरोधात् । बहिरङ्गे अचोरानन्तर्यस्थले ज्ञापितायाः परिभाषाया यत्रान्तरङ्गेऽचोरानन्तर्यं तत्रैव प्रवृत्तिरित्यस्य दुर्घटत्वात् । तस्मादयमत्र

हरदत्ताभिप्रायः—

अचोरिति द्वित्वं विवक्षितमेव । तदाश्रयणं चान्तरङ्गे बहिरङ्गे वेत्यत्र नाग्रहः । ज्ञापके बहिरङ्गएवाचोरानन्तर्यापेक्षायामपि लक्ष्यानुरोधेन तन्नियमस्य परिभाषायामनन्तर्भावात् । अत एव धिन्वन्ति कृण्वन्ति यणादेशे कृते वलादिलक्षण इट् प्राप्नोति, स्थानिवद्भावान्न भवतीति भाष्यकृद्भिरुक्तम् । "नाजानन्तर्ये" इति निषेधाप्रवृत्तौ बहिरङ्गपरिभाषयैव गतार्थत्वापत्तेः ।

किं च कर्त्रर्थमित्यत्र रेफद्वयश्रवणार्थम् उरण्रपरसूत्रे परेणाण्ग्रहणमस्तु इत्याशङ्क्य रेफादेशस्य कृतेऽपि रपरत्वे "रो रि" इति लोपस्यावश्यकतया रेफद्वयश्रवणं नास्तीति भाष्यएवोक्तम् । तत्रासिद्धपरिभाषाप्रवृत्तौ तु लोपानुपपत्त्या रेफद्वयश्रवणार्थत्वस्य निर्बाधत्वापत्तेः । पूर्वप्रवृत्ततया यणादेशे अजानन्तर्यसत्त्वेन"नाजानन्तर्ये"इति निषेधप्रवृत्तावेव तद्भाष्यस्य सामञ्जस्याद् । उत्तरकालप्रवृत्ते लोपे एकस्याप्यचोऽनपेक्षितत्वेन उक्तनिषेधस्य योजयितुमशक्यत्वात् ।

एतेन तत्रत्योक्तपूर्वपक्षविरोधोद्भावनेन हरदत्तमतदूषणमप्यपास्तम् । सिद्धान्तविरोधस्य कैयटमतएवोद्भाव्यत्वात् । "न पदान्त" इतिसूत्रस्थग्रन्थस्य च नाजानन्तर्यपरिभाषा व्यतिरेकेणापि तत्र नानुपपत्तिरित्याशयेन प्रवृत्तत्वात् । कैयटमतेऽपि आजिति द्वित्वस्याविवक्षिततया वृत्रहभ्यामित्यादौ एतत्प्रतिषेधप्रवृत्त्यापत्त्या "ह्रस्वस्य पिति कृति" इति तुगागमापत्त्या असिद्धो नलोप इति भाष्योक्त्या "नलोपः सुप्स्वर" इति "असिद्धं बहिरङ्गम्" इति वेति कैयटोक्त्या च विरोधात् । अनित्यत्वोक्तेश्च "एत ऐ" इत्यत्र हरदत्तमतेऽपि साम्यात् ।

यत्तु "एत ऐ" इत्यस्याचः स्थाने जायमानत्वेऽपि अच

आनन्तर्याभावान्न दोष इति । तदसत् । आनन्तर्यं ह्यव्यवहित-पूर्वापरीभावो वा निमित्तकार्यिणोरन्यतरस्याचूत्वं वा । नाद्यः । अजिति द्वित्वविवक्षायामेव पर्यवसानात् । नान्त्यः । पचावेदमित्यत्रापि सत्त्वात् । "यणः प्रतिषेधः" इतिवार्त्तिकप्रत्याख्यानस्य च "झलो लोपाद्" इत्येतदभिप्रायकत्वाद्, एतत्प्रतिषेधानित्यत्वाभिप्रायकत्वाद्वा, असिद्धपरिभाषायाः कार्यकालत्वेऽप्येतत्परिभाषाया यथोद्देशपरत्वाद्वेति दिक् ।

अत्रायं सिद्धान्तः—अन्तरङ्गं बलवद्" इति परिभाषा निरपवादा । "असिद्धं बहिरङ्गम्" इति तूक्तापवादा ।

यत्तु विप्रतिषेधसूत्रे पूर्वपरिभाषा गतार्थेति भाष्यम् । तदभ्युच्चयमात्रमिति भागवृत्तिकैयटलघुविवरणकारादयः ।

बृहद्विवरणकारास्तु—"नाजानन्तर्ये" इति परिभाषा माऽस्तु । तज्ज्ञापकेनासिद्धपरिभाषाऽनित्यत्वस्यैव ज्ञाप्यत्वादित्याहुः । "नाजानन्तर्ये" इति भाष्यमप्यसिद्धपरिभाषाया अनित्यत्वपरतयैव नेयमिति दीक्षिताः ।

वस्तुतस्तु विषयविशेषावच्छिन्नमानित्यत्वं समर्पयितुं नाजानन्तर्यपरिभाषाश्रौव्यमिति भाष्याशयः । अत एव वृत्तिकारसीरदेवाभ्यामुक्तम्—"नलोपः सुप्स्वर" इति सूत्रे कृतितुग्ग्रहणेनासिद्धपरिभाषाया अनित्यत्वं ज्ञाप्यते । तेनामू इत्यत्र बहिरङ्गस्यैकादेशस्यासिद्धत्वेनान्तरङ्गमुत्वं सिध्यति । पपुषः पश्येत्यत्र बहिरङ्गस्य संप्रसारणस्यासिद्धत्वात् "वस्वेकाजाद्घसाम्" इतीट् च न भवतीति । अत एव बहिरङ्गपरिभाषाया अनित्यत्वाद् या सेत्यत्र बहिरङ्गमपि त्यदाद्यत्वमन्तरङ्गेटापि नासिद्धमिति हरदत्तः ।

केचित्तु यथोद्देशपक्षेऽसिद्धपरिभाषायास्तत्राप्रवृत्त्या कार्य-

कालपक्षे च "नाजानन्तर्ये" इति निषेधात् तुग्ग्रहणं सार्थकमेवेत्याहुः । "न यासयोः" इति ज्ञापकादेव तत्र बहिरङ्गपरिभाषाया अप्रवृत्तेः इत्यास्तां तावत् ।

प्रकृतमनुसरामः । ननु पूर्वस्येति षष्ठ्या कार्यित्वनिमित्तत्वरूपसंबन्धद्वयस्योपसंग्रहसिद्धे विधिग्रहणं माऽस्तु । तत्रापि पूर्वस्मान्निमित्तत्वेनाश्रितादिति व्याख्येयत्वात् । अन्यथा हेगौरित्यत्र गकारात्परस्य विधौ वृद्धेः स्थानिवत्त्वाद् "एङ्ह्रस्वाद्" इति संबुद्धिलोपापत्तेः । सत्यम् । योगविभागार्थं तत्, तेन पूर्वस्य विधौ स्थानिवदेव न तु स्वाश्रयम् ।

यद्वा–विधिग्रहणसामर्थ्याच्छास्त्रीयेऽशास्त्रीये च विधिमात्रे स्थानिवत्त्वम् । तेन पटयतीत्यादौ टिलोपाभाववेलायाम् "अत उपधाया"इति वृद्धेर्निमित्ताभावादेवाभावात् टिलोपे कृतेऽपि न प्रवृत्तिः । अशास्त्रीयस्यापि वृद्ध्यभावस्यातिदेशात् ।

ननु पूर्वसूत्राद्विधिग्रहणानुवृत्त्यैव सिद्धिः । यद्वा–स्थानिवदिति वतिबलेनाभावोऽप्यतिदिश्यते, उशीनरवन्मद्रेषु यवाः सन्तीतिवत् । तदुक्तम्–

कामसतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति इति ।

इति चेत्, सत्यम् । तथाऽपि पूर्वस्यैव विधौ स्थानिवत्त्वम्, न तु पूर्वपरयोर्विधाविति नियमार्थत्वात् । तेन ईयतुरिति सिद्धम् । अन्यथा इणोऽतुसि यणादेशे "द्विर्वचनेऽचि" इति स्थानिरूपातिदेशादिकारस्य द्वित्वे तत्काले यणोऽपहारात् अन्तरङ्गत्वात्सवर्णदीर्घः स्यात् । व्याश्रयत्वेन "वार्णादाङ्गम्" इत्यप्रवृत्तेः । न च सवर्णदीर्घानन्तरं यणि बाधकाभावान्निमित्तस्य विनाशोन्मुखत्वान्न सवर्णदीर्घः । कृतेऽपि यणि स्थानिवद्भावेन निमित्तविघाताभावात् । इ अतुस् इति स्थिते "अन्तादिवच्च" इ-

त्यभ्यासग्रहणेन ग्रहणादभ्यासह्रस्वे "दीर्घ इणः किति" इति दीर्घे तत्सामर्थ्याद्यणभावे इ अतुरिति स्यात्। उक्तरीत्या तु सवर्णदीर्घस्य पूर्वपरोभयविधित्वाद्यणादेशस्य स्थानिवद्भावानुपपत्त्या सवर्णदीर्घस्य निमित्तविघातापत्त्या अकृतव्यूपरिभाषया तदप्रवृत्तौ द्वितीयस्य इकारस्य यणादेशे पूर्वस्य दीर्घे च सिद्धमिष्टम्। इह सन्निधिसाम्येऽपि स्थान्यपेक्षमेव पूर्वत्वं गृह्यते, न त्वादेशाद् निमित्ताद्वा। तेन वैयाकरणः सौवश्व इत्यत्र यणादेशस्य स्थानिवद्भावमाश्रित्य प्राप्तौ "एचोऽयवायाव" इति आयावादेशौ न स्तः। एचो यणादेशोत्तरकाले प्रवृत्त्या अनादिष्टादचः पूर्वत्वस्य विरहात्। तदुक्तम्—

अचः पूर्वत्वविज्ञानादैचोः सिद्धमिति।

न च स्थानिन आदेशेनापहृतत्वात्कथं तदपेक्षपूर्वत्वोपादानम्। पूर्वत्वे तस्योपलक्षणत्वात्।

अथैवं निराघेत्यत्र जग्ध्यादेशः घात्यादित्यत्र वधादेशश्च स्यात्। तत्र हि—ण्यल्लोपौ" इति पूर्वविप्रतिषेधेन पूर्वं णिलोपस्ततः प्रत्ययलक्षणेन वृद्धिः। तथा चानादिष्टादचो णिच इकाराद् आद् घात् इत्यनयोः पूर्वत्वं नास्ति। एकदेशविकृतन्यायेन च अदिहन्ग्रहणाभ्यां तद्ग्रहणमिति चेन्न। स्थानिद्वारा तयोरप्यनादिष्टादचः पूर्वत्वात्। न च स्थानिनि तस्यार्थसिद्धत्वेऽपि शास्त्रीयत्वाभावादतिदेशानर्हत्वात् कथमादेशस्यानादिष्टादचः पूर्वत्वलाभ इति वाच्यम्। "अचः परस्मिन्" इत्यतिदेशस्यैव शास्त्रीयकार्यत्वात्स्थानिवत्सूत्रेण तस्यैवातिदेशसंभवात्। "न पदान्त" इति सूत्रे सवर्णग्रहणश्चेह लिङ्गम्। अन्यथाऽल्लोपानन्तरप्रवृत्तस्यानुस्वारस्य स्वरूपतोऽनादिष्टादचः पूर्वत्वाभावादेव स्थानिवद्भावाप्रसक्त्या

तन्निषेधवैयर्थ्यात् । नन्वेवम् ब्राह्मणकण्डूतिरिति न सिद्ध्येत्, कण्डूयतेः क्तिचि अल्लोपयलोपौ, अल्लोपस्य स्थानिवत्त्वादुवङ् तस्य स्थानिद्वाराऽनादिष्टादचः पूर्वत्वाद् "अचः परस्मिन्" इति स्थानिवद्भावादकारेण व्यवधानान्नोठ्, नापि "लोपो व्योः" इति वलोपः । "हलि च" इति दीर्घे कण्डूवूतिरित्यस्यापत्तेः । न चोवङः स्थानिद्वाराऽनादिष्टादचः पूर्वत्वेऽपि न तस्यात्र कार्यम्, किं तु वकारमात्रस्य, स च नादेशत्वपर्याप्त्याश्रय इति तस्यापि स्थानिद्वारकमनादिष्टादचः पूर्वत्वं नास्तीति वाच्यम् । "सर्वे सर्वपदादेशा" इति न्यायेन कण्डू इत्यस्य कण्डुव् इत्यादेशः । तस्य कण्डू इत्यादेशे कार्येऽल्लोपस्य स्थानिवत्त्वसौलभ्यात् ।

अत्राहुः—स्थानिद्वारकमनादिष्टादचः पूर्वत्वमनित्यम् । कण्डूतिरिति भाष्योदाहरणसामर्थ्यात् । तितउमाचष्टे तितापयतीति हरदत्तग्रन्थाच्च । अन्यथा णौ टिलोपे च तस्य स्थानिवत्त्वाद् "अचो ञ्णिति" इति वृद्ध्यभावेऽपि "अत उपधाया" इति वृद्ध्याऽऽकारे तस्य स्थानिद्वारा उकारात्पूर्वत्वेन उकारलोपस्य स्थानिवद्भावात्पुको दुर्लभत्वात् । न च पुक आकारान्तसमुदायावयवत्वादाकारमात्रस्य च पूर्वत्वान्न पुग्विधावुकारलोपस्य स्थानिवद्भाव इति वाच्यम् । उक्तन्यायेन आकारान्तस्यापि पूर्वत्वादिति ।

यत्तु तितउ णिच् इति स्थिते वृद्धिटिलोपयोर्नित्यत्वे परत्वाद् "अत उपधाया" इति वृद्धिः, ततष्टिलोपे आदन्तस्य स्वत एवानादिष्टादचः पूर्वतया स्थानिवद्भावस्य दुर्वारतया पुको दुर्लभत्वम् । तस्मात् शपि णिचो गुणे तस्य वृद्धौ आयादेशे तितायतीत्येव रूपम् । न च तिता णिच् इति स्थितेऽन्तरङ्गत्वाद् आद्गुणे शप्ययादेशे तितयतीत्यस्यापत्तिः । अकृतव्यूह-

परिभाषया पूर्वमाद्गुणस्याप्रवृत्तेः । वृद्ध्या तन्निमित्तविघातस्यो-त्पत्स्यमानत्वात् । अकृतव्यूहपरिभाषाया अन्तरङ्गपरिभाषाऽ-पवादत्वात् । न च शपि गुणस्य "अचः परस्मिन्" इति स्था-निवत्त्वादाद्गुणस्य निमित्तस्य विघातो न भवतीति वाच्यम् । पूर्वपरयोर्विधौ स्थानिवत्त्वाभावात् । लुङि तु तिता णिच् चङ् तिप् इति स्थिते "तनोतेर्डउः सन्वच्च" इति व्युत्पत्तिप-क्षे "अनभ्यासस्य" इति द्वित्वनिषेधे "चङ्परनिर्ह्रासे" इति टिलोपस्य स्थानिवत्त्वनिषेधेन ह्रस्वाभावे णिलोपस्य स्थानिव-त्त्वादसिद्धत्वाद्वाऽतोलोपाभावे दीर्घविधौ स्थानिवद्भावनिषेधा-त्सवर्णदीर्घेऽतितादित्येव न त्वातितापदिति ।

तच्चिन्त्यम् । टिलोपस्य नित्यत्वात् । "अचः परस्मिन्" इति कार्यातिदेशेन वृद्धिप्राप्तावपि "लक्षणान्तरेण प्राप्नुवन्नानित्यः" इत्यनित्यत्वात् । किं त्वनित्यमपि अनादिष्टादचः पूर्वत्वमिह नेष्यतइत्यत्र प्रमाणं चिन्त्यमिति ।

वस्तुतस्तु स्थानिद्वारकमनादिष्टादचः पूर्वत्वमित्यत्र माना-भावः । अशास्त्रीयतयाऽतिदेशानर्हत्वात् । अत एव आह्व अ इ-त्यत्र संप्रसारणे आतोलोपस्य स्थानिवद्भावात्तन्निमित्ते यणादेशे च आह्व इति सिद्धमित्याशङ्क्य आतोलोपस्य स्थानिवद्भावो न भवति उकारस्यानादिष्टादचः पूर्वत्वाभावादिति भाष्यम् । व्या-ख्यातं च कैयटेन—

नन्वनादिष्टादचः पूर्वो वकार इति तदादेशस्यापि स्था-निवद्भावादनादिष्टादचः पूर्वत्वं भविष्यति, नैतदस्ति, शास्त्रीय-कार्यसिद्धये स्थानिवद्भावो विधीयते, न त्वनादिष्टादचः पूर्वत्वे लौकिके इति ।

यत्तु "अचः परस्मिन्" इत्यतिदेश एव शास्त्रीयं कार्यमि-

त्यादि, तदसत् । अतिदेशस्य शास्त्रीयत्वविरहानुद्धारात् । अतिदेशनिष्ठशास्त्रीयताया अकिञ्चित्करत्वात् । यद्रूपवैकल्यादुपदेशाप्रवृत्तौ सत्यामतिदेशो मृग्यते तद्रूपनिष्ठशास्त्रीयत्वस्यैवापेक्षितत्वात् । अन्यथाऽपशब्दानुकरणस्याप्यसाधुत्वं स्यात् । असाधुत्वमाश्रित्यासाधुप्रयोगनिषेधे प्रवर्त्तयितव्येऽसाधुत्वस्यापेक्षिततया तस्यापि शास्त्रीयत्वापत्तेः । "प्रकृतिवदनुकरणम्" इति हि तत्रातिदेशशास्त्रम् । ब्राह्मणेन नापभाषितवै इति निषेधोऽतिदेश्यः । तद्घटकं चासाधुत्वम् । प्रकृतेऽपि "स्थानिवदादेशः" इति अतिदेशशास्त्रम् । "अचः परस्मिन्" इति स्थानिवद्भावोऽतिदेश्यः । तद्घटकं चानादिष्टादचः पूर्वत्वमिति साम्यात् । न चेष्टापत्तिः । ऋत्वृक्सूत्रस्थभाष्यादिस्वपरग्रन्थविरोधात् । अत एव द्यूत्वेत्यत्र यणादेशानुपपत्तिरेव भाष्ये उपन्यस्ता, न तु ऊठः स्थानिवत्त्वात् "लोपो व्योः" इति यकारलोपापत्तिरपि, अनादिष्टादचः पूर्वत्वाभावादिति कैयटेनोक्तम् । "रुग्यत्यात्" इति सूत्रेऽपि आदिष्टादचः पूर्वत्वात्सखीयतेः क्वौ अल्लोपस्य न स्थानिवत्त्वमिति शङ्कायां तत्रोक्तम् । क्वौ लुप्तं न स्थानिवदिति च समाहितम् । "लोपो व्योः" इति सूत्रेऽपि कण्डूरित्यत्रातोलोपस्य स्थानिवत्त्वादुवङ् स्यादित्याशङ्क्योक्तम्—

तत्रैव क्विबाश्रय ऊठ् करिष्यते ऊठि च कर्त्तव्ये नास्ति स्थानिवद्भावः । आदिष्टादचः पूर्वत्वात् । अत एव कण्डुवौ कण्डुव इत्यादावूठ् । उवङि कर्त्तव्ये नास्त्यल्लोपस्य स्थानिवद्भाव इति ।

स्थानिद्वारके त्वनादिष्टादचः पूर्वत्वे गृह्यमाणे तदनित्यत्वपरतया बहूनां ग्रन्थानां कदर्थनं स्यात् ।

यत्तु स्थवीयानित्यत्र गुणलोपयोस्तुल्यकालत्वात् गुण-

स्य कथमनादिष्टादचः पूर्वत्वमित्याशङ्क्य स्थानिनोऽनादिष्टादचः पूर्वत्वात्तद्द्वारेण गुणस्यापि भविष्यति, तत्र स्थानिवद्भावे सति त्वकारेण व्यवधानादवादेशाप्रसङ्ग इति कैयटेनोक्तम्। तदभ्युपेत्यवादमात्रम्। उक्तयुक्तेः। अञ्झलादेशेऽपि स्थानिवदिति पक्षमुपक्रम्य लिखितत्वाच्च। इयेषेत्यादौ "अभ्यासस्यासवर्णे" इति इयङुवङोर्निमित्तविघातकत्वं गुणस्योपपादयितुं सवर्णग्रहणसार्थक्यस्य स्वयमेवोक्तत्वात्। तस्य प्रत्याख्येयत्वाच्च। निराद्येत्यादौ चासिद्धपरिभाषया समाधानात्। आश्रीयमाणायामेव प्रकृतौ स्थानिवद्भाव इति पक्षे जग्ध्यादेशे णेर्निमित्तत्वेनानाश्रयणात्स्थानिवत्त्वानुपपत्त्योक्तरीत्यैव समाधेयत्वाद्। अत्र च पक्षे विधीयते इति विधिः। कर्मणि किप्रत्ययः। पूर्वस्येति शेषे षष्ठी। सा च न स्थानेयोगा। अनुवादे परिभाषाऽनुपस्थानात्। एतेनाऽऽयन्नासन्निति व्याख्यातम्। "इणो यण्" "श्नसोरल्लोपः" इत्यनयोः स्थानिवद्भावेन अजादित्वादाट्प्रवृत्तेः। पूर्वस्य तदवयवस्य तद्विकारस्य वा विधावित्यर्थादागमादिविधावपि स्थानिवत्त्वप्रवृत्तेः। "अचः" इत्यत्र त्वादेशपदसमभिव्याहारात्स्थानषष्ठी। इहापि स्थानेग्रहणानुवृत्तेर्वा।

भाष्ये तु निमित्तापेक्षं आदेशापेक्षं वा पूर्वत्वमित्यपि पक्षद्वयमुक्तम्। वैयाकरणादौ तु ऐचोरसिद्धत्वान्न दोषः। नाजानन्तर्यपरिभाषा त्वनित्या। न च निमित्तापेक्षमिति पक्षे वैयाकरणादौ कथमतिप्रसङ्गो य्वोरेव निमित्तात्पूर्वत्वादैचोश्च विधेयत्वादिति वाच्यम्। तयोरपि तदवयवत्वादिति न्यासकारः।

अत्र विधिरिति भावे किः। पूर्वस्येति कर्मणि षष्ठीत्यपि बोध्यम्। ननु निमित्तापेक्षया पूर्वत्वे द्वाभ्यामित्यादौ त्यदाद्यत्वस्य स्थानिवद्भावात् "सुपि च" इति दीर्घः "इद्य-

ति" इतीत्वस्य स्थानिवत्त्वादिगन्तलक्षणो गुणो लवनं लावक इत्यादौ गुणवृद्ध्योः स्थानिवत्त्वादवावादेशौ च न स्यातामिति चेत्, अत्र भाष्यम्—

स्वाश्रया एते विधयो भविष्यन्तीति ।

यद्यपि विधिग्रहणसामर्थ्यादत्रातिदेशे स्वाश्रयनिवृत्तिरिति सिद्धान्तः, तथाऽपि "द्वयोरेकस्य डतरच्" "देयमृणे" "किरतौ लवने" इत्यादिनिर्देशात्सिद्धिरिति कैयटः ।

पूर्वत्वं च व्यवहितसाधारणम् । पूर्वं मथुरायाः पाटलिपुत्रमित्यादिदर्शनात् । पूर्वस्येति साक्षादुपादानात् "तस्मिन्निति निर्दिष्टे" इत्यस्यानुपस्थितेः । एवं च स्वरविधौ स्थानिवद्भावनिषेधोऽपि सङ्गच्छते । चिकीर्षक इत्यत्र सनकारापेक्षया ईकारस्य रेफषकाराभ्यां व्यवहितत्वात् । स्वरविधौव्यञ्जनमविद्यमानवदित्यस्य सत्त्वेऽपि स्थानिवद्भावे तदभावात् । अत एव चङ्परनिर्ह्रासे निषेधोपसंख्यानं वक्ष्यते । तेन पटयति अवधीदित्यादौ स्थानिवत्त्वम् । भाष्यमते वधादेशस्यादन्तत्वात् । "आर्द्धधातुके" इत्यस्य विषयसप्तमीत्वादित्यादि प्रागुक्तम् । न च पटयतीत्यत्र सुबन्ताण्णिजुत्पत्त्याऽन्तर्वर्त्तिविभक्त्या पदत्वाज्जश्त्वापत्तिः, तद्विधौ स्थानिवद्भावनिषेधादिति वाच्यम् । कर्मसमर्पकात्प्रातिपदिकादेव णिजुत्पत्तेः । सुबन्तादिति पक्षेऽपि "णाविष्ठवद्" इत्यतिदिष्टभसंज्ञया पदसंज्ञाया बाधात् । एतेन पट्व्या मृद्व्या इति सर्ववृत्त्युक्तत्वान्मूर्द्धाभिषिक्तसूत्रोदाहरणमिति भाष्यं व्याख्यातम् । तथा हि—पटु ई आ इति स्थिते परयणादेशे कृते निमित्तात्पूर्वत्वे गृह्यमाणे परयणादेशनिमित्तादाकाराद्व्यवहितपूर्व उकारो न भवति इति तस्य यणादेशे कर्त्तव्ये यणः स्थानिवत्त्वं न स्यात् । अतो व्यवहितस्यापि पू-

र्वत्वाश्रयणात्सिद्धम् । न च पूर्वयणादेश एव प्रथमं स्यादिति वाच्यम् । परयणादेशस्य नित्यत्वात् । न च सति स्थानिवद्भावे पूर्वयणादेशस्यापि कृताकृतप्रसङ्गित्वान्नित्यत्वमेवेति वाच्यम् । तथाऽपि शब्दपरविप्रतिषेधेन परयणादेशस्याधिकबलत्वात् । पूर्वापरविषयभेदादेकस्यापि लक्षणस्य भेदात् । एकस्य च कार्यित्वनिमित्तत्वयोर्विरोधात्परत्वेन व्यवस्थाश्रयणात् ।

नन्वेवं कर्त्र्यां हर्त्र्यां इत्यत्र स्वरो न स्यात् । कर्तृ ई आ इति स्थिते हि यदि नित्यत्वात्परयणादेशः स्यात्तस्य स्थानिवद्भावात्पूर्वस्य यण उदात्तयणोऽनन्तर आकारो नेति उदात्तत्वं न स्यात् । ईकारस्यानुदात्तत्वात् । यदा त्वन्तरङ्गत्वात्पूर्वं पूर्वयणादेशः, तदा ङीप उदात्तत्वं तस्यापि यणि आकारस्य तदिति सिद्धम् । मैवम् । पूर्वयणादेशमेवोदात्तस्थानिकमाश्रित्य विभक्त्युदात्तसिद्धेः । न च परयणादेशेन व्यवधानं स्वरविधौ व्यञ्जनस्याविद्यमानवद्भावात् ।

भाष्यकारास्त्वाहुः—स्वार्थद्रव्यलिङ्गसंख्याकारकाणां प्रतीतिक्रमः प्रक्रियादशायामावश्यकः । तथा हि—नागृहीतविशेषणन्यायेन प्रथमं सामान्यमभिधीयते । ततस्तदाश्रयो द्रव्यम् । तस्य लिङ्गसङ्ख्याश्रयत्वेनान्तरङ्गत्वात् । ततो लिङ्गम् । द्वित्वादिसंख्याया वस्त्वन्तरापेक्षतया बहिरङ्गत्वात् । द्वित्वादिव्यवच्छेदकतया एकत्वस्यापि तथात्वात् । ततः संख्या । कर्मादिकारकशक्तीनां द्रव्यविजातीयक्रियापेक्षतया बहिरङ्गत्वात् । ततः परिशेषात् कारकमिति । एवं चार्थप्रतीतिक्रमेणैव शब्दे कार्याणि प्रवर्त्तन्ते । अतो विभक्तिनिमित्तकयणादेशादीकारनिमित्तकयणादेश एव बलवान् । एतेन शब्दपरविप्रतिषेधोऽप्यपास्तः । बहिरङ्गस्यासिद्धतया दुर्बलत्वात् । अतो नेदमुदाहरणम् । अकृतव्यूह-

परिभाषा त्वनित्येति ।

स्यादेतत् । स्थानिनो यत्र कार्ये निमित्तत्वेनाश्रयणं तत्र स्थानिवत्, उतानाश्रयणेऽपि । नान्त्यः । श्लेष्मघ्न पित्तघ्न दध्यश्व मध्वश्व इत्यादौ अल्लोपयणादेशयोः स्थानिवद्भावेन संयोगसंज्ञाविरहात् गुरुत्वानिबन्धनप्लुतानुपपत्तेः । द्विर्वचनवरे-यलोपानामुत्तरसूत्रे उपादानापत्तिश्च । "अनचि" इति पर्युदासात्तत्सदृशस्य हल एव तत्राश्रयणम्, न त्वच इति प्रथमपक्षे स्थानिवत्त्वाप्रसक्त्या तत्परित्यागाल्लाघवम् ।

ननु वरेयलोपेऽचोऽनाश्रयणेऽपि आकारलोपविधौ "अचि क्ङिति" इति प्रकृतिराश्रितैव, तत्कथम्भाष्ये वरेशब्दपाठ इति, मैवम् । यङ्न्तयत्वाकारस्य प्रत्ययत्वाभावात् । अजादौ प्रत्यये परे च आकारलोपविधानात् । अदुग्धेत्यत्र क्सस्य "अलोऽन्त्यस्य" इति अल्लोपे तस्य स्थानिवत्त्वाद् "झलो झलि" इति सिचो लोपो न स्यादिति लुग्विधेयः स्यात्, घ्नन्तीत्यत्रा-ल्लोपस्य स्थानिवत्त्वादानन्तर्यविरहात्कुत्वं च न स्यात् । नाद्यः । निराध्येत्यत्र जग्ध्यादेशप्रसङ्गात् । तत्र णेरनाश्रयणेन स्थानिवत्त्वानुपपत्तेः । अकुर्व्याशामित्यत्र "ये च" इत्युकारलोपस्य अलुन्याशामित्यत्र "ई हल्यघोः"इति ईत्वस्य अजङ्याशामित्यत्र जन जनने इत्यस्माच्छ्यत्ययेन तङि जनी प्रदुर्भावे इत्यस्माद्वा छान्दसत्वात् श्लौ "ये विभाषा" इत्यात्वविकल्पस्य राय्याशामित्यत्र "रायो हलि" इत्यात्वस्य च प्रसङ्गात् । सर्वत्र स्थान्यनाश्रयणात् । द्वितीयपक्षे तु नायं दोषः । व्यवहितपूर्वविधावपि स्थानिवत्त्वप्रवृत्तेः ।

अत्र भाष्यम् । अविशेषेणत्येव पक्षो युक्तः । स्वाश्रयकार्यनिवृत्तेरुक्ततया उकारलोपादीनामप्रसक्तेः । संयोगसंज्ञायाः

पूर्वपरोभयविधित्वेन स्थानिवत्त्वाप्रसक्तेः । प्रतिषेधन्तराणां च सूत्रएव कृतत्वात् । तदेव चाविशेषेणेत्यत्र ज्ञापकम् । "लुग्वा दुह"इत्यत्र लुग्ग्रहणं त्वावश्यकम् । अदुहीत्यत्र वकारस्याझल्त्वात् । घ्नन्तीत्यत्र तु श्रुतिकृतमानन्तर्यमाश्रीयते, स्थानिवत्त्वकृतं तु व्यवधानमविघातकम् । वचनसामर्थ्यात्तत्र प्रवृत्तेः । अत एव हननमित्यादौ नातिप्रसङ्गः इति सप्तमे वक्ष्यते ।

स्यादेतत् । पूर्वविधाविति पञ्चमीसमासो माऽस्तु । बेभिदिता माथितिकः अपीपचन्निति भाष्योदाहरणत्रयस्यान्यथासिद्धेः । तथा हि—बेभिद्यशब्दात्तृच् । नित्यत्वादल्लोपयलोपौ । तत "एकाच"इतीट्प्रतिषेधः स्यात् । उपदेशेत्यस्य एकाचि अनुदात्ते चेत्युभयविशेषणत्वात् । द्विःप्रयोगश्च द्विर्वचनम् । अल्लोपस्य स्थानिवत्त्वे तु व्यवधानान्नोक्तनिषेध इति । तन्न । विहितविशेषणाश्रयणात् । तृचश्च यङन्तादेवोत्पत्त्या उपदेशे य एकाच् भिदिति ततोऽनुत्पत्तेः । मथितं पण्यमस्य माथितिकः । "तदस्य पण्यम्" इति ठक् । तत इकादेशः । "यस्येति च" इत्यल्लोपः । तान्तत्वात्कादेशोऽपि न प्रसज्यते । "ठस्येक"इत्यत्र स्थान्यादेशयोरकारस्योच्चारणार्थतया वर्णमात्रस्य स्थानित्वादल्विधित्वादनल्विधाविति इकारादेशस्य स्थानिवत्त्वनिषेधात् । समुदायस्य तथात्वेऽपि सन्निपातपरिभाषया समाधानात् । अल्लोपस्याजादित्वनिबन्धनभसंज्ञानिमित्तकतया तत्कृततकारान्तत्वमादाय अजादित्वविघातककादेशस्याप्रवृत्तेः । अपीपचन्नित्यपि न प्रयोजनम् ।

ननु झेः "इतश्च" इति इकारलोपएकदेशविकृतन्यायेन झ् इत्यस्य झिभावानपायात् "झोऽन्तः" इत्यन्तादेशे चङकारस्य तदकारेण सह पररूपे तस्य परं प्रत्यादिवद्भावात् झिग्रहणेन ग्रहणात् "सिजभ्यस्त"इति जुसादेशः स्यात्, स्था-

निवद्भावे तु णिलोपस्य पररूपस्य वा व्यवधानान्नेति चेद्,
न । वेत्तेरनन्तरं लङ एव झिः संभवतीति तत्साहचर्या-
दभ्यस्तादपि लङादेशस्यैव झेर्जुसादेशविधानात् ।

न च सिचा साहचर्याल्लुङादेशस्यैव झेरस्त्विति वाच्यम्। परसाहचर्यस्य बलवत्त्वात् । "विप्रतिषेधे परम्" इति न्यायात् । अत एव भवतेर्यङ्लुङन्ताल्लुङि अबोभूवन्निति माधवः । न चैवम् "अदभ्यस्ताद्" इत्यस्यैव वारणार्थं पञ्चमीसमासावश्यकत्वम् । पररूपे झस्याभावात् । अल्विधौ अन्तादिवद्भावानुपपत्तेः । झकारस्यादादेशे कर्त्तव्येऽल्विधित्वेन स्थानिवद्भावासंभवाच्च ।

अत्राहुः—नेह साहचर्यं नियामकतया भगवतोऽभिमतम् । अपीपंचन्नित्युदाहरणात् । "द्वित्रिचतुर्" इति सूत्रे कृत्वोऽर्थग्रहणात्तस्यानित्यत्वात् । तस्मादबोभूवुरित्येव युक्तम्। "आतः" इति नियमस्य सिचः परत्वमाश्रित्य यो जुस्प्राप्तस्तन्मात्रं विषय इति माधवादिभिरुक्तत्वात् । अभ्यस्ताश्रयस्य जुसो दुर्वारत्वात् । तन्नियमस्य लाघवात्सामान्यविषयकत्वेऽपि "अदभ्यस्ताद्" इत्यदादेशेऽबोभूवदिति रूपान्तरमस्तु । नित्यत्वेन वुको गुणबाधकत्वात् । अबोभूवान्निति तु चिन्त्यमेव । अन्तादेशस्य दुर्लभत्वात् ।

अत्राहुः—मथितयतेः क्विपि टिलोपणिलोपयोः "वेरपृक्तस्य" इति लोपे च मथित्। तेन चरतीति ठक् । तस्यैकादेशार्थं पञ्चमीसमास आवश्यकः । एतादृशकल्पनायां च माथितिक इति भाष्योदाहरणस्यैव मानत्वात् । नन्वेवं विगणय्येति न स्यात् । अयादेशे कर्त्तव्येऽल्लोपस्य स्थानिवत्त्वात् । अनुगमय्य इत्यादिमित्संज्ञेषु चरितार्थतया ऽऽरम्भसामर्थ्यविरहात् । मैवम् ।

पूर्वस्माद्विधौ स्थानिवद्भावस्यानित्यत्वात् । तथा चाष्टमे हरदत्तेनोक्तम् । अनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः । "निष्ठायां सेटि" इति सेड्ग्रहणादिति । तथा हि । न तावदनिड्व्यावृत्त्यर्थं तत् । ण्यन्तात्तदसम्भवात् ।

न च संज्ञपितः पशुरित्यत्र "यस्य विभाषा" इति प्रतिषेधः, "सनीवन्त" इति विकल्पितेट्कत्वादिति वाच्यम् । तत्रैकाच इत्यनुवृत्तेः । अन्यथा दरिद्रातेरिट्प्रतिषेधापत्तेः । यदि च पूर्वस्माद्विधौ स्थानिवत्त्वं नित्यं स्यात्, तदा निषेधाप्रसक्तिरेव । णिचा व्यवधानात् । तस्मादनित्यत्वं ज्ञाप्यम् इति । "वस्वेकाज्" इति सूत्रे कैयटेनाप्युक्तम्, पूर्वस्मादपि विधावित्येतदनित्यमिति । परिदृढय्य गत इति णिलोपस्यासिद्धत्वं व्याश्रयत्वात् परिहृत्य पूर्वस्मादिति स्थानिवत्त्वमाशङ्क्य प्रवेभिदय्य प्रस्तनय्येति भाष्योदाहरणसामर्थ्यान्नेति माधवः ।

यद्वा—"लघुपूर्वाद्" इत्यत्र वर्णरूपान्यपदार्थग्रहणाद्वर्णग्रहणे च जातिग्रहणाद्व्यवधानेऽपि न दोष इति दीक्षिताः ।

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ५७ ।

पदस्य चरमावयवे द्विर्वचनादौ च विधेये परनिमित्तोऽजादेशो न स्थानिवत् । कानि सन्ति, कौ स्तः । यणावादेशयोः कार्ययोः "श्नसोरल्लोपः" इत्यल्लोपो न स्थानिवत् । न च अनादिष्टादचः पूर्वत्वाभावादेव न तथेति वाच्यम् । वाक्याद-

पोद्धृत्य पदानि संस्क्रियन्तइति पक्षे तत्सत्त्वात् । " युष्मद्युप-पदे " इत्यादौ पदान्तरसापेक्षतयाऽपि पदसंस्कारदर्शनात् । अत एवाङ्गसंज्ञासूत्रे स्त्री इयतीत्यत्र पदान्तरनिरपेक्षपदसंस्का-रपक्षे स्त्रीशब्देकारस्यानादिष्टादचः पूर्वत्वाभावादिदमादेशलो-पस्य न स्थानिवत्त्वमिति कैयटेनोक्तम् । पक्षेपदोक्त्या प्रकृतो-क्तपक्षस्यापि तदभिमतत्वात् । हरदत्तस्तु यद्यपि व्याकरणेन पदान्येव व्युत्पाद्यन्ते, न वाक्यम्, तथाऽपि वाक्यगते स्त इत्यादिपदे व्युत्पाद्यमाने काविस्यादेः पदस्यासत्यपि निमित्तत्वे सन्निधानमविरुद्धमित्यनादिष्टादचः पूर्वत्वमित्याह ।

केचित्तु गोचो गोचेत्यादौ "अचः" इत्यल्लोपस्य "अवङ् स्फोटायनस्य" इत्यवङ्विधौ स्थानिवत्त्वनिषेधः । तत्रौकारस्या-नादिष्टादचः पूर्वत्वादित्याहुः ।

अत्रेदं तत्त्वम् । विधिशब्दो भावसाधनः । पदान्तस्येति कर्मषष्ठ्या समासः । अन्तशब्दश्चरमावयवपरः । तथा च पद-चरमावयवनिष्ठं यत्र विधेयत्वं तत्र स्थानिवद्भावनिषेधः । कानि सन्ति कौ स्त इत्यत्र यदि यकारवकारौ स्यातां वस्तुतः पदान्तौ स्याताम् इति पदान्तविधित्वसम्भवः । तदुक्तम्—

योऽसौ पदान्तो यकारो वकारो वाऽन्ते श्रूयेतेति ।

कैयटेन च व्याख्यातम्—"यकारवकारौ विधीयमानावेव पदान्तौ भवत इत्यस्ति पदान्तताया विधानम्" इति ।

क्वचित्तु पदसंज्ञाविधानेन, यथा वेतस्वानित्यादिवक्ष्यमाणा-पत्तौ । तदुक्तं विवरणकारैः—

स्वरूपेण सकारः स्थितोऽपि पदान्तत्वेन विशिष्टो विधेय-एवेति । षडिक इत्यत्र तु धर्मधर्मिणोरुभयोरपि पूर्वसिद्धत्वान्न कथमपि पदान्तत्वविशिष्टविधानमिति नोक्तनिषेध इति वक्ष्यामः।

नत्वत्र विधिवाक्येषु विधेयतावच्छेदकत्वेन पदान्तत्वातिदेशापेक्षा। "इको यणचि" इत्यादौ स्थानितावच्छेदकतया आदेशतावच्छेकतया वा तदनुल्लेखादसङ्गतिप्रसङ्गात्।

यदि तु विधीयते इति कर्मव्युत्पत्त्या विधिशब्दो विधेयपरः। पदान्तस्येति शेषे षष्ठी स्थानित्वार्था। तथा च पदचरमावयवनिष्ठं यत्स्थानित्वं तन्निरूपितं यत्र विधेयत्वं तत्र न स्थानिवत्त्वमिति व्याख्यायेत, तर्हि षडिक इति न सिध्येत्। तथा हि—अनुकम्पितः षडङ्गुलिदत्तः षडिकः। "बह्वचो मनुष्यनाम्न" इति ठच्। "ठाजादावूर्ध्वम्" इति ङ्गुलिशब्दस्य लोपः। "यस्येति च" इत्यकारलोपः। तत्र षट् इत्यस्य प्रत्ययलक्षणेनान्तर्वर्तिविभक्तिमाश्रित्य क्रियमाणा पदसंज्ञा तुल्यावधिकतया भसंज्ञया बाध्येत। तथा च जश्त्वेन डत्वं न स्यात्। न च "यस्य" इत्यल्लोपस्य स्थानिवद्भावादकारान्तस्य भसंज्ञा षान्तस्य च पदसंज्ञेति भिन्नावधिकत्वान्न बाध्यबाधकभाव इति वाच्यम्। "न पदान्त" इति निषेधप्रवृत्त्यापत्त्या भसंज्ञाया अपि षान्तएव विश्रामात्। न च जश्विधित्वादेवात्र स्थानिवत्त्वनिषेधः। जश्विधावेव तत्प्रवृत्तेः। इह तु पूर्वमेव जश्त्वस्य निष्पत्तेः, षकाररूपापत्तेरेवात्र विधेयत्वात्। नापि पूर्वत्रासिद्धे न स्थानिवदित्यस्य प्रवृत्तिः। हेतोरुक्तत्वादित्याकरानुसारी ग्रन्थः।

अत्र केचित्—कर्मसाधनविधिशब्दपक्षेऽपि पदान्तस्य स्थाने विधौ कर्तव्यएव स्थानिवत्त्वनिषेधो भसंज्ञा तु न पदान्तस्थानिकेति कथं निषेधप्रवृत्तिः। न च पदान्तस्थानिको यो विधिस्तद्विरोधिविधिं प्रत्यपि स्थानिवद्भावनिषेधः, अस्ति च पदान्तस्थानिकं जश्त्वं तद्विरोधी भसंज्ञाविधिः, जश्त्वस्य पदसंज्ञापेक्ष-

त्वादिति वाच्यम् । तादृशार्थपरत्वे मानाभावात् । पदान्तस्थानिके विधौ स्थानिवत्त्वनिषेधमात्रेणोपपत्तेः । कानि सन्तीत्यादौ चरितार्थत्वादधिकपरत्वे प्रयोजनाभावात् । एतेन जश्भावसाधिकाया अकारान्तनिष्ठभसंज्ञायाः साधकोऽयं स्थानिवद्भावः । तद्व्यतिरेके भसंज्ञाया अपि षकरान्तनिष्ठत्वापत्तौ तया पदसंज्ञाबाधे जश्भावानुपपत्तेरित्यपास्तम् । जश्भावनिमित्तत्वेनानाश्रयणात् । अकारात्पूर्वभागस्यान्तर्वर्त्तिविभक्त्या पदत्वेन तत्सिद्धेश्च । अत एव जशि नेति पूर्वत्रासिद्धे न स्थानिवदिति च निषेधयोरप्रवृत्तिः । जशि कर्त्तव्ये स्थानिवद्भावो नेत्यर्थे जश्संबन्धिन एव ग्रहणेन जश्भावेन सह बाध्यबाधकभावो निष्पाद्यनिष्पादकभावो वा यस्य संबन्धस्तस्यैव स्थानिवत्त्वनिषेधात् । भावसाधनपक्षेऽपि षडिक इत्यस्य सिद्धेश्च । जश्भावस्य विधेयस्य पदान्तत्वसत्त्वात् । न च जश्भावस्य पूर्वमेव निवृत्त्या पदान्तस्य विधेयत्वं नास्तीति वाच्यम् । भसंज्ञाया अपि संभावितत्वादकृतव्यूहपरिभाषया "अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते" इति न्यायाच्च तदप्रवृत्तेः । कर्मसाधनपक्षेऽपि पदान्तस्थानिकविधेयाभावाच्च । न च पदान्तत्वेन सिद्धस्य भत्वात्षकाररूपापत्तिर्विधेयेति वाच्यम् । द्विर्वचनादिसाहचर्येण शास्त्रीयस्यैव विधेयस्योपादानादिति ।

तदत्यन्तमसत् । अनादिष्टादचः पूर्वत्वेन दृष्टस्य पदचरमावयवस्य स्थाने विधौ कार्ये परनिमित्तोऽजादेशो न स्थानिवदिति वाक्यार्थः । तथा च "दध्यत्रेत्यत्र संयोगान्तलोपप्रसङ्गे पदान्तविधिं प्रति नेत्ययमपि प्रतिषेधो नास्ति, पदान्ते विधेये स प्रतिषेधो न च लोपोऽभावात्मकत्वात्पदान्त" इति कैयटग्रन्थविरोधः । एवं वृक्षव् इत्यत्र विधेयस्य वलोपस्यावयवत्वाभावात्

"न पदान्त" इति णिलोपस्य स्थानिवत्त्वनिषेधो नेति कौस्तुभमनोरमाग्रन्थविरोधः। त्वद्रीत्या लोपप्रतियोगिनो वकारादेः पदान्तत्वसत्त्वान्निषेधस्य दुर्वारत्वात्। एवं वेतस्वानित्यत्र कर्मसाधनपक्षे न दोष इत्येतत्परभाष्यविरोधः। तदस्मिन्नस्तीत्यर्थे कुमुदनडवेतसेभ्यो ड्मतुप्। डित्त्वादकारलोपः। "तसौ मत्वर्थे" इति भसंज्ञायां रुत्वाभावः। न च तस्य चातुरर्थिकत्वान्निर्दृत्ताद्यर्थकत्वे तथाऽपि दोष इति वाच्यम्। तत्रानभिधानमित्यभिप्रायेणोक्तत्वात्। तत्र सान्तस्य भसंज्ञायां क्रियमाणायामल्लोपस्य स्थानिवद्भावात्सान्तत्वं नास्तीति भसंज्ञा न स्यात्। न च "न पदान्त"इति निषेधः। भसंज्ञायाः पदान्तस्थानिकत्वाभावात्। तथा च पदान्तस्थानिके विधौ यद्विरोधी तद्विधिं प्रत्यपि न स्थानिवद्भाव इत्यर्थोऽवश्यं वाच्यः। अस्ति च पदान्तस्थानिको रुत्वविधिः। तद्विरोधी भसंज्ञाविधिः। तं प्रति अल्लोपस्य स्थानिवद्भावनिषेधे सति तस्य भसंज्ञा सिद्धा। तथा चाधिकार्थपरत्वे मानाभाव इत्यसंबद्धमेवाभिधानम्। अत एव स्थानिवद्भावनिषेधव्यतिरेकेणैव यस्य पदान्तत्वं सिद्धम्, तस्य विधौ "न पदान्त" इति निषेधः कर्मसाधनविधिशब्दपक्षे प्रवर्त्ततइति भाष्यकैयटयोरेव स्पष्टम्। वेतस्वानित्यत्र हि स्थानिवद्भावनिषेधं विना सकारो न पदान्तत्वेन सिद्धः। स्थानिवद्भावसत्त्वेऽकारान्तएव पदसंज्ञाविश्रामात्। कानि सन्तीत्यत्र च "न पदान्त" इति निषेधं विनाऽपि इकारस्य पदान्तत्वसत्त्वाद्यणादेशे कर्तव्येऽल्लोपस्य स्थानिवद्भावनिषेधसौलभ्यम्। भावसाधनपक्षेऽपि तत्सिध्यतीति त्वन्यदेतत्। एवं षडिक इत्यत्र "न पदान्त" इति निषेधप्रवृत्तिं विना षकारो न पदान्तत्वेन सिद्धः अतो दुर्लभैव तत्रैतन्निषेधप्रवृत्तिः।

न चान्तर्वर्त्तिविभक्त्या तस्य पदान्तत्वं सिद्धमेवेति वाच्यम् । स्थानिवद्भावनिषेधाभावे तुल्यावाधिकया भसंज्ञया तद्बाधापत्तेरुक्तत्वात् । एतन्निषेधस्यैव तत्पदसंज्ञायामुपजीव्यत्वात् वेतस्वानित्यतो विशेषाभावात् ।

यत्तु कानि सन्तीत्यत्रैव निषेधोपपत्तिरिति तन्न । पदान्तस्थानिके विधौ यस्य बाध्यबाधकभावो निष्पाद्यनिष्पादकभावो वा सम्बन्धस्तस्य स्थानिवत्त्वानिषेध इत्यवश्यं वाच्यम् । जश्त्वविधितो वैषम्याभावात् । निष्पाद्यनिष्पादकभाव आदेशस्य विवक्षितः स्थानिनो वा ? । नाद्यः । अल्लोपस्य यणादेशेन तदभावात् । नान्त्यः । षडिक इत्यत्राकारस्यापि स्वान्तनिष्ठभसंज्ञाद्वारा जश्त्वरूपे पदान्तस्थानिकविधावनुगुणत्वात् निषेधस्य दुर्वारत्वात् । ननु साक्षादनुगुणत्वं निवेश्यमितिचेन्न । साक्षात्त्वप्रवेशे गौरवात् । किं च, साक्षात्त्वम् हि किं संज्ञामात्रानपेक्षत्वम्, उत स्वभिन्नवृत्तिसंज्ञाऽनपेक्षत्वम्, उत स्वमात्रवृत्तिसंज्ञाऽनपेक्षत्वम् ? । नाद्यः । अकारस्याप्यच्त्वेन रूपेण यण्यनुगुणत्वात् । न द्वितीयः । अच्त्वस्यापि अकारभिन्नवृत्तित्वात् । नान्त्यः । अप्रसिद्धेः । अथ यस्यां व्यक्तौ यत्र निमित्तत्वपर्यवसानं तत्पर्याप्तसञ्ज्ञातिरिक्तसञ्ज्ञानपेक्षत्वं तदर्थ इति चेद् । अणादिसञ्ज्ञाया अप्यकारपर्याप्ततया तदतिरिक्ताया अच्सञ्ज्ञाया एवापेक्षितत्वात् । अथ भेदप्रतियोगिन्यां सञ्ज्ञायां प्रकृतकार्यनिमित्तत्वमपि वाच्यम् अणादिसञ्ज्ञास्तु न तथा इति चेन्न । तथापि यथोद्देशे अचि परतो यत्कार्यं दृष्टं तद् आदेशेऽपि भवतीति कार्यातिदेशेन लोपे सत्यपि "अचः परस्मिन्" इत्यनेनैव यणादीनां प्रसक्त्या अकारे निमित्तत्वपर्यवसानाभावात् । नच कार्यकालपक्षे शास्त्रीयत्वाविशेषात् अकारनिष्ठाया एवाच्संज्ञाया

लोपोत्तरमतिदेशः, यणादेशस्तु "इकोयणचि" इत्यनेनैवेति चेद् । तथापि अकारे निमित्तत्वस्यानन्वयात् । अच्सञ्ज्ञाया लोपेऽतिदेशेऽपि निमित्तत्वस्य फले एव विश्रामात् ।

एवं पर्यवसानं फलोपधायकत्वं सम्भावनामात्रं वा ? । नाद्यः । निषेधात्प्रकृते फलानुपधानात् । नान्त्यः । अच्त्वेन इकारादीनामपि तथात्वात् । अत्र स्थानिवद्भावेन फलानुपधानं तत्राकः सवर्णे दीर्घ इत्यपवादेनेति तु विशेषः । नच कानि सन्तीत्यत्र इकारे न निमित्तत्वसम्भावना, अकारलोपेऽपि तदभावात् इति वाच्यम् । लोपे सति अकारेऽपि तदभावात् । स्थानिवद्भावप्रयुक्ता सम्भावना विवक्षितेति चेत् । तर्हि सा पक्षद्वयेऽपि लोपस्यैव नत्वकारस्येत्युक्तमेव ।

ननु अतिदेश्यतावच्छेदकधर्मो यादृशः प्रकृते निमित्ततावच्छेदकत्वेन निर्णीतस्तदवच्छिन्नायां यस्यां व्यक्तौ पदान्तस्थानिकविधिनिरूपितनिमित्तत्वं सम्भावितं तद्वृत्तितदतिरिक्तधर्मानपेक्षत्वं विवक्षितम्,प्रकृतेऽतिदेश्यतावच्छेदको निमित्ततावच्छेदकत्वेन निर्णीतो धर्मोऽच्त्वं तदवच्छिन्नायां लोपव्यक्तौ कानि सन्तीत्यत्र यणादेशनिमित्तत्वं सम्भावितं तादृशलोपवृत्तिर्योऽच्त्वातिरिक्तो धर्मस्तदनपेक्षत्वं यणादेशे प्रसञ्जनीये लोपस्यास्त्येवेति चेद् । सत्यम् । अच्त्वस्य केवलस्य यणादेशानापादकत्वात् । कार्यान्तराविशिष्टस्यैव तस्य तदापादकत्वात् । नहि यद्यत्र परतोऽच् स्यात् तदा यणादेशः स्यादित्यापादयितुं शक्यम् । पूर्वस्य इक्त्वाभावे प्रगृह्यत्वे वा सत्यपि तस्मिंस्तदनुत्पत्तेः । तस्मात्तदभावप्रयोजकाभावप्रतियोगित्वमेवानुगुणत्वम् वाच्यम् । यथा चाच्त्वस्य कानि सन्तीत्यत्र तथात्वम् तथा षाढिक इत्यत्र अकारस्यापि । तदभावे षकारान्त एव भसञ्ज्ञाप्रसङ्गात् जश्त्वाभाव

प्रयोजकत्वात् इति स्थानिवत्त्वनिषेधो दुर्वारः स्यात् इति दिक् । सिद्धान्ते तु पदान्तस्य यत्र विधीयमानत्वं तत्र स्थानिवत्त्वनिषेधः । षडिक इत्यत्र तु जश्त्वस्य पूर्वासिद्धत्वान्न निषेध इति सति स्थानिवद्भावे भपदसञ्ज्ञयोर्भिन्नावाधिकतया षान्तस्य पदसञ्ज्ञासिद्धिः । तेन न पदसञ्ज्ञाविरहप्रयुक्तषकाररूपतापत्तिः । नच षकाररूपताविधानमादायैव निषेधापत्तिः । तस्यापदान्तत्वात् । अन्यथा जश्त्वापत्तेः । अनुकम्पितो वागाशीर्दत्तो वाचिकइत्यत्र तु "एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्य" इति समस्तस्यैवोत्तरपदस्य लोपस्वीकारः ।

यत्तु अकृतव्यूहपरिभाषया अन्तरङ्गानपीतिपरिभाषया वा षडिक इत्यत्रापि न पूर्वं जश्त्वमिति । तत्र नाद्यः । उक्तरीत्या निमित्तस्य विनाशोन्मुखत्वाभावात् । शङ्कामात्रस्याप्रयोजकत्वात् । न द्वितीयः । स्वादिष्वितिपदसञ्ज्ञाया अङ्गमात्रविश्रान्ततया लुकि दुर्लभत्वेऽपि सुबन्तत्वप्रयुक्तायास्तस्या अतथात्वेन लुक्यपि प्रत्ययलक्षणेन सुलभत्वात् । अन्यथा पञ्च सप्तेत्यादौ नलोपो न स्यात् । राजपुरुष इत्यादावपि तथा । तत्रापि लुक एव स्वीकारात् । अन्यथा ऽत्राल्लोपापत्तेः । गोमत्प्रिय इत्यादौ नुमाद्यापत्तेश्च । पदसञ्ज्ञा त्वन्तर्वर्तिविभक्त्याश्रयेण षकारान्तस्येति कैयटोक्तेश्च विभक्तेरश्रूयमाणतया सुबन्तस्य पदसञ्ज्ञायामपि षकारान्त एव पर्यवसानमित्येवंपरत्वात् ।

अथ भावसाधनपक्षे ब्रह्मबन्धूरित्यत्र धकारस्य जश्त्वं स्यात् ऊङा सहैकादेशस्य परादिवद्भावेनोङ्ग्रहणेन ग्रहणात् । तस्मिन्परे स्वादिष्वितिपदसञ्ज्ञाया धकारान्ते प्रसङ्गात् । नच भसञ्ज्ञया बाधः । तत्र स्थानिवद्भावप्रवृत्त्या तस्या उकारान्त एव विश्रामात् । एवं वेतस्वानित्यत्र सकारस्य रुत्वापत्तिः, पदान्तत्वे वि-

धीयमाने स्थानिवत्त्वनिषेधात् पदसञ्ज्ञायाः सकारान्ते सुस्थत्वात्।

अत्र भाष्यम् "पदे अन्तः पदान्तः" पदे परतोऽन्त इति यावत् । तस्य विधौ न स्थानिवत् । इमतुप्तु न पदमिति सस्य रुत्वे कर्तव्ये भवत्येव स्थानिवद्भावनिषेध इति भत्वस्यापि सकारान्त एव विधानात् अवधिभेदाभावाद्भसञ्ज्ञया पदसञ्ज्ञाबाधः ।

"यद्वा यथाऽन्यानि पदकार्याणि उपप्लवन्ते रुत्वं जश्त्वं, एवमिदमपि पदकार्यमुपप्लोष्यते । किम् ? भसञ्ज्ञा नामेति" ।

अस्यार्थः । भसञ्ज्ञायां पदमित्यनुवर्तते पदं सद्भसञ्ज्ञं भवतीति पदत्वसद्भावे तन्निमित्तकं रुत्वं माभूदिति भसञ्ज्ञायामपि पदविषयकत्वात्पदान्तविधित्वमस्तीति स्थानिवत्त्वनिषेधात्सान्तस्यैव भसञ्ज्ञेति तया पदत्वबाधान्न रुत्वम् । पूर्वं पदसञ्ज्ञैव भसञ्ज्ञोपजीव्या, पश्चात्तु भसञ्ज्ञया तद्बाध इत्यन्यदेतद् ।

प्रकृतमनुसरामः । द्विर्वचने सुद्ध्युपास्यः । " अनाचि च " इति द्वित्वे कर्तव्ये यणादेशो न स्थानिवत् । नच असिद्धं बहिरङ्गमिति द्वित्वानुपपत्तितादवस्थ्यम् । हरदत्तमते नाजानन्तर्ये इति तन्निषेधात् । स्थानिवद्भावनिषेधसामर्थ्याच्च ।

वरे इति निपातनान्न विभक्तेर्लुक् । तन्निमित्तोऽजादेशो न स्थानिवत् । यायावरः । यातेर्यङन्तात् "यश्च यङः" इति वरच् । अतो लोपः । तस्य "आतोलोप इटि च" इत्याकारलोपे कर्तव्ये न स्थानिवत्त्वम् । स्यादेतद् । अतो लोपस्य परनिमित्तकत्वमेव नास्ति आर्द्धधातुके इति विषयसप्तम्या आर्द्धधातुकोत्पत्तेः पूर्वमेवातो लोपप्रवृत्तेः । अत एव " अचो यत् " इत्यत्र वृत्तौ वक्ष्यते 'अच् ग्रहणं किम् ? यावता हलन्ताण्ण्यतं वक्ष्यति ।

अजन्तभूतपूर्वस्यापि यथा स्यात् दित्स्यं धित्स्यम्' इति ।

अत्र हरदत्तादयः—'वरेग्रहणसामर्थ्यात्परसप्तमीपक्षोऽप्यस्ति । अत एव "अनुदात्तेतश्च हलादेः" इत्यत्र आदिग्रहणम् । असति हि तस्मिन्हलन्तादिति विज्ञायेत । ततश्च जुगुप्सनो मीमांसन इत्यत्र युज्न स्याद् इति । यदि च विषयसप्तमी स्यात् प्रागेव प्रत्ययोत्पत्तेरतो लोपे सति हलन्तत्वादेव तत्रापि युच् सिद्ध्येदिति आदिग्रहणं व्यर्थं स्याद्' इति ।

एवं यातेर्यङन्तात् क्तिचि अतो लोपे यलोपविधौ स्थानिवत्त्वनिषेधाद्यलोपे तस्य स्थानिवद्भावादाकारलोपे पुनर्यकारलोपे यातिरिति रूपम् ।

न च पुनराकारयकारयोर्लोपे प्रत्ययमात्रश्रवणापत्तिरिति वाच्यम् । आलोपस्य स्थानिवत्त्वात् आभीयत्वेनासिद्धत्वाद्वा । न च स्वस्य स्वं प्रत्येव कथमसिद्धत्वमिति वाच्यम् । चिणोलुङ्न्यायेन तत्सम्भवात् । वक्ष्यति च वार्त्तिकम्—

"चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वाद्" इति ।

अस्यार्थः—चिणो लुग्विधौ अकारितरामित्यादौ तरबादेर्लोपो मा भूदित्येतदर्थकं तग्रहणं व्यर्थं तङ्तरसमुदायस्य प्रत्ययत्वाभावात् । न च तकारलोपोत्तरं तरपो लोपापत्तिः । तलोपस्यासिद्धत्वात् । न चाभेदे तदनुपपत्तिः । विषयभेदेन लक्षणभेदाश्रयणादिति ।

भाष्ये तु कण्डूयतेः क्तिचि कण्डूतिरिति यलोपोदाहरणम् ।

वृत्तौ तु क्तिन्नित्युक्तम् । तत्र यद्यपि अप्रत्ययेन बाधितत्वात्कण्डूयेत्येव भवितव्यमिति भाष्योक्त्या च क्तिनो दौर्लभ्यम् । तथाऽपि 'क्तिन्नाबादिभ्य' इति क्तिन् । 'क्तिचीत्येव युक्तः पाठः'

इति हरदत्तः। अल्लोपयलोपौ। न च अल्लोपस्य स्थानिवत्त्वा-दुवङ्प्रसङ्गः यलोपं प्रत्येव स्थानिवत्त्वनिषेधादिति वाच्यम्। इष्टापत्तेः। "च्छ्वोः" इति तस्य ऊठः सम्भवात्। न च तं प्रत्युवङादेशस्य स्थानिवत्त्वापत्तिः। आदिष्टादचः पूर्वत्वात्। अत एव ऊठः पुनरुवङ् नेति हरदत्तादयः। एवं तेष्ठीयतेः क्विपि अल्लोपयलोपयोरल्लोपस्य स्थानिवत्त्वादियङि "लोपो व्योः" इति यलोपे तेष्ठितिरिति रूपम्, पेपीयतेस्तु एरनेकाच इति यणि यलोपे च पेप्तिः, शो तनूकरणे इत्यस्माद् यङन्तात् क्विजादिषु कृतेषु "पूर्वत्रासिद्धे न-" इति स्थानिवत्त्वनिषेधाच्छस्य षत्वे ष्टुत्वे च शाष्टिरिति विशेषः।

आकर्षिकः। चरतीत्यर्थे "आकर्षाद्" इति ष्ठल्। "लिति" इति ककाराकारस्योदात्तत्वे कार्ये "यस्येति च" इति अकारलोपो न स्थानिवत्। न च वचनसामर्थ्यं गतिः। कारक इत्यादौ चरितार्थत्वात्। "स्वरविधौ व्यञ्जनमविद्यमानवद्" इति रेफादेर्व्यवधायकत्वानुपपत्तेः। आनन्तर्यसम्भवे व्यवहितानाश्रयणात्। न च ष्ठलो लित्करणसामर्थ्यादकारेण व्यवधाने स्वरसिद्धिः। आकारस्यापि पक्षे उदात्तत्वापत्तेरिति कैयटः।

अन्ये तु श्रुतिकृतमेवानन्तर्यं लित्करणसामर्थ्यादाश्रीयते। घ्नन्तीत्यादौ कुत्ववदिति, तन्न युक्तमित्याहुः।

तत्र चिकीर्षक इत्यादौ ईकारस्योदात्तत्वे कर्त्तव्येऽतो लोपो न स्थानिवदिति उदाहरणम् बोध्यम्। शिण्ढि इत्यत्र सवर्णानुस्वारयोः कर्त्तव्ययोः श्नसोरल्लोपो न स्थानिवत्।

ननु श्नसोरल्लोपे कृते अनुस्वारप्रवृत्तेः अनुस्वारस्यानादिष्टादचः पूर्वत्वाभावात् स्थानिवत्त्वप्रसक्तिरेव नास्ति। नच

स्थानिद्वारकमनादिष्टादचः पूर्वत्वमिति वाच्यम् । अशास्त्रीयत्वेन तस्यातिदेशानर्हत्वात् ।

यत्तु हरदत्तादिभिरुक्तम् । अनादिष्टादचः पूर्वत्वापेक्षे "अचः परस्मिन्" इत्यतिदेशे कर्त्तव्ये "स्थानिवदादेश" इत्यतिदेशः प्रवर्त्तत इति । तन्न । पूर्वसूत्रे निराकृतत्वात् । तथा हि । अनादिष्टादचः पूर्वत्वमतिदिश्यते " अचः परस्मिन् " इत्यतिदेशो वा । नाद्यः । अशास्त्रीयत्वात् । नान्त्यः । " अचः परस्मिन् " इत्यतिदेशस्य प्रकृतेऽपि स्थानिन्यप्रवृत्ततया तदादेशेऽतिदेष्टुमशक्यत्वात् । स्थानिन्यदृष्टस्यातिदेशानर्हत्वात् । आवश्यकं च हरदत्तस्य तत् । अन्यथा लोलुव इत्यादौ इयङुवङोः कृतयोर्लघूपधगुणप्राप्त्या तद्वारणार्थं " न धातुलोप–" इति सूत्रारम्भ इति तत्सिद्धान्तानुपपत्तेः । स्थानिद्वारकमनादिष्टादचः पूर्वत्वमाश्रित्याल्लोपस्य स्थानिवद्भावादेव गुणप्रसक्तेस्तत्र वारयितुं शक्यत्वात् ।

न च तत्सूत्रप्रत्याख्यानाद्‌ भाष्यकारस्य स्थानिद्वारकमप्यनादिष्टादचः पूर्वत्वमिति अभिप्राय आवश्यक इति वाच्यम् । तत्सूत्रप्रत्याख्याने भाष्यकृतस्तात्पर्यविरहात् । " आतोऽनुपसर्गे " इति सूत्रस्थभाष्यविरोधस्य पूर्वमेव दर्शितत्वाच्च । न च तद्भाष्यादिकं स्थानिद्वारकस्यानादिष्टादचः पूर्वत्वस्यानित्यत्वाभिप्रायकमेवेति वाच्यम् । स्थानिद्वारकस्यानादिष्टादचः पूर्वत्वस्य युक्तिशास्त्रोभयविरुद्धत्वेन 'स ह्यादिष्टादचः पूर्वः' इत्यादिभाष्यस्यैव बलवत्त्वात् । अत एव " अक्षय्यं हि वै चातुर्मास्ययाजिनः सुकृतं भवति " इत्येतदपेक्षया कृतकत्वलिङ्गकविनाशित्वानुमानसहकृतायाः "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः प्राब-

स्यमिति भामत्यादावुक्तम् । अत एव कण्डूतिरित्यत्रादिष्टादचः पूर्वत्वात् पुनरुवङ् नेत्युक्तम् । सत्यम् । आदेशापेक्षं निमित्तापेक्षं वा पूर्वत्वमिति पक्षद्वये स्थानिवत्त्वप्रसक्त्या निषेधोपपत्तिः । एतेनोक्तनिषेधादेव स्थानिद्वारकस्यानादिष्टादचः पूर्वत्वस्य ग्रहणमित्यपास्तम् ।

केचित्तु हरितशब्दादाख्यानण्यन्ताद्विचि हरिल्लुनातीत्यत्र "तोर्लि" इति लत्वे कर्त्तव्येऽतो लोपस्य णिलोपस्य वा स्थानिवत्त्वनिषेधार्थं सवर्णग्रहणम् । न च पूर्वत्रासिद्धे न स्थानिवदित्यत एव सिद्धिः । "तस्य दोषः संयोगादिलोपलत्वणत्वेषु" इति तन्निषेधादित्याहुः ।

अन्ये तु प्रतिपदोक्तमेव लत्वं तत्र गृह्यते न तु परसवर्णविधिप्रयोज्यं व्यवहितप्रतीतिकत्वादित्याहुः ।

अपरे तु रेफोत्तरं विधेयलकारप्रश्लेषात् "तोर्लि" इति लत्वमपि प्रतिपदोक्तमेव, परसवर्णस्यानुवृत्तौ गौरवप्रसङ्गात् ।

वस्तुतस्तु "पूर्वत्रासिद्धीये न स्थानिवद्" इत्याश्रित्य सवर्णग्रहणस्य सिद्धान्तेऽपि प्रत्याख्येयत्वान्नायं दोषः इत्याद्यवधेयम् ।

यद्यपि परसवर्णविधौ स्थानिवत्त्वनिषेधस्य तत्स्थानिनोऽनुस्वारस्यापि विधौ स्थानिवत्त्वप्रतिषेधमन्तरेणानुपपन्नतयाऽनुस्वारविधावपि तन्निषेध इति पृथगनुस्वारग्रहणवैयर्थ्यम्, तथापि यत्र परसवर्णप्रसक्तिर्नास्ति शिंषन्तीत्यादौ तत्रानुस्वारो न स्यादिति शङ्कावारणार्थं तत् ।

प्रतिदीव्नेत्यत्र "हलि च" इति दीर्घे कार्ये भसंज्ञानिमित्तकोऽल्लोपो न स्थानिवत् । प्रतिपूर्वाद् दिवः "कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः" इति कनिन् ।

वृत्तौ तु "उपधायां च" इति दीर्घ इति पठ्यते, तद् ले-

खक्कैः प्रमादाल्लिखितम्, दिवेर्वकारस्यानुपधात्वात् ।

" उपधायां च " इति सूत्रे प्रतिदीव्नेत्यत्र " हलि च " इति दीर्घ इति वृत्तावेव लिखितत्वादिति हरदत्तादयः ।

दीक्षितास्तु 'आचारक्विबन्तात्क्विपि समाधेयम् । तत्र प्रतिदिवन् इति नान्तम्, तस्यैव धातुसंज्ञा तया वकारस्योपधात्वसम्भवात् । नच, अल्लोपात्पूर्वमकारस्यैव " अनुनासिकस्य क्विझलोः " इति दीर्घापत्तिः । अकृतव्यूहपरिभाषया भाविनमल्लोपमालोच्यान्तरङ्गस्यापि दीर्घस्याप्रवृत्तेः । न च स्थानिवत्त्वाभावेऽपि " असिद्धं बहिरङ्गम् " इति परिभाषयाऽल्लोपस्यासिद्धत्वाद्दीर्घानुपपत्तिः । क्ङिति तुग्ग्रहणेन तस्या अनित्यत्वज्ञापनात् । यथोद्देशपक्षे तत्परिभाषायास्तत्राप्रवृत्तेश्च । एतस्योभयपक्षेऽपि वाच्यत्वाद्' इति आहुः ।

" सग्धिश्च मे " "बब्धां ते हरी " । अदेः क्तिन् " बहुलं छन्दसि " इति घस्लादेशः । "घसिभसोर्हलि च" इत्युपधालोपः । " झलो झलि " इति सलोपः । धि परे सिचो लोप इत्यस्य भाष्यकृताऽनङ्गीकारात् ।

वार्तिकमते तु छान्दसत्वात्सलोप इति कैयटहरदत्तादयः । " झषस्तथोः " इति प्रत्ययतकारस्य धत्वम् । तत् प्रति पूर्वस्माद्विधाविति उपधालोपस्य न स्थानिवत्त्वम् । तस्यानित्यत्वात् । घकारस्य "झलां जश् झशि" इति जश्त्वेन गकारे कर्तव्ये उपधालोपो न स्थानिवत् । समाना ग्धिः सग्धिः "समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु" इति समानस्य सादेशः । द्वितीये भसेर्लोट्, तसस्ताम्, शपः श्लुः । अन्तरङ्गत्वाद् द्वित्वम् । अभ्यासकार्यम् । तत उपधालोपादि प्राग्वत् ।

जक्षतुः । घसेर्लिट् अतुस् । "गमहन" इत्युपधालोपः

"खरिच" इति चर्त्वेन घस्य कत्वे कर्त्तव्ये न स्थानिवत् ।

अत्र वार्तिकम्—

" स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् " ।

भावरूपस्त्वादेशः स्थानिवदेवेत्यर्थः । तेन पञ्चारत्न्यः, दशारत्न्यः । जसादिषु " छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः" इति गुणाभावे यण्। तस्य स्थानिवद्भावाद् "इगन्तकालकपाल—" इत्यादिना पूर्वपदप्रकृतिस्वर इति भाष्यम् ।

न चेदमसिद्धपरिभाषया गतार्थमिति वाच्यम् । अकृतव्यूहपरिभाषया पूर्वं यणोऽप्रवृत्तेः । बहुखट्वक इत्यत्र स्थानिवद्भावात् "ह्रस्वान्तेऽन्त्यात्पूर्वम्" इति खकाराकारस्य उदात्तत्वं न भवति, किं तु "कपि पूर्वम्" इत्येव । प्राचितीक इत्यत्र तु 'ह्रस्वान्त' इत्यस्य प्रवृत्तिरिति कैयटहरदत्तादयः ।

किर्योः गिर्योः, व्युत्पत्तिपक्षे "हलि च" इति दीर्घः प्राप्तो यणः स्थानिवद्भावान्नास्ति ।

अच इत्यधिकारे "भुजेः किच्च" "कॄगॄशॄदॄकुटिभिदिच्छिदिभ्यश्च" इति इः । स च कित् । "कॄग्रो रिच्च" इति हरदत्तन्यासकाराभ्यामुपन्यस्तं तु क्वचिदुणादिवृत्तावन्वेषणीयमिति दीक्षिताः ।

(अन्ये) इह "उपधायां च" इति सूत्रे वृत्तिकारोक्तरीत्या किर्योरित्यादिकमव्युत्पत्तिपक्षाश्रयेणापि सिद्धम्। वाय्वोरित्यत्र "लोपो व्योः" इति वकारलोपस्तु असिद्धपरिभाषया निषेद्धुं शक्यः । अत उक्तवार्त्तिके स्वरेत्येवावश्यकमित्याहुः ।

"क्विलुगुपधात्वचङ्परनिर्ह्रासेषूपसंख्यानम्" । पूर्वत्रासिद्धे च "तस्य दोषः संयोगादिलोपलत्वणत्वेषु" ।

अयमर्थः—क्वौ विधिं प्रति न स्थानिवत् । लवमाचक्षाणो लौः । णिचि टिलोपः, क्वौ णिलोपश्चेत्युभयं वकारस्य क्विन्निमित्ते ऊठि कार्ये न स्थानिवत् । "एत्येधत्यूठ्सु" इति वृद्धिः । ये तु "क्वौ लुप्तं न स्थानिवत्" इति पठन्ति तेषामेतन्न स्यात् । तथा पिपठिषतेः क्वौ अतो लोपे नपुंसके बहुवचने झलन्तलक्षणे नुमि कर्त्तव्ये अतो लोपस्य स्थानिवत्त्वनिषेधः स्यात् क्वौ परे कृतत्वात् इति नुम्प्रसङ्गात् । 'क्वौ विधिम्' इति पक्षे तु नुमः क्विनिमित्तत्वाभावाद्भवत्येव स्थानिवत्त्वम् । पूर्वत्रापि क्विनिमित्तकस्य णिलोपस्य स्थानिवत्त्वनिषेधेऽपि णिनिमित्तकस्य टिलोपस्य स्थानिवत्त्वप्रसङ्गादूठोऽनुपपत्तेः । इदं च हरदत्तग्रन्थे स्पष्टम् । कैयटेनापि "क्वौ विधिं प्रति" इत्यर्थो व्यवस्थितो न तु "क्वौ लुप्तम्" इतीत्युक्तम् । क्वचित् "क्वौ लुप्तम्" इत्यप्याश्रीयते एवेति तदर्थः । अत एव "ल्यत्यात्परस्य" इति सूत्रे 'सखीयतेः सखीः लूनीयतेर्लूनीः' इति भाष्यम् । सखीयादिभ्यः क्विपि कृते ऽल्लोपयलोपयोश्चाल्लोपस्य स्थानिवत्त्वादिकारस्य यणा भाव्यम् । ततो यलोपे स्थानिवत्त्वनिषेधाद्, आदिष्टादचः पूर्वत्वात्स्थानिवत्त्वाप्रसङ्गाद्वा यलोपः स्यादित्याशङ्क्य क्वौ लुप्तं न स्थानिवदिति समाधत्त कैयटः ।

अत्र "लोपाजादेश एव न स्थानिवद्" इति पक्षमाश्रित्य आदिष्टादच इत्याद्युक्तम् । देवयतेर्द्यूरिति तूभयथाऽपि सिध्यतीति हरदत्तः ।

ननु "क्वौ विधिं प्रति" इति पक्षे ऊठ् सिद्ध्यति तथाऽपि तस्य स्थानिद्वाराऽनादिष्टादचः पूर्वत्वाद् णिलोपस्य स्थानिवत्त्वाद् "अचो ञ्णिति" इति वृद्धिः स्यात्, तस्मात् "क्वौ लुप्तम्" इत्यवश्याश्रयणीयम् । अत एव इदं तु क्वौ-

लुप्तस्योदाहरणं देवयतेर्दयूरिति कैयटेनोक्तम् । तत्कथमुभयथाऽपीति चेन्न । स्थानिद्वारकपूर्वत्वे मानाभावस्योक्तत्वात् । न च पक्षद्वयेऽपि प्रत्ययलक्षणेन दयूरित्यत्र वृद्धिर्दुर्वारेति वाच्यम् । वहिरङ्गस्य ऊठो वृद्धिं प्रत्यासिद्धत्वात् । तथा च स्थानिवद्भावे सत्यपि न क्षतिः । न चैकदेशविकृतन्यायेन "दिव औद्" इत्यस्यापत्तिः । निरनुबन्धपरिभाषया अधातुग्रहणानुवृत्तेर्वा तत्समाधानस्य भाष्ये वक्ष्यमाणत्वात् ।

इदं च सर्वमार्द्धधातुके इति परसप्तमीपक्षे । विषयसप्तमीत्वे त्वतो लोपस्य परनिमित्तकत्वाभावात् न स्थानिवत्त्वप्रसक्तिरिति बोध्यम् । ध्वनितं चेदं "लोपो व्योः" इति सूत्रे यलोपाकिलोपयोर्विप्रतिषेधं वदता भाष्यकृता तदुपपादयता कैयटेन चेति स्पष्टमाकरविदाम् ।

लुका लुप्ते न स्थानिवत् । आमलक्याः फलमामलकम् । "नित्यं वृद्धशरादिभ्यः" इति मयट् । "फले लुक्", "लुक्तद्धितलुकि" इति ङीषो लुक् । परनिमित्तको "यस्येति च" इत्यल्लोपो न स्थानिवत् । अन्यथा स्थानिवद्भावादीकारस्य परत्वमस्तीत्यकारलोपः स्यात् । फलेलुक्प्रत्याख्यानपक्षे तु पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुः पञ्च इन्द्राण्यो अग्नाय्यश्च देवता अस्य पञ्चेन्द्रः, पञ्चाग्निः । आद्ये "आर्हाद्" इति ठक् । तस्य "अध्यर्द्धपूर्व" इति लुक् । "अन्तरङ्गानपि" इति न्यायेन यणः पूर्वं तत्प्रवृत्तावपि स्थानिवत्त्वाद्यण्प्रसङ्गः । अविरविकन्यायेन पटुशब्दादेव तत्र ठक् न तु पट्वीशब्दादिति कल्पने च प्रतिपत्तिगौरवम् । न च "भस्याढे तद्धिते" इति पुंवद्भावः । भत्वे भाविन्येव तद्विधानाद् अत्र तु लुकि तदभावात् । "ठक्छसोश्च" इत्यस्यापि लुप्त-

ता लुप्ते प्रत्ययलक्षणाभावेन दुर्लभत्वात् । द्वितीये पुंवद्भावविरहात्स्पष्टमुदाहरणम् । "सास्य देवता" इत्यण् । "द्विगोर्लुगनपत्ये" इति लुक् । ततो ङीब्ङीषोः लुक् । तत्सन्नियुक्त ऐकारः आनुक्‌च श्रूयेत । न च सन्नियोगशिष्टन्यायेन तन्निवृत्तिः । तद्धितलुकि परे स्त्रीप्रत्ययलुको विहिततया तन्निमित्ताया ङीपोङीषश्च निवृत्तेः स्वपूर्वयोरैकारानुगागमयोर्निवृत्तौ कार्यायाम् "अचः परस्मिन्" इति स्थानिवत्त्वप्रवृत्तेः ।

केचित्तु वरे इत्यत्र वर ई इति प्रश्लेषात् ईकारे परतो विधौ न स्थानिवदिति व्याख्याय प्रकृतवार्तिके लुग्ग्रहणं नारभ्यमिति वदन्ति । स्पष्टं चेदं पदमञ्जर्याम् । केचित्तु एवं सति पञ्च गार्ग्यायण्यो देवता अस्य पञ्चगार्ग्यः इत्यत्र ङीषो लुकि ष्फप्रत्ययस्य लुक् न सिद्ध्येत् ङीष्लुकः स्थानिवद्भावेन तद्धितलुकः परत्वाभावात् । ईकारे परतो यो विधिस्तत्रैव त्वया स्थानिवद्भावनिषेधोपगमात् । अस्य च तथात्वाभावात् । एवं पञ्चभिः श्वश्रूभिः क्रीतः पञ्चश्वशुर इत्यत्राकारोकारलोपः स्यात् । ऐनेयः श्यैनेय इत्यादौ "यस्येति च" इति ङीपो लोपे नकारस्यापि निवृत्तिः स्यात् । नकारस्य पूर्वमेव निष्पन्नतया कार्यत्वाभावात् स्थानिवदादेश इत्यस्याप्रवृत्तेः । निवृत्त्यभावरूपकार्यस्याशास्त्रीयत्वात् । न च ङीब्नकारयोः सह विधानेन ईकारपरविध्यभावान्नोक्तनिषेध इति वाच्यम् । आनुगैकारयोर्ङीषा ङीपा च सह विधानेन पञ्चेन्द्र इत्यादेरसिद्धेः इत्याहुः । तन्न । ष्फप्रत्ययेन सहैव ङीषो लुक्प्रवृत्तेः । तत्र हि "प्राचां ष्फ तद्धितः" इति स्त्रीत्वं ष्फप्रत्ययस्यैवार्थो ङीष् तु षित्त्वसामर्थ्याद्भवतीति सिद्धान्तः ।

उपधात्वे कर्त्तव्ये न स्थानिवत् । पारिखीयः । अ-

कप्रत्ययः अर्कः, पाचयतेः क्तिच् पाक्तिः । "चोः कुः" इति कुत्वं प्रति णिलोपो न स्थानिवत् । कुत्वमुपलक्षणम् । अतएव लेहयतेर्लेढिः, दोहयतेर्दोग्धिः, याजयतेर्याष्टिः, वेशयतेर्वेष्टिरिति सिध्यतीति बोध्यम् । कुत्वोपादानस्य पूर्वत्रासिद्धीये न स्थानिवदित्येतन्मूलकत्वात् । तदपि न्यायसिद्धम् । "अचः परस्मिन्" इत्यातिदेशं प्रति त्रैपादिकस्यासिद्धतया तद्विधौ तदप्रवृत्तेः । न च राम इत्यादौ विसर्गो न स्यात् । न्यायसाम्येन स्थानिवत्सूत्रस्याप्यप्रवृत्तौ सुबन्तत्वाभावात्पदत्वानुपपत्तेरिति वाच्यम् । "प्रत्यय" इत्यादिज्ञापकेन तत्प्रवृत्तेः । न चैवं द्विर्वचनसवर्णानुस्वारदीर्घजश्चरोऽपि सूत्रे नोपादेया इति वाच्यम् । इष्टापत्तेः । तथा च वार्त्तिकम्—

"द्विर्वचनादीनि च वरेयलोपस्वरवर्जम्" इति ।

स्यादेतत् । दीर्घग्रहणपरित्यागे स्थलान्तरीये दीर्घविधौ स्थानिवत्त्वापत्त्या "चिण्णमुलोः" इति सूत्रे यङन्ताण्णिजन्ताद्वा णिचि चिणि अशंशामि अशामि इति सर्वैरुदाहृतम् न सिद्ध्येत् । न च दीर्घग्रहणसामर्थ्यम् । अहीडीत्येतदर्थत्वात् । अहेडीत्येतन्निवृत्त्यर्थत्वाच्च । तथा हि—"हेडृ अनादरे" घटादिः, ह्रस्वः । हिडयति । अत्र चिण्णमुलोः कृतयोः ह्रस्वविकल्पस्यैव विधाने अहिडि अहेडीति स्यात् । दीर्घे तु अहिडि अहीडीति रूपमिति कैयटादौ स्पष्टम् ।

अत्राहुः—णित्वजात्यैक्यं गृहीत्वा अशामीति, यङ्लुगन्तात्त्वशंशामीति सिद्धम् । याङि तल्लुकि वा अर्थस्वरयोरविशेषात् । ग्राहितमित्याद्यपि पूर्वस्माद्विधौ स्थानिवद्भावेन णिचा व्यवधाने "ग्रहो ऽलिटि" इति दीर्घस्याप्रवृत्तेः । न च सूत्रमते दीर्घविधौ

न्यथा परिखाशब्दाच्चातुरर्थिकेऽणि कृते तन्निमित्तकस्य आलोपस्य स्थानिवद्भावात् खकारोपधत्वाभावाद् "वृद्धादकेकान्तखोपधाद्" इति छो न स्यात् । उपधासंज्ञायाः पूर्वविधित्वात् । न च पटयतीत्यादौ टिलोपस्य स्थानिवद्भावनिषेधात् पकाराकारस्य उपधासंज्ञायां सत्याम् "अत उपधायाः" इति वृद्ध्यापत्तिरिति वाच्यम् । उपधासंज्ञानिबन्धनप्रत्ययविधावेवोक्तनिषेधप्रवृत्तेरिति सिद्धान्तात् । न चैवं सौरी बलाका इति यलोपोदाहरणे उपधाविधौ स्थानिवत्त्वनिषेधादेव तदन्यथासिद्ध्यभिधानं भाष्ये कथमिति वाच्यम् । अनास्थावादमात्रत्वात् । तत्र हि "तेनैकदिक्" इत्यणन्तात् ङीप् । एकस्याणूनिमित्तको द्वितीयस्य चाकारस्य ङीब्निमित्तको लोपः । तद्द्वयस्यापि यकारलोपे स्थानिवत्त्वनिषेधः । द्वितीयलोपस्य त्वाभीयत्वात्समानाश्रयत्वाच्चासिद्धतया यकारस्योपधासंज्ञायां तल्लोपसिद्धेः । तथा चोपधात्वं यलोप एवोक्तम्, न तु प्रत्ययविधाविति । यलोपस्यैव सौरीत्युदाहरणमिति स्पष्टम् ।

चङ्परनिर्ह्रासश्चङ्निमित्तको ह्रस्वः । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन । प्रथमणिचो लोपस्य स्थानिवत्त्वे सत्याकारस्यानुपधात्वात् "णौ चङ्युपधायाः" इति ह्रस्वो न स्यात् । यस्तु चङ्परो द्वितीयो णिच् तदङ्गसंबन्धित्वस्याकाररूपायामुपधायामभावात् । प्रथमणिजङ्गसंबन्धित्वस्य सत्त्वेऽपि प्रथमणिचश्चङ्परत्वाभावात् । एवं वारिशब्दाद् "तत्करोति" ण्यन्ताच्चङ् अवीवरत् । इकारलोपो न स्थानिवत् । न च "नाग्लोपि" इति निषेधः । परत्वात् वृद्धौ सत्यां टिलोप इत्यभ्युपगमात् । अत एव हलकलयोरदन्तत्वं निपातयिष्यते । कुत्वेऽपि न स्थानिवत् । अर्चयतेरौणादिकः

कप्रत्ययः अर्कः, पाचयतेः क्तिच् पाक्तिः । " चोः कुः " इति कुत्वं प्रति णिलोपो न स्थानिवत् । कुत्वमुपलक्षणम् । अतएव लेहयतेर्लेढिः, दोहयतेर्दोग्धिः, याजयतेर्याष्टिः, वेशयतेर्वेष्टिरिति सिध्यतीति बोध्यम् । कुत्वोपादानस्य पूर्वत्रासिद्धीये न स्थानिवदित्येतन्मूलकत्वात् । तदपि न्यायसिद्धम् । "अचः परस्मिन्" इत्यतिदेशं प्रति त्रैपादिकस्यासिद्धतया तद्विधौ तदप्रवृत्तेः । न च राम इत्यादौ विसर्गो न स्यात् । न्यायसाम्येन स्थानिवत्सूत्रस्याप्यप्रवृत्तौ सुबन्तत्वाभावात्पदत्वानुपपत्तेरिति वाच्यम् । "प्रत्यय" इत्यादिज्ञापकेन तत्प्रवृत्तेः । न चैवं द्विर्वचनसवर्णानुस्वारदीर्घजश्चरोऽपि सूत्रे नोपादेया इति वाच्यम् । इष्टापत्तेः । तथा च वार्त्तिकम्—

"द्विर्वचनादीनि च वरेयलोपस्वरवर्जम्" इति ।

स्यादेतत् । दीर्घग्रहणपरित्यागे स्थलान्तरीये दीर्घविधौ स्थानिवत्त्वापत्त्या "चिण्णमुलोः" इति सूत्रे यङन्ताण्णिजन्ताद्वा णिचि चिणि अशंशामि अशामि इति सर्वैरुदाहृतम् न सिध्येत् । न च दीर्घग्रहणसामर्थ्यम् । अहीडीत्येतदर्थत्वात् । अहेडीत्येतसिद्धयर्थत्वाच्च । तथा हि—"हेडृ अनादरे" घटादिः, ह्रस्वः । हेडयति । अत्र चिण्णमुलोः कृतयोः ह्रस्वविकल्पस्यैव विधाने अजिहिडे अहेडीति स्यात् । दीर्घे तु अजीहिडे अहीडीति रूपमिति कैयटादौ स्पष्टम् ।

अत्राहुः—णिच्यणादेरेवं ईडीत्वा अराडीति, यङ्लुगन्तात् त्वरांशामीति सिद्धम् । चङि तल्लुकि वा अर्थस्वरयोरविशेषात् । आहितमित्यादावपि पूर्वस्माद्विधौ स्थानिवद्भावेन णिचा व्यवधाने "अहो अडिडि" इति दीर्घस्याप्रवृत्तेः । न च सूत्रस्थे दीर्घविधौ

स्थानिवद्भावनिषेधात् दीर्घो दुर्वारः। विहितविशेषणाश्रयणात्। एतेन जरीगृहितेत्यपि व्याख्यातम्।

माधवाचार्यास्तु यङ्लुगन्ताद्ग्रहेस्तृजादाविटो दीर्घः जाग्रहीतेत्यादि इत्याहुः।

तत्राहुः—द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्ताद् ग्रहेर्विहितत्वम्। यङ्लुकोऽनैमित्तिकतयाऽञ्झलादेशतया लुको लुप्तत्वाच्च स्थानिवद्भावोऽपि नेति तस्याशयः।

एतच्च भाष्यकैयटविरुद्धम्। "एकाचो द्वे" इति सूत्रे हि "ग्रहेरङ्गाद्" इतिभाष्यव्याख्यायां कैयटेनोक्तम्—'जरीगृहितेत्यत्र ग्रहेर्विहितं यद् आर्द्धधातुकमिति विहितविशेषणान्न दीर्घः। तृचो 'जरीगृह्' इत्यङ्गं न तु ग्रहिः, विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणम्' इति।

इदं च यद्यपि यङ्प्रक्रमेणोक्तम् तथाऽपि यङ्लुक्यपि न दीर्घ इति तदभिप्रायोऽन्यसाम्यादिति।

अत्रेदं वक्तव्यम्—यङ्लुकः किंचिन्निमित्तकत्वाभावेन तदुत्तरं प्रत्ययोत्पत्तौ बाधकाभावात् यथाश्रुतरूपाश्रयणे ग्रहेर्विहितत्वानपायात्। न च द्वित्वादिप्रवृत्त्यनन्तरमेवार्द्धधातुकोत्पत्तिः। अन्तरङ्गतया आर्द्धधातुकस्यैवोत्पत्तेः। यङन्ते तु ग्रह्यशब्दोत्तरमेवार्द्धधातुकोत्पत्त्या यथाश्रुतरूपप्रच्यव इति वैषम्यम्। न च जरीगृहित्यङ्गमिति कैयटविरोधः। शुद्धस्य ग्रहेरङ्गव्यावृत्तावेव तत्तात्पर्यात्। यङ्लोपस्य परनिमित्तकत्वाद्यथाश्रुते बाधात्। तत्पूर्वं जरीग्रह्यशब्दात् तृजिति तेनैवोक्तत्वाच्च। अस्तु वा तत्र यङः श्रूयमाणतया तन्निमित्तं द्वित्वादि पूर्वमेव, लुकि तु प्रत्ययलक्षणाद्यपेक्षस्य द्वित्वादेः पश्चादेव प्रवृत्तिरिति माधवाशयः। "ग्रहोऽलिटि" इति सूत्रे एकाच्ग्रहणस्य हरदत्ते-

नानुवर्तितत्वेऽपि यथा यङ्लुङन्ते दीर्घप्रवृत्तिस्तथोक्ता तत्रेति दिक् ।

"तस्य दोषः संयोगादिलोपलत्वणत्वेषु" ।

तस्य पूर्वोक्तनिषेधस्य । तेन स्थलत्रये पूर्वत्रासिद्धेऽपि स्थानिवत्त्वप्रवृत्तिरित्यर्थः । तेन, काक्यर्थम्, वास्यर्थम्, इत्यत्र पदान्ते यः संयोगस्तदाद्यवयवयोः सकारककारयोः " स्कोः " इति कलोपो न ।

ननु " स्कोः " इत्यत्र झल इत्यनुवृत्त्या तस्य च " स्कोः " इत्यत्र व्यभिचारावारकत्वेन वैयर्थ्यात् उपसर्जनेऽपि संयोगे विशेषणतया झलन्तो यः संयोगः तदाद्योः स्कोर्लोप इत्यर्थाद् बहिरङ्गतया यणोऽसिद्धत्वाद्वा नायमतिप्रसङ्ग इति चेन्न । कुस्मयतेः क्विपि कूरिति माधवाद्युदाहृतस्यानुपपत्तिप्रसङ्गात् । संयोगादीत्यस्यानुपादाने संयोगान्तलोपे णिलोपस्थानिवद्भावनिषेधापत्तेः । दध्यत्र इति भाष्यव्याख्यायां "पूर्वत्रासिद्धे न स्थानिवत् इति नास्ति, संयोगादिपदस्य संयोगोपलक्षितलोपोपलक्षणत्वात्" इति कैयटोक्तेः पूर्वपक्ष्यभिप्रायवर्णनमात्रपरत्वात् । नपदान्तसूत्रशेषे स्कन्दयतेः स्कन् तक्षयतेस्तगिति तेनैवोक्तत्वात् ।

"यत्तु सिद्धकाण्डे श्चुत्वकत्वे " इति वार्तिकव्याख्याने मधुपूर्वात् श्चोततेः क्विबन्ताण्णिजन्तात् क्विपि मधुगितीष्यते मधुडिति प्राप्नोतीति तेनोक्तम्, तत्र सकारोपदेशसामर्थ्यान्न संयोगादिलोप इति भावः । नच सन् श्चोततीत्यत्र "शि तुक्" इत्यप्रवृत्त्या चरितार्थत्वमिति वाच्यम् । " क्वौ लुप्तं न स्थानिवत् " इति समाधेयत्वात् । कुस्मयतौ तु सामर्थ्याभावात् संयोगान्तलोपस्यैव प्रवृत्तेः । तक्षि-

रक्षिभ्यां ण्यन्ताभ्यां क्विपि तक् रक् इत्याद्यसिद्धेश्च । संयोगस्य तत्र झलन्तत्वात् । संयोगादिलोपे कर्त्तव्ये णिलोपस्य स्थानिवद्भावे तु तदप्रवृत्त्या संयोगान्तलोपे च स्थानिवत्त्वनिषेधेन तत्प्रवृत्त्या उक्तसिद्धेः । न च "काष्ठशगेव नास्ति" इति भाष्यादयं प्रयोगो नास्तीति वाच्यम् । काष्ठशक्स्थातेत्यत्र झल्परसंयोगादेः ककारस्य लोपमाशङ्क्य तथोक्तत्वात् यत्र ककारस्य संयोगादिलोपप्रसक्तिस्तत्रैवानभिधानस्योक्तत्वात् । अत्र च णिलोपस्य स्थानिवत्त्वेन तदप्रसङ्गात् । अत एव कान्तेभ्यः क्विब् नास्तीति व्याख्यातारः ।

लत्वे यथा—निगार्यते, निगाल्यते । णिलोपस्य स्थानिवद्भावाद् "अचि विभाषा" इति लत्वविकल्पः ।

अथ प्रत्ययलक्षणेनैव लत्वम् । न च वर्णाश्रयत्वम्, धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् । एतच्च भ्रूणहत्येति तकारनिपातनेन ज्ञापयिष्यते । यद्वा, अन्तरङ्गतया णिलोपात् पूर्वमेव लत्वमिति चेत्, मैवम् । 'प्रत्ययलक्षणसूत्रमितरव्यावृत्तिमात्रफलकम्, स्थानिवद्भावस्तु स्थानिवत्सूत्रेणैव' इति भाष्ये वक्ष्यमाणत्वात् अजादिप्रत्ययनिमित्तके लत्वे च विशेषणतया अलाश्रयणाद् "अनल्विधौ" इति निषेधात् । नाप्यन्तरङ्गत्वेन सिद्धिः । अकृतव्यूहपरिभाषाविरोधात् ।

किं च "उपसर्गस्यायतौ" इति सूत्रे अयतिपरत्वम् उपसर्गस्य विशेषणं रेफस्य वेति पक्षद्वयम् । आद्ये प्लायत इति लत्वार्थं स्थानिवद्भावोपयोग आवश्यकः, अन्यथा एकादेशे कृते पौर्वापर्यरूपव्यपवर्गाभावः । अयतिनिष्ठपरत्वनिरूपितपूर्वत्वशालिन उपसर्गस्येति तदर्थात् । उभयत आश्रये च अन्तादिवद्भावनिषेधात् । द्वितीये एकादेशस्य परादित्वेन ग्रहणाद्रेफा-

पेक्षयाऽयतेः परत्वेन प्लायते इत्यस्य सिद्धावपि पल्ययते इत्यत्र लत्वं न स्यात्, यकारेण व्यवधानात् । न च वचनसामर्थ्यम् । प्लायते इत्यत्र सावकाशत्वात् । न च तत्रापि स्थानिवद्भावात् अकारेण व्यवधानम् । पूर्वत्रासिद्धे तन्निषेधात् । लत्वविधौ स्थानिवद्भावप्रतिप्रसवे तु येननाव्यवधानन्यायेनोभयत्र लत्वसिद्धिरिति दिक् ।

"णत्वे माषवपनी"इति भाष्यम् । "प्रातिपदिकान्त–"इति सूत्रेण समासान्तस्य नकारस्य णत्वं विधीयमानम् अल्लोपस्य स्थानिवत्त्वनिषेधात् ङीबुत्पत्तेः प्राक् समासविधानात्प्राप्नोतीति कैयटः ।

अत्र प्रत्यवतिष्ठन्ते–बहिरङ्गतयाऽल्लोपस्यासिद्धतया नकारस्य प्रातिपदिकान्तत्वाभावः । प्रहिणोति प्रमीणातीत्यादौ चैकदेशविकृतन्यायेनैव " हिनुमीना " इत्यस्य प्रवृत्तेः । न च प्रियाष्ट्न इत्यत्र णत्वनिवृत्तिसिद्ध्यर्थमिदम् । कार्यकालपक्षे बहिरङ्गतयैव सिद्धेः । एतेन प्रियाष्ट्णा इति णत्वस्वीकारपरः पदमञ्जरीग्रन्थोऽपास्त इति ।

तदसत् । तत्र णत्वस्य पूर्वमुपपादितत्वात् ।

यत्तु " अनितेरन्तः " इति सूत्रे हे प्राण् इति णत्वार्थम् " पदान्तस्य " इति निषेधबाधाय " अन्तः " इति योगं विभज्य पदान्तस्यानितेर्णत्वं विधीयते । यद्वा, समीपार्थमन्तशब्दमादाय निमित्तसमीपवर्त्तिनोऽनितिनकारस्य तादृशस्य वा अनितेर्नकारस्य णत्वं योगविभागं विनाऽपि सिद्धम् । आद्ये प्राणिति इत्यादावेकेनाऽऽकारेण व्यवधानेऽप्यारम्भसामर्थ्यात् णत्वम् । द्वितीये तु एकादेशस्य आदिवद्भावात् रेफादव्यवहितस्यानितेः संभवात्सिद्धम् । पर्यनितीत्यत्र तु द्वयेनै-

केन वा व्यवधानान्न णत्वमित्यष्टमे व्याख्यातम्। इह णत्वग्रहणे तु पर्यनितीत्यत्रैव प्राणिति इत्यत्रापि द्वाभ्यामेकेन वा वर्णेन व्यवधानात् णत्वं न स्यात्। न च वचनसामर्थ्यम्। निरणिति दुरणितीत्यत्र चारितार्थ्यात्। न चैवं "निर्दुरोरनितेः" इत्येव ब्रूयात् इति वाच्यम्। अनितिं प्रत्युपसर्गत्वाभावेऽपि णत्वापत्तेः। निरानयतीत्यत्र निरो व्यर्थविशेषकत्वेन णत्वस्यानिष्टत्वात्। किंच, अनितेर्ण्विजन्तान्निष्पन्नात् शब्दस्य निश्शब्देन "निरादयः क्रान्ताद्यर्थे" इति समासे भसंज्ञायामल्लोपे निर्न इत्यत्र णत्वं स्यात्। हे प्राणित्यत्र णत्वप्रतिप्रसवायावृत्त्यर्थम् अक्षरलाघवाच्च "अन्तः" इत्यस्यैव युक्तत्वात्। तस्मादाष्टमिकभाष्याद्यालोचनया अत्र णत्वग्रहणं न कार्यमिति। तदप्यसत्। तन्मात्रपरत्वे "रादनितेः" इत्यस्यैवापत्तेः। रान्तादुपसर्गात्परस्यानितेर्ण इति व्याख्यानसंभवात्। "अनितेः" इत्यस्य प्रयोजनान्तराभावात् "पदान्तस्य" इति निषेधस्यापवादसंभवाच्चेति दिक्।

यद्यपि "न मु ने" इत्यत्र योगविभागादसिद्धताया अनित्यत्वमाश्रित्य स्थलत्रये स्थानिवत्त्वं सुसाधम्, तथाऽपि तादृशविशेषस्य दुर्ग्रहतया वार्तिकारम्भ एव श्रेयान्।

द्विर्वचनेऽचि ५८।

द्वित्वनिमित्तमचमाश्रित्य कृतोऽजादेशः स्थानिवत् स्यात् द्वित्वे कर्त्तव्ये। "अचः परस्मिन्" इत्यस्यानादिष्टादचः पूर्वस्य विधावेव प्रवृत्तेः साच्कस्य द्वित्वे कर्त्तव्ये अप्राप्तः स्थानिवद्भावो विधीयते। निमित्तापेक्षया पूर्वस्य विधाविति पक्षेऽपि द्विर्वचनस्य विधौ स्थानिवत्त्वनिषेधादिति कैयटः। रूपातिदेशश्चायम्। चक्रतुः, चक्रुः। कृ अतुस कृ उस्, इति स्थिते यणः पश्चात् उक्ता-

तिदेशेन कृ इत्यस्य "लिटि धातोः" इति द्वित्वम् । कार्यातिदेशस्वीकारे तु यणादेशे सति प्रकृतेरनच्कत्वात् एकाचो विहितं द्विर्वचनं न प्राप्नोतीति स्थानिवद्भावादनेन सूत्रेण यण्सहितस्यैव द्विर्वचनं स्यात्। रूपातिदेशत्वे च प्रमाणं वक्ष्यते।

अत्र पञ्च पक्षाः संभवन्ति । तथा हि—अचीत्यादेशोपलक्षणम् । द्विर्वचने इति विषयनिर्देशः । अचि योऽजादेशः स द्वित्वे स्थानिवदिति प्रथमः ।, द्विर्वचन इति विषयनिर्देशः तस्मिन्कर्तव्ये स्थानिवद्भवत्यचि परे इति द्वितीयः ।, द्विर्वचनपदमर्शआद्यजन्तम् अधिकरणल्युडन्तं वा । द्वित्वनिमित्तत्वविशेषितं च अज्ग्रहणम् आदेशोपलक्षणम् । द्विर्वचननिमित्तेऽचि योऽजादेशः स स्थानिवदिति तृतीयः ।, उक्तविधमेवाऽज्ग्रहणं स्थानिवद्भावविशेषणम् । अजादेशः स्थानिवत् द्विर्वचननिमित्तेऽचि परे इति चतुर्थः ।, द्विर्वचनग्रहणमावर्त्तते । एकेनाज्विशेष्यते तेन च स्थानिवद्भावो विशेष्यते । अपरेण विषयो निर्दिश्यते । द्वित्वे कर्त्तव्ये अजादेशः स्थानिवत् द्वित्वनिमित्ते अचि परे इति पञ्चमः ।

अत्र नाद्यः । द्वित्वनिमित्तत्वरहितमचमाश्रित्य कृतस्याप्यजादेशस्य स्थानिवत्त्वप्रसङ्गात्, अचो द्वित्वनिमित्तत्वेनाविशेषितत्वात् । ततश्चाचिकीर्त्तदित्यत्र णिचि परे कृतस्य "उपधायां च" इति ऋकारस्थानिकस्य इकारादेशस्यापि स्थानिवत्त्वे "चङि" इति कृ इत्यस्य द्वित्वे "उरत्" इत्यत्त्वे च अचकीर्त्तदिति स्यात् । दुद्यूषति ऊठमाश्रित्य कृतयणादेशस्य स्थानिवत्त्वे दिव्शब्दस्य द्वित्वे दिद्यूषतीति स्यात् । भवनमिच्छतीति क्यजन्तात्सनि ल्युटि कृतयोर्गुणावादेशयोः स्थानिवत्त्वे बुभवनीयिषतीति स्यात् ।

न द्वितीयः । दुद्यूषति इत्यादिदोषद्वयतादवस्थ्यात् । अचिकीर्तदित्यत्र तु इत्वस्य तकारव्यवधानान्न दोषः । स्थानिवद्भावभाजो ह्यादेशस्य स्थानिवत्त्वविधानवेलायाम् अचि अनन्तरे स्थानिवत्त्वेन भाव्यम्, तथैवाचि परतः तद्विधिनिर्वाहात्। एवं पपावित्यत्र "आत औ णलः" इत्यौकारेण सह पाशब्दस्य वृद्धौ सम्प्रति आदेशात्परोऽज् नास्तीति स्थानिवत्त्वं न स्यात् । जग्मतुरित्यादौ "गमहन" इत्युपधालोपो व्यवहितत्वान्न स्यात् ।

न तृतीयः । कालावधारणविरहे द्वित्वोत्तरमपि स्थानिरूपावस्थानप्रसङ्गात् ।

न चतुर्थः । पपावित्यादिदोषसाम्यात् । कालावधारणाभावाच्च ।

न पञ्चमः । जग्मतुरित्याद्यनुपपत्तेः । लोपप्रतियोग्यपेक्षयाऽतुसादेः अव्यवहितपरत्वाभावात् । तस्मादुक्तरीत्या पूर्वव्याख्यानमेव युक्तम् ।

तथा हि—द्विर्वचननिमित्तत्वेन अज्विशेषणात् अचिकीर्तदित्यादौ नातिव्याप्तिः । इत्वे णिचो द्वित्वे च चङो निमित्तत्वात् । आदेशोपलक्षणाच्च पपावित्यादौ नाव्याप्तिः । पुनर्द्विर्वचनोपादानाच्च कालावधारणलाभात् द्वित्वोत्तरमादेशावस्थानम् ।

अथ द्विर्वचननिमित्तेऽचि परे विधीयमानं स्थानिवत्त्वं चक्रतुरित्यादौ न स्यात् । अतुसो द्वित्वनिमित्तत्वेऽपि तदवयवस्याकारमात्रस्य तन्निमित्तत्वविरहात् । न चारम्भसामर्थ्यम् । चकार चक्रे इत्यादौ द्वित्वयण्निमित्तयोरेकमात्रपर्याप्ततया तत्र चरितार्थत्वात् ।

यदि तु, परस्मिन्नित्यनुवर्त्य तत्राचीति विशेषणम् । व्याख्येयम् "यस्मिन्विधिस्तदादावल्ग्रहणे" इति अजादौ परस्मिन्निति,

चक्रे इत्यादौ तु व्यपदेशिवद्भावादजादित्वमिति कल्प्यते। एवमपि न निर्वाहः। अजादेर्द्विर्वचननिमित्तत्वेऽपि यणं प्रत्यच एव निमित्तत्वात्।

वस्तुतो "विधौ परिभाषोपतिष्ठते नानुवादे" इति न्यायेन "यस्मिन्विधिः" इति परिभाषाप्रवृत्तिरेव दुर्लभा। अचि योऽजादेश इत्यस्यानुवादत्वात्। तत्राऽऽदेशस्यानुवाद्यतया तद्विशेषणत्वात् अचीत्यस्य तदादिग्रहणपरिभाषाया अप्रवृत्तेः।

अत्रोच्यते। अचि परतो द्विर्वचनं दृष्टमित्येतावतैवाचो द्विर्वचननिमित्तत्वम् अत्र। तदाहुः—

'तद्भावभाविताभात्रेणेह निमित्तत्वम्' इति। तथा च साक्षाद्वा समुदायघटकतया (वा) द्वित्वोपयोगित्वमात्रं विवक्षितमिति।

यत्तु द्विर्वचनेनाक्षिप्तः प्रत्ययोऽत्राचीत्यनेन विशेष्यते, परस्मिन्नित्यनुवर्त्तते। अमीषां मध्ये देवदत्तात्परमानयेत्युक्ते यथा सजातीयेन मनुष्यान्तरेणाव्यवहितपर आनीयते तथेहापि प्रत्ययान्तरेणाव्यवहितपरो गृह्यते। तेन द्वित्वनिमित्ते अजादौ प्रत्यये प्रत्ययान्तरेणाव्यवहिते सति योऽजादेशः स स्थानिवदिति सूत्रार्थः। वक्ष्यमाणज्ञापकबलेन णिचा व्यवहिते प्रवृत्तावपि दिदवनीयिषतीत्यादावनेकप्रत्ययव्यवधानन्नातिप्रसङ्गः। अपीप्यदित्यत्र वर्णव्यवधानेऽपि प्रत्ययान्तराभावात्प्रवृत्तिः। अनुवादे परिभाषाऽनुपस्थानेऽपि निर्दिष्टपरिभाषालभ्यार्थसिद्धिश्च। अत एवेह परस्मिन्नित्यनुवर्त्तते इति न्यासकारः। द्विर्वचनेन प्रत्ययाक्षेपं णिज्भिन्नप्रत्ययव्यवहिते ज्ञापकस्याप्रवृत्तिं च वदतः कैयटस्याप्ययमेवाशय इति।

तन्न। "यस्मिन्विधिः" इति परिभाषाप्रवृत्तेर्दुर्लभत्वात्। निर्दिष्टपरिभाषाप्रवृत्तिं विना तदर्थस्यानुपपत्ते-

श्च। तथा हि—अमीषामिति निर्धारणे मनुष्यत्वस्य प्रतियोगितावच्छेदकतया तद्विषयस्यापि मनुष्यत्वलाभात्, परशब्दस्य चाव्यवहितपरार्थकत्वात् तथा (अर्थ–) लाभात्। प्रकृते च यदपेक्षमव्यवधानं तस्य प्रत्ययत्वग्राहकाभावात्। ऊर्णुनविषतीत्यर्थं तद्भावभावितामात्रेणेत्यस्यावश्यमाश्रयणीयत्वाच्च। तथा हि—ऊर्णोतेः सनि "सनीवन्त–" इति इटि च ऊर्णु इस् इति स्थिते "विभाषोर्णोः" इति ङित्त्वविरहेण गुणावादेशौ। "सन्यङोः" इति सन्नन्तस्य द्वित्वविधानेऽपि सनो द्वित्वप्रयोजकतया तस्मिन्कृतयोः स्थानिवत्त्वात् नुशब्दस्य द्वित्वे अभ्यासे उकारश्रवणम्। अत्र हि इडभावे "इको झल्" इति सनः कित्त्वापत्त्या गुणविरहात् इटः सन्निष्ठझलादित्वविघटकत्वेन गुणनिमित्तत्वम्, अवादेशे तु स्पष्टमेव। द्वित्वनिमित्तं तु सनेव, तत्र विशेषणान्तरानुपादानात्। तथा च निमित्तकोटावप्रविष्टस्याप्यचस्तत्र विद्यमानत्वमात्रेण निमित्तत्वमाश्रित्यैव तत्र गुणादेः स्थानिवत्त्वमिति।

नन्वेवम् अरिरिषतीति न स्यात्। ऋधातोः सनि "स्मिपूङ्रञ्ज्वशां सनि" इति इटि गुणे च तस्य इस्शब्दनिमित्तकस्य स्थानिवत्त्वे "अजादेर्द्वितीयस्य" इति इसो द्वित्वप्रसक्त्या अरीषतीतिरूपप्रसङ्गात्। रिस् इत्यस्य द्वित्वं तु तत्रेष्टमिति चेत्। नैवम्। इस्शब्दस्य कार्यित्वेन द्वित्वनिमित्तत्वाभावात्। न हि कार्यी निमित्ततयाऽऽश्रीयते। शयितरीति ज्ञापकात्। अन्यथा शीङोङित्त्वेन गुणनिषेधापत्तेः। न चैवम् ऊर्णुनविषतीत्यपि न स्यात्। सन्नन्तस्य द्वित्वविध्यविशेषेण तत्रापि इस् इत्यस्य द्वित्वनिमित्तत्वासंभवादिति वाच्यम्। मत्वर्थीयेन इनिना कार्योपहितस्यैव निमित्तत्वनिषेधात्। ऊर्णोतौ नुशब्द एव प्रवृत्त्या

सनो द्वित्वानुपधानात् । अरिरिषतीत्यत्र तु रिशब्दस्य द्वित्वभागितया सनो द्वित्वोपहितत्वमिति वैषम्यात् । नन्वेवं जेघ्रीयते देध्मीयते इत्यादावपि घ्रीय् ध्मीय् इत्यादेर्द्वित्वभागितया यङो द्वित्वनिमित्तत्वाभावादेवानतिप्रसङ्गे तद्वारणार्थमचीत्युक्तमिति भाष्यवृत्त्यादिग्रन्थाः कथं संगच्छन्तामिति चेन्न । "अनुस्वारो व्यञ्जनं च अक्षराङ्गम्" इत्यस्मादनन्तरं "स्वरान्तरे व्यञ्जनान्युत्तरस्य" इति प्रातिशाख्ये सूत्रितत्वात् घ्रीय इति समुदाये यकारस्योत्तरावयवतया घ्री इत्यादेरेव द्विरुक्तिरिति तदभिप्रायात् । यदि तु षाष्ठवार्त्तिकभाष्यरीत्या "नटभार्यावद्व्यञ्जनानि" इत्याश्रित्य द्वितीयैकाजवधिकस्य द्विर्वचनमाश्रीयते तदा तु आधिजगे इति अज्ग्रहणस्य व्यावर्त्यं बोध्यम् । "गाङ् लिटि" इति द्विलकारकनिर्देशमाश्रित्य "लावस्थायामेव गाङादेशविधानम्" इति भाष्ये उक्तत्वात् ।

ननु वार्तिकमते लिटीत्यादीनां परसप्तमीत्वाभ्युपगमात् गाङादेशस्य परनिमित्तकत्वेऽपि भाष्यकृता विषयसप्तमीत्वाभ्युपगमान्नेदमपि प्रयोजनमिति चेत्,

तर्हि जग्ले इत्याद्युदाहरणम् । अशिति प्रत्यये परे आत्वविधानात् ।

अथानैमित्तिकमात्वं शिति तु प्रतिषेध इति वक्ष्यमाणरीतिराश्रीयते तदा अचीति नोपादेयमेव ।

अथ भसेः क्सौ "घसिभसोर्हलि च" इत्युपधालोपे कृते तस्य स्थानिवत्त्वनिषेधार्थमस्तु इति चेत् ।

अत्र कैयटहरदत्तादयः—

"तत्र सत्यसति वा स्थानिवद्भावे न कश्चिद्विशेषः प्स्वानितिरूपसाम्यात् । न च सति द्वित्वे पकारद्वयमिति वाच्यम् ।

"दृष्टानुविधिश्छन्दसि भवति" इति सिद्धान्तात् । भाषायां क्सुर्दुर्लभ एव उपधालोपश्च छान्दस एव" इति ।

अचीत्येतदेव रूपातिदेशे प्रमाणम् । कार्यातिदेशे तु घ्री, गा, ग्ला इत्येषामेव द्वित्वेन भाव्यमिति तत्र स्थानिवद्भावनिषेधार्थस्य अचीत्यस्य वैयर्थ्यं स्यात् । रूपातिदेशस्वीकारे तु घ्रा, इङ्, ग्लै इत्येषां द्वित्वापत्तौ इष्टरूपं न सिध्यतीति तत्र स्थानिवद्भावो मा प्रवर्त्तिष्टेत्येतदर्थकतया तत्सार्थक्यम् । तदुक्तम्—"अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य" इति ।

अज्ग्रहणप्रत्याख्यानपक्षे तु स्थानिवदिति शब्दाधिकारमाश्रित्य स्थानिवत्सूत्रे कार्यातिदेशपरत्वेन निश्चितस्थानिवच्छब्दस्य अत्र लक्ष्यानुरोधात् रूपातिदेशपरत्वं कल्प्यम् । पूर्वसूत्रादच इति षष्ठ्यन्तमनुवर्त्य तेनादेशो विशेषणीयः ।

ननु अच इत्यादेशविशेषणं किमर्थमिति चेत् न । शुशावेत्यत्र वृद्ध्यावादेशयोरिव सम्प्रसारणस्यापि स्थानिवत्त्वे श्विशब्दद्वित्वे शिशावेति रूपं मा भूत् । न च "सम्प्रसारणं तदाश्रयं च कार्यं बलीयः" इति लावस्थायामेव तत्प्रवृत्त्या द्वित्वेन सह समाननिमित्तकत्वमेव नेति वाच्यम् । व्यतिशुशुवाते इत्यादौ दोषस्य दुर्वारत्वात् । "विभाषा श्वेः" इत्यस्य लावस्थायां प्रवृत्तावपि ईजाते ईजाथे इत्यादावतिप्रसङ्गात् कित्त्वस्यादेशविध्यनन्तरप्रवृत्तिकत्वात् । न च तस्यापि लावस्थायामेव विधिरस्त्विति वाच्यम् । अन्तरङ्गैरादेशैर्बाधितत्वात् । "स्वापेश्चङि" इति सम्प्रसारणस्य स्थानिवद्भावे "न सम्प्रसारणे सम्प्रसारणम्" इति निषेधात् असूषुपत् इत्यत्राभ्यासे उवर्णानुपपत्तेश्च । अच इत्युक्ते तु सुप् इत्यस्यैव द्वित्वे तत्सिद्धिः ।

द्वित्वे कर्त्तव्ये इत्युक्त्या तदुत्तरमादेशरूपस्यैवावस्थानम् ।

अन्यथा प्रकृतिभाव एव स्यात् । निन्यतुरित्यादौ तु पूर्वमियङ्प्रवृत्तावपि द्वित्वोत्तरम् "एरनेकाचः" इति तदपवादो यण् । यद्वा । "प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते" इति न्यायात् पूर्वमेव इयङ् न प्रवर्त्तते । आभीयत्वेन इयङोऽसिद्धत्वात् वा यणिति बोध्यम् ।

स्यादेतत् । स्थानिवद्ग्रहणं निवर्त्य "न पदान्त–" इति सूत्राद् नञ्ग्रहणं चानुवर्त्य उक्तस्थले अजादेशनिषेध एव व्याख्यायताम् भाष्यारूढत्वसाम्यात् । स्थानिवदित्यत्र शब्दाधिकारत्वानाश्रयणेन लाघवात् नपदान्तसूत्रानन्तरपाठानुग्रहाच्चेति । मैवम् । नकारस्य स्वरितताया अत्रापि कल्प्यत्वात् । स्थानिवच्छब्दे च तस्याः क्लृप्तत्वात् । अचूपदादेशपदयोरनुवृत्त्यर्थं पूर्वतरसूत्रानुसन्धानकल्पनस्यावश्यकतया "न पदान्त–" इति सूत्रानुसन्धानकल्पने गौरवाच्च ।

स्यादेतत् । द्वित्वनिमित्तमचमाश्रित्य कृतस्यैव अजादेशस्य स्थानिवद्भावविधाने चुक्षावयिषतीत्यादौ णिनिमित्तकस्य वृद्ध्यावादेशादेस्तदनुपपत्त्या अभ्यासे उकारश्रवणं न स्यात् अकारस्यैव तत्प्रसङ्गात् । एवम् उडुडावयिषति । उडुरिवाचरति उडवति ण्यन्तात्सन् । चङि औडूडवत्, नुनावयिषति, अनूनवत्, ऊर्णुनावयिषति, और्णूनवत्, पुस्फारयिषति अपुस्फुरदित्यादौ "चिस्फुरोर्णौ" इत्यात्वम् इत्यादौ इति चेत्, अत्र वार्तिकम्–

"ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य" इति ।

अस्यार्थः—"ओः पुयण्ज्यपरे" इति सूत्रेण अभ्यासोकारस्य इत्त्वं विधीयते पवर्गयण्जकारेष्ववर्णपरेषु परतः । तत्र यद्यपि पिपाविषते यियविषति इत्यत्र पूङो यौतेश्च सनि "स्मिपूङ्रञ्ज्वशाम्–" इति, "सनीवन्ते" इति च इट् गुणा-

वादेशौ द्वित्वे कर्त्तव्ये "द्विर्वचनेऽचि" इत्यस्य प्रवृत्त्या अभ्यासे उकारसम्भवात् तस्य इत्त्वविधानेन पकारयकारांशः सार्थक एव, तथाऽपि वर्णप्रत्याहारजकाराणां ग्रहणं णौ कृतस्यादेशस्य स्थानिवत्त्वं ज्ञापयति । आदेशविशिष्टानामेव द्वित्वेऽभ्यासे उवर्णस्याप्रसिद्धेः । अभ्यासाकारस्य "सन्यतः" इति इत्त्वस्य सिद्धेश्च । तद्व्यतिरेकेण पवर्गयण्जकाराणामवर्णपराणां दुर्लभत्वात् । सनि चैषामिटो दुर्लभत्वात् । अबीभवत्, अमीमवत्, अलीलवत्, अरीरवत्, बिभावयिषतीत्यादि । तथा च द्वित्वनिमित्तस्याचो णिचा व्यवधानेऽपि णिज्निमित्तकस्याप्यजादेशस्य स्थानिवद्भावे सिद्धे चुक्षावयिषतीत्यादिकं निराबाधम् । येननाव्यवधानन्यायेन द्वित्वनिमित्तस्याचो णिज्मात्रेण व्यवधानमाश्रीयते न तु निनवनीयिषतीत्यादौ ल्युट्क्यजादिभिरिति नातिप्रसङ्गः । अत एव 'णौ कृतं स्थानिवद्' इति पठन्ति ।

नन्वेवमप्यचिकीर्त्तदित्यत्र णिचि कृतस्य इत्त्वस्यापि स्थानिवत्त्वं स्यात् ।

मैवम् । अवर्णपर एव हलि स्थानिवत्त्वानुमानात् । तथा च भाष्यम्—"तुल्यजातीयस्य ज्ञापकम् । कश्च तुल्यजातीयः ? यथाजातीयकाः पुयण्जयः । कथञ्जातीयकाश्चैते ? अवर्णपराः" इति । वार्त्तिककारस्तु सूत्रमेतत्प्रत्याचख्यौ । तथाहि—षष्ठे द्वित्वप्रकरणान्ते पठ्यते-–

"द्विर्वचनं यणयवायावादेशाल्लोपाणिलोपोपधालोपकिकिनोरुत्त्वेभ्यः पूर्वविप्रतिषेधेन" इति ।

अस्यार्थः—दध्यत्रेत्यादौ सावकाशो यण्, चयनं चायको लवनं लावक इत्यादौ आयादेशादयश्चत्वारः, गोदः कम्बलद

इत्यादावाल्लोपः, श्लेष्मघ्न इत्यादावुपधालोपः, कारणा हारणा इत्यादौ णिलोपः, निपूर्त्ता इत्यादावुत्त्वं च। किरतीत्यादौ "ऋत इद्धातोः" इतीत्त्वस्याप्येतदुपलक्षणम् । तेन ततुरिरित्यादिकमपि सेत्स्यति । द्वित्वं तु बिभिदतुरित्यादौ सावकाशम् । तथा चोभयप्रसङ्गे पूर्वविप्रतिषेधात् द्वित्वं तेषां बाधकम् । तेन चक्रतुः, विवाय, लुलाव, विवयिथ, लुलविथ, पपतुः, जघ्नुः, जग्मतुः, आटिटत्, ततुरिरित्यादि सिद्धम् । न चैवम् इयङोऽत्रानुपादानान्निन्यतुरिति न स्यादिति वाच्यम् । "प्रकल्प्य च" इति न्यायेन भाविनं यणमालोच्य पूर्वमियङ् न प्रवर्त्तत इत्युक्तत्वात्। तस्मान्नारम्भणीयमेतद्वचनमिति ।

भाष्यकारास्त्वाहुः—

विप्रतिषेधोऽयमयुक्तः, आल्लोपादीनां नित्यत्वात् द्वित्वस्यानित्यत्वेन तुल्यबलत्वाभावात् । अथापूर्वोऽयं वाचनिको विप्रतिषेधस्तदा तदेव गौरवम् । अपि च नित्यानामिवान्तरङ्गाणामपि वचनेन बाधापत्तौ निनवनीयिषतीत्यादावभ्यासे उकारश्रवणं स्यात् । अथ नित्यानामेवोक्तवचनं वारकं न त्वन्तरङ्गाणामपि, तथाऽपि चुक्षावयिषतीत्यादौ वृद्ध्यादेरन्तरङ्गत्वात्पूर्वं प्रवृत्तौ ततो द्वित्वे अभ्यासह्रस्वे "सन्यत" इति इत्वे च इकारस्य श्रवणं स्यात् । तथा च तद्बाधनाय "उत्परस्यातः" "ति च" इत्युत्तरं "ओदौदादेशस्य चुट्टुशरादेः" इति वचनं कल्प्यम् । अभ्यासस्येत्यनुवर्त्तते ।

अस्यार्थः—आदौतोरादेशो यस्मिन्नङ्गे तत्सम्बन्धी चुट्टुशरादिश्च योऽभ्यासस्तस्य योऽकारस्तस्य उत्स्यादिति । चुक्षावयिषति, उड्डावयिषति, नुनावयिषति, ऊर्णुनावयिषति, शुशावयिषति, पुस्फारयिषति। यद्यप्यन्त्ये "शर्पूर्वाः खयः" इति पका-

रशेषे शरादित्वं नास्ति तथाऽपि अभ्याससञ्ज्ञाप्रवृत्तिकाले तद्बोध्यम् । ओदौदादेशस्य किम् ? "चायृ पूजायाम्" चिचाययिषति । "खद स्थैर्ये" चिखादयिषति । चुट्टतुशरादेः किम् ? बिभावयिषति । अतः किम् ? ऋजुम्, ऋणम्, ऋतुम्, अंशुं, वा, आख्यत् आर्जिजत्, आर्णिणत् ,आर्तितत्, आंशिशत् । अत्र परत्वाद् वृद्धौ टिलोपे सणिच्कस्य द्वित्वं मा भूत् । "अभ्यासस्य" इत्यनुक्तौ तु चुट्टतुशरादेरिति अङ्गस्य अतो वा विशेषणं स्यात् । तथा च शीतं लुनाति शीतलूः सूर्यः तमाख्यातुमिच्छति शिशीतलयिषतीत्यत्र तकारोत्तरस्याकारस्य उत्त्वं स्यात् । तस्माद्वचनद्वयमपि वार्त्तिककृता पठनीयम् । "ओः पुयण्ज्यपरे" इत्यपि तथैव । पिपविषते यियविषति जिजावयिषतीत्यादौ इत्त्वं यथा स्यात् । पू यु इत्यनयोः सनि इटि परत्वाद् गुणे पूर्वविप्रतिषेधेनावादेशात्पूर्वं द्वित्वस्य तन्मते प्रवृत्तेः। "जुचङ्क्रम्य" इत्यत्र निर्दिष्टः सौत्रो जुधातुः। तस्माण्ण्यन्तात्सन् । तत्र चुट्टतुशरादेरित्युत्त्वे प्राप्ते तद्बाधनाय इत्त्वस्य वक्तव्यत्वात् । न च चुट्टतुशरादेरित्यत्र चुशब्दस्थाने चकारमात्रं पठनीयम् । तथाच नात्रातिप्रसङ्ग इति वाच्यम् । गुङ् घुङ् ध्वनौ । णिचि चङि ताभ्यां, सनि च अजूगवत्, अजूघवत्, जुगावयिषति, जुघावयिषतीत्यादेरसिद्धेः । एवं दिदवनीयिषतीत्यत्रापि तवर्गादित्वादुत्त्ववारणाय वचनान्तरमारम्भणीयम् ।

अथवा "सन्यत" इत्यस्मान्मण्डूकप्लुत्या सन्ग्रहणमनुवर्त्य येननाव्यवधानन्यायेन णिज्भिन्नंव्यवधाने उत्त्वं नेति व्याख्येयम् ।

नन्वेवमपि तनुशब्दादाचारक्विबन्ताद्धेतुमण्णौ सत्यसति

वा सन् तितनावयिषति तितनविषतीत्यत्राप्युत्त्वं स्यात् ।

नैवम् । अभ्यासस्यावयवः ओदौदादेशस्य तु यथासम्भवमवयव आदेशो वा योऽकारस्तस्य उत्वमिति वार्त्तिकार्थः । चुक्षावयिषतीत्यवयवः । पुस्फारयिषतीत्यादेशः । तितनावयिषतीत्यत्र तु तदुभयाभावान्न दोषः । एवं च अत इत्यपि सार्थकम् । अन्यथा आटिटदित्यादौ चङ्परे णौ यदङ्गं तदवयवे लघौ सन्वदतिदेशात् आर्जिजदित्यादावपि प्रसङ्गाभावेन तद्वैयर्थ्यं स्यादिति सूत्रापेक्षया वार्त्तिकमते महागौरवमिति ।

स्यादेतत् । प्रकृतसूत्रं वार्तिकं चेत्युभयमपि मास्तु । "ओः पुयण्" इत्येव ज्ञापकम् । अन्तरङ्गं नित्यं च बाधित्वा द्विर्वचनं भवतीति द्वित्वानन्तरं च यथासम्भवं यणादिप्रवृत्तिरिति ।

अत्र कैयटः—ज्ञापकं सामान्यापेक्षं विशेषापेक्षं वा । नाद्यः । अचिकीर्तदित्यादौ इत्त्वं बाधित्वा पूर्वं द्वित्वप्रवृत्तावभ्यासे अकारश्रवणापत्तेः । नान्त्यः । चक्रतुरित्यादेरसिद्धेः । तस्मात्सूत्रमावश्यकम् । तद्विषये च इष्टसिद्ध्यर्थं भाष्योक्तरीत्या ज्ञापकमाश्रयणीयमिति दिक् ।

अत्र वोपदेवेन काव्यकामधेनावित्थं व्यवस्थापितम्—अङ्कयतेश्चङि णिचमाश्रित्य कृतस्य अतो लोपस्य स्थानिवद्भावात् कशब्दस्य द्वित्वे आञ्चकदिति रूपमेके स्वीकुर्वन्ति तच्च मुनित्रयविरुद्धम् । तथाहि—किं "द्विर्वचनेऽचि" इति स्थानिवत्त्वं, ज्ञापकेन वा । नाद्यः । णिचो द्वित्वनिमित्तत्वाभावात् । द्विर्वचनावृत्त्या द्वित्वनिमित्तमचमाश्रित्य कृतस्यैवाजादेशस्य स्थानिवत्त्वमिति भाष्यवार्त्तिकयोरुक्तत्वात् । नान्त्यः—ज्ञापकस्य सजातीयविषयकत्वमाश्रित्य अवर्णपर एव हलि स्थानिवत्त्वमिति भाष्य एव स्थापितत्वात् । पूर्वविप्रतिषेधवार्तिकदू-

षणपरभाष्यप्रामाण्यादेव तथा लाभात्। आश्चकदित्यादावभ्यासे अकारस्य भाष्यसंमतत्वे हि तदर्थमपि वार्तिककृता यत्नान्तरं कल्पनीयमिति गौरवमप्यापादयेत् । तदभावात्तु ज्ञायतेऽभ्यासे इकार एव भाष्याभिमत इत्यल्लोपस्य स्थानिवत्त्वमनभिमतम् इति । तस्मादुकारादेश एव स्थानिवत् । अभ्यासात्परस्य अवर्णपरहलस्तत्रैव सम्भवादिति सिद्धम् ।

यत्तु काशिकायाम् "पूर्वत्रासिद्धम्" इति सूत्रे ऊढशब्दात् णिचि चङि औजढदित्युदाहृत्य क्तान्तस्य तु औजिढदित्युक्तम् । न्यासकृता च णौ कृतस्य टिलोपस्य स्थानिवद्भाव इति व्याख्यातम् । सरस्वतीकण्ठाभरणकारेण च "णिच्यनित्" इति सूत्रितम् । तत्सर्वं महाभाष्यविसंवादान्निर्मूलम् । इत्थमेव दुर्गगुप्तेन दुर्गटीकायाम्, त्रिलोचनदासेन कातन्त्रपञ्जिकायाम्, वर्द्धमानमिश्रेण कातन्त्रविस्तरे, हेमसूरिणा हैमव्याकरणे, प्रदर्शितम् । एतच्च ज्ञापकमजन्तस्यापवर्गपरस्यावर्ण एवेति वेदितव्यमिति प्रदर्शितम् । अभिनवशाकटायनेन च शब्दानुशासने णिनिमित्तादपि प्राग्द्विः तच्चावर्णपरे इति प्रदर्शितम् । तस्मादाश्चिकत् औजिढत् इत्येव साधीयः । तथैव नन्दिक्षीरस्वाम्यादिभिर्धातुपारायणेषूदाहृतम्—

शुष्किकः शुष्कजङ्घा च क्षामिमानौजिढत्तथा । इति

वैयाघ्रपद्यवार्तिकेऽपि इकारपाठ एव सांप्रदायिकः । श्रोत्रियास्तु प्रमादाज्जिस्थाने जं पठन्ति । क्षेमेन्द्रेणापि जैनेन्द्रन्यासे स्पष्टमेवोक्तमिति । वैयाघ्रपद्यवार्त्तिकं च पूर्वत्रासिद्धमित्यस्य प्रयोजनाभिधानपरम् । तथा हि—शुष्किकेत्यत्र "उदीचामातः स्थाने यकपूर्वायाः" इति इत्त्वविकल्पो न भवति "शुषः कः" इति निष्ठाकत्वस्यासिद्धतया ककारस्याकारात् पूर्वत्वाभावात् ।

एवं शुष्कजङ्कित्यत्र "न कोपधायाः" इति पुंवद्भावनिषेधस्य न प्रवृत्तिः । क्षामिमानित्यत्र "मादुपधायाश्च" इति वत्वं न भवति, "क्षायो मः" इति मत्वस्यासिद्धतया मकारस्यानुपधात्वात् । औजिढदित्यत्र ढत्वस्यासिद्धत्वात् हृति इत्यस्य द्वित्वम् ।

अत्र वदन्ति ।

वोपदेवमहाग्राहग्रस्तो वामनदिग्गजः ।
कीर्तेरेव प्रसङ्गेन माधवेन विमोचितः ॥

तथा हि—किं वामनोक्तौ वार्त्तिकदूषणपरभाष्यविरोधः, किं वा ज्ञापकस्य सजातीयविषयकत्ववर्णनपरभाष्यविरोधः ?। नाद्यः । "नित्यानित्ययोर्विप्रतिषेधानुपपत्तिः, दिदवनीयिषति इत्याद्यसिद्धिश्च" इति दूषणयोर्भाष्ये ऽनुक्तत्वात् दूषणान्तरोपलक्षणं भाष्यमिति स्थिते औजढत् इत्यभ्यासे अकारश्रवणार्थं सोऽपि विधेयः स्यात् इति दूषणान्तरस्यापि वार्त्तिकोपरि देयत्वात् । तदेवं वार्त्तिकं रचनीयम्—"ओदौदादेशस्य चुट्टुतुशरादेरभ्यासस्योत्सनि" ततः "अल्लोपवतो णिचोऽत्" । अल्लोपवतोऽङ्गस्याभ्यासस्य णिचोऽत् स्यात् औजढत् आञ्चकत् इति ।

न द्वितीयः । यत्र द्विरुक्तौ अभ्यासोत्तरखण्डस्य आद्योऽजवर्णस्तत्र स्थानिवदिति भाष्यस्य फलितार्थः । अस्ति च हृतशब्दस्य द्विरुक्तौ प्रक्रियादशायामुत्तरत्रावर्णः । न च पुनः प्रवृत्तेन टिलोपेनापहारात् न तस्य प्रयोगसमवाय इति वाच्यम् । प्रयोगसमवायित्वस्य भाष्येऽनुक्तत्वात् । एवं च नुनावयिषतीत्यादौ द्वित्वप्रवृत्तिवेलायामवर्णाभावेऽपि पश्चाद्भाविनं तमाश्रित्य यथा स्थानिवद्भावस्तथा हृतशब्दस्य पश्चात्तद्विरहेऽपि । तथा हि—अवर्णपरत्वं द्वित्वप्रवृत्तिवेलायां विवक्षितम् उत परिनिष्ठिते रूपे ?। नाद्यः । चुक्षावयिष-

ति इत्यादावभावात् । नान्त्यः । आञ्चकत् इत्यादौ तदभावात् । तस्मात्प्रक्रियादशायामेव तदित्यवश्यमङ्गीकार्यम् । एतेन वोपदेवन्यस्ता अपि ग्रन्था व्याख्याताः प्राक्रियादशायामवर्णपरत्वस्य विवक्षितत्वात्, वामनोक्तौ तद्विरोधाभावात् ।

अध्यजीगपत् इत्यत्र तु स्थानिवत्त्वप्रवृत्तावजादित्वात् णिच एव द्वित्वापत्त्या उभयत्राप्यवर्णपरत्वाभावात् न स्थानिवत्त्वम् अचिकीर्त्तत् इत्यादिवत् । एवं सत्युवर्णस्थानिकस्यैवादेशस्य स्थानिवत्त्वमिति दुराग्रहो निर्मूल एव । अत एव "लोपः पिबतेरीच्चाभ्यासस्य" इति सूत्रे अपीप्यत् इत्यत्र पिबतेर्णौ युकि चङि उपधालोपे च तस्य स्थानिवत्त्वात् पाय्शब्दस्य द्वित्वमिति वृत्तिः सङ्गच्छते ।

अत्रेदं वक्तव्यम्—स्थानिवद्भावप्रवृत्तिवेलायाम् अवर्णपरत्वं यत्र हलोऽस्ति तत्रत्य आदेशः स्थानिवत् इति भाष्याभिप्रायो न तु त्वदुक्तान्यतरत्र गौरवात् प्रमाणाभावाच्च ।

एतेन भाष्यस्य दूषणोपलक्षणत्वात् "अल्लोपवतो णिचोऽत्" इति वचनारम्भोऽप्यापाद्यत्वेनाभिमत इत्यपास्तम् । वाचनिकविप्रतिषेधपरत्वेन प्रवृत्ते वार्त्तिके भाष्यस्य दूषणोपलक्षणत्वे प्रमाणाभावात् । नित्यानित्ययोर्विप्रतिषेधानुपपत्तिरिति दूषणस्य प्रसिद्धविप्रतिषेधपरत्वमात्रविषयकत्वात् ।

यत्तु उकारादेशस्यैव स्थानिवत्त्वे अचिकीर्त्तत् इत्यत्रातिप्रसङ्गशङ्काभाष्यमसङ्गतं स्यात् इति ।

तत् तुच्छम् । णिचि कृतं स्थानिवद्भवतीति यथाश्रुतार्थबोधदशायामेव तत्प्रवृत्तेः । सिद्धान्तविरोधेन शङ्काया असङ्गत्युक्तौ शङ्कामात्रोच्छेदापत्तेः । अन्यथान्यतरत्रावर्णपरत्ववादिनस्तवापि तदसङ्गतेर्दुरुद्धरत्वात् । तत्र प्रक्रियादशायामप्यवर्णपरत्वाभावात् ।

एतेन प्रयोगसमवायित्वं विशेषणं भाष्यानुक्तमिति निरस्तम् ।

ऊर्णुनावयिषति इत्यादावपि स्थानिवत्त्वप्रवृत्तिदशायाम् अवर्णस्य हलपेक्षया परत्वात् । "कथं जातीयकाश्चैते अवर्णपराः" इति भाष्योक्तेश्च ।

युक्तं चैतत् । अवर्णपरपवर्गयण्जकारेषु परतो विधीयमानमभ्यासोकारस्य इकारादेशविधानं हि स्थानिवद्भावं ज्ञापयति इत्युभयसिद्धम् । अस्ति चात्र स्थानिवत्त्वप्रवृत्तिवेलायां पवर्गादीनामवर्णपरत्वमिति यथोक्तार्थलाभात् । अत एव "तुल्यजातीयस्य ज्ञापकम्" इति भाष्यम् । तेन तुल्यजातीयस्य स्थानिवत्त्वमित्यर्थात् तत्प्रवृत्तिवेलायामवर्णपरत्वस्य स्पष्टमेवोक्तत्वात् । प्रथमोपस्थितं स्थानिवद्भावमुपेक्ष्य द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽजवर्ण इत्यर्थपरत्वे मानाभावात् । एवं च "अल्लोपवतो णिचोऽत्" इति वचनापादनमपि दूरापास्तम् । अभ्यासेऽकारस्य प्रमाणसिद्धत्वाभावेन तदर्थं वचनारम्भस्य निष्फलत्वात् । प्रक्रियादशायाम् अवर्णपरत्वमित्यस्य न्यासाद्यनभिमतत्वाच्च ।

अत एव "स्तौतिण्योः" इति सूत्रे सिषेचयिषति इत्यत्र सिचेर्हेतुमण्णौ गुणे सनि इटि गुणायादेशयोः कृतयोः गुणस्य स्थानिवद्भावात् सिच्शब्दस्य द्वित्वमिति न्यासकारेणोक्तम् । तत्रोत्तरखण्डे अकाराभावेन त्वदुक्तरीत्या औजढत् इत्यत्रत्यतद्ग्रन्थस्य व्याख्यातुमशक्यत्वात् ।

एतेन सिचो द्वित्वमिति न्यासस्य भाष्यविरोधादुपेक्ष्यत्वमिति परास्तम् । औजढत् इत्यत्राप्यल्लोपस्थानिवत्त्वस्य भाष्यविरुद्धतया स्वयमेव प्रक्रियादशायामवर्णपरत्वाभिप्रायं कल्पयित्वा वचनानर्हत्वात् । अत एव औजढत् इत्यादिसिद्धये सामान्यापेक्षं

ज्ञापकमुक्त्वा अचिकीर्त्तत् इत्याद्यनुरोधेन तदनित्यत्वं सीरदेवेन स्वीकृतम् । तस्मात्सामान्यापेक्षं ज्ञापकमित्येव वामनन्यासकारादीनामभिप्रायः न तु त्वदुक्तः ।

परं तु "विशेषापेक्षं ज्ञापकम्" इति भाष्यविरोधादेव तेषामनुपादेयत्वमित्यन्यदेतदिति रहस्यम् ।

अत एव अदन्तेषु ऊन धातोर्माधवीयधातुवृत्तौ, "नोनयतिध्वनयति" इति सूत्रे काशिकापदमञ्जर्योश्च औनिनत् इत्यभ्यासे इकारपाठः संगच्छते ।

एतेन तत्सर्वं लिपिप्रमादप्रयुक्तमेव । स्थलान्तरस्थवामनमाधवग्रन्थविरुद्धत्वात् इत्यपि निरस्तम् । भाष्यसंमतार्थसंवादिन इकारपाठस्यैव वामनादितात्पर्यविषयत्वावश्यकत्वेन वैपरीत्यात् ।

नन्वेवम् अकारान्तत्ववैयर्थ्यमिति चेन्न । तद्बलेन वृद्धौ सत्याम् अङ्कापयति आञ्चीकपत् इत्यादिरूपाभ्युपगमात् ।

यदि तु चिति इत्यादाविदित्करणस्य णिज्विकल्पज्ञापकतायाः क्लृप्तत्वात् इहापि तथैवेत्याग्रहस्तथापि न क्षतिः । णिजभावपक्षे अनेकाच्त्वात् आम्, अङ्क्यात् इत्यादौ "अनिदिताम्" इति उपधालोपाप्रवृत्तिरित्यतोऽपि सार्थकतानिर्वाहात् ।

यत्तु अभ्यासे अकारश्रवणार्थतया अदन्तत्वसार्थक्यमिति । तच्चिन्त्यम् । इकारस्यैव तत्र व्यवस्थापितत्वात् ।

अथ सर्वमतेऽप्यभ्यासे जकारश्रवणानुपपत्तिः "पूर्वत्रासिद्धीयमद्विर्वचने"इति ढकारस्यैव सिद्धत्वात् इति चेन्न । तस्यानित्यतया द्युतिशब्द एव तत्प्रवृत्तेरित्यास्तामातिविस्तरः ॥

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य प्रथमे पादे अष्टमाह्निकम् ।

अदर्शनं लोपः ५४ ।

प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् । स्थाने इत्यनुवृत्तेः । न चादर्शनशब्दस्यैवेयं संज्ञा स्यात् इति "लोपो व्योः" इत्यादौ स एवादेशः प्रसज्येतेति वाच्यम् । महासञ्ज्ञासामर्थ्यात् अर्थस्यैव संज्ञित्वात् । न च प्रदेशेष्वेव लौकिकलोपशब्दार्थो विज्ञास्यते पशुरपत्यम् इत्यादाविवेति संज्ञासूत्रमनारभ्यमिति वाच्यम् । प्रसक्तस्येति प्रतियोगिविशेषलाभार्थं तदारम्भात् । अन्यथा दधि मधु इत्यादौ क्विपः स्वाभाविकादर्शनसत्त्वेन लोपसंज्ञायां प्रत्ययलक्षणेन तुक् स्यात् ।

तथा च वार्त्तिकम् ।

"सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात्" इति ।

ननु वार्त्तिकमते तत्सूत्रस्य विध्यर्थत्वात् अस्त्वेवम् । भाष्यमते तु तन्नियमार्थं स्थानिवत्सूत्रेणैव कार्यप्रवृत्तिरिति वक्ष्यते । न चात्र तुकस्तेन प्रसक्तिः । षष्ठीग्रहणस्य तत्रानुवर्तितत्वात् । अत एव ग्रामणीः इत्यादौ अर्थोपपदधातुसन्निधानात् अर्थतः शास्त्रतश्च अण्प्रसङ्गे क्विपो विधानेऽपि वृद्ध्यादिकं न भवति । तस्मादिदं सूत्रं निरर्थकमिति चेत् ।

मैवम् । "चाहलोप एवेत्यवधारणम्" "चादिलोपे विभाषा" इति सूत्रयोश्चादीनामप्रयोगस्यैव लोपपदार्थत्वात्षष्ठीनिर्देशेन लोपविध्यभावाल्लोपसंज्ञाऽनुपपत्तौ 'अयमेवारण्यं गच्छतु' 'अयमेव ग्रामं गच्छतु' इत्यादौ तिङन्तनिघातनिषेधस्य 'शुक्ला व्रीहयो भवन्ति' 'श्वेता गा आज्याय दुहन्ति' इत्यादौ निघातनिषेधविकल्पस्य चानुपपत्तेः । सूत्रारम्भे तु तत्र शास्त्रतो लोकतो वा तदप्रसक्तेर्न दोषः

न च वार्तिकमते ग्रामणीरित्यत्र वृद्धिः स्यादिति वाच्यम्। क्विपा अणः प्रसङ्गापहारात्। विशेषशास्त्रनिर्मुक्ते एव सामान्यशास्त्रस्य प्रवृत्तेः। "सत्सूद्विष" इति क्विपो विषये "कर्मण्यण्" इत्यस्य प्रसक्तेरेवाभावात्।

प्रत्ययस्य लुक्श्लुलुपः ६०।

तन्त्रावृत्त्यादिना तद्भावितानामिमाः संज्ञाः अनेकसंज्ञाविधानसामर्थ्यात्। लुक्श्लुलुप् एतैः शब्दैः कृतं प्रत्ययादर्शनं क्रमेण तत्संज्ञं स्यात्। न चैवं विधिप्रदेशेषु इतरेतराश्रयापत्तिः अदर्शनस्य नित्यत्वेऽपि लुगादिसंज्ञया भावितत्वस्य तदभावेन पूर्ववत् परिहारासम्भवात् इति वाच्यम्। भाविसंज्ञाविज्ञानात्। प्रदेशाश्च "लुक् तद्धित" 'जुहोत्यादिभ्यः श्लुः" "जनपदे लुप्" इत्यादयः। लोपसंज्ञायाश्च नैताभिर्बाधः। एकसंज्ञाधिकारात्। अन्यत्र संज्ञानां समावेशदर्शनात्। अत एव "न लुमताङ्गस्य" इति निषेधः सङ्गच्छते। अन्यथा "प्रत्ययलोपे" इत्यस्य लुगादिविषये प्रसक्तेरेवाभावात्।

स्यादेतत्। प्रत्ययस्येति किमर्थम्। 'न तावदप्रत्ययनिवृत्त्यर्थम्। लुगादिविधौ सर्वत्र प्रत्ययस्यैव स्थानिवत्त्वादप्रसिद्धेः। अनुवादे च तद्भावितस्यैव ग्रहणात्।

ननु "लुक् तद्धितलुकि" इत्यत्र "गोस्त्रियोः" इत्यनुवृत्त्या गोशब्दस्यापि लुगापत्तिः। योगविभागात्। "गोरुपसर्जनस्य" ततः "स्त्रियाः"। "लुक्तद्धित" इत्यत्र "स्त्रियाः" इत्यनुवर्त्तते गोः इति निवृत्तम्। अन्यथा प्रत्ययग्रहणे कृतेऽपि गमेर्डोसूप्रत्ययस्य लुक् स्यात्।

"कंसीयपरशव्ययोः" इत्यत्रापि कंसीयपरशव्ययोः प्रातिप-

दिका[illegible]रस्य लुक् विधीयते । "ङ्याप्प्रातिपदिकात्" इत्यधिकृततत्वात् । अतः प्रकृतिभागस्य न लोपः । अन्यथा "कमेः सः" कंसः परान् शृणाति परशुः इत्युकारसकारयोर्लुगापत्तेः ।

न च "अत्रिभृगुकुत्स" इत्यादौ प्रतियोगिविशेषसमर्पणार्थम् । तत्र "यस्कादिभ्यो गोत्रे" इत्यतो गोत्रपदानुवृत्तेरत्र्यादिगोत्रे यो विहितस्तस्य लुग्विधानात् ।

"जनपदे लुप्" इत्यत्र प्रातिपदिकाधिकारात्प्रत्ययानुवृत्तेश्च जनपदे विहितस्य चातुरर्थिकप्रत्ययस्य लुक् ।

"लवणाल्लुक्" इत्यत्रापि ठक एव, प्रकृतत्वात् "तस्मादित्युत्तरस्य" इति पञ्चम्या प्रत्यय इत्येतस्य षष्ठ्यन्तत्वकल्पनात् ।

ननु "यञञोश्च" "सुपो धातुप्रातिपदिकयोः" इत्यादौ लोपप्रतियोगिप्रत्ययस्यानेकाच्त्वेन "अलोऽन्त्यस्य", "लवणाल्लुक्" इत्यादौ च "आदेः परस्य" इति आदिमात्रस्य लोपो मा भूदिति सर्वादेशार्थं प्रत्ययग्रहणम् ।

मैवम् । लोपे प्रकृते ऽपि "लुग्वादुह" इति लुग्वचनस्य सामान्यापेक्षज्ञापकतया लुमतां सर्वादेशत्वासिद्धेः । न च लोप एव सर्वादेशो लुगादयस्तु "अलोऽन्त्यस्य" इति वैपरीत्यं स्यादिति वाच्यम् । असञ्जातविरोधितया लोपस्यान्त्यादेशत्वसिद्धौ लुगादीनामेव सर्वादेशत्वकल्पनात् ।

मैवम् । "आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्" इत्यत्र "लुगणिञोः" इत्यतो लुग्ग्रहणमनुवर्त्तते न वा ? । नाद्यः । स्थानिनौ द्वौ आदेशास्तु लुका सह त्रय इति यथासंख्यविरहे एकैकस्यादेशत्रयप्रसङ्गात् । ततश्चागस्तयोऽपि कुण्डिनाः स्युः कुण्डिनाश्चागस्तयः । लुक् च ज्ञापकात्सर्वादेश-

स्तदा उभयत्रापि विभक्तिमात्रं श्रूयेत। नान्त्यः। प्रकृते सिद्धेऽपि अगस्तीनां छात्रा आगस्तीया इति प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षितेऽप्यगस्त्यादेशस्य निषेधाभावात् प्रवृत्तावद्धत्वात् छप्रत्ययानुपपत्तेः। इह प्रत्ययग्रहणे तु आगस्त्यकौण्डिन्ययोः प्रत्ययांशस्य लुकि परिशिष्टभागयोर्यथासंख्यमगस्तिकुण्डिनचौ आदेशावित्यगस्तयः कुण्डिना इति च सिद्धम्। प्राग्दीव्यतीयविवक्षायां तु गोत्रे ऽलुगचीति लुक्प्रतिषेधे तत्संनियोगशिष्टागस्तिभावस्यापि निवृत्तावागस्त्येत्यस्य वृद्धत्वात् छे "सूर्यतिष्यागस्त्य" इति यलोपे आगस्तीया इति सिद्धम्। कौण्डिन्ये तूभयथाऽपि न विशेष इति तत्रैव वक्ष्यते। तस्माल्लुगित्यस्य तत्रावश्यमनुवर्त्यतया पूर्वदोषपरिहाराय प्रत्ययग्रहणमत्रावश्यकम्।

भाष्यकृतस्तु "प्रत्ययलोपे" इत्यत्र विशेषणार्थम्, द्वितीयग्रहणमुत्तरार्थम्। तेन समस्तप्रत्ययलोपे एव प्रत्ययलक्षणं न त्वेकदेशलोपे। अन्यथा आघ्नीय, संरायस्पोषेण मीय इत्यत्र परत्वादुपधालोपे पुनः प्रसङ्गविज्ञानादनुनासिकलोपः स्यादित्याहुः

हरदत्तस्तु सर्वादेशार्थमपीदम्, सामान्येन ज्ञापनस्यागतिकगतित्वात् इत्याह इति दिक्।

प्रत्ययलोपे प्रत्ययलक्षणम् ६१।

प्रत्यये लुप्तेऽपि तन्निमित्तकं कार्यं स्यात्। तेन अतृणेट् इत्यत्र तिपो लुप्तत्वेऽपि "तृणह इम्" इति हलादिपित्सार्वधातुकं निमित्तीकृत्य इमागमः। न चात्र "स्थानिवत्" इत्यनेन गतार्थत्वम्। विशेषणत्वेनाप्यलाश्रयणे "अनल्विधौ" इति निषे-

धस्य, स्वीकारात् । वर्णाश्रये प्रत्ययलक्षणं नास्ति इत्यस्य तु नायं विषयः वर्णप्राधान्यमात्रे तत्प्रवृत्तेः । तथा हि प्रकृतसूत्रे प्रत्ययलोपे तल्लक्षणम् इत्येवास्तु, यद्वा द्वितीयभाग एव माऽस्तु, स्थानिवत् इत्यनुवृत्त्या सिद्धेः । तदुपादानसामर्थ्याच्च प्रत्ययमात्रवृत्तिधर्मो यत्र निमित्ततावच्छेदकस्तदेव कार्यं प्रत्ययलोपे भवति न तु गवे हितम् गोहितम् इत्यादाववादेशः, अच्त्वस्य तत्र निमित्ततावच्छेदकस्य प्रत्ययाप्रत्ययसाधारण्यात् । यद्यत्र "नलुमता" इति निषेधः, तथाऽपि सुयशा इत्यत्र विसर्गसुलोपस्य स्थानिवत्त्वे "वा शरि" इति सकारादेशविकल्पस्य, सुवृड् इत्यत्र "खरि च" इति चर्त्वस्य दुर्वारत्वम् । इमागमविधौ तु सार्वधातुकस्य विशेष्यतया तत्त्वस्य प्रत्ययत्वव्याप्यतया तत्प्रवृत्तौ बाधकाभावात् । हलादाविति विशेषणतयैव वर्णस्य तत्राश्रयणात् । एतदर्थस्यैव 'वर्णाश्रये नास्ति' इत्यत्रोपनिबद्धत्वात् । अत एव धिन्विकृण्व्योर्विचि "लोपो व्योः" इति वलोपे तस्यानिमित्तत्वात् वस्तुतो निमित्तत्वस्य प्रत्ययवृत्तित्वेऽपि "न धातुलोपे" इति गुणनिषेधो न प्रवर्तते, आर्द्धधातुकत्वस्य तत्र निमित्ततायामनवच्छेदकत्वात्, वल्त्वस्य च प्रत्ययत्वव्याप्यत्वविरहात् । तेन सुधे, सुधेनौ, सुधेनः, सुकः, सुकर्णौ, सुकर्ण इत्यादि सिद्धम् । "हल्ङ्याब्भ्य" इति सुलोपे पदत्वात् "नलोपः प्रातिपदिकान्तस्य" इति नलोपः ।

एतेन—

सुधे सुधेवारिवधात्सुराणां सुकारणे लाघवतश्च रामः ।
विशेषणे द्वे य इहादिकर्तुर्वदेदधीती स हि कैयटीये ॥

इति व्याख्यातम् ।

धातोर्लोपो यस्मिन्निति बहुव्रीहिणैव सिद्धे आर्द्धधातुक-ग्रहणसामर्थ्यात्तत्त्वेन निमित्तत्वलाभात्। न च 'तोतोर्ति इत्या-दिव्यावृत्त्या चारितार्थ्यम्, यङ्लुकश्छान्दसत्वात्। भाषा-विषयत्वेऽपि आर्द्धधातुकग्रहणस्यावृत्त्या द्वितीयस्य सामर्थ्य-मिति बोध्यम्। "पूर्वस्मिन्योगे यदार्द्धधातुकग्रहणम् तदन-वकाशम्" इति "क्ङिति च" इत्येतत्सूत्रीयभाष्योक्तेश्च अना-स्थामूलकत्वाद् इति।

इदं तु चिन्त्यम्—आर्द्धधातुकग्रहणाल्लोपगुणयोरेकव्य-क्तिनिमित्तकत्वमात्रमिष्यते न त्वार्द्धधातुकत्वावच्छिन्ननिमि-त्तत्वनिरूपितकार्यत्वपर्यन्तम्। लोलुव इत्यादावपि गुणनिषेधा-नुपपत्तेः। "यङोऽचि च" इति लोपे अच्प्रत्ययस्य वस्तुत आ-र्द्धधातुकत्वेऽपि आर्द्धधातुकत्वस्य निमित्ततानवच्छेदकत्वात्। तस्मादार्द्धधातुकत्वव्याप्यधर्मावच्छिन्ननिमित्तत्वनिरूपितकार्य-त्वविवक्षणम्। व्याप्यत्वं च भेदाभेदसाधारणम्। आर्द्ध-धातुकानतिरिक्तवृत्तित्वस्यैव धर्मेऽभिमतत्वात्। प्रकृते तु वल्-त्वस्य आर्द्धधातुकातिरिक्तवृत्तित्वान्न निषेधप्रवृत्तिरिति सुस्थम्।

उक्तभाष्यस्वारस्यादत्र विजेव न भवति। क्विपि तु ऊठि कृते धिनूः, धिन्वौ, धिन्वः, कृणूः कृण्वौ, कृण्व इत्यादि। सुधी, सुधिनौ, सुधिनः, सुकीः, सुकृणौ, सुकृणः इत्यादि तु न भवति इत्याहुः।

'यङ्लुको भाषाविषयत्वे आर्द्धधाकग्रहणस्य तोतोर्ति इत्यादौ चारितार्थ्यादावृत्तौ च मानाभावात् गुणनिषेधे सुधी, सुधिनौ, सुधिनः, सुकीः, सुकीर्णौ, सुकीर्ण इत्यपि भवति' इति दीक्षिताः।

ननु परिवीरित्यत्र क्विपो लोपे तुग्दीर्घयोरनेनैव विधाना-देकलक्षणत्वाद्विप्रतिषेधानुपपत्त्या परत्वाद्दीर्घत्वं न स्यात्। मै-

वम् । व्यपदेशातिदेशो ह्ययम्, ततश्च 'कृत्प्रत्ययः' इत्यादिव्यपदेशे लोपेऽतिदिश्यते, कार्यं तु तन्निबन्धनं तत्तच्छास्त्रैरेव भवति इति विप्रतिषेधसिद्धेः ।

तदुक्तम्—

"सिद्धन्तु स्थानिसंज्ञाऽनुदेशादान्यभाव्यस्य" इति ।

स्वार्थे ष्यङ् । आदेशस्य स्थानिसंज्ञया यो व्यपदेशस्तस्यानेन विधानादित्यर्थः । तस्मादल्विध्यर्थमिदम् इति वार्तिकमतम् ।

भाष्यकृतस्त्वाहुः अतृणेट् इत्यर्थं नेदम् । तत्र हलीत्येतस्य निवृत्तेः । न च तृणहानि इत्यादावतिव्याप्तिः । "नाभ्यस्तस्याचि" इत्यस्माद् 'अचि न' इत्यनुवृत्तेः । न चाशीरित्यत्र "शास इदङ्हलोः" इत्येतदर्थम् । आशासः क्वावुपसंख्यानात्सिद्धेः । तद्धि तवाप्यावश्यकम् । तत्र शासिमात्रग्रहणे आशास्त इत्यादौ माभूदिति नियमार्थम्, अङ्प्रकृतिभूतस्यैव शासः साहचर्यादित्त्वविधौ ग्रहणे तु आशास्ते इत्यादाविव क्विप्यपि तस्याप्रसक्त्या विध्यर्थमिति परं विशेषः । तस्मात्प्रत्ययलोपे प्रत्ययलक्षणमेव कार्यं न तु प्रत्ययाप्रत्ययसाधारणधर्मावच्छिन्ननिमित्तत्वनिरूप्यकार्यत्ववदपि कार्यमिति नियमार्थमिदम् । तेन शोभना दृषदोऽस्य सुदृषत्प्रासाद इत्यत्र सुशब्दात्परस्य मन्नन्तस्यासन्तस्य चोत्तरपदस्य बहुव्रीहावाद्युदात्तत्वं भवतीत्यर्थकेन "सोर्मनसी अलोमोषसी" इति सूत्रेणाद्युदात्तत्वं न प्रवर्तते । किं तु "नञ्सुभ्याम्" इत्यन्तोदात्तत्वमेव । अन्यथा "सुपो धातुप्रातिपदिकयोः" इति जसो लुकि स्थानिवद्भावेनोत्तरस्याऽसन्तत्वानपायात् । उक्तरीत्या तु अस्त्वस्य प्रत्यय-

व्यतिरिक्तवृत्तित्वान्न दोषः। अनिनस्मन्ग्रहणेषु अर्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः। एवं "अत्वसन्तस्य" इति दीर्घोऽपि न भवतीत्यवधेयम्। वार्त्तिकमते तूक्तदोषव्यावृत्त्यर्थं यत्नान्तरारम्भे गौरवमिति।

स्यादेतत्। नियमविधेरितरव्यावृत्तिरेव फलम्। 'व्रीहीनवहन्ति' इत्यादौ ह्येतद्व्यतिरेकेणापि तुषतण्डुलविभागरूपवैतुष्यसाधनत्वेन दलनादिविकल्पितावघातस्य प्राप्त्या तत्साधारणप्राप्तावेव तात्पर्ये विधिवैयर्थ्यम्, अतः पाक्षिकाप्राप्तिव्यवच्छेदे तात्पर्यम्। तेन पाक्षिकप्राप्तिप्रतियोगिनः साधनान्तरस्य निवृत्तिः। न चेदमेव नियमफलम्। अप्राप्तांशप्रापणरूपनियमाभावे तदनुपपत्तेः। तत्सत्त्वे चार्थादेव तत्सिद्धेः। प्रकृतविध्यभावे च स्थानिवद्भावस्य न पाक्षिकी प्राप्तिरिति चेत्।

अत्राहुः—परिसंख्याप्यत्र नियमपदेन व्यवह्रियते। 'पञ्च पञ्चनखा भक्ष्या' इत्यस्य नियमत्वेन भाष्ये लिखितत्वात्। सा च यद्यपि दोषत्रयवती यथाश्रुतार्थत्यागात्, पञ्चातिरिक्ता न भक्ष्या इति परार्थकल्पनात्, प्राप्तपञ्चनखान्यभक्षणबाधाच्च। तथाऽप्यत्र सामान्यशास्त्रस्यापि प्रत्ययलोपस्थलतात्पर्यकत्वे शास्त्रप्राप्तस्यात्यन्तबाधासम्भवात्प्रत्ययत्वव्याप्यधर्मावच्छिन्ननिमित्तताकस्यापि कार्यस्य वचनद्वयप्रामाण्याद्विकल्प एव स्यात्। पञ्चातिरिक्तभक्षणं तु प्रापकप्रमाणस्य रागस्य दौर्बल्याद्बाध्यते इति वैषम्यम्। अतः सामान्यशास्त्रस्योक्तकार्यातिरिक्तविषयकत्वमवश्यं कल्प्यम्। अतः प्राप्तबाधरूपो दोषो नास्ति। तेन प्रत्ययलक्षणस्य तद्भिन्ने, भवतीत्यस्य च न भवतीत्यत्र तात्पर्यात्प्रत्ययलक्षणातिरिक्तं न भवतीत्यर्थः। न च स्थानिवदित्यस्यानेनोपसंहारापत्तिः। तच्छास्त्रवैयर्थ्यापत्तेः। "तं च

तुर्द्धा कृत्वा पुरोडाशं बर्हिषदं करोति" "आग्नेयं चतुर्द्धा करोति" इत्यनयोस्तु परस्परोपसंहाराद्वैषम्यम् । आग्नेयपदं हविरन्तरात्पुरोडाशपदं चान्यदैवत्यपुरोडाशाद्व्यावर्त्यत इति । स्मृतिपुराणादौ त्ववान्तरवक्तृभेदान्न सामान्यशास्त्रवैयर्थ्यम्। अत एव 'न अङ्गुल्या दन्तधावनं कुर्यान्न तर्जन्या' इत्यादावेकवक्तृकवाक्ये नोपसंहारः किं तु दोषाधिक्यकल्पनमेवेति दिक् ।

अथ तथाऽपि पञ्चेत्यत्र प्रत्ययलक्षणेन पदत्वं समासत्वात्प्रातिपदिकत्वम्, "स्नुक्रमोः" इति इट्, "उभयप्राप्तौ कर्मणि" इति षष्ठी इत्यादिग्रन्थानां का गतिः, इतरव्यावृत्तावेव तात्पर्यात् सामान्यशास्त्रस्यैव तद्विधायकत्वात् इति चेत् ।

अत्राहुः—

उभयप्राप्ताविति परिशेषिता षष्ठी इत्यादि व्याख्येयम् न तु विहितेति । अत एव "उभयप्राप्तौ कर्मणीति प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः" इति वार्त्तिककृता तत्सूत्रस्य प्रतिषेधत्वमेवोक्तम् न तु विधित्वम् ।

यद्वा, सामान्यशास्त्रस्य विशेषे तात्पर्याभावस्योभयकल्प्यत्वात् प्रत्ययलक्षणेत्यादिकं यथाश्रुतमेवास्तु। अस्य च प्रयोजनापेक्षायां प्रत्ययलक्षणातिरिक्तकार्यव्यावृत्तिः फलतः सिद्ध्यति ।

यथा "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति प्रत्यक्षाविधिः लिङ्गकल्प्यविध्यपेक्षया पूर्वप्रवृत्तिकत्वात् अपूर्वविधिरेव । तावन्मात्रस्य च लैङ्गिकाविधिनैव सिद्धत्वादेतद्वैयर्थ्यापत्त्या गर्दभाभिधानीव्यावृत्तिः फलं कल्प्यते । तदुक्तम्—

अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः
प्रयोजनं विधेः किं स्यादस्येति तु निरूपणे ॥

न गर्दभाभिधानीतः फलमन्यन्निवर्त्तनात् ।

न चात्र विषयान्तरार्थं स्थानिवत्सूत्रस्यावश्यकत्वान्न प्रत्ययलोपसूत्रस्य तदपेक्षया प्रथमप्रवृत्तिः प्रत्यक्षत्वाविशेषादिति वाच्यम् । तथाऽपि स्थानित्वादेशत्वाभ्यां तत्तत्स्थान्यादेशानामनुगमेऽपि वस्तुतस्तेषां भिन्नत्वात् यावत् प्रत्ययतल्लोपयोरुपस्थित्या सामान्यशास्त्रस्य प्रत्ययलोपपरत्वं लभ्यते तावत् प्रत्ययलोपे प्रत्ययलक्षणमित्यनेन विशेषधर्मप्रकारकबोधजननात्प्रथमप्रवृत्तौ बाधकाभावात् । एतावान्परम् विशेषः—तत्र लैङ्गिकविधिकल्पनमेव प्रतिबध्यते प्रकृते तु सामान्यशास्त्रस्य प्रत्ययलोपविषयकत्वमात्रमिति । अस्मिंस्तु पक्षे पूर्वोक्तग्रन्था यथाश्रुता एव योज्याः । एतेन नियमसूत्राणां निषेधमुखेन विधिमुखेन वा प्रवृत्तिरिति पक्षद्वयं व्याख्यातम् ।

न लुमताऽङ्गस्य ६३ ।

लुमता लुक्श्लुलुपामन्यतमेन शब्देन कृते प्रत्ययादर्शने तन्निमित्तमङ्गकार्यं न स्यात् । गर्गाः, मृष्टः, जुहुतः । यञ्शपोर्लुमता लोपात्तन्निमित्तौ वृद्धिगुणौ न । लुमता किम् । कार्यते, हार्यते । "णेरनिटि" इति णिलोपे ण्यपेक्षा, अमार्ट्, नित्यत्वाद्धल्ङ्यादिलोपेऽपि मृजेर्वृद्धिश्च यथा स्यात् । अङ्गस्येति किम् । पञ्च, सप्त । अत्र प्रत्ययलक्षणेन सुबन्तत्वात्पदसंज्ञा यथा स्यात् । अत्राङ्गशब्दस्य स्वरितत्वादङ्गाधिकारविहितमेव कार्यं निषिध्यत इति वार्त्तिककृत् ।

भाष्यकृतस्त्वाहुः—एवं सति उत्क्रामेत्यत्र "अतो हेः" इति हेर्लुकि "क्रमः परस्मैपदेषु" इति दीर्घः, जिगमिष इत्यत्र "गमेरिट् परस्मैपदेषु" इतीट्, विवृत्सेत्यत्र "न वृद्भ्यश्चतुर्भ्यः"

इतीट्प्रतिषेधश्च न स्यात् । एषामङ्गाधिकारीयत्वात् । अतोऽङ्गाधिकारीयं तद्बहिर्भूतं वा वस्तुतोऽङ्गस्य यत् कार्यं तत्रायं निषेधः । नचाङ्गकार्यमात्रनिषेधेऽप्युक्तदोषतादवस्थ्यम् । लोपप्रतियोगिपरस्मैपदनिरूपिताङ्गसंज्ञायाः क्रमेतिशबन्तमात्रवृत्तित्वात् दीर्घस्य च शब्निरूपिताङ्गत्वशालिनः क्रमेरेव विधानात् । एवमुत्तरद्वयेऽपि ।

तथा च यत्प्रत्ययनिरूपितं यस्याङ्गत्वं तत्प्रत्ययस्य स्थानिवत्त्वमाश्रित्य तन्निमित्तं कार्यं तस्य न भवतीत्यर्थः फलितः ।

अथ पक्षद्वयेऽपि "ञ्नित्यादिर्नित्यम्" "कितः" "पथिमथोः सर्वनामस्थाने" इति विहिताः स्वरा लुकि कृतेऽपि दुर्वाराः । तथा च गर्गाः, विदाः । यञञोर्लुक्" । उष्ट्रग्रीवा । "इवे प्रतिकृतौ" इति कनो "देवपथादिभ्यश्च" इति लुप् । तत्र "ञ्निति" इत्याद्युदात्तं स्यात् । असंज्ञायां चेदम् । संज्ञायां तु "संज्ञायामुपमानम्" इत्याद्युदात्तस्येष्टत्वादिति कैयटः । अत्रेरपत्यान्यत्रयः । "इतश्चानिञ" इति ढक् । तस्य "आत्रिभृगुकुत्स" इति लुक् । तत्र कितस्ताद्धितस्येत्यन्तोदात्तत्वं स्यात् । प्रत्ययग्रहणपरिभाषया तद्धितान्तस्य तद्विधानात् । न च फिट्स्वरेण तत्रान्तोदात्तत्वं दुर्वारम् । "राशदिभ्यां त्रिप्" "अदेस्त्रिनिश्च" इत्युणादिसूत्रेणात्रिः अत्री इति च रूपद्वयसिद्धेः । तत्र प्रत्ययस्य पित्त्वादनुदात्तत्वे शेषनिघातेन इकारान्तस्यात्रिशब्दस्याद्युदात्तत्वम् । नान्तस्य नित्स्वरेणान्तोदात्तत्वमित्यभ्युपगमात् । "अत्रेरिव शृणुतम्" इत्यत्र, "अत्रीणां स्तोममद्रिवः" इति लुकि चाद्युदात्तप्रयोगात् । "दूरे वा ये अन्ति वा केचिदत्रिण" इत्यन्तोदात्तप्रयोगाच्च । पन्थाः प्रियो यस्य स पथिप्रियः । "सुपो धातु" इति लुकि पथिमथोरित्याद्युदात्तत्वं च स्यात् । एषामङ्गाधिकारीयत्वाभावात् ।

वस्तुतोऽङ्गकार्यत्वाभावाच्च "सुप्तिङन्तम्" इति पदसंज्ञाया इव उक्तस्वराणां प्रत्ययान्तकार्यत्वाभावात् । अङ्गत्वस्य तु प्रत्ययान्तावधिकपूर्वभागमात्रवृत्तित्वात् ।

ननु "कित" इति माऽस्त्वङ्गकार्यम्, इतरद् द्वयं तु सप्तमीनिर्देशाद्वस्तुतोऽङ्गस्य कार्यं भवत्येवेति भाष्यमते कथं तत्प्रसक्तिरिति चेन्न । सौवर्यः सप्तम्यस्तदन्तसप्तम्य इति स्वीकारात् ञ्निदन्तस्यादेरुदात्त इत्यर्थात् । तत्र च ज्ञापकं "भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति" इति पूर्वग्रहणम् । अन्यथा पिति परे विधीयमानस्य पूर्वकार्यत्वसिद्ध्या तद्वैयर्थ्यात् । अत एव "उपोत्तमं रिति" इति उदात्तत्वम् 'आहवनीय' इत्यादौ रिदन्तस्योपोत्तमे प्रत्ययस्यैव ईकारे प्रवर्त्तते नतु प्रकृतिभागस्योपोत्तमे हकाराकारे ।

एवं "चङ्यन्यतरस्याम्"इत्यपि चङन्त । एवेति सिद्धान्तः । न चैवं "चतुरः शसि" इत्युदात्तत्वं शसन्तस्यैव स्यात् । तथा च "षट्त्रिंशांश्च चतुरः कल्पयन्त" इति मध्योदात्तपाठविरोध इति वाच्यम् । शस्ग्रहणसामर्थ्यात्तदन्तबाधात् । अन्यथा "ऊडिदम्पदादि"इति सूत्र एव चतुर्शब्दं ब्रूयात् । तत्रासर्वनामस्थानग्रहणानुवृत्त्याऽनतिप्रसङ्गात् । न च आभ्यामित्यादौ तद्दोषः । "षट्त्रिचतुर्भ्यो हलादिः" इति तत्रोदात्तत्वस्यैव सिद्धान्तेऽपीष्टत्वात् । न चैवं स्वरविधौ षष्ठीनिर्देशस्यैवापत्तिः, रित इत्यादावर्द्धमात्राधिक्यादिति प्राप्ते वार्तिकम्—

"लुमति प्रतिषेधे एकस्वरस्योपसंख्यानं, सर्वामन्त्रितसिज्लुक्स्वरवर्जं, प्रयोजनं ञ्नितिकिल्लुक्स्वराः, पथिमथोः सर्वनामस्थाने लुक्" इति ।

अयमर्थः—प्रत्ययलक्षणेन प्राप्तोऽप्येकपदस्वरो न भवति। "सर्वामन्त्रितसिज्लुक्स्वरवर्जम्" इति वचनमारभ्यमित्यर्थः। पदद्वयाश्रयस्तु भवत्येव। यथा दधि तिष्ठतीत्यत्र "पदस्य" "पदात्" इत्यधिकारीयः "तिङ्ङतिङः" इति निघातः। दधीत्यस्य पदसंज्ञार्थं प्रत्ययलक्षणस्यापेक्ष्यत्वात्। एवम् 'इह तिष्ठ' इत्यादि बोध्यम्। सर्वादिपर्युदासः किम्। 'सर्वस्तोमोऽतिरात्रः' इत्यत्र "सर्वस्य सुपि" इत्याद्युदात्तत्वम्, 'सर्पिरागच्छ' 'सप्त आगच्छत' इत्यत्र "आमन्त्रितस्य च" इति षाष्ठाद्युदात्तत्वम्, 'मा हि दाताम्' इत्यत्र "आदिः सिचोऽन्यतरस्याम्" इत्याद्युदात्तत्वं च यथा स्यात्। नचाद्ये "बहुव्रीहौ प्रकृत्या" इत्यत एव सिद्धम् "स्वाङ्गशिटामदन्तानाम्" इति सर्वशब्दस्याद्युदात्तत्वादिति वाच्यम्। "सर्वस्य सुपि" इत्यस्य प्रवृत्तिं विना "बहुव्रीहौ" इत्यस्य प्रवर्त्तयितुमशक्यत्वात्। तद्विहितस्यैवाद्युदात्तस्य "बहुव्रीहौ प्रकृत्या" इत्यनेन व्यवस्थाप्यत्वात्। सर्पिःशब्दस्यापि व्युत्पत्तिपक्षे प्रत्ययस्वरेण, अव्युत्पत्तिपक्षेऽपि फिट्स्वरेणान्तोदात्तत्वात्। "नाब्विषयस्य" इत्याद्युदात्तस्य न प्रवृत्तिः। "अनिसन्तस्य" इति पर्युदासात्। 'घृतादिपाठादन्तोदात्तत्वम्' इति कैयटः। तत्तु अव्युत्पत्तिपक्षाभिप्रायम्।

ननु सप्तशब्दः "सप्यशूभ्यां तुट् च" इति कनिनन्तत्वात् आद्युदात्तः, अव्युत्पत्तिपक्षेऽपि "न्नः संख्यायाः" इति तथैवेति चेन्न। घृतादित्वात् अन्तोदात्तत्वात्। सप्त युञ्जति रथमेकचक्रमिति तत्प्रयोगाच्च। तस्मात्स्वरत्रयानिवृत्तिः प्रयोजनमित्यर्थः। "गातिस्था" इत्यत्र सिज्ग्रहणसामर्थ्यात् तल्लुकि स्वरासिद्धिः। अन्यथा च्लेरेव लुकं विदध्यात् अभूत्, अपात् इत्यादिसिद्धये। "अस्तिसिचो" इत्यत्र सकारान्तरप्रश्लेषस्याप्येवं परि-

त्यागसम्भवात् ।

न चैवम् "आतः" इति सूत्रं विध्यर्थमेव स्यात् न तु नियमार्थम्, तथा च लटो निवृत्तये च्लिलुकीति वक्तव्यत्वापत्त्या गौरवं विपरीतमिति वाच्यम् । "ङितः" इत्यनुवृत्त्यैव लटो निवृत्तेः । तस्मात्सिज्लुक्स्वरस्योक्तपर्युदासे भेदप्रतियोगित्वेन निवेशो न कार्य इति । षष्ठे तु ज्ञापकेन समाहितम् । तथा च "संज्ञायामुपमानम्" इति सूत्रे वार्तिकम्—

"उपमानस्याद्युदात्तत्ववचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्य" इति ।

अन्यथा चञ्चेव चञ्चा, वध्रिकेव वध्रिका । संज्ञार्थस्य कनो "लुम्मनुष्ये" इति लुप् । तत्र प्रत्ययलक्षणेन नित्स्वरेणैव तत्सिद्धेरित्याद्युदात्तवचनमुक्तार्थज्ञापकमेव । न च "न लुमताऽङ्गस्य" इति प्रतिषेधः । अङ्गाधिकारबहिर्भावात् । निदन्तस्यादेरित्यर्थाद्, वस्तुतोऽङ्गकार्यत्वाभावाच्च । "पथिमथोः" इति स्वरप्रतिषेधवचनं तु कर्त्तव्यमेव । तस्यानुबन्धलक्षणत्वाभावात् उक्तज्ञापकेन दुर्वारत्वात् । न च ज्ञापकस्य स्वरमात्रविषयकत्वं कल्प्यम् । आमन्त्रितसिज्लुक्स्वरयोरसिद्धिप्रसङ्गात् । न च सप्तमीनिर्दिष्टे स्वरे प्रत्ययलक्षणप्रतिषेधो ज्ञाप्यः । 'सर्वस्तोमः' इत्याद्युदात्तानुपपत्तेः ।

यद्वा सप्तमीऽनिर्दिष्टस्वरे प्रत्ययलक्षणं न भवतीति ज्ञाप्यम् । "सर्वस्य सुपि" इत्यत्र सप्तमीमपनीय सुप इति षष्ठ्यन्तं पाठ्यम् ।

अत्र वदन्ति । ज्ञापकं द्वेधा सामान्यापेक्षं विशेषापेक्षं च । यदि "भीह्री" इत्यत्र पूर्वग्रहणेन सप्तम्यर्थपक्षे तदन्तग्रहणपक्षे च यत्र फलभेदस्तत्रैव "सौवर्यः सप्तम्यस्तदन्तसप्तम्य" इति ज्ञाप्यते । तत्र हि पूर्वग्रहणाभावे तदन्त एवोदात्तः स्यात् । सप्तम्याश्रयणे तु पितं विहाय भीप्रभृतीनामेवोदात्त इति फले भेदः ।

परे।

एवं "उपोत्तमं रिति" "चङ्यन्यतरस्याम्" इत्यादौ बो॰ ग्यम् । "ञ्नित्यादिर्नित्यम्" "पथिमथोः सर्वनामस्थाने" इत्यादौ तूभयथाऽपि प्रकृत्यादेरेवोदात्तत्वमिति न कश्चिद्भेदः। अतो नात्र तदन्तसप्तमीत्वम्। अतो वस्तुतोऽङ्गस्य कार्यं भवत्येवेति "न लुमताऽङ्गस्य" इति प्रतिषेधप्रवृत्त्या न चित्स्वराद्यापत्तिरिति। प्रकृतसूत्रस्थभाष्यकैयटस्वरसोऽप्येवम् । षाष्ठतद्ग्रन्थास्तु सामान्यापेक्षज्ञापकाभिप्रायां इति दिक् ।

'अत्रय' इत्यत्रापि नोक्तस्वरापत्तिः, तद्धितस्यैव कितोऽन्तोदात्तविधानात् । अत्र च तस्य लुप्तत्वात्। प्रत्ययलक्षणस्यान्यदीयकार्यस्यैव प्रत्ययलोपेऽपि विधानात्। प्रत्ययस्य तु यत्कार्यं तस्य तल्लोपेऽनुपपत्तेः । एकनिरूपितयोर्निमित्तत्वकार्यित्वयोरेकस्मिन्नसम्भवात् । न च तदपि प्रत्ययान्तस्यैव कार्यमिति वाच्यम्। न हि प्रत्ययग्रहणे तदन्तस्येति स्वतन्त्रं वचनम् किं तु विशेषणं तदन्तस्य संज्ञेत्येतदर्थमूलकम्। विशेषणविशेष्यभावे च कामचारात् तत्र प्रत्ययस्य विशेषणत्वानङ्गीकारात् । लोपस्याभावरूपतया अन्तस्य तदुदात्तस्य च बाधात्स्थानित्वसूत्रस्याप्यप्रवृत्तेः। 'राजपुरुष' इत्यादावपि नाल्लोपः। वस्तुतो यदङ्गमिति व्याख्यानाद्भसंज्ञानिषेधात् सुबन्तत्वप्रवृत्तपदसंज्ञया च नकारस्य लोपात्। 'अहर्ददाति' इत्यत्र रेफोऽपि सिद्धः। "असुपि" इति निषेधस्य वस्तुतोऽङ्गकार्यत्वेन सुब्लुक्यप्रवृत्तेः। न च वार्त्तिकमते दोषो दुर्वारः। 'अह्नो रविधौ' इति वचनारम्भात्। न च "असुपि" इति वचनस्य सामर्थ्यात्प्रत्ययलक्षणं नास्तीति वाच्यम्। 'दीर्घाहा निदाघः' इति हल्ङ्यादिलोपेऽपि रेफापत्तेः। एतेन "असुपि" इति पर्युदासः, 'अहर्ददाति' इत्यत्र दाधातोः सुब्भिन्नस्य सत्त्वात् रेफ इति परास्तम्।

न च रुत्वरत्वयोरसिद्धतया दुर्बलत्वात्पूर्वं नलोपात् अकारस्यैव रुत्वरत्वयोरापत्तिः । तदुभयारम्भसामर्थ्यात् तद्विषये नलोपविरहात् । अकारस्य रेफे रुत्वे वा विशेषाभावात् । न च 'अहर्गच्छ' 'हे दीर्घाहो निदाघ' इत्यत्र तदारम्भः चरितार्थः, तत्र नलोपनिषेधादिति वाच्यम् । तथा ऽपि "रूपरात्रि" इति रुत्ववैयर्थ्यात् । न चैतदपि सम्बुद्धौ चरितार्थम् । "अहन्" इत्यावर्त्य एकेन नलोपाभावो निरूप्यते, द्वितीयेन च रुत्वं विधीयते इति व्याख्यानात् ।

स्यादेतत् । परमवाचा, परमगोदुहा, परमलिहा, परमदण्डिना, परमदिवा, परमकुमार्या, इत्यत्रान्तर्वर्तिविभक्तिनिबन्धनायाम् उत्तरपदस्य पदसंज्ञायां "चोः कुः" "दादेर्धातोर्घः" "होढः" "न लोपः प्रातिपदिकान्तस्य" "दिव उत्" "इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च" इत्येतेषां प्रवृत्तिः स्यात् । न च भसंज्ञया बाधः । भिन्नावधिकत्वात् । समस्तपदस्य भसंज्ञा उत्तरपदमात्रस्य तु पदसंज्ञेति । अत्र भाष्यम्—भसंज्ञायां सुबन्तमित्यनुवर्त्यम् । तथा च यजादावसर्वनामस्थाने परे यस्मात्प्रत्ययविधिस्तथाभूतः पूर्वसमुदायो भसंज्ञः, तदवयवसुबन्तसद्भावे तु तदपि भसंज्ञं भवतीत्यर्थः । प्रधानशिष्टा च भसंज्ञा राज्ञ इत्यादौ सुबन्तावयवाभावेऽपि प्रवर्त्तत एव, "कर्त्तुः क्यङ् सलोपश्च" इति हंसायते इत्यादाविव ।

नचैवमपि सर्वनामस्थाने दोषो दुर्वारः तत्र "असर्वनामस्थाने" इति पदत्वनिषेधात् । तत्रापि-सुबन्तमित्यनुवृत्तेः प्रतिषेधसामर्थ्याच्च "अनन्तरस्य विधिर्वा" इत्यस्य न प्रवृत्तिः । "सर्वनामस्थाने परे पूर्वसमुदायस्तदवयवभूतं सुबन्तं च पदसंज्ञं नेति तदर्थः । समुदायस्य "स्वादिषु" इति, अवयवस्य तु सुबन्तमिति

प्राप्तौ ः पदसंज्ञाया निषेधात् 'परमवाचौ' इत्यादि सिद्धम् । न चैवं 'सुवाक्' 'सुराजा' इत्यादौ कुत्वनलोपादिकं न स्यात्, समुदायावयवयोर्द्वयोरप्युक्तरीत्या पदसंज्ञानिषेधात् इति वाच्यम् । "असर्वनामस्थाने" इत्यत्र "यचि भम्" इति सूत्रात् यचीत्यपकृष्य अजादौ सर्वनामस्थाने पदत्वनिषेधात् सौ पदसंज्ञासद्भावात् । न चैवं श्रूयमाणेऽपि सौ पूर्वस्य पदसंज्ञापत्तिः । इष्टत्वात् । तस्मात्समासचरमभागस्याजादौ सुपि न क्वचित्पदसंज्ञेति सिद्धम् ।

न चैवं 'दूरान्मुक्तः' इत्यादावलुक्, 'होतापोतारौ' इत्यादावनङ् च न स्यात् उत्तरपदे तद्विधानादिति वाच्यम् । उत्तरपदशब्दस्य समासचरमावयवे रूढतया तत्र पदसंज्ञाऽनपेक्षणात् । न चैवमपि 'दधिसेचौ' इत्यादौ "सात्पदाद्योः" इति षत्वनिषेधो न स्यादिति वाच्यम् । पदादादिः पदादिरिति व्याख्यानात् । पदोत्तरत्वे सति शब्दान्तरस्यादिरिति यावत् । न च रामेषु इत्यादावपि निषेधापत्तिः । "स्वादिषु" इति या पदसंज्ञा तामादायोक्तनिषेधस्याप्रवृत्तेः । तत्र च सातिग्रहणस्यैव ज्ञापकत्वात् । युक्तं चेदम् । पदस्यादिरिति व्याख्याने 'दधिसेचौ' इत्यादौ षत्वस्य दुर्वारत्वात् । "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति वक्ष्यमाणत्वात् । न च बहुसेचौ इत्यादौ षत्वापत्तिः बहुचः प्रत्ययत्वेनापदत्वादिति वाच्यम् । बहुचः परस्य नेति वचनस्यारभ्यत्वात् । तथा हि पदात् इत्येव वाच्यम् । पदात्परस्य सस्य षत्वं न स्यादित्यर्थः । आदिपदस्थाने च बहुच् प्रक्षेप्यः बहुचः परस्य सस्य न षत्वमिति । वार्तिककृता तु 'परमवाचा' इत्यादिसाधनाय बहुवचनमेवारब्धम् । तदाह—

"उत्तरपदत्वे चापदादिविधौ" इति ।

उत्तरेत्यनेनोत्तरपदं गृह्यते । तस्य पदत्वे इति समासस्य-समासचरमावयवस्य पदसंज्ञायां कर्त्तव्यायां लुमता लुप्ते प्रत्यय-लक्षणं न भवति । 'दधिसेचौ' इत्यादावपि पदसंज्ञानिषेधवारणाय अपदादिविधाविति । पदादिविधौ तु कर्त्तव्ये भवत्येव प्रत्ययलक्षणमित्यर्थः । एवं च प्राक् सुबुत्पत्तेः समासोऽत्र नाभिधेयः । 'धनक्रीता' इत्यादिसिद्धये तदनित्यत्वस्वीकारात् ।

कैयटस्तु नायमुपपदसमासः किं तु 'दध्नः सेचौ' इति षष्ठीसमासः, अनभिधानाच्च सोपपदान्न विच्, अतो 'दधिसेचौ' इत्यादेः नापत्तिरित्याह । एवमपि "बहुच्पूर्वस्य च" इति वचनं कार्यमेव, बहुचि कृते विशिष्टस्यार्थवत्त्वात्प्रातिपदिकत्वात्सुपो लुकि पुनर्विशिष्टात्सुबन्तरोत्पत्तेर्वक्ष्यमाणत्वात् अन्तर्वर्तिविभक्त्या पदसंज्ञामाश्रित्य कुत्वं मा भूत् इति ।

अत्र वदन्ति—"प्रत्ययलोप"इति सूत्र एव 'उत्तरपदत्वे च पदादिविधौ''बहुच्पूर्वस्य'इति पठनीयम् । पदादिविधावेव प्रत्ययलक्षणं न तु पदान्तविधौ इति नियमार्थं चेदं वाक्यद्वयम् । एवं च नञ्परित्यागाल्लाघवम् । एवं च सावपि पदम् इत्यपि नास्ति । पूर्वोक्तप्रकारस्यानादरणात् । अत एव हल्ङ्यादिसूत्रे भाष्यम्—'अथ सावपि पदं भवति । एवमप्युभयतः स्पाशा रज्जुः' इति । 'अभूवन्' इत्यत्र जुस् न भवति । आत इत्यस्य नियमार्थत्वात् । न च देवदत्तं याजयाञ्चकार इत्यत्र लुकं बाधित्वा परत्वात् तिबादिषु "आमः" इति तेषां लुकि प्रत्ययलक्षणेन तिङन्तत्वात् आमन्तस्य निघातस्ततः परस्य निघातनिषेधश्च स्यादिति वाच्यम् । येननाप्राप्तिन्यायेन लावस्थायामेव तिबादीन् बाधित्वा लुक्प्रवृत्तेः । तदुक्तम्—

परे आमि लिलोपात् तस्य चानिघातस्तस्माच्च निघात' इति । न च देवदत्तो युष्मत्पुत्र इत्यादौ षष्ठ्यन्तस्य विहिता युष्मदोरादेशाः स्युरिति वाच्यम् । स्थग्रहणेन श्रूयमाणायां विभक्तावेव तद्विधानात् । "समये तिष्ठ सुग्रीव" इत्यादौ समयं मा हासीरित्यर्थावगमात् तिष्ठतेरहानौ वृत्तेः । न च विभक्तिविशिष्टयोरेव वस्नसादि न तु प्रकृतिभागमात्रस्येत्यर्थं स्थग्रहणमिति वाच्यम् । षष्ठीचतुर्थीद्वितीयानामिति निर्देशेनापि तत्सिद्धेः ।

अथ "चिणो लुक्" इति तलोपे कृते 'अवधि भवता दस्युः' 'अगायि भवता ग्रामः' 'अध्यगायि भवता अनुवाकः,' इत्यादौ "हनो वध लिङि" "लुङि च", "इणो गा लुङि", "इङश्च" । "विभाषा लुङ्लृङोः" इति हानिणिङादेशा न स्युरिति चेन्न । लुङि यदार्द्धधातुकं तस्मिन्विषये तेषां विधानात् लादेशात्प्रागेव तेषां प्रवृत्तेः । तस्माद्वस्तुतोऽङ्गस्य कार्यं न भवतीति सिद्धान्तः ।

अचोऽन्त्यादि टि ६४ ।

निर्द्धारणे षष्ठी । जातावेकवचनम् । अचां मध्ये योऽन्त्योऽच् तदादि शब्दस्वरूपं टिसंज्ञम् । प्रदेशाः "टित आत्मनेपदानाम्" इत्यादयः । अन्त्य आदिर्यस्येति बहुव्रीहिः । नित्यसापेक्षत्वात्समासः । यत्र तु हलन्तस्तत्र तद्विशिष्टस्यैव संज्ञा । तेन कुरुते इत्यादावकारस्य, कुर्वाते इत्यादौ च आकारमकारयोरेत्वम् ।

अलोऽन्त्यात्पूर्व उपधा ६५ ।

अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः । "पुगन्तलघू-

पधस्य च" इति इकारस्य गुणः । ननु पूर्वस्यावधेः छिन्नस्यैवोपादानात् शास इत्यत्र शकाराकारसमुदायस्य उपधासंज्ञा स्यात् । समुदायावयवसान्निधौ एकाज्द्विर्वचनन्यायेन समुदायस्यैव कार्यित्वात् । तथा च "शास इदङ्हलोः" इतीत्त्वं समुदायस्यैव स्यात् इति चेन्न । पूर्वपदस्योत्सर्गतोऽव्यवहितपूर्वपरत्वात् । समुदायसंज्ञायामपि "अलोऽन्त्यस्य" इति परिभाषया ऽनतिप्रसङ्गाच्च ।

अथ "नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे" इति प्रतिषेधः स्यात्, शब्दस्यावृत्तिर्न तु अर्थस्येत्यभ्यासस्यानर्थकत्वात् "भृञामित्"इत्यादेः सर्वादेशत्ववारणाय अनभ्यासेत्युक्तम् । विकारश्च भावात्मक एव, तेन देहि इत्यत्र अभ्यासलोपः सर्वादेश एवेति । मैवम् । "तस्य लोप" इति सूत्रे ञिटुडूनां सर्वलोपार्थं "तस्य" इति पदोपादानादेतस्याः सूत्रानभिमतत्वात् । भाष्यकृताऽपि तत्प्रयोजनानामन्यथोपपादितत्वात् । तथा हि "अव्यक्तानुकारणस्य" इति पररूपं तावदन्त्यस्य न भवति । "नामेडितस्यान्त्यस्य तु वा" इति ज्ञापकात् । अन्यथाऽऽम्रेडितस्य वेत्येव ब्रूयात् । "ध्वसोरेद्धौ" इत्यत्रापि लोपग्रहणानुवृत्तावपि पुनर्लोपग्रहणसामर्थ्यात् सर्वादेशः । तथाचैवं सूत्ररचना "घोरभ्यासस्य लोपोहौ" । व्याख्यातम् । "असेश्चैत्" अस्तेर्घोश्च एद्भवति हौ परे इत्यर्थः ।

यद्वा लोपस्श् इति छेदः । संज्ञायां शकारानुबन्धस्य प्रयोजनाभावादादेशे संज्ञिनि सर्वादेशत्वप्रवृत्तिः । "द्विशकारको निर्देश" इति भाष्यम् । तत्र लोप इति भिन्नं पदम् । लोपशब्दस्य कृदन्तस्य संज्ञिनाऽर्थेनार्थवत्त्वाद्विभक्तौ कृतायां शकारः प्रतिनिर्दिश्यते । तस्य चोपदेश एव इत्सञ्ज्ञायां सर्वादेशो लोपः सम्पद्यते । न च

परे यः संयोगस्तदादित्वात्सोर्लोपे एकशकारकपाठेनैव सिद्धे इति वाच्यम् । स्पष्टार्थं न तल्लोप इति भावात् । अत एव "अन उपधालोपिनः" इत्यादावल्लोपो न कृतः ।

यद्वा "झलो झलि" इतिवत् निमित्तकार्यिणोरेकपदस्थत्व एव "स्कोः" इत्यस्य प्रवृत्तिः । न च 'आभ्याम्' इत्यादौ "हलि लोप" इति अककारस्य इदम इदो विहितस्य लोपस्यान्त्यप्रतियोगिकत्वापत्तिर्दुर्वारेति वाच्यम् । "अनाप्यकः" इत्यस्मात् 'अन्' इत्यनुवृत्त्या हलीति सप्तम्या अन् इत्यत्र षष्ठीं प्रकल्प्य अन एव लोपविधानात्, अलोऽन्त्यपरिभाषया नकारमात्रस्य लोपे "अतो गुणे" इति पररूपे च 'आभ्याम्' इति सिद्धेः । न च तथापि "अत्र लोपो ऽभ्यासस्य" इत्यत्रान्त्यादेशत्वप्रसङ्गतादवस्थ्यम् । अत्राभ्यासत्वाश्रये लोपो, न तु तदेकदेशे इति व्याख्यानात् ।

ननु ददौ, दधौ इत्यादिवारणाय सनीत्यस्य, जिज्ञपयिषति इत्यादिवारणाय सादाविति सन्विशेषणस्य, यियक्षति इति वारणाय मीमेत्यादिप्रकृतिविशेषाणाम्, "मुचोऽकर्मकस्य गुणो वा" इति मुमुक्षति गाम् इत्यादिवारणाय विषयविशेषस्य च लाभार्थमेवात्रग्रहणमिति चेन्न । अनुवृत्त्यैवैषां सिद्धेः ।

न च तथाऽपि "विभाषा भवद्भगवदघवतामोच्चावस्य" इति वार्तिकेन विहित ओकारो वकारमात्रस्य स्यात् इति वाच्यम् । वस्येत्यपहाय अवस्येति निर्देशसामर्थ्यात्सर्वादेशत्वसिद्धेः ।

तस्मात्समुदायसंज्ञायामपि न दोषः । संयोगोपधत्वादिव्यवहारोऽप्यत्र सङ्गच्छते ।

पक्षान्तरे त्ववयवधर्मस्य समुदाये समारोपो बोध्यः ।

यद्वा, अल इति जसन्तम् । न च पूर्व इत्येकवचनान्तेन सा-

मानाधिकरण्यानुपपत्तिः। पूर्वे इति जसन्तस्यैव छेदात्। न्त्य-
स्यालत्वलाभस्त्वार्थः।

यद्वा, अल इति निर्धारणे षष्ठी। जातावेकवचनम्। अ र्ला
मध्येऽन्त्यात्पूर्वोऽल् इत्यर्थः॥

तस्मिन्निति निर्दिष्टे पूर्वस्य६६।

सप्तमीनिर्देशे पूर्वस्यैव कार्यं स्यात्तच्च निर्दिष्टे अव्यवहितो-
च्चारिते। निश्शब्देन नैरन्तर्यस्य दिशिना चोच्चारणस्य लाभा-
त्। नियमार्थं चेदम्। "इको यणचि" इत्यादीनामनियतप्र-
वृत्तिप्रसञ्जको यस्तर्कितोऽभावस्तत्प्रतियोगित्वात्। यदीदं वचनं
न स्यात् तर्हि पूर्वस्य परस्य समीपस्यानन्तरस्य व्यवहितस्याव्य-
वहितस्य वा इको विनिगमकाभावात् यणादेशः स्यात्। सति त्व-
स्मिन्पूर्व एव विश्राम्यतीति। "इको यणचि" इत्यत्र हि भावल-
क्षणा सप्तमी। अचि सतीत्यर्थः। सत्त्वं च पूर्वपरोभयसाधारणम्।
एवमुपश्लेषोऽपि। तथाच कार्यप्रतियोगित्वनिमित्तत्वयोरेकत्र
युगपदसम्भवात् 'दध्युदकम्' इत्यादौ पर्यायेण द्वयोर्यण् स्यात्
अतः पूर्वस्यैवेति नियम्यते 'अग्निचित्' इत्यत्र व्यवहितपूर्वेऽपि
प्राप्तस्त्वव्यवहितस्यैवेति।

यत्तु सत्सप्तम्यां "तस्मिन्"इति परिभाषा नोपतिष्ठते इति
"श्नान्नलोपः" इति सूत्रे भाष्यकैयटयोरुक्तम्। तत् पूर्वपक्षिणः
प्रौढिवादमात्रम्।

ननु तस्मिन्निति शब्दो यत्र निर्दिश्यते यथा—"तास्मि-
न्नाणि च युष्माकास्माकौ", तत्रैवायं प्रवर्त्तेत। 'गवित्ययमाह'
इत्यादौ इतिशब्देन शब्दस्वरूपस्यैव बोधात्। न च तत्र प्रयो-
जनाभावः। हे यौष्माकीण अस्मभ्यं देहि, हे आस्माक युष्म-

ऽयं दा मि' इत्यादौ खञणूभ्यां परस्यादेशव्याप्तेः फलत्वात् । नैवम्, लोके शब्दस्यार्थपरत्वात् इतिना शब्दपरत्वकल्पनात्, व्याकरणे तु शब्दपरत्वात् इतिनाऽर्थपरत्वसिद्धेः । इतिकरणस्य पदार्थविपर्यासकरत्वात् । तत्रैव पूर्वशब्दोच्चारणापत्तेश्च । एतत्सूत्रारम्भापेक्षया लाघवात् । तस्मात्सप्तम्यन्तानुकरणमेव तस्मिन्निति । सर्वनाम्ना अचि हलीति विशेषणानां संग्रहात्, "तस्यापत्यम्" इत्यादिवत् ॥

तस्मादित्युत्तरस्य ६७ ।

पञ्चमीनिर्देशे उत्तरस्यैव कार्यं स्यात् तच्चाव्यवहितस्य । तेन "तिङ्ङतिङः" इति निघातः 'अग्निमीळे' इत्यत्रैव न त्वीळेऽग्निमित्यत्रापि ।

दिग्योगलक्षणा चेयम् । कारकविभक्तेरसम्भवात् । तथाचोत्तरशब्दवत्पूर्वशब्दस्याप्यध्याहारापत्तेः व्यवहितस्याप्युत्तरस्य कार्यप्रसङ्गाच्च नियमार्थमिदम् । तेन 'उत्थानम्' इत्यत्र "उदः स्थास्तम्भोः" इत्यस्य न प्रसङ्गः ।

यद्वार्त्तिकम्—

"तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थं वचनं दध्युदकं, पचत्योदनम्" इति ।

इहापि तस्मादिति पञ्चम्यन्तानामनुकरणम् न तु यत्र तस्मादिति शब्दस्तत्रैतदुपस्थित्यर्थम्, पूर्वोक्तयुक्तेः ।

नन्वत्र प्रयोजनाभावादेव शङ्काऽनुदयः । " तस्मान्नुड् द्विहलः " " अत आदेः " इति दीर्घादकारात्पूर्वस्याङ्गस्यासम्भवात् । "तस्माच्छसो नः पुंसि" इत्यत्रापि वृक्षान् इत्यादौ पूर्वसवर्णदीर्घात् पूर्वस्य षकारस्य नत्वापत्तेः षष्ठी-

निर्दिष्टस्य शसो नत्वमिति व्याख्यानेन वारणात् ।

अत्राहुः—उच्चरत आलुपलभत इति प्रयोजनम्, दीर्घीभूतादाकारात्पूर्वस्योच्चरच्छब्दप्रकृतिकस्य शसो नत्वं मा भूदित्युक्तिसम्भवसत्त्वात् ।

एवम् "तस्मान्नुडाचि" इत्यत्रापि अनश्व इत्यादौ लुप्तनकारान्नञः पूर्वं नुडागमो मा भूदिति योजनीयम् ।

इह सूत्रद्वये षष्ठीप्रक्लृप्तिपक्षोऽपि भाष्ये उक्तः । स यथा—"षष्ठी स्थानेयोगा" इति सूत्रादिह षष्ठीत्यनुवृत्त्या सत्यप्यर्थनिर्देशे ऽव्यवहितस्य पूर्वस्य षष्ठी, पञ्चम्यर्थनिर्देशे तादृशस्योत्तरस्य षष्ठी स्यादित्यर्थः । इक इत्यादौ षष्ठ्याः सत्त्वात्तदनुवादेन पूर्वस्यैषा, न तूत्तरस्य न वा पूर्वस्यापि व्यवहितस्येत्येतदेव बोध्यते । "आने मुक्" इत्यादौ तु षष्ठ्यपि प्रकल्प्यते । अन्यत्पूर्ववत् । सा चानियतयोगात्स्थानषष्ठी । यदुत्तरं स्थानषष्ठी तस्यैव च कार्यनियमोऽर्थात्सिद्धः । यत्र तूभयनिर्देशस्तत्रोभयोर्न प्रकल्पकत्वम् । कार्यित्वनिमित्तत्वयोर्युगपदेकस्मिन्नसम्भवात् । "एकः पूर्वपरयोः" इति ज्ञापकाच्च । अन्यथा "आद्गुणः" इत्यादौ आदिति पञ्चम्याऽचीति सप्तम्याः षष्ठीत्वं कल्प्यत इत्युभयोर्गुणादेशसिद्धौ तद्वैयर्थ्यात् । तथा च तत्र कैयटः—

सूत्रद्वयप्रमाणत्वात् द्वे भवेतां प्रकल्पिके ।
षष्ठ्या विभक्ती तेनात्र ज्ञापनार्थत्वमाश्रितम् ॥

द्वे पञ्चमीसप्तमीरूपविभक्ती । षष्ठ्याः परस्परोत्तरषष्ठ्या इत्यर्थः । किं तु परत्वानवकाशत्वाभ्यां नियमपक्षवत्षष्ठीप्रकल्पनपक्षेऽपि व्यवस्था । तथा हि— "आने मुक्" इत्यत्र सप्तम्यनवकाशा "अतो येयः" इति

पूर्वत्र चरितार्थाया अत इति पञ्चम्याः षष्ठीं प्रकल्पयति । एवम् "ईदासः" इत्यास इति पञ्चमी निरवकाशा "आने" इति सप्तम्याः पूर्वत्र सावकाशायाः । "तास्यनुदात्तेद्" इति सूत्रेऽपि "सार्वधातुके" इति सप्तमी अभ्यस्तासिजर्थत्वादुत्तरत्र सावकाशेति तासेरित्यादिपञ्चम्येव षष्ठीं प्रकल्पयति—लसार्वधातुकस्य स्यतास्यादिभ्य अनुदात्तत्वमिति । न च तत्र लसार्वधातुकमिति प्रथमान्तपाठान्न सप्तमीति वाच्यम् । " तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तासिजर्थः " इति वक्ष्यमाणत्वात् । एवम् "बहोर्लोपः" इत्यत्र बहोरिति पञ्चम्यनवकाशा इष्ठेमेयस्सु इति सप्तम्याः षष्ठीं प्रकल्पयति—बहोः परेषामेषां लोपः स्यादित्यर्थः । अत एव "भूच बहोः" इति षष्ठीनिर्देशः । "गोतो णित्" इति पञ्चमी सर्वनामस्थाने इति सप्तम्याः षष्ठीं प्रकल्पति । गोशब्दस्य णित्त्वे प्रयोजनाभावाच्च । न च 'तिष्ठति गौः' इत्यत्र पूर्वस्य वृद्धिः फलम् । गोशब्दं प्रति तिष्ठतेरनङ्गत्वात् । "आमि सर्वनाम्नः सुट्" इत्यत्रापि पञ्चम्यनवकाशा आमीति सप्तम्या उत्तरत्र सावकाशायाः षष्ठीं प्रकल्पयति । न च आदित्यनुवृत्तया पञ्चम्या सामानाधिकरण्याददन्तात्सर्वनाम्न इति पञ्चम्यपि कृतार्थेति वाच्यम् । तथाऽपि यथोद्देशपक्षे परत्वात् "तस्मादित्युत्तरस्य" इत्येतत्प्रवृत्तेः । तदुक्तम्—

"उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देश" इति ।

इदं चाभ्युपेत्योक्तम् । वर्णाश्रमेतराणाम् इत्यादिवारणाय सर्वनाम्नो विहितस्याम इति, येषाम् इत्याद्यर्थम् अकारात्परस्येति व्याख्यानात् । अकारान्तात्सर्वनाम्नो विहितस्याम इति व्याख्याने तु येषाम् इत्यादौ न स्यात् । दीर्घादित्यत्र तु षष्ठ्याः

स्थाने पञ्चमी, छान्दसव्यत्ययात् । तेन दीर्घस्यैव तुक् न तु छस्य, "विभाषा सेनासुराच्छाया" इति लिङ्गाच्च । अन्यथा छकारोत्तरं तुक्प्रसङ्गे श्चुत्वे "खरि च" इति चर्त्वे चकारद्वयं स्यात् ।

ननु प्रत्ययविधावपि "गुप्तिज्किद्भ्यः" इति पञ्चम्याः सन् इति प्रथमायाः षष्ठीप्रकल्पकत्वं स्यात् । न चेष्टापत्तिः आदेशान्तरप्रतिनिर्देशाभावात्सनः सनादेशे दोषाभावादिति वाच्यम् । स्थानिन एवात्र निर्दिष्टत्वादादेशस्योपदेशाभावादित्संज्ञाऽनुपपत्तेः । स्थानिनोऽप्युत्पत्तिकाल एव निवृत्त्यभिमुखतया प्रतिपन्नस्य इत्संज्ञाऽनन्वयात् ।

अत्राहुः—

परत्वविशिष्टस्य सन उत्पादनेनोपक्षीणायाः पञ्चम्या नास्ति प्रकल्पकत्वमिति । षष्ठी ह्यनुवादविभक्तिः । स च यथाप्राप्तस्य । प्रत्ययविधौ च तस्य पूर्वमप्रसिद्ध्याऽनुवादानुपपत्तेः । अनियमे नियमकारिण्याः परिभाषाया अनियमप्रसक्त्यभावे प्रवृत्त्यनर्हत्वाच्च । तस्मात्प्रत्ययविधौ पञ्चम्यो न प्रकल्पिका इति॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ६८।

शब्दस्य स्वकीयं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना इति दीक्षिताः ।

नव्यास्तु "अणुदित्सवर्णस्य" इत्यादिषु प्रथमान्तानां संज्ञासमर्पकत्वेन षष्ठ्यन्तानां संज्ञिसमर्पकत्वेन दृष्टत्वात् स्वं रूपं शब्दस्य संज्ञा स्यादित्यर्थः ।

तथा च प्रत्ययलोपसूत्रे भाष्यम्—

"स्वं रूपं शब्दस्य संज्ञा भवतीति हन्तेरपि हन्तिः संज्ञा

भविष्यतीति अत्रापि रूपं शब्दस्य संज्ञेति" इत्याह ।

हरदत्तस्तु–'ग्राह्यमित्यध्याहार्यम् । शब्दस्येति "कृत्यानां कर्त्तरि वा" इति षष्ठी । तेन शब्दः स्वमेव रूपं ग्राहयतीत्यर्थः । रूपपदं चाग्न्यादिपदवृत्तिजातिपरम् । व्यक्तिद्वारा च कार्ययोग, इति व्याचख्यौ ।

तेन "अग्नेर्ढक्" इति अग्निशब्दादेव ढक् न तु वह्निशब्दात् ।

अशब्देति किम् । "उपसर्गे घोः" इत्यादौ घुशब्दस्वरूपं मा ग्राहि, किं तु दाधारूपा धातव एव गृह्येरन्निति । तेन घुधातोः शब्दार्थान्न किप्रत्ययः । स्वपदं च यत्र यः शब्द उपात्तस्तत्परम् । शब्दे शास्त्रे संज्ञेति सप्तमीसमासः । षष्ठीसमासे कर्मादिष्वर्थसंज्ञासु स्वरूपग्रहणापत्तेः ।

ननु रूपग्रहणं विनाऽपि स्वशब्देन तदेव ग्राह्यम् । प्रतीतावुपदेशानपेक्षादसाधारणत्वादन्तरङ्गत्वान्नियतोपस्थितिकत्वाच्च, अर्थस्य प्रतीतौ शक्तिग्रहापेक्षत्वात् पर्यायान्तरबोध्यत्वेन साधारणत्वात्पदधीजन्यज्ञानविषयत्वेन बहिरङ्गत्वात् अनुकरणदशायामर्थानवगमादनियतोपस्थितिकत्वाच्चेति ।

अत्राहुः–इहार्थोऽपि विवक्षितो रूपवदिति ज्ञापनार्थं रूपग्रहणम् । तेन "अर्थवद्ग्रहणे नानर्थकस्य" सिद्धम् । ज्ञापकवशादर्थस्य, स्वं रूपमिति वचनाच्च शब्दस्येति, सिद्धमर्थवद्ग्रहणम् । तेन 'काशे' इत्यादौ "शे" इति प्रगृह्यत्वं नेत्यादि । यत्र त्वर्थवद्रूपेण शब्दो नाश्रीयते तत्र नेदमुपतिष्ठते । यथा–वर्णग्रहणेषु,–टेरेत्वं, तेनानर्थकस्यापि टेरेत्वं भवति ।

अत्र भाष्यकृतः–नैतत्समारभ्यम् । लोके हि योग्यतालक्षणेन सम्बन्धेन शब्दोऽर्थं बोधयति । व्याकरणेऽपि पशुरपत्यं देवता माश्च उदश्वो भरता इत्यादावर्थ एव गृह्यते । "अग्ने-

ढक्" इत्यादौ त्वर्थेन सह प्रत्ययस्य पौर्वापर्यासंभवात् शब्दस्यैव ग्रहणम्। "ङ्याप्प्रातिपदिकात्" इत्यधिकाराच्च।

न चाशब्दसंज्ञेत्येतदर्थमारम्भः। घुसंज्ञारम्भादेव घुधातोरग्रहणात्। "व्यवहाराय नियमः" इत्युक्तत्वात्। एतेन 'कुमारीघ' इत्यत्र "घरूप" इति ह्रस्वो ऽभावप्रतियोगीति व्याख्यातः। "ई हल्यघोः" इत्यत्र तु घुशब्दस्याकारन्तत्वाभावादेव नोपादानम्। पर्युदासाभावे यद्ग्रहणप्रसक्तिस्तस्यैव पर्युदासाभ्युपगमात्।

न चार्थवद्ग्रहणपरिभाषाज्ञापनार्थम्। तस्या न्यायसिद्धत्वात्। शब्दविशिष्टस्यैवार्थस्योपस्थितेरौत्सर्गिकत्वात् विशेष्ये कार्यबाधाद्विशेषणीभूतशब्दे कार्यप्रवृत्तेर्वाच्यत्वात् अर्थस्य परित्यागापेक्षया शब्दविशेषणत्वेन कार्यिनियामकताया एव युक्तत्वात्।

प्रत्यासत्त्या च स एव शब्दो गृह्यते, न तु तत्पर्यायः, अनुपस्थितत्वात्। अत एव आग्नेयम् इत्यादौ अग्निपदेनैवोपादाने देवतात्वम्, न तु पर्यायान्तरेणेति "विधिशब्दस्य मन्त्रत्वे" इत्यधिकरणे सिद्धान्तः। एतेन "अभिव्यक्तपदार्था ये" इति न्यायो, गौणमुख्यन्यायोऽपि व्याख्यातः। गौणार्थस्य प्रथममनुपस्थितत्वात्।

न चोत्तरसूत्रचतुष्टये "स्वं रूपम्" इत्यस्यानुवृत्त्यर्थम्। तां विनाऽपि निर्वाहात्। ग्रहणकसूत्रे स्वस्यापि स्वसावर्ण्यात् ग्रहणसिद्धेः। अन्यथा 'अवात्ताम्' इत्यादौ "झलो झलि" इति लोपानुपपत्तेः। व्यक्तिभेदस्यात्रापि सुलभत्वात्। एवं तपरसूत्रेऽपि। "आदिरन्त्येन" इत्यत्रादिपदावृत्त्या सिद्धम्। तत्र लिङ्गं "नादिचि" इति निषेधः। अन्यथा "प्रथमयोः पूर्वसवर्णः" इत्यत्र "अकः" इत्यनुवृत्तेरकारस्य संग्रहणाभावे

तदप्रसक्त्या निषेधवैयर्थ्यात्। "येन विधिः–" इत्यत्रापि "तस्य च" इति वार्त्तिककृतैव वाच्यत्वात् । तस्मात्सूत्रमिदं प्रत्याख्यातम् ।

"सित्तद्विशेषाणां वृक्षाद्यर्थम्" । सिदित्युपलक्षणम् । किञ्चिल्लिङ्गासङ्गेन विशेषाणां संज्ञेति वक्तव्यम् । तेन "विभाषावृक्षमृग–" इति सूत्रे वृक्षम् मृगम् इत्यादि पाठ्यम् । विशेषाणामेव द्वन्द्व एकवत् । प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । इदं च न्यायसिद्धम् । पर्यायाणां सहप्रयोगाभावात् सामान्यविशेषाणां चार्थाभावात्सामान्येन विशेषाणामाक्षेपात् द्वन्द्वस्यैवानुपपत्तेः ।

"पित्पर्यायवचनस्य च स्वाद्यर्थम्" । चकारात्स्वरूपस्य विशेषाणां च ग्रहणम् । "स्वे पुषः" । रैपोषं पुष्टः, अश्वपोषम्, स्वपोषम् । इदं वाचनिकमेव ।

"जित्पर्यायस्यैव राजाद्यर्थम्" । "सभा राजामनुष्यपूर्वा" । इनसभम्, ईश्वरसभम् । नेह राजसभा, हरिश्चन्द्रसभा । इदमपि न्यायासिद्धम् । नञ्प्रश्लेषेण अराजेति पर्युदासाश्रयणात् राजसदृशानां तत्पर्यायाणामेव ग्रहणात् । न च स्वस्यापि स्वपर्यायत्वम् । स्वभिन्नत्वे सत्यभिन्नप्रवृत्तिनिमित्तकत्वं पर्यायत्वमिति स्वीकारात् । विशेषणेन स्वस्य, विशेष्येण च विशेषवाचकपदस्य वारणात् । इनशब्दो राजशब्दपर्याय इत्यस्य राजशब्दभिन्नत्वे सति राजशब्दशक्यतावच्छेदकधर्मावच्छिन्नशक्यताक इत्यर्थः ।

"झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम्" । "पक्षिमत्स्यमृगान्हन्ति" । मात्स्यिकः, शाफरिकः । न तु पर्यायवचनानाम् अनिमिषान्हन्ति । 'मीनस्येष्यत' इति भाष्यम् । मैनिकः । 'मृगपक्षिणोस्तु पित्रिर्देशः कर्त्तव्यः । तेन स्वरूपस्य

पर्यायाणां विशेषाणां च ग्रहणम्' इति व्याख्यातारः। इदमपि वाचनिकम्।

अणुदित्सवर्णस्य चाप्रत्ययः ६९।

अविधीयमानोऽण् उदिच्च सवर्णस्य चकारात्स्वस्य च संज्ञा स्यात्। अत्राण् परेण णकारेणेति प्रागुक्तम्। "अस्य च्वौ"। शुक्लीस्यात् मालीस्यात्। एरच्। जयः, लयः। "ऋदोरप्" स्तवः, पवः। "उरण् रपरः"। कर्ता, किरति। "ऋदोरप्" इत्यत्र ह्रस्वऋकारस्य तु न ग्रहणम् दीर्घाणामनण्त्वेन सवर्णग्राहकत्वं नास्ति इति सिद्धान्तात्। एतेन "अष्टन आ विभक्तौ" इत्यादिकं व्याख्यातम्। "अप्रत्ययः" इति पर्युदासाच्च। दीर्घाणामनण्त्वं च ग्रहणकशास्त्र एव वाक्यापरिसमाप्तिन्यायात्। "उरण्" इत्यादौ तु तेषामप्युपादानम्। तेन कारक इत्यादौ रपरत्वम्। तस्माद्दीर्घाणां ग्राहकत्वं नास्ति ग्राह्यत्वं त्वस्त्येवेति फलितार्थः। अप्रत्यय इत्युदितो न विशेषणम्। "कुहोश्चुः"। चकार, जगाद। अत एव "भाव्यमानोऽण् सवर्णान्न गृह्णाति" इत्याहुः। तुक्नुडादयस्तु नोदितः, "प्रतिज्ञानुनासिक्याः पाणिनीयाः" इत्यभ्युपगमात्। अप्रत्ययः किम्। विधीयमानानां प्रत्ययादेशागमानां ग्राहकत्वं मा भूत्। तेन "अत इञ्", "इदम इश्", "भुवो वुक्" इत्यादौ न दीर्घादि। न च इञादीनां अनण्त्वादेव न ग्राहकत्वमिति वाच्यम्। उपदेश इत्यनुवृत्त्या सूत्रान्तरगतानामेव हलामित्संज्ञाप्रवृत्तौ इकारादीनामेव विधेयत्वपर्यवसानात्।

स्यादेतत्। "अकः सवर्णे दीर्घः" इत्यत्राकारोऽष्टादशानां ग्राहकोऽस्तु अण्त्वात्। अस्तु च इकारादीनामपि "आ-

दिरन्त्येन—" इत्युक्तेः। ईकारादयो दीर्घास्तु कथं ग्राह्याः। तद्वाचकस्य इकारादेः सूत्रेऽनुपादानात्। अक्शब्देन तदुपस्थितिरिति चेत्, तर्हि वाक्यार्थे तेऽनुयन्तु। पदार्थसंसर्गस्य वाक्यार्थत्वात्। न तु तेऽपि स्वार्थोपस्थापकाः। अनुच्चारितत्वात्। अत एव 'ऋचं वेत्ति' इत्यादौ शब्दविशेषं वेत्ति इत्येवार्थो न तु 'तदर्थं वेत्ति' इति। तथा च वार्त्तिकम्—

"तत्र प्रत्याहारग्रहणे सवर्णग्रहणमनुपदेशात्", "ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणसंप्रत्यायकत्वाच्छब्दस्यावचनम्" इति।

शब्दस्याप्रतीयमानस्यावचनम् अर्थाप्रतिपादकत्वमित्यर्थः।

अत्राहुः—प्रत्याहारग्रहणे सर्वत्र तद्वाच्यवाच्ये निरूढलक्षणा, "दीर्घाज्जसि च" इति ज्ञापकात्। तद्धि "प्रथमयोःपूर्वसवर्णदीर्घस्य निषेधः। न चाक्शब्दवाच्यो दीर्घो ऽस्ति। तथा च निषेधस्य निर्विषयत्वापत्तिः। आकारस्य सत्त्वेऽपि तत्र "नादिचि" इत्येव सिद्धेः। "प्वादीनाम्" इत्यादिनिर्देशाश्चेह लिङ्गमिति।

अन्येत्थं प्रत्यवतिष्ठन्ते—'ऋचं वेत्ति' इत्यत्र अर्थत्वेनार्थस्य कर्मतया वेदनान्वय आपाद्यते अग्नित्वादिना वा ?। नाद्यः। तादृशबोधेऽर्थपदोत्तरद्वितीयाज्ञानस्य हेतुत्वात्। नान्त्यः। तत्राप्यग्निमिति धियो हेतुत्वात्। न च यत्र कैयटोक्तरीत्या ऋक्शब्देन प्रकरणादिवशात् 'अग्निमीळे' इत्यादिरूपा ऋक् प्रतीयते तत्र 'अर्थं वेत्ति' इतिबोध आपाद्यत इति वाच्यम्। अर्थत्वविशिष्टवाचकस्य तदुत्तरद्वितीयायाश्चाज्ञानात्। ऋक्शब्दोत्तरं द्वितीयायास्त्वानुपूर्वीविशेषावच्छिन्नाया ऋच एव कर्मताबोधकत्वात्। अर्थस्य ऋक्शब्दार्थत्वाभावात्। न च ईडनादिकर्मकबोध आपाद्यः। तदुत्तरकर्मविभक्तिज्ञानाविरहात्। न च 'अग्निमीळे'

इत्याद्यृगर्थस्य कर्मतासंसर्गेण वेदनान्वयस्तथा 'अग्निमीळे वेत्ति' इत्यादिजन्य इवेति वाच्यम् । ऋचम् इत्यनेन सह वेदनस्य जनितान्वयबोधतया निराकाङ्क्षत्वात् । एतेनाग्निकर्मकवेदनबोधापत्तिरपि निरस्ता । उच्चारितत्वस्य तु शाब्दबोधकारणतावच्छेदके न निवेशः । पुस्तकदर्शनादिना शब्दस्मरणादपि तदुत्पत्तेः । शब्दोपस्थितशब्दस्य नार्थबोधकत्वम्, लिप्याद्युपस्थितस्य त्वस्त्येवेति वैषम्ये च मानाभावात् । एतेन देवदत्तपदस्य 'घटम्' इति द्वितीयैकवचनान्तपदे गृहीतसङ्केतस्य 'देवदत्तं वेत्ति' इति वाक्यात् घटकर्मकवेदनबोधापत्तिरपि निरस्ता । घटमिति पदकर्मकवेदनान्वयबोधेन निराकाङ्क्षत्वात् । अगादिसंज्ञानां षष्ठ्यादिविशिष्टे इकारादौ सङ्केतज्ञानाभावाच्च ।

वार्त्तिकस्य त्वयमभिप्रायः—"अकः सवर्णे—" इति वाक्यात् दीर्घोद्देश्यत्वरूपं स्थानित्वम् आक्षरसमाम्नायिकानामिकारादीनामेव स्यात् न तु दीर्घाणाम् । इकारोपस्थापके अक्पदे स्थानित्वबोधकषष्ठ्याः सत्त्वेऽपि दीर्घोपस्थापकात् इकारादुत्तरं तदभावात्, अतः श्रीशाद्यसिद्धिरिति । अनुच्चारितानामर्थोपस्थापकतैव नास्तीत्यर्थ उक्तदोषात् । वार्त्तिकपदं त्वेवं व्याख्येयम्—प्रत्याहारे, उच्चारिते सति इति शेषः, सवर्णानामग्रहणमन्वयबोधराहित्यं प्राप्नोति अनुपदेशात्संज्ञिष्वनुच्चारणात् । एवं च मध्यगत्वाभावात् आद्यन्तरूपया संज्ञया सह तेषामसति सङ्केतपरिच्छेदे उक्तप्रतिज्ञासिद्धिः । ह्रस्वसंप्रत्ययात्—ह्रस्वैरुपस्थापनात् । उच्चार्यमाणसंप्रत्ययात्—उच्चार्यमाणस्य तत्तद्बोधानुकूलयोग्याविभक्त्यन्तत्वादिना ज्ञातस्य सम्यगुद्देश्यविधेयभावाविवेकेन प्रत्यायकत्वात् अन्वयबोधकत्वात् शब्दस्यावचनम् । इष्टान्वयबोधाजनकत्वमिति । "ऋॠ इत्युक्ते संपाठमात्रं

गम्यते" इति भाष्यमपि अध्ययनादिकर्मत्वादिविधेयोद्देश्यतयेति शेषेण शाब्दपरतयैव नेयम्। "ऋक्छब्देन प्रकरणादिवशात् विशिष्टसंनिवेशा ऋक् प्रतीयमानाऽपि स्वार्थं न प्रत्याययति" इति कैयटोऽप्युक्तरीत्यैव व्याख्येय इति। 'उच्चार्यमाणैरेव प्रत्यायकैर्भवितव्यमिति नास्ति नियमः। बुद्ध्युपारूढास्तु प्रत्यायकाः। अस्ति च मध्यवर्त्तिनां बुद्धावारोहः । ततश्च संज्ञित्वेन प्रत्याय्यमानस्यापि प्रत्यायकत्वं भविष्यति। अत्र च ज्ञापकं "दीर्घाज्जसि च" इति प्रतिषेध' इत्यादिपदमञ्जरीग्रन्थस्याप्यत्र स्वारस्यम्।

अत्रायं निष्कर्षः । शब्दोपस्थितस्य शब्दस्य नार्थबोधकत्वम् । अनुकरणस्थले शब्दस्योपस्थितस्याप्यर्थानवबोधकत्वात् । एतच्च "स्वं रूपम्–" इति सूत्रे कैयटहरदत्तादिग्रन्थेष्वेव स्पष्टम् । वार्त्तिकस्य तु नोक्तं व्याख्यानम्। अक इत्यनयैव षष्ठ्या तेषामपि स्थानित्वबोधनसम्भवात् । अत एव "द्विरेफमानय", "हिरण्यपूर्वं कशिपुं प्रचक्षते" इत्यादिस्थले भ्रमरादिवृत्तिकर्मत्वबोधः सङ्गच्छते। अक इति हि अइउऋऌ इत्येषां संज्ञा। अनुकार्यानुकरणयोश्च भेद एवात्र विवक्षितः, अन्यथा विभक्त्यनुपपत्तेः । तथा च अकारोपस्थाप्यस्य अकारस्य तदुपस्थाप्यानां दीर्घाणां यथा स्थानित्वं तथाऽक्पदोपस्थाप्यस्य इकारादेस्तदुपस्थाप्यानां दीर्घाणां च तत् । अकारादितो वैलक्षण्याभावात् । तस्मादनुच्चारितस्य कथं ग्राहकत्वमित्येव पूर्वपक्षाभिप्रायः ।

सिद्धान्तस्तु—अन्यत्र तथात्वेऽपि प्रकृते शब्दोपस्थितशब्दस्यापि ग्राहकत्वम् अन्यथा ग्रहणकशास्त्रं व्यर्थं स्यात् । "अस्य च्वौ" "एरनेकाचः" इत्यादावपि अकारस्योच्चार्यमाणस्य ग्राहकात् अकाराद् भिन्नत्वात्। एतेन दीर्घस्य सम्भवेऽपि "नादिचि"

इत्यस्य वैयर्थ्यम् इति निरस्तम् । अक इत्यत्राकारेणापि दीर्घग्रहणस्य युक्तिसाम्यात् अनुपपत्त्या "दीर्घाज्जसि च" इत्यस्य ज्ञापकतायाः सुस्थत्वात् । अत एव यत्र स्वरूपेणोच्चार्यन्ते "अस्यच्वौ" इत्यादौ तत्रैवैषां ग्राहकत्वं स्यात् इत्यपि कैयटेन पूर्वपक्ष उक्तः । अक इत्यादावप्यकारस्य सवर्णग्राहकत्वं न स्यात् इत्यापत्तेरपि तदाभिमतत्वात् ।

तदयमर्थः—गवित्ययमाहेत्यादावनुकरणस्य तन्मात्रबोधकत्वम् । अणां तु अनुकार्यवृत्तिधर्मावच्छिन्नयावद्व्यक्तिपरत्वम् । "अस्य" इत्यादिषु अकारस्यैवानुकार्यत्वात् तद्भेदानामेव ग्रहणम् । अक इत्यादौ तु "आदिरन्त्येन" इति वचनात् यावतामनुकार्यत्वं तद्भेदानामेव ग्रहणम् । "आदिरन्त्येन" इत्यनेन अकारादिष्विव "अणुदित्" इत्यनेन तद्भेदेष्वपि सङ्केतितत्वात् । न च तत्र प्रत्येकमकारादीनामपि सवर्णग्राहकत्वस्य बोध्यतया तत एव सिद्धौ अगित्यादीनां तद्विलक्षणं ग्राहकत्वं न बोध्यते गौरवादिति वाच्यम् । "दीर्घाज्जसि च" इत्यादीनां तद्वाच्यवाच्ये निरूढलक्षणाकल्पकत्वमपेक्ष्य अगादिशब्दानाम् उक्तपरत्वकल्पकत्वस्यैव युक्तत्वात् । न च अणित्यत्र अण् अक् अङ् अच् अट् इत्यादिबोधाभावात् कथं तेषां यावद्व्यक्तिपरत्वबोध इति वाच्यम् । तदाऽपि तदुपस्थितेरावश्यकत्वात् शब्दव्यपदेशादेव झल्त्वमप्यायातीति भवदभ्युपगमात् ।

न च प्रत्याहारग्रहणाभावे "अस्य च्वौ" इत्यादौ ग्राहकत्वानुपपत्तिः । अण्पदे तन्त्रावृत्त्येकशेषाणामन्यतमाङ्गीकारात् । अपि च भवन्मते वर्णग्रहणे ग्रहणकशास्त्रेण ग्राहकत्वम्, प्रत्याहारस्थलेतु उक्तज्ञापकलभ्यनिरूढलक्षणयेति पर्यवसितम् ।

तथा च अक इत्यादीनां ग्राहकत्वे ग्रहणकशास्त्रस्यानुपयोगात् अक्पदार्थबोधे च "आदिरन्त्येन" इत्यस्यैवापेक्षितत्वात्, ग्रहणकसूत्रेऽपि अणूपदेन दीर्घाणामुपस्थितौ बाधकाभावात् तेषामपि सवर्णग्राहकत्वापत्त्या 'दीर्घाणामनणूत्वेन सवर्णग्राहकत्वं नास्ति' इति सिद्धान्तभङ्गप्रसङ्गः। तथा च कैयटः—'अत्र हि सूत्रे प्रत्याहारसंनिविष्टा एव गृह्यन्ते। स्वात्मनि क्रियाविरोधात् अनिष्पादाद्, ग्रहणकशास्त्रान्तराभावाच्च अत्र सूत्रे अकारादिभिराकारादीनां ग्रहणासंभवः। अन्येषु तु प्रदेशेषु अनेन सूत्रेण अकारादिभिराकारादयो गृह्यमाणाः कार्याणि लभन्ते" इति। कौस्तुभेऽप्युक्तम्—'पदार्थसंसर्गो हि वाक्यार्थः। तद्बोधश्च पदार्थबोधोत्तरभावी। ततश्चाणूसूत्रेण ये उपस्थितास्तेषां सवर्णग्राहकत्वं सूत्रार्थः। अणूशब्दश्चाक्षरसमाम्नायपठितेषु सङ्केतित इति तानेवात्रोपस्थापयति' इत्यादि।

किं चैवं ग्रहणकसूत्रस्यैव वैयर्थ्यम्। उभयसाधारण्येन ग्राहकत्वस्य "दीर्घाद्—" इत्यादिनैव ज्ञापयितुं शक्यत्वात्। तस्मादुक्तरीतिरेव युक्ता। अत एव कैयटेन स्पष्टमुक्तम्—'तत्राकार उच्चारित "आदिरन्त्येन सहेता" इति मध्यपतितानां स्वरूपस्य च ग्राहकः, अस्माच्च वचनात्सवर्णानामपीत्यर्थ' इति। न च तत्प्रत्याहाराद्यक्षरमात्रपरम्। अकारस्योपलक्षणत्वात् युक्तेश्चोक्तत्वात् इति दिक्।

वार्त्तिककारस्त्वाह—

"सवर्णेऽणूग्रहणमपरिभाष्यमाकृतिग्रहणाद्" इति।

अकारादिनिर्देशानां जातिपरत्वात् तदवच्छिन्नयावद्व्यक्तिलाभात् अणूग्रहणं न कार्यम्। ह्रस्वत्वं तु विधेयस्थले तद्विशेषणतया विवक्षितमिति नातिप्रसङ्गः। अनुवाद्यस्थले तु तदविवक्षणात्सर्व-

ग्रहणम् । "अष्टन आ" इत्यादौ तु दीर्घोच्चारणसामर्थ्यात् दीर्घव्यक्तिसमवेतमेव सामान्यं गृह्यते। पूर्वत्वया ब्राह्मणः प्रत्युपस्थेय इत्यत्र विशिष्टव्यक्तिनिष्ठब्राह्मणत्ववत् ।

यद्वा, व्यक्तिरेव शब्दार्थः । जातिस्त्वशब्दार्थोऽपि अभेदप्रत्ययहेतुरस्ति इति सर्वव्यक्तीनामभेदेनाश्रयणात् एकव्यक्तिनिर्देशे सर्वव्यक्तिग्रहणसिद्धिः। आकृतिग्रहणात् इत्यस्य तु अयमर्थः- आकृतेरेकाकारप्रत्ययनिमित्तत्वेन प्रतिपत्तिरिति । न चात्र ऋकारेण ऌकारग्रहणं न स्यात् । एकजात्यनाक्रान्तत्वादिति वाच्यम् । अत्राण्पदस्थाने ऋकारप्रक्षेपेण तत्सिद्धेः ।

तपरस्तत्कालस्य ७०।

ननु तच्छब्दस्तपरपरः । तस्य कालानात्मकत्वात्तपरः कालो यस्येति सामानाधिकरण्यमनुपपन्नम् । तथा चोक्तम्—

आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे ।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः ॥

मैवम्। तत्काल इव कालो यस्येत्युत्तरपदलोपाभ्युपगमात् । तःपरो यस्मात्स तात्परो वा स्वसमकालस्य उच्चार्यतावच्छेदकधर्मावच्छिन्नस्यैव ग्राहकः । तेन अत् इत् इत्यादौ ह्रस्वत्वावच्छिन्नषड्व्यक्तीनामेव ग्रहणम् । ऋदित्यादौ ऋऌइत्युभयसम्बन्धिनां षण्णां मिलित्वा द्वादशानाम् । तात्परस्योदाहरणम् । "वृद्धिरादैच्" इति । तेन त्रिमात्रादीनां एचां गुणवृद्धिसंज्ञाविरहात् गङ्गोदकम्, खट्वैलकम् इत्यादौ न त्रिमात्राद्यादेश इति एओङित्यादिसूत्रयोः प्रपञ्चितम् । कार्यकालपक्षे भाव्यमानत्वादेव सवर्णग्रहणवारणे तु वृद्धिसूत्रे तपरकरणं स्पष्टार्थमित्यपि वृद्धिसूत्र एव विचारितम् । गुणानां भेदकत्वपक्षे तु तत्र

तपरत्वम् आकारार्थमपि गुणान्तरयुक्तस्य तस्य ग्रहणस्य फलत्वात्।

इदं च सूत्रं विध्यर्थं नियमार्थं वेति पक्षद्वयमाकरासिद्धम्। तथा हि—अणित्यस्यानुवृत्त्या आकारादावणभिन्ने तत्कालानां सवर्णानां भिन्नगुणत्वेऽपि अनेन ग्रहणं विधीयते ।

नन्वेवमस्यानण्सु चरितार्थत्वात् "अतो भिस ऐस्" इत्यादावण्ग्रहणे अकारेण दीर्घादीनामपि पूर्वसूत्रेण ग्रहणं स्यादिति चेन्न। तस्यापि "अस्य च्वौ" इत्यादौ ह्रस्वे चरितार्थतया विप्रतिषेधे परत्वात् अस्यैव प्रवृत्तेः। अन्यत्र संज्ञानां बाध्यबाधकभावविरहेऽपि अत्र फलभेदेन विरोधात्—सवर्णसंग्राहकत्वे ह्यष्टादशानां प्रसङ्गोऽन्यथा तु षण्णामिति । न च तपरत्वसामर्थ्यादेव न ग्रहणम्। "ऋत इद्धातोः" इत्यादौ मुखसुखार्थत्वस्यापि दर्शनात्।

एतेनोक्तसंख्यानुपादानात् विरोधाभावेऽपि तपरत्वसामर्थ्यात् बाध्यबाधकभावानुपादानमित्यपास्तम् ।

अस्येति निर्देशेऽपि लाघवाच्च फलतो विरोधस्यापि बाधकत्वे तन्त्रतया शाब्दसंख्यानुपादानस्याकिंचित्करत्वात्।

यदपि तकारविशिष्टेयं संज्ञा न त्वण्मात्रम्। तत्कालस्येति तच्छब्दस्तु विशेष्यमात्रं परामृशति न तु विशिष्टम् । तदुच्चारणकालसदृशे लक्षणा तु प्राचां मतेऽप्यस्त्येव। सर्वनामपदेऽपि "एतस्यैव रेवतीषु वारवन्तीयम्", "तत्त्वमसि" इत्यादौ लक्षणायाः पूर्वोत्तरतन्त्रयोः स्थितत्वात्। तथा च टिघुभाद्यन्तर्गताण्वत् इहैकदेशत्वेनानर्थक्याद्ग्राहकताप्रसङ्ग एव नास्ति। विभक्त्युत्पत्तिरप्येवं संगच्छते। वृद्धिसूत्रे 'अत्राकारः प्रयोगस्थैराकारैरर्थवान्' इति हरदत्तग्रन्थस्तु प्राचां रीत्या नेतव्य इति।

तदपि चिन्त्यम् । तकारस्योपलक्षणतया तद्विशिष्टस्य संज्ञात्वाभावात् ।

न च विशेषणत्वस्य मुख्यत्वात्तद्गुणविज्ञानात् विशिष्टे तत् । अत्इत्यस्य अइत्यस्य च संज्ञात्वे गौरवात् । अत्, इत्-इत्यानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवाच्च ।

एतेन पञ्चमीसमासानाश्रयणेऽपि न निर्वाहः । अत एवास्य नियमार्थत्वं विप्रतिषेधश्चेति भाष्योक्तं सङ्गच्छते । विशिष्टस्य संज्ञात्वे तस्यानण्त्वात्पूर्वेण प्राप्त्यभावात्, समानविषयकत्वाभावाच्चोभयमप्यनुपपन्नं स्यात् । विभक्तिस्तु अक इत्यादिवत् । तत्रानुबन्धनिर्मुक्तस्यैव वाचकतायास्त्वयाऽपि स्वीकारात् ।

"दिवऔत्" इत्यत्र विधीयमाने तपरकरणं स्वरार्थम् । "द्यौः पितः पृथिवि मातरध्रुक्" । उदात्तप्रयोगस्तु द्योशब्दस्य । "पृथिवी उत द्यौः" इति । "औत्" "अच्च घेः" इत्यादौ तु मुखसुखार्थम् । व्याख्यानात् । "समिधाने अग्नौ" इत्यादौ तित्स्वराभावाद्' इति वृत्त्यादयः ।

यत्तु तैरुक्तम्—"इटोऽत्" इत्यत्र "न विभक्तौ" इति न निषेधः । "इदमस्थमुः"इति उकारानुबन्धनादनित्यत्वात्'इति ।

तदभ्युपगम्यवादमात्रम् । तित्स्वरापत्तेः । "भक्षीय तव राधसः" इत्यन्तोदात्तप्रयोगात् । तस्मान्मुखसुखार्थमेव' इति दीक्षिताः ।

स्यादेतत्—

अभ्यासार्थे द्रुता वृत्तिः प्रयोगार्थे तु मध्यमा ।
शिष्याणामुपदेशार्थे वृत्तिरिष्टा विलम्बिता ॥ इति

तिस्रो वृत्तयः । ताश्च क्रमेण तृतीयभागाधिकाः—द्रुतं

श्लोकमृचं चोच्चारयतो यस्या नाडिकाया नव पलानि स्रवन्ति तस्या एव मध्यमायां द्वादश, विलम्बितायां तु षोडशेति । तथा च प्रकृते विलम्बितायां तपरकरणे द्रुतमध्ययोः, मध्यमायां तपरकरणे द्रुतविलम्बितयोः, द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कार्यं स्यात्, कालभेदात् ।

अत्र वार्त्तिकम्—

"सिद्धन्त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते" इति ।

अस्यार्थः—व्यञ्जको ध्वनिर्मात्राकालावच्छिन्न एव वर्णमभिव्यञ्जयति, स्वरूपेण तु तदुत्तरकालमप्यनुवर्त्तते ।

यद्वा ह्रस्वव्यञ्जको ध्वनिर्वृत्तित्रयेऽपि मात्राकाल एव । किं तु मध्यमाविलम्बितयोः पूर्वध्वन्यनुनिष्पादादिना न्यूनकालेन ध्वन्यन्तरेण पूर्वाभिव्यक्तवर्णस्यैव व्यक्त्यन्तरं जन्यते । अभिव्यञ्जकभेदेऽपि अभिव्यङ्ग्यभेदाभावात् । एवं दीर्घप्लुतव्यञ्जकयोरपि वृत्तित्रयेऽपि यथाक्रमं द्विमात्रत्रिमात्रत्वे । तदनुनिष्पादी तु ततो न्यून इति न दोषः । ह्रस्वदीर्घप्लुतास्तु स्वत एव भिन्नाः । वर्णोत्पत्तिपक्षे तु तदनुनिष्पादी दूरादपि ग्राह्यः कश्चित् ध्वनिरावश्यकः । तस्यैव कालभेदाद् वृत्तित्रैविध्यं बोध्यम् ।

तथा च भाष्यम्—

"ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु दृश्यते ।
अल्पो महांश्च केषां चिदुभयं तत्स्वभावतः" ॥

शब्दो द्विधा व्यञ्जकव्यङ्ग्यभेदात् । शब्दानां व्यङ्ग्यानां व्यञ्जकत्वेन सम्बन्धी यो ध्वनिः स एव महानल्पश्च लक्ष्यते । व्यङ्ग्यस्त्वभिन्नकाल एव । तदुभयम्, व्यङ्ग्यव्यञ्जकत्वरूपम् । केषां

चित्, ताल्वादिव्यापारजन्यानामेव, न तु भेर्यादिजन्यानामपि । स्वभावतः, कारणवैलक्षण्यात् । 'व्यक्तानामुभयं गृह्यते । अव्यक्तानां तु ध्वनिरेव' इति कैयटः ।

आदिरन्त्येन सहेता ७१।

आद्यन्तावयवद्वारा समुदायानुकरणेन सिद्धे अन्त्यव्यावृत्त्यर्थमिदं सूत्रमिति दीक्षिताः ।

अन्त्येन इता सहोच्चार्यमाण आदिर्वर्णो वर्णसमुदायो वा मध्यगानां स्वस्य च संज्ञा स्यात् । वर्णो यथा—अल् इत्यादिः । संघातो यथा—कुञ् इत्यादिः । कुभ्वस्तीनां ग्रहणात् । 'आद्यन्तौ मध्यापेक्षाविति मध्यानामेव संज्ञित्वम् । "स्वं रूपम्" इत्यनुवर्त्तनात् स्वरूपस्य च । सहग्रहणाच्चाद्यन्तौ समुदितौ संज्ञेति "इको यणचि" इति समुदायादेव विभक्तिर्नादिमात्रात् । स्वं रूपं चादेरेव गृह्यते नान्त्यस्य । तस्याप्राधान्यात् । अतो दध्यत्र इत्यत्र केवल एव यकार आदेशो न तु णकारसहितः, इति कैयटादयः ।

अत्र कौस्तुभकृतः—"प्रत्याहारेष्वाद्या वाचकाः, तत्र ग्रहणकशास्त्रं सावकाशम्" इति ग्रहणकशास्त्रीयभाष्यपर्यालोचनया वाचकत्वं तावदाद्यवर्णविश्रान्तम् । अन्त्यस्तु द्योतकः । सहग्रहणात्तु विशिष्टाद्विभक्तिरिति द्योतकान्तराद्वैषम्यम् । तथा च इत्संज्ञयाऽपहृतस्यान्त्यस्य कथं संज्ञित्वप्रसक्तिः । अन्यथा अजादिसंज्ञानामपि णकारादावतिप्रसङ्गात् । विशिष्टस्य संज्ञात्वेऽपि यण्शब्दापादानस्यानुपपन्नत्वात् । ककाराविशिष्टस्यैव स्थानित्वात् इकारस्य स्थानित्वासम्भवाद्' इति ।

अत्रेदं वक्तव्यम् । समुदायस्यैव संज्ञात्वमुपपादितमेव ग्रह-

णकसूत्रे । इत्संज्ञासत्त्वेऽप्यन्त्यस्य संज्ञाप्रवृत्तेः पूर्वं लोपाभावात् स्थानित्वप्रसक्तिः । मध्यगतानुबन्धानां तु पूर्वमेव लोप इति वैषम्यम् ।

वस्तुतस्तु

"आचारादप्रधानत्वाल्लोपश्च बलवत्तरः" ।

इति वार्त्तिके आचारादित्येव संमतः पक्षः । तथा चानुबन्धान्यत्वे सति तत्समुदायघटकवर्णत्वम् अजादिपदशक्यतावच्छेदकमिति प्रत्याहाराह्निकान्ते व्याख्यातम् । अन्त्येनेति किम् । 'सुट्प्रत्याहारस्तृतीयैकवचनावयवेन टकारेण मा भूत् । "टाङसिङसाम्" इति निर्देशेन तस्य पूर्वान्तित्वाभावनिश्चयाद्' इति वृत्तिकृतः ।

'न च तदन्तं पूर्वसमुदायमादाय दोषः । अन्त्यत्वप्रयुक्ता यस्येत्संज्ञा तस्यैवात्र ग्रहणात् । तस्य च "चुटू" इति प्रत्ययादित्वेनैव इत्संज्ञत्वाद्' इति हरदत्तः ।

रप्रत्याहारस्तु लकाराकारस्यानुनासिकत्वप्रतिज्ञानसामर्थ्यात् ।

दीक्षितास्तु—'औटष्टित्वस्यानन्यार्थतया प्रत्यासत्तिन्यायाच्च तेनैव प्रत्याहारादन्त्यपदं मास्तु । तस्मात् मध्यमेन इता सहित आदिस्तदुत्तरेषाम्, अन्त्येन इता सहितो मध्यमः पूर्वेषां संज्ञा मा भूदित्यन्त्यादिग्रहणम् । इतेति किम् । उक्तरीत्या रप्रत्याहारो यथा स्याद्'इत्याहुः ।

नव्यास्तु—'सह आसमन्तादेति सहेता मध्यमो वर्णः आद्यन्तपदसमभिव्याहाराद् । एतेस्तृचि रूपम् । "एत्येधत्यूठ्सु"इति वृद्धिवारणाय आकारप्रश्लेषः । "ओमाङोः" इति पररूपम् । अन्त्येनादिः अणू इत्यादिसंज्ञको भवतीत्यर्थः । स्वंरूपमि-

त्यनुवृत्तिः । वृद्ध्यादिवत्सामानाधिकरण्यात्संज्ञात्वप्रत्ययः । एवं च "हलन्त्यम्" इत्यत्रान्योन्याश्रयशङ्काऽपि न' इत्याहुः ।

येन विधिस्तदन्तस्य ७२।

विशेषणं तदन्तस्य स्वस्य च संज्ञा स्यात्। "एरच्" । चयः, जयः । "ओरावश्यके" । अवश्यलाव्यम् । विधिरिति कर्मणि किः। येनेति करणे तृतीया। कृद्योगषष्ठ्या कर्त्तरि तस्या बाधितत्वात् । करणस्य च परतन्त्रत्वनियमात् तृतीयया पारतन्त्र्यं लक्ष्यते । न च सुब्विभक्तौ न लक्षणा, व्यत्ययानुशासनवैयर्थ्यात् इति वाच्यम् । "प्रहासे च" इत्यादिव्यत्ययानुशासनात् तिङ्क्ष्वपि तदनापत्तौ 'रथो गच्छति' इत्यादौ तिङो व्यापारलक्षणानुपपत्तेः ।

अत्र नैयायिकाः–विभक्त्यन्तार्थे विभक्तेर्न लक्षणा, तेन नोक्तविरोधः । अत एव 'अर्थेनैव विशेषो हि, इत्यत्राऽभेदे तृतीया' इति मणिकृतः ।

"प्रयाजशेषेण हवींष्यभिघारयति"इत्यत्र'प्रयाजशेषं हविःषु क्षारयति' इति मीमांसकोक्तिस्तु व्यत्ययस्यानुशासनिकत्वात् नानुपपन्ना ।

प्रकृतमनुसरामः। कर्त्तृव्यापारव्याप्यत्वरूपं पारतन्त्र्यमिकारादीनां न भवति इति अप्राधान्यं विशेषणत्वरूपं गृह्यते। तथा च विशेषणत्वेनोपात्तं स्वान्तस्य विशेष्यस्य संज्ञा विशेषणत्वस्य च विशेष्यत्वनिरूपितत्वात् विशेष्यसन्निधावेव प्रवर्त्तते। स च क्वचित्साक्षात्, यथा–"ईदूदेद्"इत्यत्र द्विवचनस्य, क्वचिदधिकारात्, यथा–"एरच्"इत्यत्र धातोः, क्वचिदाक्षेपात्, यथा–"इको झल्"

इत्यत्र सना धातोः । "इको यणचि" इत्यादौ तु विशेष्यस्य कथमप्यसन्निधानात् तदन्तविध्यभावः ।

अत्र वार्त्तिकम् ।

"येन विधिस्तदन्तस्य चेद्ग्रहणोपाधीनां तदन्तोपाधिताप्रसङ्गः" ।

ग्रहणमिति कर्मणि ल्युट् । गृह्यमाणविशेषणत्वेन सम्मतानाम् ओष्ठ्यपूर्वत्वादीनामित्यर्थः । तथा हि–ऋकारोऽत्र ऋकारान्तस्य धातोर्विशेषणमिति स्वयं विशेषणानाकाङ्क्षत्वात् पूर्वमेव विशेष्यान्वयं प्रतिपद्यते–ऋदन्तस्य धातोरिति । ततश्च ऋदन्तत्वविशिष्टे धातौ 'विशिष्टे वैशिष्ट्यम्' इति रीत्या ओष्ठ्यपूर्वत्वं विशेषणं स्यात् ।

यद्वा, 'एकत्र द्वयम्' इतिरीत्या ऋदन्तत्वम् ओष्ठ्यपूर्वत्वं च द्वयमपि धातोर्विशेषणं स्यात् । तथा च संकीर्णम् इत्यादावतिव्याप्तिः । उपसर्गमकारस्य धातोः पूर्वं सत्त्वात् । न ह्योष्ठ्यस्य धात्ववयवत्वमाश्रयितुं शक्यम्, अवयवावयवित्वयोरेकनिरूपितयोरेकस्य विरोधात् । एवं 'पूर्तम्' इत्यादावव्याप्तिः । ऋकारान्तत्वेऽपि ओष्ठ्यपूर्वत्वाभावात् ।

एवम्–"उतश्च प्रत्ययात्" इत्यत्रासंयोगपूर्वत्वमुकारस्य विशेषणं न स्यात् किं तु अङ्गप्रत्ययान्यतरस्य । तत्र आद्ये 'क्ष्णु' इत्यादावव्याप्तिः । द्वितीये तक्ष्णुहि इत्यादिसिद्धावपि अश्नुहि इत्यादावतिव्याप्तिरिति ।

अत्र सिद्धान्तवार्त्तिकम्–

"सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वाद्" इति ।

अयमर्थः–वृद्ध्यादिसंज्ञा गुणप्रधानभावानपेक्षा एव यथोद्देशं प्रवर्त्तन्ते । इयं तु गुणप्रधानभावसापेक्षत्वात्कार्यकाला, विधि-

वाक्यव्यतिरेकेण विशेषणविशेष्यभावानवगमात् । अतो वि-शेषणसम्बन्धवेलायां गुणभावानवगमात्प्रथमं 'विशेषणसबन्ध-मनुभूय ऋकारादिस्तदन्तस्य संज्ञा भवति । तथा च 'विशिष्टस्य वैशिष्ट्यम्' इति न्यायेन ओष्ठ्यपूर्वकत्वविशिष्टो य ऋकारस्तद-न्तस्य धातोरिति फलितम् । एवमन्यत्रापीति ।

अत्र सिद्धान्ताभिमतविशेषणविशेष्यभावव्यवस्थापनार्थं प्र-वृत्तानि वार्त्तिकानि व्याख्यायन्ते ।

"समासप्रत्ययविधौ प्रतिषेधः" "उगिद्वर्णग्रहणवर्जम्" ।

समासविधौ प्रत्ययविधौ च तदन्तविधिप्रतिषेधः । श्रिता-दयो विशेष्यत्वेन सुबादयस्तु विशेषणत्वेनाश्रयणीयाः । तथा च श्रिताद्यन्तैः सुबन्तैः सहेति नार्थः किं तु सुबन्तैः श्रितादिभि-रित्येव । विशेषणत्वाभावात्तदन्तविधिर्नेति फलितोऽर्थः । तेन "द्वितीयाश्रित–"इति समासः कष्टं परमश्रित इत्यत्र न भवति किं तु कष्टश्रित इत्यत्रैव। "नडादिभ्यः फक्"नाडायन इत्यत्रैव। प्रातिपदिकेभ्यो नडादिभ्य इत्यर्थः । नडादीनामेव विशेष्यत्वं न तु नडाद्यन्तेभ्यः प्रातिपदिकेभ्यः इति तदर्थः, नडादीनां विशे-षणत्वानाश्रयणात् । नेह सूत्रनडस्यापत्यं सौत्रनाडिः । "अत इञ्" । अनुशतिकादित्वात् उभयपदवृद्धिः । न च "ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति" इति परिभाषयैव सिद्धिः, "पूर्वादिनिः" इत्यत एव सिद्धे "सपूर्वाच्च" इत्यस्य तज्ज्ञापक-त्वात् इति वाच्यम् । तस्याः समासप्रत्ययविधिमात्रविषयकत्व-मित्येतस्य वार्त्तिकेन ज्ञाप्यत्वात् । अत एव "गोस्त्रियोः" इति सूत्रे गोऽन्तं यत्प्रातिपदिकमिति व्याचक्षते ।

एतेन 'प्रत्ययविधौ ज्ञापितत्वात् उक्तपरिभाषायाः "व्यप-देशिवद्भावोऽप्रातिपदिकेन" इति परिभाषायाश्च प्रत्ययमात्र-

विषयकत्वमिति सीरदेवोक्तिरपास्ता ।

नच "शेषो घ्यसखि" इत्यत्र "ग्रहणवता" इति परिभाषया तदन्तविधिप्रतिषेधाद् अतिसखिशब्दस्य घिसंज्ञापर्युदासो नेति कैयटहरदत्तादिग्रन्थविरोध इति वाच्यम् । तेषां प्रौढिवादमात्रत्वात् । तत्र विशेष्यसन्निध्यभावादेव तदन्तविध्यप्रसक्तेः ।

स्यादेतत् । श्रिताद्यन्तैः सुबन्तैरित्यर्थस्य पूर्वपक्षसिद्धत्वे कथं परमाश्रित इत्यत्र समासस्यैव कथं प्रसक्तिः । श्रितान्तस्य सुबन्तत्वाभावात् । श्रितान्तत्वस्य च विभक्तिपूर्वभागे सुबन्तत्वस्य च विशिष्टे विश्रामात् । द्वयोः सामानाधिकरण्याभावात् ।

अत्राहुः—परमश्रितेति सम्बुद्ध्यन्तमुदाहरणीयम् । तद्धि प्रत्ययलक्षणेन सुबन्तं श्रितान्तं च स्वरूपेण श्रूयते इति ।

अथ सिद्धान्तेऽपि सुबन्तैः श्रितादिभिरित्यर्थे श्रितादीनां सुबन्तत्वं बाधितम् । तस्य विशिष्टवृत्तित्वात् । न च श्रितादीनां तत्प्रकृतिके लक्षणा। उक्तरीत्या सम्बुद्धौ चारितार्थ्यात् । तथा च कृष्णश्रितम् इत्यादि न स्यात् ।

अत्राहुः—

समासतद्धितविधौ सर्वत्र श्रितादीनां नडादीनां च तत्प्रकृतिके लक्षणैव । "खट्वा क्षेपे" "नदीभिश्च" इत्यादावभेदस्य बाधितत्वात् तत्र पूर्वपदस्य द्वितीयाद्यन्तत्वस्यावश्यकतया सम्बुद्ध्यन्तत्वानुपपत्तेः । "पूर्वकालैक-" इत्यादौ तत्सम्भवेऽपि "एकविभक्तौ" इत्यादिनिर्देशो न सिद्ध्येत् । तस्मात्सामान्यापेक्षज्ञापकबलेन ऐकरूप्याय सर्वत्र तत्तत्प्रकृतिके लक्षणेति स्थिते इहत्यभाष्यवृत्त्योः कैयटहरदत्तकृतं भङ्क्त्वाव्याख्यानमनादेयम् ।

यत्तु श्रितादीनां कृदन्तत्वेन "गतिकारकोपपदानाम्-"

इति सुबुत्पत्तेः प्रागेव समास इष्टः, अन्यथा 'काष्ठश्रितेयः' न-सिद्ध्येत् । "प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च" ग्रहणात् । अत एव किल प्राचा श्रितादिभिरित्येव व्याख्यातम् नतु सुबन्तैरिति ।

तन्न । प्रधानस्त्रीप्रत्यये तदादिनियमाभावात् । "स्त्रीभ्यो ढक्" इति स्त्रीप्रत्ययग्रहणेन कष्टश्रिताशब्दादेव ढगुत्पत्त्या काष्टश्रितेयसिद्धेः । न च कदाचिच्छ्रिताशब्दादप्यापत्तिः । असामर्थ्यात् । "कर्तृकरणे कृता–" इत्यादिवत्कारकतद्विशेषयोः "द्वितीयाश्रित–" इति सूत्रे ऽनुपादानाच्चेति ।

अन्ये तु श्रितादिप्रकृतिकसुबन्तेनेति नान्तरीयकतया प्रकृतिर्विशेषणीयेति श्रिताद्यन्तप्रकृतिकेन सुबन्तेनेति, नडादि-प्रकृतिकषष्ठ्यन्तादित्यत्र च नडाद्यन्तप्रकृतिकषष्ठ्यन्तादित्यर्थ-स्यापत्त्या–कष्टं परमश्रितः, सौत्रनाडिः इत्यादावतिप्रसङ्गता-दवस्थ्यम् । अतो वार्त्तिककृतो वाचनिकमेव तदन्तविधिवारणं-मित्याहुः ।

अस्यापवादमाह–"उगित् इति" । उगिता वर्णेन च प्रातिप-दिकं विशेष्यते । अतस्तत्र प्रत्ययविधावपि तदन्तविधिर्भव-त्येवेत्यर्थः । महान्तमतिक्रान्ता अतिमहती । "उगितश्च" इति ङीप् । नच गौरादित्वान्ङीषा सिद्धिः । "अनुपसर्जनात्" इति तत्राधिकृतत्वात् ।

अन्ये तु गौरादिषु महद्बृहदित्यनयोः प्रामादिकः पाठः । 'महते सौभगाय' इत्यादौ विभक्तेरुदात्तत्वार्थं "शतुरनुमो नद्यजादी" इति सूत्रे नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्या-नारम्भात् ङीपोऽप्युदात्तसिद्धेरित्याहुः ।

वर्णग्रहणे यथा—"अत इञ्" । अदन्तात्प्रातिपदिकादि-

त्यर्थः । दाक्षिः । न च सामर्थ्यात्तदन्तविधिः । अस्यापत्यम् इः कामः इत्यत्र चारितार्थ्यात् । "बाह्वादिभ्यश्च" इत्युत्तरत्र वृद्ध्याद्युदात्तत्वाभ्यां ञित्त्वस्य तथात्वाच्च । न च औपगवादेरेव इञ्स्यात् न तु दाक्षिः इत्यत्र, अकारस्यानर्थकत्वादिति वाच्यम् । वर्णग्रहणेऽर्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः । अत एवैतत्सूत्रशेषे वार्त्तिकम्–

"अलैवानर्थकेन" इति ।

एवं च सङ्घातेनार्थवतैव तदन्तविधिः । तेन स्त्रियौ परमस्त्रियौ इत्यत्रैव "स्त्रियाः" इतीयङ् । न तु शस्त्र्यौ, शस्त्र्य इत्यत्र । तथा "इन्हन्पूषार्यम्णां शौ" "सौ च" इति नियमे हन् शब्देन प्लीहन्शब्दस्याग्रहणात् दीर्घः । पायसं करोति इत्यत्र "संपर्युपेभ्यः–" इति सुडभावः । गर्मुत्स्थातेत्यत्र[1] "उदः स्थास्तम्भोः" इति पूर्वसवर्णाभावः । उदित्यस्य तवर्गेण विशेषणात्, तोरित्यस्य निवृत्तेर्वा । "वा पदान्तस्य" इत्यतः पदग्रहणानुवृत्तावपि पदेन तस्यैव विशेषणात् ।

अथ हन्स्त्रीग्रहणयोरङ्गाधिकारीयत्वात् संशब्दस्य "एङः पदान्तात्–" इति पदाधिकारीयत्वात्, "उदः स्थास्तम्भोः" इत्यस्याप्युक्तरीत्या तथात्वात् "पदाङ्गाधिकारे तस्य तदुत्तरपदस्य च" इत्यत्र केवलपदाधिकारस्यापि ग्रहणात्, प्लीहन्शब्दे हन् इत्यस्य अङ्गत्वोत्तरपदत्वान्यतराभावात्प्रसक्तिरेव नास्ति, तस्माद् "अलैवानर्थकेन" इति व्यर्थमिति चेन्न ।

"पदाङ्गाधिकारे" इत्यस्यैव भाष्ये प्रत्याख्यानात् ।

---

१ गर्मुत्सुवर्णतृणयोरितिकोशात् गर्मुच्छब्दस्तृणवाची ।

"अलैवानर्थकेन" इति वचनेनार्थवता तदन्तविधेः सूत्रेणैव सम्भवात् । तदारम्भे तु परमश्चासावतिमहांश्चेति परमातिमहान् इति न स्यात् । अतिमहच्छब्दस्य महच्छब्दोत्तरपदत्वेऽप्यनङ्गत्वात् । विशिष्टस्य महदुत्तरपदत्वाभावात् । उत्तरपदेति समासान्त्यावयवस्यैव ग्रहणात् । "सान्तमहतः" इति दीर्घस्य, "उगिदचाम्" इति नुमश्च दुर्लभत्वात् । सूत्रेण तु तदन्तविधिना तत्सिद्धेः । "ग्रहणवता–" इति निषेधस्य समासप्रत्ययविधिमात्रविषयकत्वात् ।

अत्र वार्त्तिकम्—

"अकच्प्रत्ययः सर्वनामाव्ययधातुविधावुपसंख्यानम्"।

सर्वके । सर्वनामत्वाच्छीभावः । उच्चकैः । अव्ययत्वात् सुपो लुक् । 'उच्चकैः अधीयान' इत्यत्र "अव्ययानां न" इति निघातप्रतिषेधः । उच्चकैर्मुखम् इति । "नाव्ययादिक्शब्द–" इति उत्तरपदाद्युदात्तत्वनिषेधः । भिनत्ति । अत्रागमानुदात्तत्वेन प्रत्ययस्वरस्य बाधितत्वात् विशिष्टो धातुस्वर इति केचित् ।

अन्ये तु अभिनोऽत्र इति "दश्च" इति धातोर्विधीयमानं रुत्वमित्याहुः । न हीदं तद् नापि तदन्तमित्युपसंख्यानारम्भः।

यद्वा तदन्तान्तस्येति सूत्रार्थः । सर्वशब्दस्य योऽन्तोऽकारः स एव सर्वकशब्दस्यान्त इति । एवमुत्तरत्रापि । अन्वर्थसंज्ञाऽऽक्षिप्तस्य संज्ञिनः सर्वादिभिः, अव्ययसंज्ञाक्षिप्तस्य स्वरादिभिः, धातुसंज्ञाभाजां वाप्रकाराणां भूवादिभिर्विशेषणात् । उत्तरपदलोपश्च अत्र वाचनिको न तु उष्ट्रमुखादिवद्गम्यमानार्थस्य सामर्थ्यान्निवृत्तिरिति केचित् । चरमावयव एव अवयवबुद्ध्या तदन्तस्य सर्वादिशब्दान्तत्वव्यपदेशः ।

अथवाऽवयवे समुदायरूपारोपात् तदन्तत्वम्, पार्श्वायः-

शूलादिषु गौणेनाप्यर्थेन शास्त्रव्यवहारदर्शनादित्येके ।

मध्यपातिनामकजादीनां तदेकदेशत्वात्तत्त्वबुद्धिविघातकत्वं नास्तीति चेन्न । अन्यूनानधिकानामेव संज्ञाविधानात् । नित्यानां शब्दानां विकारोपजनराहित्येन सर्वसर्वकशब्दयोर्भेदात् ।

वस्तुतस्तदेकदेशभूतं तद्ग्रहणेन गृह्यते । "नेदमदसोः"इत्यत्र अकोः इति प्रतिषेधाज्ज्ञापकात् । अन्यथा इदमदसावुद्दिश्य विहितस्य कार्यस्य सककारयोरप्रसक्तेरिति दिक् ।

प्रकृतसूत्रप्रयोजनवार्तिकानि—

"प्रयोजनं सर्वनामाव्ययसंज्ञायाम्" ।

सर्वे, परमसर्वे, उच्चैः, परमोच्चैः ।

"उपपदविधौ भयाढ्यादिग्रहणम्" ।

भयङ्करः, अभयङ्करः, आढ्यङ्करणम्, स्वाढ्यङ्करणम् ।

भयाढ्यादीनां कर्मविशेषणताऽऽश्रयणात् । "क्षेमप्रिय–" इत्यादौ तु कर्मणा क्षेमादयो विशेष्यन्ते इति तदन्तविधेरप्रवृत्तिः ।

"ङीब्विधावुगिद्ग्रहणम्" ।

भवती, अतिभवती । महती, अतिमहती ।

"प्रतिषेधे स्वस्रादिग्रहणम्" ।

स्वसा, परमस्वसा, दुहिता, परमदुहिता । ऋदन्तत्वात्प्राप्तस्य ङीपो "न षट्स्वस्रादिभ्यः" इति प्रतिषेधः । नच विधावेव विशेषणं तदन्तस्य संज्ञा न तु प्रतिषेधेऽपीति वाच्यम् । विधिपरस्य कर्मव्युत्पत्त्योभयपरत्वात् । स्वस्रादिभिः प्रातिपदिकस्य विशेषणात् तदन्तविधिः ।

"अपरिमाणबिस्ताचितग्रहणं च प्रतिषेधे" ।

द्विबिस्ता, द्विपरमाबिस्ता, त्रिबिस्ता, त्रिपरमाबिस्ता । "अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि" । द्विगुना

आक्षिप्तमुत्तरपदं बिस्तादिभिर्विशेष्यते इति तदन्तविधिः ।

"दितिग्रहणं च" ।

दितेरपत्यं दैत्यः । अदितेरपत्यम् आदित्यः । "दित्यदित्यादि–" इतिसूत्रे अदितिग्रहणं न कार्यम् । न च परमदित्यादिपदेभ्योऽपि ण्यप्रसङ्गः । अनभिधानात् ।

"रोण्या अण्" ।

आजकरौणः, सैंहकरौणः ।

"तस्य चेति वक्तव्यम्" ।

रौणः । न च "स्वं रूपम्" इति रोणीशब्दग्रहणम् । वार्तिककृता तदनुवृत्तेरनङ्गीकारात् । अतएव "आद्यन्तवद्"इत्यत्र "येन विधिस्तदन्तत्वे" इति प्रयोजनमुक्तवान् । अन्यथा आद्यन्तवद्भावाभावेऽपि "अचो यत्"इत्यत्र तदन्तविधिना जेयम् इत्यादेः, स्वरूपग्रहणाच्च अध्येयमित्यादेः सिद्धिः । न च व्यपदेशिवद्भावेन केवलस्यापि तदन्तत्वम् । "अप्रातिपदिकेन" इति तन्निषेधात् । तत्र च लिङ्गं–"पूर्वादिनिः""सपूर्वाच्च"इति योगद्वयवचनम् । अन्यथा "पूर्वान्तादिनिः" इति ब्रूयात् । व्यपदेशिवद्भावेन केवलादपि तत्सम्भवात् ।

न च रोणीशब्दो ङ्यन्तत्वात्प्रातिपदिकमेव न भवतीति वाच्यम् । "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि" इति परिभाषया स्त्रीप्रत्ययान्तानामप्युक्तपर्युदासे भेदप्रतियोगित्वेनोपादानात् । "तस्य च" इति वचनं तु न पूर्वोक्तस्यैव शेषः, अपि तु वक्ष्यमाणानामपीति बोध्यम् ।

"रथसीताहलेभ्यो यद्विधौ" ।

रथ्यः, परमरथ्यः, सीत्यम्, परमसीत्यम् । हल्या, परमहल्या । ठग्विधौ तु तदन्ताविध्यभावात्तदभावः ।

"सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य" ।

सुपाञ्चालकः, सुमागधकः, सर्वपाञ्चालकः, सर्वमागधकः, अर्द्धपाञ्चालकः, अर्द्धमागधकः, पूर्वपाञ्चालकः, पूर्वमागधकः ।

"ऋतोर्वृद्धिमद्विधाववयवानाम्" ।

ऋतुवाचिनः शब्दाद्यो वृद्धिमान् प्रत्ययस्तद्विधाववयववानां तदन्तविधिरित्यर्थः । शरदः पूर्वो भागः पूर्वशरत्, तत्र भवं 'पूर्वशारदम्' । "सन्धिवेलाद्यृतुनक्षत्रेभ्यः" इत्यण् । "अवयवादृतोः'–' इत्युत्तरपदवृद्धिः । वृद्धिमदिति किम् । "प्रावृष एण्यः" इत्यत्र तदन्तविधिर्मा भूत् । तेन पूर्वप्रावृषम् इति ऋत्वणेव । अवयवानां किम् । पूर्वस्यां शरदि भवं पौर्वशारदिकम् इत्यत्र कालाट्ठञ् एव । तत्र यथाकथञ्चित्कालवाचिनां ग्रहणम् नतु ऋतुलक्षणोऽण् ।

"ठञ्विधौ संख्यायाम्" ।

द्वे षष्टी परिमाणमस्येत्यर्थे "तद्धितार्थे" इति समासे "आर्हादगोपुच्छसङ्ख्या–" इति ठक् न । तदन्तविधिसत्त्वे संख्यावत्तदन्तादपि ठक्प्रतिषेधात् । तेन "प्राग्वतेः"इति ठञ् । द्विषाष्टिकः । न च "अध्यर्द्धपूर्वाद्" इति लुगापत्तिः । "सोऽस्यांशवस्नभृतयः" इत्यतः सोऽस्येत्यनुवृत्तावपि "तदस्य परिमाणम्" इत्यत्र प्रत्ययार्थसमर्थविभक्त्योः पुनर्निर्देशाद् लुक्संबद्धात्तस्मात्पुनर्निर्देशस्य लुगसम्बन्धरूपवैलक्षण्यज्ञापकत्वात् ।

यद्वा अनुवर्त्तमानेन सोऽस्येत्यनेन सहितं परिमाणं संख्यायाः इत्येतावद् प्रत्ययविधायकम् । तस्य लुकि "तदस्य परिमाणम्" इति वचनसामर्थ्यात्पुनस्तत्सजातीयः प्रत्ययः । न च तस्यापि लुगापत्तिः । विधानसामर्थ्यात् । द्विगुनिमित्तत्वाभावाद्वा ।

केचित्तु द्वे षष्टी भूत इति "तमधीष्टोभृतोभूतोभावी" इति ठक् । अनार्हीयत्वेनालुक्प्रसक्तेः । तत्र कालादित्यनुवृत्तावपि काले संख्येये वर्त्तमानात्षष्टिशब्दात्तदुत्पत्तिसम्भवाच्च । रमणीयादिभ्यस्त्वनभिधानान्न । परिमाणार्थे तु लुग्दुर्वारः ।

तथाहि—"तेन क्रीतम्" इत्यारभ्य "तदर्हति" इत्यतः प्राक्तनेष्वर्थेषु अर्हत्यर्थे, तदुत्तरमपि वर्त्तयतीत्यारभ्य "आकालिकडाद्यन्तवचने" इत्यन्तेषु चार्थेषु "प्राग्वतेः" इति ठञ् भवति । एवं च आर्हीयानार्हीयार्थसाधारण्येऽपि परिमाणार्थस्य ठञ आर्हीयत्वं दुर्वारम् । परिमाणस्य "तदर्हति" इत्यतः प्राक् निर्देशात् । "तदस्य" इत्यस्य पुनरुपादानमात्रेणार्हीयत्वक्षत्यभावात् । अन्यथा द्वौ निष्कौ परिमाणमस्येति द्विनिष्क इति जीवितपरिमाणादन्यत्रापि लुक् न स्यात् । "द्वित्रिपूर्वान्निष्काद्" इति वचनस्य परिमाणातिरिक्तार्हीयार्थेषु सावकाशत्वात् । तस्मादुक्तरीत्यैव द्विषाष्टिकसिद्धिः । 'तदस्य' इति तु त्यक्तव्यं, 'सोऽस्य' इत्यनुवृत्त्यैव सिद्धेरित्याहुः।तच्च द्विषाष्टिकशब्दस्याद्युदात्ततायामनपेक्षितायां ग्राह्यम् ।

"धर्मान्नञः" ।

धर्मं चरति धार्मिकः । अधर्मं चरति आधर्मिकः। "अधर्माच्च" इति नारभ्यम् ।

"पदाङ्गाधिकारे तस्य च तदुत्तरपदस्यच" इति प्रयोजनम् । "इष्टकेषीकामालानां चिततूलभारिषु" । इष्टकचितम्, पक्वेष्टकचितम्, इषीकतूलेन, मुञ्जेषीकतूलेन, मालभारी, उत्पलमालभारी । पदाङ्गेति पदशब्द उत्तरपदाधिकारपरः । तत्प्रयोजनस्यैवोदाहृतत्वादिति कैयटादयः । अत एव परममहत्परिमाणमित्यत्र षष्ठीसमासः । सामानाधिकरण्ये "आन्महतः"

इत्यात्वप्रसङ्गादिति किरणावल्यां व्याख्यातम् ।

उपायकृतस्तु कर्मधारयेऽपि न दोषः । न च "पदाङ्गाधिकारे"इति परममहच्छब्दस्याप्यात्वापत्तिः, तत्र केवलपदाधिकारस्यैव ग्रहणात् । उत्तरपदाधिकारस्यापि ग्रहणे "इष्टकेषीका–" इत्यत्र पुनस्तदन्तविध्युपसंख्यानवैयर्थ्यप्रसङ्गादित्याहुः ।

दीक्षितास्तु–'नेदं युक्तम् । उपसंख्यानस्याऽप्रसिद्धत्वात् । "इष्टकेषी–"इत्यादेस्तूक्तप्रयोजनत्वेनैवोदाहृतत्वात् ।

एतेन 'सततनैशतमोवृतमन्यतः' इति भारविप्रयोगे "ओजःसहोम्भस्तमसः" इति अलुकमाशङ्क्य वर्द्धमानोक्तरीत्या समादधानो दुर्घटवृत्तिकृदपि निरस्तः ।

यदपि 'ओजःप्रभृतीनां पूर्वपदं प्रति विशेष्यत्वाद्'इति हरदत्तः। तदपि वार्त्तिकविरोधादुपेक्ष्यम् । विशेषणविशेष्यभावनिर्णयायैव इहत्यवार्त्तिकानां प्रवृत्तिरिति कैयटवदेव स्वयमपि व्याख्यानात् । उक्तस्थले तु नपुंसके भावे क्तः । शेषे षष्ठी । तया समासः । सततं नैशतमोवृतं यत्रेति बहुव्रीहिः ।

यद्वा सततं नैशतमसो वृतं वृतिर्यत्र । 'वृतु वर्त्तने' घञर्थे भावे कप्रत्ययः' इत्याहुः ।

अङ्गाधिकारे प्रयोजनवार्तिकम्—

"प्रयोजनं महदप्स्वस्नप्तॄणां दीर्घविधौ",

महान्, परममहान् । आपः, स्वापस्तिष्ठन्ति । "न पूजनाद्" इति समासान्तनिषेधः । न च "द्व्यन्तरुपसर्गेभ्य" इति ईत्वापत्तिः । अप इति समासान्तविशिष्टस्यैव तत्रोपादानात् । तत्र च उक्तभाष्यस्यैव प्रमाणत्वात् । स्वसारौ, परमस्वसारौ । नप्तारौ, परमनप्तारौ ।

"पद्युष्मदस्मदस्थ्यनडुहो नुम्"

पद्भावस्य प्रयोजनम्। "पादः पद्" इत्यत्र पाच्छब्देनाङ्गविशेषणात् 'द्विपदः पश्य' पादयतेरप्रत्ययः पात्, पदः, पदेत्यादि। "क्वौ लुप्तम्" इति णिलोपो न स्थानिवत्। उत्तरपदाधिकारे तु पादशब्दस्यैव विशेष्यत्वम्। तेन "पदाऽऽज्यातिगोपहतेषु" इति पद्भावः–पादेनोपहतं पदोपहतम् इत्यत्रैव, न तु दग्धपादोपहतम् इत्यत्र। उत्तरसूत्रेऽप्येवम्। तेन "हिमकाषिहतिषु च" इति पद्भावः 'पत्काषी' इत्यत्रैव, न तु 'परमपादकाषी' इत्यत्रापि। 'परमपत्काषी' इति प्रयोगे तु परमपदेन पत्काषिशब्दस्य कर्मधारयः। यूयम्, अतियूयम्, वयम्, अतिवयम्, अस्थ्ना, परमास्थ्ना, अनड्वान्, परमानड्वान्।

"द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणम्"।

"दिव औत्" द्यौः, सुद्यौः। पन्थाः, सुपन्थाः। "न पूजनात्" इति समासान्तनिषेधः। पुमान्, परमपुमान्, गौः, सुगौः, सखा, सुसखा सुसखायौ, चत्वारः, परमचत्वारः, अनड्वाहः, परमानड्वाहः, त्रयाणाम्, परमत्रयाणाम्। 'परमपन्थाः, परमगौः' इति भाष्ये क्वाचित्कोऽपपाठः। परमसखायौ इत्यत्रापि बहुव्रीहिः। गौणत्वेऽप्यनङ्णित्त्वयोः प्रवृत्तिरिति कैयटः।

केचित्तु परमुदाहरणान्तरम्। अगौः, अपन्था इत्यत्र "पथो विभाषा" इति नञ्तत्पुरुषे समासान्तनिषेध इत्यर्थ इत्याहुः।

"प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्"। इदं चाङ्गसंज्ञासूत्रे योगविभागेन साधयिष्यते। इह प्रत्ययस्य स्वाक्षिप्तस्य धातुप्रत्ययाद्यवयवकसमुदायविशेषणत्वात्तदन्तविधिः।

इदं च संज्ञाविधौ न। "सुप्तिङन्तम्" इत्यन्तग्रहणात्। उत्तरपदाधिकारेऽपि न। "हृदयस्य हृल्लेखयदण्लासेषु" इत्यत्र

लेखपदस्य पृथगुपादानात् । अन्यथा अणणन्तत्वादेव सिद्धेः ।
उक्तस्यापवादमाह—

"प्रत्ययग्रहणे चापञ्चम्याः" इति ।

यत्र पञ्चम्यन्तात्परः प्रत्ययः कार्यान्तरविधानाय परिगृह्यते तत्र तदन्तविधिर्नेत्यर्थः । यथा "रदाभ्याम्" इत्यत्र । तत्र हि तदन्तविधिसद्भावे रेफदकाराभ्यां परो यो निष्ठान्तस्तदवयवस्य तकारस्य नत्वं स्यादित्यर्थापत्तौ 'दृषत्तीर्णः' इत्यत्र धात्ववयवतकारस्यापि नत्वापत्तिः । न च "संज्ञाविधौ प्रत्ययग्रहणं न" इत्यस्यात्रावकाशः । संज्ञाया विधेयत्वे एव तत्प्रवृत्तेः । नचैवं संज्ञाविधावित्यस्य वैयर्थ्यम् । तदन्तस्य संज्ञायां विधिप्रदेशेषु पुनस्तदन्तविधिना प्रत्ययान्तान्तस्य संज्ञा स्यादिति तन्निषेधसार्थक्यात् । पञ्चम्यन्तात्प्रत्ययविधौ तदन्तविधिर्नेति तु नार्थः । "ञितश्च तत्प्रत्ययाद्" इत्यत्र अञ्प्रत्ययादेव अञ्विधाने तस्यैवाङ्गसंज्ञायां वृद्धिस्वरयोः प्रसङ्गात् । "स्यतासी लृलुटोः" इत्यत्र धातोरित्यधिकारादपञ्चम्या इति निषेधात्, यद्वा लृलुटोर्विशेष्यत्वाश्रयणात्तदन्तविध्यभावः ।

"यस्मिन्विधिस्तदादावल्ग्रहणे" ।

सौत्रस्य तदन्तविधेर्वाचनिकोऽयमपवादः ।

दुराग्रहिणस्तु प्रकृतसूत्रे तस्मिन्नित्यस्य, "आदिरन्त्येन" इति सूत्रादादिग्रहणस्य, इतेति तृतीयान्तस्य चानुवृत्त्या इत्पदस्य च लक्षणया अल्परत्वाल्लभ्यत एतद् इत्याहुः ।

अपरे तु यान्तप्रत्ययस्यासम्भवेन प्रथमत्यागे कारणाभावात् यादावित्यर्थकेन "वान्तो यि प्रत्यये" इति सूत्रेणैवेयं परिभाषा ज्ञाप्यते इत्याहुः ।

अन्ये तु "गुणोऽपृक्ते" इत्यपृक्तग्रहणमत्र मूलम् । तद्धि

"उतो वृद्धिर्लुकि हलि" इत्यनुवृत्तौ क्रियते । हलीत्यनुवृत्तौ हलादौ इत्यर्थः स्यात् । अपृक्तग्रहणे तु 'मौर्णोत्' इत्यत्र वर्णमात्रे इत्याहुः । तेन "अचिश्नु" इत्यादौ अजादावित्यर्थो न तु अजन्त इति । तेन श्रियः, भ्रुवः इत्यादि । विशेषणेनैवायम् । अपवादस्योत्सर्गसमानाविषयकत्वात् । तेन "अमि पूर्वः" इत्यत्राचीत्यस्य विशेष्यत्वाश्रयणात् अभ्यचीत्यर्थो न त्वजादावमीति, विशेषणवैयर्थ्यात् । अमि योऽच् अमोऽवयव इति यावत् । तेन मकारसहितस्य पूर्वरूपं नेति दीक्षिताः ।

वृत्तिकारादयस्तु अमि परत इत्येवार्थः । अजनुवृत्तौ प्रमाणाभावात्, "आदेः परस्य" इत्यत एव दोषानवकाशात् ।

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ७३ ।

यत्समुदायघटकानामचां मध्ये पूर्वोऽच् वृद्धिसंज्ञः स वृद्धसंज्ञः स्यात् । आम्रगुप्तीयः । वृद्धाच्छः । बहुत्वमविवक्षितम् । शालीयः । व्यपदेशिवद्भावादेकस्यापि । जानातीति ज्ञा ब्राह्मणी । तस्या अयं ज्ञीयः । "वा नामधेयस्य वृद्धसंज्ञा वक्तव्या" । पौरुषेयसंकेतः संज्ञा । उभयत्र विभाषेयम् । देवदत्तादीनामप्राप्ते वामनादीनां च प्राप्ते आरम्भात् । देवदत्तीयः दैवदत्तः । "विधाय मूर्त्तिं कपटेन वामनीम्' इति श्रीहर्षः । "गोत्रोत्तरपदस्य च नित्यम्" । वृद्धसंज्ञा वाच्येत्यर्थः । कम्बलप्रियस्य चारायणस्य शिष्याः कम्बलचारायणीयाः । घृतरौढीयाः । रूढस्यापत्यं रौढिः । पूर्ववत् । 'ओदनपाणिनीयाः' । पणनं पणः ।

घञर्थे कः । तत इनिः । पणिनो गोत्रापत्यं 'पाणिनः' । अण् । "गाथिविदाथिकेशि–" इति प्रकृतिभावान्न टिलोपः । तस्य युवापत्यं 'पाणिनिः' । न च "ण्यक्षत्रियार्षञितः" इति इञो लुक् स्यात्, आर्षाद् यून्युत्पन्नत्वादिति वाच्यम् । "ऋष्यन्धक" इति विहितस्यैव तत्र ग्रहणात् । अस्य च सामान्यविहितत्वात् ।

यद्वा पाणिनशब्दस्य यौगिकत्वात्, लुग्विधौ च रूढस्यैव ग्रहणात्, "दाक्षीपुत्रस्य पाणिनेः" इति भाष्यवार्त्तिकनिर्देशाच्च । तस्य च्छात्रा इति विवक्षायां "यूनि लुक्" इति इञो लुक् । तेन "इञश्च" इत्यणोऽप्रवृत्तौ "वृद्धाच्छः" । न च प्रत्ययलक्षणेन इञन्तत्वानपायात् दोषतादवस्थ्यम् । "इञश्च" इत्यत्र "कण्वादिभ्यः" इत्यतो गोत्रे इत्यनुवृत्त्या तस्य च पारिभाषिकगोत्रपरतया यूनि तदप्रवृत्तेः ।

यद्वा गोत्रान्तादसमस्तवत्प्रत्ययो भवतीति वक्तव्यम् । पूर्वोक्तान्येवोदाहरणानि । पैङ्गलकाण्वाः । "कण्वादिभ्यो गोत्रे" इत्यण् । वृद्धत्वाभावान्न छः । गोत्रान्तादित्यस्यापवादो "जिह्वाकात्यहरितकात्यवर्ज्जम्" इति । कतशब्दो गर्गादिः । जिह्वाचपलः कात्यो जिह्वाकात्यः, हरितभक्षः कात्यो हरितकात्यः । तस्यच्छात्रा जैह्वाकाताः हारितकाताः । औत्सर्गिकोऽण् । "यस्येतिच" इत्यकारस्य "आपत्यस्यच तद्धितेऽनाति" इति च यकारस्य लोपः ।

त्यदादीनि च ७४ ।

वृद्धसंज्ञानि स्युः । इदमीयम्, किमीयम् । "वृद्धाच्छः" । त्वादायनिः, मादायनिः । "उदीचां वृद्धाद्" इति फिञ् । "प्रत्ययोत्तरपदयोश्च" इति त्वमादेशौ । चकारेण "वा नामधेयस्य"

इत्यादिवार्त्तिकोक्तार्थसिद्धिरिति न्यासकारः।

इहादिग्रहणं न सम्बध्यते, अच्सम्बद्धस्यैव तस्यानुवृत्तेः। यस्याचामादयस्त्यदादय इत्यन्वयस्य बाधितत्वात्। निर्धारणस्य सजातीयविषयकत्वनियमात्। त्यदादीनां चाज्रूपत्वाभावात्। पूर्वपक्षे तु त्वदीयः इत्यादौ छो न स्यात्। न च व्यपदेशिवद्भावः। "अप्रातिपदिकेन" इत्युक्तत्वात्। न च वचनसामर्थ्यम्। त्वत्पुत्राः इत्यादौ सावकाशत्वात्। आदिग्रहणानुवृत्त्यन्यथाऽनुपपत्त्या उपसर्जनानामपि त्यदादित्वसम्भवात्। अचामित्यस्य त्वनुवृत्तिरुत्तरार्थैव स्यात्। तस्मादिहादिग्रहणाननुवृत्तिरेव।

एङ् प्राचां देशे ७५।

मण्डूकप्लुत्या यस्याचामादिरित्यनुवृत्तिः। एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने। एणीपचनीयः, गोनर्दीयः, भोजकटीयः। "वृद्धाच्छः"। एङिति किम्। आहिच्छत्रः, कान्यकुब्जः। औत्सर्गिकोऽण्। विधेयसंज्ञासम्बन्धात्प्राचामित्याचार्यनिर्देशाद्विभाषालाभः। व्यवस्थितविकल्पश्चायम्। तेन क्रोडदेवदत्तशब्दयोरप्राग्देशवाचिनोर्वृद्धसंज्ञा। वृद्धसंज्ञत्वात् काश्यादित्वात् वृद्धलक्षणठञ्ञिठौ भवतः। प्राग्देशवाचिनस्त्वणेव। क्रौडो, दैवदत्त इति। "शैषिकेषु इति वक्तव्यम्"। सेपुरम्, स्कोनगरं च वाहीकग्रामौ। वृद्धत्वात् "वाहीकग्रामेभ्यश्च" इति ठञ्ञिठौ। सैपुरिकी, सैपुरिका, स्कौनगरिकी, स्कौनगरिका। शैषिकेषु इति वचनात् अपत्यविकारयोर्वृद्धलक्षणौ फिञ्मयटौ न भवत इति कुणिव्याख्यानाश्रयिणो भाष्यकारस्य मतम्। जयादित्यस्तु प्राचामिति देशविशेषणम्। प्राचि देशे विद्यमानानां पुंसां यो देश-

स्तदाभिधाने इति सूत्रार्थः । पूर्वमते मतशब्दाध्याहारप्रसङ्गात् । तेन देवदत्तो नाम वाहीकग्रामस्तस्य प्राग्देशत्वाभावात् दैवदत्तः इत्यत्र वृद्धत्वाभावादेव ठञ्ञिठौ न भवत इति व्याचख्यौ । अत्र पक्षे सैपुरी इत्यादिकं वचनेनैव साध्यम् । तयोर्वाहीकग्राम-तया तद्रीत्या वृद्धत्वाभावात् इति । देशे किम् । गोमती नाम प्राग्देशनदी । तत्र भवा मत्स्या गौमताः । नच देशग्रहणे नद्यपि ग्राह्या इति वाच्यम् । "विशिष्टलिङ्गो नदीदेशोऽग्रामाः" इत्यत्र पृथक् नद्याः उपादानात् ।

प्राग्देशविभागस्तु अमरेण उक्तः—

"शरावत्यास्तु योऽवधेः ।

देशः प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः"

शरावती नदीविशेषः उत्तरपूर्वाभिमुखीति हरदत्तादयः । नैर्ऋत्याः पश्चिमाब्धिगामिनी इत्यमरव्याख्यातारः । तस्या दक्षिणपूर्वस्यां दिशि व्यवस्थितो देशः प्राग्देशः । उत्तर-परस्यांतु उदग्देशः ।

तदुक्तम्—

प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा ।

विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥

वाहीकदेशस्तु प्रागुदग्वहिर्भूतः । "वहिषष्टिलोप" इति व्युत्पादनात् इति विवरणकाराः ।

दीक्षितास्तु "अव्ययात्त्यप्" इति सूत्रे "उदीच्यग्रामाच्च ब-ह्वचोऽन्तोदात्तात्" इत्यस्यावकाशः शिवपुरं 'शैवपुरः' । ठञः स एव । शाकलं नाम वाहीकग्रामः-इह उभयं प्राप्नोति इति भा-ष्ये वाहीकस्यापि उदग्रूपत्वं लभ्यते । हरदत्तादिभिरपि तथैव अनुवादाच्च । वाहीकदेशस्वरूपं तु कर्णपर्वणि—

पञ्चानां सिन्धुषष्ठानामन्तरे ये समाश्रिताः ।
वाहीका नाम ते देशा न तेषु दिवसं वसेत् ॥

धर्मवहिर्भूतत्वाद्वाहीका इति तात्पर्यम् । शतद्रूर्विपाशा इरावती वितस्ता चन्द्रभागेति पञ्च नद्यः । सिंधुनदस्तु षष्ठस्तन्मध्ये देशो बाहीक इति व्याख्यातारः । व्युत्पत्त्यन्तरमपि तत्रैव ।

वहिकश्च बहीकश्च विपाशायां पिशाचकौ ।
तयोरपत्यं वाहीका नैषा सृष्टिः प्रजापतेः ॥

एतद्विवेचनं च "बाहीकग्रामेभ्य" इत्यादौ उपयोक्ष्यते इत्याहुः ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमाध्यायस्य प्रथमे
पादे नवमाह्निकम् । पादश्चायं समाप्तः ।

द्वितीयपादप्रारम्भः ।

गाङ्कुटादिभ्योऽञ्णिन्ङित् ।१।

गाङित्यादेशग्रहणम् । ङकारस्यानन्यार्थत्वादिति द्वितीये वक्ष्यामः । तस्मात्कुटादिभ्यश्च परे ञ्णिद्भिन्नाः प्रत्यया ङिद्वत्स्युः । अत्र कुटादित्वं कुटोच्चारणोत्तरमुच्चारितत्वम् । तच्च कुटादिष्वेव । तथाऽपि तद्गुणवहुव्रीहिणा कुटत्वेन रूपेण कुटस्यापि बोधः । नचोभयसाधारणैकज्ञानविषयत्वादिना रूपेण कुटस्य तदादीनां च बोधोऽस्तु इति वाच्यम् । अतद्गुणसंविज्ञानस्थले वहुव्रीहिघटकपदार्थव्यावृत्तरूपेणैव बोधस्य वाच्यत्वात् । तत्साधारण्यार्थमत्रापि तथाकल्पनात् । उभयत्राप्यन्यपदार्थस्यैकरूपेणैव प्रतीतेः । वर्त्तिपदार्थस्योपलक्षणत्वविशेषणत्वाभ्यामेव बहुव्रीहिद्वैविध्यात् ।

प्राञ्चस्तु—अतद्गुणसंविज्ञाने लक्ष्यमात्रवृत्तिना तद्गुणे तूभयसाधारण्येन धर्मेण बोध इति विभागात् तद्गुणस्थले शक्यलक्ष्योभयसाधारणधर्म एव लक्ष्यतावच्छेदक इति वदन्ति । अत एव क्षणभङ्गवादे शब्दादिरित्यत्र चरमशब्दभिन्नत्वसमानाधिकरणसत्त्वेनालीकव्यावृत्तेन सर्वानुगम इति मिश्रादिभिर्व्याख्यातम् ।

ङिदिति चातिदेशः । तदुक्तम्—

'परत्र परशब्दः प्रयुज्यमानो विनाऽपि वतिं तदर्थं गमयति' इति । अध्यगीष्ट । "घुमास्थागापाजहातिसां हलि" इति ।

हलादिक्ङिदार्द्धधातुकनिमित्तक ईकारादेशः । 'कुट कौटिल्ये' चुकुटिथ, कुटिता । "क्ङितिच" इति गुणनिषेधः । 'कुङ् शब्दे' एतत्पर्यन्ताः कुटादयः ।

अथ कथं 'प्रवृत्तो वैलक्ष्यात्किमपि लिखितुं दैवहतकः' इत्यमरः । 'चित्रेणापि न शक्यते विलिखितुं सर्वाङ्गसंकोचभाक्' इति सुबन्धुश्च । लिखतेः कुटादावनन्तर्भावात् । अत एव 'विलेखितुं भीमभुवो लिपीषु' इति श्रीहर्ष इति ।

अत्र वदन्ति–प्रमाद एवायम्, संज्ञापूर्वकविधेरनित्यतया वा समाधेयम् ।

केचित्तु एकशेषेण कुटस्यादिरिति तत्पुरुषं व्याख्याय लिखतेरपि प्रकृतसूत्रेण संग्रह इत्याहुः ।

तन्न । 'लिखिता' इत्यादीनां वृत्तिकारहरदत्तादिभिरुदाहृतत्वात् । "आलेखने" इति सौत्रप्रयोगाविरोधाच्चेति ।

इह पूर्वपक्षत्रयं भाष्ये निरस्तम् । तथा हि–गाङादिभ्यः परे प्रत्यया ङितः स्युरित्यर्थे बाधः । तत्परस्य प्रत्ययस्य इत्संज्ञकङकाररहितत्वात् । सत्त्वे वा वचनान्तरसिद्धत्वादेतद्विधिवैयर्थ्यम् । न च चङादेरेवानेन विधानम् । अञ्णिदिति पर्युदासवैयर्थ्यात् । तदुक्तम्–"ङित्किद्वचने तयोरभावादप्रसिद्धिः" इति । किद्ग्रहणमुत्तराभिप्रायम् ।

अस्तु तर्हि गाङादिप्रकृतिकाञ्णिद्भिन्नप्रत्ययानुवादेन ङित्कितोर्विधिरिति द्वितीयः । उक्तप्रत्ययस्य ङकार इत्संज्ञको भवतीत्यर्थः । इद्धर्माक्रान्तस्यैव विधानादादौ मध्ये ऽन्ते वेति देशविशेषस्यानपेक्षणात् । इताश्च धर्मोऽश्रूयमाणानामपि कार्यविशेषकत्वम् । मैवम् । टित्त्वकित्त्वमित्त्वानामभावाद् अनन्तरार्थे च बहुव्रीहेरभावात् ङिदिति तत्पुरुषस्यैव वाच्यत्वात् "आदेः प-

रस्य" इति आदेः स्थाने ङकारादेशप्रसङ्गात् । न च 'कुटिता' इत्यादौ प्रासिद्धाङित्त्वाश्चङादय एव विधीयन्तामिति वाच्यम् । तेषां तदर्थोक्तावसामर्थ्यात् । तृङादीनां चात्र प्रसिद्धिविरहात् । एतद्वचनादेव तेषामपूर्वविधिस्वीकारे तु ङिच्चेत्यन्तादेशत्वप्रसङ्गात् । न चानुबन्धानामसतामेव कार्यनिर्वाहकत्वात्कथमादेशत्वम् आदेशस्य भावरूपतयाऽन्यप्रसङ्गसंभवादिति वाच्यम् । लोपस्येव वचनसामर्थ्यादित्संज्ञकङकारस्याप्यादेशत्वसम्भवात् । स्थानिनिवृत्त्युत्तरं ङकारस्य निवृत्तिसम्भवात् । न च षष्ठीनिर्देशाभावः । पञ्चम्याः प्रथमायाः षष्ठीत्वप्रकल्पनोपपत्तेः ।

तदेतदुक्तम्—

"भवतीति चेदादेशप्रतिषेधः" इति ।

अस्तु तर्हि गाङादिभ्यः परोऽञ्णित् ङित्संज्ञको भवतीति तृतीयः । मैवम् । क्ङितीतिशब्दात्किति ङितीत्यनयोर्भेदात्संज्ञिनामप्रतीत्यापत्तेः । परिच्छिन्नपरिमाणानामेव संज्ञात्वात् । न्यूनातिरिक्तशब्दोच्चारणस्य संज्ञास्वरूपानुपलम्भात् । ङित्संज्ञाया व्यचेः कुटादित्ववचनात् संप्रसारणार्थतया, लिटः कित्संज्ञायाश्च "वचिस्वपि" इति संप्रसारणार्थतयाऽप्युपपत्तेः, गाङ्कुटादिभ्यः परस्य ङित्संज्ञा तु न्यायवशादप्रयोजनैव स्यात् । "क्ङिति च" इत्यादौ यौगिकस्यैव ग्रहणसम्भवात् । किति ङितीत्यादौ च कृत्रिमत्वादनयोरेव ग्रहणं स्यात् । नच चङादीनां ङित्त्ववैयर्थ्यम् । यत्र संज्ञास्वरूपानुपलब्धिस्तत्र क्ङिति प्रदेशेषु ग्रहणार्थत्वात् । तदुक्तम्—

"संज्ञाकरणे क्ङिद्ग्रहणेऽसंप्रत्ययः शब्दभेदाद्" इति ।

तस्मादतिदेश एव स्थितः ।

ननु सिसृक्षति, दिदृक्षते, इत्यत्र "हलन्ताच्च" इति सनः

क्त्विविधानेऽपि "सृजिदृशोर्झल्यमकिति" इत्यमागमः स्यात् । तदुक्तम्—

"तद्वदतिदेशेऽकिद्विधिप्रसङ्गः" इति । अतिदेशानां स्वाश्रयानिवर्त्तकत्वात् । मैवम् । किति न भवतीति व्याख्यानात् । तदुक्तम्—

"सिद्धन्तु प्रसज्यप्रतिषेधाद्" इति ।

अथ चुकुटिषति इत्यादौ सनो ङित्त्वात् तदन्तस्यात्मनेपदापत्तिः । मैवम् । उपदेशे यो ङित्तदन्तादिति व्याख्यानात् ।

भाष्ये तु ङितीव ङिद्वदिति सप्तम्यर्थे वतिमाश्रित्य पूर्वस्य ङितीव कार्यमतिदिश्यते ऽतो न ङिदन्तत्वानिबन्धनमात्मनेपदमिति व्याख्यातम् । यद्वार्तिकं—"सिद्धं तु पूर्वस्य कार्यातिदेशाद्" इति । यद्यपीह वतिर्नोपात्तस्तथाऽप्यतिदेशस्य यावत्कार्यार्थत्वाभावाद्व्याख्यानाद्विशिष्टकार्यार्थ एवातिदेशः । उपदेशग्रहणानुवृत्त्या चोक्तस्थले नात्मनेपदमिति सामर्थ्यात् पूर्वस्य कार्यातिदेशोऽयमिति भाव इति कैयटः ।

विज इट् । २ ।

विजेः पर इडादिप्रत्ययो ङिद्वत् । वृद्धिसंज्ञासूत्रादादिपदानुवृत्त्या इडादिरित्यर्थलाभः । आदिभूतस्य इटो ङित्त्वे प्रयोजनाभावात्तदादिप्रत्ययलाभः । अत एवार्थवद्ग्रहणप्रत्ययाप्रत्ययपरिभाषाभ्यामुत्तमपुरुषैकवचनस्येटो ग्रहणे प्रसक्तेऽपि तन्न भवति, आद्यवयवत्वाभावात् इति न्यासकारः ।

अन्ये तु आगमग्रहणस्यावश्यकतया तस्य गुणनिमित्तत्वाभावेन ङित्त्ववैयर्थ्यात् मत्वर्थलक्षणया इड्वान् प्रत्ययो गृह्यते । इट् च प्रत्ययस्यादिरेवेति फलितार्थः—इडादिप्रत्यय इति । अत आदिग्रहणानुवर्त्तनं व्यर्थमित्याहुः ।

'विजिर् पृथग्भावे' इत्यस्य नेह ग्रहणं व्याख्यानात् । इटोऽसम्भवादिति तु हरदत्तः । केचित्तु विवेजिथ इत्यत्र थलि क्रादिनियमादिट् सम्भवत्येव । पित्त्वेन "असंयोगाल्लिट्" इति कित्त्वस्याप्रवृत्तेरित्याहुः ।

'ओविजी भयचलनयोः' । प्रायेणायमुत्पूर्वः । उद्विजिता, उद्विजिष्यते ।

विभाषोर्णोः ३ ।

'ऊर्णुञ् आच्छादने' । अदादिः । अस्मात्पर इडादिप्रत्ययो वा ङिद्वत् । ऊर्णुविथ, ऊर्णुनविथ, ऊर्णुविता, ऊर्णविता ।

सार्वधातुकमपित् ४।

अपित्सार्वधातुकं ङिद्वत् । तुदति । शस्य ङित्त्वान्न लघूपधगुणः । अतिदेशे कल्प्यमानो वतिस्तृतीयान्तादेव नतु षष्ठ्यन्तात् । सादृश्यानुयोगिनि प्रथमाश्रवणाद् । अन्यथा षष्ठीसप्तम्योरन्यतरस्यापत्तेरिति दीक्षिताः ।

ननु सूत्रे वतेरभावाद्विवरणवाक्य एव तत्प्रयोगात् तदनुरोधेन सूत्रे सप्तम्याद्यन्तत्वापादनं न युक्तम् । विवरणवाक्ये तदापादने त्विष्टापत्तिरेव । सूत्रे उभयोः समानविभक्त्यन्तपदप्रयोगबलादेवातिदेशलाभादुपजीव्यविरोधाच्चेति ।

नैवम् । तृतीयान्तादेव वतिमाश्रित्य विवरणवाक्येऽपि सौत्रविभक्तिसम्भवे तत्रापि विभक्त्यन्तरकल्पने प्रमाणाभावात् । कैयटस्याप्यत्रैव स्वारस्यम् ।

अथ सार्वधातुकग्रहणं व्यर्थम् । श्नानिपः पित्त्वेन तन्ङित्त्वस्य ज्ञापकत्वाभावेऽपि चङादीनां ङित्त्वेनार्द्धधातुकानां ङि-

त्त्वाभावस्य ज्ञाप्यत्वात् । न चैवं तातङो ङित्त्वेन सार्वधातुकानामप्यङित्त्वज्ञापनं स्यादिति वाच्यम् । तिपः पित्त्वेनाऽप्राप्तप्रापणार्थत्वात् । ज्ञापकं च सजातीयापेक्षम् । तेन सार्वधातुकस्याप्यङित्त्वज्ञापनस्यानापत्तिः ।

मैवम् । सजातीयाविषयकत्वे चङ्ङौ लुग्विकरणानां, नजिङ् वर्तमानकालानाम्, ङ्वनिप् भूतकालानाम्, अथङ् औणादिकानाम्, नङ् घञर्थीयानां ज्ञापकः स्यादित्यार्द्धधातुकान्तराणां ङित्त्वापत्तिः । न च प्रत्ययत्वव्याप्यधर्मेण साजात्यं विवक्षणीयम्, न तूक्तधर्मैरिति वाच्यम् । विनिगमकाभावात् ।

स्यादेतत् । अपिदिति पर्युदासः प्रतिषेधो वा । नाद्यः । च्यवन्ते, प्लवन्ते इत्यादौ शपोऽन्तादेशस्य च "अतो गुणे" इति पररूपे परस्यापित इहाश्रयणादेकादेशस्यादिवद्भावात्पिद्भिन्नस्य सत्त्वात् ङित्त्वेन गुणनिषेधापत्तेः । न च पररूपात्पूर्वमेव गुणः । पररूपस्य नित्यत्वादन्तरङ्गत्वाच्च ।

यद्यपि सार्वधातुकावयवस्याकारस्यैकादेशः तथाऽपि परं प्रत्यादिवत्त्वादन्तशब्दोऽपित् सार्वधातुकं भवत्येवेति ङित्त्वप्रसङ्गः । च्यवे इत्युत्तमैकवचने तु सर्वस्यैव सार्वधातुकस्यैकादेशान्ङित्त्वप्रसक्तिसौलभ्यम् । तदुक्तम्—

"अपित् ङिदिति चेच्छबेकादेशप्रतिषेधः" इति ।

न द्वितीयः । तुदानि, लिखानि । "आडुत्तमस्य पिच्च" इत्यादू । पिदपितोरेकादेशस्यादिवद्भावात् पिन्नेति ङित्त्वप्रतिषेधापत्तेः । तदुक्तम्—

"न पित् ङिदिति चेदुत्तमैकादेशप्रतिषेधः" इति ।

अत्र भाष्यम्—"उभयथाऽपि न दोषः । एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानात्" इति ।

यद्यपि च्यवन्ते इत्यत्र "वार्णादाङ्गम्" इति समाधानं सुलभम्, तथाप्युभयसाधारणपरिहाराभिधित्सया तन्नाश्रितमिति कैयटः ।

असंयोगाल्लिट् कित् ५ ।

असंयोगात्परोऽपिल्लिट् कित्स्यात् । चक्रतुः । "सार्वधातुकार्द्धधातुकयोः" इति गुणे प्राप्ते "क्ङिति च" इति निषेधः । "ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्विप्रतिषेधेन" । बिभिदतुः, बिभिदुः इत्यादौ कित्त्वं नित्यं गुणस्त्वनित्यः । वव्रते, वव्रधे इत्यादौ द्वयोरप्यनित्यत्वम् । कित्त्वे कृते गुणस्येव गुणे कृते रपरत्वेन संयोगात्परतया कित्त्वस्याप्यप्रसक्तेः । ततश्च परत्वाद् गुण एव स्यादिति विप्रतिषेधारम्भः । न च यथा क्सस्य कित्त्वसामर्थ्याद् गुणो बाध्यते तथेहाप्यतिदेशसामर्थ्यादिति वाच्यम् । क्सस्य कित्करणे प्रयोजनाभावाद् अनवकाशत्वात् । इह तु सम्प्रसारणेन कृतार्थत्वाद् दुर्बलातिदेशप्राप्तस्य गुणनिषेधस्य दुर्बलत्वाद् गुणेन सह विप्रतिषेधानुपपत्तिः । तातङ्न्यायो ऽप्यत्रानुसन्धेयः । तस्मात्परशब्दमिष्टवाचकमाश्रित्य सूत्रेण संगृहीतमेवार्थं स्फुटीकर्त्तुं वार्त्तिकारम्भः ।

स्यादेतत् । गाङादिप्रकृतिकस्य प्रत्ययस्य ङित्त्वम्, असंयोगादित्यादौ च कित्त्वमतिदिश्यते इति वैषम्ये किं बीजं उभयत्राप्यन्यतरस्यैवातिदेशौचित्यात् । एतेनोपदेशो ऽपि व्याख्यात इति चेत् । अत्र वार्त्तिकम् ।

"पृथगनुबन्धत्वे प्रयोजनं वचिस्वपियजादीनामसम्प्रसारणम्", "सार्वधातुके चङादिषु जाग्रो गुणविधिः", "कुटादीनामिट्प्रतिषेधः" "क्त्वायां कित्प्रतिषेधश्च"।

सुप्त इत्यादिवत् स्वपित इत्यादौ सम्प्रसारणं स्यात्। चङादयश्च "चङङ्नजिङ्ङ्वनिबथङ्नङः" इतिभाष्यम्। शून इत्यादिवदशिश्वियद्, अश्वदित्यत्रापि स्याद्, सुप्त इत्यादिवत् स्वप्न इत्यत्रापि स्यात्। इष्टवान् इतिवत् यज्वा इत्यत्रापि स्यात्। उषित इतिवत् आवसथ इत्यत्रापि स्यात्। रुदिविदिभ्यां ङिदित्यतो ङिदित्यनुवृत्तौ "उपसर्गे वसेः"इत्यथप्रत्ययः। इष्टम् इतिवत् यज्ञ इत्यत्रापि स्यात्। "यजयाच—"इति नङ्। जागृत इत्यादिवत् जागरित इत्यादावपि अङितीति पर्युदासः स्यात्। गुणविधिरित्यत्राऽकारप्रश्लेषपरित्यागे तु दृष्टान्तदार्ष्टान्तिकवैपरीत्येन व्याख्येयम्। लूत्वा पूत्वा, इत्यादिवत् नुवित्वा इत्यादावपि "श्रयुकः किति" इतीट्प्रतिषेधः स्यात्। यद्यपि पूर्वस्य कार्य एवातिदेशः स्थापित इट्प्रतिषेधश्च परस्यैव कार्यः तथापि कितीतिसप्तमीनिर्देशात् इट्प्रतिषेधस्याप्यतिदेशः स्याद् इत्येतावन्मात्रेणोक्तमिति कैयटः। देवित्वा, सेवित्वा इत्यादिवत् कुटित्वा पुटित्वा इत्यत्रापि "न क्त्वा सेट्" इति कित्त्वप्रतिषेधः स्यात्। विशेषाभावादौपदेशिकवदातिदेशिकस्यापि कित्त्वस्य बाधसम्भवात्। न चौपदेशिकत्वस्य प्रथमोपस्थितत्वात्तद्बाधेन चरितार्थो निषेधः कथमातिदेशिककित्त्वं बाधेत। अत एव रागप्राप्तहिंसानिषेधेन चरितार्थम् "न हिंस्यात्सर्वा भूतानि" इति शास्त्रं "अग्नीषोमीयं पशुमालभेत" इत्यादिविहितहिंसायां न प्रवर्त्तते इति वाच्यम्। अप्राप्तस्यैवातिदेशात्। क्त्वायां कित्त्वातिदेश एव न स्यादित्यत्र तात्पर्यात्। चकारस्य यथाश्रुतत्वे तु

इट्प्रतिषेधसमुच्चयस्तदर्थः । लूत्वा, पूत्वा, इत्यादिवत् णुवित्वा, धुवित्वा इत्यत्रापि "श्र्युकः किति" इति इट्प्रतिषेधः स्यात् । 'णू स्तवने' 'धू विधूनने'। अत एव 'परिणूताखिलोदयः' इति-श्रीभागवतम् ।

भाष्यकृतस्तु—नैतत् प्रयोजनम् । ङित्त्वातिदेशेऽप्यौपदेशिककित्त्वसत्त्वेन निषेधप्रवृत्त्या धूत्वा, नूत्वा इत्येव, साधुत्वात् विरोधाभावात् स्वाश्रयकित्त्वस्यानिवर्त्तनात् । न च "येन-नाप्राप्तिन्यायेन ङित्त्वेन कित्त्वबाधापत्तिः । 'कुटिता' इत्यादौ कित्त्वाभावेन नाप्राप्ते कित्त्वे ङित्त्वातिदेशानारम्भात् इत्याहुः ।

इन्धिभवतिभ्याञ्च ६

'ञिइन्धी दीप्तौ' 'भू सत्तायाम्' । आभ्यां परोऽपिल्लिट् कित्स्यात् । इन्धेः संयोगार्थं ग्रहणम्, भवतेः पिदर्थम् ।

ननु बभूवेति प्रथमणलि न कित्त्वविधानार्थम् । "अचो-ञ्णिति" इति वृद्धेर्निर्दिष्टस्थानिकतया तत्र "क्ङिति च" इति निषेधाप्रवृत्तेः । न च कित्त्वसामर्थ्यादनिग्लक्षणवृद्धेरपि निषेधः स्यादिति वाच्यम् । बभूविथेति थलि, 'अहं बभूव' इति उत्तमणलि च णित्त्वाभावपक्षे गुणनिषेधेन चरितार्थत्वात् ।

अत्र वार्त्तिकम्—

"इन्धेश्छन्दोविषयत्वाद् भुवो वुको नित्यत्वात् ताभ्यां लिटः किद्वचनानर्थक्यम्" इति ।

उक्तसूत्रप्रत्याख्यानमेतत् । इन्धेर्हि अनन्तरो लिट् नास्त्येव । "इजादेश्च गुरुमतः" इत्यामा व्यवधानात् । छन्दसि तु "अमन्त्रे" इति पर्युदासादामुविरहेऽपि समीधे इत्यत्र "छन्दस्युभयथा"इति लिटः सार्वधातुकत्वात् "सार्वधातुकम-

पिदू" इति ङित्त्वान्नलोपः। आर्द्धधातुकत्वाच्च श्नमभावः।
तथाच मन्त्रः—

"त्वामग्ने दध्यङ्ङृषिः पुत्र ईधे अथर्वणः" इति, "समीधे-दस्युहन्तमम्" इति च।

एवञ्च लिडव्यवहितपूर्वस्य भाषायां संम्भवो नास्ती-त्यत्र तात्पर्यं न तु सामान्यत इन्धेर्भाषायामप्रयोगो ऽपीति कैयटादयः।

एतेन इन्धिग्रहणसामर्थ्यात् आम्विरहे भाषायामप्युक्तप्रयो-गस्य साधुत्वकल्पनमपास्तम्, भाष्यवार्त्तिकविरुद्धत्वात्।

भू अ इति स्थिते च वुको नित्यत्वात्। न च शब्दान्तर-प्राप्त्या वुगनित्यः। एकदेशविकृतस्यानन्यत्वात्। कृताकृ-तप्रसङ्गित्वेन नित्यत्वानपायाच्च। "ओः सुपि" इत्यत ओरि-त्यस्याननुवृत्तेः। वुकि कृते च गुणस्य प्राप्त्यभावात्।

मृडमृदगुधकुषक्लिशवद-वसः क्त्वा ७

कित्स्यात्। "न क्त्वा सेड्" इति वक्ष्यमाणकित्त्वनिषेधस्या-पवादः। 'मृड सुखने', 'मृद क्षोदे', 'गुध परिवेष्टने, 'गुध रोषे-च', 'कुष निष्कर्षे', क्लिश हिंसायाम्', 'क्लिशू हिंसायाम्'। दिवा-दिक्र्याद्योर्द्वयोरप्युपादानम्। 'वद व्यक्तायां वाचि,' 'वस निवा-से'। उषित्वा। "वसति क्षुधोरिट्"। यजादित्वात्सम्प्रसारणम्।

अत्र भाष्यम्—"न क्त्वा सेट्" इति सूत्रं न कर्त्त-व्यम्, इदं सूत्रं मृडादिभ्य एव परस्य क्त्वः कित्त्वं नान्येभ्य इति नियमार्थमस्तु। न च मृडादिभ्यः परः क्त्वैव किद्भवति

न तु निष्ठादिरिति विपरीतानियमापत्तिः । प्रयोगमूलत्वाद् व्याकरणस्मृतेरनिष्टनियमानुपपत्तेः । न च लूत्वा, पूत्वा इत्यादावपि कित्त्वानुपपत्तिः क्त्वामात्रस्य नियमापत्तेः, "क्त्वातोसुन्कसुनः" इत्यत्र विशेषणार्थत्वेन ककारसार्थक्यादिति वाच्यम् । सेट एव क्त्वो नियमारम्भात् । न च "क्लिशः क्त्वानिष्ठयोः" इति पक्षे क्लिशेरनिट्त्वात् ततः परस्य क्त्वः कित्त्वविधानमनिट्क्त्वाकित्त्वव्यावृत्त्यर्थं स्यादिति वाच्यम् । गुधकुषक्लिशां "रलो व्युपधाद्" इति कित्त्वविकल्पान्नित्यकित्त्वविध्यर्थत्वात् नियमार्थत्वायोगात् ।

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ८

चकारात् क्त्वाग्रहणम् । 'रुदिर् अश्रुविमोचने,' 'विद ज्ञाने,' 'मुष स्तेये,' 'ग्रह उपादाने,' 'ञिष्वप् शये' 'प्रच्छ ज्ञीप्सायाम् । रुरुदिषति रुदित्वा । "स्वपिप्रच्छयोः सन्नर्थं ग्रहणं किदेव हि क्त्वा" इति भाष्यम् । "न क्त्वा सेड्" इतिनिषेधस्य सुप्त्वा पृष्ट्वेत्यत्राप्रवृत्तेः । अनिट्कत्वात् । अत एव अनिटः क्त्वः कित्त्वानियमार्थत्वमस्य न इति कैयटः ।

इको झल् ९

इगन्तात्परो झलादिः सन् कित्स्यात् । क्त्वाग्रहणं त्वत्र निवृत्तम् । अनिट्कस्य तस्य स्वयमेव झलादित्वात् । कित्त्वेन गुणनिषेधः । अत एव एजिवबुभूषति, दिदीषते । कित्त्वेन गुणनिषेधः ।

षयत्वाभावात् दीङो "मीनातिमिनोतिदीङाम्" इत्यात्वं न ।

न च झलन्तः सन्नित्यर्थोऽस्तु । ततश्च 'चिचीषिता' इत्यादौ अतोलोपस्थल एव किन्त्वं स्यात् न तु 'चिचीषति' इत्यादौ । सन्शवकारयोरेकादेशस्य पूर्वं प्रत्यन्तवद्भावादिति वाच्यम् । आदिग्रहणानुवृत्त्या व्याख्यानात् । इग्ग्रहणे इक् स्मरणे इत्येव तु न गृह्यते, गर्गादिषु जिगीषुशब्दपाठस्य ज्ञापकत्वात् । जयतेः परस्यच सनः किन्त्वानुपपत्तिप्रसङ्गात्, झलितिप्रत्याहारसाहचर्याच्च । तत्समीपस्य हलोऽसम्भवाद्धलन्ताच्चेत्यस्यानन्वयप्रसङ्गाच्च इति न्यासकारः ।

अत्र वार्त्तिकम्—

"इकः किन्त्वं गुणो मा भूत् दीर्घारम्भात् कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ॥
सामर्थ्याद्धि पुनर्भाव्यमृदित्त्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम्" ॥

अस्यार्थः—"इको झल् हलन्ताच्च" इत्येक एव योगोऽस्तु किमर्थो योगविभाग इत्याक्षेपाभिप्रायः । यथाश्रुते तूत्तरमाह—"गुणो मा भूद्"इति । "सार्वधातुकार्द्धधातुकयोः" इत्यनेनेत्यर्थः । नन्वत्र "अज्झनगमां सनि"इति दीर्घो येननाप्राप्तिन्यायेन गुणस्य बाधको भविष्यतीत्याह—"दीर्घारम्भाद्" इति । दीर्घोत्तरं गुणप्रसक्तेस्तन्निषेधार्थं किन्त्वमित्युत्तरमाह—"कृते भवेद्" इति । रूपविशेषाभावेऽपि मन्त्रजपादिवदात्र्त्तमानस्यैव शास्त्रस्य फलसाधनत्वादिति भावः । नन्वेवं दीर्घविधिवैयर्थ्यं शास्त्रपूर्वकप्रयोगस्यैव धर्मनिमित्ततया शास्त्रप्रवृत्तिमात्रस्याप्रयोजकत्वादित्याह—"अनर्थकन्तु" इति । उत्तरमाह—"ह्रस्वार्थम्" इति । ह्रस्वानां दीर्घविधिसामर्थ्याद् गुणाभावेऽपि दीर्घा-

न्तानां प्रयोजनाविरहाद्दीर्घविध्यप्रवृत्त्या गुणः स्यादिति तन्निषेधार्थं कित्त्वमिति भावः । "दीर्घाणां तु" इति गुणनिषेधार्थं दीर्घेष्वपि दीर्घशास्त्रं प्रवर्त्तत एव । अदग्धदहनन्यायस्य फलाभावमूलकत्वात् । फलञ्च ह्रस्वेषु रूपान्तरसम्पत्तिः दीर्घेषु तु रूपान्तरानापत्तिरित्यन्यदेतत् । अत एव "मो राजि समः क्वौ" इति मकारस्य मकारादेशविधिः । तदेतदुक्तम्—"सामर्थ्याद्धि पुनर्भाव्यम्" इति । ननु दीर्घविधिना गुणस्येव इकारस्यापि बाधापत्तिः । चिकीर्षति, जिहीर्षति । "अज्झन" इति दीर्घः । "ॠत इद्धातोः" इतीत्वं हि तत्रेष्यत इत्याशङ्क्याह—"ॠदित्त्वम्" इत्यादि । दीर्घत्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिदादेशस्य न बाध इत्यर्थः । उक्तं हि—'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमेव नासौ बाध्यते" इति । ननु ह्रस्वान्तानां दीर्घाभावे इत्त्वप्राप्त्यभावे ऽपि दीर्घाणां दीर्घव्यतिरेकेणैव इत्त्वप्राप्तिरस्त्येवेत्याशङ्क्याह—"दीर्घाणां नाकृते दीर्घे" इति । तत्रापि गुणबाधार्थं दीर्घविधिरवश्यं प्रवर्त्तयितव्यः । अन्यथा "इत्त्वोत्त्वाभ्यां गुणवृद्धी विप्रतिषेधेन" इति गुणप्रसङ्गादित्यर्थः । तदेवं कित्त्ववैयर्थ्ये प्राप्ते सिद्धान्तमाह "णिलोपस्तु" इति । ज्ञपि+स+ति इतिस्थिते णेर्गुणो लोपो दीर्घत्वं चेति त्रयं प्राप्नोति । तत्राऽसति कित्त्वे निरवकाशत्वाद्विशेषाभावाच्च गुण इव लोपो ऽपि दीर्घेण बाध्येत । पाचयतेः पाक्तिः इत्यादौ णिलोपस्यापि सावकाशत्वात् । "पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्" इति न्यायेन लोप एव बाध्येत । गुणस्तु स्यादेव । कित्त्वविधाने तु 'चिचीषति' इत्यादिषु गुणप्रसक्त्यभावात्तत्र लब्धावकाशं दीर्घत्वं परत्वाण्णिलोपेन बाध्यते इति सिद्धम् ।

स्यादेतत् । असत्यपि कित्त्वे येननाप्राप्तिन्यायेन गुणस्यैव दीर्घो बाधको भविष्यति न तु णिलोपस्य, गुणबाधेन च सावकाशं दीर्घत्वं परत्वादेव णिलोपेन बाधिष्यत इत्यनारभ्यमेव कित्त्वम् ।

अत्राहुः—बाध्यविशेषचिन्तायां तथात्वे ऽपि बाध्यसामान्यचिन्तायां स्वविषये प्राप्तस्य सर्वस्य बाधाभ्युपगमात् ।

स्यादेतत् ।असत्यपि कित्त्वे 'निमित्सति' 'प्रमित्सति'इत्यत्र मीनातिमिनोत्योः सनि निरवकाशत्वाद् गुणं बाधित्वा दीर्घः । ततः मिनोतेरपि मीग्रहणेन ग्रहणात्प्रतिपदविधानादिस्भावेन गुणबाधः । तदुत्तरं "हलन्ताच्च"इति कित्त्वेन लघूपधगुणबाधः । तथा च "सनिमी"इत्यत्र 'मी'इतिसामान्यग्रहणार्थत्वाद्दीर्घविधेश्चरितार्थतायां 'ज्ञीप्सति' इत्यत्र दीर्घं बाधित्वा परत्वादेव णिलोपो बाधिष्यते इति कृतं कित्त्वेन ।

मैवम् । उक्तरीत्या दीर्घस्य सावकाशत्वात् द्वाभ्यामपि गुणलोपाभ्यां दीर्घबाधापत्तेः कित्त्वारम्भस्यावश्यकत्वात् । न च दीर्घस्य कुङ्धातुरवकाशः, 'चुकूषति' इत्यत्र कुटादित्वेनैव ङित्त्वाद् गुणनिषेधसिद्धेरिति वाच्यम् । उक्तभाष्यानुरोधेन दीर्घान्तत्वनिर्णयात् इति कैयटादयः । नच 'गु पुरीषोत्सर्गे' 'ध्रु गतिस्थैर्ययोः' इति सन्नन्तावकाश इति वाच्यम् । तथा सति उहनगमामित्येव पाठापत्त्या अजितिप्रत्याहारग्रहणवैयर्थ्यापत्तेः । एवं कुङो ह्रस्वान्तत्वे ऽपि बाधकाभाव इति न्यासकाराभिप्रायः ।

हलन्ताच्च १०

अन्तपदस्यावयवार्थत्वे ऽनन्वयः । इको हलवयवत्वाभा-

वात् । इग्वतो हलन्तादिति न्यासे 'पिपक्षति' इत्यत्र सम्प्रसारणापत्तिः । इगुपधाद्धलन्तादिति न्यासे दम्भेः सन्यव्याप्तिः । सूत्रभेदश्च । तथापि समीपार्थो ऽन्तशब्दः । इक्समीपाद्धलः परो झलादिः सन् कित्स्यात् । 'गुहू संवरणे' । जुघुक्षति । 'भिदिर् विदारणे' । बिभित्सति ।

अथ दम्भेः सनि धिप्सति इत्यत्र नकारस्य सन्परत्वाभावात् भकारस्य च इक्समीपत्वाभावात्कित्त्वाभावे नलोपो न स्यात् ।

उच्यते । हल्त्वजात्योभयोरैक्यमाश्रित्य इक्परत्वानपायात् । तदुक्तम्—"दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्" इति । इदं च "निपात एकाज्" इत्येकग्रहणेन ज्ञापितम् । हकारादिषु चाभिन्नप्रत्ययाभिधानात् हल्त्वजातेः सद्भावः । त्यक्तभेदा व्यक्तय एव जातिरिति पक्षे ऽपि भेदव्युदासादभेदाश्रयणादिष्टसिद्धिरिति कैयटः । यद्यपि वृद्धिसूत्रोक्तन्यायेन हल्त्वजातावतिरिक्तायां मानाभावः, तथापि हल्पदजन्यायामुपस्थितौ यावतीनां जातीनां हकारादौ प्रत्येकं प्रकारत्वं तदतिरिक्तवर्णत्वसाक्षाद्व्याप्यजात्यनवच्छिन्नत्वमेवात्र विवक्षणीयम् ।

लिङ्सिचावात्मनेपदेषु ११

इक्समीपाद्धलः परौ झलादी लिङ् आत्मनेपदपरः सिच्च कितौ स्तः । क्लृप्सीष्ट, क्लृप्सीयास्ताम्, क्लृप्सीरन्, अक्लृप्त, अक्लृप्साताम्, अक्लृप्सत । ऊदित्वाद्वेट् । झलादी किम् । कल्पिषीष्ट अकल्पिष्ट इति इट्पक्षे मा भूत् ।

स्यादेतत् । आत्मनेपदेष्विति निर्द्धारणसप्तमी परसप्तमी

वा। नाद्यः। निर्द्धारणस्य सजातीयाविषयतया लिङ्मात्रस्य विशेषणापत्तेः। लिङिति तदादेशग्रहणात्। न द्वितीयः। सिचो विशेषणेऽपि लिङस्तदयोगात्। सीयुड्विशिष्टस्य लिङ्पदार्थत्वे तदपेक्षया लिङ्परत्वानुपपत्तेः। नाप्यर्थद्वयपरत्वम्। सकृच्छ्रुतत्वात्। नाप्येकशेषः। अर्थभेदात्सहाविवक्षाविरहात्। अत्र भाष्यम्—"उभयथाऽप्यदोषः" इति।

तथाहि—आत्मनेपदं यौ लिङ्सिचावित्यर्थः। नच सिचस्तङानोभयभिन्नत्वादात्मनेपदत्वानुपपत्तिः। तत्परत्वेन आत्मनेपदस्य सिचि औपचारिकत्वात्। गौणमुख्यार्थयोरात्मनेपदशब्दयोः सारूप्यमात्रप्रतिबद्धैकशेषाश्रयणात्। द्वितीयेऽप्यदोषः। अवयवगतपौर्वापर्यस्य समुदाये आरोपात्। तन्त्रेणार्थद्वयलाभाद्वा। परन्तु सम्भवव्यभिचाराभ्यां सिजेवात्मनेपदेन विशेष्यते न तु लिङ्। परस्मैपदेषु लिङो झलादित्वाभावेन तत एवात्मनेपदग्रहणसिद्धावात्मनेपदविशेषणस्य वैयर्थ्यात्।

अथ सिचोऽप्यात्मनेपदविशेषणं किमर्थम् अयाक्षीत् इत्यादौ इक इत्येव व्यावृत्तेः। अचैषीद् इत्यादौ अच्परत्वाभावादेव तथात्वात्। 'अकोषीत्'इत्यादौ इडागमे कृते झलादित्वाभावात्। अभैत्सीत् इत्यादौ "वदव्रज" इति वृद्धेरिग्लक्षणत्वाभावादेव "क्ङिति च" इति निषेधविरहात्सत्यपि कित्त्वे क्षतिविरहात्।

मैवम्। अस्राक्षीत्, अद्राक्षीत् इत्यादौ "सृजिदृशोः" इत्यकिल्लक्षणस्यामागमस्यानुपपत्तिप्रसङ्गात्।

उश्च १२

ऋवर्णात्परौ झलादी पूर्वोक्तौ कितौ स्तः। भृषीष्ट, भृषी-

षाताम्, भृषीरन्, अभृत, अभृषाताम्, अभृषत ।

वा गमः १३

गमः परौ झलादी पूर्वोक्तौ कितौ वा स्तः । सङ्गसीष्ट, संगंसीष्ट, समगत, समगंस्त । कित्त्वपक्षे ऽनुनासिकलोपः ।

हनः सिच् १४

हन्तेः परः सिच् कित्स्यात् आत्मनेपदे परे । आहत, आहसाताम्, आहसत । पुनः सिज्ग्रहणं "एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः" इति ज्ञापनार्थम् । तेन पूर्वसूत्रद्वये "लिङ्सिचावात्मनेपदेषु" इतिसंपूर्णसूत्रानुवृत्तिः ।

यमो गन्धने १५

सिच् कित्स्यात् । गन्धनं परदोषाविष्करणम् । 'उदायत' । गन्धने किम् । 'उदायंस्त पादम्' । आकृष्टवानित्यर्थः ।

विभाषोपयमने १६

प्राग्वत् । रामः सीतामुपायत, उपायंस्त महास्त्राणि ।

स्थाघ्वोरिच्च १७

सिच् कित्, इच्चान्तादेशः । समस्थित, समस्थिषाताम्, समस्थिषत, अदित, आदिषाताम्, अदिषत ।

अत्र वार्त्तिकम्—

"इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृते ऽपि सः ।
अनन्तरे प्लुतो मा भूत्प्लुतश्च विषये स्मृतः" ।

नचात्र हेतुपदप्रयोगविरहात् "षष्ठी हेतुप्रयोगे" इत्यस्याप्रसक्त्या कस्येत्यत्र हेतुतृतीयापत्तिः । अत्र सम्बन्धित्वेनैव विवक्षितत्वात् । 'मदीयाः पुत्राः' इत्यत्र अपत्यत्वप्रकारकविवक्षाविरहेण सम्बन्धिसामान्यार्थे छप्रत्ययोत्पत्तेः । "तकारेत्त्वम्" इत्यत्र कर्मधारयोत्तरं त्वप्रत्ययः । "दीर्घो माभूद्" इति । आकारस्थाने आन्तरतम्यात्तस्यैव प्रसङ्गात् । "भाव्यमानो ऽण् सवर्णान्न गृह्णाति" इति परिहारो नोक्तः । 'अमूभ्याम्' इत्यादौ भाव्यमानस्याप्युकारस्य ग्राहकत्वदर्शनात्, समाधानान्तरसद्भावाच्चेति भावः । "ऋतेऽपि सः" इति । "घुमास्था" इत्यादिनैव ईत्वस्य सिद्धत्वात् इकारविधिसामर्थ्यादेव दीर्घो न भविष्यतीत्यर्थः । किन्त्वन्तु विधेयमेव । अन्यथा "घुमास्था" इत्यस्याप्यप्रवृत्तेः । प्रयोजनान्तरमाह "अनन्तरे प्लुतो मा भूद्" इति । असदृशे आदेशे क्रियमाणे प्लुतो ऽपि प्रसज्येत तद्व्यावृत्त्यर्थं तपरत्वमित्यर्थः । तदपि प्रत्याचष्टे "प्लुतश्च" इति । यद्यनेन प्लुतो विधीयेत तदा यत्र विषये "अनन्त्यस्यापि प्रश्नाख्यानयोः" इत्यादिना प्लुतो विहितस्तत्राप्यनेन विधीयेत । अस्मिन्कर्तव्ये "पूर्वत्रासिद्धम्" इत्याष्टमिकप्लुतस्यासिद्धत्वात् । ततश्च पक्षे ऽनुवाददोषः स्यादिति ह्रस्व एव भवतीत्यर्थः ।

केचित्तु तपरत्वसमर्थनमेतत् । असदृशादेशे क्रियमाणे दीर्घ एव स्यात् । नच तस्योक्तरीत्या ऽन्यथासिद्धिः । प्लुतनिवृत्त्यर्थतया सिद्धस्यापि विधानोपपत्तेः । मा भूत्प्लुत-

इति चेन्न । "प्लुतश्च विषये स्मृतः" । स चासति तपरत्वे न प्राप्नोतीति दीर्घनिवृत्त्यर्थं तपरत्वं स्थितमिति व्याचख्युः ।

प्लुतविधौ तु "वाक्यस्य टेः" इत्यधिकारात्कथमेकस्य प्लुतः स्यादिति चिन्त्यमेतदिति कैयटः ।

न क्त्वा सेट् १८

सेट् क्त्वा किन्न स्यात् ।

अत्र वार्त्तिकम्—

"न सेडिति कृते ऽकित्त्वे निष्ठायामवधारणात् ।
ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ।
इत्त्वं कित्सान्नियोगेन रेण तुल्यं सुधीवनि ।
वस्वर्थं किदतिदेशात् गृहीतिः क्त्वा च विग्रहात्" ।

अयमर्थः—अकित्त्वे इति छेदः । 'न सेट्' इति सूत्रणीयम् । क्त्वाग्रहणे फलाभावात् । नच गुधितो, गुधितवान् इति निष्ठायामपि कित्त्वनिषेधापत्तिः । "निष्ठा शीङ्स्विदिमिदि" इत्यादिनियमादेव तदभावात् । एभ्य एव परा निष्ठा न किदित्यर्थात् । एभ्यः परा निष्ठैव किन्न भवतीति विपरीतनियमस्य व्याख्यानादेव परित्यागात् ।

ननु तथापि, परोक्षापदं पूर्वाचार्यप्रसिद्ध्या लिट्परम्, तत्र कित्त्वनिषेधे पपिव, पपिमेत्यादौ "आतो लोप इटि च" इत्याकारलोपो न स्यादिति चेन्न । क्ङिदार्द्धधातुकं निमित्तीकृत्य तदभावे ऽपि इटमेवाश्रित्य तत्सिद्धेः । नच तथापि जग्मिव, जघ्निव इत्यादौ "गमहन" इत्युपधालोपः कित्त्वाभावान्न स्यादिति वाच्यम् । औपदेशिककित्त्वस्यैवायं निषधो न त्वातिदेशिकस्येति व्याख्यानात् 'असंयोगाल्लिट् कित्' इति आतिदेशिककित्त्वस्य सुस्थ

त्वात्। नचात्र प्रमाणाभावः। "इको झल्" इत्यत्र झल्ग्रहणस्यैव मानत्वात्। तद्धि 'शिशयिषते' इत्यत्र कित्त्वं मा भूदित्येतदर्थम्। आतिदेशिकस्यापि कित्त्वस्य निषेधे तु तत्र "इक" इति कित्त्वप्रसक्तावपि "न सेट्" इत्यनेन तन्निषेधसम्भवात् झल्ग्रहणं व्यर्थमेव स्यात्।

यत्तु "अस्त्वत्र कित्त्वम्" इति भाष्यम्। तत्रास्त्वित्यस्य प्राप्नोत्वित्येवार्थः। निवृत्तस्य निषेद्धुमशक्यत्वादिति कैयटः।

तथा च हल्ग्रहणं आतिदेशिककित्त्वस्य "न सेट्" इत्यनेन बाधो नेत्यत्र ज्ञापकम् इति स्थितम्।

स्यादेतत्। "स्थाघ्वोः" इत्यत्रानुवृत्त्यर्थं झल्ग्रहणं झलादावेव यथा स्यात्, उपास्थायिषाताम् इत्यत्र मा भूत्। कर्मणि लुङ्। स्था स् आतामिति स्थिते इत्त्वं चिण्वद्भावश्च प्राप्नोति। परत्वाच्चिण्वद्भावात् युक् च प्राप्नोति वृद्धिश्च। वृद्ध्यपवादत्वात् युक्। तत्र कृते यकारस्य इत्त्वं स्यात्। न च पुनर्वृद्धिः। सकृद्गतिन्यायात्।

मैवम्। कित्त्वसंनियोगशिष्टस्य इत्त्वस्य कित्त्वव्यतिरेके प्रवृत्त्यनुपपत्तेः। अत एव सुधीवा, सुपीवा इत्यादौ ङीप्संनियोगेन रकार उच्यमानो ङीबभावे न भवति। नच "अनो बहुव्रीहेः" इति तन्निषेधः। तस्य ङीम्मात्रनिषेधकत्वात्। "सन्नियोगशिष्टानामन्यतराभावे उभयोरप्यभाव" इति परिभाषयैव रेफादेशनिवृत्तेः। स च न्यायो "बिल्वकादिभ्यश्छस्य लुग्" इत्यत्र छग्रहणेन ज्ञापयिष्यते। यद्वा, आकारस्य इत्त्वे कृते वृद्ध्यायादेशौ। युगागमेन वृद्धेर्बाधे ऽपि इकारस्य वृद्धिसम्भवात्। नच पपिवान्, तस्थिवान् इत्यादौ आकारलोपो न स्यात्। क्वसोः कित्त्वस्यौपदेशिक-

त्वात् इति वाच्यम् । इटमेवाश्रित्य तत्सिद्धेः । नच जग्मिवान्, जघ्निवान् इत्युपधालोपो न स्यादिति वाच्यम् । आतिदेशिककित्त्वेन सिद्धेः । नच अञ्जेः क्वसौ "असंयोगाद्" इत्यातिदेशिककित्त्वस्याप्रवृत्त्या औपदेशिकस्य च 'न सेड्' इत्यनेन बाधान्नलोपो न स्यादिति वाच्यम् । क्वसोश्छान्दसत्वात्तत्र लिटः सार्वधातुकसंज्ञाया अपि सत्त्वात् "सार्वधातुकमपिद्" इति ङित्त्वमेवाश्रित्य तत्सिद्धेः ।

कैयटस्तु—'अत्र नलोपे कृते द्विर्वचने एकादेशे च "वस्वेकाजाद्धसाम्" इति इट् । तत्र हि कित्त्वप्रतिषेधान्नलोपनिवृत्तौ द्विहल्त्वान्नुटि सत्येकाच्त्वाभावात् इण्निवृत्तौ नलोपादीनां चक्रकप्राप्तिः, चक्रकेषु चेष्टतो व्यवस्था । भाष्ये तु परिहारान्तरसद्भावादेष परिहारो नाश्रितः' इत्याह ।

तस्मात् क्वाग्रहणं न कार्यमिति प्राप्ते सत्याह "गृहीतिः" इति । निगृहीतिः, उपस्निहितिः, निकुचितिः । अत्र कित्त्वं मा भूत् । "तितुत्र—" इति इण्निषेधे "अग्रहादीनाम्" इति वचनात् इट् । क्रमेण संप्रसारणं, गुणाभावो, नलोपश्च सिद्ध इत्यर्थः । इदानीं क्त्वाग्रहणं प्रत्याचष्टे—"क्त्वाच" इति । "विग्रहात्" योगविभागात्—"पूङः" । पूङः परा सेट् निष्ठा न कित् । ततः । "क्त्वाच" । पूङः इति निवृत्तम् । सेट् निष्ठा किन्नेत्यर्थः ।

निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः १९

सेट् निष्ठा न कित् । शयितः । "विभाषा भावादिकर्मणोः-" इति वेट् । प्रस्वेदितश्चैत्रः, प्रस्विन्नः इत्यादि । सेट् किम् ।

प्रस्विन्नं तेन । भावे कित्त्वमेव ।

मृषस्तितिक्षायाम् २०

सेट् निष्ठा न कित् । मर्षितः । तितिक्षायां किम् । अपमृषितं वाक्यम् ।

उदुपधाद्भावादिकर्मणो-रन्यतरस्याम् २१

उदुपधात्परा भावे आदिकर्मणि च सेट् निष्ठा न कित् । द्योतितं तेन, द्युतितं वा, प्रद्योतितः प्रद्युतितो वा चैत्रः । "आदिकर्मणि क्तः कर्त्तरि च" इति कर्त्तरि, भावे च क्तः । शब्विकरणेभ्य एवायमिष्टः । नेह गुधितम् ।

पूङः क्त्वा च २२

क्त्वा निष्ठा च न कित् ।

ननु सेडित्यन्यतरस्यामिति चानुवृत्त्या सेटोरेव क्त्वानिष्ठयोः कित्त्वविकल्पः स्यात् । ततश्च पुवित्वा पुवित इति पक्षे स्यात् । "पूङः श्च" इतीटो विकल्पात् ।

अत्र वार्तिकं-"न वा सेट्त्वस्याकिदाश्रयत्वादनिटि वा कित्त्वम्" इति ।

अस्यार्थः-इड्विधौ "पूङश्च" इति सूत्रं नारभ्यम् । तेनानिटोरेव क्त्वानिष्ठयोरयं कित्त्वविकल्पः । कित्त्वपक्षे "श्र्युकः किति" इति इट्प्रतिषेधात् पूत्वा पूत इति, तदभावपक्षे तु इड्गुणयोः पवित्वा पवित इति सिद्धम् ।

भारद्वाजीयास्तु पठन्ति नित्यमकित्त्वमिडाद्योः, क्त्वाग्रहणमुत्तरार्थमिति । लाघवमनादृत्य सूत्रकारेण इड्विधौ "पूङश्च" इति पठितम् । इह च न विकल्पानुवृत्तिरुत्तरत्र वाग्रहणादिति सिद्धमिष्टम् । क्त्वाग्रहणं तूत्तरार्थम् । "न क्त्वा सेट्"इत्यनेन कित्त्वनिषेधसिद्धेः । एतच्च सूत्राभिप्रायवर्णनमात्रम् । कात्यायनेन तु उक्तरीत्या लाघवात्तत् सूत्रं प्रत्याख्यातम् ।

नोपधात्थफान्ताद्वा २३

नकारोपधात्थकारफकारान्यतरान्तात्परः सेट् क्त्वा वा कित् । अन्तग्रहणं स्पष्टार्थम् ।

न्यासकारस्तु— एतत्प्रकरणे प्रयत्नं विना तदन्तविधिर्नेति ज्ञापनार्थं तत् । तेनोत्तरसूत्रे 'ऋत' इति रूपेण धातुर्गृह्यते नतु ऋदन्त—इत्याह । श्रथित्वा, श्रन्थित्वा, गुफित्वा, गुम्फित्वा । नोपधात्किम् । कोथित्वा, रेफित्वा । 'कुथ पूतीभावे' । 'रिफ कत्थनयुद्धहिंसादानेषु' ।

नच "रलो व्युपधाद्"इति विकल्पो दुर्वार इति वाच्यम् । नोपधग्रहणसामर्थ्यात् ।

वञ्चिलुञ्च्यृतश्च २४

पूर्ववत् । 'वञ्चु प्रलोभने' । 'लुञ्च अपनयने' । वचित्वा, वञ्चित्वा, लुचित्वा, लुञ्चित्वा, ऋतित्वा, अर्तित्वा । ऋतिः सौत्रस्तकारान्तो अस्मादेव निर्देशादिति तृतीये वक्ष्यामः । ईयङ्भावपक्षे ऽयं विकल्पः ।

तृषिमृषिकृशेः काश्यपस्य २५

पूर्ववत् । काश्यपग्रहणं पूजार्थम् । विकल्पस्य प्रकृतत्वात् । तृषित्वा, तर्षित्वा इत्यादि । 'ञितृषा पिपासायाम्' 'मृष तितिक्षायाम्'' "कृष तनूकरणे" ।

रलो व्युपधाद्धलादेः संश्च २६

नन्वयं कित्त्वस्य विधिः प्रतिषेधो वा । नाद्यः । क्त्वा-ग्रहणवैयर्थ्यात् । तत्र कित्त्वस्य सिद्धत्वात् । नान्त्यः । सन्ग्रह-णवैयर्थ्यात् । तस्य स्वयमेवाकित्त्वात् ।

मैवम् । "न क्त्वा सेट्" इति कित्त्वनिषेधप्राप्त्या विधेरेव युक्तत्वात् ।

उश्च इश्च वी तदन्यतरोपधाद्रलन्ताद्धलादेः परौ सेटौ सन् क्त्वा च वा कितौ स्तः । दिद्युतिषते, दिद्योतिषते, द्युतित्वा, द्योतित्वा । रलः किम् । दिदेविषति, देवित्वा । व्युपधात्कि-म् । वर्तित्वा, विवर्तिषते । हलादेः किम् । एषित्वा, एषिषिषति ।

इह नित्यमपि द्वित्वं गुणेन बाध्यते । ओणेर्ऋदित्करणेन सामान्यत उपधाकार्यस्य द्वित्वात्प्राबल्यबोधनात् । सेट् किम् । भुक्त्वा, बुभुक्षते । आदिग्रहणं स्पष्टार्थम् । व्युपधस्य हलन्त-त्वाव्यभिचारात् ।

ऊकालोऽज्झ्रस्वदीर्घप्लुतः २७

ऊकाल इति तत्कालस्येतिवद्व्याख्येयम् । एकद्वित्रिमात्रा अचः क्रमेण ह्रस्वदीर्घप्लुतसंज्ञाः । समाहारे ऽपि सौत्रं पुंस्त्व-म् । नच सञ्ज्ञित्रयनिर्देशे मानाभावः । सञ्ज्ञात्रयस्य लिङ्गत्वात् ।

नच ह्रस्वदीर्घप्लुतसञ्ज्ञा ऽप्येकैवेति वाच्यम् । ह्रस्वादिशब्दैरेवोत्तरत्र व्यवहारात्, समुदायस्य संज्ञात्वविरहात् ।

स्यादेतत् । उक्तक्रमेण संज्ञिनिर्देशे नियामकाभावः । नच प्लुतस्य आदौ मध्ये वा निर्देशे प्रकृतिभावापत्त्या तस्यान्त एव निर्देश इति वाच्यम् । त्रिमात्रस्यान्ते निर्देशं विना प्लुतसंज्ञाविरहे प्रकृतिभावस्य दूरापास्तत्वात् । एतेन ह्रस्वस्य घिसंज्ञात्वात्पूर्वमेव निर्देश इत्यपि निरस्तम् । ह्रस्वसंज्ञाया अपि पूर्वनिर्देशाधीनत्वात् ।

मैवम् । "विभाषा पृष्टप्रतिवचने हेः" इति मात्रिकस्य प्लुतविधानात् ज्ञापकात् । मात्राकालस्यान्ते निर्देशे हि तस्यैव प्लुतसंज्ञापत्त्या मात्रिकस्य मात्रिकविधानं व्यर्थं स्यात् ।

न च विसदृशादेशविध्यर्थं तत् । अन्तरतमपरिभाषायाः प्रत्यक्षाया बाधितुमशक्यत्वात् । अन्ते मात्रिकनिर्देशस्य सन्दिग्धत्वात् ।

नच तथापि ह्रस्वस्य मध्ये निर्देशः स्यादिति वाच्यम् । "अतो दीर्घो यञि" "सुपिच" इति दीर्घविधानाज्ज्ञापकात् । मध्ये मात्रिकनिर्देशे हि पूर्ववद्वैयर्थ्यं स्यात् ।

न च द्विमात्रस्यान्ते निर्देशः स्यादिति वाच्यम् । "ओमभ्यादाने" इति द्विमात्रस्य प्लुतविधानात् । वैयर्थ्यापत्तिः प्राग्वत् । लिङ्गद्वयेनान्त्यमध्याभ्यां मात्रिकस्यापकृष्टत्वात्पारिशेषादादितो निर्देश इति सिद्धा संज्ञिव्यवस्था ।

स्यादेतत् । ह्रस्वस्याणत्वात्सवर्णग्रहणे द्वित्रिमात्रयोरपि ह्रस्वसञ्ज्ञापत्तिः, तयोस्त्वनण्त्वान्न ह्रस्वस्य दीर्घप्लुतसञ्ज्ञाप्रसङ्गो दोषः ।

अत्र वार्त्तिकम्—

"सिद्धं तु तपरनिर्देशात्" । उदूकाल इति पठनीयम् । तपरत्वाच्च न ग्राहकत्वम् ।

नचैवं द्रुतायां तपरकरणे मध्यविलम्बितयोरुपसंख्यानापत्तिः । "सिद्धन्त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते" इति तपरसूत्रे परिहृतत्वात् ।

भाष्यकृतस्तु—कालग्रहणान्न दोषः । ऊ अच् इत्युक्ते ऽपि अच्त्वेन उकारादिविशेषणे व्यभिचाराभावात् वैयर्थ्यापत्त्या उकारादिभिरेवाऽचो विशेषणात् उकारादिकालत्वात् तत्सदृशस्याचो ग्रहणे सिद्धेऽपि कालग्रहणं श्रूयमाणेनैव उकारेण कालविशेषणं यथा स्यात् न तु तद्गृहीतसवर्णैरपीत्येतदर्थम् । षण्मात्रस्याचो ऽसंभवात् संज्ञात्रयकरणाच्च कालशब्दस्य मात्रिकेणाप्युकारेण सम्बन्धात् । यद्वा ग्रहणकशास्त्रे ऽशब्दसंज्ञेत्यनुवर्त्यम्, शब्दस्य संज्ञायां विधेयायाम् अणूसवर्णग्राहको न भवतीति न दोषः । गुणानामभेदकतया च उदात्तादीनामपि मात्रिकाणां ह्रस्वसंज्ञा । उदात्तादिसंज्ञासु त्वज्ग्रहणं निवृत्तमिति दीर्घप्लुतानामपि तत्संज्ञासिद्धिः । न चैवं हलामपि तदापत्तिः । अयोग्यत्वात् । "इको यणाचि" इत्यादिकं तु न संज्ञाविधानम्, किन्तु "आदिरन्त्येन" इति विहितसंज्ञानुवाद इति न दोषः ।

यद्वा ह्रस्वसंज्ञाविधानसामर्थ्यात् न दीर्घप्लुतयोर्ह्रस्वसंज्ञा । त्रयाणां ह्रस्वसंज्ञायां हि ह्रस्वप्रदेशेषु त्रयाणामुपस्थित्या ऽन्तरतमादेशविधाने ह्रस्वसंज्ञावैयर्थ्यम् । न च वचनसामर्थ्यात् अनन्तरतमोऽप्यादेशः स्यादिति वाच्यम् । अच इत्येव वक्तव्यत्वापत्तेः ह्रस्वसंज्ञायां फलविशेषाभावात् ।

ननु ह्रस्वसंज्ञायामसत्यां यत्र एचो ह्रस्वो विधीयते तत्र 'एच इग्' इति प्रदेशेषु वक्तव्यं स्यात्, सत्यां तु "एच इग्घ्र-

स्वादेशे" इति सकृदेवेति लाघवमिति चेद् । मैवम् । एवं हि एकं संज्ञायां त्रीणिचान्यत्रेति चत्वारि पदानि, चत्वारि च "एच इग्घ्रस्वादेशे"इत्यत्र इत्यष्टौ पदानि, स्थलत्रये "एच इग्" इत्युक्तौ तु षडेवेति लाघववैपरीत्यात् ।

ननु 'हेड वेष्टने' इत्यस्य 'हिडयति' इत्यर्थे "मितां ह्रस्व" इत्यत्र, परमनुमन्य इत्यर्थे "खित्यनव्ययस्य" इत्यत्र च "एच इग्" इत्यस्य वक्तव्यत्वात् दश पदानि भवन्ति । तेन यथान्यासं "ह्रस्वादेशे" इत्यत्र आङः पृथग्गणनेऽपि न निस्तारः । नवपदापत्तावपि दशापेक्षया लाघवादिति चेत् ।

अत्र कैयटः—'लाघवोपलक्षणपरं भाष्यम् । पञ्चकृत्व 'एच इग्' इत्युपादाने शब्दगौरवेऽपि प्रतिपत्तिलाघावानपाया-दिति । तदेव लघुना न्यासेन सिद्धे ह्रस्वविधानं द्वित्रिमात्रयोर्न ह्रस्वसंज्ञा इत्यत्र ज्ञापकमिति सिद्धम् ।

अचश्च ॥ २८ ॥

ह्रस्वदीर्घप्लुतशब्दैर्यत्र विधानं तत्र अच इति षष्ठ्यन्तमुप-तिष्ठते । तच्छेषतदपवादपक्षावप्यत्र भाष्ये निरस्तौ । तथाहि-अलोऽन्त्यस्य विधयो भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्येति एकवाक्यत्वे तच्छेषपक्षः । भिन्नवाक्यत्वे तु अचो ह्रस्वादयः अन्त्यस्यानन्त्यस्य वेति तदपवादपक्षः। आद्ये दोषवार्त्तिकं"ह्र-स्वादिविधिरलोऽन्त्यस्येति चेत् वचिप्रच्छिशमादिप्रभृतिहानिग-मिदीर्घेष्वजग्रहणम्"इति । वाक्, प्राट्, शाम्यति, क्लाम्यति, जिघांस-ति, जिगांसति। अचोऽन्त्यत्वाभावाद्दीर्घो न स्यादिति तत्र तत्र अच इति वक्तव्यं स्यात् । द्वितीयेऽपि "अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधा-तुकनामिदीर्घेष्वनन्त्यप्रतिषेधः" । अन्यथा सुवाक् कुलं, भिद्यते,

षण्णाम् इत्यत्राप्युक्तविधयः प्रसज्येरन्। यकारादौ यदङ्गं तस्यावयवो योऽच् इति व्याख्याने 'भिद्यते' इत्यत्रातिप्रसङ्गोक्तिः । अवयवयकारादिविशेषणे तदभावादेवमन्यत्रापीति-कैयटः । यदि तु नोपधायाः एव नामि नियमः, तदा अन्यते, तन्यते इत्यत्र "अकृत्-" इति दीर्घः स्यात्। यदि नाम्येव नोपधाया इति, तदा षण्णाम् इत्यत्र "नामि" इति दीर्घः स्यात् । अथ नियमद्वयं, तथापि भिद्यते, सुत्राक् इत्यत्रातिप्रसङ्गो दुर्वार एव ।

तस्मात्पदोपस्थितिपक्ष एव सिद्धान्तः । तथाहि—प्रदेशेषु "अच" इति षष्ठ्यन्तस्योपस्थितौ वचिप्रच्छिशमादिप्रभृतिहानिगामिदीर्घेषु वच्यादयो विशेषणम् अच इति विशेष्यं तेषामचो दीर्घ इति । "ह्रस्वो नपुंसक" इत्यादौ तु अच इत्येतन्नपुंसकस्येत्यादेर्विशेषणमिति तदन्तविधिनाऽजन्तस्य नपुंसकस्येत्यादिरर्थ इति नातिव्याप्तिः ।

ननु "दिव औत्" "पथिमथ्यृभुक्षामात्" "त्यदादीनामः" इत्यत्राप्यच इत्यस्योपस्थितिः स्यात् ।

मैवम् । ह्रस्वदीर्घप्लुतशब्दानामत्र स्वरूपमात्रपदार्थकानां विधीयमानाज्विशेषणतया ह्रस्वादिशब्दैर्विधीयमानस्याच इत्यर्थसम्पत्तेः । नच विशेष्याणामचामुपस्थित्यर्थं तदुपयोगः । अनुवृत्तेन अच्पदेनैव तेषामुपस्थापितत्वात् ।

नन्वेवमत्रैवाज्ग्रहणं क्रियताम् नतु पूर्वसूत्रे इति चेत्—

अत्र वार्त्तिकम्—

"अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम्" । अन्यथा मरक्ष्य प्रतक्ष्य इत्यत्र मात्रिकस्यापि संयोगस्य ह्रस्वसंज्ञायां तुक् स्यात् । तितउच्छत्रम् इत्यत्र च अच्समुदायस्य द्वि-

मात्रतया दीर्घसंज्ञायां "दीर्घात्" "पदान्ताद्वा" इति तुग्विकल्पश्च स्यादित्यर्थः । नचैकमचमाश्रित्य ह्रस्वलक्षणस्तुगपि पक्षे भविष्यतीति वाच्यम् । दीर्घलक्षणेन परत्वात्तद्बाधे सकृद्गताविति पुनरप्रवृत्तेः । नापि "पुनःप्रसङ्गविज्ञानम्" । नित्यविकल्पविध्योर्विरोधात् पूर्वेण परस्य बाधप्रसङ्गात् । यत्र पूर्वो विधिः परं न बाधते तत्रैव क्वचित्तदाश्रयणात् । समुदायसन्निधाववयवानां पारतन्त्र्येण पृथक् कार्यानारम्भकत्वाच्च । नन्वाज्ग्रहणे कृतेऽपि वर्णग्रहणे जातिग्रहणात् अच्समुदायस्य दीर्घसंज्ञा दुर्वारैवेति वाच्यम् । ऊकाल इति विशेषणाद्व्यक्तेरेवोपादानात् जातेः परिमाणाभावात् व्यक्तिद्वारैव तदाश्रयणात् एकैकवर्णव्यङ्ग्यत्वेन जातेः समुदायव्यङ्ग्यत्वाभावादिति कैयटः ।

उच्चैरुदात्तः ॥ २९ ॥

नीचैरनुदात्तः ॥ ३० ॥

ननु उच्चनीचयोरापेक्षिकयोरव्यवस्थितत्वात्कथं लक्षणत्वम् । नच गात्राणां निग्रहरूप आयामो, रूक्षत्वरूपं दारुण्यं, कण्ठस्य संवृततारूपं खस्य अणुत्वं चेति उच्चैः कारणानि । गात्रशैथिल्यरूपोऽन्ववसर्गः, स्वरस्निग्धत्वरूपं मृदुत्वं, कण्ठमहत्त्वरूपं खस्योरुत्वं चेति नीचैःकारणानीति वाच्यम् । महाप्राणो हि पुरुषो नीचैरप्युच्चारयन् स्वरेण महान्तं देशं व्याप्नोति, अल्पप्राणस्तु उच्चैरप्युच्चारयन् अल्पमेवेति दोषतादवस्थ्यात् ।

अत्र वार्त्तिकम्—

"सिद्धन्तु समानप्रक्रमवचनात्" इति । प्रक्रम्यन्ते वर्णा अस्मिन्निति प्रक्रमः स्थानम् । तदयमर्थः—ताल्वादिस्थाना-

नाम् ऊर्द्ध्वाधोभेदेन भागद्वयम्। ऊर्द्ध्वभागेनोच्चार्यमाण उदात्तः, अधोभागेन त्वनुदात्तः। अभ्यासज्ञेयश्चायं स्वरविशेषः। षड्जवदिति। एते अचामेव गुणा न तु हलाम्। अजुपरागात्तु हलामपि तथोपलब्धिः। 'इषेत्वोर्जेत्वा' इत्यादौ यथा। नच वैपरीत्यम्। 'आप्यायध्वम्' इत्यादौ आकारोदात्तत्वे तिङन्तस्य निघाते आकारस्य हलुपरागं विनाऽप्युदात्तत्वात्। तस्मादन्वयव्यतिरेकाभ्यां हल एवाच्स्वरानुविधायिन इति सिद्धम्। "स्वयं राजन्ते ते स्वराः अन्वग्भवति व्यञ्जनमित्यन्वर्थसंज्ञयाऽप्येवम्" इति भाष्यम्। यद्यपि सादृश्यं न किञ्चिदस्ति, तथापि सम्प्रदायमात्रात् इयं निरुक्तिः।

यद्वा अञ्जेः गत्यर्थत्वाद्विविधं गच्छत्यजुपरागादिति निर्वचने तात्पर्यमिति कैयटः।

समाहारः स्वरितः ॥ ३१ ॥

यद्यप्यचोर्न समाहारः। कार्य्य,क्व,कन्या इत्यादौ स्थानिद्वारकस्यापि तस्याऽसम्भवात्। "ऋहलोर्ण्यत्" "किमोऽत्"। तित्स्वास्वरितः। गाङ्गेऽनूप इत्यादौ तु गाङ्गशब्दस्याण्णन्तत्वात् अन्तोदात्तत्वे अनूपशब्दस्य "अनोरप्रधानकनीयसि" इत्यनुदात्तादित्वे एकादेशस्य च "स्वरितो वा ऽनुदात्ते पदादौ" इति स्वरितत्वे स्थानिद्वारकतत्सम्भवेऽपि तस्य गौणत्वात्। आदेशस्य स्वरितस्य वर्णान्तरत्वात्। नाप्युदात्तत्वानुदात्तत्वयोरेव समाहारो ग्राह्यः। अच्प्रस्तावात्। तथापि गुणिनोः समाहारानुपपत्तौ गुणयोस्तदाश्रयणम्।

न च समाहारस्य संज्ञित्वानुपपत्तिः, स्वरितसंज्ञया योग्यतया अच एव संज्ञित्वेनाक्षेपादिति वाच्यम्। उपचारात्समाहा-

स्वतोऽच एव संज्ञित्वात् ।

नचैवं त्रैस्वर्येणाधीमहे इत्यादिशिष्टव्यवहारविरोधः । कैश्चिदुदात्तगुणैः कैश्चिदनुदात्तगुणैः कैश्चिदुभयगुणैरिति तदर्थात् । स्वरत्रैविध्यपरत्वाभावात् ।

तस्यादित उदात्तमर्द्धह्रस्वम् ॥ ३२ ॥

स्थिते गुणद्वयसमाहारे विभागप्रदर्शनार्थमारम्भः ।

ननु ह्रस्वग्रहणाद्दीर्घप्लुतस्वरितयोरयं विभागो न स्यात् । कन्या, शक्तिके३ शक्तिके इति "कन्याराजमनुष्याणाम्" इत्यन्तः स्वरितः । "स्वरितमाम्रेडिते ऽसूया" इति स्वरितः प्लुतः ।

मैवम् । अर्द्धह्रस्वशब्दः प्रमाणे रूढः । व्युत्पत्त्यर्थं ह्रस्वस्योपादानम् । अर्द्धमात्रा त्वनेनाभिधीयते ततः प्रमेये मात्रप्रत्ययः । "प्रमाणे लः" इति तस्य लुक् । ततश्च ह्रस्वदीर्घप्लुतयोरपि बुद्ध्या ऽर्द्धमात्राविभागसम्भवान्न दोष इति भाष्यकैयटयोः स्थितम् । अत एव ' "येनविधिः" इति सूत्रे ह्रस्वशब्दममुख्यया वृत्त्या मात्रार्द्धे वर्त्तमानमङ्गीकृत्य दीर्घप्लुतयोरुदात्तविभागः कृत ' इति बृहद्विवरणकारैरुक्तम् ।

अत्र दीक्षिताः—ह्रस्वग्रहणमवयुत्यानुवादमात्रम् । अर्द्धमित्येव विवक्षितम् । तेन दीर्घप्लुतयोरपि पूर्वार्द्धमुदात्तम् । तच्च न समांशरूपं किन्तु लेशरूपम् । तत्र प्रातिशाख्य-विशेषानुरोधेन कस्यांचिच्छाखायां समांशः, कस्यांचिदर्द्धमात्रेति विशेषः । एकश्रुत्यादीनां प्रातिशाख्यानुरोधेनैव व्यवस्थादर्शनात् । न च दीर्घस्वरितसमार्द्धस्योदात्तत्वे प्रमाणाभा-

वः । ये१.ऽरा इत्यत्र एकारस्य, तनूनपाच्छचीपतिमित्यत्र च पदपाठे ऊदीतोरर्द्धोदात्ततया बह्वृचैः पठ्यमानत्वात् । तनूनपाच्छचीपतिशब्दयोः "उभे वनस्पत्यादिषु युगपत्" इति पूर्वोत्तरपदयोराद्युदात्तत्वे शेषनिघातः । पूर्वपदयोश्च तनूशचीपदयोरन्त्यस्य पाक्षिकं स्वरितत्वं प्रातिशाख्ये उक्तम्—

जात्यवद्वा तथा वाऽन्त्यौ तनूशचीति पूर्वयोः । इति ।

स्वरितार्द्धस्योदात्तत्वे प्रातिशाख्यमपि—

एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ।
तस्योदात्ततरोदात्तादर्द्धमात्रार्द्धमेव वा ॥
अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत् ।
उदात्तं वोच्यते किञ्चित्स्वरितं वाऽक्षरं परम् । इति ।

स्वर इत्यन्तं स्वरितलक्षणम् । पूर्वेतिपदस्योदात्तानुदात्तत्वपरत्वात् । तस्य स्वरितस्य स्वतन्त्रोदात्तापेक्षया उदात्ततराऽर्द्धमात्रा बोध्येति । अर्द्धमात्रेति 'क्व३वोऽश्वाः' इत्याद्यभिप्रायम् । न चैवं स्वतन्त्रोदात्तापेक्षया उदात्ततराऽर्द्धमात्रा बोध्या इत्यंस्य नीचस्थानत्वादनुदात्तत्वापत्तिः। अत्यन्तनीचस्यैव स्थानस्य तत्रोपादानात् । अर्द्धवेति दीर्घाभिप्रायम् । अनेनैव त्रयाणामुपसंग्रहादिदमेवादर्त्तव्यमिति सूचयितुमेवकारः। अर्द्धमात्रापेक्षया समांशस्य बहुत्वेन तदुपकारकत्वात् । चरमोपन्यासाच्च । प्रातिशाख्यसमाख्यया तच्छाखापरत्वलाभे तच्छाखायां स्वरितस्य समानोदात्तपाठाच्च । अनुदात्त इत्यादि परिशेषसिद्धार्थानुवादः । स शेष उदात्तश्रुतिः । किमविशेषेण ? नेत्याह—नचेत्यादि । उदात्तस्वरितपरं विहायेत्यर्थः ।

शाकल्योऽप्याह—

अमाक्तृतस्तु यः स्वारः स्वरितोदात्तपूर्वगः ।

उदादायार्द्धमस्याथ शिष्टं निघ्नन्ति कम्पितम् ॥

उदादाय उदात्तं कृत्वेत्याहुः ।

अत्र वदन्ति—नेदं युक्तम् । उक्ताकरग्रन्थविरोधात् । शाखाविशेषे तथा पाठेऽपि सर्वशाखासाधारणस्यास्य तदेकवाक्यतया संकोचानर्हत्वात् । लौकिकप्रयोगे विशेषवचनाभावे ऽर्द्धमात्रैवोदात्तेत्यत्र तात्पर्यात् । उक्तमातिशाख्यं च न साधकम् । अर्द्धमात्रा, अर्द्धमेव वेति पक्षयोः पाणिनिशाकल्ययोः सामान्यविशेषलक्षणाभिप्रायेण व्यवस्थितत्वात् । एवकारो विशेषलक्षणेन कृतायाः सामान्यलक्षणव्यावृत्तेरनुवादार्थः । वाशब्दो व्यवस्थितविकल्पार्थ इति ।

अपिच समांशग्रहणेऽर्द्धग्रहणवैयर्थ्यं "समं स्यादश्रुतत्वाद्" इत्येव सिद्धेः ।

न चार्द्धमात्राया अपि लाभार्थं तत् । उभयसाधारणरूपाभावात्, लेशत्वस्यैकस्याभावात्, एकशेषादिकल्पनेऽपि गौरवात् ।

एतेनार्द्धह्रस्वशब्देनार्द्धमात्रा लक्ष्यत इति हरदत्तादिग्रन्थास्तु मतान्तरपरतया कथंचिन्नेया इति परास्तम् । हरदत्तोक्तस्यैव प्रकृतसूत्रार्थत्वात् ।

यत्तु—आकरे अर्द्धमात्रायामर्द्धह्रस्वशब्दस्य रूढेरुक्तत्वात् समुदायस्य शक्त्यभावेन लक्षणाया अयोगाच्चायुक्त एव इति ।

तन्न । अर्द्धमात्रायां रूढावपि कैयटोक्तरीत्या तदवच्छिन्नधर्मिणो लक्षणयैव लाभात् । मात्रच्प्रत्ययलोपं न जानतामपि बोधोदयात् । तदनुशासनस्य "गुणवचनेभ्य" इत्यादिवल्लक्षणातात्पर्यग्राहकत्वादित्यास्तां विस्तरः ।

प्रकृतमनुसरामः—

अत्र वार्त्तिकं-"स्वरितस्यार्द्धह्रस्वोदात्तादोदात्तस्वारितपरस्य सन्नतरादूर्द्धमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थम्"

अस्यार्थः-आ अर्द्धह्रस्वोदात्तादिति आकारच्छेदः । इयं नवसूत्री "उदात्तादनुदात्तस्य स्वरितः" इत्येतदुत्तरमष्टमे पठनीया । तेन 'इमं मे गङ्गे यमुने सरस्वति' इत्यत्र मे-शब्दात्स्वरितात्परेषां गङ्गेत्यादीनाम् आमन्त्रितनिघातादनुदात्तानां "स्वरितात्संहितायामनुदात्तानाम्" इति वचनादेकश्रुतिर्भवति । अन्यथा "उदात्तादनुदात्तस्य" इति त्रैपादिकस्वरितस्य "स्वरितात्" इत्यत्रासिद्धत्वात्स्वरितात्परत्वमनुदात्तानां नास्ति इति एकश्रुतिर्न स्यात् । न चाश्रयात्सिद्धत्वं शङ्क्यम् । 'कार्यम्' इत्यादौ षाष्ठस्वरिते सावकाशत्वात् ।

"स्वरितोदात्तार्थं च" ।

तथाहि-सुब्रह्मणि साधुरिति यत्प्रत्ययः तित्त्वात्स्वरितः, ततष्टाप् पित्त्वादनुदात्तः, एकादेश आन्तरतम्यात्स्वरितः । तत्रानुदात्तभागस्यापि विद्यमानत्वात् । ओमित्युदात्तः । "ओमाङोश्च" इत्युदात्तस्वरितयोरेकादेशः स्वरित एव । एकदेशान्तरतम्यात् । इन्द्रशब्दश्चामन्त्रितत्वादनुदात्तः । 'सुब्रह्मण्योमिन्द्र आगच्छ' इत्यत्र "न सुब्रह्मण्यायां स्वरितस्य तूदात्तः" इत्योकारस्य स्वरितस्योदात्तविधानं सावकाशमिति त्रैपादिकस्य स्वरितस्योदात्तो न स्यात् । 'इन्द्र आगच्छ' इति यथा ।

"स्वरितोदात्ताच्च स्वरितार्थम्" ।

'इन्द्र आगच्छ, हरिव आगच्छ' । आशब्द उदात्तः । गच्छेति शेषनिघातादनुदात्तः । "उदात्तादनुदात्तस्य" इति स्वरितः । तस्यासिद्धत्वादुक्तसूत्रेणोदात्तत्वं न स्यात् ।

"स्वरितपरसन्नतरार्थं च"

माणवकजटिलकाध्यापक न्यङ् । "न्यधीच" इति पूर्वपदप्रकृतिस्वरः । तत "उदात्तस्वरितयोर्यणः"इत्यकारः स्वरितः। तस्यासिद्धत्वात् "उदात्तस्वरितपरस्य सन्नतरः" इति पूर्वस्यानुदात्ततरो न स्यात् । न चाश्रयात्सिद्धत्वम् । माणवकजटिलकाभिरूपं क इत्यत्र सावकाशत्वात् । "तित्स्वरितम्" इत्यस्य सिद्धत्वात् । तस्मान्नवसूत्री शास्त्रान्ते पठनीयेति सिद्धम् ।

तच्च सूत्रकृतैव ज्ञापितम् । तदुक्तम्—"देवब्राह्मणयोरनुदात्तवचनं ज्ञापकं 'स्वरिताद्' इति सिद्धत्वस्य" इति । अन्यथा स्वरितस्यासिद्धत्वादनुदात्तत्वमस्त्येवेत्यनुदात्तत्वविधानमनर्थकं स्यात् । नहि स्वरितस्य सिद्धत्वमनेन ज्ञाप्यते स्वरितस्य य उदात्तस्तस्मात्परस्यानुदात्तस्य स्वरितताऽऽपत्तेरिति भाष्यवार्त्तिकयोः स्थितम् ।

अत्र दीक्षिताः—"स्वरितस्य तूदात्त"इति प्रकरणोत्कर्षे ज्ञापकम् । नच भाष्यकैयटादिरीत्या 'सुब्रह्मण्योम्' इत्यत्र तदवकाशः। "एकादेश उदात्तेनोदात्तः" इत्यस्य प्रवृत्तेरावश्यकत्वात् । नच तत्र"अनुदात्तस्य"इत्यनुवृत्तेर्वृत्तिकृतोक्तत्वात् उदात्तस्वरितयोरेकादेशे न तत्प्रवृत्तिरिति वाच्यम् । तदनुवृत्तौ मानाभावात् । 'क्वावरम्' इत्यत्र बह्वृचैरुदात्तस्यैव पठ्यमानत्वात् । कशब्दस्य स्वरितत्वात् । तैत्तिरीयाणामपि "याज्ययैवैनमेतयाऽऽप्याययति" इत्यत्राङ्प्रश्लेषेण द्वितीयाक्षरस्योदात्तत्वाच्च ।

अत एव बह्वृचप्रातिशाख्ये—

उदात्तवत्येकीभाव उदात्तं सन्ध्यमक्षरम् ।
अनुदात्तोदये पुनः स्वरितं स्वरितोपधे' ॥ इति—

श्लोके उत्तरार्द्धे एवानुदात्तपदं प्रयुक्तम्, पूर्वान्वयभ्रमवारणाय पुनःपदं प्रयुक्तम् । शौनकीये स्वराष्टकेऽपि—'एकादिष्टमुदात्तेन तं तमेव नयेत्स्वरम्' इत्युक्तम् । एकादेशे प्रतियोगित्वेनानुदात्तस्यानुपादानाद्' इत्याहुः ।

तन्न । शाखाविशेषे तथा पाठस्य प्रातिशाख्यविधिनैव सिद्धे तदनुरोधेन सर्वभाषादर्शिभाष्यकारादिव्याख्यानस्योल्लङ्घयितुमशक्यत्वात् ।

एकश्रुति दूरात्सम्बुद्धौ ३३ ।

दूरात्संबोधने वाक्यमेकश्रुति स्यात् । 'आगच्छ माणवक' । पक्षे माणवकशब्दटेः प्लुत उदात्तः । एकश्रुतिप्लुताभ्यामवयवभेदेन वाक्ये समुच्चिताभ्यां दूरात्सम्बोधनं द्योत्यते । सम्बुद्धिपदं सम्बोधनपरम् । एकवचनपरत्वे 'देवा ब्राह्मणा' इत्यादावव्याप्तेः । तदुक्तम्—"उभयगतिरिह शास्त्रे भवति" इति । क्वचिदकृत्रिमस्यापि ग्रहणमित्यर्थः । एकवचनस्य दूरादिति विशेषणानुपपत्तेः । सम्बोधनस्य तु क्रियारूपत्वादपादानतया तत्सम्भवात् । एकश्रुतिश्च नोदात्ता, "उच्चैस्तरां वा वषट्कार" इत्युदात्तविधानात् । अन्यथा "यज्ञकर्मणि" इत्येकश्रुत्यैव सिद्धेः । नाप्यनुदात्ता । "उदात्तस्वरितपरस्य सन्नतर" इत्यनुदात्तत्वविधानात् । एकश्रुत्यनुवृत्त्यैव सिद्धावनुदात्तविधानमनर्थकं स्यात् । तस्मात्क्षीरोदकवदुदात्तानुदात्तयोर्भेदातिरोधानमेकश्रुतिरित्यर्थः सिद्धः । अत्रैव प्रचयव्यवहारो वैदिकानाम् । स्वरिते तु त्रिभागेन तयोरुपलब्धिः । अन्ये तु व्याचक्षते—उभयत्रापि तरनिर्देशस्तन्त्रम् । "सोमस्याग्ने वीहि३वौ३षट्" इत्यत्र "यज्ञकर्मणि" इत्येकश्रुतिर्विहिता, तदपे-

क्षया वौषट्शब्दस्योदात्ततरत्वं विधीयते । तच्चैकश्रुतेरुदात्तानुरागं विनाऽनुपपन्नम् । उत्कर्षस्य सप्रतियोगिकत्वात् । एवं "सन्नतर" इत्यत्रापि ।

तथा च सप्त स्वराः—उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्तरः, स्वरितः, स्वरितोदात्तः, स्वरित एवानुदात्तेनोपरक्त एकश्रुतिः । कस्यचित्तु स्वरितस्योदात्तभागो नानुदात्तेनानुरज्यत इति पृथक् स्वरितनिर्देश इति सिद्धम् ।

यज्ञकर्मण्यजपन्यूङ्खसामसु ३४ ।

मन्त्रो यज्ञकर्मण्येकश्रुतिः स्यात् जपादीन्वर्जयित्वा । "अग्निर्मूर्द्धा दिवः"। यज्ञेति किम्। स्वाध्यायकाले त्रैस्वर्यमेव यथा स्यात् । अजपेति किम् । "ममाग्ने वर्चो विहवेष्वस्तु" । जपो नामोपांशुप्रयोगो यथा जले निमग्नस्य । न्यूङ्खास्तु षोडश ओकाराः । तेषु प्रथमसप्तमत्रयोदशास्त्रय उदात्तास्त्रिमात्राः, इतरे त्रयोदशानुदात्ता अर्द्धौकाराः । एवं चाश्वलायनेनोक्तमुदाहृतं चेति प्रसादकारः । "गीतिषु सामाऽऽख्या" इति जैमिनिसूत्रम् । अजपेतिपर्युदासात्तत्सदृशमन्त्रे इदमैकश्रुत्यम् । अत एव "इन्द्रशत्रुशब्दे ऊह्यमाने नैतत्प्रवृत्तिः" इति पस्पशायां प्रपञ्चितम् ।

उच्चैस्तरां वा वषट्कारः ३५ ।

यज्ञकर्मणि वौषट्शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा । "सोमस्याग्ने वीहि३वौ३षट्" । वषट्शब्दोपादानं वैचित्र्यार्थम् ।

वौषट्शब्दस्यैव विवक्षितत्वात् इति संप्रदायः। एतस्मान्निर्देशादेव वर्णनिर्देशाभावेऽपि कारप्रत्ययः। तेन स्वाहाकारो हन्तकार इत्यादिसिद्धम्।

विभाषा छन्दसि ३६।

छन्दसि एकश्रुतिर्वा। व्यवस्थया च विकल्पः। यथा—बह्वृचानां संहितायां त्रैस्वर्यम्, ब्राह्मणे त्वेकश्रुतिरित्यादि। विकल्पस्य प्रकृतत्वेऽपि "यज्ञकर्मणि" इत्यस्य निवृत्तिसूचनार्थं पुनर्विभाषाग्रहणम्।

ननु यज्ञकर्मण्येव नित्याया वैकल्पिक्याश्चैकश्रुतेर्विरोधाद्विधातुमशक्यत्वात्सामर्थ्यादेव 'यज्ञकर्मणि' इत्यस्य निवृत्तिसम्भवात्पुनर्विभाषाग्रहणं व्यर्थमिति चेन्न। अजपेत्यादिपर्युदासान्नित्यैकश्रुतेर्मन्त्रविषयकत्वम्, वैकल्पिक्यास्तु ब्राह्मणपरत्वमिति व्यवस्थासम्भवात्। प्रतिषेधपक्षेऽपि नित्यैकश्रुतेरेव ऊहादिविषयत्वम्, वैकल्पिक्यास्तु छन्दोविषयत्वमिति सम्भवात्तन्निवृत्त्यर्थतया सार्थक्यात्।

अत्र व्याचक्षते—तन्त्रेणावृत्त्या वा "अच्छन्दसि" इति नञ्प्रश्लेषाद्भाषायामप्यैच्छिको विकल्पः। दाण्डिनायनादि-सूत्रे "ऐक्ष्वाकस्य स्वरभेदार्थं पृथक् निपातनम्" इत्युक्त्वा "एकश्रुत्यनिर्देशात्सिद्धम्। एकश्रुतिर्हि स्वरसर्वनाम। यथा—नपुंसकं लिङ्गसर्वनाम" इति भाष्योक्तेः। अत एव विरुद्धस्वरकसमासद्वयस्यैकश्रुत्या सङ्ग्रहादभियुक्तानां श्लेषकाव्यनिर्माणं सङ्गच्छते। अत एव इन्द्रशत्रुशब्दे बहुव्रीहिस्वरेण दोषप्रवृत्तिरुक्ता पस्पशायाम्, तदन्ते "श्वेतो धावति अलम्बुसानां याता" इति भाष्यं च। "वेद इव

लोके स्वरो न विशेषाध्यवसायहेतुः" इति काव्यप्रकाशस्य त्वेकश्रुत्या पाठादित्याशयः ।

नचैवं "झल्युपोत्तमम्" इति प्रक्रम्य "विभाषा भाषायाम्"इत्युक्तेर्वैयर्थ्यम् । त्रैस्वर्येण प्रक्रमे पाक्षिकानुदात्तलाभार्थत्वात् । वेति प्रकृते विभाषाग्रहणात्सूत्रकृतां तन्त्रादेरनभिमतत्वात् ।स्वरविधौ छन्दोऽधिकाराभावाच्चेति तिष्ठतु विस्तरः।

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ३७।

सुब्रह्मण्याख्ये निगदे पूर्वेण प्राप्ता एकश्रुतिर्न भवति किन्तु वचनान्तरविहितस्य स्वरितस्योदात्तः स्यात् । "सुब्रह्मण्योम्" । "इन्द्र आगच्छ" । ओंकारस्योदात्तत्वं व्याख्यातम् । "ओमभ्यादाने" इति प्लुतोदात्तत्वं तु नास्ति, तस्याऽयज्ञकर्मविषयत्वादिति संप्रदायः । इन्द्रशब्द आमन्त्रिताद्युदात्तः, शेषनिघातेनाकारोऽनुदात्तः । "उदात्तादनुदात्तस्य" इति तस्य स्वरितः, तस्यानेन उदात्तः । "निपाता आद्युदात्ता" इत्याकार उदात्तः । गच्छ इत्यस्य "तिङ्ङतिङः" इति निघातः । "उदात्ताद्" इति गकाराकारस्य स्वरितः । तस्याप्युदात्तः । तथाच छकारभिन्ना आद्याश्चत्वार उदात्ताः । नच "उदात्ताद्" इति छकारस्याप्युदात्तत्वापत्तिः । तदुत्तरमेतत्प्रकरणपाठस्य पूर्वमुक्तत्वात्स्वरितोदात्तस्यासिद्धत्वात् ।

"हरिव आगच्छ" इत्यत्र आमन्त्रिताद्युदात्तः, इकारस्य

शेषनिघातः, तस्य स्वरितः, तस्योदात्तत्वम् इति 'हरिव' इत्यत्र द्वावुदात्तावन्त्योऽनुदात्तः । 'आगच्छ' इत्यपि पूर्ववत् ।

"आगच्छ मघवन्" इत्यत्र "आमन्त्रितस्य" इति मघवच्छब्दोऽनुदात्तः ।

"मेधातिथेः" इति षष्ठ्यन्तस्य "मेष" इत्यामन्त्रिते पराङ्गवद्भावात् आमन्त्रितस्वरेण मेधातिथिशब्दावयवो मे इत्युदात्तः, धा इत्यस्योक्तरीत्या स्वरितस्यानेनोदात्तः। मेधा इति द्वयमुदात्तम्। इतरदनुदात्तम् । एवं "वृषणश्वस्य मेने गौरावस्कान्दिन्नहल्यायै जार" इत्यादिषु पराङ्गवद्भावादि योज्यम् ।

"कौशिकब्राह्मण गोतमब्रुवाण" इत्यत्रापि द्वौ द्वावुदात्तावन्येऽनुदात्ताः । नच तृतीयस्यापि "उदात्तादनुदात्तस्य" इति स्वरितत्वादनेनोदात्तत्वापात्तिः, एवं परेषामपीति वाच्यम् । स्वरितग्रहणसामर्थ्यात् सर्वेषामुदात्तत्वे इष्टे "न" इत्यपहाय "सुब्रह्मण्यायामुदात्त" इत्येव ब्रूयात् । तस्मादुभयग्रहणसामर्थ्यान्न सर्वेषामुदात्तत्वम् ।

"श्वः सुत्यामागच्छ मघवन्" । श्व इति निपातस्वरेणाद्युदात्तः । सुत्याशब्दः "संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः" इति सुनोतेः क्यपि तत्रोदात्तानुवृत्तेरन्तोदात्तः, शेषनिघातेन 'सु' इत्यनुदात्तः । "उदात्तस्वरितपरस्य" इत्यनुदात्ततरः । आगच्छ इति द्वावुदात्तौ परोऽनुदात्त इति पूर्ववत् ।

"द्व्यहे सुत्याम्, त्र्यहे सुत्याम्" द्व्यह इति टजन्तत्वादन्तोदात्तम् ।

तथा च सामब्राह्मणम्—"तस्मादुत्करे तिष्ठन्सुब्रह्मण्यः सुब्रह्मण्यायाह्वयति–सुब्रह्मण्यो३म्, सुब्रह्मण्यो३म्, सुब्रह्मण्यो३म् इति ।

स्त्रियमिव त्रिराह त्रिषत्या हि देवाः । 'इन्द्रागच्छ' इति यदाह 'इन्द्रागच्छ' इत्येतद्वा अस्य प्रत्यक्षं नाम तेनैवैनं त्रिराह्वयति । 'हरिव आगच्छ' इति, पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी ताभ्यां हीदं सर्वं हरति । 'मेधातिथेर्मेष' इति, मेधातिथिं ह काण्वायनिं मेषो भूत्वा जहार । 'वृषणश्वस्य मेने' । वृषणश्वस्य ह मेनका नाम दुहिताऽऽस तां हेन्द्रश्चकमे । 'गौरावस्कन्दिन्' इति । गौरमृगो ह भूत्वाऽवस्कन्द्यारण्याद्राजानं पिबति । 'अहल्यायै जार' इति । अहल्याया ह मैत्रेय्या जार आस । 'कौशिकब्राह्मण' इति । कौशिको ह स्मैनं ब्राह्मण उपन्येति । 'गोतमब्रुवाण' इति । देवासुरा ह संयत्ता आसंस्तानन्तरेण गोतमः शश्राम, तमिन्द्र एत्योवाच—इह नो भवान्स्पशश्चरत्विति, नाहमुत्सह इति, अथाहं भवतो रूपेण चराणीति, यथा मन्यस इति । स यत्तद् गोतमो ब्रुवाणश्चचार गोतमरूपेण वा तदेतदाह गोतमासीति । अर्हे सुत्यामागच्छ मघवन्निति, तद्यथाऽर्हतो ब्रूयादिति अर्हे वः पक्ताऽस्मि तदागच्छतेत्येवमेवैतद्देवेभ्यः सुत्यां प्राह । 'देवा ब्राह्मणाः' इति, देवा ह वै देवा अथ हैते मनुष्यदेवा ये ब्राह्मणाः शुश्रुवांसो ऽनूचानास्ते मनुष्यदेवाः । आहुतय एव देवानां दक्षिणा मनुष्यदेवानाम्, आहुतिभिर्हि देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवाञ्छुश्रुवुषोऽनूचानान्ब्राह्मणान्प्रीणाति" इति ।

"असावित्यन्तः" ।

वाचनिकमिदम् । प्रथमान्तस्यान्त उदात्तः । गार्ग्यो यजते, वात्स्यो यजते । ञित्त्वादाद्युदात्तं प्राप्तम् ।

तथा च द्राह्यायणिसूत्रम् "अर्थनिर्वचनमुच्चान्तम्" । 'अर्थो निरुच्यते बोध्यते प्राधान्येन प्रतिपाद्यते ऽनेनेत्यर्थनिर्वचनम् । पदमिति यावत् । पदमित्येव तु नोक्तम् । समासे पूर्वपदानामन्तोदात्तता मा भूद्' इति व्याख्यातारः । यजते

इत्यस्य निहतस्य "उदात्ताद्" इति स्वरितत्वे उदात्तः ।

"अमुष्येत्यन्तः" ।

षष्ठ्यन्तोपलक्षणमिदम् । 'दाक्षेः पिता यजते' । पूर्ववत् ।

"स्यान्तस्योपोत्तमं च"

अदन्तस्य षष्ठ्यन्तस्य उपान्त्यं चकारादन्तश्चेत्युभयमुदात्तं स्यात् । गार्ग्यस्य पिता यजते, वात्स्यस्य पिता यजते ।

"वा नामधेयस्य" ।

स्यान्तस्य नामधेयस्योपोत्तमं वा उदात्तं स्याद्, अन्त्यस्तु स्यादेव । देवदत्तस्य पिता यजते । 'जनिष्यमाणानाम्' इत्यत्र प्रत्ययस्वरेण स्यशब्द उदात्तः, "तास्यनुदात्तेद्" इति लसार्वधातुकस्वरेण शानजनुदात्तः । "उदात्ताद्" इति स्वरितः । तस्यानेनोदात्तत्वमिति ष्यमौ उदात्तौ । अन्यच्छेषनिघातेनानुदात्तम् । 'पितापितामह' इत्यत्र तु पितामहप्रपितामहयोः "असौ" इत्यन्तोदात्तत्वे "उदात्ताद्" इति स्वरितत्वे प्रकृतसूत्रेण पिमशब्दयोरेवोदात्तत्वं नतु तत्परतोऽपि ।

देवब्रह्मणोरनुदात्तः ३८ ।

अत्र वार्त्तिकम्—"देवब्रह्मणोरनुदात्तत्वमेके" इति । देवा ब्रह्माण आगच्छत । अयमर्थः—देवा ब्रह्माण इति पदयोर्वैयधिकरण्यपक्षे पूर्वस्यामन्त्रितस्याविद्यमानवद्भावादुभयोरपि आमन्त्रिताद्युदात्तत्वे शेषनिघाते स्वरितत्वे च कृतेऽनुदात्तविधिरर्थवान । यदि तु तयोः सामानाधिकरण्यं तदा "विभाषितं विशेषवचने बहुवचनम्" इति पक्षे विद्यमानत्वाद् "आमन्त्रितस्य"इति निघातेनैव सिद्ध्या प्रयोजनाभावात् ।

स्वरितात्संहितायामनुदात्तानाम् ३९ ।

स्वरितात्परेषामनुदात्तानां संहितायामेकश्रुतिः स्यात् । "इमं मे गङ्गे यमुने सरस्वति" । इममित्यन्तोदात्तम् । मे इत्यनुदात्तम् । "अनुदात्तं सर्वम्" इत्यधिकारात् । "उदात्तादनुदात्तस्य" इति तस्य स्वरितः । ततः परेषां गङ्गे इत्यादीनामेकश्रुतिः । संहितायां किम् । पदपाठे आमन्त्रितनिघातेनानुदात्तत्वमेव यथा स्यात् ।

स्यादेतत् । 'अनुदात्तानाम्' इति बहुत्वं विवक्षितं न वा । नाद्यः । 'आग्निवेश्यः', 'पचति' इत्यत्र द्वित्वैकत्वयोरव्याप्तेः । आग्निवेश्यशब्दो हि गर्गादियञन्तत्वादाद्युदात्तः । शेषनिघाते द्वितीयः "उदात्ताद्" इति स्वरितः । वेश्येति वर्णद्वयमनुदात्तम् । पचति इत्यत्र धातुरुदात्तः । शप्तिपौ पित्त्वादनुदात्तौ । शबकारः स्वरितः । ततोऽपर एक एवानुदात्त इत्येकश्रुतिर्न स्यात् ।

नान्त्यः । "इमं मे गङ्गे यमुने सरस्वति" इत्यत्र मेशब्दस्य स्वरितत्वात्ततः परस्यैकस्यैवैकश्रुतिः स्यात्, न 'यमुने' इत्यादीनाम्, व्यवहितत्वात् । "तस्मादित्युत्तरस्य" इति वचनात् ।

अत्र भाष्यम्—वचनत्रयान्तानामनुदात्तपदानामेकशेषोऽयमिति ।

सरूपसूत्रारम्भपक्षे चेदम् । जातिपक्षे तु "जात्याख्यायाम्" इति बहुवचनम् । ततश्चैकद्विबहुषु स्वरितात्परस्या जातेरानन्तर्येणोपलम्भात्सर्वेषामेकश्रुत्यसिद्धिः ।

नन्वाद्ये षट्प्रभृतीनामेव कार्यं स्यात्सहविवक्षायामेकशेष-

विधानात् समुदितानामेव कार्यान्वयादिति चेन्न । निर्देशसहविवक्षायामपि प्रत्येकं कार्यप्रवृत्तेः, देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामितिवत् ।

उदात्तस्वरितपरस्य सन्नतरः ४० ।

उदात्तः स्वरितो वा परो यस्मात्तस्यानुदात्तस्यानुदात्ततरः । "सरस्वति शुतुद्रि" । "व्यचक्षयत्स्वः" । इति वृत्तिकारादयः ।

केचित्तु—एकश्रुतिस्वरस्यानुदात्ततरः स्यादित्येवार्थः । अन्यथा "एकश्रुति दूरात्" इतिसूत्रगतभाष्यकैयटविरोधात् ।

किञ्च अस्यासिद्धत्वात्सरस्वतीशब्दावयवेकारस्यापि पूर्वेणैकश्रुतिः स्यात् ।

नचायं तदपवादः । अग्निम्, कन्या इत्यादौ सावकाशत्वात् ।

नच "न सु ने" इत्यत्र 'न' इति योगविभागान्नासिद्धत्वमिति हरदत्तादिरीत्या निर्वाहः । तदर्थं योगविभागस्य भाष्यादावनुक्तेः । अन्यथा शास्त्रान्तपाठकल्पनस्यापि वैयर्थ्यात् । एकश्रुतेरिव स्वरितस्यापि परत्वाद्बाधोपपत्तौ "नोदात्तस्वरितोदयम्" इतिसूत्रवैयर्थ्याच्चेति प्राहुः ।

अपृक्त एकाल्प्रत्ययः ४१ ।

एकोऽल् यत्र स प्रत्ययोऽपृक्तसंज्ञः । प्रदेशाः—"सुतिस्यपृक्तं हल्" इत्यादयः ।

स्यादेतत् । एकहलित्येव वक्तव्यम् । 'अपृक्तं हल्' इत्यत्र हल्पदपरित्यागे लाघवात् । अल्ग्रहणे तु बिभेदेत्यादौ णलो लोपवारणाय तदावश्यकत्वात् ।

नैवम् । "यूनि लुगणिञोः" इति पदद्वयोच्चारणे गौरवात् ।

हल्ग्रहणेतु अपृक्तस्येत्येव तत्र वक्तव्यत्वात् ।

नचैवं फाण्टाहृतेरपत्यं फाण्टाहृतः । "फाण्टाहृतिमिमताभ्याम्" इतिणप्रत्ययस्यापि लुगापत्तिः । अण एव लुका सिद्धौ णविधानानर्थक्यापत्त्या तद्वारणात् ।

नच "यञिञोश्च" इतिफग्बाधनार्थतया तत्सार्थक्यम् । पैलादिपाठं कृत्वाऽपि फको वारयितुं शक्यत्वात् ।

मैवम् । यथान्यासे ऽपृक्तसंज्ञायां हल्ग्रहणम्, हल्ङ्यादिसूत्रे द्वितीयहल्ग्रहणम्, "अणिञोः" इत्यत्रापृक्तग्रहणं चेति त्रयम्; उक्तरीत्याऽप्यपृक्तसंज्ञायां हल्ग्रहणम्, "अणिञोः"इत्यत्राणिञ्पदयोर्ग्रहणं चेति पदत्रयमेवेति न लाघवम्।

एवं च तथाऽप्येकग्रहणं मास्तु। नच दर्विः,जागृविरित्यादावतिप्रसङ्गः। अलेव यः प्रत्यय इति व्याख्यानात्। अन्यथाऽल्पदवैयर्थ्यात्। अलन्तस्येत्यर्थे केवलस्याद्यन्तवद्भावेन तथात्वाश्रयणे तद्व्यावर्त्याभावात् ।

नचैवं हल्ग्रहणेऽपि समानम् इति वाच्यम् । अजन्तव्यावृत्त्या तदन्तविधेश्चरितार्थत्वापत्तेः। तस्माद् "एकग्रहणं वर्णग्रहणे जातिग्रहणम् इति ज्ञापनार्थम्" इति भाष्ये। "निपात एकाज्" इत्यत्र ज्ञापितस्यापि पुनर्ज्ञापनं मन्दबुद्ध्यनुग्रहार्थो वेति कैयटः ।

तत्पुरुषः समानाधिकरणः कर्मधारयः ४२ ।

सामानाधिकरण्यं द्वेधा शाब्दमार्थं च । आद्यं यथा–नीलमुत्पलमिति पदद्वयस्य, समानविभक्तिकत्वात् । द्वितीयमपि तत्रैव तदर्थयोरभेदेन विशेषणविशेष्यभावात् ।

तत्राद्यं बाधितसाधारणं 'माता वन्ध्या' इत्यादिदर्शनात् । द्वितीयं त्वबाधितमात्रवृत्तीति विवेकः । शब्दानुशासनप्रस्तावादाद्यमेवात्र निविष्टम् । काञ्चनमयवह्निमानित्याद्यभियुक्तप्रयोगदर्शनात् ।

वार्त्तिपदयोरेकविभक्तिकयोर्यस्तत्पुरुषः कर्मधारयसंज्ञः स स्यात् ।

तत्पुरुषप्रकरणादन्यत्रैतदारम्भस्तु कर्मधारयसंज्ञायास्तत्पुरुषसंज्ञाबाधकत्वं मा भूदिति । तत्रैकसंज्ञाधिकारात् । नीलश्च तदुत्पलं च नीलोत्पलम् । चित्रा गावो यस्येत्यादिबहुव्रीहेरपि समानाधिकरणत्वाद्व्यभिचारवारणाय तत्पुरुष इति । राजपुरुष इत्यादिवारणाय समानाधिकरण इति ।

नच तत्पुरुषस्य समुदायस्यैक्यात्सामानाधिकरण्यानुपपत्तिस्तस्य भेदनियतत्वादिति वाच्यम् । तत्परुषपदस्य तद्घटकपदलक्षकत्वात् ।

ननु मुख्यतत्पुरुषस्यापि सामानाधिकरण्यं सम्भवति—राजपुरुषः शोभन इत्यादौ, तत्र चरितार्थत्वात्कुतो लक्षणा ।

अत्र कैयटः—तत्पुरुषस्य पदान्तरेण सामानाधिकरण्यं बहिरङ्गं वर्त्तिपदानां तु तदन्तरङ्गमिति ।

नचैवं [illegible] पदानामेव कर्मधारयसंज्ञाऽऽपत्तिः । एकाजि[illegible]न्यायेन पदसमुदायस्यैव संज्ञाविधानात् ।

प्रथमानिर्दिष्टं समास उपसर्जनम् ४३ ।

समासविधौ प्रथमान्तं पदमुक्तसंज्ञम् । कृष्णं श्रितः कृष्णाश्रितः । कृष्णादिशब्दानां प्रथमान्तत्वाभावेऽपि "द्विती-

याश्रित–" इत्यादौ तत्समर्पकद्वितीयादिपदानां प्रथमान्तत्वात् । तथाच समासपदं तद्विधायकशास्त्रपरमिति फलितम् । समासघटकपदापेक्षया समासविधेर्लघुतया तत्परत्वस्यैव न्याय्यत्वात् ।

स्यादेतत् । निर्देशापेक्षया समासस्याधारत्वात् एकत्र प्रथमानिर्दिष्टस्य सर्वत्रोपसर्जनसंज्ञा स्यात् । तदुक्तम्— "यस्य विधौ प्रथमानिर्देशस्ततो ऽन्यत्रोपसर्जनसंज्ञाप्रसङ्गः" इति । ततश्च राजकुमारीश्रित इत्यत्र श्रितादिसमासे कुमारीशब्दस्य प्रथमानिर्दिष्टत्वादुक्तसंज्ञायाम् उपसर्जनत्वनिमित्तो ह्रस्वः, पूर्वनिपातश्च पूर्वपदे षष्ठीतत्पुरुषेऽपि स्यात् ।

अत्र वार्त्तिकम्—

"सिद्धन्तु यस्य विधौ तं प्रतीति वचनाद्" इति ।

यस्य श्रितादेः समासविधौ प्रथमानिर्दिष्टं तं प्रत्येवोपसर्जनसंज्ञेत्यर्थात् । उपसर्जनमित्यन्वर्थसंज्ञया यत्प्रातियोगिकं यस्याप्रधानत्वं तत्प्रतियोगिकैवोक्तसंज्ञेति लाभात् ।

नन्वेवमर्द्धपिप्पली, पुरुषव्याघ्र इत्यादौ पूर्वपदार्थप्रधानेऽर्द्धादिशब्दानामुक्तसंज्ञा न स्यात् ।

मैवम् । अर्थसम्भवे सत्येवान्वर्थसंज्ञानां प्रवृत्तिनिमित्तमपेक्ष्य प्रवृत्तेः । अन्यत्र तु तदनपेक्ष्यैव, विधानसामर्थ्याद् । अत एव स्वादीनां कर्मप्रवचनीयसंज्ञेति वक्ष्यते ।

एतेन राज्ञः पुरुषस्येत्यादिकमपि व्याख्यातम् ।

भाष्ये तु परिहारान्तरमप्युक्तम् । पूर्वनिपातप्रकरणे हि "न वाऽनिष्टदर्शनाद्" इति पूर्वनिपातं प्रत्याख्यायोक्तम्–"षष्ठ्यन्तयोः समासेऽर्थाभेदात्प्रधानस्यापूर्वनिपातः" इति । वाक्यसमासयोरेकार्थत्वानुरोधाद्राज्ञ एव पूर्वनिपातो न पुरुषस्य, अन्यथाऽर्थभेदप्रसङ्गात् ।

न च राज्ञः कुमार्या इत्यत्रोपसर्जनह्रस्वापत्तिः । पुनर्ङीप्स-

म्भवादिष्टापत्तेः। वक्ष्यते हि–"परवल्लिङ्गम्" इति, "शब्दशब्दार्थौ" इति। यद्यप्येतत्तत्रैव दूषणीयं तथाऽप्यन्वर्थसंज्ञायामेव तात्पर्यम्।

एकविभक्ति चापूर्वनिपाते ४४।

समासे यन्नियतविभक्तिकं तदप्युक्तसंज्ञं न तु तस्य पूर्वनिपातः। तत्तत्प्रयोगव्यक्तौ सर्वस्याप्येकविभक्तित्वा-त् सामर्थ्यात् यस्य पर्यायेणापि न सर्वविभक्तित्वं तस्येयं संज्ञा। 'निष्कौशाम्बिः' इत्यत्र हि कौशाम्बीशब्दो निष्क्र-मणक्रियाऽपेक्षया ऽपादानशक्तिसम्बन्धात्पञ्चम्यन्त एव। क्रि-यान्तरापेक्षया शक्त्यन्तरानावेशात्।

स्यादेतत्। श्रितादिसमासे द्वितीयाद्यन्तानां कृष्णादि-शब्दानामप्यनेन पूर्वनिपातनिषेधः स्यात्, पूर्वसूत्रस्य नीलो-त्पलादिसमानाधिकरणसमासे सावकाशत्वात्।

मैवम्। अत्र पर्युदासाश्रयणात् पूर्वेण तत्र सिद्धेः।

यद्वा "एकविभक्ति–" इत्यनेन विहितोपसर्जनसंज्ञानिबन्ध-नस्यैव पूर्वनिपातस्य प्रतिषेधः। "अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा" इतिन्यायात्।

"एकविभक्तावषष्ठ्यन्तवचनम्"

इह [illegible] अर्द्धं पिप्पल्या अर्द्धपिप्पली। एकदेशि-स[illegible]विषय[illegible]श्चायं निषेधः। तेन पञ्चानां कुमारीणां स-माहारः पञ्चकुमारि इत्यादौ उपसर्जनत्वमेवेति द्वितीये विस्तरः।

"प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गक्रान्ताद्यर्थे"।

क्रमेणोदाहरणम्। पञ्चभिर्गोभिः क्रीतः पञ्चगुः, प्राप्तो जी-विकां प्राप्तजीविकः, आपन्नो जीविकामापन्नजीविकः, अल-ङ्कुमार्यै अलङ्कुमारिः, निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः।

इति सिद्धान्तसुधानिधौ प्रथमाध्यायस्य द्वितीये पादे प्रथमाह्निकम्॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ४५ ।

धातुप्रत्ययभिन्नमर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् । महासंज्ञाकरणं "को धातुः, कः प्रत्ययः, किं प्रातिपदिकम्" इत्याथर्वणश्रुत्यनुरोधात् । अर्थपदमभिधेयपरम् । संज्ञिविशेषलाभार्थमिदम् । तदुक्तम्—"अर्थवदिति व्यपदेशो वर्णानां मा भूद्" इति । नचाधातुरित्यादिपर्युदासात्तद्भिन्नस्यार्थवत एव लाभः । धर्मान्तरप्रयुक्तसादृश्यवतो वारणीयत्वात् । तेन वर्णेषु प्रत्येकं न व्यभिचारः । "वर्णानां च मा भूद्" इतिपाठे दशदाडिमाद्यनर्थकपदसमुदायस्य चकारेण समुच्चयः ।

स्यादेतत्—अस्तु वर्णानां संज्ञा । न च स्वादेरापत्तिः । एकवाक्यतया संख्याकर्मादिषु तेषां विधानात् ।

मैवम् । अविशेषेण स्वादीनामुत्पत्तेः । ततोऽर्थनियमः प्रकृतार्थापेक्षो वा प्रत्ययनियम इति अव्ययादिवत्सुपां दुर्वारत्वात् । ततश्च धनं वनमित्यादौ समुदायस्य [illegible] प्रातिपदिकसंज्ञायां तदन्तर्भावात् विभक्तिलोपेऽपि नलोपापत्तिः [illegible] धातुरिति निषेधः । प्रत्येकस्माद्विभक्तेरापाद्यत्वात् । तत्र च धा[illegible]तुत्वाभावात् । अर्थवद्ग्रहणपरिभाषाया विशिष्टरूपोपादानविषयकत्वात् । "प्रादूहोढ" इत्यादिवत् ।

यत्तूक्तम्—"संघातस्यैकार्थ्यात् सुबभावो वर्णाद्" इति, तद् वर्णानामर्थवत्त्वपक्षे तन्त्रेणैकयैव विभक्त्या समुदायावयवार्थगतैकत्वप्रतीतिसिद्धेः । अनर्थकस्य तु संज्ञायां प्रकाशनीयार्थ-

विरहात् प्रत्येकवर्णादपि स्याद् । अन्यद् विचारितं पस्पशायाम् ।

ननु "सुपो धातुप्रातिपदिकयोः" इत्यत्र धातोः पार्थक्येन ग्रहणात् धातोः प्रातिपदिकसञ्ज्ञाविरहो ज्ञापयिष्यते । अन्यथा पुत्रीयतीत्यादौ प्रातिपदिकत्वादेव लुक्सिद्धेः तेन "अहन् वृत्रम्" इत्यादौ न नलोपापत्तिरित्यधातुग्रहणं व्यर्थम् ।

मैवम् । तत्र "अप्रत्यय" इति प्रातिपदिकसंज्ञानिषेधात् तदर्थतया धातुग्रहणोपपत्तेः ।

नच प्रत्ययलक्षणेन "अप्रत्यय" इति संज्ञानिषेधः । "न ङिसम्बुद्ध्योः" इत्यनेन लोपे कार्ये प्रत्ययलक्षणमाश्रित्योक्तपर्युदासो न प्रवर्तते इति ज्ञापितत्वात् ।

अप्रत्यय इति किम् । काण्डे, कुड्ये । अत्र विभक्त्यन्तस्य सञ्ज्ञायां "ह्रस्वो नपुंसके प्रातिपदिकस्य" इति मा भूत् ।

अत्र भाष्ये छिद् भिद् इत्यादौ 'अधातुः' इति निषेधात्प्रातिपदिकसंज्ञाविधायकत्वेन कृद्ग्रहणस्य चरितार्थत्वेऽपि तद्धितग्रहणस्य नियमार्थत्वं भविष्यति–एतदन्तस्यैव प्रत्ययान्तस्य संज्ञेति ।

स्या[illegible] व्यन्त[illegible] अर्द्ध[illegible]दानां प्रत्येकं प्रत्ययान्तत्वेऽपि वाक्यस्य प्राति[illegible] [illegible]विष[illegible] [illegible]ज्ञा स्यात् । नच तत्र प्रत्ययान्तपर्युदासेन निर्वाहः । [illegible]हारः [illegible]त्ययग्रहणे [illegible]स्मात् स विहितस्तदादेस्तदन्तस्य च' इति प्रकृतिप्रत्ययसमुदायस्यैव ग्रहणात् । ननु अर्थवत्त्वाभावादेव तद्वारणम् । अन्वयव्यतिरेकाभ्यां पदानामेवार्थवत्त्वात्, वाक्यस्य चाकाङ्क्षादिलभ्यत्वात् ।

मैवम् । ध्वनिव्यङ्ग्यं नित्यं वाक्यं पदार्थसंसर्गरूपविशिष्टवाक्यार्थवाचकम् । अन्यथा वाक्यार्थस्याशाब्दत्वं स्यात् ।

तथाच वाक्यमेव मुख्यः शब्दः, वाक्यार्थ एव मुख्यः शब्दार्थः । पदपदार्थावस्थापनं तु लाघवार्थं सादृश्यात्कल्पितान्वयव्यतिरेकावाश्रित्य कल्पितम् । प्रतिवाक्यं व्युत्पत्त्यसम्भवात् इति सिद्धान्तात् ।

अत्र वार्तिकम्--

"अर्थवत्समुदायानां समासग्रहणं नियमार्थम्" इति ।

नन्वेवं बहुपटवः, उच्चकैः, नीचकैः इत्यादिकानामपि संज्ञा न स्यात् । द्योत्यवाच्याभ्यामर्थाभ्यां प्रत्ययस्य प्रकृतेश्चार्थवत्त्वात् अर्थवत्समुदायत्वरूपप्रतियोगितावच्छेदकधर्मावच्छिन्नत्वात् ।

नच संज्ञाविरहे यथा स्वाद्युत्पत्तिर्न भवति, तथा पूर्वोत्पन्नविभक्तिलोपोऽपि न भविष्यति इति तथैव सिद्धिरिति वाच्यम् । स्वरे दोषप्रसङ्गात् ।

तथाहि--"चित" इति सूत्रे "चितः सप्रकृतेः बह्वकजर्थम्" इतिवचनात्प्रकृतिमन्तर्भाव्य चित्स्वरो विधीयते । तथाच 'पटव' इति जसन्तस्य बाहुचं प्रति प्रकृतित्वात् जसकारस्योदात्तत्वं स्यात् । पूर्वोत्पन्नसुपो लोपे तु पुनरुत्पन्नविभक्तेः प्रकृतावनन्तर्भावाट्टाकारस्यो[illegible]ति सिद्धमिष्टम् । उच्चकैरित्यादावपि अकज्वतः सुबन्तस्य[illegible]पवे पदत्वाभावाद् 'उच्चकैः पठति' इत्यादौ "तिङ्ङतिङः" इति निघातानुपपत्तिः, पदादित्यधिकारात् । तन्मध्यपतितन्यायस्यानाश्रयणेनेदम् । तस्मात्प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा भवत्येवेति ज्ञापनार्थम् अप्रत्यय इति वक्तव्यम् ।

नचैवं बहुपटव इत्यादेरपि निषेधापत्तिः । प्रत्ययान्तस्यैव प्रतिषेधात् ।

न च 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावः'। यत्र संज्ञा विधेया तत्रैव तन्निषेधात् । अत्र तु संज्ञाप्रतिषेध इति वैषम्यात् ।

न च जसन्तं बहुपटव इत्येतदपि प्रत्ययान्तमेवेति वाच्यम् । पटुशब्दादेव जसुत्पत्तेः, समुदायस्य तदन्तत्वाभावात् ।

न च न विद्यते प्रत्ययो यस्मिन् इति बहुव्रीहिणा प्रत्ययादेरपि बहुपटव इत्यस्य निषेधः स्यादिति वाच्यम् । वर्त्तिपदार्थप्राधान्येन तत्पुरुषस्यान्तरङ्गत्वात् ।

अत्र भाष्यम्—तुल्यजातीयस्यैव समासग्रहणेन नियमः क्रियते सुबन्तानामेव समासविधानात् ।

न चाश्वक्रीतीत्यादौ "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इतिवचनादसुबन्तेनापि सुबन्तस्य समासोऽस्तीति वाच्यम् । भेदसंसर्गद्वारकार्थवत्त्वयुक्तानामित्यर्थादिति कैयटः ।

तथाच प्रकृतिप्रत्ययभावानापन्नसमुदायस्य समासभिन्नस्योक्तनियमेन व्यावृत्ति[illegible]रिति फलितम् ।

एतेनोक्तदोषा[illegible]या प्रत्ययान्तप्रतिषेधसामर्थ्यात्प्रकृतिप्रत्ययसमुदा[illegible]ज्ञा भवत्येवेति न्यासग्रन्थो यथाश्रुतपरत्वेन व्या[illegible] [illegible]विषय[illegible]

केचित्तु—य[illegible] संघाते पूर्वो भागः पदम् उत्तरस्तु प्रत्ययस्तस्य व्यावृत्तिः । बहुपटव इत्यत्र पूर्वभागस्य पदत्वाभावान्न दोषः । जन्मवानित्यादौ तूत्तरभागस्य प्रत्ययत्वात् । न च तद्धितग्रहणसामर्थ्यम् । औपगव इत्यादौ पूर्वस्य भसंज्ञया तत्र चरितार्थत्वात् । न चान्तर्वर्त्तिविभक्तिमाश्रित्य पदसंज्ञा । तुल्यावधिकया भसंज्ञया

तद्बाधात् । न च 'अयमियान्' इत्यादिसमुदायस्य संज्ञाप्रसङ्गः पूर्वभागस्य पदत्वेऽप्युत्तरस्य प्रत्ययत्वादुक्तनियमेन तत्र प्रवृत्त्यभावादिति वाच्यम् । तद्विहितत्वस्यापि प्रत्ययविशेषणत्वात् । तद्विहितत्वाभावप्रयुक्तविशिष्टाभावस्य तत्राप्यनपायादित्याहुः ।

न च सुप्तिङ्समुदायस्य संज्ञापत्तिः । "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति" इत्यस्य नियमार्थत्वात् । यद्यपि समाससंज्ञा समासान्तोदात्तार्था तथापि समासत्वादेव प्रातिपदिकत्वमिति तत्तुल्यजातीयताप्रतिपादनार्थमेतदुक्तमिति कैयटः ।

न च 'पश्य धावति' इत्यादेस्तिङ्समुदायस्य तदापत्तिः । "आख्यातमाख्यातेन क्रियासातत्ये" इत्यस्य नियमार्थत्वात् । तस्मात्समासग्रहणेन तुल्यजातीयानां सर्वेषां वाक्यानां निःयमान्निवृत्तिरिति सिद्धम् ।

अत्र वदन्ति—नैयायिकमते समासस्य शक्तिलक्षणोभयरहितत्वादर्थवत्त्वाभावादप्राप्तसंज्ञाविधायकत्वे बहुपटव इत्यादेरासिद्धिः, तद्धितान्तत्वाभावात्समासत्वा[भा]वात् ।

न च तद्धितग्रहणं तद्विशिष्टपरमिति [वा]च्यम् । पचतकीत्यादावतिव्याप्तेरिति ।

तन्न । पदार्थद्वयस्य विशेष्यत्वप्रकारत्वाभ्यामन्व[यभा]नाच्च विशिष्टार्थलाभस्तादृशसमुदायस्यैव तैरनर्थकत्वो[क्त्य]भावात् । बहुचस्तु स्वार्थिकप्रत्ययत्वेन पटुशब्दस्यैव तादृशार्थकत्वात् ।

तथाच अयं विशेषः—वैयाकरणानां वाक्यसमासयोरपि बहुपटव इत्यादिवदर्थवत्त्वात्समासग्रहणस्य नियमार्थत्वाद् वाक्यवद्बहुपटव इत्यादेरपि व्यावृत्तिप्रसक्तौ तद्व्यावृत्तं नियमप्रतियोगितावच्छेदकं रूपमाश्रित्य वाक्यस्य संज्ञा वार्यते ।

नैयायिकानां तु समासस्य विशेषविधानात्संज्ञा न तु वाक्यस्य, विशेषविध्यभावाद् । अर्थवत्त्वाभावेन सामान्यविधेरप्रवृत्तेश्च । बहुपटव इत्यादेस्तु उभयमते ऽप्यर्थवत्त्वादेव प्रातिपदिकसंज्ञेति ।

यदप्युक्तम्—समासग्रहणस्य नियमार्थत्वाभावे 'मूलकेनोपदंशम्' इत्यादौ समुदायस्य प्रसङ्गः । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । वैयाकरणमते तु समासग्रहणकृतनियमेन परत्वात्तद्बाधात् । एवञ्च "कृतद्धित" इति सूत्रे कृद्ग्रहणपरिभाषा नोपतिष्ठते एव फलाभावादिति ।

तदप्यसत् । विधिमुखेन नियमप्रवृत्तौ निषेधस्याक्षेप्यत्वात् प्रत्यक्षविधिना समं विप्रतिषेधायोगात् । आक्षेप्यापेक्षया प्रत्यक्षस्य बलवत्त्वात् । निषेधस्य समासभिन्नपरताया इव कृद्भिन्नपरताया अप्यवश्यं कल्पनीयत्वात् ।

निषेधमुखेन प्रवृत्तिरिति पक्षेऽपि कृद्ग्रहणपरिभाषया कारकपूर्वस्यापि प्रातिपदिकसंज्ञायां सिद्धायां परेणापि नियमेन व्यवच्छेदो न स्यात् । कारकपूर्वस्य प्रातिपदिकसंज्ञाविधेरन्यत्र सावकाशत्वाभावात् सावकाशनिरवकाशयोर्विप्रतिषेधानुपपत्तेः ।

न अर्द्धं र्थानुरोधात्तदप्रवृत्तिः । नियमस्य कृद्भिन्नपरत्वपरः, कृद्ग्रहणपरिभाषासङ्कोचो वा कल्प्यते इत्यत्र नियामकाभावात् । परिभाषाया अप्रवृत्तौ नियमस्य कृत्साधारण्यम्, तत्सिद्धौ तत्परिभाषाया अप्रवृत्तिरित्यन्योऽन्याश्रयापत्तेश्च । प्रत्युत तस्याः प्रथमोपस्थितिकतया कारकपूर्वस्य संज्ञासिद्धौ नियमस्य तद्भिन्नपरताया एव युक्तत्वात् ।

अत एव "कृत्तद्धित" इत्यत्र कृद्ग्रहणपरिभाषोपस्थाने 'मूलकेनोपदंशम्' इत्यत्र समासाभावपक्षेऽपि

तृतीयाया लुक् स्यात् । न च समासविकल्पविधिवैयर्थ्यम् । 'दाधिउपदंशम्' इत्यत्र शाकलप्रकृतिभावार्थतया तदुपपत्तेः । अन्यथा "अमैवाव्ययेन" इति नित्यसमासापत्त्या "सिन्नित्यसमासयोः प्रतिषेधो वक्तव्यः" इति शाकलप्रकृतिभावनिषेधापत्तेरिति कैयटेन चतुर्थे उक्तम् । "गतिकारकोपपदात्कृत्" इति उत्तरपदप्रकृतिस्वरविरहार्थं तया तदुपपत्तिरिति च सीरदेवेनोक्तम् । परत्वान्नियमेन तत्संज्ञाबाधमनभिधाय कृद्ग्रहणपरिभाषाया अप्रवृत्तेरेव तेन प्रथममुक्तत्वात् ।

तथाहि षष्ठीत्यादौ समासात्प्रागेव "पुंयोगाद्"इत्यादिवचनैर्ङ्यादिप्रत्ययः स्यादित्याशङ्क्य षष्ठादिसमुदायस्य प्रातिपदिकत्वाभावात्स्त्रीप्रत्ययानुपपत्तिरित्युक्त्वा कृद्ग्रहणपरिभाषया समुदायस्य कृदन्तत्वात्संज्ञा स्यादित्याशङ्क्य अप्रत्यय इति पर्युदासात्प्रत्ययान्तस्य प्रातिपदिकसंज्ञाया अप्राप्तावपि कृद्ग्रहणेन कृदन्तस्य संज्ञा न तु गतिकारकपूर्वस्यापीत्युक्तम् । तस्मात्समासे कृते तन्निबन्धनप्रातिपदिकसंज्ञया स्त्रीप्रत्यय इति तद्ग्रन्थार्थः । अतस्तत्र कृद्ग्रहणपरिभाषा न प्रतिष्ठते इत्युभाभ्यामुक्तम् ।

तस्मादेवं समाधेयम्—

"कृत्तद्धित" इत्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्त भावेऽपि अर्थवदित्यस्यानुवृत्त्या प्रक्रियादशायामन्वयव्यतिरेकाभ्याङ्कल्पितामर्थवत्तामाश्रित्य प्रकृतिप्रत्यययोर्मिलित्वा यदर्थबोधकत्वं तदर्थबोधकसमुदायस्य प्रातिपदिकसंज्ञेति तावद्भाष्यादावेव स्पष्टम् । ततश्च नैयायिकमतेऽपि अर्थवद्ग्रहणानुवृत्त्या प्रकृतिप्रत्ययसमुदायस्यैव विधानसामर्थ्यात्संज्ञा

न तु कारकपूर्वस्यापि । अधिकग्रहणे प्रमाणाभावात् । तद्बला-त्परिभाषाया एव प्रवृत्त्यभावात् ।

वस्तुतो नात्र तत्परिभाषाऽवकाशः । "गतिरनन्तर" इ-त्यत्र तस्या ज्ञापयिष्यमाणत्वात् । प्रत्येकपूर्वस्यैव ग्रहणमिति तदर्थात् । उभयपूर्वकस्य युगपदनुपादानात् । अवतप्तेन-कुलस्थितम्, उदकेविशीर्णमित्यादौ तथैव दर्शनाच्चेति दिक् ।

नन्वेतत्सूत्रं व्यर्थम्, व्युत्पत्तिपक्षे कृदन्तत्वादेव सर्वत्र सिद्धे-रिति चेन्न। अव्युत्पत्तिपक्षे सार्थक्यात् । तत्र चेदमेव ज्ञापकमि-ति प्राञ्चः ।

निरुक्तेऽप्युक्तम् —"नामान्याख्यातजानीति शाकटायनः, नैरुक्तसमयश्च, न सर्वाणीति गार्ग्यो वैयाकरणानाञ्चैके" इति ।

व्युत्पत्तिपक्षेऽपि निपातार्थमनुकरणार्थञ्चेति हरदत्तोक्तं तु चिन्त्यम् । तत्रापि प्रकृत्यादिकल्पनसम्भवात् ।

वस्तुतस्तु व्युत्पत्तिपक्षेऽपि बहुपटव इत्याद्यर्थं सूत्रम् । न चैवं बहुच्पूर्व इत्येव सूत्र्यतामिति वाच्यम् । मूलकेनोपदंश-मित्यादौ कृदन्तत्वेनाऽतिप्रसङ्गात् । अर्थवत्सूत्रं विना समा-सग्रहणस्य नियमार्थत्वायोगादिति दीक्षिताः ।

तद[illegible]भक्ता भेदविवक्षायामनुकरणानां प्रकृत्यादिकल्पने मा[illegible] इह म[illegible] स[illegible]वात् ।

अयं तु विशेषः । भेदाविवक्षापक्षेऽनुकार्येणार्थवत्त्वात्प्राति-पदिकसंज्ञा "भुवो वुग्" इत्यादिवत् । अभेदविवक्षायां तु न, गवित्ययमाहेत्यादिवत् । मूलकेत्यादावतिप्रसङ्गस्य च निरस्तत्वात् ।

कृत्तद्धितसमासाश्च ४६ ।

कृदन्ततद्धितान्तसमासाः प्रातिपदिकसंज्ञाः । प्रत्ययान्तप्रतिषेधस्य पूर्वमुक्तत्वात्तदपवादस्यास्य प्रत्ययान्त एव प्रवृत्तेः, "संज्ञाविधौ" इत्यस्य नात्र प्रवृत्तिरिति न्यासकारः । लिट् धुक् इत्यादौ अधातुरिति, कर्तेत्यादौ प्रत्ययान्तमिति पर्युदासे प्राप्तेऽयमारम्भः । समासग्रहणं च नियमार्थमिति व्याख्यातम् ।

ननु समासस्य प्रत्ययान्तत्वादप्राप्तविधिरयं स्यात् । मैवम् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात् । न च "स्त्रीप्रत्यये चानुपसर्जनेन" इत्यनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावाद् 'राजकुमारी' इत्याद्यर्थं स्यादिति वाच्यम् । अन्तरङ्गस्यापि हल्ङ्यादिलोपस्य लुग्विषये प्रवृत्त्यभावात्, श्रूयमाणे एव सुपि समासप्रवृत्तेः, 'परिहृत्यापवादविषयम्' इतिन्यायात् । तत्राप्रत्ययान्तत्वेन समासवाक्ये प्रवृत्तायाः संज्ञाया एकदेशविकृतन्यायेन विभक्तिलुक्यपि सुलभत्वात् । अत एव गोमत्प्रियः इत्यादौ न नुमादयः । लुका लोपे प्रत्ययलक्षणाभावात् ।

ननु तथाऽप्यसमर्थसमासे विध्यर्थं स्यात् । मैवम् । अर्थवदित्यनुवृत्तेः, तस्य चानर्थकत्वात् । न चैवं षत्र संज्ञाऽनापत्तिः । धर्मिग्राहकमानेन तत्सिद्धेः । "असूर्यललाटयो[illegible]शो[illegible]नेन ह्यसूर्यशब्दे उपपदे खश् । विभक्त्यन्तं विना च उपोच्चारि[illegible]मासे[illegible]पपदत्वानुपपत्तेः ।

स्यादेतत् । शशविषाणादिसमासार्थमयमपूर्वविधिः । तेषामनर्थकत्वात् । ननु शशपदं शशसबन्धाभाववत्परम् । तस्याभेदेन विषाणान्वयः । तथा च शशसम्बन्धाभाववदभिन्नं विषाणमित्यर्थवदेव तदिति वाच्यम् । शशविषाणं नास्तीत्यस्यायोग्यत्वापत्तेः ।

अतएव विषाणे शशसम्बन्धाभावनिश्चयदशायां शशविषाणनिर्मितं कार्मुकमिति वाक्यान्न शाब्दधीरित्यभियुक्ताः। अत एव—

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।
मृगतृष्णाऽम्भसि स्नातः शशशृङ्गधनुर्द्धरः॥

इत्यादेरपार्थकत्वमिति क्षीरस्वाम्यादि[illegible]रुक्तम्। अत एव 'सङ्गतिग्रहणाभावाच्छशशृङ्गादिपदानामबोधकता' इति बौद्धाधिकारदीधितावुक्तम्।

मैवम्। "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति पातञ्जलसूत्रात् शशविषाणादेरलीकस्यापि शब्दबोध्यत्वात्। अनेन पदेनालीकं बोध्यमिति वृत्तेस्तत्र स्वीकाराच्च। अत एव 'गगनकमलस्यापि शब्दाभासप्रतिपन्नत्वाद्' इति लीलावत्यामुक्तम्।

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि। इति—
खण्डनकारोक्तेश्च।

वस्तुतस्तु तन्निष्ठात्यन्ताभावप्रतियोगिनि शशपदस्य लक्षणा। ततश्च तदर्थेनार्थ[illegible]त्वात्प्रातिपदिकसंज्ञा। 'शशसम्बन्धविशेषवद्विषाणम्' इतिधी[illegible]तु भ्रमादेव। एतेन शशविषाणं नास्तीत्यपि व्याख्या[illegible]स्यायाः [illegible]सम्बन्धविशेषस्यैव तत्र प्रतियोगितावच्छेदकत[illegible]विषयत्वात्। अत एव 'शशादिप्रत्येकपदार्थव्युत्प[illegible]स्य शशविषाणादिपदात्तदर्थप्रत्ययप्रसङ्गाद्' इति दीधितावुक्तं विशिष्टस्यार्थवत्त्वं नास्तीत्यभिप्रायात्।

अयं तु विशेषः—तादृशार्थविशेषशक्तस्य शशविषाणादिसमासस्य कदाचिच्छक्तिभ्रमादन्यथाबोधकत्वमिति।

प्राञ्चस्तु खपुष्पशशशृङ्गादिशब्दानामभाववचनत्वादर्थवत्त्वम्।

तथाहि—खे पुष्पं नास्तीति विग्रहे नञर्थान्तर्भावः। विग्रहे

नास्तीति कथनं समासार्थविवरणार्थम् । समासोत्तरं नास्तीति पदजातं त्वनुवादमात्रम् । स्पष्टं चैतन्मीमांसावार्त्तिकादावित्याहुरिति दिक् ।

ह्रस्वो नपुंसके प्रातिपदिकस्य ४७।

अजन्तस्य प्रातिपदिकस्य नपुंसके ह्रस्वः । श्रीपम् । ह्रस्वश्रुत्या "अच" इत्युपस्थितौ तदन्तविधिः । प्रातिपदिकसम्बन्धिनोऽच इत्यन्वये तु वैयधिकरण्यम्, सुवाक् कुलमित्यादावतिव्याप्तिश्च स्यात् ।

न च नपुंसकपदेनैव प्रातिपदिकाक्षेपसम्भवात्तदुपादानवैयर्थ्यम् । काण्डे कुड्ये रमते ब्राह्मणकुलमित्यादिव्यावृत्त्यर्थत्वात् । साधनाश्रयसंख्यावत्तल्लिङ्गस्याप्युपादानसंभवात् ।

नचोक्तन्यायेन 'दोषा ब्राह्मणकुलम्' इत्यादौ सहचरितत्वाद्दोषाशब्दस्यौपचारिकत्वेऽव्ययस्यापि ह्रस्वापत्तिः प्रातिपदिकत्वादिति वाच्यम् । 'दोषा दिवा' इति शब्दौ हि रात्रावहनीति सप्तम्यर्थविशिष्टार्थौ । ब्राह्मणकुलसाधनानां क्रियाणां अधिकरणं कालो भवन् ब्राह्मणकुलस्याधिकरणम्—'दोषा दृश्यते चरत्यधीते वा' इति । आधेयव्यवधानेनाधिकरणस्य लिङ्गो[illegible]त्वात् । ततश्चाव्ययं नपुंसकस्याधिकरणमेव न तु नपुंसकाभि[illegible]मास[illegible]

ननु काण्डीभूतं ब्राह्मणकुलमित्यादौ प्रकृतिविकृत्योरभेद[illegible] विवक्षायां च्विप्रत्ययान्तस्यापि नपुंसकत्वादतिव्याप्तिरिति । नच कृते ह्रस्वे "च्वौ च" इति दीर्घो भविष्यतीति वाच्यम् । अन्तरङ्गे दीर्घे बहिरङ्गस्य ह्रस्वत्वस्यासिद्धत्वात् । एवं रमते इत्यत्रापि ह्रस्वत्वे टेरेत्वं नेति योज्यमिति चेन्न ।

---

१ अधिकरणं भवन् काल इति योजना ।

असत्त्ववाचित्वादव्ययस्य नपुंसकत्वाभावात्। एतेन तिबन्तमपि व्याख्यातम्। शत्त्याश्रयद्रव्यनिष्ठसंख्याप्रतिपादकस्याप्याख्यातस्य तदीयलिङ्गप्रतिपादने सामर्थ्यविरहात्। शब्दशक्तिस्वाभाव्यात्। 'काण्डे तिष्ठतः' इत्यत्रापि नपुंसकत्वाभावः, संख्यायाः प्राधान्यात्। अवयवधर्मेण समुदायस्य नपुंसकत्वव्यपदेशे तु काण्डे कुड्ये इत्यत्र स्यात्। प्रातिपदिकविभत्त्योरेकादेशस्य प्रातिपदिकग्रहणेन ग्रहणात् 'ह्रस्वो नपुंसके यत्तस्य'इति कर्त्तव्यं स्यात्। साक्षात्तस्यैव यदा नपुंसकत्वं तदा ह्रस्वो न त्ववयवद्वारके तस्मिन्निति तदर्थः।

अथवा तस्यैवानुपजातव्यतिरेकस्येत्यर्थः। विभत्त्यन्तं चोपजातव्यतिरेकमिति नातिप्रसङ्गः।

सूत्रकारस्य त्वयमभिप्रायः—मुख्यमेवात्र नपुंसकवृत्ति प्रातिपदिकं गृह्यते। अन्तवद्भावातिदेशात्तु प्रातिपादिकत्वं न मुख्यमिति। युगवरत्राय,युगवरत्रार्थम्, युगवरत्रेभ्य इत्यादौ तु न ह्रस्वः। बहिरङ्गत्वाद्दीर्घादीनामासिद्धत्वात्। एवमतिखट्वायेत्यादौ उत्तरसूत्रेण ह्रस्वोऽपि नेति व्याख्येयम्।

गोस्त्रियोरुपसर्जनस्य ४८।

उपसर्जनेति गोस्त्रियोः,तेच प्रातिपादिकस्य विशेषणम्। तेन तदन्तविधिः। "ग्रहणवता प्रातिपादिकेन"इति निषेधस्य प्रत्ययविधिमात्रविषयकत्वात्। तथा चोपसर्जनभूते ये गोस्त्रियौ तदन्तं यत्प्रातिपदिकं तस्य ह्रस्वः स्यात्। "अलोऽन्त्यस्य"। निष्कौशाम्बिः, अतिखट्वः। "एकविभक्ति च" इत्युपसर्जनत्वम्। चित्रगुः। प्रथमानिर्दिष्टत्वात्।

स्यादेतत् । अतिश्रीः, अतिलक्ष्मीरित्यादौ ह्रस्वत्वं स्यात् । नैवम् ।

अत्र वार्त्तिकम्—

"गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्" ।

कृत्स्त्रीणां धातुस्त्रीणां चेत्यर्थः । टाङिति टापमारभ्य ष्यङो ङकारेण प्रत्याहारः । तथा च कृदन्तस्त्रीणां तद्बहिर्भावान्न दोषः ।

भाष्यकारास्त्वाहुः—स्त्रीग्रहणं स्वरितमाश्रित्य "स्त्रियाम्" इत्यधिकारे विहिता एव प्रत्यया गृह्यन्ते । "स्वरितेनाधिकारः" इति सूत्रस्य यत्र स्वरितत्वं तत्र तदधिकारोपादानमिति, अस्यापि व्याख्यास्यमानत्वात् ।

नन्वेवं राजकुमारीमतिक्रान्तोऽतिराजकुमारिरित्यादौ ह्रस्वो न स्यात् । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्यैव ग्रहात् । कुमारशब्दस्य ङीप्रकृतित्वात्कुमारीशब्दस्यैव स्त्रीप्रत्ययान्तत्वान्न तु राजकुमारीशब्दस्येति चेन्न । स्त्रीप्रत्यये तदादिनियमाभावात् । अत एव परमकारीषगन्धीपुत्र इत्यत्र "ष्यङः संप्रसारणम्" इत्यस्य प्रवृत्तिः ।

ननूपसर्जनस्त्रीप्रत्यये तदादिनियमोऽस्त्येव अन्यथाऽतिकारीषगन्ध्यापुत्र इत्यत्रापि सम्प्रसारणापत्तेः । ...

अत्र कैयटः—'क्वचिदुपसर्जनस्त्रीप्रत्ययेऽपि तदादिनियमो नास्ति हल्ङ्यादिसूत्रे दीर्घग्रहणात् । अन्यथा निष्कौशाम्बिः, अतिखट्व इत्यादौ उपसर्जनत्वात् ङ्याबन्ताभावादेव सुलोपानापत्त्या तद्वैयर्थ्यापत्तेः ।

नन्वेवं कुम्भकारीशब्दादपि स्त्रीभ्यो ढगुत्पत्त्या कौम्भकारेयसिद्धौ "अनुपसर्जनात्" इत्यत्र तत्सिद्धिर्न स्यादिति भाष्यविरोध इति चेन्न । तत्र तदादिनियमाभावे कदाचित् कारी-

शब्दादपि तदापत्तेरिति तदाशयादिति ।

न्यासकारस्त्वाह—'अङ्गसंज्ञासूत्रे योगविभागलभ्येयं परिभाषा । तत्र "वाऽऽमि"इत्यत्राव्यवस्थितविभाषार्थस्य वाशब्दस्यानुवृत्तिमाश्रित्यात्र तत्प्रवृत्तिर्नेति व्याख्येयम् ।

यद्वा"कृत्तद्धित"इत्यतोऽनुक्तसमुच्चयार्थश्चकारोऽनुवर्त्यः,इति ।

स्यादेतत् । गोकुलमित्यादावतिप्रसङ्गः । कुमारीपुत्र इत्यत्र कुमारीशब्दस्य प्रत्ययान्तत्वादप्रातिपदिकत्वेऽपि राजकुमारीशब्दस्य समासप्रातिपदिकत्वाद्राजकुमारीपुत्र इत्यत्रापि अतिप्रसङ्ग एव । खट्वायादो मालायाद इत्यादौ तु न तच्छङ्का, उभयत आश्रयेऽन्तादिवद्भावनिषेधात् । अत्र हि प्रातिपदिकं स्त्रीप्रत्ययश्चाश्रीयते—स्त्रीप्रत्ययान्तं यत्प्रातिपदिकमिति । एकादेशश्च यदि प्रातिपदिकस्यान्तवत्तदा स्त्रीप्रत्ययस्यान्तत्वं नास्ति, अथ स्त्रीप्रत्ययस्यादिवत्तदा प्रातिपदिकत्वं नास्तीति ।

मैवम् । गोकुलमित्यादौ तदन्तत्वाभावात् प्रातिपदिकेच व्यपदेशिवद्भावस्य निषेधात् ।

ननु "येन विधिः"इति सूत्रे "रोण्या अण्""तस्य च"इति वार्त्तिककृतोक्तत्वात् "स्वं रूपम्" इत्यस्यानुवृत्तिरिति लभ्यते । तथा च ...सम्बन्धत्वाभावेऽपि गोशब्दस्वरूपसत्त्वादेव गोकुलमित्यत्र? ...विषये ह्रस्वः स्यात् ।

मैवम् । "स्वं रूपम्" इत्यस्याननुवृत्तेः । आद्यन्तवत्सूत्रे "येन विधिस्तदन्तत्वे प्रयोजनम्"इति वार्त्तिकोक्तेः ।

न च तथापि "तस्य च"इति वार्त्तिकादेव गोकुलमित्यत्र ह्रस्वापत्तिः । तस्य वार्त्तिकमात्रशेषत्वात् ।

नापि द्वितीयः । उपसर्जनं यः स्त्रीप्रत्ययस्तदन्तस्योपसर्जनस्येत्युक्त्या यत्प्रतियोगिकं यस्योपसर्जनत्वं त-

त्प्रातियोगिकस्यैवान्तत्वस्य लाभात् । राजकुमारीशब्द-स्य तु पुत्रपदेन यः षष्ठीसमासस्तन्निरूपितोपसर्जनत्वसत्त्वेऽपि तन्निरूपितान्त्यत्वाभावात् । अन्यथा "पूर्वपदप्रतिषेधः" इति वार्त्तिकारम्भेऽप्यनिर्वाहात् । पञ्च कुमार्यः प्रिया अस्येति त्रिपदे बहुव्रीहावाद्यपदद्वयस्य "तद्धितार्थोत्तरपद"इति द्विगुस-मासे कुमारीशब्दस्य पूर्वपदत्वाभावात् ह्रस्वापत्तेः । भिन्नप्र-तियोगिकयोरन्तत्वोपसर्जनत्वयोः सत्त्वात् । एतेन अगोपुत्र इत्यपि व्याख्यातम् ।

अथ तथाऽपि द्वन्द्वस्य प्रतिषेधो वक्तव्यः। कुक्कुटमयूर्यावि-त्यत्र समासार्थेऽवयवार्थस्योपसर्जनत्वाद्,"अनेकम्"इत्यनुवृत्त्या प्रथमानिर्दिष्टत्वाच्च मयूरीशब्दस्योपसर्जनत्वात्तस्मिन्नेव समासेऽन्त्यत्वाच्च ।

नैवम् । "परवल्लिङ्गम्" इति "शब्दशब्दार्थौ" इति व-क्ष्यमाणत्वाल्लिङ्गतदर्थबोधकप्रत्ययोभयातिदेशस्वीकारान्मयूरीश-ब्दस्योक्तरीत्या ह्रस्वत्वेऽपि द्वन्द्वसमासोत्तरं ङीप्प्रत्ययोपपत्तेः। अवयवार्थयोरेव परस्परसान्निहितयोर्द्वन्द्वार्थत्वमिति प्राधान्या-दुपसर्जनत्वाभावाच्च ।

स्यादेतत् । "कपि प्रतिषेधो वक्तव्यः" [illegible]रीकः । विषयसप्तमी चेयम् । कपः पूर्वमेवान्तरङ्गत्वात् ह्रस्वप्र[illegible]-ङ्गात् । न च "न कपि" इति प्रतिषेधः । "केऽणः" इति प्राप्तेरव तेन प्रतिषेधाद् । "अनन्तरस्य" इति न्यायात् । अन्यथा प्रियं ग्रामणि यस्य प्रियग्रामणिक इत्यादेरपि निषेधापत्तेः । कुला-दिविशेषणत्वाद्ग्रामणिशब्दे क्लीबत्वम् ।

नैवम् । कपः समासान्तावयवत्वात्कपि कृते स्त्रीप्रत्यया-न्तस्य समासप्रातिपदिकत्वविरहात् । बहुयवागूक इत्यादौ

अतिमाल इत्यादौ च द्वयोः सावकाशतया परत्वात्कप एव प्रवृत्तेः। न चोपसर्जनस्त्रीप्रत्ययान्तप्रातिपदिकमात्रापेक्षं ह्रस्वत्वमन्तरङ्गं कप्तु समासविशेषस्य नद्युत्तरपदबहुव्रीहेः सापेक्षत्वाद्बहिरङ्ग इति वाच्यम्। समासार्थोत्तरपदान्ताः समासान्ता इति पक्षे कपोऽवयवापेक्षत्वात्, ह्रस्वस्य च समुदायापेक्षत्वाव सर्वेभ्यः समासकार्येभ्यः कपोऽन्तरङ्गत्वात्।

तस्माद् "ईयसो बहुव्रीहेः पुंवद्वचनम्" इत्येव वार्त्तिकमारभ्यम्। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। "ईयसश्च" इति कप्प्रतिषेधः। बहुव्रीहेः किम्। श्रेयसीमतिक्रान्तोऽतिश्रेयसिरिति तत्पुरुषे ह्रस्वो यथा स्यात्।

लुक् तद्धितलुकि ४९।

स्त्रीप्रत्ययस्य लुक् तद्धितलुकि सति। अभावरूपस्य लुकः परत्वासम्भवात्। पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। "तद्धितार्थ" इति समासः। ततः "साऽस्य देवता" इत्यण्। तस्य "द्विगोर्लुगनपत्ये" इति लुक्। "इन्द्रवरुण–" इत्यादिना विहितस्य ङीपोऽनेन लुक्। सन्नियोगशिष्टन्यायेन आनुकः ह्रस्वश्च निवृत्तिः। पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलः। "तेन क्रीतम्" इत्यार्हीयस्य ठकः "अध्यर्द्धपूर्व–" इति लुक्। आमलक्याः फलं आमलकम्। "नित्यं वृद्धशरादिभ्य" इति मयट्। फले लुक्। एवं बदरं कुवलमिति। शष्कुल्यादयो गौरादिङीषन्ताः। लौकिकं चैषामुपसर्जनत्वम्। व्याप्तिन्यायादुभयविधस्याप्यत्र ग्रहणात्। लुकि किम्। गार्गीकुलम्। गार्ग्यशब्दाद् "यञश्च" इति ङीप् "यस्येति च" इत्यकारलोपे "हलस्तद्धितस्य" इति यकारलोपः।

स्यादेतत् । अवन्तेरपत्यं गोत्रं स्त्री अवन्ती । "वृद्धेत्कोसलाजादाद्" इति ञ्यङ् । कुन्तीत्यप्येवम् । कुरोरपत्यं स्त्री कुरूः । "कुरुनादिभ्यो ण्यः" । "स्त्रियामवन्तिकुन्तिकुरुभ्यश्च" इति लुक् । आद्याभ्याम् "इतो मनुष्यजातेः" इति ङीष् । अन्त्याद् "ऊङुतः" इत्यूङ् । अत्रावन्त्यादीनामुपसर्जनस्त्रीप्रत्ययसत्त्वात्तद्धितलुकश्च कृतत्वात्स्त्रीप्रत्ययस्य लुक् स्यात् ।

मैवम् । यत्र स्त्रीप्रत्ययान्तात्परस्य तद्धितस्य लुक् तत्रैवास्य लुकः प्रवृत्तेः । अत्र च कृते लुकि स्त्रीप्रत्ययोत्पत्तेः । तदुक्तम्—"अलुक्परत्वाद्" इति । उक्तोऽर्थः । बुद्धिपरिकल्पितं लुकः परत्वमाश्रित्य तु वार्त्तिककृतैवमुक्तम् ।

भाष्यकृतस्तु उपसर्जनत्वाभावादेव न दोषः । उपसर्जनेन स्त्रीप्रत्ययस्य विशेषणात्, शास्त्रीयस्योपसर्जनस्यासम्भवाद् अप्रधानरूपोपसर्जनत्वस्याश्रयणात् । अवन्तीत्यादौ चापत्यलक्षणाया जातेः प्राधान्येनाभिधानात्, अप्रातिपदिकत्वाच्च न ह्रस्वत्वम् । आमलकमित्यादौ तु तद्धितान्तत्वात्प्रातिपदिकत्वम् लिङ्गविशिष्टस्यैवोपादानाच्च लिङ्गविशिष्टपरिभाषाप्रवृत्तिः । कुरूरित्यत्राप्युभयत आश्रयणेऽन्तवद्भावनिषेधात् ।

इद्गोण्याः ५० ।

तद्धितलुकि गोणीशब्दस्योक्तविषये इत्त्वं स्यात् । पञ्चभिर्गोणीभिः क्रीतः पञ्चगोणिः । "तद्धितार्थ–" इति समासे क्रीतार्थे ठक् । पूर्ववत् तस्य लुक् । लुकि प्राप्ते ह्रस्वारम्भः । अत्र वार्त्तिकम्—

"इद्गोण्या नेति वक्तव्यं ह्रस्वता हि विधीयते ।
इति वा वचने तावन्मात्रार्थं वा कृतं भवेत् ॥
गोण्या इत्त्वं प्रकरणात् सूच्याद्यर्थमथापि वा ।"

अस्यार्थः—ननु गोण्या लुङ्निषेध एव कर्त्तव्यो न त्विच्वम्, "गोस्त्रियोः" इति ह्रस्वेन सिद्धेः। मैवम्। नेत्युक्ते इदित्युक्ते वा विशेषाभावात्। यदा गोणिमात्रमिदं गोणिरिति मात्रप्रत्ययस्य लोपः क्रियते, तदा लुकि निषिद्धे ह्रस्वत्वं सिद्धम्। तस्मात्प्रथमाविधाने परिमाणग्रहणस्य प्रयोजनं तद्धितं विनाऽपि यत्र परिमाणशब्दाः परिमेये वर्त्तन्ते तदाऽपि प्रथमा यथा स्यादिति। एवं चानुपसर्जनत्वादभेदोपचारेण प्रमेयवृत्तित्वादप्राप्ते ह्रस्वे इत्त्वविधिः। नन्वेवं सर्वत्र गोण्या इत्त्वं स्यात्। तर्ह्युपसर्जनस्येत्यनुवर्त्तते एव नतु तद्धितलुकीति, तेन यत्र स्वार्थोपसर्जनमर्थान्तरं प्रत्याय्यते तत्रेदमित्त्वं विधीयते। नहि तत्र ह्रस्वेन सिद्धिः। अप्रातिपदिकत्वेन तदप्रवृत्तेः। प्रकारान्तरेण प्रत्याचष्टे—गोण्या इत्त्वमिति। अशिष्यमिति शेषः। प्रकरणादिति। गोण्या इत्येव सूत्रणीयम्। न च संनिधानाल्लुकोऽनुवृत्तिप्रसङ्गः। वैयर्थ्यप्रसङ्गात्। तेनैव सिद्धेः। तथा च ह्रस्वानुवृत्तौ लुकोऽपवादो ह्रस्वत्वं विधीयते इति सिद्धमिष्टम्। सिद्धान्तमाह—सूच्यादीति। यद्यपि गोणिरिति मात्रलोपेनापि सिद्धम्, तथापि इदिति योगविभागार्थमिदम्। तेन पञ्चसूचिरित्यादि सिद्धम्। न चान्यत्राप्यापत्तिः। तस्येष्टमात्रासिद्ध्यर्थत्वात्। तपरत्वं तु दीर्घनिवृत्त्यर्थम्। न च दीर्घस्य दीर्घविध्यानर्थक्यम्। ह्रस्व...तेत्यर्थत्वेनोपपत्तेः। न च भाव्यमानत्वादेव दीर्घनि-...त्तेः। लुको ह्रस्वस्य बाधनेन स्वरूपावस्थापनमात्रफलकतया-इ...ऽपूर्वविधायकत्वाभावात्।

लुपि युक्तवद्व्यक्तिवचने ५१।

लुपि सति प्रकृतिवल्लिङ्गवचने स्तः। अनेन प्रकृत्यर्थसम्बन्धिन्यौ लिङ्गसंख्ये प्रत्ययार्थेऽतिदिश्येते। युक्तपदस्य प्रकृतिपरत्वात्।

प्रकृतिप्रत्ययार्थयोः परस्परं युक्तत्वेऽपि प्रत्ययार्थे प्रत्ययार्थातिदेशवैयर्थ्यात् । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः, अङ्गाः, वङ्गाः, कलिङ्गाः । "जनपदे लुप्" इति लुप् । कुरुशब्दे ण्यस्य, अन्यत्राण इति विशेषः । पूर्वाचार्यवचनं चैतत् । अग्रे प्रत्याख्यास्यमानत्वात् । व्यक्तिवचने इति किम् । शिरीषाणामदूरभवो ग्रामः शिरीषाः । "अदूरभवश्च" इत्यण् । तस्य च "वरणादिभ्यश्च" इति लुप् । तेषां वनं शिरीषवनम् इत्यत्र णत्वं मा भूत् अन्यथा व्यक्तिसंख्ययोरिव प्रकृतिवृत्तेर्वनस्पतित्वस्याप्यतिदेशापत्त्या "विभाषौषधिवनस्पतिभ्यः" इति णत्वं स्यात् । तदप्रवृत्तौ तु ग्रामार्थकत्वान्न णत्वम् । 'फली वनस्पतिर्ज्ञेयः' इति भेदस्य णत्वविधावनाश्रयणात् । एवं कटुबदर्या अदूरभवो ग्रामः कटुबदरीत्यादि ।

स्यादेतत् । प्रकृतिगतस्य ग्रामापेक्षव्यतिरेकस्याप्यतिदेशात्षष्ठ्यपि स्यात्, वचनशब्दस्यैकवचनादिप्रत्ययवाचकत्वात् । एकवचनादिसंज्ञविधिकालेऽनुनिष्पादिवचनशब्दस्यापि पारिभाषिकत्वानपायात् । वाक्ये च षष्ठीदर्शनात् । न च वचनशब्देन संख्यैवातिदिश्यते इति वाच्यम् । तद्वाचकशब्दातिदेशपर्यवसाने षष्ठ्या अपि संख्याप्रतिपादकत्वेन तदापत्तेः ।

मैवम् । शिरीषाणां ग्रामस्य च यः सम्बन्धो वाक्ये भासते लुपि कृते तस्य विशिष्टस्यैव प्रातिपदिकार्थेऽन्तर्भावात्, मासजात इत्यादिवत् ।

अत्र भाष्यम्—

"प्रागपि वृत्तेर्युक्तं वृत्तं चापीह यावता युक्तम् ।
वक्तुश्च कामचारः प्राग्वृत्तेर्लिङ्गसंख्ये ये" ॥

अस्यार्थः—वृत्तेः प्राग्वाक्यावस्थामपि प्रकृतिवाच्यं वस्तु प्रत्ययार्थेन संबद्धं वृत्त्यनन्तरमपि तथैव, उभयत्राप्यर्थभेदाभावा-

त्। वक्तुश्चेति चकारस्य भिन्नक्रमत्वात्प्राग्वृत्तेश्चेति योज्यम्। प्राग्वृत्तेर्ये लिङ्गसंख्ये चशब्दाद्वृत्तस्यापि ते अतिदेष्टुं कामचारः। तथा च प्राग्वृत्तेर्ये लिङ्गसंख्ये तयोर्नातिदेशः किन्तु प्रत्यासत्त्या वृत्तस्य ये लिङ्गसंख्ये तयोरेव। ततश्च यथा तावकीनो मामकीन इत्यादौ आदेशबलादुपसर्जनस्यापि संख्याविशेषावगतिः, यथा वा आदेशे प्रथमासामानाधिकरण्यदर्शनाल्लटि तदवगतिस्तथाऽत्रापि प्रत्ययार्थेऽतिदिष्टसंख्याऽवगमात् तत्प्रकृत्यर्थेऽपि तदवगमः। तत्र वृत्तावुपसर्जनं प्रधानार्थमभिधत्ते इति व्यतिरेकाभावात् संख्यामात्रप्रत्ययार्थं प्रातिपदिकार्थमात्रे प्रथमैव भवति। शिरीषाणां मनुष्या इत्यादौ तु मनुष्यादिजनितव्यतिरेकापेक्षा षष्ठी। शिरीषग्रामयोर्यः सम्बन्धस्तस्यैव वृत्तावन्तर्भावात्। "अथवा प्राग्वृत्तेर्ये लिङ्गसंख्ये ते अतिदिश्येते। षष्ठी कस्मान्न भवति। सामान्यातिदेशे विशेषानतिदेशः" इति भाष्ये पाठान्तरम्। तत्र वाक्यावस्थायां प्रकृत्यर्थस्य ये लिङ्गसंख्ये ते अतिदिश्येते। षष्ठी तु व्यतिरेकनिबन्धना। न चेह प्रत्ययार्थस्य व्यतिरेकोऽस्ति। न च व्यतिरेकसहिता संख्याऽतिदिश्यते, संख्यामात्रातिदेशे सम्बन्धसहितसंख्याऽतिदेशाभावादित्यर्थ इति कैयटः।

अत्र वार्त्तिकम्—"समास उत्तरपदस्य बहुवचनस्य लुपः"। वर्त्तिपदार्थानामेवापेक्षितपरस्पराणां द्वन्द्वार्थमिदम्। उत्तरपदे यत्र बहुवचनस्य लुप् तत्रैव बहुवचनातिदेशो न तु पूर्वपदेऽपीति। मथुरापञ्चालाः। नेह पञ्चालमथुरे। एवं मथुरागोदा इति। न तु मथुरागोदौ। द्वन्द्वेऽपि गोदार्थस्य द्वित्वानतिक्रमादिति कैयटः।

विशेषणानां चाजातेः ५२।

लुबर्थस्य विशेषणानामपि वद्वदेव लिङ्गवचने स्तो न तु जा-

तेः । पञ्चाला रमणीयाः । गोदौ रमणीयौ । गोदौ ह्रदविशेषौ । विशेषणानां विशेष्यसमानयोगक्षेमत्वात्सिद्धेऽपि जातिप्रतिषेधार्थमारम्भः । पञ्चाला जनपदः।गोदौ ग्रामः । जनपदग्रामशब्दौ जातिवचनौ । एवं तद्विशेषणेऽपि गोदौ ग्रामो रमणीयो बह्वन्न इत्यादि । अत्र हि सामानाधिकरण्येनान्वये जातिभिन्नानां विशेषणानां युक्तवद्व्यक्तिवचने, जातिरूपस्य तु विशेषणस्य नेत्यर्थः । वैयधिकरण्येनान्वये तु जातेर्यानि विशेषणानि तेषां नेति । भवतिना नञ्सम्बन्धादसमर्थसमासश्चायम् । आद्ये पञ्चाला जनपद इति सिद्धम् । सुभिक्षः संपन्नपानीयो बहुमाल्यफल इति तद्विशेषणानां तु बहुवचनान्तत्वं स्यात् । अन्त्ये वैपरीत्येन योज्यम् । तस्मात्सूत्रे आजातेरिति आङ् प्रश्लेष्यः तथा च यावज्जा । नियतलिङ्गवचना एव तेषां संज्ञाः। आपो दारा वर्षाः सिकता इत्यादिवत् । तेषां तत्तज्जात्यवच्छिन्नैकव्यक्तिमात्रेऽपि बहुचनान्तानामेव प्रवृत्तेः ।

लुब्योगाप्रख्यानात् ५४ ।

लुबपि न विधेयो योगस्य यौगिकार्थस्याप्रख्यानाद अनवगम्यमानत्वात् इत्यर्थः । पञ्चाला इत्यादिभ्यो[१] देशविशेषबोधस्य पञ्चालत्वादिप्रकारकस्यैव जायमानत्वात् । क्षत्रियविशेषसम्बन्धित्वेन बोधस्यानुभवसिद्धत्वाभावात् ।

ननु "हस्ताज्जातौ" "कम्बलाच्च सञ्ज्ञायाम्" इत्यादौ सञ्ज्ञाशब्दानामपि व्युत्पादनमस्त्येव, हस्तीत्यादिभ्योऽपि जातिविशेष-

---

१ अत्रायं ग्रन्थस्त्रुटित उपलभ्यते आदर्शभूतेषु त्रिष्वपि पुस्तकेषु । नियतेत्यादिच "तदशिष्यम्" इति सूत्रव्याख्यानमुदाहरणतः, कौस्तुभात् , प्रदीपाच्चावसीयते ।

प्रकारकस्यैव बोधस्योदयात् । सत्यम् । तत्र तद्धितोत्पत्त्या रूपे विशेषात् । अत्र तु लुप आवश्यकतया तदभावादिति न्यासकृत् ।

योगप्रमाणे च तदभावे दर्शनं स्यात् ५५ ।

चशब्दो हेत्वर्थः। योगस्य प्रमाणं योगप्रमाणम्। यौगिकार्थप्रत्यायकत्वमिति यावत् । यदि हि पञ्चालादयः शब्दाः क्षत्रियादिसम्बन्धं प्रवृत्तिनिमित्तमभिधायैव जनपदादौ प्रवर्त्तेरन् तदा तदभावे योगाभावे पञ्चालशब्दानामदर्शनमप्रयोगः स्यात् । दण्डसम्बन्धाभावे पुरुषे दण्डिपदाप्रयोगात् । नचेष्टापत्तिः । प्रयोगविरोधात् ।

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ५६ ।

वचनमित्यनन्तरं अशिष्यमित्यनुषङ्गः। प्रधानं प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यत्वरूपेण प्राधान्येन प्रतीपाद्यः प्रत्ययार्थो यत्र तत् । प्रत्ययार्थः प्रधानमित्येवं रूपं वचनमिति यावत् । अशिष्यमनारभ्यं अर्थस्य विशेषणविशेष्यभावरूपस्य अन्यप्रमाणत्वात् लोकानुभवमूलकत्वात् ।

तेन हि प्रत्ययार्थत्वावच्छेदेन प्राधान्यं बोध्यते उत तत्सामानाधिकरण्यमात्रेण ।

नाद्यः। घटमित्यादौ कर्मत्वादौ प्रातिपदिकार्थस्य प्रकारत्वेऽपि संख्याऽऽदेः प्रत्ययार्थस्य प्रातिपदिकार्थे प्रकारत्वात् ।

नान्त्यः । प्रकृत्यर्थस्यापि क्वचित्प्रधानतया प्रत्ययार्थेऽपि तद्वचनस्यानुपयुक्तत्वात् । तथा च क्रमेण लोकाविरुद्धार्थबोधकत्वादिति लोकसिद्धार्थबोधकत्वादिति च हेतुद्वये तात्पर्यम् ।

कालोपसर्जने च तुल्यम् ५७।

अतीताया रात्रेः पश्चिमार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽद्यतनः, विशेषणमुपसर्जनमित्यादि पूर्वाचार्याणां वचनम् । तत्राप्याशिष्यत्वं समानं लोकसिद्धत्वात् ।

यद्वा लोकसिद्धत्वाख्यो हेतुस्तुल्यः । तथा चाशिष्यत्वासिद्धिरिति योज्यम् ।

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ५८ ।

स्पष्टोऽर्थः । यद्यपि जातिरुपलक्षणं व्यक्तिस्तु पदार्थ इति पक्षे बहुष्वेकवचनमित्येव युक्तम्, "जातेरुपलक्षणत्वेनाख्यायाम्" इति व्याख्यानात्, तथाऽपि जातौ पदार्थ एतत् । तदुक्तम्—"जात्याख्यायां सामान्याभिधानादैकार्थ्यम्" इति । भाष्ये तु "यद् गार्ग्ये गार्ग्यत्वं तदेकम्" इत्यप्युक्तं तद् गोत्रस्य परिभाषिकजातित्वाभ्युपगमात्, बहुषु गर्गेषु गार्ग्यत्वस्यैकस्य भावादिति कैयटः । जातिश्चेह समानकालीनानेकवृत्तिरेव गृह्यते न तु भिन्नकालीनानेकवृत्तिर्डित्थत्वादिः । जातिपदार्थपक्षे सर्वेषां जातिशब्दत्वेऽपि "जात्याख्यायाम्" इत्युक्तिसामर्थ्यात् ।

नन्वत्र पक्षे व्रीहिभ्य आगत इत्यत्र "घेर्ङिति" इति गुणः स्यात् स्थानिवद्भावेन ङ्यादेशस्य भ्यसो ङित्त्वात् । नैवम् ।

एकस्मिन्नर्थे बहुत्वस्यैवानेनातिदेशात् स्थान्यादेशभावविरहात् ।

तदुक्तम्—"अर्थातिदेशात्सिद्धम्"इति ।

एवं "तिष्यपुनर्वस्वोः" इत्यत्रापि द्विवचनबहुवचनशब्दाभ्यां द्वित्वबहुत्वयोरभिधानमिति बोध्यम् ।

"सङ्ख्याप्रयोगे प्रतिषेधो वक्तव्यः" ।

एकस्मिन्बहुत्वातिदेशस्यैकशब्दप्रयोगेऽपि प्राप्तौ प्रतिषेधारम्भः। एको व्रीहिः संपन्नः सुभिक्षं करोति । विकल्पः किम् । व्रीहिरित्यपि यथा स्यात् । तत्र सम्पन्नो व्रीहिरित्यादौ भिन्नव्यक्तिपरत्वेऽपि एकत्वं व्रीहित्वजातावेवान्वेति क्वचित्पदार्थतावच्छेदकपदार्थयोरप्यन्वयस्वीकारादिति केचित् ।

अन्ये तु व्रीह्यादिपदशक्यतावच्छेदकतया व्रीहित्वादेः स्वरूपत एवोपस्थित्या अन्वयितावच्छेदकव्रीहित्वत्वरूपेणानुपस्थितेस्तत्र पदार्थान्तरान्वयानुपपत्त्या स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थे व्रीह्यादावेवैकत्वान्वय इत्याहुः ।

नव्यास्तु नेदं युक्तम्। नह्येकत्वमात्रमेकवचनस्यार्थः वस्तुमात्रसाधारण्यादर्थवत एव लाभादनुपयोगाच्च, किन्तु सजातीयान्तरराहित्यविशिष्टम्। तच्च सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपम्। साजात्यं च समभिव्याहृतपदार्थसम्बन्धित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण। तेनात्र घटोऽस्तीत्यादौ एतद्घटनिष्ठस्यैकत्वस्य घटान्तरनिष्ठभेदप्रतियोगितायां वस्त्वन्तरनिष्ठैकत्वस्य चैतद्घटनिष्ठभेदप्रतियोगितायामवच्छेदकतया घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः । एतद्देशविद्यमानत्वविशिष्टघटनिष्ठभेदप्रतियोगितानवच्छेदकत्वस्य तद्घटनिष्ठैकत्वे एव प्रसिद्धेः। तत्र घटान्तरसत्त्वविवक्षायां तु तदप्रसिद्धमेव स्यात् । अत एव"पशुना यजेत"इत्यादावेकत्वस्य

विवक्षितत्वात् तद्यागव्यक्तौ पश्वन्तरव्यावृत्तिः । बहुघटसत्त्वे 'घटोऽस्ति'इति प्रयोगस्तु जात्यभिप्रायेण समर्थनीयः ।

यत्तु भावाख्यातवदत्राप्येकत्वमविवक्षितमेव साधुत्वार्थत्वादिति । तन्न । तत्र गत्यन्तराभावेऽप्यत्र तदभावात् इत्याहुः ।

प्रकृतमनुसरामः—

अत्र वार्त्तिकं "अशिष्यं वा बहुवत्पृथक्त्वाभिधानाद्"इति ।

जातिप्राधान्यविवक्षायामेकवचनस्य द्रव्यप्राधान्यविवक्षायां तु बहुवचनस्य सिद्धत्वात् सूत्रं नारभ्यमित्यर्थः ।

"अस्मदः सविशेषणप्रयोगे नेति वाच्यम्" ।

देवदत्तः गार्ग्यायणः पण्डितो वा अहं ब्रवीमि । त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता इत्यादौ भवत्येव । निषेधस्यानुवाद्यविशेषणविषयत्वादिति हरदत्तादयः ।

अस्मदो द्वयोश्च ५९ ।

एकत्वे द्वित्वे वा विवक्षिते ऽस्मदो बहुवचनं वा स्यात् । वयं ब्रूमः । अहं ब्रवीमि, आवां ब्रूव इति वा ।

इदमपि भाष्ये प्रत्याख्यातम् । इदं मे अक्षि सुष्टु पश्यति, अनेनाक्ष्णाऽहं सुष्ठु पश्यामीत्युभयथा लोके प्रयोगदर्शनात् । आद्ये आख्यातस्य संयोगादिव्यापारपरत्वात्, अन्त्ये चाश्रयत्वपरत्वात् । तथा च वयं पश्यामः इत्यादौ वयमित्यनेनेन्द्रियाणामभिधानात् शरीरवत्तत्राप्यहंकारोत्पादात् । एकेन्द्रियप्रवृत्ताविन्द्रियान्तराणामौदासीन्येन संनिधातृत्वात्कर्तृत्वस्य विवक्षितत्वात् । पारतन्त्र्यविवक्षायां त्वहमित्येकवचनम् । युष्मदस्मदोश्चैकशेषऽस्मद एवार्थद्वयाभिधायित्वाद् द्विवचनम् ।

फल्गुनीप्रोष्ठपदानां च नक्षत्रे ६०।

द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् नक्षत्रेऽर्थे। उदिते पूर्वे फल्गुन्यौ प्रोष्ठपदे वा। उदिताः पूर्वाः फल्गुन्यः प्रोष्ठपदा वा। नक्षत्रे किम्। फल्गुन्यौ माणविके।

इदमपि प्रत्याख्यातम्। तन्नुक्तं चन्द्रमसमादाय बहुत्वसंभवात् छत्रिणो गच्छन्तीत्यादिवत्। अमावास्यायामप्यादित्यमण्डलप्रविष्टेन चन्द्रेण नक्षत्राणां योगात्। एकस्यां तूत्तरायां फल्गुनीशब्दस्यावृत्तेः पुष्पवन्तावित्यादिवन्नैकवचनम्। शिष्टप्रयोगस्य नियामकत्वाच्च नातिप्रसङ्गः।

छन्दसि पुनर्वस्वोरेकवचनम् ६१।[1]

विशाखयोश्च ६२।

द्वित्वे एकवचनं वा। पुनर्वसु, विशाखा वा नक्षत्रम्। पक्षे पुनर्वसू, विशाखे।

इमे अपि प्रत्याख्याते। तथा च वार्तिकम्—

"पुनर्वसु विशाखयोः सुपां सुलुक् पूर्वसवर्णेति सिद्धम्" इति॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ६३।

---

१ नानयोः सूत्रयोः सर्वेष्वादर्शपुस्तकेषूपन्यासो व्याख्यानं वा उपलभ्यते केवलमेकस्मिन् पुस्तके सूत्रोपन्यासमात्रमुपलभ्य कौतुक—भाष्यानुरोधेन व्याख्यानमपि किञ्चिदुपन्यस्तम्।

बहुत्वं द्वित्ववद्भवति । तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू । तिष्येति किम् । कृत्तिकारोहिण्यः । नक्षत्रेति किम् । तिष्यश्च पुनर्वसू च माणवकाः तिष्यपुनर्वसवः । न चात्र गौणत्वादेव व्यावृत्तिरिति वाच्यम् । तिष्यपुनर्वसुयुक्तकालभवत्वेन माणवकेषु तिष्यपुनर्वसुशब्दस्य मुख्यत्वात् । न च तथापि पूर्वसूत्रादेव नक्षत्रपदलाभ इति वाच्यम् । कालार्थकतिष्यपुनर्वसुशब्दस्य वारणार्थत्वात् । बहवः तिष्यपुनर्वसवो गताः कतरेण तिष्येण गतः । यद्वा अनयोः प्रदेशान्तरस्थमपि कार्यं नक्षत्रत्वे एव स्यादित्येतदर्थम् । तेन "तिष्यपुनर्वस्वोर्नक्षत्राणि यलोप" इत्यत्र नक्षत्रपदं नोपादेयम् । ननु तत्र वाऽत्र वा तदुपादाने न कश्चिद्विशेष इति चेत्तर्हि पर्यायस्यापि ग्रहणार्थम् सिद्धपुनर्वसू इति सिद्धम् । द्वन्द्वेति किम् । यस्तिष्यः स एव पुनर्वसू येषां भ्रान्तानां ते तिष्यपुनर्वसवः । बह्विति किम् । समाहारे मा भूत् । उदितं तिष्यपुनर्वसु । न चाप्राणिनामिति पर्युदासाज्जातिप्रयुक्तैकवद्भावानुपपत्तिः । सर्वो द्वन्द्वो विभाषैकवद्भवतीत्यस्य ज्ञाप्यत्वात् । तेन बाभ्रवशालङ्कायनं बाभ्रवशालङ्कायना इत्यादि सिद्धम् । तथाहि— अप्राणिजातिद्वन्द्वे नित्यमेकवद्भावः प्राणिद्वन्द्वे तु विकल्पेन, एकवद्भावप्रकरणं प्राण्यङ्गादीनां समाहार एव द्वन्द्व इति विषयविभागार्थमिति वक्ष्यमाणत्वात् । तथा च तत्प्रकरणानुपात्तानां "चार्थे द्वन्द्व" इत्यनेनैव इतरेतरयोगद्वन्द्वे द्विवचनादि, समाहारद्वन्द्वे त्वेकवद्भाव इति न्यायसिद्धेऽर्थे बहुवचनग्रहणमपि लिङ्गमिति सिद्धम् । तथा च समाहारे प्राण्यङ्गादीनामेव द्वन्द्व इति तत्र विपरीतनियमवारणार्थमेतादिति तात्पर्यम् ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्य द्वितीये द्वितीयमाह्निकम् ।

अथ तृतीयमाह्निकम् ।

सरूपाणामेकशेष एकविभक्तौ ६४

स्वाद्यन्यतमयावत्प्रत्ययप्रकृतिकानां येषां शब्दानां सारूप्यं तेषां मध्ये एक एव शिष्यते । वृक्षौ वृक्षाः । यद्यपि समानानामित्युक्तौ रूढत्वात्समानपदस्य तुल्यार्थत्वावगमे लाघवम्, सरूपाणामित्यत्र तु पदद्वयार्थावगमपूर्वकान्यपदार्थावगमात्प्रतिपत्तिगौरवम्, तथाऽपि शब्दार्थोभयकृतसाम्यविवक्षापत्त्या वृक्षा इत्यादावेवैकशेषः स्यान्न त्वक्षाः पादा इत्यादौ अर्थभेदात् । "स्वं रूपम्" इत्यत्र रूपग्रहणेन व्याकरणेऽर्थाङ्गीकारस्यापि ज्ञापितत्वात् । रूपग्रहणे तु शब्दस्वरूपमात्रगतं तुल्यत्वं गृह्यते इति न दोषः ।

नन्वेकग्रहणं व्यर्थम् । शेषशब्दस्य भावसाधनत्वपक्षे प्राथम्यादेकस्यैव शेषसिद्धेः । शिष्यते इति शेष इति कर्मसाधनत्वेऽप्येकत्वस्य विवक्षितत्वादेकस्यैव शेषसिद्धेः । मैवम् । आद्ये व्याप्तिन्यायादनेकस्यापि शेषापत्तेः । द्वितीयेऽपि "ग्रहं सम्मार्ष्टि" इतिवत्संस्कार्यसंख्याया अविवक्षितत्वात् ।

अथ शेषग्रहणं व्यर्थम् । सरूपाणामेकः साधुर्भवतीति वाक्यशेषाध्याहारेणान्तरतमस्यैकस्यादेशस्योपपत्तेः । मैवम् । एकस्यादेशत्वप्रसङ्गात् । "षष्ठीस्थाने योगा" इति नियमात् । ततश्चाश्वश्च अश्वश्चाश्वौ । समुदायघटकयोर्द्वयोर्द्वयोरश्वशब्दयोरादाद्युदात्तत्वादन्त्ये चानुदात्तत्वात्सर्वोदात्तस्य सर्वानुदात्तस्य वा-

ऽश्वशब्दस्य प्रसङ्गात् । उदात्तद्वयानुदात्तद्वयवतः समुदायस्य स्थाने तदन्यतरवत एवादेशस्यान्तरतमत्वात् ।

अथैकविभक्ताविति किमर्थम् । न च पयः पयो जरयति, वासो वासः छादयति, ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहीत्यादावेकशेषवारणार्थमिति वाच्यम् । सहविवक्षायामित्यस्यावश्यकत्वात् । अत एव "इदितो नुम्धातोः" इत्येकशेषाभावः सङ्गच्छते । परस्परविशेष्यविशेषणभावानापन्नानामेव तत्संभवात् । बहुव्रीहौ तु वार्त्तिपदार्थानां विशेष्यविशेषणभावसत्त्वात् । वक्ष्यति हि वार्त्तिककारः "न वाऽर्थविप्रतिषेधाद्युगपद्वचनाभाव" इति । युगपद्वचनं सहविवक्षा । यत्र शिष्यमाणो लुप्यमानार्थाभिधानसमर्थस्तत्र ह्येकशेषः । कर्तृत्वकर्मत्वसम्प्रदानत्वादयश्च एकेन युगपद्बोधयितुमशक्याः । युगपदेकस्माद्विभक्तिद्वयानुत्पत्तेः । चतुर्थ्यन्तस्य शेषे च ब्राह्मणेभ्य इत्युक्ते कर्तृत्वस्य, तृतीयान्तस्य शेषे ब्राह्मणैरित्युक्ते सम्प्रदानत्वस्यानवगमात् । एकेन भिन्नेन वा पदेनोपस्थितानामैकरूप्येणैव प्रत्ययार्थान्वयादित्यर्थः ।

नैवम् । तस्य सारूप्योपलक्षणार्थताया वक्ष्यमाणत्वात् ।

स्यादेतत् । अनेकव्यक्तिबुबोधयिषायामनेकशब्दप्रयोगे प्राप्ते तन्निवृत्त्यर्थं तावदयमारम्भः । ततश्च विरूपानेकशब्दप्रयोगस्य धवखदिरौ इत्यादौ दर्शनात् सरूपैकशेषारम्भवत् वृक्षा इत्यादौ सरूपैकशेषदर्शनाद्विरूपाणामनेकशेष इत्येवाऽऽरभ्यताम् दृष्टान्तमात्रस्य हेत्वभावस्य चोभयत्र साम्यात् । प्रयोगानुसरणे तु किञ्चिदारब्धव्यम् । व्यक्तिपक्षेऽपि एकस्यापि शब्दस्य बह्वर्थबोधकत्वसम्भवादन्यथैकशेषारम्भेऽप्यनिर्वाहात् । शब्दशक्तेर्वचनमूलकत्वा-

भावात् । किञ्च सरूपैकशेषे गौरवं द्वयोरेकशेषे एकस्य, यदा त्रयाणामेकः शिष्यते तदा द्वयोश्चतुरादीनामेकशेषे त्रयादीनां निवृत्तिरेकस्य च प्रवृत्तिर्व्याख्येये इति प्रवृत्तिनिवृत्तिलक्षणविषयभेदाद्बुद्धिगौरवापत्तेः । शेषशब्दस्य निवृत्तिविशिष्टावस्थानवाचित्वात् विरूपानेकशेषारम्भे तु प्रवृत्तिविषया बुद्धिरेकरूपैवेति लाघवम् । उच्यते । "वृद्धो यूना"त्यादावेकशेषस्यैव विधेयत्वात् इह त्वनेकशेषविधाने प्रस्थानद्वयापत्त्या लाघवादेकशेषस्यैव युक्तत्वात् ।

इदं त्ववधेयम्—एकपदस्य पूर्वोक्तरीत्या सजातीयान्तरराहित्यार्थकतया शब्दान्तरनिवृत्तिरेव विधीयते, अवस्थानं तु सिद्धत्वादनूद्यते । अत एव कैयटेन प्रवृत्तिनिवृत्तिलक्षणविषयभेदादित्युक्तम् । आपाततो "दध्ना जुहोति"इत्यादिवदवस्थानस्यापि विधेयत्वप्रतीतेः । निवृत्तेरवस्थाने वैशिष्ट्यञ्च निवर्त्तमानपदसमभिव्याहाराभावरूपम् । प्रतियोगिप्रसिद्धिश्च श्रूयमाणतत्पदसमभिव्याहृतशब्दान्तरस्थले एव अलौकिकप्रक्रियावाक्य एव वा सुलभा ।

स्यादेतत् । षडत्र पक्षाः सम्भवन्ति । तथाहि—समुदायादेकविभक्तौ परत एकशेषो विधीयते एकशब्दस्य संख्यावाचित्वेन प्रसिद्धत्वात् । ननु "ङ्याप्प्रातिपदिकाद्" इत्यत्रैकवचनान्तानामेव द्वन्द्वः क्रियते वृत्तिपदार्थानां सर्वत्रैकत्वभानस्यौत्सर्गिकत्वात । यौष्माकीन इत्यादौ आदेशादिबलादेव बहुत्वादिप्रतीतेः, तथा चैकत्वस्य विवक्षितत्वादेकस्मादेव प्रातिपदिकात्स्वादयो न तु समुदायात् । "कर्त्तुरीप्सिततमम्" इत्यादौ तु द्वयोर्बहूनां वा ईप्सितस्य कर्मसंज्ञादर्शनाल्लक्ष्यानुरोधान्न संख्याविवक्षेति वैषम्यम् । तथा च समुदायादेकस्या विभक्तेः

परत्वाभावादसंभव एव । तदुक्तं "एकविभक्ताविति चेन्नाभावाद्विभक्तेः" इति ।

मैवम् । स्वार्थमादायावयवयोरिव परस्परापेक्षायां सत्यां समुदायार्थस्याप्यवयवार्थातिरिक्तस्यानुभूयमानत्वात् तमादाय समुदायस्याप्येकप्रातिपदिकत्वाद्विभक्त्युपपत्तेः । नचार्थवत्समुदायानां समासग्रहणं नियमार्थमिति वाच्यम् । तस्य सजातीयविषयकत्वात् सुबन्तानामेव व्यावृत्तेः । राजदर्शीत्यादावुपपदादिसमासेऽपि पूर्वपदस्य नलोपादिपदकार्यानुरोधेन सुबन्तत्वात् । तथा चैकाज्द्विर्वचनन्यायेन समुदायादेव द्विवचनाद्युत्पत्तिः । तेनैवावयवार्थानां संख्यान्वयात्मकानुग्रहसंपत्तेः । न च राजन् राजन् औ इत्यत्र परत्वान्नित्यत्वाच्चोपधादीर्घे कृते वैरूप्यादेकशेषो न स्यात् इति वाच्यम् । "विरूपाणामपि समानार्थानाम्" इति तत्सम्भवात् ।

यद्वा अन्तरङ्गत्वादेकशेषः । संबुद्धिभिन्नसर्वनामस्थानरूपविभक्तिविशेषम्, उपधां चापेक्षमाणस्य दीर्घस्य बहिरङ्गत्वात् । न च द्वन्द्वेऽपि द्वन्द्वं विनैव समुदायाद्विभक्तिप्रसङ्ग इति वाच्यम् । तद्विधावनेकं सुबन्तमित्यनुवृत्त्या उक्तन्यायबाधात् । तथा च वृक्ष वृक्ष औ इति स्थिते एकशेषप्रवृत्तिरित्येकः पक्षः ।

यद्वा पृथग्विभक्तौ परत एकशेषः । ननु वृक्ष स् वृक्ष स् इति स्थिते विभक्तौ परतः सरूपाणामेकशेषस्य विभक्तिनिमित्तकत्वात् प्रकृतिनिवृत्तौ तदुत्तरविभक्तेः केवलायाः प्रयोगः स्यात् । न च केवलयोः प्रकृतिप्रत्यययोः प्रयोग इति निषेध इति वाच्यम् । तयोः परस्परलोपप्रयोजकत्वे 'अग्निचिद्' 'इयती' इत्यादौ परस्परराहित्येऽपि प्रयोगदर्शनात् । न चान्येषां सकाराणां संयोगान्तलोपेन निस्तारः । संयोगान्तं

यत् पदं तदन्तस्य तद्विधानात् । वृक्षस्स्स् इति स्थिते च वृक्षस् इत्येकम्, स् इति द्वितीयम्, स् इति तृतीयं पदमिति कस्यापि पदस्य संयोगान्तत्वाभावात् । एतेन संयोगादिलोपोऽपि परास्तः ।

मैवम् । "संयोगान्तलोप" इति भाष्यस्य संयोगान्तस्यान्तः सकारस्तस्य लोपः । स च हल्ङ्याादिसूत्रेणेतिव्याख्येयत्वात् । इति द्वितीयः ।

अथवा समासादेकविभक्तौ परत एकशेषोऽस्तु । प्रथमसूत्राद् द्वन्द्वे इत्यनुवृत्तेः । तथा च वृक्षश्च वृक्षश्चेति द्वन्द्वे वृक्षवृक्षऔ अत्रैकशेष इति । तदुत्तरविभक्तेः "सुपो धातु—" इतिलोपान्न श्रवणापत्तिरिति तृतीयः ।

यद्वा पृथक् सर्वेषां विभक्त्यन्तानामेकशेषः एकविभक्तीनामिति न्यासाश्रयणात् । सप्तमीनिर्देशे हि प्रकृतिमात्रनिवृत्तौ प्रत्ययश्रवणप्रसङ्गः, उक्तरीत्या तु विभक्त्यन्तानामेव निवृत्त्या नेति चतुर्थः ।

अथवा प्रातिपदिकानामेवैकशेषः । तथाहि—एकविभक्ताविति न क्रियते । "ह्रस्वो नपुंसके" इति सूत्रात्प्रातिपदिकग्रहणमनुवर्त्यानुत्पन्नायामेव विभक्तौ सरूपाणां प्रातिपदिकानामेकशेषो विधीयते । तिङन्तेष्वपि पचल् पचल् इति स्थिते कृदन्तत्वात्प्रातिपदिकसंज्ञायां तदुपपत्तेः । तथा च लुप्यमानप्रकृतिकविभक्तिश्रवणस्य नापत्तिः । न च प्रातिपदिकमात्रसारूप्यविवक्षायां जननीपरिच्छेत्तृवाचिनोरपि मातृशब्दयोरेकशेषापत्तिः । विभक्त्यन्तानामेकशेषपक्षेऽपि तुल्यत्वात् । क्वचिद्विभक्तौ सारूप्यसत्त्वात् । न च प्रातिपदिकावस्थायां सारूप्यस्य सार्वदिकत्वात्सर्वत्रैकशेषापत्तिः । विभक्त्यन्तानां सरूपाणामेकशेषे तु यस्यां

तृतीयादिविभक्तौ सारूप्यं तत्रैकशेषो नत्वन्यत्रेति वाच्यम् । अर्थविप्रतिषेधादत्राप्येकशेषानापत्तेः । मातृशब्दद्वयैकशेषे ताभिरित्यनुप्रयुक्ते पुमर्थस्य, तैरित्युक्ते च स्त्र्यर्थस्यानवबोधात् इति पञ्चमः ।

यद्वा द्विवचनबहुवचनान्तानामेकशेषः । युगपदधिकरणविवक्षायां चैकैकस्य पदस्यार्थद्वयबोधकत्वात् वृक्षावित्यादौ द्विवचनादिसिद्धिः । न चैवं एकशेषेण नित्येन वृक्षश्च वृक्षश्चेति वाक्यबाधापत्तिः । तत्र सहविवक्षाविरहात् भिन्नार्थत्वादेकशेषवृत्त्या वाक्यबाधाभावात् । इदं च द्वन्द्वे इत्यनुवर्त्य द्वन्द्वे प्रसक्ते सतीति व्याख्यानाल्लभ्यते इति षष्ठः ।

तत्र—नाद्यः । भिक्षाणां समूहो भैक्षमित्यादेरसिद्धेः । तथाहि—भिक्षा भिक्षा भिक्षा आम् अ इति स्थिते सर्वविधिभ्यो लुग्विधेर्बलवत्त्वादामो लुकि कृते एकशेषो न स्यात् । विभक्तिपरत्वाभावात् । न च प्रत्ययलक्षणम् । "न लुमताऽङ्गस्य" इति तन्निषेधात् । राम राम औ इत्यत्रापि परत्वाद्वृद्धौ हेत्वभावादेकशेषो न स्यात् । न चान्तादिवद्भावेन विभक्तेः परत्वमिति वाच्यम् । उभयत आश्रये तन्निषेधात् ।

न द्वितीयः । द्विवचनबहुवचनार्थं द्वन्द्वप्रतिषेधार्थं च वचनान्तरारम्भापत्तेः । न चानवकाश एकशेषो द्वन्द्वबाधकः । तिङन्तेषु एकशेषस्य सावकाशत्वात् । कारकभेदेन क्रियाभेदादनेकतिङन्तप्रसङ्गात् । ततश्च परत्वात् द्वन्द्वः स्यात् । न च तदुत्तरम् एकशेषः । सकृद्गताविति न्यायात् । पुनः प्रसङ्गविज्ञानेऽपि वक्ष्यमाणरीत्या स्वरसमासान्तेषु दोषप्रसङ्गात् । वृक्षस् वृक्षस् इत्यत्र पूर्वस्यापि वृक्षशब्दस्य पाक्षिकनिवृत्तिप्रसङ्गे सुवृक्षावित्यापत्तेः । परस्यैव निवृत्तौ नियामकाभावात् । एवं बहुत्वेऽपि

योऽयम् । न च संयोगादिलोपेन सिद्धिः । एकपदसम्बन्धी यः संयोगस्तदादेर्हलोऽत्राभावात् । स् स् इत्यनयोः प्रत्येकं पदत्वात् । इदं चोपलक्षणं परानिवृत्तावपि पूर्वोक्तस्य हल्ङ्यादिलोपस्यानुपपत्तेः । सुतिसीतिप्रत्ययैः प्रकृत्याक्षेपात् हलन्तायाः प्रकृतेः परेषामेव स्वादीनां लोपविधानात् । एवं गोदौ दाराः सिकता इत्यादीनां नियतवचनानां यत्रैकशेषस्तत्र हल्ङ्यादिलोपादेः शङ्कितुमप्यशक्यत्वाच्च । एतेन संयोगान्तस्य पदान्तस्येति पक्षाश्रयेणापि निर्वाहो न सम्भवतीति दिक् । एवं शिष्यमाणप्रातिपदिकोत्तरविभक्तेः श्रवणप्रसङ्गश्चेत्यवधेयम् ।

नापि तृतीयः । तदुक्तम्—"समास इति चेत्स्वरसमासान्तेषु दोषः" इति ।

तथाहि अश्वश्चाश्वश्चेति द्वन्द्वे समासान्तोदात्तत्वे शेषनिघाते च यदि पूर्वशेषस्तदा सर्वानुदात्तत्वापत्तिः, अथ परशेषस्तदाऽन्तोदात्तत्वप्रसङ्गः परत्वादेकशेषं बाधित्वा समासान्तोदात्तत्वप्रवृत्तेः । न च येननाप्राप्तिन्यायेनैकशेषः समासान्तोदात्तत्वापवाद इति वाच्यम् । तदुत्तरमप्येकशेषप्रवृत्तिसम्भवाद्विरोधाभावाच्च । एवं ऋच् ऋच् अ इति स्थितेऽन्तर्वर्तिन्या विभक्तेर्लुका लुप्तत्वात् प्रत्ययलक्षणप्रतिषेधाच्च विभक्तिपरत्वाभावादेकशेषार्थं समुदायादन्या विभक्तिरुत्पाद्या, तस्यां च नास्ति सारूप्यम् । एको हि ऋच्शब्दः, अपर ऋचशब्दः । न च समासान्तः समासस्यैवावयवो नतूत्तरपदस्येति वाच्यम् । समासान्तकृतव्यवधानेन विभक्तिपरत्वाभावादेकशेषानापत्तेः । न चायमेव दोषो वक्तव्यो नत्वसारूप्यमिति वाच्यम् । समासार्थस्योत्तरपदस्यावयवः समासान्त इति

पक्षमाश्रित्य तथोक्तत्वात् । एवं स्वसा च स्वसारौ चेत्यत्र परत्वाद् गुणदीर्घयोः कृतयोः सारूप्याभावादेकशेषो न स्यात् । एवं नौश्च नावौ चेत्यादावनङ्गकार्ये आवादेशादावपि बोध्यम् । तथा हि यद्यन्तर्वर्तिन्यां विभक्तौ लुका लुप्तायामपि वचनसामर्थ्यात्प्रत्ययलक्षणमाश्रीयते तदाऽत्र वैरूप्यम्, अथ समासविभक्त्यैकविभक्तिपरत्वं तथाऽपि वैरूप्यतादवस्थ्यम् । एवम् "आख्यातमाख्यातेन" इत्यत्र प्रकरणे द्वन्द्वश्च सरूपाणामिति कल्पनीयम् । अन्यथा तिङन्तानामेकशेषानापत्तेः ।

नापि चतुर्थः । लुप्यमानानां प्रत्ययेन सहैव निवृत्तावपि शिष्यमाणप्रकृतिकप्रत्ययस्य श्रवणापत्त्या तल्लोपविधानस्य द्विबहुवचनविधानस्य द्वन्द्वप्रतिषेधवचनस्य चारम्भणीयत्वात् ।

नापि पञ्चमः । भैक्षमित्यस्यासिद्धेः । समर्थस्य यद् ङ्याप्प्रातिपदिकं तस्मात्तद्धिता इत्याबन्तादाणि कृते परत्वादादिवृद्धौ कृतायां वैरूप्यादेकशेषानापत्तेः । हरितस्य स्त्री हरिणी, एव हरिणस्यापि । हरिणी च हरिणी च हरिण्यावित्येकशेषानुपपत्तेश्च । प्रातिपदिकावस्थायां वैरूप्यात् । एवं श्येन्यौ रोहिण्यावित्यत्रापि । यद्यपि हरितशब्दात्पुंयोगे ङीषा हरितीति रूपं तथाऽपि हरितशब्दस्य स्त्री हरिणी स्त्रीप्रत्ययान्तो हरितशब्द इति यावदिति कैयटः । प्रातिपदिकग्रहणस्य विच्छिन्नत्वाच्च प्रातिपदिकानां लोके प्रयोगाभावात्सारूप्यस्य पदान्तर्भावेणैव ग्रहणात् । तदुक्तम्—"न वा पदस्यार्थे प्रयोगाद्" इति ।

नापि षष्ठः । जहत्स्वार्थायां वृत्तौ पदद्वयस्याप्यनर्थकत्वात् एकैकस्यानेकार्थाभिधायित्वानुपपत्तेः । अजहत्स्वार्थावृत्तिपक्षेऽपि प्रथमप्रवृत्तस्यैकवचनस्य त्यागायोगात् । अन्यथा षष्ठीतत्पुरुषाद्ययोगात् तत्रापि पूर्वपदस्योत्तरपदार्थे उपसंक्र-

मेण षष्ठ्याद्ययोगात् । तथा च भाष्यम्—"सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा च" इति । एतच्च द्वितीये प्रपञ्चयिष्यामः । तस्मात्षडपि पक्षा दुष्टा एवेति प्राप्ते सिद्धान्तमाह भाष्यकारः—

"प्रातिपदिकानां चैकशेषे सिद्धम्" इति । तथाहि—एकशेषे न एकविभक्तिर्निमित्तं किं तर्हि सारूप्ये उपलक्षणम् । एकविभक्तौ लौकिकप्रयोगे यानि सरूपाणि दृष्टानि तेषामेकशेषः । स चानैमितिकत्वाद्विभक्तिं नापेक्षते इत्यन्तरङ्गत्वात्सुबुत्पत्तेः प्रागेव प्रवर्त्तते । भाष्ये प्रातिपदिकग्रहणं चोपलक्षणम् । तेन हरिण्यादीनामपि तत्सिद्धिः । "स्वरभिन्नानां यत् परं तच्छिष्यते" इति वचनान्ङीबन्तस्य हरिणीशब्दस्य शेषः । केचित्तु हरितहरिणशब्दयोरेवैकशेषे उभयवाचित्वे ऽप्यन्यतरस्य वर्णवाचित्वं चाश्रित्य स्त्रीप्रत्यय इत्याहुः, तेषां पक्षे स्वरभेदप्रसङ्ग इति कैयटः । भैक्ष्यमित्यादावप्यनैमित्तिकत्वेनान्तरङ्गत्वात्पूर्वमेकशेषस्ततो वृद्धिः । यद्वैकशेषोत्तरमेव तद्धितोत्पत्तिरिति न दोषः ।

तस्मादयमत्रार्थः—विभक्तिपदमत्र स्वादिमात्रपरम्, सत्यप्याश्रयभेदेन क्रियाभेदे निवृत्तभेदाया एव तस्यास्तिङन्तेन बोधात् । प्रकर्षाभ्यावृत्त्यादीनां च स्वाश्रयाभ्यावृत्त्यादिनिमित्तकत्वात् । पचत इत्यादिद्विवचनादीनां च कर्त्रादिनिष्ठसंख्याप्रतिपादकत्वात् । नच कर्तृकर्मणोर्विहितस्य लकारस्य तद्भेदाद्भेद एव युक्त इति वाच्यम् । इष्टापत्तेः । "लस्य" इत्यत्र लत्वजातेराश्रयणादनेकेषामपि लकाराणां स्थानेऽर्थत आन्तर्यात् द्विवचनबहुवचनयोः प्रवृत्तेः । एकपदं च समानार्थकं सत्सजातीयार्थकम् । साजात्यं च न विभक्तित्वेन विभक्तिपदादेव सिद्धेः, तदुपादानस्यापि वैयर्थ्याप-

त्तेश्च । विभक्तित्वावच्छेदेन सारूप्यस्यासम्भवादेवाविवक्षणीयत्वात् । तत्सामानाधिकरण्यमात्रेण सारूप्यस्य च सरूपपदोपादानादेव लाभात्, किन्तु विभक्तित्वव्याप्येन सुत्वादिना । न तु प्रथमात्वादिना । वृक्षः वृक्षौ वृक्षा इत्यादावपि सारूप्याभावात् । तात्पर्यवशाच्च प्रकृत्यर्थतावच्छेदकसुत्वादिधर्माणां यावत्त्वं गम्यते । तादृशयत्किञ्चिद्धर्मावच्छेदेन सारूप्यस्य तद्व्यतिरेकेणैव सिद्धेः । अवच्छिन्नत्वं च सप्तम्यर्थः । तथा च विभक्तित्वव्याप्या यावन्तः सुत्वादिधर्माः प्रत्येकं तदवच्छिन्नयावत्प्रत्ययव्यक्तिषु सारूप्यमित्यर्थः । सुत्वादियावद्धर्मावच्छिन्नाया एकस्याः प्रत्ययव्यक्तेरप्रसिद्धत्वात्प्रत्येकमित्युक्तम्, सुत्वाद्यवच्छिन्नयत्किञ्चिद्व्यक्तौ सारूप्यवारणाय यावदित्युक्तम् । तेन जननीपरिच्छेत्तृवाचिनोर्मातृशब्दयोर्नैकशेषः । औ इत्यारभ्य शस्पर्यन्तं सारूप्याभावात् । एतेनोत्तरसूत्रस्थस्यैवकारस्येहानुकर्षणात्सरूपाण्येवेत्यर्थो लभ्यते इत्यपास्तम् । उक्तरीत्यैव तल्लाभात् ।

नन्वेवं नियतवचनानां दाराश्च दाराश्चेत्यादीनामेकशेषो न स्यात् । मैवम् । यावत्यः प्रत्ययव्यक्तयो यस्मात्सम्भवन्ति तदवच्छेदेन सारूप्यस्य विवक्षितत्वाद् इति दिक् ।

स्यादेतत् । गर्गा इति न सिद्ध्यति । अपत्यबहुत्वे हि यञोऽपि बहव उत्पाद्याः प्रत्यर्थशब्दनिवेशाद्, अन्यथैकशेषवैयर्थ्यात् । न च द्वितीयादीनां यञां प्रकृतेः परत्वं न स्यादिति वाच्यम् । यञाकृतेरेकत्वाद्व्यवधानाभावात् । गर्ग य य य इति स्थिते प्रथमयञः प्रकृतिसन्निपातकृतवैरूप्यादेकशेषो न स्यात् । एवं विभक्तिनिमित्तकत्वपक्षेऽपि समुदायस्य तद्धितान्तत्वात्प्रातिपदिकसंज्ञायां एकविभक्त्युत्पत्तौ बोध्यम् । सहविवक्षायां विभक्त्यन्तानामेकशेष इति पक्षेऽपि गर्ग य अस् य अस्

इति स्थिते ऽप्येवम्। न च प्रकृत्यंशं विहाय यशब्दानां सारूप्या-त्तदुपपत्तिः। प्रकृतिविशिष्टसमुदायादेव विभक्त्युत्पत्त्या तल्लक्षि-तसारूप्याश्रये एकशेषे विभक्तिबहिर्भावस्यानुचितत्वात्। यञा प्रकृत्यर्थानपेक्षसमुदायानभिधायित्वाच्च। न चैकैकस्य प्रत्य-यार्थस्य प्रकृत्यर्थेन योगात्प्रधानावृत्त्या च गुणावृत्तेन्र्याय्य-तया गर्गशब्दानामपि बहुत्वाद्गार्ग्यशब्दानामेवैकशेष इति वाच्यम्। "तद्राजस्य बहुषु" इति यलोपानुपपत्तेः। बहुषु वृत्ते-र्यञादेरेव तद्विधानात्। तस्य च यञामेकशेष एव शिष्यमाणय-ञो बह्वर्थकत्वादुपपत्तेः। उक्तरीत्या तु यञन्तस्यैव बह्वर्थकत्वात्।

मैवम्। तत्कृते बहुत्वे इत्यस्यापि तदन्तकृते बहुत्वे इत्येव व्याख्यानात्। न चैकस्मिन्कश्यपापत्येऽञि कृते तस्माद् "इवे प्र-तिकृतौ" कन्। "जीविकार्थे चापण्ये" इति तस्य लुक्। प्रतिकृतिब-हुत्वविवक्षायां काश्यपा इत्यत्रापि लुक् स्यात्, अञन्तस्य बह्व-र्थकत्वादिति वाच्यम्। अपत्यबहुत्ववाचिन एव लोपविधा-नात् अस्य च प्रतिकृतिबहुत्ववाचित्वात्। यद्वा एकस्मादे-व गर्गशब्दात्परेषां बहूनां यञां सत्यपि प्रकृतिसन्निपातकृतवै-रूप्ये सर्वेषां प्रकृत्यर्थविशिष्टापत्याभिधायित्वाद् "विरूपाणामपि समानार्थानाम्" इत्येकशेष इति सिद्धम्। यद्येतत्सूत्रं न स्यात्तर्हि प्रत्येकं विभक्त्युत्पत्तौ द्वन्द्वः स्यात्, सति त्वनेकसुबन्ताभावान्न तत्प्रसक्तिः। एतेन द्वन्द्वापवाद एकशेष इति व्याख्यातम्।

ननु पदार्थतावच्छेदकभेदे द्वन्द्व इति पक्षे घटश्च घटश्चेति द्वन्द्वस्य न प्रसङ्ग इति चेन्न। पदार्थभेदे द्वन्द्वपक्षे सम्भवात्। पयसी इत्यत्र जलत्वदुग्धत्वरूपपदार्थतावच्छेदकभेदसत्त्वाच्च। स्यादेतत्। एकश्च, एकश्च द्वौ च द्वौ चेत्येकशेषः स्यात्। अत्र

वार्त्तिकम्—"संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः" इति । यत्रैकः शब्दोऽनेकार्थाभिधानसमर्थः तत्रैवैकशेषः । प्रयुक्तानामेवान्वाख्यानात् । एकानित्युक्ते च सहायादेरेवार्थस्य प्रतीत्या द्वित्वप्रतीत्यभावात् । अन्यपदार्थत्वाच्चेत्यस्यासंदिग्धेन पदान्तरेण द्वावित्यादिनैव तदर्थः प्रत्याय्यते इत्यर्थः । एतेन तत्र द्वन्द्वो ऽपि नास्त्यनभिधानात् । ननु गार्ग्यावित्यत्र गार्ग्यश्च गार्ग्यश्चेति सरूपैकशेषस्यापि सम्भवात्सन्देहादर्थासंप्रत्ययेऽपि एकशेषो दृश्यते उत्तरकालं प्रकरणादिना सन्देहनिवृत्तेः । न च तत्र "वृद्धो यूना" इत्यारम्भसामर्थ्यात् तथा, अत्र त्वसन्दिग्धविषयसम्भवान्नेति वाच्यम् । अक्षा इत्यादावप्यप्रवृत्त्यापत्तेः । मैवम् । अर्थासम्प्रत्यये सत्यन्यपदार्थत्वादिति विशिष्टस्य हेतुत्वात् ।

अत्रेदं तात्पर्यम्—यत्पदार्थतावच्छेदकावच्छिन्नं द्वित्वादिपर्याप्त्यधिकरणं तत्पदयोरेकशेषः । एकत्वावच्छिन्नं तु न द्वित्वादिपर्याप्त्यधिकरणम् । ननु घटत्वाद्यवच्छिन्नमपि प्रत्येकं न तथा, मिलितं त्वेकत्वावच्छिन्नमपि तथेति तुल्यम् । न च तत्र पदार्थताऽवच्छेदकं घटत्वादिकमुभयत्राप्यभिन्नम्, एकत्वं तु प्रतिव्यक्ति भिन्नमिति वाच्यम् । पयसी इत्यादावपि जलत्वदुग्धत्वरूपपदार्थतावच्छेदकयोः सामानाधिकरण्याभावात् । मैवम् । यत्पदार्थतावच्छेदकं प्रत्ययार्थसंख्यानिष्ठप्रतियोगितावच्छेदकताकभेदप्रकारतानिरूपितविशेष्यतावच्छेदकं न भवति, तत्पदयोरेकशेषः । एकत्वं तु एको द्वित्ववद्भिन्न इति प्रतीतौ विशेष्यतावच्छेदकमेव । पर्याप्तिसम्बन्धस्य प्रतियोगितावच्छेदकत्वलाभाय प्रत्ययार्थेत्युक्तम् । एकघटे घटाविति प्रयोगाभावेन विभक्त्यर्थद्वित्वादेः पर्याप्त्यैवान्वयस्य व्युत्पन्नत्वात् । एको द्वित्ववानि-

त्यत्र तु द्वित्वमाश्रयत्वमात्रेण विशेषणं न तु पर्याप्त्येति न-दोषः। घटो द्वित्ववद्भिन्न इत्यत्रापि एकत्वमेव यथोक्तभेद-प्रकारतानिरूपितविशेष्यतायामवच्छेदकं न तु घटत्वं न द्वाविति प्रयोगाभावात्। अत एव चैत्रो मैत्रश्च गच्छतः इत्यत्र प्रत्येकमेकत्वान्वयेऽपि चैत्रत्वमैत्रत्वे धर्मितावच्छेदकीकृत्यैवाख्याातार्थद्वित्वान्वयधीर्न त्वेकत्वमपीत्यदोषः। एवं द्विशब्दादावपि योज्यम्।

प्रकृतमनुसरामः—एकार्थानामपि विरूपाणामेकशेषो वक्तव्यः। वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ वा। सरूपाणामित्यनेन समानार्थकत्वस्यापि सङ्ग्रहात्। "स्वरभिन्नानां यस्योत्तरस्वरविधिस्तस्यैकशेषो वक्तव्यः"। स्वरेण भिन्नानां भिन्नस्वराणामिति यावत्। अक्षश्चाक्षश्च अक्षौ। एकोऽक्षशब्दोऽशेर्देवने इति सप्रत्ययान्तत्वादन्तोदात्तः। द्वितीयस्तु घञन्तत्वादाद्युदात्त इति तस्यैकशेषः। मीमांसकौ। एको मीमांसकशब्दो ण्वुलन्तत्वान्मध्योदात्तः अपरस्तु मीमांसामधीते इति "क्रमादिभ्यो वुन्" इति आद्युदात्तस्तस्यैकशेषः।

इदमप्यवधेयम्—घटावित्यादौ पदार्थतावच्छेदकसामानाधिकरण्येन द्वित्वं प्रतीयते, अक्षावित्यादावपि पदार्थतावच्छेदकयोर्विभीतकत्वदेवनत्वयोः परस्परसामानाधिकरण्याभावेऽपि प्रत्येकं तदाधिकरणयोर्द्वयोर्द्वित्वान्वये द्वित्वेन सह तयोः सामानाधिकरण्यमव्याहतम्, पदार्थतावच्छेदकयोः परस्परसामानाधिकरण्यप्रत्ययस्यानुभवसिद्धत्वाभावात् प्रयोजनाभावात् घटावित्यादावसम्भवाच्च। एकशेषस्थले च अक्षपदमेव एकपदार्थतावच्छेदकप्रकारकत्वविशिष्टापरपदार्थतावच्छेदकप्रकारकज्ञानजनकम्। अनुभवानुरोधात्। तथाचानारभ्य एवैकशेषः। एकेनैव तादृशा-

र्थबोधसिद्धेः, अन्यथा तदारम्भेऽप्यनिस्तारात् । नहि स्वतो ऽसती शक्तिराचार्येण कर्तुं शक्यते । शब्दशक्तेर्लोकप्रयोगमात्रकल्प्यत्वात् । नचैवमग्निचित् सोमसुदित्यादौ क्विब्लोपादेरपि वैयर्थ्यापत्तिः । प्रत्ययलक्षणादेस्तत्प्रयोजनत्वात् । एकशेषस्य च प्रक्रियायामुपयोगविरहात् । नचैकेन शब्देन कथमनेकार्थाभिधानमिति वाच्यम् । तुल्यत्वात् वृत्तिविषयतावच्छेदकावच्छिन्नबोध्यत्वात् । एकद्विबहूनामर्थानां घटो गावौ दारा इत्यादिशब्दवृत्तिविषयत्वस्याविशेषात् । नचैवं प्लक्षन्यग्रोधावित्यादावपि सहविवक्षायां समुदायार्थप्रादुर्भावादेकेनैवार्थद्वयबोधात् द्वितीयप्रयोगो न स्यादिति वाच्यम् । प्लक्षावित्युक्ते प्लक्षान्तरेणैव सहत्वप्रतीतेः । क्वचित् द्विरूपेणाप्यर्थद्वयाभिधानदर्शनाच्च । यथा—द्यावाक्षामा । द्यावा चिदस्मै पृथिवी नमेते इति । द्योशब्देनात्र द्यावापृथिव्योरभिधानम् । औकारस्य "सुपां सुलुग्" इत्याकारादेशः । "गोतो णित्" इत्योकारान्तग्रहणात् णित्त्वाद् वृद्धिस्तत आवादेशः। पृथिवीइति द्विवचनान्तम्। "वा छन्दसि" इति पूर्वसवर्णदीर्घः । पृथिवीपदेन दिवस्पृथिव्योरभिधानम् । तथाच प्रकरणादिवशाद्यत्रार्थविशेषनिर्णयस्तत्र प्रवृत्तिनिमित्तभेदे ऽपि विरूपस्याप्यनेकार्थाभिधायित्वदर्शनात्सरूपस्य सुतरां तदुपपत्तेः ।

एतेन नानार्थानुरोधादेकशेषारम्भ इत्यपास्तम् । उक्तरीत्या एकेनैव शक्यतावच्छेदकद्वयप्रकारकधीसम्भवात् । नच द्वन्द्ववारणार्थमयमारम्भः । अनभिधानादेव तत्सिद्धेः ।

तदेवं पक्षद्वये ऽपि सूत्रं प्रत्याख्यातम् ।

अत एव "सरूपाणाम्" इति "जात्याख्यायाम्" इति च सूत्रयोर्भाष्यकृता ,प्रत्याख्यास्यमानत्वेऽपि लक्ष्यानुरोध एव

पक्षद्वयाश्रये बीजमित्युक्तं कौस्तुभे पस्पशायाम् ।

पदार्थतावच्छेदकैक्यस्थलाभिप्रायेण तु प्राह वार्त्तिककारः— "आकृत्यभिधानादेकं विभक्तौ वाजप्यायनः" इति । सूत्राभिप्रायवर्णनमात्रार्थं वार्त्तिकान्तरं "द्रव्याभिधानं व्याडिः" इति । जातिव्यक्त्योः पदार्थत्वे तारतम्यं विप्रतिषेधसूत्रे निरूपयिष्यामः ।

जातिसद्भावे प्रमाणमाह—"प्रख्याऽविशेषाद्"इति । प्रख्याया बुद्धेरविशेषादेकरूपत्वात् । भिन्नव्यक्तिविशेष्यकयोरपि गौरित्याकारकयोर्द्वयोर्बोधयोः समानप्रकारकत्वानुभवात् । एवं चैकत्वमपि जातेर्धर्मिग्राहकमानसिद्धम् । लाघवेन नित्यत्वकल्पनाच्च नाश्रयनाशनाश्यत्वम् । नचैकस्या जातेर्युगपदनेकव्यक्तिषु कथं वृत्तिरिति वाच्यम् । तस्या अपि धर्मिग्राहकात्सिद्धेः ।

यत्तु "एक इन्द्रो ऽनेकस्मिन्क्रतुशते आहूतो युगपत्सर्वत्र भवति"इति भाष्यं तद् अभ्युच्चयमात्रम् । कायव्यूहेन तदुपपत्तेरुत्तरमीमांसायां निरूपितत्वात् ।, अचेतनदेवतापक्षे तु सन्निधानस्यैवानङ्गीकारात् ।

ननु गोत्वं व्यापकमवश्यं वाच्यम्, अन्यथा उत्पन्ने गोपिण्डे तत्प्रत्ययो न स्यात् । तदुक्तं बाह्यैः—

न याति न च तत्रासीदस्ति पश्चान्नचांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥

ततश्च घटादावपि गोत्वप्रकारकप्रत्ययः ।

तदुक्तम्—

व्यक्तौ चैकत्र सा व्यक्त्याऽभेदात्सर्वत्रगा यदि ।
जातिर्दृश्येत सर्वत्रेति ।

मैवम् । समवायाख्यसम्बन्धविशेषस्य गोव्यक्तिभिरेव समं

स्वीकारात् । तत्र स्वभावस्यैव नियामकत्वात् । अत एव जीवानां व्यापकत्वे ऽप्यवच्छेदकत्वाख्यः सम्बन्धः शरीरविशेष एव स्वीक्रियते । अन्यथा सर्वशरीरावच्छेदेन सर्वेषां सुखादि-साक्षात्कारापत्तेः ।

यत्तु बौद्धाः—अपोह एव अतद्व्यावृत्तिरूपो जातिः । गो-भिन्नभेदस्य गोमात्रे सत्त्वादतिरिक्तगोत्वे मानाभावादिति । तद-सत् । गोभिन्नमित्यत्र यत्किञ्चिद्गोप्रतियोगिको भेदो निवेश्यते, गोत्वावच्छिन्नप्रतियोगिताको वा । नाद्यः । गोरपि यत्किञ्चिद्गवा-पेक्षया भिन्नत्वात् । तद्भेदस्य घटे ऽपि वृत्त्या तत्रापि गौरिति प्रत्ययापत्तेः । नान्त्यः । अतिरिक्तगोत्वासिद्धेः । तदाहुः—

सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः ।
तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते ॥ इति ।

क्रियाशब्दानामपि जातिवाचित्वमेव । गुडतण्डुलादिपा-कव्यक्तिष्ववान्तरवैलक्षण्यसत्त्वे ऽपि पाकत्वस्य प्रत्यभिज्ञाबला-त्सिद्धेः । भिन्नडित्थशब्दगतं यथा डित्थशब्दत्वं नाम तेष्व-भिन्नप्रत्ययाभिधानहेतु तथा सोऽयमिति शब्दार्थयोरभेदाध्यव-सायादध्यस्तडित्थशब्देषु संज्ञिष्वपि सम्बन्धादभिन्नप्रत्यया-भिधाननिमित्तम् ।

तथाच स्वाश्रयवाच्यत्वसम्बन्धेन व्यक्तिनिष्ठं डित्थ-शब्दत्वं तदर्थेषु प्रवृत्तिनिमित्तम् । वह्निमानित्यादौ स्वसम-वायिसंयोगसम्बन्धेन वह्नित्वमिवेत्याशयः ।

तौ एतौ इत्यादौ च परोक्षत्वप्रत्यक्षत्वादिकम् ।

अभावाश्चत्वार इत्यत्रापि निरुपाख्यत्वं नाम सामान्यमाश्र-यणीयम् । गोत्वाश्वत्वे सामान्ये इति व्यावृत्तेष्वनुवृत्तप्रत्य-यहेतुत्वं सामान्यानामपि सामान्यमस्ति ।

अथवा निःसामान्यानि सामान्यानीति तार्किकदर्शनं वैयाकरणैर्न नियमत आस्थेयम्। कार्योन्नीयमाना हि तेषां पदार्था इति सामान्येष्वपि सामान्यमस्ति इति कैयटः। न-चैवं सामान्येष्वपि सामान्यस्वीकारेऽनवस्थापत्तिरिति वाच्यम्। एकव्यक्तित्वरूपबाधकसत्त्वेन तत्र जातेरस्वीकारात्। यत्तु घटत्वादिजातिमादाय तस्याप्यनेकव्यक्तिकत्वमस्त्येवेति। तन्न। तत्साधारणजात्यन्तरस्वीकारे प्रयोजनाभावात्। सामान्यत्व-जात्यैव तत्रानुवृत्तप्रतीत्युपपत्तेरिति दिक्।

ननु जातौ पदार्थे द्वित्वादीनां कथमन्वयः तस्या एकत्वात्। नैवम्। एकाश्रयसम्बन्धविवक्षायामाकृतेरेकवचनम्। यथा "पशुना यजेत" इति। अनेकाश्रयसम्बन्धविवक्षायां तु द्विवचनबहुवचने। नहि जातिपदार्थवादिना व्यक्तेरनभिधेयत्वं स्वीक्रियते, किन्तु गुणभावमात्रम्। तत्र पचति पचतः पचन्तीत्यादौ क्रियाप्रा-धान्येऽपि साधनसंख्याकृतो वचनभेदः, एवमाकृतिप्राधान्येऽपि द्रव्यसंख्याकृतः इत्यदोषात्। नन्वेवमपि लिङ्गभेदो न स्यात् ब्राह्मणी ब्राह्मण इति। उक्तं हि "विशेषणानां चाजातेः" इत्यत्र "आत्रिष्ठलिङ्गा जातिः" इति। सर्वदाऽप्येकमेवाश्रयगतं लिङ्ग-मुपादत्ते इत्यर्थः। नैवम्। स्तनकेशादिसम्बन्धरूपस्य स्त्री-त्वादेर्लौकिकस्यात्र लिङ्गत्वेनानुपादानात्। तथा सति लिङ्गा-न्तरसम्बन्धायोगात्। किन्तु स्वसिद्धान्तव्यवस्था शाब्दिकैरा-श्रीयते। तथाहि सत्त्वरजस्तमःपरिणामरूपाणां शब्दादीनां वृद्धिह्रासमध्यस्थाऽवस्थाः शब्दैकगोचरा लिङ्गत्वेन परिगृह्यन्ते। गुणानां वृद्धिः पुंस्त्वम्, अपचयः स्त्रीत्वम्, स्थितिमात्रं नपुंस-कत्वम्। अत एवोत्कर्षापकर्षसत्त्वेऽपि तदविवक्षया स्थितिमात्रा-भिप्रायेण "सामान्ये नपुंसकम्" इति शास्त्रं सङ्गच्छते। एतच्च

"स्त्रियाम्" इति सूत्रे प्रपञ्चयिष्यामः ।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ६५ ।

अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यपरिभाषया वृद्धपदं गोत्रपरं पारिभाषिकयुवपदसाहचर्यात् । युवप्रत्ययान्तेन सहोक्तौ गोत्रप्रत्ययान्तः शिष्यते उक्तप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यम् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्धेति किम् । गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ । यूनेति किम् । गर्गश्च गार्ग्यश्च गर्गगार्ग्यौ । तल्लक्षणेति किम् । गार्ग्यश्च वात्स्यायनश्च गार्ग्यवात्स्यायनौ । कृत्स्नं किम् । भागवित्तिभागवित्तिकौ । भागवित्तशब्दाद्गोत्रापत्ये "अत इञ्" तस्माद्यून्यपत्ये "वृद्धाट्ठक् सौवीरेषु बहुलम्" इति ठक् । अत्र न केवलं प्रत्ययमात्रकृतं वैरूप्यं किन्तु कुत्सासौवीरगोत्रत्वकृतमपि । "गोत्रस्त्रियाः कुत्सने" इत्यतः "कुत्सने" इत्यस्यानुवृत्तेः । कृत्स्नं किम् । गार्ग्यश्च वात्स्यायनश्च गार्ग्यवात्स्यायनौ ।

स्त्री पुंवच्च ६६ ।

यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् । स्त्रीत्वप्रयुक्तवैरूप्याधिक्यादप्राप्तावारम्भः । गार्गी च गार्ग्यायणश्च गर्गाः । "अस्त्रियाम्" इत्यनुवृत्तौ "यञञोश्च" इति लुक् । दाक्षी च दाक्षायणश्च दाक्षी । इह स्त्रीशब्दस्य स्वरितत्वे तदधिकारीयप्रत्ययोपादाने पुंवत् स्त्रीप्रत्यय इति अभावातिदेशो वा, स्वरितत्वाभावे शब्दस्य-

ग्रहणं वा, अर्थग्रहणं वा। नाद्यः। उक्तस्थले गर्गा इत्यत्र यञः श्रवणापत्तेः। "अस्त्रियाम्" इति तल्लोपनिषेधात्। प्रसज्यप्रतिषेधे चायं दोषः। पर्युदासे तु स्त्रीसदृशार्थसत्त्वात् शिष्यमाणस्य लुप्यमानार्थाभिधायित्वात्। न द्वितीयः। स्त्रीत्वस्यानिवृत्त्या गर्गान्पश्येत्यत्र "तस्माच्छसो नः पुंसि" इति नत्वानुपपत्तेः। तस्मात् तृतीयः साधुः। पुमर्थातिदेशे तत्प्रयुक्तकार्यप्रवृत्तेः। एवमन्यत्रापि बोध्यम्।

पुमान्स्त्रिया ६७।

सरूपाणां मध्ये स्त्रिया सहोक्तौ पुमान् शिष्यते स च पुंवदेव तल्लक्षण एव चेद्विशेषः। हंसश्च हंसी च हंसौ। शिष्यमाणस्य लुप्यमानार्थाभिधायित्वेन स्त्रीत्वस्यापि सत्त्वेन टाप्प्राप्तः पुंवदेवेत्यनुवृत्तेर्न भवति। पदान्तरगम्ये ऽपि तल्लक्षणविशेषे ऽप्येकशेषः। यथा गौश्चायं गौश्चेयमित्येतौ गावौ चरत इति कैयटः। तदितरकृतविशेषविरहरूपे विशिष्टाभावे ऽस्य तात्पर्यम्। स चात्रापि विशेष्याभावादस्त्येवेति दीक्षिताः। पुमानिति योगविभागाद्विशेषाभावे ऽप्येकशेषः, शिष्टप्रयोगस्य नियामकत्वाच्च नातिप्रसङ्ग इति न्यासकारः। हंसत्वजातेः शक्यतावच्छेदकत्वसाम्याच्छब्दभेदस्य स्त्रीत्वमात्रलक्षणत्वे ऽपि हंसश्च वरटा च इत्यादौ नैकशेषः। सरूपानुवृत्त्या प्रकृतिसाम्यलाभात्।

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ६८

भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ। पूर्वसूत्रे सरूपपदानुवृत्तौ चैतदेव सूत्रं मानम्। अन्यथा ऽत्रापि तेनैव स्यात्।

"त्यदादीनि सर्वैः" इत्यत्र तु न तदनुवृत्तिर्बाधितत्वात् । अत्र भाष्यम् गार्ग्यश्च गार्ग्यायणश्चेत्यत्र वृद्धयूनोर्यदेकं गर्गापत्यत्वरूपं सामान्यं तस्यैव विवक्षितत्वात् सिद्धं गार्ग्याविति । वृद्धयूनोरत्रोपादानं किं वा वृद्धयोरेवेति विशेषावधारणार्थम् एकशेषारम्भपक्षेऽपि प्रकरणादेरेवापेक्षणीयत्वात् सामान्योपादाने ऽपि तेनैव विशेषनिर्णयसंभवात् ।

न च द्वन्द्ववारणार्थमेकशेषारम्भः । अनभिधानादेव तन्निवृत्तेः । स्त्रीपुंसयोरपि मृगक्षीरादिवज्जातिमात्रविवक्षायां ब्राह्मणावित्यादि सिद्धम् ।

स्यादेतत् । ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेत्यत्र "पुमान्स्त्रिया" इत्येकशेषप्रसङ्गः।यत्रैका प्रत्ययप्रकृतिरन्यत्तु वैरूप्यम्, तादृशविषयस्य सत्त्वात्। नच "एकविभक्तौ" इत्यनुवृत्त्या एकशेषनिमित्ते विभक्तौ परतो यत्र स्त्रीपुंस्कृतो विशेषस्तत्रैकशेषः इह तु पूर्वपदविभक्तावपि स्त्रीपुंसकृतविशेषसत्त्वान्नेति वाच्यम् । कारकश्च कारिकाच कारकावित्येकशेषानापत्तेः । इत्वं ह्यत्र स्त्रीत्वकृतो विशेषस्तस्य चैकशेषनिमित्तविभक्तिमपेक्ष्य पूर्वत्वाभावात् । नच इत्वस्य स्त्रीप्रत्ययकृतविशेषरूपत्वे ऽपि स्त्रीत्वरूपार्थकृतविशेषत्वं नास्तीति वाच्यम् । तथा सति गोमांश्च गोमती च गोमन्तावित्यसिद्धेः । स्त्रीप्रत्ययेनात्र विशेषान्तरानाधानात् । स्त्रीत्वरूपार्थेन तु प्रत्ययरूपस्यैव विशेषस्योक्तत्वात् । तथाच क्वचिदर्थाहितस्य क्वचिच्च स्त्रीप्रत्ययाहितस्य विशेषस्यावश्यं ग्राह्यत्वात् । नच पक्षद्वये ऽपि पटुश्च पट्वीच पटू इत्यादावेकशेषो न स्यात्, यणादेशे स्त्रीत्वस्त्रीप्रत्ययान्यतरस्यापि निमित्तत्वाभावात्, अज्रूपत्वमेवाश्रित्य यणो विहितत्वादिति वाच्यम् । तद्भावभावितामात्रेण स्त्रीप्रत्ययस्य परंपरया च

स्त्रीत्वस्य यणादेशे निमित्तत्वात्, एवं इत्वेऽपीति ब्राह्मणवत्सा चेत्यादावेकशेषो दुर्वार इति।

मैवम्। तत्पदस्यानुवृत्त्या प्रधानयोरेव स्त्रीपुंसयोर्ग्रहणात्। सहविवक्षायां चैकशेषविधानात्। तस्याश्च प्रधानमात्रविषयकत्वात् यत्र प्रधानस्त्रीपुंसकृतो विशेषस्तत्रैकशेषः अत्र त्वप्रधानस्त्रीपुंसकृतस्यापि विशेषस्य सत्त्वादिति।

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ६९।

अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्चैकवद्वा तल्लक्षण एव चेद्विशेषः। शुक्लश्च कंबलः शुक्लं च वस्त्रं तदिदं शुक्लं ते इमे शुक्ले। शुक्लः कंबलः शुक्ला बृहतिका शुक्लं वस्त्रं च तदिदं शुक्लं तानीमानि शुक्लानि।

अत्र भाष्यं स्थितिमात्रविवक्षायां औत्सर्गिकं नपुंसकमेव सिद्धम्। न च पाक्षिकैकवद्भावार्थं सूत्रम्। जातिप्राधान्यविवक्षयैव सिद्धेः।

पिता मात्रा ७०

स्पष्टम्। वेत्यनुवर्तते। पिता च माता च पितरौ मातापितरौ। दौहित्राभावे पितरौ धनभाजावित्येतद्व्याख्याने—यद्यपि युगपदधिकरणवचनतायां द्वन्द्वस्मरणात्तदपवादत्वादेकशेषस्य धनग्रहणे पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वं श्रवणात्पाठक्रमेणार्थक्रमावगमाद्धनसम्बन्धे ऽपि क्र-

मापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माता धनभाक्, तदभावे पितेति गम्यते इति विज्ञानेश्वरः ।

एतेन जगतः पितरौ वन्दे इत्यपि व्याख्यातम् । योग्यतादिप्रमाणान्तरवशान्निर्णय इति पर्यवसानात् ।

एतेन भवानपि त्वद्दयिताच शेषे सायुज्यमासादयतं शिवाभ्यामिति विषयान्तरमपि व्याख्यातम् । स्त्रीलिङ्गस्य विग्रहवाक्ये पूर्वप्रयोगनियमे मानाभावात् । "उष्ट्री च करभश्च, हंसश्च वरटा चेत्यादौ कस्मान्न भवति" इति भाष्यदर्शनात् ।

श्वशुरः श्वश्र्वा ७१

स्पष्टम् । श्वशुरौ श्वश्रूश्वशुरौ । सूत्रत्रयमधिकृत्य भाष्यम्—वृत्तिविषये भ्रात्रादिशब्दानां स्वस्रादिबोधकत्वं तावदेकशेषारम्भेऽपि स्वीकार्यम्, शिष्यमाणं लुप्यमानार्थाभिधायीति सिद्धान्तात्, तद्वरम् एकशेषं विनाऽपि शब्दार्थसम्बन्धस्य नित्यत्वात्सहविवक्षायामेव तथात्वं स्वीक्रियताम्; अनभिधानाच्च भ्रातृस्वसृशब्दयोर्न द्वन्द्वः; मातापितरौ श्वश्रूश्वशुरावित्यत्र च द्वन्द्वस्य वाशब्दानुवृत्त्या त्वयाऽपि स्वीकारात्; किमयं सरूपयोरेकशेष उत विरूपयोरित्यवधारणार्थं प्रकरणादेर्नियामकत्वस्य वाच्यत्वाच्चेति । 'श्यालः स्वस्रोरथाग्रहीद्' इति भागवते तु स्वसृपदं "प्राणभृदुपदधाति" इतिवल्लिङ्गसमवायेन स्वसृतत्पत्योर्लाक्षणिकम् । नचोभयोः साम्यादल्पत्वानुपपत्तिः, तत्र प्राणपदगर्भमन्त्रस्य तद्रहितमन्त्रापेक्षया ऽल्पत्वात् इति वाच्यम् । लक्ष्यापेक्षया शक्यानां बहुत्वाभावमात्रस्य तत्र विवक्षितत्वात् इति श्रीधरः ।

त्यदादीनि सर्वैर्नित्यम् ७२।

स्वभिन्नैः सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते। स च देवदत्तश्च तौ।

"त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानीति वक्तव्यम्"।

सा च देवदत्तश्च तौ। सा च कुण्डेच तानि। शिष्यमाणत्वात्त्यदादिलिङ्गे प्राप्ते आरम्भः। पुंनपुंसकयोस्त्वेकशेषे शब्दपरविप्रतिषेधान्नपुंसकशेषः। तच्च देवदत्तश्च ते।

"अद्वन्द्वतत्पुरुषविशेषणानामिति च वक्तव्यम्"।

स च कुक्कुटः सा च मयूरी कुक्कुटमयूर्यौ ते। तच्च साच अर्द्धपिप्पल्यौ ते।

न्यायसिद्धं चेदम्। "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति समासार्थस्य लिङ्गातिदेशात्तद्विशेषणस्य सर्वनाम्नस्तल्लिङ्गत्वसिद्धेरिति कैयटः। त्यदादीनां सर्वनामतया वस्तुमात्रपरामर्शकत्वात्पदान्तरेण सहोक्तौ तेषामेव शेषो न्यायसिद्ध इति नेदमारभ्यम्। नच त्यदादीनां यत्परं तच्छिष्यते इत्येतदर्थं सूत्रम्, तद्विना शब्दपरविप्रतिषेधालाभादिति वाच्यम्। सच यश्च तावानय यावानयेति पूर्वशेषस्यापीष्टत्वात्। सूत्रारम्भपक्षे च तदासिद्धेः। नापि तद्देवदत्ताविति प्रयोगवारणार्थम्। "सामान्यविशेषवाचिनोर्न द्वन्द्वः" इति वचनस्यावश्यकत्वात्। नचैवं शूद्राभीरम्, गोबलीवर्दम्, तृणोलपम्, इति न स्यादिति वाच्यम्। आभीराणां जात्यन्तरत्वात्। ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते।

माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपाद्॥ इति—

स्मृतेः। गोशब्दस्य च स्त्रीगवीमात्रवाचकत्वात् वृषभे शक्त्यन्तरस्वीकारात्। न च सामान्यपदेन विशेषार्थस्यापि प्र-

तीतिसिद्धेः न द्वन्द्वप्रसक्तिरिति वाच्यम् । तं ब्राह्मणमानय गार्ग्यमिति प्रयोगदर्शनात् । विशेषणविशेष्यभाववद् विशेष्य-सन्निधौ सामान्यशब्दस्य तदितरविशेषपरत्वस्यापि ब्राह्मणा आगता वसिष्ठो ऽप्यागत इत्यादौ दर्शनात् । तस्मात्सामान्यविशेषयोर्द्वन्द्ववचनस्यावश्यकत्वात्तत एव सिद्धौ नैतत्सूत्रमारभ्यमिति भाष्यम् ।

ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री ७३।

पुमान्स्त्रियेत्यस्यापवादः । एषु सहविवक्षायां स्त्री शिष्यते । गाव इमाः । अजा इमाः । ग्राम्येति किम् । न्यङ्कव इमे । सूकरा इमे । पशिवति किम् । ब्राह्मणा इमे । सङ्घेति किम् । एतौ गावौ । संघे गुणत्वानुपपत्त्या तद्घटकनिष्ठं तद्ग्राह्यम्, द्व्यवयवसङ्घसम्भवे ऽपि सङ्घपदग्रहणसामर्थ्यादनेकघटितस्यैव विवक्षितत्वात् । अतरुणेति किम् । तरुणका इमे । वर्करा इमे । संघे तरुणत्वतदभावयोरन्वयानुपयोगात्संघघटकपशुव्यक्तिनिष्ठयोस्तयोरुपादानं सामर्थ्यात् । "अनेकशफेष्विति वाच्यम्" । नेह अश्वा इमे । उष्ट्रा इमे । विकल्पानुवृत्त्या व्यवस्थितत्वान्नेदमिति न्यासकृत् ।

अत्रापि भाष्यम्–नैतदारभ्यम् । सङ्घेषु स्त्रीगवीनामेव बाहुल्यान्मल्लग्रामादिवद् भूयस्त्वेन व्यपदेशादेव स्त्रीशेषसिद्धेः, अग्राम्येषु तु पुंसामेव प्राधान्यात्, उष्ट्राणां तु आरण्यकत्वेन सूत्रारम्भेऽपि स्त्रीशेषत्वाभावात् । ब्राह्मणा इत्यादावपि पुंसामेव प्राधान्यात् । एतावित्यादौच निर्ज्ञाते लिङ्गविशेषे पुंस एव शेषात्, वत्सा इमे इत्यादावपि पुंसामेव प्राधान्यादिति ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्य द्वितीये तृतीयमाह्निकम् पादश्चायं समाप्तः ॥

अथ प्रथमाध्यायस्य तृतीयः पादः ।

भूवादयो धातवः १।

क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः । भवति । धातुत्वाल्लडादयः । याः पश्यसीत्यादौ धातुसंज्ञायां या इत्यादेरातो लोपस्य वारणाय क्रियावचना इति । हिरुक् इत्यादौ वर्जयित्वेत्याद्यर्थके निपाते, शिश्ये इत्यादौ भावतिङन्ते चातिव्याप्तिवारणाय भ्वादय इति गणपठिता इत्यर्थकम् । नच लाक्षणिकत्वादेव याशब्दस्य गणे ऽनुपादानमिति वाच्यम् । स्थलान्तरे प्रतिपदोक्तत्वस्य तत्रापेक्षितत्वात् । नचान्तरङ्गे लोपे ऽर्थनिमित्तकतया बहिरङ्गस्य टापोऽसिद्धत्वम् । लिङ्गस्य कारकापेक्षया प्रथमप्रतीतिकत्वेन अजादिप्रत्ययनिमित्तकस्य लोपस्यैव बहिरङ्गत्वात् । 'नाजानन्तर्ये' इति निषेध इत्यपि केचित् ।

नचार्थनिर्देशो नियामकः । तस्याभियुक्तान्तरकृतत्वेनापाणिनीयत्वात् ।

> क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः ।
> प्रयोगतो ऽनुसर्तव्या अनेकार्था हि धातवः ॥
> इत्यर्थान्तरव्यावृत्तौ तात्पर्याभावाच्च ।

अत एव "कुर्द खुर्द गुर्द गुद क्रीडायामेव" इत्येवकारः । "श्लिष आलिङ्गने" इत्यादिकं च सङ्गच्छते । नचैवं "टुवम् उद्गिरणे" इति निपातनादित्वमित्यस्यानुपपत्तिः । एतदपरितोषादेव पृषोदरादित्वस्यान्यैरुक्तत्वात् ।

भूवादय इति निपातनाद्वकारागमः । नचासाधुत्वम् । वैयाकरणनिकाये प्रसिद्धत्वात् । नच क्रियावचनत्वस्य

सूत्रादलाभः । भवनं भूः क्रियासामान्यं तद् वदन्तीति भूवादय इत्यर्थात् । "वसिवपियजिराजिव्रजिसहिहनिवासिवादिवारिभ्य इञ्" इत्यत्र इञो वादयतेर्विधाने ऽपि बाहुलकाद्वदेरपि तत्सम्भवादिति केचित् ।

वादयतेरेवात्र इञ् निवृत्तप्रेषणतयाऽर्थभेदाभावात् । वदन्तीतिभाष्यस्य चार्थकथनपरत्वादित्यन्ये ।

नचैवं गणपठितत्वस्य दौर्लभ्यम् । "सनाद्यन्ता धातवः" इत्यस्यारम्भेण पठितानामेव संज्ञाऽनुमानात् । सौत्राणां तु स्तम्भ्वादीनामुदित्करणेन धात्वधिकारीयकार्यविधानेन च धातुत्वसिद्धेः । चुलुम्पादीनां च भ्वादेराकृतिगणत्वात् । वृत्करणस्य यजादिसमाप्त्यर्थत्वात् ।

एतेन दिवाद्यन्ते वृत्करणं पुषादिसमाप्त्यर्थम्, तेन मृग्यतीत्यादिकमपि व्याख्यातम् ।

वस्तुतो "बहुलमेतन्निदर्शनम्" इति चुराद्यन्ते गणसूत्रेण सर्वसिद्धिः । भ्वादिभ्योऽपि स्वार्थे णिच् ।

यद्वा दशगणीपाठो दिङ्मात्रम्,शिष्टप्रयोगादन्ये ऽपि धातवो ज्ञेया इति द्वेधा तस्य ग्रन्थकृद्भिर्व्याख्यानात् ।

यद्वा भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः । भूवौ आदी येषामिति बहुव्रीहिः । सादृश्यं च क्रियावाचित्वेनेति यथोक्तविशेषणद्वयलाभः । नच वातेर्धातुत्वानापत्तिः । भेदाघटितसादृश्यस्य तत्र सत्त्वात् ।

यद्वा वादय इत्यत्र बहुव्रीहितत्पुरुषयोरेकशेषः । "स्वरभिन्नानां यत्परं तच्छिष्यते" इति बहुव्रीहेः शेषः । भुवो वादय इति षष्ठीसमासः । वाच्यवाचकभावश्च षष्ठ्यर्थः ।

यद्वा तन्त्रावृत्त्यादिना उभयलाभः, "द्विर्वचनेऽचि" इत्यादिवत्। अत्र भूप्रभृतयो वासदृशा इत्येव सारम् ।

एतेन—

भूवादीनां वकारोऽय मङ्गलार्थः प्रयुज्यते ।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः ॥ इति–

वार्त्तिकं व्याख्यातम् ।

वस्तुतस्त्वभियुक्तानां परिभाषाविशेषसम्बन्धेन धातुपदवत्त्वमेव धातुत्वम्। तत्परिचायकं चोक्तसूत्रम्। नतु भ्वाद्यन्यतमत्वम्, गौरवात्। अनुकरणेषु तत्तद्रूपाणामतिप्रसङ्गाच्च। तद्व्यावृत्तस्य भूत्वादेरन्यतमत्वघटकस्य प्रकारान्तरेण दुर्वचत्वात्। अत एव सौत्राणाम्, चुलुम्पादीनां च सङ्ग्रहः। अत एव च धात्वर्थत्वं क्रियात्वमिति तान्त्रिकाणामुद्घोषः सङ्गच्छते ।

अथ केयं क्रियानाम ? परस्वाहुः फलाव्यवहितपूर्वकालवर्ती व्यापारविशेषस्तथा। अधिश्रयणादीनां तु क्रियात्वमौपचारिकम्।

तदुक्तम्—

अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः ।
प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्यया ॥ इति ।

नच काष्ठादिव्यापारस्य तथात्वाद्व्यभिचारः। जनकान्तरानुकूलत्वस्य वाच्यत्वात्। नापि पाकारम्भेपि क्रियाया भावित्वात्पक्ष्यतीत्यस्यापत्तिः। गौणमुख्यसाधारणतत्क्रियासमूहस्यातीतत्वे ऽपाक्षीदिति, प्रागभावे पक्ष्यतीति, यत्किञ्चित्सत्त्वे च पचतीति प्रयोग इति व्यवस्थाऽभ्युपगमात्। इदंच यङ्विधौ भाष्ये स्पष्टम्।

तन्न । मुख्यत्वसम्भवे गौणत्वस्यानुचितत्वात् ।

अथ पचित्वं जातिः,पचतीत्यनुगतव्यवहारात्, सैव क्रिया । नचैवमसाध्यत्वापत्तिः । तदाश्रयव्यक्तीनामेव तथात्वात् ।

तदुक्तम्—

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवावभासते ॥ इति ।

तन्न । दण्डादिव्यापारस्यापि फलानुकूलत्वेन तदाश्रयस्य दण्डस्य कर्तृत्वे तिङा तदभिधानापत्त्या दण्डेन देवदत्तः पचतीत्यत्र दण्डेऽपि प्रथमापत्तेः । नच करणार्थेयं तृतीया । कर्तृत्वे करणत्वस्यानुपपत्तेः । "आकडारादेका संज्ञा" इति नियमात् । न च तदा दण्डादिव्यापारस्य धात्वर्थत्वेनाविवक्षितत्वान्न दोष इति वाच्यम् । तथाऽपि क्रियायाः साध्यत्वप्रत्ययस्यान्यात्रिषयकत्वे मानाभावात् ।

अथ साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रिया । तदुक्तम्—

यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥ इति ।

नच साध्यत्वेनाभिधाने मानाभावः, पचति, पाकः, करोति, कृतिरित्यादौ धात्वर्थप्रतीत्यविशेषे ऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोदर्शनस्य मानत्वात् । तथाच क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वं साध्यत्वम् । तदेवासत्त्वभूतत्वम् । क्रियायाः प्रत्ययार्थतावादे ऽपि पचति पाकभवनेत्यादौ तथा दर्शनात्तथात्वावश्यकत्वादिति ।

तन्न । साध्यत्वप्रकारकशाब्दबोधस्य सर्वानुभवविरुद्ध-

त्वात् । भोक्तुमित्यादावसत्त्वभूता क्रिया भासते इति सिद्धान्तविरोधाच्च । क्रियान्तराकाङ्क्षायास्तत्र सत्त्वात् इति तृतीये वक्ष्यते इति चेत् ।

अत्रोच्यते । फलानुकूलो व्यापारसमूह एव क्रिया । तदुक्तं भाष्ये "क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति । व्यापारसमूहघटकानामवयवानामेकक्षणानवच्छिन्नतया प्रत्यक्षासम्भवादित्यर्थः ।

तथा च वाक्यपदीये—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥

युगपदनवस्थाने हेतुः क्रमजन्मनामिति । बुद्ध्या तावद्विषयकसमूहालम्बनज्ञानेन । प्रकल्पितः अभेदो यस्य । तथा चानेकवर्णसमुदाये एकज्ञानावच्छिन्नतया यथैकं पदमिति व्यवहारस्तथोक्तस्थले क्रियाया अपीत्यर्थः । पिण्डीभूतेति । यथा परमाणवः पिण्डीभूता उपलभ्यन्ते न केवलाः एवं पिण्डीभावात् क्रिया न प्रत्यक्षेति कैयटः ।

काव्यप्रकाशकारेणाप्युक्तम्—

साध्यः पूर्वापरीभूतावयवः क्रियारूप इति । तद्व्याख्यातारोऽपि—साध्यः साध्यत्वेन विवक्षितः पूर्वापरीभूतत्वेन प्रतीयमाना अवयवाः प्रचयान्तर्गताः प्रचयिनो ऽधिश्रयणादयो यस्य पाकादिधात्वर्थस्य सः । अक्रमस्य क्रमप्राप्तिरित्यर्थः । प्रचयस्य तत्तत्प्रत्येकातिरिक्तस्याभावाद्व्यापाराणां प्रत्येकं पाकत्वेन क्रमेण पाक इति भ्रम एवेति । अत एवोक्तमाश्रित्यक्रमरूपत्वात् इति ।

यद्वा अधिश्रयणादिरपि तत्तदाश्रयविशिष्टः क्रियारूपः, क्रियाया विशेष्यस्य चैकत्वाद् अक्रमत्वे ऽपि आश्रयीभूतविशेषणक्रमात्क्रमोपचारः ।

अन्ये तु स्थालीन्धनतण्डुलादिविशिष्टक्रिया पचादिधात्वर्थः, तदवयवाश्च स्वनिष्ठशक्त्यवच्छेदकत्वे सति स्वाश्रयाः स्थाल्यादयः, तेषां वास्तवपौर्वापर्याभावाच्छिन्नप्रत्यय इत्याहुः ।

नच यत्र चुल्ल्युपरिधारणादयो ऽवतारणपर्यन्ता व्यापाराः पुरुषभेदेन नानापाकक्रियासु युगपद्भवन्ति तदा पाकक्रियाप्रत्यक्षं स्यादिति वाच्यम् । तच्छक्तीनां परस्परसहकारित्वाभावात् ।

ननु पाकत्वं प्रत्येकव्यापारपर्याप्तम्, ननु संयोगादिवद्व्यासज्यवृत्ति भिन्नकालीनेषु एकस्य व्यासक्त्यनुपपत्तेः, उक्तग्रन्थान्तरेभ्योऽपि तथाप्रतीतेश्च ।

शब्दकण्टकोद्धारे ऽप्युक्तम्—चुल्लीज्वालनमारभ्यावतारणपर्यन्तव्यापारकलापे घटत्वादिवत् प्रत्येकपर्याप्तमेव पाकत्वं भावनात्वं वा आख्यातार्थो वा, फलावच्छिन्नव्यापारसमुदायस्य तदर्थत्वात् । उक्तं च भाष्ये—"नाना चैकार्था क्रिया पचतीति स्थाल्यधिश्रयणमुदकावसेचनं तण्डुलावपनमेधोऽपकर्षणमग्निज्वालनं दर्वीघट्टनमवतारणम्" इति, तथाच पाकप्रत्यक्षं स्यादेवेति चेन्न ।

पाकत्वस्य वस्तुतस्तथात्वेऽपि तत्समूहस्यैव क्रियाव्यवहारविषयत्वात् । तस्य च प्रत्यक्षायोगात् । अत एव पश्य मृगो धावतीत्यादावेकदेशस्यैव वर्त्तमानस्य दर्शनकर्मत्वमिति तृतीये वक्ष्यते । तदुक्तं हरिणा—

क्रमात्सदसतां तेषामात्मानो न समूहिनाम् ।
सद्वस्तुविषयैर्यान्ति सवन्धं चक्षुरादिभिः ॥

न यान्तीत्यन्वयः । क्रमिकव्यापारसमुदायस्य क्रियात्वात्तस्य वर्त्तमानत्वासम्भवान्न चक्षुरादिग्राह्यत्वम् । वर्त्तमानस्य तदेकदेशभूतस्य व्यापारस्य चाक्षुषत्वं तूपपन्नमेवेत्यर्थः । तत्सिद्धं क्रिया धात्वर्थ इति ।

अथोक्तरूपक्रियाया धात्वर्थत्वे किं मानम् ? । न तावद् "भावप्रधानमाख्यातम्" इति निरुक्तम् । आख्यातशब्दस्य धातावशक्तत्वात् । ननु 'सर्वमाख्यातज नाम' इति निरुक्तकृताऽभिधानात्तस्य धातुवाचकत्वम् । प्रत्ययजन्यत्वस्य नामत्वसम्भवात् । "नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्" इति भाष्योक्तेश्च । शकटस्य ऋषेस्तोकमपत्यमिति कैयटः । शाकटायन इति यावत् ।

तथाच निरुक्तम्—तत्र "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च" इतीति चेत् ।

मैवम् । कृदन्ते धातावाख्यातपदप्रयोगाभावात् । तत्र लक्षणया तदुपपत्तेः । अत एव "येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि" इतिजैमिनिसूत्रे ऽपि लक्षणयैवाख्यातपदं धातुपरम् । उत्पत्तावुच्चारणकाले स्वे ऽर्थे प्रयोगो न विद्यते, स्वार्थसिद्धो न विद्यते इति यावत् ।

अयं तु विशेषः—जैमिनिसूत्रे तेन तिङन्तस्यैव धातोर्ग्रहणम्, निरुक्ते तु आख्यातपदस्योपलक्षणतया धातुस्वरूपमात्रस्येति । नापि भावपदस्य भावनापरत्वम् ।

धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते । इति—

वैयाकरणैः परिभाषितत्वे ऽपि निरुक्तस्मृतौ आख्यातार्थभावनाया एव ग्रहणात् । तस्य व्याकरणमात्रपरत्वात् । तत्रापि "नपुंसके भावे क्तः" इत्यादावेव तथा, नतु "तस्य

भावस्त्वतलौ" इत्यादाविति स्पष्टम् । किञ्च भावनाया धात्वर्थत्वे मुख्यविशेष्यत्वं न स्यात्, प्रत्ययार्थप्राधान्यभङ्गापत्तेः । क्वचित्तत्परित्यागे ऽपि उत्सर्गे पक्षपातस्य युक्तत्वात् । नच भावनायास्तिङर्थत्वे कृदन्तेषु तत्प्रतीतिर्न स्यादिति वाच्यम् । धात्वर्थकारकैस्तत्सिद्धेः ।

तदुक्तम्—

धात्वर्थकारकैरेव गुणभूतो ऽवगम्यते ।
भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते ॥

अत एव भावनाप्रधानत्वादाख्यातेषु तत्सम्बन्धादेव गुणभूतकारकप्रतीतिसिद्धेर्न कर्तृकर्मणोरभिधानम् । नच स्वार्थफलव्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वानिर्वचनानुपपत्तिः । तत्र हि वस्तुतः फलव्यधिकरणो यो व्यापारस्तद्वाचित्वं सकर्मकत्वम्, उत फलव्यधिकरणत्वेन व्यापारवाचकत्वम् । नाद्यः । पच्यादेरपि फलाविवक्षायामकर्मकत्वाङ्गीकारात् । तत्र वस्तुतः फलव्यधिकरणत्वस्याभावात् । नान्त्यः । अनुभवविरोधात् । नच सर्वदाऽकर्मकस्यैव वारणीयत्वान्न पूर्वोक्तातिव्याप्तिरिति । तादृशाकर्मकादिलक्षणस्यानुपयुक्तत्वात् । "लः कर्मणि भावे चाकर्मकेभ्यः" इत्यकर्मकग्रहणेनाविवक्षितकर्मकाणामपि ग्रहणस्येष्टत्वात् । 'नेह पच्यते' इत्यादौ भावलकार इति हरदत्तादिभिरुक्तत्वात् । 'पीता गावो' 'भुक्ता ब्राह्मणाः' 'कृतपूर्वी कटम्' 'गतं तिरश्चीनम्' इत्यादौ ग्रन्थकारैर्भावे क्तप्रत्ययव्याख्यानाच्च । ननु गतिबुद्ध्यादिसूत्रे गत्यर्थाकर्मकेति सूत्रे च अविद्यमानकर्मकाणामेव ग्रहणं देवदत्तेन पाचयतीति तृतीयानुरोधात्, दत्तवान्पक्ववानित्यर्थे दत्तः पक्व इत्यादेरापत्तेश्चेति चेत् । तर्हि तदननुगमतादवस्थ्यम्, तस्मादविवक्षाविरहविशि-

ष्टकर्मसाकाङ्क्षधातुत्वमेव सकर्मकत्वं तदभावश्चाकर्मकत्वम् । पच्यादीनां स्वरूपेण कर्मसाकाङ्क्षत्वे ऽप्यविवक्षादशायामकर्मकत्वादविवक्षाविरहेति ।

एतेन कृञो यत्नार्थकत्वे यतिवदकर्मकत्वापत्तिरिति निरस्तम्।

तथाहि—आकाङ्क्षा समभिव्याहारात्मिका शब्दधर्मः । तेनार्थैक्येऽपि घटः कर्मत्वमित्यादावनाकाङ्क्षत्वम् । घटमित्यादौ च साकाङ्क्षत्वम्, तद्वदेव यतेः कर्मानाकाङ्क्षा कृञश्च तदाकाङ्क्षेत्युपपत्तेः। आस्यादिधातूनां च स्वरूपेण अकर्मकत्वे ऽपि मासादिकालयोगे तदाकाङ्क्षत्वात्सकर्मकत्वम् । अत एवैकस्यैव ग्रन्थधातोश्चैत्रनिष्ठव्यापारमादाय सकर्मकत्वं पुष्पनिष्ठव्यापारमादाय त्वकर्मकत्वमित्यभ्युपगमः ।

अथ भावयति घटमितिवद्भवति घटमित्यपि स्यात् । दृष्टान्ते णिचा दार्ष्टान्तिके चाख्यातेन व्यापारबोधाविशेषात् । नच प्रयोजकव्यापारो णिजर्थः, कर्तृव्यापारस्त्वाख्यातार्थ इति विशेष इति वाच्यम् । त्वद्रीत्या कारकचक्रप्रयोक्तुरेव कर्तृत्वेन घटस्यातथात्वात् । नच यस्यैवान्यापेक्षयाऽऽख्यातोपात्तव्यापारसमवायः स कर्ता इति बाधाध्याये व्यवस्थितत्वाददोष इति वाच्यम् ।

करोतिः क्रियमाणेन न कश्चित्कर्मणा विना ।
भवत्यर्थस्य कर्ता च करोतेः कर्म जायते ॥
करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः ।
भविता तमपेक्ष्याऽथ प्रयोज्यत्वं प्रपद्यते ॥
तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः ।
प्रयोजकक्रियामाहुर्भावनां भावनाविदः ॥ इति ।

भावार्थाधिकरणे भट्टपादैर्भावनाया निरूपितत्वात् तदना-

श्रयस्य कर्तृत्वानुपपत्तेः । नच धातूपात्तव्यापाराश्रयत्वमेव कर्तृत्वमिति वाच्यम् ! व्यापारस्य धात्वर्थत्वसिद्धौ भावनाया-स्तिङर्थत्वानुपपत्तेरिति चेन्न ।

अनुकूलव्यापारे शक्तिपक्षे हि अनुकूलत्वं जनकत्वम् प्रयोजकसाधारणं वा । नाद्यः । फलजनकशरीरगतक्रियाविशेषोपक्षीणस्यात्मनिष्ठप्रयत्नादेरन्यथासिद्धस्याऽसङ्ग्रहापत्तेः । नान्त्यः । कृष्यादिसाधारण्यात् । नच यत्नत्वाधःसन्तापनत्वादीनां तत्तद्रूपेण शक्यतावच्छेदकत्वाङ्गीकारान्नातिप्रसङ्गः । तथापि पचति पाके यतते इत्यादिविवरणाद्यत्नादीनां धात्वर्थबहिर्भावस्य दुर्वारत्वात् । नच घञादियोगे धातोः फलमात्रमर्थः । सामान्यसामग्रीमर्यादया तद्बोधापत्तेः । घञादिसमभिव्याहारस्य तत्प्रतिबन्धकत्वे गौरवात् । तिबादिसमभिव्याहृतधातुत्वस्य शक्ततावच्छेदकत्वे कार्यकारणभावद्वयमवच्छेदकगौरवं तत्र व्यापारबोधानुभवविरोधश्च । स्तोकं पाक इत्यस्योपपादनविरोधश्च । नच तत्र विवक्षाविरहादेव यत्नबर्हिभावः । देवदत्तः पचतीत्यत्र विवक्षाध्रौव्यात् । अन्यथा तस्य कर्तृत्वानुपपत्तेः । धातूपात्तव्यापारवत एव त्वन्मते तत्त्वात् । अत पचतीत्यत्र भासमानो यत्नो ऽवश्यं पच्यर्थाद्बहिः कार्यः । स एवाख्यातार्थः । विवरणवेलायां भासमानस्य तस्य परिशेषादाख्यातवाच्यत्वकल्पनात् । तत्रापि रथो गच्छतीत्यादेरनुरोधादनुकूलव्यापारवाचिणिजन्तभूधातुना विवरणात्, सङ्ग्राहकलाघवाच्चानुकूलव्यापारे एव शक्तिः, यत्नस्यापि तद्रूपेण सङ्ग्रहादिति मीमांसकाः ।

मण्डनमिश्रानुयायिनस्तु—फलमात्रं धात्वर्थः, अनुकूलव्यापारो व्यापारमात्रं वा ऽऽख्यातार्थः । जन्यजनकभावः संसर्गलभ्यः । लडाद्यर्थो वर्त्तमानत्वादि लिङर्थश्चेष्टसाधनत्वादि व्या-

पार एवान्वेति। आख्यातजन्यवर्त्तमानत्वप्रकारकबोधे तज्जन्यव्यापारोपस्थितेर्हेतुत्वकल्पनात्।

नच व्यापारविगमे फलसत्त्वे पाको विद्यते इति स्यादिति वाच्यम्। भावार्थघञादेरनुकूलव्यापारार्थत्वात्। अत एव व्यापारसत्त्वे फलानुत्पत्तिदशायां पाको भविष्यतीति न प्रयोगः। नापि घटभूतलयोर्मिथः संयोग इतिवन्मिथो गमनमित्यादि। संयोग इत्यादौ तु घञादेः प्रयोगसाधुतामात्रम्, धात्वर्थमात्रप्रतीतेः। व्यापाररहितेऽपि वृक्षादौ संयुज्यते इत्यादिव्यवहारात्तत्र तिङोऽपि न व्यापारोऽर्थ इति न सकर्मकत्वम्, आश्रयत्वस्यैव तत्र तिङर्थत्वात्। नचैवं धात्वर्थतावच्छेदकफलशालित्वरूपं कर्मत्वं ग्रामादेरनुपपन्नम्। प्रत्ययोपनीतपरसमवेतव्यापारजन्यधात्वर्थफलशालित्वस्य कर्मत्वात्। प्रत्ययोपनीते परसमवेते च व्यापारस्य विशेषणम्। भूमिं प्रयाति विहग इत्यत्र विहगादेरपि स्वापेक्षया भिन्नो यः स्वावयवः तत्समवेतव्यापारजन्यधात्वर्थफलसंयोगवत्त्वात्स्वात्मानं प्रयातीत्यादिवारणाय प्रत्ययोपनीतेति। तादृशस्वार्थव्यापारस्तु न परसमवेतः। गमनात्मकव्यापारस्यैव प्रत्ययोपनीतत्वात्, तस्य च परसमवेतत्वाभावात्। गमनजन्यविभागशालिपूर्वदेशे ऽतिव्याप्तिवारणाय धात्वर्थेति। तण्डुलं पचतीत्यत्र आधेयत्वं द्वितीयार्थः, फले धात्वर्थे तदन्वयः। फलस्य जनकत्वसंबन्धेनाख्यातार्थव्यापारे तस्याश्रयत्वेन चैत्रेऽन्वयः। तण्डुलवृत्तिविक्लित्तिजनकव्यापारवांश्चैत्र इति धीः। चैत्रेण पच्यते तण्डुल इत्यत्र तृतीयार्थवृत्तित्वस्य तिङर्थे व्यापारे, तस्य जन्यत्वसम्बन्धेन धात्वर्थे फले, तस्याश्रयत्वेन तण्डुलादावन्वयः। चैत्रवृत्तिपरसमवेतव्यापारजन्यफलवांस्तण्डुल इति

धीः । फलव्यापारयोर्विशेषणविशेष्यभेदेन कर्तृकर्मव्यवहारः ।

अथ सुबर्थस्य धात्वर्थेऽन्वयः क्लृप्त इति तस्याख्याता-न्वयकल्पनमयुक्तम्, एवम् आख्यातार्थव्यापारस्य धात्वर्थविशेषणत्वमपि इति विभाव्यते, तर्हि तृतीयाया व्यापार एवार्थः, तत्र वृत्तित्वं प्रकृत्यर्थस्य संसर्गः, व्यापारस्य जन्यत्वेन धात्वर्थफले ऽन्वयः, तस्य निरूपितत्वसम्बन्धेन तिङर्थे ऽधिकरणत्वे तस्य तण्डुले ऽन्वयः ।

कर्मकृतः फलाश्रयः, कर्तृकृतश्च व्यापाराश्रयोऽर्थः, तण्डुलः पक्वः चैत्रो गन्ता इत्यादिसामानाधिकरण्यानुरोधात् । कर्मप्रत्यये सुबर्थ एव व्यापारे वर्त्तमानत्वान्वयः । नच भिन्नपदोपात्तान्वये ऽतिप्रसङ्गः । फलबोधकधातुसमभिव्याहृतकर्माख्यातजन्यवर्त्तमानत्वबोधे तृतीयाजन्यव्यापारोपस्थितेर्हेतुत्वात् । पक्ववानित्यादौ कर्तृप्रत्यये तु एकदेशे व्यापार एव तदन्वयः ।

यद्वा व्यापारे आश्रये च खण्डशक्तिः विशिष्टमन्वयलभ्यम् । अत एव एवकारस्य अन्ययोगे व्यवच्छेदे च शक्तिः । अन्ययोगप्रतियोगिकव्यवच्छेदशक्तौ पार्थ एव मनुष्य इत्यादेः प्रसङ्गात् । पार्थान्ययोगो घटश्चेत्युभयाभावस्य मनुष्यत्वे सत्त्वात् । नचान्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदः शक्यः । वस्तुमात्रस्य यत्किञ्चिदपेक्षयाऽन्यत्वात् अप्रसिद्धेः । नचान्यसंयुक्तत्वावच्छिन्नप्रतियोगिताव्यवच्छेदो ऽन्यसमवेतत्वावच्छिन्नव्यवच्छेदश्च ध्वंसादौ प्रसिद्ध इति वाच्यम् । पार्थ एव धनुर्धर इत्यादौ बाधितत्वात् । पार्थस्यापि कुतश्चिदन्यत्वेन तत्समवेतत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य धनुर्धरत्वे विरहात् । पार्थान्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य अन्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदाद्भिन्नतया तदप्रत्ययप्रसङ्गाच्च ।

एवं च नीलो घटो नास्तीत्यत्र नीलान्वितस्य घटस्याभावे ऽन्वयात् नीलघटत्वावच्छिन्नप्रतियोगित्वं संसर्गः तथा पार्थाद्यन्वितस्यान्ययोगस्य व्यवच्छेदे ऽन्वयात्पार्थान्ययोगत्वावच्छिन्नप्रतियोगिताकत्वं संसर्ग इति बोध्यम् । नच प्रतियोगितामात्रेणान्ययोगविशिष्टो व्यवच्छेद एवार्थो ऽस्तु व्युत्पत्तिबलादुक्तव्यवच्छेदलाभसम्भवादिति वाच्यम् । वाक्यार्थलाभ एव व्युत्पत्तेस्तन्त्रतया पदार्थस्य तदलभ्यत्वात् । नचैकपदार्थयोः कथं मिथो ऽन्वय इति वाच्यम् । आख्यातार्थकृतौ कालान्वयस्य परैरभ्युपगमादित्याहुः ।

केचित्तु व्यापारमात्रं धात्वर्थः । गतो गम्यते ग्राम इत्यादौ फलस्य कृदात्मनेपदाभ्यामेव लाभात्, ग्रामङ्गच्छति, ग्रामस्य गन्तेत्यादावपि द्वितीयादेः फलजनकत्वमर्थः । आदेशशक्त्यनङ्गीकारे तु तत्स्मारितद्वितीयाया एव सोऽर्थः ।

यद्वा षष्ठ्याः कर्मत्वे लक्षणा फलं चाधिकरणत्वसंसर्गेण नामार्थेऽन्वेति ।

यद्वा फलमात्रमर्थो जनकत्वं संसर्गः । नचैवं ग्रामं गच्छति त्यजतीत्यादौ फलसामान्यस्य द्वितीयादिना लाभेऽपि नियतसंयोगविभागादिलाभो न स्यात् । ततश्च गृहाद्ग्रामं गच्छति चैत्रे ग्रामस्येदं गमनं न तु गृहस्येति न स्यात् गृहवृत्तिफलजनकत्वसामान्याभावस्य तत्रासत्त्वादिति वाच्यम् । गम्यते ग्राम इत्यत्र फलमात्मनेपदार्थ इति वदतामपि फलविशेषप्रत्ययानुपपत्तिप्रसङ्गात् । नच तदवच्छिन्नव्यापारवाचिधातुसमभिव्याहारात्फलविशेषो लभ्यते यथेष्टसाधकत्ववाचकाद्विधेरेव स्वर्गादिपदसमभिव्याहारात्स्वर्गजनकत्वम् । प्रतीतिस्त्विष्टत्वफलत्वाभ्यां स्वर्गत्वसंयोगत्वाभ्यां

वेत्यन्यदेतदिति वाच्यम् । गमिसमभिव्याहारे द्वितीयायाः संयोगः, त्यजिसमभिव्याहारे च विभाग एवार्थ इत्यत्र तयोस्तात्पर्यग्राहकत्वसम्भवादित्याहुः ।

नैयायिकास्तु फलावच्छिन्नव्यापारवाचित्वमेव धातोः सकर्मकत्वम् । त्यजेर्विभागावच्छिन्ने, गमेश्च संयोगावच्छिन्ने स्पन्दे शक्तत्वात् । धात्वर्थजन्यफलशालित्वमात्रस्य कर्मत्वे पूर्वदेशे गमेः कर्मत्वम्, उत्तरस्मिन् त्यजेः, स्पन्देश्च पूर्वापरदेशयोः स्यात् । उक्तरीत्या तु स्पन्देर्व्यापारमात्रे शक्तिर्नतु फलावच्छिन्ने इति न सकर्मकत्वम् । नचैवं जानात्यादेः सकर्मकत्वं न स्यादिति वाच्यम् । तत्र तद्व्यवहारस्य भाक्तत्वात् । नचैवं तत्र द्वितीयादिकं न स्यादिति वाच्यम् । "कर्मणि द्वितीया" इत्यनुशासनं हि तत्समभिव्याहारमपेक्ष्य प्रवर्त्तते "तेन रक्तं रागाद्" इतिवत्, तथा च पच्यादियोगे धात्वर्थतावच्छेदकफलशालिनि तण्डुलादौ द्वितीयादिकं विदधाति, जानात्यादियोगे धात्वर्थविषये घटादौ, स्पन्दादियोगे तूक्तान्यतरप्रकाराभावान्न कुत्रचिदिति व्यवस्थोपपत्तेः । "सकर्मकधातुयोगे द्वितीया' इत्येतादृशानुशाभावात् । तदेवं विवादे कथं विशिष्टा भावना धात्वर्थ इति प्राप्ते सिद्धान्तमाह भाष्यकारः—

'किं करोति' इति क्रियासामान्यविषयकप्रश्ने पचतीत्यादेरुत्तरस्य प्रयोगात् धात्वर्थ एव व्यापारः ।

ननु किं विषयकयत्नवानित्येव प्रश्नार्थः, कृञो यत्नार्थत्वात् ।

तदुक्तं कुसुमाञ्जलौ—

कृताकृतविभागेन कर्तृरूपव्यवस्थया ।

यत्न एव कृतिः पूर्वा परस्मिन्सैव भावना ।

१ गमित्यज्योरिति पाठः ।

क्रियाजन्यत्वाविशेषे ऽपि यत्नजन्याजन्यत्वप्रतिसन्धानात्पटाङ्कुरयोः कृताकृतव्यवहारात्, ज्ञात्रादिवदाश्रयपरतृजन्तकर्तृपदस्य यत्नाश्रयबोधकत्वाच्च । क्रियायास्तदनुकूलव्यापारस्य वा कर्तृपदार्थत्वे तदाश्रयं करणमात्रं वा कर्तृपदार्थः स्यात् । अत एव पचतीत्यस्य पाकं करोतीति कृञा तिङर्थस्यैव विवरणम् ।

तदुक्तम्—

भावनैव हि यत्नात्मा सर्वाख्यातस्य गोचरः ।
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ इति ।

इति चेत् ।

मैवम् । कृञो यत्नमात्रार्थकत्वे 'क्रियते घटः स्वयमेव' इति कर्मवद्भावानुपपत्तेः । कर्मस्थक्रियेष्वेव तद्विधानमिति वक्ष्यमाणत्वात् । अन्यथा 'ज्ञायते घटः स्वयमेव' इत्यस्यापि प्रसङ्गात् । तदुक्तम् —

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।
नतु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ॥

प्राप्यत्वं च क्रियाकृतविशेषवत्तया ऽनुपलभ्यमानत्वमिति वक्ष्यते । तस्मादुत्पादनैव कृञर्थः । उत्पत्तिमत्तयाच घट उपलभ्यते एव 'अयं घटः केनचित्कृतः' इति घटदर्शने ज्ञानोदयात् ।

नच घटोपादानविषयककृतौ साध्यतया घटस्यापि विषयत्वात् तद्व्यतिरेकेण च घटादुत्पत्तेर्यत्नवत्तयाऽपि घट उपलभ्यते एव, साक्षात्कारस्य त्वयाऽप्यभिधानादुत्पत्तेरतीन्द्रियत्वात् इति वाच्यम् ।

तदपेक्षया उत्पत्तेरेव तद्विषयत्वौचित्यात् । अन्यथा फलज्ञानस्यापि प्रवृत्तिप्रयोजकतया तद्विषयत्वस्याप्युत्पत्त्या आक्षेपात् 'ज्ञायते घटः स्वयमेव' इत्यादिकमपि स्यात् । नच तत्रो-

त्पत्तौ कृञो लक्षणा । उत्पादनाया उपाधिरूपतया शक्यतावच्छेदकत्वगौरवाद् । अत एवोत्पादना तिङर्थ इति रत्नकोषमतमपि मणिकृतैवमेव निरस्तम् । नच लक्ष्यतावच्छेदक इव शक्यतावच्छेदके ऽपि गौरवं न दोष इति शङ्क्यम् । लक्षणायाः शक्तिकल्पनोत्तरकल्प्यतया तत्र लाघवानादरणात् । अन्यथा निषादस्थपत्यधिकरणविरोध इति चेत् ।

न । उक्तप्रयोगरूपसाधकेन उत्पादनायामेव शक्तिपरिच्छेदात् ।

एवं किङ्करोतीत्यत्र कृञो यत्नार्थकत्वे प्रश्नवाक्ये तिङर्थयत्नानन्वयस्य वाच्यतया पचतीति उत्तरानुपपत्तिः । धातोः प्रश्नविषयार्थानवबोधात् ।

तथाहि—'किमेकं दैवतं लोके' इत्यादौ 'एकदैवतत्वव्याप्यधर्मप्रकारकज्ञानं ममेष्टसाधनम्' इति ज्ञानात् 'तादृशज्ञानं मम जायताम्' इतीच्छया उक्तवाक्यप्रयोगः । तस्य च 'एकदैवतत्वव्याप्यधर्मो मम जिज्ञासाविषयः' इति वाक्यार्थः । विष्णुदैवतमित्याद्युत्तरेण च जिज्ञासानिवृत्तिः, विष्णुत्वप्रकारकज्ञानोदयात् । तस्यैव विष्णुत्वांशे एकदैवतत्वव्याप्यधर्मप्रकारकज्ञानत्वरूपेणेच्छाविषयत्वात् । अन्यज्ञानादन्येच्छानुत्पत्तेः । सिद्धेऽपि तदनुत्पत्तेश्च । उत्पादनार्थत्वे तु व्यापारसामान्यविषयकप्रश्ने तद्विशेषविषयकोत्तरोपपत्तिरिति ।

नन्वेवं अस्ति भवतीत्यादिषु उभयांशविरह इति चेत् ।

मैवम् । तत्रापि क्रियासद्भावात् ।

तदुक्तम् ।

अस्त्यादावपि धर्म्यंशे भाव्ये ऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रतीयते ।

धर्म्यंशे धर्मिभागे, भाव्ये भाव्यतया विवक्षायाम् । भूधातोरु-

त्पत्तिस्थित्युभयार्थकत्वात्। "तत्र भवः" "तत्र जातः" इति भेदनिर्देशात्। अत एव तत्र लडादिप्रयोगः, कालस्य क्रियात्मकत्वात्।

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका। इति,

कालानुपाति यद्रूपं तदस्तीति प्रतीयते। इति—

वाक्यपदीयोक्तेः।

नचैवं 'घटं करोति' इत्यत्रेव 'घटो भवति' इत्यादावपि तत्प्रतीतिः स्यादिति वाच्यम्। अशेषभावाद्भावनाफलयोरेकानिष्ठत्वाद्भावना स्पष्टं न प्रतीयते इत्युत्तरार्द्धार्थात्।

नचैवं 'किङ्करोति' इति प्रश्ने 'पचति' इत्यादिवद् 'अस्ति' इत्यादिकमपि उत्तरं स्यादिति वाच्यम्। सुस्थतया निश्चिते प्रश्नस्य विशेषविषयकत्वज्ञानात् तदभावे ऽपि आसन्नविनाशधर्मिकयथोक्तप्रश्ने अस्तीत्युत्तरस्य सर्वाभिमतत्वात्।

ननु 'दिगस्ति' "आत्मा भवति' इत्यादौ उत्पत्तेर्बाधिततया कथं भावना वाच्येति चेन्न। तत्तत्क्षणविशिष्टत्वेन तेषामप्युत्पत्तेः।

यद्वा स्वरूपधारणमेव फलं तदाश्रयतैव साध्यत्वेनाभिधीयमाना व्यापारः। तथाचात्माऽऽदिः स्वरूपधारणं करोतीत्यर्थः। अस्तीत्युत्पन्नस्यात्मधारणमुच्यते इति निरुक्तकारोक्तेः।

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते। इति—

वाक्यपदीयोक्तेश्च। नचैवं सकर्मकत्वापात्तिः। जीवत्यादिषदन्तर्भूतकर्मकत्वात्।

यद्वा अस्तित्वमेव व्यापारः, अवच्छेदकतारूपा व्याप्तिः फलम्। अत एव 'मासमास्ते इत्यादौ धात्वर्थतावच्छेदकफलशालित्वरूपं मुख्यमेव कर्मत्वमिति भाष्ये द्वितीये वक्ष्यते।

अथवा क्रियावाचित्वावश्यकत्वे ऽपि फलवाचित्वानावश्यकत्वात्सत्ताऽऽदिरेव क्रिया। अत एव 'पश्यति भवः स्वयमेव'

'दर्शयते भवः' इत्यादौ निवृत्तप्रेषणे विषयतारूपफलस्यैव धात्वर्थत्वं क्रियात्वं चेति स्वीकारः ।

एवं पच्यते ओदनः स्वयमेवेत्यादौ ।

एकदेशे समूहे वा व्यापाराणां पचादयः ।

स्वभावतः प्रवर्त्तन्ते तुल्यरूपं समाश्रिताः ॥ इति—

वाक्यपदीयानुसारेण विक्लित्तिमात्रं धात्वर्थः । तद्रूपक्रियाश्रयत्वात् ओदनादीनां कर्तृत्वमिति व्याचक्षते ।

भाष्येतु निरुक्तमप्युदाहृतम्—"षड् भावविकारा इति ह स्माह वार्ष्यायणिः" इति ।

अत्र कैयटः-भावस्य क्रियायाः षट् प्रकाराः तेषु चास्तिः पठित इति तस्यापि क्रियात्वम् ।

अथवा भावस्य सत्ताया एते प्रकाराः । सत्तैवानेकक्रियात्मिका साधनसम्बन्धाध्यवसीयमानसाध्यरूपा जन्मादिरूपतया भासते इति ।

तथाच जातिसमुद्देशे हरिणोक्तम्—

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ॥

इत्युपक्रम्य,

प्राप्तक्रमविशेषेषु क्रिया सैवाभिधीयते ।

क्रमरूपस्य संहारे तत्सत्त्वमिति कथ्यते ॥ इति ।

व्यापारविशेषाणां साध्यत्वात्क्रमिकत्वाच्च तदुपहितसत्तायास्तद्योग इत्यर्थः ।

स्यादेतत् । जानाति, इच्छति, यतते, द्वेष्टि, इत्यादौ अवच्छेदकं फलं नास्त्येव, तथाच तत्र कथं सकर्मकत्वम्, वैयाकरणानां स्वार्थफलव्यधिकरणव्यापारवाचित्वस्यैव तत्त्वात् । नच ज्ञानजन्यं विषयताख्यमेव फलं घटनिष्ठमिति वाच्यम् । ज्ञानजन्याविषय-

तायां मानाभावात्। अतीतादौ तदुत्पत्तेरशक्यवचनत्वात्।

तदुक्तं कुसुमाञ्जलौ—

स्वभावनियमाभावादुपकारोऽतिदुर्घटः।

सुघटत्वे ऽपि सत्यर्थे ऽसति का गतिरन्यथा॥

पूर्वार्द्धस्यायमर्थः—विषयस्य ज्ञानेन सह पूर्वमसम्बन्धे घटज्ञानं पटेऽपि ज्ञातताां जनयेत् असम्बद्धत्वाविशेषात्। स्वभावादेव तज्ज्ञानं पटीयमिति चेन्न। ज्ञातता स्वीकारवैयर्थ्यात्। नच क्रियात्वात्कर्मनिष्ठफलजनकत्वानुमानम्। इच्छति नश्यति इत्यादौ व्यभिचारात्। न च 'घटो ज्ञातः' इति प्रत्यक्षं मानम्। ज्ञानवैशिष्ट्यस्यैव तद्विषयत्वात्।

तदुक्तम्—

अनेकान्तादसिद्धेर्वा नच लिङ्गमिह क्रिया।

तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके॥ इति।

इष्टतादीनामपि सिद्धिप्रसङ्गादित्यर्थः।

अत्र वदन्ति—आवरणभङ्गजनकज्ञानं ज्ञानानुकूलव्यापारो वा जानातेः, इच्छाद्वेषानुकूलव्यापार इच्छतिद्विष्यादीनामर्थ इति सकर्मत्वमुपपन्नमिति।

अद्वैतचन्द्रिकाकृतस्तु—नैतद्युक्तम्। आवरणभङ्गरूपफलस्य परोक्षज्ञानविषयनिष्ठत्वाभावात्। परोक्षवृत्त्या ऽसत्त्वापादकस्यैवावरणस्य निवृत्तेः। तत्र वृत्तेर्विषयसम्बन्धाभावेन विषयनिष्ठाभानावरणभङ्गाभावात्। प्रमातृमात्रनिष्ठवृत्त्या प्रमातृनिष्ठावरणभङ्गस्यैव सम्पादनात्। परंपरया फलसम्बन्धमादाय सकर्मकत्वोक्तावकर्मकस्यापि तदापत्तेः। तस्यापि फलव्यापारयोर्धातुरित्यादिना त्वया स्ववाच्यव्यापारसमानाधिकरणफलवाचकत्वोक्तेः। सुखादिस्थले आवरणस्यैवाप्रसिद्धत्वाच्च।

अत एव ज्ञानमपि न फलम् । चैतन्यस्य नित्यतया फलत्वायोगात् । वृत्तिज्ञानस्य परोक्षस्य विषयनिष्ठत्वाभावात् । विषयतासम्बधस्य वृत्त्यनियामकत्वात् । सुखादिस्थले तदसम्भवाच्च ।

यदपि विषयताजनकज्ञानादिकं जानात्यादेरर्थ इति ।

तदपि न । विषयताया ज्ञानाद्यतिरिक्तत्वे ऽपि ज्ञानादिजन्यत्वे मानाभावात् । ज्ञानादिपूर्वं विषयतासत्त्वेऽपि ज्ञानाद्यभावादेवोपपत्तेः । ज्ञानादीनां च स्वोत्पत्तिद्वितीयक्षणे स्वकार्योपधानासम्भवात्स्वोत्पत्तिक्षणे सविषयकत्वाभावात् । तस्मादेवं वाच्यम्—असत्त्वापादकाज्ञाननिरूपकत्वाभावस्य यदधिकरणत्वं तत्प्रयोजकचिदेव जानात्यर्थः । उक्ताधिकरणत्वरूपफलवत्त्वेन घटादेर्ज्ञानादिकर्मता । सुखादिनिष्ठे तादृशाधिकरणत्वे ऽपि सुखाद्युपहितरूपेण चित् प्रयोजिका । सुखादेरसत्त्वदशायां तादृशचिदभावे उक्ताधिकरणत्वाभावात्तद्भावे तद्भावाच्च । न च यथोक्तनिरूपकत्वाभावप्रयोजकचिदेव ज्ञाधात्वर्थो ऽस्त्विति वाच्यम् । घटाकारवृत्तिदशायां प्रमातारं जानातीति प्रसङ्गात् । तादृशवृत्तिप्रयुक्तस्योक्तनिरूपकत्वाभावस्य प्रमातरि सत्त्वात् । उक्तनिरूपकत्वाभावाधिकरणत्वोक्तौ तु प्रमातृनिष्ठस्य तस्य स्वतः सिद्धतया न वृत्त्यवच्छिन्नचित्प्रयोज्यत्वम् इति न तदापत्तिः, घटादौ विघ्नाभावाधिकरणत्वस्य मङ्गलाप्रयुक्तत्ववत् । एवं च वृत्त्युपहितरूपेण सुखाद्युपहितरूपेण च तादृशप्रयोजकत्वाद् वृत्त्यवच्छिन्नचितो जानात्यर्थत्वम् इति ग्रन्थसङ्गतिः ।

यदितु तार्किकादिरीत्या साक्षात्करोतिजानात्योर्मुख्यसकर्मकत्वं नाभ्युपेयते तत्र ज्ञाधातोः शक्यता शुद्धचिद्व्यक्तावेव निरवच्छिन्ना, शक्यनानात्व एवानुगमार्थमवच्छेदकस्वीकारा-

त् । घटं जानातीत्यादौ तदीयासत्त्वापादकाज्ञानविरोधित्वसम्बन्धेन घटादेर्ज्ञाधात्वर्थेऽन्वयः । तदीयत्वं च स्वावच्छिन्नचिद्विषयिताविषयितान्यतररूपस्तत्सम्बन्धः । स्वावच्छिन्नाचिद्विषयित्वमात्रानिवेशे ब्रह्म जानातीत्यादावनुपपत्तिः । ब्रह्मणश्चित्स्वरूपत्वेन सावच्छिन्नत्वाभावात् । विषयित्वमात्रनिवेशे च घटं जानातीत्यादावनुपपत्तिः । घटादेर्जडत्वेनावरणकृत्याभावात् । घटादिविषयकत्वस्याज्ञाने ऽनङ्गीकारात् । अत उभयमुपात्तम् । अभानापादकाज्ञानसत्त्वे ऽपि परोक्षवृत्तिकाले घटं जानामीत्याद्यनुभवादसत्त्वापादकेतीत्याहुः ।

इदं च तर्ककौतूहले विचारितमस्माभिरिति तिष्ठत्वतिविस्तरः ॥

उपदेशे ऽजनुनासिक इत् २।

उपदिश्यतेऽनेनेत्युपदेशः । "कृत्यल्युटो बहुलम्" इति बाबाहुलकात्करणे घञ् । नच तदाश्रयणे मानाभावः । भाष्योक्तेरेव तथात्वात् । सच धातुप्रातिपदिकपाठे, सूत्रवार्त्तिके च । एतैर्हि शब्दा उपादिश्यन्ते । तत्रानुनासिकोऽच् इत् संज्ञा स्यात् । नच "पुंसि संज्ञायां घः प्रायेणम्" इति घप्रत्यय एवास्त्विति वाच्यम् । संज्ञात्वाभावात् । शास्त्रकारसङ्केतविरहात् । नच प्रायेण संज्ञायामिति व्याख्यानाद् असञ्ज्ञायामपि तदुपपत्तिः । प्रायसंज्ञाग्रहणयोर्विधेयविशेषणत्वमपहाय परस्परं विशेषणविशेष्यभावानौचित्यात् । तदुक्तं भाष्ये "नह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणम्" इति । उपाधिविशेषणयोश्च वाच्यत्वावाच्यत्वाभ्यां विशेषः । यथा दतिहरिशब्देन पशुरभिधीयते इति पशुरुपाधिः । गार्गिकया श्लाघते

इत्यत्र श्लाघाया वुञाऽनभिधानात्सा विशेषणम् ।
तदुक्तम्—

अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः ।
अनुपाधिरतोऽन्यः स्यात् श्लाघादिविशेषणं यद्वत् ॥

अनयोश्च क्रियाभावशब्दयोरिव क्वचित्पर्यायत्वं क्वचिद्भेदेन व्यवहार इति द्रष्टव्यम् । तस्माद्बाहुलकमेव स्थितमिति मूलानुयायिनः ।

एतेनोपदेशपदार्थविचारभाष्यस्योपक्रमस्थस्य न्यायप्राप्तानुवादकस्य प्राबल्यानुमानेनोक्तार्थे भाष्यकृतस्तात्पर्यं नास्तीति परास्तम् । उत्तरपक्षत्वेन साक्षादुपन्यस्ते तात्पर्याभावानुमानस्य बाधितत्वात् ।

यदप्युक्तम्—भाष्यकारस्य करणे घञुक्तिः किं पाणिनीयव्याकरणसापेक्षा उत तन्निरपेक्षा ।

नाद्यः । उक्तन्यायेन घञसिद्धेः । नान्त्यः । पाणिनीयसूत्रोपन्यासस्यासङ्गततापत्तेः । तस्मान्न्यायविरुद्धे भाष्यस्य न तात्पर्यमिति ।

तदप्यसत् । बहुलग्रहणानुसारेण सूत्रतात्पर्यस्यैव भाष्यकृता स्फुटीकृतत्वात् । अन्यथा बहुलग्रहणवैयर्थ्यापत्तेः । प्रत्याहारशब्देऽधिकरणे घञिति स्वयमेवोक्तत्वाच्च । अत एवासन्न्यायोपन्यासपूर्वकस्मृतिसाम्यमप्यपास्तम् । भावघञन्तत्वपक्षे उच्चारणक्रियायामन्त्यत्वासम्भवेन शब्दद्वारकस्यान्त्यत्वस्य ग्रहणे गौरवाच्च । अन्यथा प्रतिज्ञासमधिगम्ये प्रतिज्ञाशब्दस्य लक्षणेति वदतां कर्मण्यङः दूषणानुपपत्तेश्च ।

अन्ये त्वाहुः—वासरूपन्यायेन करणे ऽपि घञ् सुवचः । नच क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति वाच्यम् । भावानवबोधात् । तत्र हि क्तल्युटौ नपुंसके भावे विहितावेव गृह्येते,

परस्परसाहचर्यात् । ननु भूतवर्त्तमानक्तौ करणाधिकरणल्युटौ च । तेन "निष्ठा" इतिभूतक्तविषये अशयिष्ट अभविष्ट इत्यादौ लुङ् सिद्धः । विधिसामर्थ्यात्समाधाने गौरवात् । तथा "ञीतः क्तः", "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्त्तमानक्तविषये क्ष्वेदते, क्ष्विद्यति, मेदते, मेद्यति, स्वेदते, स्विद्यति, इच्छति, जानाति पूजयतीत्यादौ लट्, तद्भिन्नधातुषु लड्विधेश्चरितार्थत्वात् । एवं करणल्युटो विषये उपदेशेत्यादौ, अधिकरणल्युटो विषये प्रासाद इत्यादौ घञ् । नचैवं धातुमात्रात्करणाधिकरणयोर्घञापत्तिः । "अभिधानलक्षणाः कृत्तद्धितसमासाः" इति न्यायात् ।

अयमेव बाहुलकात्करणे घञं वदतो भगवतोऽप्यभिप्रायः । "कृत्यल्युटो बहुलम्" इत्यत्र ल्युट्पदं करणाधिकरणल्युट्परम्, क्वचित्कारकान्तरेऽपि भवति क्वचित्करणाधिकरणयोरपीत्यर्थकबहुलशब्दस्य तेनैव सम्बन्धसम्भवात् । भावातिरिक्ते साधने करणाधिकरणयोरित्यनेनैव ल्युटो विधानेन तत्र भावल्युटो ग्रहणासम्भवात् । अत एव तत्र कृत्यग्रहणमपि कर्मार्थकतत्परम् । कारकान्तरे ऽपि भवतीत्यर्थेन बहुलग्रहणेन बहुभ्यो धातुभ्यः सदा भवति कस्माच्चिद्धातोः कदाचिद्भवतीत्यर्थः । तथाच प्रकृतपरिभाषायां करणाधिकरणल्युटो ग्रहणं न भवति वैयर्थ्यादिति पर्यवसन्नम् ।

अत एव प्रत्ययसूत्रे प्रतियन्त्यर्थमनेनेति प्रत्ययः । यद्वा "पुंसि संज्ञायाम्" इति घइति अनुन्यासग्रन्थः सङ्गच्छते । बाहुलकात्परस्यापि करणल्युटोऽप्रवृत्तिपक्षे अचः सम्भवात् ।

एतेन करणल्युटा बाधितत्वादेरच् तत्र न भवत्येव उक्तपरिभाषानुरोधादिति मैत्रेयग्रन्थो निरस्तः ।

यत्तु सीरदेवेनोक्तम् तत्परिभाषायां क्तस्तावन्नपुंसके

भावे विहित एव गृह्यते ल्युटा साहचर्यात् । ल्युडपि यदि भावे विहित एव गृह्येत तर्हि तेनैव हासमित्यादेर्वारणसम्भवात् क्त-ग्रहणं व्यर्थमेव स्यात् । क्तग्रहणाश्रये तु ल्युट् त्यक्तुं न शक्यते सकर्मकेभ्यो भावे क्तस्याभावात् । तथाच क्तग्रहणसा-मर्थ्यात्सामान्यविहितो ल्युट् गृह्यते इति मैत्रेयोक्तं युक्तमिति ।

तन्न । ल्युट्सामान्यग्रहणे तत्साहचर्याद्भावे क्त एव गृह्यते इत्यस्य व्याहतत्वात् । नापि ल्युट्ग्रहणेन हासमित्यादिवा-रणसम्भवः, परस्परामवृत्तिपक्षे एव परस्परेण प्रवर्त्तितव्य-मित्यस्य सर्वसंमततया ल्युटोऽप्रवृत्तिपक्षे तस्य नित्यं बाधक-त्वाभावेन घञो दुर्वारत्वात् ।

यदपि तेनोक्तं वुञ्छणादिसूत्रे सप्तदशप्रत्यया इति वृत्ति-ग्रन्थोऽनुन्यासमते ऽनुपपन्नः स्यात् । "परिमाणाख्यायां सर्वे-भ्यः" इति घञोऽजपवादत्वात् ।

तदप्ययुक्तम् । प्रत्ययशब्दस्य परिमाणाख्यत्वाभावात् । नच संख्यावाचिन्युपपदे घञिति तदर्थः । एकस्तण्डुलनिचायः । द्वौ शूर्पनिष्पावौ इत्यादिभाष्योदाहरणविरोधात् । "उपपद-मतिङ्" इति नित्यसमासप्रसङ्गादित्याहुरित्यास्तां तावत् ।

उदाहरणम् एधेत्यत्र अनुदात्ताकारस्य इत्सञ्ज्ञत्वाद् "अनु-दात्तङितः" इत्यात्मनेपदम् । नच तस्यानुभवसिद्धत्वाभावः । सूत्रकृता तादृशस्यैव पाठे ऽधीदानीमनुनासिकपाठस्यापभ्रष्ट-त्वात् । तदुक्तं प्रतिज्ञानुनासिक्याः पाणिनीया इति । एवं तत्र तत्राभियुक्तव्यवहारवशादुन्नेयम् ।

उपदेशे किम् । अभ्र आँ अपः । "आङो ऽनुनासि-कश्छन्दसि" इत्यनुनासिकः । अस्य शास्त्रे पाठाभावान्न संज्ञा ।

ननु "उञ ऊँ" इत्यत्रातिप्रसङ्गः; स्वरूपेणैव पठितत्वात्,

विधानसामर्थ्यस्य चोभयत्रापि अविशेषात् । नच 'अनेकान्ता अनुबन्धाः' इति पक्षे अभ्र आं अटित इत्यादावादित्त्वादिडभावार्थम् इत्सञ्ज्ञापत्तिः। आङिदित्येतावताऽपि तत्सिद्धेः। अत एव दधीच्छति दधि ब्राह्मणकुलम्। दधीयतेः क्विप्यल्लोपयलोपह्रस्वेषु "अणोऽप्रगृह्यस्य" इत्यनुनासिकस्य "अनुनासिक" इति इत्संज्ञायां नुमापत्तिः । दधिमथ्वादिषु पचतिभवतीत्यादिषु इत्कार्यं लोप एव स्यादत उपदेशग्रहणमित्यपास्तम् । "अणप्रगृह्य इद्" इत्येतावतैव तदुपपत्तेरनुनासिकविधानवैयर्थ्यात् । "इतश्च" इति लोपविधानवैफल्याच्च । तस्मादुपदेशपदं व्यर्थमिति चेत् ।

अत्राहुः—उत्तरार्थं तदिति । अजिति किम्। मनिनो मकारस्य मा भूत् । तथा च "अन्येभ्यो ऽपि दृश्यते" इति हलन्तेषु मित्त्वादन्त्यादचः परः स्यात् । अनुनासिकः किम् । चिरिणोति जिरिणोति । अत्र मा भूत् ।

हलन्त्यम् ३।

उपदेशेऽन्त्यं हलित्स्यात् । नचापेक्षिकमन्त्यत्वमतिप्रसङ्गि । अन्त्यपदस्वारस्येन तत्तद्धातुत्वाद्युपाधिपरिच्छिन्ने समुदाये यदन्त्यं तस्योपादानात् । शीङ् स्वप्ने। ङित्वात्तङ् । शेते। उपदेशे किम्। अग्निचित् । सोमसुत् । नच तुग्विधानसामर्थ्यम् । आगत्येत्यादौ चरितार्थत्वात् । नच क्विपः पित्त्वविधानवैयर्थ्यम् । अग्निचितावित्यादौ सार्थक्यात् । इति हरदत्तः । अन्त्यं किम् । मनिनो मकारस्य मा भूत् । वेश्म सद्म । "सर्वधातुभ्यो मनिन्" । सत्यामित्सञ्ज्ञायां "मिदचोऽन्त्यात्परः" इत्यस्य प्रसङ्गात् ।

वस्तुतः पूर्वसूत्रे ऽज्ग्रहणसामर्थ्यादेवात्र न दोषः । अनेन तेन वा मकारस्येत्संज्ञायां विशेषाभावात् ।

एवं "षः प्रत्ययस्य" इत्यादिकमप्यत्र साधकं ज्ञेयम् । "श्रोत्रियंश्छन्दोऽधीते" "क्षेत्रियच् परक्षेत्रे चिकित्स्यः" इत्यादौ वाक्यार्थे पदवचनमिति पक्षे प्रकृतिप्रत्ययविभागाभावेऽपि उपदेशेऽन्त्यत्वादित्संज्ञा । सनुतर् इत्यादेः स्वरादिपाठेऽपि रेफो नेत्सञ्ज्ञः, उच्चारणसामर्थ्यात् । अन्तोदात्तनिपातनानुरोधेन रित्स्वरस्य दुर्वचत्वात् ।

स्यादेतत् । "आदिरन्त्येन" इत्यस्य इत्सञ्ज्ञाधीनप्रवृत्तिकतया "हलन्त्यम्" इति सूत्रस्य च तदधीनप्रवृत्तिकतया अन्योन्याश्रयः पदार्थबोधं विना वाक्यार्थबोधस्यासंभवात् ।

अत्राहुः—हलिति योगो विभज्यते हस्य लृ हल् । सामीप्यं षष्ठ्यर्थः । नच तत्र विप्रतिपत्तव्यम् । "अस्तेर्भूः" इत्यत्र "अस्तेः समीपे ऽनन्तरे वा" इति भाष्यदर्शनात् "ग्रो यङि" इत्यत्रानन्तर्यं षष्ठ्यर्थ इति शङ्कायास्तदारूढत्वाच्च । ब्राह्मणकम्बल इत्यादौ तु स्वस्वामिभावसंबन्धस्योत्थिताकाङ्क्षत्वात्प्रतीतिरित्युत्सर्गः । अन्यथा त्विष्टापत्तिः । अनन्तरादिषु बहुव्रीहेरेवानभिधानस्य भाष्यकारैरुक्तत्वात् । अत एव न समीपार्थे बहुव्रीहिरस्त्यनभिधानादिति सीरदेवेनाप्युक्तम् ।

यत्तु "ङेप्रथमयोरम्" "लसार्वधातुकमनुदात्तम्" "उदात्तस्वरितयोर्यणः" इत्यादौ क्लृप्तस्य स्थान्यादेशसम्बन्धस्य बाधः । नच हकारस्थानिकलकाराप्रसिद्धिः । "नहो धः" इति हस्य धत्वे "तोर्लि" इति लत्वे च उपानल्लुनातीत्यत्र तत्सत्त्वात् । नचासिद्धत्वम् । धुडादिष्वित्सञ्ज्ञानापत्तेः । इत्संज्ञायां "पूर्वत्रासिद्धम्" इत्यस्याप्रवृत्तेः । नापि साक्षाद्धकारस्थानिकलकाराभावेन परिभाषाबाधः । भविता भवितारावित्यादौ स्वरानापत्तेः । प्रथमोपस्थितपरिभाषाऽनुरोधेन परं-

परादेशग्रहणस्योचितत्वाच्चेति।

तदसत्। हल्शब्दार्थप्रसिद्ध्युपपादकत्वेनोक्तकल्पनायां तदनुपपादकहकारस्थानिकलकारेत्सञ्ज्ञापादकशंकाया अयुक्तवान्तत्वात्। अनुवादे च परिभाषाऽनुपस्थानात्। अन्यथा "उदीचामातः स्थाने" इत्यत्र स्थानेग्रहणवैयर्थ्यात्। तेन स्थानेयोगपरिभाषाया अनित्यत्वज्ञापने ऽपि फलतो विशेषाभावात्। अत एव स्थानिवत्सूत्रे "अनल्" इत्येवास्तु अनुवादतया स्थानेयोगाभावात्। सम्बन्धसामान्ये षष्ठीमाश्रित्य अलोऽलेत्याद्यर्थलाभसंभवादिति शङ्कितं ग्रन्थकारैः। अत एव "सिद्धन्तु प्रसङ्गे रपरत्वाद्" इति पक्षे ऋकारस्य योऽण् स प्रसङ्गावस्थायामेव रपरः स्यादित्यर्थे ऋकारसमीपस्थस्याप्यणो रपरत्वं स्यादित्याशङ्क्य द्वितीयस्थानशब्दमनुवर्त्य ऋकारस्थानिकस्याणो लाभ इत्युक्तमाकरे। धुडादौ तु कार्यकालपक्षमालम्ब्य इत्सञ्ज्ञाया उपपादितत्वात्। अत्र च तत्कल्पने प्रमाणाभावात्। लत्वस्यासिद्धत्वाभावे बीजस्य दुर्वचत्वात्। उपदेशे इत्यस्य प्रकृतत्वात्। नच श्रुत्या प्रकरणबाधः। उपदेशग्रहणमुत्तरार्थमिति सिद्धान्तात्। तस्यापि श्रुतित्वाविशेषात्।

एतेन व्यस्तप्रयोगो ऽपि दुर्लभ इत्यपास्तम्।

भवितेत्यादौ तु स्थानिवद्भावेन डादीनां सार्वधातुकत्वमस्त्येवेति न दोषः। परम्परया लादेशत्वस्यापि तत्र सत्त्वात्। नच तासेः परस्य लादेशसार्वधातुकस्यानुदात्तत्वविधानं भवितासीत्यादौ साक्षाल्लकारादेशे सिबादौ चरितार्थमिति कथमादेशादेशे डादौ तत्प्रवृत्तिरिति वाच्यम्। उभयपक्षसाधारण्यात्। अकारसन्निहितसार्वधातुकस्याप्रसिद्ध्या तत्र सामर्थ्याल्लकारादेशग्रहणमित्येवाधिकस्य वाच्यत्वात्। नच चलतीत्यादौ शा-

बादिरेव तथा प्रसिद्धइति वाच्यम् । तास्यादेः परस्येत्यपि सार्व-धातुकविशेषणस्य श्रूयमाणत्वात् । विशिष्टस्य तथाऽप्यप्रसिद्धेः । "लस्य" इति सूत्रे लकारो ऽनुनासिको निर्दिश्यते इति भाष्यो-क्तपक्षे "लसार्वधातुकम्"इत्यत्रापि तादृशस्यैव लकारस्योपादा-नाच्च । एतेन "उदात्तयणो हल्पूर्वात्", "उदात्तस्वरितयोर्यणः" इत्यादिकमपि व्याख्यातम् । यणो हल्पूर्वत्वनियमाव तत्परस्य चानुदात्तस्यैव तत्सूत्रप्रवृत्तिस्थले ऽपेक्षितत्वात् । तत्र बाधस-द्भावात् षष्ठ्या सामीप्यस्य वक्तुमशक्यत्वात् । ननु "उदात्त-यणः" इति सूत्रे हल्पूर्वग्रहणस्य वहुतितवा ब्राह्मण्येति व्यावर्त्त्यं भाष्ये वक्ष्यते इति चेत् । सत्यम् । तत्र "वहोर्नञ्वदुत्तरपदभू-म्नि" इति अतिदेशोदात्ततया उकारपूर्ववार्त्तिनां शेषनिघातेन टाविभक्तेश्च सुप्स्वरेणानुदात्ततया बाधतादवस्थ्यात् । तथा चो-भयोरपि नियमाभावात् प्रयोजनवशेन प्रकृते सामीप्यस्य षष्ठ्यर्थत्वे बाधकाभाव इति सिद्धम् ।

नन्वेवमपि लसूत्रस्थलकारस्य हकारसंनिधानेनैव हल्प्रत्याहा-रापत्तिः । अव्यवहितसामीप्यानुपपत्तावेव व्यवहिततदुपादानात् ।

यद्वा हल् च लूचेति द्वन्द्वः । नच हल्शब्दार्था-नवबोधात्सहविवक्षाऽनुपपत्तौ कथं द्वन्द्व इति वाच्यम् । "आदेशप्रत्ययोः" इति सूत्रे आदेशाभिन्नः प्रत्ययावयवश्च यः सकार इति व्याख्याय सहविवक्षां विनाऽपि सौत्रो द्वन्द्व इति स्वयमेवोक्तत्वात् । नच तत्रोभयनिर्देशस्यै प्रत्यक्षत्वात् तथा, अत्र तु नेति वाच्यम् । अन्योऽन्याश्रयपरिहारस्याव-श्यकतयाऽत्रापि साम्यात् ।

वस्तुतो ऽत्र न तदनुपपत्तिः । हल्पदं सार्थकमाप्तप्रयुक्त-त्वादिति सामान्यतोऽर्थवत्त्वाज्ञाने सति तस्याः सुस्थत्वात् ।

लकारस्येत्सञ्ज्ञायाम् "आदिरन्त्येन" इति प्रत्याहारसिद्धौ पश्चादेव हल्पदार्थविशेषज्ञानसम्भवात् । पाणिनेस्तादृशविवक्षायाः सम्भवाच्च । प्रयोगे वक्तृविवक्षाया एवापेक्षितत्वात् । वाक्यप्रयोगहेतुज्ञानस्य तच्छब्दातिरिक्तप्रमाणजन्यत्वनियमात् । अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोगाद् इत्यादिकमप्यत्र योज्यम् ।

यत्तु "तुल्यास्यप्रयत्नं सवर्णम्" "अणुदित्सवर्णस्य" इतिप्रणयनेन अकारहकारादयो ग्राहका इत्यर्थस्य ज्ञातत्वेन "अइउण्" "हयवरट्" इत्यादीनां तदर्थाभिप्रायेण प्रणयनापत्तिरिति ।

तदसत् । अकारादिभिरकारादिग्रहणमापाद्यम्, उताकारादिहकारादीनां परस्परं ग्राह्यग्राहकभावः । नाद्यः । इष्टत्वात् । नान्त्यः । "नाज्झलौ" इति बाधकसत्त्वात् । एतेनाकारादीनां तुल्यस्थानानां च परस्परं सावर्ण्यं नेति सूत्रकारज्ञानं कल्प्यम्, तत्र चाकारहकारयोरिवाकारयोरपि सावर्ण्याभावो विषय इति निरस्तम् । आचार्यस्य विशेषदर्शित्वेन तद्विषयकज्ञानस्य बाधितत्वात् । अत एव ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमे ऽपि भ्रमविषयकेऽपीश्वरज्ञाने ग्राह्यभ्रमविशेषे शुक्त्यादौ प्रकारीभूतरजतत्वादिवैशिष्ट्यविषयकत्वं नास्तीति तार्किकसिद्धान्तः । तुल्यस्थानप्रयत्नानामप्यज्झलां परस्परं सावर्ण्यं नास्तीत्यस्मिन्नाचार्यज्ञाने अच्त्वावच्छिन्नस्य हल्त्वावच्छिन्नेन सावर्ण्याभाव एव विषयो न त्वच्त्वावच्छिन्नस्य तेन, हल्त्वावच्छिन्नस्य वा तेनेति स्पष्टत्वात् ।

यत्तु मुखनयनं पश्येत्यादावन्यतरपदार्थज्ञानशून्यस्यैकतरपदार्थविषयकदर्शनान्वयबोधे ऽपि उभयपदार्थज्ञानवतः सहबोधस्यैव सत्त्वेन वक्तृतात्पर्यनिर्वाहः । प्रकृते तु बोद्धॄणां

सहबोधस्य वक्तुमशक्यत्वादाचार्याणामपि तदभिप्रायेण शब्द-प्रयोगाभावात्सहविवक्षाऽनुपपत्तिरेवेति ।

तदप्यसत् । 'द्वयोः सहबोधो जायताम्' इत्येव तात्पर्यम् । सचोभयशक्तिज्ञानवतः सहैव इतरस्य त्वन्यथेति हि वस्तुस्थितिः। प्रकृते तु सूत्रकारस्यैव युगपद् बोधः, अस्मदादीनान्तु पूर्वं लकारेत्सञ्ज्ञाबोधः ततो हल्पदार्थज्ञाने द्वयोः सहबोधः । 'सहैव बोधो जायताम्'इति तात्पर्ये मानाभावात् । सामान्यबोधस्तु अस्म-दादीनामपि सहैव भवतीति स्पष्टम् । पदद्वयशक्तिज्ञानविरहिणो ऽपि सह बोधो जायतामिति तात्पर्यस्य च बाधितत्वात् ।

ननु स्ववाक्यात्स्वान्वयबोधो न भवत्येव प्रकृतान्वयबोध-समानाकारकज्ञानाभावरूपस्वरूपसदाकाङ्क्षाविरहात् ।

मैवम् । इच्छाविरहविशिष्टस्यैव ज्ञानस्य तत्र निवेशात् ।

तथा चोक्तं शब्दालोके—प्रत्यक्षावगते ऽप्यनुमित्सावत् 'शब्देन जानीयाम्' इतीच्छायाः सौलभ्येनाकाङ्क्षासत्त्वे हेत्वन्त-राभावस्य दुर्वचत्वात् । अत एव द्वितीयटीकायां स्वोक्तशब्दस्य स्वं प्रति अर्थप्रत्यायकत्वं सिद्धान्तितमिति ।

यत्त्वेकं विना ऽपरस्यान्वय इति स्वीकारे 'देवदत्तो यज्ञ-दत्तश्च गच्छतः' इतिवद् 'देवदत्तयज्ञदत्तौ गच्छति' इति प्रयो-गापत्तिः । तथाचैतादृशविषये द्वन्द्वासाधुताया आवश्यकत्वात्स-हितबोधस्यैव वक्तृतात्पर्यविषयत्वं वाच्यमिति ।

तदप्यसत् । सहबोधस्योपपादितत्वात् । धातुनाम्नोश्च स-मानवचनान्तत्वनियमादुक्तापत्तेरनवतारात् । साधुतार्थं द्विव-चनापेक्षायामपि बोधार्थं तदभावात् । इयान् विशेषः- कर्त्राख्याते कर्तृपदेन समानवचनत्वं कर्माख्याते तु कर्मवाचकपदेनेति । तस्मादुक्तद्वन्द्वो निरवद्यः ।

अभ्युपेत्य तु ब्रूमः—हल् ऌ इति पृथगेवास्तु। न चात्र संयोगान्तलोपानुपपत्तिः। एकस्यापि पदस्य संयोगान्तत्वाभावात्, पदसमुदायस्य पदग्रहणेनानुपादानात् इति वाच्यम्। संयोगान्तत्वपदान्तत्वयोः लकारविशेषणत्वपक्षे तदुपपत्तेः। संयोगस्य पदविशेषणत्वात्तदन्तविधिनैव सिद्धावन्तग्रहणं विशेष्येण पदेनापि सह संबन्धार्थम्। संयोगेति लुप्तषष्ठीकम् इति व्याख्यानात्। पृथक्सर्वेभ्यो विभक्तावेकशेष इति पक्षे वृक्षस् स् इत्यत्र संयोगान्तलोपस्य भाष्य एवोपन्यासात्। नच हल्ङ्यादिलोपाभिप्रायं तदिति कैयटव्याख्यानविरोधः। अत्र व्याचक्षते इत्युपक्रम्यान्यमतेनैव तत्प्रवृत्तेः। अन्यथा सुतिसीतिप्रत्ययैः प्रकृतिराक्षिप्यते इति कैयटोक्तसिद्धान्तविरोधात्। "अस्तिसिचोऽपृक्ते" इति सूत्रे द्विसकारको निर्देश इति भाष्यस्य सिचस्स् इति च्छेदे संयोगान्तलोपेन कौस्तुभ एव व्याख्यानात्।

यत्तु लोपद्वारेण लक्षणाया एवान्वाख्यानं तस्याः शक्यज्ञानं विनाऽनुपपत्तेः परस्पराश्रय इति।

तदप्यसत्। हल्पदार्थसम्बन्धिनिलक्षणाया इहानाश्रयणात्। किन्तु हल् इति समुदायस्य हल्ऌ इति समुदायपरत्वं कल्प्यते, तच्च न लक्षणया किन्तु लकारस्मरणेन तल्लोपज्ञानशून्यानां उक्तसमुदायज्ञानाभावात्। यत्र लोपज्ञानशून्यानामपि तादृशार्थबोधो यथा—नीलः पट इत्यादौ तत्रैव लक्षणायाः स्वीकारात्। व्यतिसे इत्यादौ लुप्तस्य धातोरेव तदर्थप्रत्यायकत्वमिति मणिकारादिभिरुक्तत्वात्।

यत्तु लकारे इत्संज्ञाप्रवृत्तिसमये हल्शब्दवाच्यं किञ्चिदित्संज्ञं भवतीति वाक्येन अक्षु इत्संज्ञापत्तिः। किञ्च उक्तरीतेर्यथाश्रुतग्राहिणं प्रति प्रवृत्तावपि 'नहि निर्विशेषं सामान्य-

म्' इति न्यायेन नियतशास्त्रार्थस्य युक्तत्वं, प्रकारान्तरेण तन्निर्णये लकारप्रश्लेषो व्यर्थ इति ।

तदप्यसत् । हल्शब्दवाच्यं किञ्चिदस्तीति ज्ञानस्यापि हल्मात्रविषयकत्वात् । एतावाँस्तु भेदः वाच्यत्वेन ज्ञानं हकारादिवृत्त्यसाधारणधर्मांशे सप्रकारकं हल्त्वेन ज्ञानं निष्प्रकारकमिति । निर्विशेषं न सामान्यमिति न्यायस्य तु सामान्यप्रकारकज्ञानस्यापि विशेषविशेष्यकत्वमित्यर्थो नतु तद्धर्मावच्छिन्नविशेष्यकत्वमपीति । पूर्वं हल्शब्दवाच्यविशेषानवधारणेऽपि पश्चात्तदवधारणात् । तावता तद्धर्मस्याज्ञातत्वात्तितायामुक्तिसम्भवाभावात् । नच हल्शब्दवाच्यं किञ्चिदस्तीति ज्ञानं न सूत्रप्रवृत्तावुपयोगि तस्य लक्ष्यसंस्कारकत्वाभावादिति वाच्यम् । परम्परया तत्सत्त्वात् । तादृशज्ञानाऽनङ्गीकारे तत्रापि सम्पूर्णसूत्रावृत्तिर्न स्यात् । तात्पर्यग्रहस्य तत्रापेक्षितत्वात् । तात्पर्यसत्त्वे त्वावृत्तिरित्युक्तेः ।

यदप्युक्तम्—असतः संज्ञिनः संज्ञाविरहप्रतिपादकभाष्येणानिर्धारिते संज्ञिन्यपि न्यायसाम्यात्तदभावोपपादनेन भाष्यविरोध इति ।

तदप्यसत् । कल्पनानुरोधेन तन्निर्णयसंभवात् । तथा च तत्र कैयटः—सत्यसति वा संज्ञिनि बुद्ध्या विषयीकृते शब्देन पूर्वनिर्दिष्टे संज्ञा प्रवर्तते इति तिष्ठतु विस्तरः ।

स्यादेतत् । तथाऽप्युभयत्र संयोगान्तलोपानुपपत्तिः । तत्र यणः प्रतिषेधारम्भात् । झल् इत्यपकृष्य संयोगान्तस्य झलो लोपविधानाच्चेति ।

मैवम् । बहिरङ्गलक्षणत्वाद्वेति तृतीयपक्षे तदुपपत्तेः ।

यदप्युक्तम्—अन्तरङ्गे संयोगान्तलोपे कर्तव्ये बहिरङ्गस्य सुलोपस्यासिद्धत्वमिति ।

तदप्यसत्। पचन्नित्यादौ झलपकर्षपक्षसाधारण्यात्। नच वचनसामर्थ्यम्। प्राङ्भ्यामित्यादौ चरितार्थत्वात्। यथोद्देशपक्षस्य त्वत्रापि सुवचत्वात्। नचैवं बहिरङ्गलक्षणत्वाद्वैत्यस्यानुपपत्तिरिति वाच्यम्। यत्र यणो लोपप्रसक्तिस्तत्र कार्यकालपक्षमाश्रित्य प्रवृत्तेर्वाच्यत्वात्। नचैकस्मिन्नेव लक्षणे एकस्याः परिभाषायाः प्रवृत्त्यप्रवृत्तिविरोधः। लक्ष्यभेदेन लक्षणभेदमाश्रित्य तदुपपत्तेः।

वस्तुतस्तु हल्ङ्यादिलोपापेक्षया संयोगान्तलोपस्यैव बहिरङ्गत्वं विजातीयसंज्ञाघटितत्वात्। नच तस्याप्यपृक्तसंज्ञाघटितत्वात्साम्यम्, तस्याश्च प्रत्ययघटितत्वमपीति वाच्यम्। संयोगसंज्ञाया अपि संज्ञाद्वयघटितत्वात्। हलां च विशेष्यतया अचामभावप्रतियोगितया तत्र निवेशात्। सुप्तिङन्तं पदं "स्वादिष्वसर्वनामस्थाने" इति द्विविधायाः पदसंज्ञायास्तत्र प्रवेशाच्च। "रात्सस्य" "स्कोः संयोगाद्योः" इत्यपवादद्वयानुसन्धानापेक्षप्रवृत्तिकत्वाच्च। हल्ङ्यादिलोपस्य च निरपवादतया तत्प्रवृत्तावपवादविषयपरिहारस्यानपेक्षितत्वात्। अत एव तत्र हल्पदानुपादानपक्षे पचन्नित्यादौ नलोपानुपपत्तिरिति शङ्कितं भाष्यादौ। अन्यथा हल्ङ्यादिलोपस्यापि बहिरङ्गत्वादसिद्धत्वतादवस्थ्यं स्यात्। लक्षणविशेषप्राप्तेरप्रयोजकत्वात्। नचैवं यणपेक्षयापि संयोगान्तलोपस्य कथमन्तरङ्गत्वम्। यणादेशविधानस्य संज्ञात्रयघटितत्वात्। संयोगान्तलोपशास्त्रस्य तु उक्तरीत्या गुरुत्वात्। मैवम्। यणपवादानां भूयस्त्वात्तावद्विषयत्वानुसन्धानापेक्षप्रवृत्तिकस्य यणूशास्त्रस्य बहिरङ्गत्वानपायात्। निर्दिष्टपरिभाषासंस्कृतस्यैव तस्य लक्ष्यसंस्कारकत्वाच्च। तत्रत्यस्याऽव्यवधानस्य स्वप्रतियोगिकभेदवद्वर्णघटितत्वात्। संयोगसंज्ञाघटकस्य त्वज्मात्रघटितत्वात्। स्वत्वस्य चान-

नुगतत्वात् इति भगवदभिप्रायः ।

यद्वा हल्सूत्रे, "हलन्त्यम्" इति सूत्रे च ऌकारस्यैव तव-ल्कारइतिवद्गुणभूतस्य निर्देशः । नचैवं ऌकारस्य कथमित्संज्ञा अच्संज्ञाया इदानीमप्यनिष्पत्तेः इतरेतराश्रयसाम्यात् । सत्यम् । "ऌदितः" इत्यनेन तज्ज्ञापनसम्भवात् इति कैयटः ।

अथवा णलो लकारेण लकारस्य इत्संज्ञा ज्ञाप्यते तस्य लित्स्वरार्थत्वात् । नच श्रवणार्थत्वम् । हल्ङ्यादिसूत्रे णल्व्यावृत्तये द्वितीयहल्ग्रहणस्य कृतत्वात् । अन्यथा ऽपृक्तत्वाभावादेव तदनापत्तेः । नच भवितेत्यादौ डादेशनिवृत्त्यर्थं तदिति वाच्यम् । सुतिसीतिप्रत्ययैः प्रकृतेराक्षेपाद्धलन्तायाः प्रकृतेः परेषां स्वादीनां लोपविधानात् डादेशं प्रति च तासन्तस्य प्रकृतित्वाभावात् । नचैवं या सेत्यादौ सुलोपो न स्यात् । नचैकदेशविकृतन्यायेन एकदेशस्य पूर्वान्ततया ग्रहणाद्वा हलन्तायाः प्रकृतेः परत्वमस्त्येवेति वाच्यम् । यः स इत्यादावतिव्याप्तेः । लोपप्रवृत्तिकाले उभयत्रापि हलन्तत्वाभावात् । आबन्तात्परत्वमाश्रित्य लोपस्य चोभयत आश्रये ऽन्तादिवद्भावनिषेधेन दुर्वचत्वात् । नच "तदस्यां प्रहरणम्" इति निर्देशात्स निषेधो ऽनित्य इति वाच्यम् । तस्यापि हल्पदार्थानवबोधकाले तत्सामर्थ्यग्रहानुपपत्तेः । नच "लिति" इति ज्ञापकं ल्युडादौ चारितार्थत्वात् इति चेत् ।

सत्यम् । तावताऽपि ण्वुलादिलकारसाधारण्येन इत्संज्ञाज्ञानस्य जातत्वात् । तस्य चोत्तरकाले "हलन्त्यम्" इति सूत्रजन्यबोधसंवादित्वनिश्चयेन प्रामाण्यादिति भाष्याशयः ।

स्यादेतत् । हल्सञ्ज्ञातः पूर्वं कथं संयोगान्तलोपः संयोगसञ्ज्ञाया हल्सञ्ज्ञाघटितत्वात्, कथं वा हस्य ल् इति समासः

सुप्सञ्ज्ञाया अनिष्पत्तेः ।

एतेन द्वन्द्वसप्तमीतत्पुरुषबहुव्रीहयो व्याख्याता इति चेत् ।

सत्यम् । साधुत्वज्ञानोपयोगिशास्त्रार्थबोधस्यापि तद्बोध्यसाधुत्वकानां पदानां स्वार्थानुभावकतायामनुपयोगात् । अन्यथा क्वाप्यर्थबोधानुपपत्तेः । प्रकृते तु हल्पदार्थज्ञानस्यापि हलन्त्यमिति वाक्यार्थबोधसामग्रीघटकत्वात्तत्रैव "आदिरन्त्येन सहेता" इत्येतद्वाक्यार्थबोधोपयोगीत्सञ्ज्ञाज्ञानापेक्षेति वैषम्यम् ।

स्यादेतत् । लस्येत्संज्ञायामपि नैतद्वाक्यार्थबोधोपपत्तिः । "न विभक्तौ तु स्माः" इत्यपवादवाक्यार्थज्ञानस्य पूर्वमपेक्षितत्वात् । "पूर्वं ह्यपवादा निविशन्ते पश्चादुत्सर्गाः" इति न्यायात् । तत्र च विभक्तिपदार्थज्ञानस्य, तत्र च सुप्तिङ्पदार्थज्ञानस्य, तत्र च "आदिरन्त्येन" इत्येतदर्थज्ञानस्य, तत्र च सञ्ज्ञाज्ञानस्यापेक्षितत्वात् तस्यच "हलन्त्यम्" इत्येतद्वाक्यार्थज्ञानाधीनत्वात्, तुशब्दार्थज्ञानस्यापि ग्रहणकशास्त्रार्थज्ञानाधीनत्वात् तस्य च उदित्यंशे इत्संज्ञाज्ञानसापेक्षत्वात्, उपदेशे ऽजनुनासिक इतीत्सञ्ज्ञाया अच्पदार्थज्ञानाधीनज्ञानत्वात् उक्तक्रमेणान्योन्याश्रयसङ्क्यादिति चेत् ।

नैवम् । नह्यपवादप्रवृत्तिपूर्वमुत्सर्गवाक्येन बोध एव न जन्यते प्रसक्त्यभावे निषेधानुल्लासात् । तथा च हल्त्वमुद्देश्यतावच्छेदकीकृत्य इत्संज्ञाबोधे सिद्धे सुप्तिङादिपदार्थबोधे बाधकाभावान्न विभक्ताविति वाक्यार्थज्ञानं ततो हल्त्वावच्छेदेन इत्सञ्ज्ञेति प्राथमिकबोधस्य विभक्तिस्थिततवर्गसकारमकारांशे अप्रामाण्यकल्पनं ततो विभक्तिस्थिततवर्गसकारमकाराभिन्नत्वे सति हल्त्वरूपमुद्देश्यतावच्छेदकमुभयैकवाक्यतया सिध्यति । अस्तिचेदं पकारादावपीति पूर्वोत्पन्नसुबादिबुद्धेः प्रामाण्यमविरुद्धम् ।

यत्तु विभक्तिस्थतकारादावपीत्सञ्ज्ञाज्ञानं जातं तत्तात्पर्यभ्रममूलकत्वादप्रयोजकमेवेति नातिप्रसङ्गः ।

यत्तु "न संप्रसारणे" इति सूत्रे, निष्पन्नस्य न प्रतिषेधः । अनिष्पन्नस्य कथं निमित्तत्वमित्याशंक्य संप्रसारणनिमित्तकपूर्वरूपस्यैवायं निषेधः । यद्वा यणि पर एव पूर्वस्य संप्रसारणनिषेध इति पक्षद्वयमपि भाष्यकारैरुक्तं तदभ्युच्चयमात्रम् ।

वस्तुतस्तु समानाङ्गग्रहणस्य तत्रावश्यकतया सम्प्रसारणपदस्य तत्स्थानिनि लक्षणयोक्तद्वितीयपक्षस्य युक्तत्वमेवेति वक्ष्यामः ।

अन्येतु हलन्त्यसूत्रमेवावर्त्तनीयं हलिति सूत्रे ऽन्त्यमित्स्यादित्यर्थः । ततो हल्संज्ञासिद्धौ हलन्त्यमिति सूत्रेण चकारादीनाम् इत्संज्ञायाम् अजादिसंज्ञासिद्धिरित्याहुः ।

अपरे तु हलिति सूत्रेणैव शषसारितन्तं समुदायमुद्दिश्य संज्ञा विधीयते । तत्र लकारस्यापि प्रविष्टत्वेन "हलन्त्यम्" इतीत्संज्ञायां वलादिप्रत्याहारासिद्धिः । नच रेफान्त्यसमुदायस्याज्ञातज्ञापकत्वरूपोपदेशत्वाभावादित्संज्ञानापत्तिः । अनेकसूत्रकरणसामर्थ्यादावृत्त्यादिनोभयरूपत्वे तु गौरवमिति वाच्यम् । हल्सञ्ज्ञाविधानसामर्थ्यादेव तदुपपत्तेः । आनुपूर्वीविशेषांशे उपदेशसत्त्वाच्च, स्वरूपांशे तस्य त्वयापि दुर्वचत्वात् । नच संज्ञासंज्ञिनोरेकवाक्यानुपात्तत्वादीसत्त्यभावः । तात्पर्येणैकवाक्यताकल्पनात् । हलन्त्यसूत्रार्थबोधान्यथानुपपत्तेश्च तत्र ग्राहकत्वात् । अन्यथा सूत्रावृत्तेरप्यनुपपत्तेः । अत एव "तस्य लोपः" इत्यत्र तस्य ग्रहणं सर्वलोपार्थमिति सिद्धान्तः । नच हलित्यत्र व्यवहितानामनुवृत्तौ "अइउण्" इत्यादीनां चाननुवृत्तौ बीजाभाव इति वाच्यम् । "नाज्झलौ" इत्यादिपर्यालोचनया चकारान्तानामननुवृत्तिसिद्धेः । अल्संज्ञामपेक्ष्या-

ऽन्यूनानतिरिक्तविषयकत्वापत्तेश्च। तादृशसंज्ञाद्वयस्य वैयर्थ्यात्। हलन्त्यसूत्रावृत्तौ हि हलिति पदस्य तत्पदाभिन्ने सूत्रे लक्षणा तत्पदमात्रानुकरणेन लाभेऽपि तदभिन्नसूत्रत्वरूपेण बोधाभावात्। नच प्रथमोपस्थितत्वादस्यैव ग्रहणम्। "हलन्त्यम्" इति सूत्रोपस्थितिदशायां प्रथममेतदुपस्थितौ नियामकाभावात्। "हलोऽनन्तराः संयोगः" "नाज्झलौ" "रलो व्युपधाद्धलादेः संश्च" इत्येतेषामपि हल्पदानां सत्त्वात्। हल्पदघटितसूत्रत्वेन लक्षणायाम् उक्तविसर्गादीनामेवोक्तसंज्ञापत्तेः। अइउणित्यत आरभ्यैव प्राथम्यं विवक्षिणीयमिति चेत्। तथाऽपि तद्विषयकज्ञानकल्पनावश्यकत्वे शषसरित्यन्तसमुदायस्योद्देश्यत्वकल्पनेऽपि गौरवाभावात्। एवं "हल्" इति सूत्रे सूत्रान्तर्गतं सत् यदन्त्यमिति व्याख्याने हकाराकारावन्यत्र वर्त्तिनौ दुर्वारौ। अतस्तस्मिन्नेव सूत्रेऽन्त्यत्वं विवक्षणीयम्। हल्सूत्रान्तर्गतत्वे सति हकारोच्चारणाव्यवहितोत्तरोच्चारणविषयत्वमुद्देश्यतावच्छेदकम् इति प्रतिपत्तिगौरवम् सप्तमीति योगविभागकल्पनं च। नच तस्यान्यत्र क्लृप्तत्वम्। एतद्विषयकतात्पर्यस्य कल्प्यत्वानपायात्।

एतेन सुप्सुपेत्यपि व्याख्यातमित्याहुः।

यत्तु वदन्ति—एकदेशावृत्तेर्विवक्षायां हरन्त्यमित्येव सूत्रितं स्यात्, भवदुक्तार्थस्य तावतापि लाभात्। पूर्वस्यापि समीपत्वानपायात्। हल्पदस्थाने सर्वत्र हरित्यस्यैव वाच्यत्वात् इति। तन्न।

लाघवाभावादापत्त्यसिद्धेः। अन्यथा सूत्रावृत्तिविवक्षायां हलादिरित्येव ब्रूयादित्यस्यापि दुर्वारत्वात्। हरप्रत्याहारस्य तावतैव सिद्धेः।

नचैवमजादिसंज्ञार्थं "हलन्त्यम्" इति सूत्रान्तरकल्पने गौर-

त्वमिति शङ्क्यम् ।

उत्तरसूत्रान्नेत्यनुवर्त्य आदिभिन्नं हल् इत्संज्ञं स्यादित्यर्थोपपत्तेः । नचैवं गौरवप्रसङ्गः । "आदिर्ञिटुडवः" इत्यत्रादिग्रहणत्यागाल्लाघवसत्त्वात् । तत्र नञ्पदाननुवृत्तेश्चोभयसंमतत्वात् । नच मध्यमानामपि हलामित्संज्ञापत्तिः । तत्तदुपाध्यवच्छिन्ने यदन्त्यं तदपेक्षस्यादित्वस्य ग्रहणे तदवच्छिन्नप्रतियोगिताकभेदस्य मध्यमे ऽप्यसत्त्वात् । द्वन्द्वस्य ततो लाभानुपपत्तेश्च । "रोरि" इतिलोपे "ढ्लोपे" इति दीर्घेच "हारन्त्यम्" इत्यस्यापत्तौ गौरवापत्तेः । न संयोगान्तलोपेन निर्वाहः । परत्वाद् "रोरि" इत्यस्य दुर्वारत्वात् । नच "पूर्वत्रासिद्धीये नास्ति विप्रतिषेधः" इति वाच्यम् । एवमप्यन्तरङ्गतया "रोरि" इत्यस्य बलवत्त्वात् ।

एवं "रात्सस्य" इति नियमादपि संयोगान्तलोपो दुर्लभः ।

यत्तु नियमसूत्राणां निषेधरूपेण प्रवृत्तिपक्षे रात्परस्य सकारभिन्नस्य संयोगान्तस्य लोपो न स्यादिति तद्वाक्यार्थः । तत्र रेफस्य निमित्तत्वश्रवणात्सकारातिरिक्तवर्णो रेफातिरिक्त एव ग्राह्यः माठरादिन्यायादिति ।

तन्न । तत्पक्षस्य गौरवग्रस्तत्वादनभ्यर्हितत्वात् । अजर्घा इत्यादेरसिद्धेश्च । कुर्दधातोरुपधादीर्घानङ्गीकारपक्षे ऽपि यङ्लुकि लङि सिपि अचोकूरिति दीर्घस्य माधवेनोक्तत्वात् । "दश्च" इति रुत्वम् । त्वद्रीत्या संयोगान्तलोपस्यैव प्रसक्त्या "रोरि" इतिलोपाप्रवृत्त्या तद्विरोधात् ।

केचित्तु "हलन्त्यम्" इत्यत्र मकारोत्तरमेव लकारप्रश्लेषो व्याख्येय इत्याहुः ।

अन्येतु "उपदेशे इदन्त्यम्, अच्, अनुनासिक एव" सूत्रणीयम् । तृतीयसूत्रं नियमार्थम्—अच्चेद् इद्भवति तर्ह्यनुनासिक एवेति

तेन भूइत्यादौ नापत्तिः। नच विपरीतनियमापत्तिः। "मिदचोऽन्त्यात्" इत्यादिलिङ्गात्। नच नियमस्य अव्यवहितसूत्रप्राप्तसंज्ञाव्यावर्त्तनेन चरितार्थत्वात् भूइत्यादौ इत्संज्ञाया दुर्वारत्वमिति वाच्यम्। वाक्यार्थत्रयकल्पने, नियमवाक्ये निषधत्वस्य कल्पने, विपरीतनियमादिवारणार्थं ज्ञापकान्तरकल्पनेच प्रतिपत्तिगौरवान्नेदं युक्तमित्यपरे।

योगविभागसामर्थ्यात्सूत्रद्वयप्राप्तसञ्ज्ञाव्यावृत्तेः अजनुनासिक इत्येकयोगे ऽनन्त्यस्यानुनासिकस्याच इत्सञ्ज्ञाविधानेऽन्त्यस्यानुनासिकस्यापि पूर्वसूत्रेण संज्ञेति फलितार्थस्य तुल्यत्वात्। अन्त्यांशे नियमो ऽनन्त्यांशे विधिरिति वैरूप्यस्य दुर्वचत्वात्। क्वचिदगत्या तत्सहनेऽपि तद्दोषदुष्टन्यासस्य कल्पयितुमयुक्तत्वात्। तत्सहने तूक्तरीत्या योगद्वयकल्पने ऽपि क्षत्यभावादित्याहुः।

अन्ये तु "अन्त्यम्"इत्येवावर्त्तनीयं ततो लस्येत्संज्ञायां हलन्त्यमित्येतद्वाक्यार्थबोधः। हलन्त्यमिति नियमार्थं हल् चेदिद्भवति तर्ह्यन्त्यमेवेति भ्वादौ न दोष इत्याहुः।

वस्तुतस्तु लृकारनिर्देशवादिनो भाष्यकृतो ऽयंभावः—"अच्" इति योगं विभज्य"भूवादयः"इत्यतो"वादयः"इत्यनुवर्त्तनीयम्। अभिविध्यर्थकेनाङा औकारस्याव्ययीभावे नपुंसकह्रस्वत्वे च कृते उइति रूपम्। अकार आदौ येषां ते आदयः,उकाराभिन्ना आदय इति कर्मधारयः। यणादेशः। औकारपर्यन्ता अकारप्रभृतयः अच्संज्ञा इति वाक्यार्थः। ततः पूर्वोक्तरीत्या हलपदार्थप्रसिद्धौ हलन्त्यमित्यस्य प्रवृत्तिः ततो ऽणादिसंज्ञासिद्धिरिति न काऽप्यनुपपत्तिः।

एतेन"सनाद्यन्ता धातवः" इत्येतदुत्तरं "भूवादयश्च" इति

सूत्रणीयं लाघवादिति तृतीये वक्ष्यमाणं केषां चित्कल्पनमप्यपास्तम् ।

अत्र पाठस्योक्तानुवृत्त्यर्थत्वात् ।

एतेनैव "हलन्त्यम्" इत्यस्य प्रवृत्त्युत्तरम् "उपदेशे ऽजनुनासिकः" इति सूत्रलेखनमपि निरस्तम् । उक्तरीत्यैवाच्संज्ञासिद्धेः ।

यद्वा हल्संज्ञाया एव "आदिरन्त्येन" इत्येतत्प्रवृत्तिव्यतिरेकेण सिद्धौ यत्नान्तरं कार्यम् । हल् इति विभज्य अनु इत्यनुवर्त्तनीयम् । आङा सह अकारस्याव्ययीभावे अ इति रूपम् औकारस्य तूक्तरीत्या उ इति । ततो द्वयोर्द्वन्द्वः—अं च उ चेति । गुणे कृते नपुंसकह्रस्वत्वे च उ इत्येव रूपम् । ततो नञ्समासे अनु इति सिद्धम् । अकारादारभ्य औकारपर्यन्ताक्षरभिन्नम् अक्षरं समाहारमित्यर्थः । नञिवयुक्तन्यायाद्भेदप्रतियोगितानवच्छेदकतत्प्रतियोगिवृत्त्यक्षरत्ववतोऽक्षरस्य भेदानुयोगित्वलाभः ।

यद्वा पूर्वोक्तरीत्याच्संज्ञा प्रसाध्या । "नाज्झलौ" इति सूत्रं तु यत्नभेदेन भाष्यकृता प्रत्याख्यातं सत् हल्संज्ञाविधानार्थतया व्याख्येयम् । "सरूपाणामेकशेषः" इत्यत्रैतादृशरीतेः कैयटकौस्तुभादौ प्रसिद्धत्वात् । "नाज्झलावीदूदेद् द्विवचनं प्रगृह्यम्" इति संहितापाठे नाज्झलाप् इति च्छेदः । नाच् अज्भिन्नं हल्संज्ञामाप्नोति हलाप् हल्संज्ञमिति यावत् । यथाश्रुतच्छेदपक्षे चरितार्थत्वान्नात्राधिक्यशङ्का । समानाधिकरणनिर्देशापेक्षया प्रतिपत्तिगौरवाभावात् ।

यद्वा नाज्झला ईदूदेदिति संहितापाठः । हला हल्शब्देन सह स्यात् । साहित्यं च वाच्यत्वसम्बन्धरूपम् । अविच्छिन्नादिसम्प्रदायमूलकव्याख्यातृवचनादेव शिष्याणां हलादिपदार्थ-

बोधः । तस्य प्रामाण्यं तूक्तरीत्या शास्त्रैकमूलकत्वेन अवस्थाप्यते इति तत्त्वम् ।

न विभक्तौ तुस्माः ४।

विभक्तिस्थास्तवर्गसकारमकारा इतो न। रामान्, पचेरन्। ब्राह्मणाः, पचतः। रामम्। अद्राक्षम्। विभक्तौ किम्। अचो यत्। ऊर्णाया युस्। रुधादिभ्यः श्नम्। नच किमोऽत् इत्यादावपि निषेधापत्तिः। "प्राग्दिशो विभक्तिः" इति संज्ञायाम् एतदप्रवृत्तेः। अत्र च ज्ञापकम्—"इदमस्थमुः" इति मकारस्य इत्संज्ञापरित्राणार्थमुकारकरणम्। नचैवं तदानीमित्यत्र दानीमो मित्त्वापत्तिः। तस्य यान्तत्वात्। संयोगान्तलोपस्य इत्संज्ञां प्रत्यसिद्धतया मान्तत्वाभावात्।

यद्वा निषेधानित्यत्वमात्रं ज्ञाप्यम्। औत्, इटोऽत् इत्यादौ तकार उच्चारणार्थः। अन्यथा तित्स्वरापत्तेः। उरौ वा यो, भक्षीय तव राधस इत्यादौ प्रत्ययस्वरेणान्तोदात्ततादर्शनाच्च। लविषीयेत्यत्र भाष्ये एवान्तोदात्तत्वोक्तेश्च।

आदिर्ञिटुडवः ५।

उपदेशे आदिभूता एते इतः स्युः। आदिरिति सौत्रमेकवचनम्। ञि इन्धी इद्धः। "ञीतः" इति वर्त्तमाने क्तः। टुवेपृ "वेपथुः। "ट्वितो ऽथुच्"। डुवप् उप्त्रिमम्। "ड्वित" इति क्त्रिः। उपदेशे किम्। ञिकारीयति। डुङ् ध्वनौ। ऋदोरप्। ङ्वं कर्तुमिच्छति ञिङ्वयिषति। तत्करोति ण्यन्तात्सन् इत्यपि प्रत्युदाहार्यम्। आदिः किम्। पटूयति। पृथ्वादिषु पटुशब्दो-

पदेशसत्त्वात् । अन्त्येत्संज्ञायाम् अवयवे अचरितार्थं लिङ्गं समुदायस्य विशेषकमित्यथुच् स्यात् ।

षः प्रत्ययस्य ६।

प्रत्ययस्यादिः ष इत्संज्ञः । नर्तकी । शिल्पिनि ष्वुन् । षित्त्वात् ङीष् । प्रत्ययस्य किम् । षोडश । षष उत्वम् इत्यत्रोपदेशः । आदिः किम् । अविषः महिषः । अविमविभ्यां टिषच् ।

ननु फलाभावादत्र नेत्संज्ञा । ईकारप्रत्ययस्य टित्त्वादेव सिद्धेः । नच ङीपि अनुदात्तत्वं ङीषि तूदात्तत्वमिति पक्षे ङीषर्थं षित्त्वं स्यादिति वाच्यम् । चित्परस्य ङीपो ऽपि उदात्तनिवृत्तिस्वरेणोदात्तत्वात् इति चेन्न । विनिगमकाभावेन पक्षे टकारस्यापि श्रवणप्रसङ्गात् ।

चुटू ७।

प्रत्ययाद्यौ चुटू इतौ स्तः । वर्गद्वये द्वितीयचतुर्थानां छझठढानाम् ईय्-अन्त्-इक्-एय् इत्यादेशा वक्ष्यन्ते । गोत्रे कुञ्जादिभ्यः च्फञ् । कौञ्जायन्यः । जम् । ब्राह्मणाः । शण्डिकादिभ्यो ञ्यः । शण्डिकोऽभिजनो ऽस्य शाण्डिक्यः । चरेष्टः । कुरुचरी । जनेर्डः उपसरजः । प्रज्ञादिभ्यो णः । प्राज्ञः ।

इदं चानित्यम्, चुटुषाः प्रत्ययस्येति कर्तव्ये पृथग्योगसामर्थ्यात् । तेन केशचुञ्चुरित्यादौ चस्य नेत्संज्ञा । तथा चान्तोदात्तापत्तिः । पित्करणं तु पर्यायार्थं स्यात् । "नते नासिकायाः" इति टीटच् । अवटीटः ।

यद्वा । एतेषु "लोपो व्योः" इति यकारो लुप्तनिर्दिष्ट इति

भाष्यम् । भाष्यकारवचनाद्राजदन्तादेराकृतिगणत्वाद्वा पूर्वकालस्य परनिपातः ।

लशक्वतद्धिते ८।

ताद्धितभिन्ने प्रत्यये आदिभूता लशकवर्गा इतः स्युः । भवनम् । भवति । भूतः । प्रियंवदः । जिष्णुः । भङ्गुरः । हरये । ल्युट्-शप्-क्त-खश्-ग्स्नु-घुरच्-ङे इत्येतत्सम्बन्धिनां लादीनां यथाक्रममुक्तसंज्ञा । अतद्धिते किम् । चण्डालः । "प्राणिस्थादातः" इति लच् । लोमशः । "लोमादि-" इति शः । कार्णिका । "कर्णललाटात्" इति कन् । अत्र "किति च" इति वृद्धिः स्यात् ।

"इर उपसङ्ख्यानम्"। "इरितो वा" इत्यत्र इर् इत् यस्येति समुदायानुकरणम् । अज्झल्समुदायत्वादप्राप्तावारम्भः। समुदायस्य संज्ञायामवयवाः पारतन्त्र्यादित्सञ्ज्ञां न लभन्ते इति इदित्त्वाभावान्न नुम् । नचैवं स्वरितेत्त्वस्याप्यनापत्तिः । सामर्थ्यादवयवगतस्य स्वरितस्य समुदाये आरोपात् ।

यद्वा रेफस्य "हलन्त्यम्" इति इकारस्य "उपदेशे ऽजनुनासिकः" इतीत्सञ्ज्ञा । इरावितौ यस्येत्यवयवयोरेव इत्सञ्ज्ञकत्वेन व्याख्यानात् । नन्वेवं नुमापत्तिः । नच कुम्भीधान्यन्यायेन इकारमात्रं यत्रेत्सञ्ज्ञं तस्यैव नुमिति वाच्यम् । नन्दतीत्यादावव्याप्तेः। इकारस्यापि तत्रेत्सञ्ज्ञत्वात् । मैवम् । तेषाम् ऋकारान्तत्वाश्रयणात् । "ऋत इद्धातोः" इति इत्त्वे रपरत्वे च कृते भिदिर् इत्यादिनिर्देशः । अनङ्गस्यापि निपातनादित्त्वम् । भिद् ऋ इत्यत्र पूर्वम् ऋकारस्येत्सञ्ज्ञा तत इत्त्वरपरत्वे । "इरितो वा" इत्यत्रापि ऋ इत् यस्यायम् इरित् निपातनादित्त्वरपरत्वे ।

यद्वा स्कन्दिरूप्रभृतीनां नकारपाठस्य अन्तेदितामेव नुमित्यत्र ज्ञापकत्वात् । नच नलोपाभावार्थो नकारोपदेशः । इदित्त्वादेव तदप्रसङ्गात् ।

अथवा "न दृशः" इति क्सप्रत्ययप्रतिषेधो ज्ञापकः । नुमि हि सति इगुपधत्वाभावादेव क्सो न स्यात् ।

यद्वा "गोः पादान्ते" इतिसूत्रादन्तग्रहणमनुवर्त्य अन्ते इदितामेव नुम् इति व्याख्येयम् । तेन चक्षिङो न नुम् ।

तस्य लोपः ९।

तस्य इतो लोपः स्यात् । तस्य ग्रहणं सर्वलोपार्थम् । अन्यथा अभावरूपस्य लोपस्य भावापेक्षत्वात्प्रकरणादित्सञ्ज्ञस्य लाभोपपत्तेः । तेन ञिटुडूनामन्त्यलोपो न । नच नानर्थकेऽलोन्त्यविधिरित्येव तत्सिद्धिः । अलोन्त्यात्पूर्व इत्यत्र तत्प्रत्याख्यानात् ।

यथासंख्यमनुदेशः समानाम् १०।

समसङ्ख्यानां सम्बन्धो यथाक्रमं स्यात् । स चोद्देश्यविधेयानां यथा-"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"। नन्दनः। ग्राही। पचः। उद्देश्यानामेव यथा-"समूलाकृतजीवेषु हन्कृञ्ग्रहः"। अत्र विधेयस्य णमुल एकत्वेऽपि अनुवाद्ययोः धातूपपदयोरेव यथासङ्ख्यम्। "परस्मैपदानां णलतु-" इत्यादौ परस्मैपदशब्देन सर्वेषां युगपत्प्रत्यासत्तेर्न पाठक्रमेण व्यवस्था । लोके अजाविधनौ देवदत्तयज्ञदत्ताविति समासनिर्देशे क्रमनियमाभावः । द्वन्द्वे-

ऽनेकावयवात्मकसमुदाय एवैकशब्दतः प्रतिपादनादित्यारम्भः।

ननु "विदिभिदिच्छिदेः कुरच्" इत्यादौ तच्छीलाद्यर्थत्रयेण यथासङ्ख्यं स्यात्। एवं "ल्यपत्यात्" "ङसिङसोः" इत्यादावपीति चेत्।

अत्र भाष्यम्—"स्वरितेन" इत्यपकृष्यते तेन स्वरितत्वाभावान्न यथासङ्ख्यम्। प्रतिज्ञास्वरिताः पाणिनीयाः। अत एव "कर्तृकर्मणोश्च भूकृञोः" इत्यत्र न यथासङ्ख्यम्। तेन भवतेरकर्मकत्वात्कर्तर्येवोपपदे खल्। करोतेस्तु कर्मण्यपि।

केचित्तु प्राप्त्यर्थस्य भवतेरुपपदद्वये ऽपि स इत्याहुः। "नाडीमुष्ट्योश्च"इत्यत्र तु भवत्येव।

स्यादेतत्। "इको यणचि"इत्यत्र यथासङ्ख्यं न स्यात्। इकारोकार–ऋकाराणां प्रत्येकमष्टादश भेदाः लृकारस्य तु द्वादशेति इकां षट्षष्टिसङ्ख्यत्वात्। यणां च सप्तत्वात्। भाष्यमानत्वे ऽपि गुणानामभेदकतया सानुनासिक्यानामपि यवलानां ग्रहणात्। नचात्रान्तरतमपरिभाषयैव निर्वाहः। स्थानेऽन्तरतमसूत्रे "किमुदाहरणम्। इको यणचि दध्यत्र। सङ्ख्यातानुदेशेनाप्येतत्सिद्धम्" इतिभाष्यविरोधात्।

अत्राहुः—इक्शब्दबोध्या या इत्वादिजातयस्तदवच्छिन्नानां यण्शब्दबोध्ययत्वादिजातिचतुष्टयावच्छिन्ना भवन्तीति सूत्रार्थः। तथाच निरूढलक्षणाऽपि नाङ्गीकार्येति लाघवम्। नच निरनुनासिकानामननुनासिकयकारादिप्रसङ्गवारणायान्तरतमपरिभाषाश्रयणे आवश्यके कृतमेतत्प्रवृत्त्येति वाच्यम्। तदंशे यथासङ्ख्यपरिभाषायाः पारविरहात्। अन्तरतमपरिभाषाप्रवृत्तावपि स्थान्यंशे परत्वाद्यथासङ्ख्यस्यैव प्रवृत्तेः। अत एव प्रत्याहारपाठे शब्दतः साम्यमस्तीति तत्र कैयटः।

एतेन ऋकारऌकाराभ्यां प्रत्येकं तस्या एव त्रिंशत उपस्थितौ सत्यामृकारस्य ऌकार ऌकारस्य च रेफ आदेशः परं स्यादित्यपि निरस्तम् ।

अत एव हयवरट्सूत्रे हरयवाडितिन्यासे परत्वाद्यथासङ्ख्यमेव प्रवर्त्तेत इति शब्दकौस्तुभे ऽप्युक्तम् ।

स्वरितेनाधिकारः ११।

इत्थम्भूतलक्षणे तृतीया । अधिकारो विनियोगः । स्वरितत्वं चाधिकारज्ञापनार्थम् न तु प्रयोगसमवेतम् । स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम् । यथा "प्रत्ययः" इत्यादि उत्तरत्रोपतिष्ठते । क्वचित्पूर्वत्रापि । तदुक्तम्–'अतिङ्ित्युभयोः शेषः' इति । अवधिविशेषे तु व्याख्यानं प्रमाणम् । आतृतीयाध्यायान्तं धात्वधिकारो न तु लादेशेभ्यः प्रागेव । सप्तमाध्यायसमाप्तिपर्यन्तमङ्गाधिकारो न तु प्रागभ्यासविकारेभ्य एवेत्यादिदर्शनात् ।

यद्वा स्वरिते सति नाधिकार इत्यर्थः । तेन पूर्वाधिकारनिवृत्तिः । तथा च "विंशतिकात्खः" इत्यत्र स्वरितत्वदर्शनाद् "द्वित्रिपूर्वाद्" इत्यस्य निवृत्तिरनुमीयते ।

नचैकः स्वरितो ऽधिकारार्थ एकस्त्वधिकारनिवृत्त्यर्थ इति सन्देहानिर्णयानुपपत्तिः । व्याख्यानात्तदुपपत्तेः ।

नचैवं व्याख्यानमेवानुवृत्त्यननुवृत्तौ नियामकमस्तु किं प्रकृतसूत्रेणेति वाच्यम् । अर्थान्तरसंग्रहार्थत्वात् ।

तथाहि–स्वरितेनाधिकाररूपोऽर्थो ग्राह्यः । तेन "गोस्त्रियोः" इत्यत्र स्त्रीशब्दस्य स्वरितत्वप्रतिज्ञानात् "स्त्रियाम्"

इत्यधिकारे विहितः प्रत्ययो गृह्यते तेन "गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्" इतिवार्त्तिकं गतार्थम् ।

किञ्च अधिकं कार्यमधिकारः । गौरवस्यापि ग्रहणमित्यर्थः । तेन यत्र गौणमुख्यन्यायो नेष्यते तत्र स्वरितः पाठ्यः यथा ऽपादानाधिकरणादौ । तेन "भीत्रार्थानाम्"इत्यादेर्बुद्धिकल्पितमपायमाश्रित्य प्रत्याख्यानं सङ्गच्छते । "छन्दसि"इत्यस्य प्रमाशब्दत्वेन गौणे आर्षग्रन्थरूपेऽपि छन्दसि प्रवृत्तिः । अत एवार्षत्वात्साधुत्वमिति तत्र तत्रोद्घोषः । गङ्गायां गाव इत्यादौ गङ्गाशब्दस्य नदीवृत्तित्वे ऽपि सामीप्याद्गौणमाधारत्वमिति तत्रापि सप्तमी । यदा तु गङ्गापदस्य तीरे तात्पर्यं तदा प्रकृतावेव लक्षणा विभक्तिर्मुख्यार्थैवेति विशेषः ।

अपिच अधिकः कारः कृतिरियं पूर्वोऽपि परं बाधते स्वरितत्वयोगात् । तेन पूर्वविप्रतिषेधानां सङ्ग्रहः । तद्वार्त्तिकानां च तद्विवेकार्थत्वम् तुल्यजातीयस्य च परस्य पूर्वेण बाधो नतु नित्यत्वादियुक्तस्येति नातिप्रसङ्गः ।

इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य
तृतीयपादे प्रथममाह्निकम् ।

अनुदात्तङित आत्मनेपदम् १२।

"भूवादयः" इत्यतो ऽनुवृत्तस्य "धातवः" इत्यस्य पञ्चम्यन्तत्वेन विपरिणामः । सादृश्यमात्रेण परिणामव्यवहारो वस्तुतो योग्यस्य शब्दान्तरस्यैव सन्निधानादिति कैयटः । आत्मनेपदेनैव धातुलकारयोराक्षेपः "इको झल्" इत्यत्र सना धातोरिवेति कौस्तुभः । ङिता धातोर्विशेषणात्तदन्तविधिः । द्वन्द्वान्ते श्रूयमाणस्य इत्पदस्य द्वाभ्यां सम्बन्धः । अनुदात्तांशे तदन्तविधेः फलाभावात् । "उपदेशे" इत्यनुवृत्तम् । तथाच अनुदात्तेत्कादुपदेशे यो ङित्तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदमेव स्यात् । एधते । स्पर्द्धते । बोभूयते । ऋतीयते । शीङस्तु व्यपदेशिवद्भावात् ङिदन्तत्वम् । विधीयते इत्यादौ त्ववयवे ऽचरितार्थेन ङकारेण क्यङन्तं ङित्, ततो व्यपदेशिवद्भावेन ङिदन्तत्वम् । उपदेशे किम् । चुकुटिषति । "गाङ्कुटादिभ्यः" इति आतिदेशात्सनो ङित्त्वम् । धातोरिति किम् । चङ्ङ्भ्यां मा भूत् । अदुद्रुवत् । अच्युतत् ।

एतेन चिनुतः सुनुत इत्यादि व्याख्यातम् । "सार्वधातुकमपित्" इति ङित्त्वस्यातिदेशिकत्वात् ।

ननूपदेशधातुशब्दयोरनुवृत्तिर्व्यर्था । विकरणेभ्यो नियमो बलीयान् इत्यस्य "वृद्भ्यः स्यसनोः" इत्यत्र ज्ञापयिष्यमाणत्वात् । प्रथममेवात्मनेपदनियमस्य प्रवृत्तेरिति चेत् ।

अत्राहुः—

उपसञ्जनिष्यमाणेनापि ङिता उपसञ्जातनिमित्तस्यापि परस्मैपदस्य बाधः स्यात् । विकरणव्यवधानेऽपि नियमप्रवृत्तिरिसस्यापि ज्ञापनसम्भवात्, नियमस्य बलवत्तायाः पाक्षिकत्वाच्च ।

हरदत्तस्तु ङित इत्येव व्याचख्यौ। धात्वनुवृत्तौ प्रयोजनाभावात्। नियमस्य बलवत्त्वादेव चङादावदोषात्।

नच भाविना ङिता बाधः। परस्मैपदस्य परत्वात्।

अत एव प्रसादकृतोक्तं चङङोस्तु परस्मैपदप्रवृत्त्यनन्तरं प्रवृत्तत्वेन ङित्त्वेऽपि तङ् नेति।

केचित्तु यङीयङोर्ङकारस्य गुणवृद्धिनिषेधेन चरितार्थत्वमाशङ्क्य यङः प्रागनुदात्तमकारं प्रश्लिष्य अनुदात्तेत्त्वादेव तङ्। न च यङन्ताद् "अनुदात्तेतश्च हलादेः" इति युच्प्रसङ्गः। "जुचंक्रम्यदन्द्रम्य" इति ज्ञापकात्तदभावात्। ईयङः प्रागिकारमीकारं वाऽनुदात्तं प्रश्लिष्य आद्ये अन्तेदित्त्वाभावान्न नुम्, द्वितीये एकाच् इत्यनुवृत्तेः "श्वीदितो निष्ठायाम्" इति नेण्निषेध इति कल्पयांचक्रुः।

ननु यङ्लुक्यतिव्याप्तिः, प्रत्ययलक्षणेन ङिदन्तत्वात्।

अत्र प्राञ्चः—"बोभूतुतेतिक्ते" इति तिजेर्यङ्लुगन्तादात्मनेपदाविधानं ज्ञापकं यङ्लुगन्तात्प्रत्ययलक्षणेनात्मनेपदं नेति। अत एव "चर्करीतं च" इति अदादौ पठितस्य चकारात्परस्मैपदमिति व्याख्यानं ज्ञापकसिद्धार्थस्फुटीकरणार्थम् इत्याहुः।

यद्वा ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणतया प्रत्ययलक्षणेनात्मनेपदं नेति। अत एव न तत्प्रयुक्तात्मनेपदप्रवृत्त्यभावः। अत एव गोहितामित्यादावव्याप्त्योर्न। शोभना दृषदो यत्र तत् सुदृषत् इत्यत्र "सौमनसी इति स्वरः" "अत्वसन्तस्य" इति दीर्घश्च न भवतीति सिद्धान्तः।

अथ पास्पर्द्धीत्यत्रात्मनेपदं स्यात् स्पर्द्धेरनुदात्तत्वात्। द्विः प्रयोगो द्विर्वचनं षाष्ठम् इति सिद्धान्तात्प्रकृत्यन्तरत्वाभावात्। नैवम्। "श्तिपा शपाऽनुबन्धेन" इति निषेधात्। अनुबन्ध-

निर्देशो हि द्वेधा विशिष्य सामान्यतश्च। आद्यः—"शीङः सार्वधातुके गुणः" इत्यादौ, द्वितीयः "अनुदात्तेतः" इत्यादौ । "आङो यमहनः" इत्यादौ उपसर्गानुबन्धस्यैव निर्देशो न प्रकृत्यनुबन्धस्येति यङ्लुकि भवत्येव । उक्तनिषेधस्य प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणमित्येतदपवादत्वात् । अत एव चेत्तितः मरीमृष्ट इत्यादौ "क्ङिति च" इति निषेधप्रवृत्तिः ।

अनुदात्तेत्त्वलक्षणं चात्मनेपदमनित्यं चक्षिङो ङित्करणात् । विचक्षणः प्रथयन्नित्यादावन्तोदात्तपाठानुरोधेन "अनुदात्तेतश्च हलादेः" इति युचो वक्तव्यत्वात् अनुदात्तेत्त्वनिर्णयात् । अत एव स्फायन्निर्मोकसन्धिप्रचलदविगलत्संमदस्वेदपूरा इति मुरारिः । स एवायं नागः सहति कलभेभ्यः परिभवमिति तु आधृषाद्वेति विकल्पितणिचः सहे रूपम् ।

इदं च प्रकरणं नियमार्थम् । लस्य तिबादयः, "लटः शतृशानचौ", "लिटः कानज्वा", "क्वसुश्च", "लृटः सद्वा" इत्यात्मनेपदपरस्मैपदानां विहितत्वात् ।

स्यादेतत् । विकरणानामवकाशो लादेशभिन्नाश्चानशादयः। नियमस्य आशीर्लिङ्लिटौ, तदादेशानामार्द्धधातुकत्वात् तत्र विकरणानवकाशात् । लुङ्लृङनमश्च । आद्ययोर्विकरणलोपेनाऽन्त्ये च मध्यपातित्वेन व्यवधानविरहात् । स्पर्द्धते इत्यादावुभयप्रसङ्गे परत्वान्नित्यत्वाच्च विकरणानां पूर्वमुत्पत्त्या तैर्व्यवधानान्नियमो न प्रवर्त्तेत । तस्मादेकवाक्यतया विधिरेवास्तु। तथा हि आत्मनेपदपरस्मैपदाभ्यां लिङ्गाभ्याम् इदं प्रकरणं लादेशविधावुपतिष्ठते तत्र महावाक्येन विहितेषु लादेशेषु सार्वधातुकमाश्रित्य पश्चाद्विकरण इति न दोषः ।

नन्वेवमपि स्यादीनां लावस्थायामेव विधानात्तद्व्यवधाना-

द्दोषतादवस्थ्यमिति चेत् ।

न । लमात्रापेक्षत्वादन्तरङ्गा लादेशाः लकारविशेषापेक्षया बहिरङ्गाः स्यादय इति लादेशानां पूर्वमेव प्रवृत्तेः । लादेशानन्तरमेव स्यादीनां प्रवृत्तिः, अन्यथा तासेः परस्य लसार्वधातुकस्यानुदात्तविधिना विकरणस्वरस्सार्वधातुकस्वरं न बाधते इत्येतज्ज्ञापनानुपपत्तेरिति तृतीये वक्ष्यमाणत्वाच्च । येननाप्राप्तिन्यायेन शबादीन्बाधित्वा, शबादिविधावनुवर्त्तनाद्वा ।

ननु संज्ञया विधानं विहितानां च संज्ञेत्यन्योन्याश्रयः । एकवाक्यतापक्षे पूर्वं लादेशविध्यभावेन विहितानुवादेनात्मनेपदपरस्मैपदसंज्ञयोर्विध्ययोगादिति चेत् ।

मैवम् । परस्मैपदानुक्रमणपरित्यागेन तत्रेतरेतराश्रयाभावात् । नचैवमनुदात्तङिद्भ्यो ऽपि तत्प्रसङ्गः । तेषामात्मनेपदसम्बन्धावगमेन परस्मैपदसम्बन्धस्य बाधनात् । नच "अनुपराभ्यां कृञः" इत्यात्मनेपदनिषेधार्थं तदनुक्रमणस्यावश्यकत्वम् । "स्वरितञितः" इत्यनन्तरं कर्तर्यनुपराभ्यां कृञो नेतिसूत्रणीयत्वात् । आत्मनेपदेषु च भाविसंज्ञाविज्ञानात् ।

अत्र भाष्यम्—"पुषादिद्युताद्यॢदितः परस्मैपदेषु" "आत्मनेपदेष्वन्यतरस्याम्" इत्यादि ज्ञापयति "विकरणेभ्यो नियमो बलीयान्" इति कृतनियमानामसङ्करेण स्थितानामेव निमित्तत्वोपपत्तेः अतो न दोषः ।

अथ नियमात्प्रागपि सम्भवमात्रेण निमित्तत्वं स्यादिति चेत्तर्हि "अनुपसर्गाद्विभाषा" इति ज्ञापकम् ।

नन्वेतदपि लिङ्लिडर्थं स्यात्—चक्रमे, चक्राम, क्रम्यात्, क्रंसीष्ट इति चेत् ।

अत्र कैयटादयः—"वृद्भ्यः स्यसनोः" इति स्ये विकल्पविधानं

ज्ञापकम् । अन्यथा पूर्वं विकरणे प्रत्यये कृते तेन व्यवहितत्वान्नियमाप्रवृत्तौ पदद्वयं सिद्धमेवेति किं विकल्पविधिना । तस्मान्नियम एव युक्तः । भाविसंज्ञाविधाने गौरवात् ।

स्यादेतत् । अनुदात्तङित एव आत्मनेपदं भवतीति प्रत्ययनियमो ऽयम्, उतानुदात्तङित आत्मनेपदमेव, भावकर्मणोरात्मनेपदमेवेति प्रकृत्यर्थनियमः । नच पूर्वेण नियमाद् "भावकर्मणोः" इत्यस्य विध्यर्थत्वमेवेति वाच्यम् । समस्तमात्मनेपदप्रकरणम् एकं वाक्यमित्याशयात् अनुदात्तङिद्भ्यो ऽपि परस्मैपदापत्तेः । उक्तनियमेन अनुदात्तङिदन्येभ्य आत्मनेपदस्य निवृत्तावपि अनुदात्तङिद्भ्यः परस्मैपदस्य दुर्वारत्वात् । तदर्थं "शेषात्कर्तरि"इति नियमारम्भे च गौरवम् ।

किञ्च "वा क्यषः" इति परस्मैपदे विकल्पिते आत्मनेपदस्यानुदात्तङित्सु नियतत्वात्तत्पक्षे लकारमात्रश्रवणं स्यात् ।

न द्वितीयः । अनुदात्तङिद्भ्यस्तृजादीनामनुत्पत्तिप्रसङ्गात् । भावकर्मणोरात्मनेपदमेवेत्यर्थनियमे ऽप्येवम् ।

अत्र सिद्धान्तः—शेषात्परस्मैपदमेवेति नियमादाद्यपक्षे नातिप्रसङ्गः । नच तत्सूत्रारम्भादेव गौरवम् । प्रामाणिकत्वात् । नच कर्तरीत्युक्तेः कर्तरि परस्मैपदमेवास्तु, भावकर्मणोस्तु जागर्यते अद्यते इत्यादौ परस्मैपदं स्यादिति वाच्यम् । तत्रात्मनेपदमेवेति नियमात् । किञ्चेत्याद्यपि न । लादेशेषु कृतेषु नियमप्रवृत्तेः, आत्मनेपदस्य विकल्पेन विधानात् । शेषवचनेनैव परस्मैपदसिद्धेः ।

अथ कीदृशस्तत्र नियमः कर्तरि परस्मैपदं शेषादेवेति वा

---

१ अनुदात्त इति प्रकृतिनियमो भावकर्मणोरित्यर्थनियमइति तदनुसन्धायोभयघटितोक्तिः ।

शेषात्कर्त्तर्येवेति वा ।

नाद्यः । अशेषात्कर्तरि तद्व्यावृत्तावपि भावकर्मणोः शेषाद-शेषाच्च तस्य दुर्वारत्वात् ।

नान्त्यः । शेषाद्भावकर्मणोस्तद्व्यावृत्तावपि अशेषाद्भावकर्मकर्तृषु तस्य दुर्वारत्वात् ।

मैवम् । योगविभागेन नियमद्वयाश्रयणात्—शेषादेव परस्मैपदं कर्तर्येवेतिच । एवं कृत्यर्थनियमो ऽप्यदोषः । तृजादीनामनवकाशत्वात् । परस्मैपदमेवेति नियमेन तत्राप्यवकाशायोगात् । तयोरेवेति भावकर्मणोस्तव्यदादिविधेरप्यनवकाशत्वात् । चिणो ऽप्यनवकाशत्वात् । वस्तुतो भावकर्मणोः सार्वधातुकार्थत्वात् ।

नचैवमपि घञ् न स्यादिति वाच्यम् । अकर्तरीतिविहितस्यापादानादिषु सावकाशत्वे ऽपि भावकर्मणोर्विहितस्यानवकाशत्वात् । नाप्यत्रात्मनेपदस्यानियतत्वादत्तीत्यादौ प्रसङ्गः । शेषात्परस्मैपदमेवेति नियमात् । नच तेन कर्तर्येवात्मनेपदव्यावृत्तावपि शेषाद्भावकर्मणोः परस्मैपदं दुर्वारमिति वाच्यम् । तत्रात्मनेपदमेवेति नियमात् । तस्मान्नियमद्वयमपि स्थितम् ।

अत्रेदमवधेयम्—प्रकृत्यर्थनियम एव युक्तः । तथाहि—शेषात्कर्तरीत्यपहाय परस्मैपदमित्येव सूत्रणीयम् । यत्र परस्मैपदमात्मनेपदमपि प्राप्तं तत्र परस्मैपदमेव स्यात् । प्रत्ययनियमपक्षे तु "शेषाद्" इति "कर्तरि" इति च वाच्यम् । योगश्च विभजनीय इति गौरवम् । तिबादिवाक्येन सह वाक्यभेदः । परिसंख्याप्रयुक्तदोषत्रयं च नियमद्वयेऽपि समानम् । तदसहने तु लस्य तिबादय इत्यनेन सहैकवाक्यत्वादिदं प्रकरणं विधायकमेव शेषात्कर्तरीतिच कर्तव्यमेव अन्योन्याश्रयपरिहारायच भाविसंज्ञा विज्ञेया ।

एवं च विकरणेषु न दोषः । लादेशोत्तरं सार्वधातुकमाश्रित्य विकरणप्रवृत्तेः । न च स्यादिषु दोषः । लमात्रापेक्षतयाऽन्तरङ्गेषु तिबादिषु कृतेषु लकारविशेषापेक्षतया बहिरङ्गाणां स्यादीनां प्रवृत्तेरिति कौस्तुभकृतः ।

भावकर्मणोः १३।

विहितस्य लस्यात्मनेपदं स्यात् । सुप्यते । क्रियते । एकवाक्यतया विधिर्भिन्नवाक्यतया नियमो वेति पूर्ववत् । सोऽपि द्विधा—प्रत्ययनियमोऽर्थनियमश्चेति । नचान्त्ये को भवता लाभो लब्ध इत्यत्र घञोऽसिद्धिः । सजातीयस्य परस्मैपदस्यैव व्यावृत्तेः ।

ननु भिद्यते कुशूलः स्वयमेवेत्यत्र-कर्मकर्तरि परस्मैपदं प्राप्नोति । "कर्मवत्कर्मणा" इति हि शास्त्रस्य, व्यपदेशस्य वाऽतिदेशः। तथाच तेन तेन शास्त्रेण तत्तत्कार्यं कर्तव्यम् । कर्मण्यात्मनेपदमित्यस्यावकाशः शुद्धं कर्म, कर्तरि परस्मैपदमित्यस्य शुद्धः कर्ता, कर्मकर्तर्युभयप्रसङ्गे परत्वात्परस्मैपदमिति ।

मैवम् । प्राधान्यात्कार्यातिदेश एव सः । सर्वातिदेशानां कार्यार्थत्वात् । पक्षान्तरे तु "शेषात्कर्तरि" इति सूत्रे "कर्तरि कर्मव्यतिहारे" इत्यस्मात् "कर्तरि" इत्यनुवर्त्त्य कर्तैव यः कर्ता तत्र परस्मैपदम् । व्यपदेशान्तरस्याविषय इति यावत् । तत्र तु स्वाश्रयं कर्तृत्वमातिदेशिकं तु कर्मत्वमिति न परस्मैपदम् ।

कर्तरि कर्मव्यतिहारे १४।

विनिमयविषयभूतायां क्रियायां वर्त्तमानाद्धातोः कर्तर्यात्मनेपदं स्यात् । व्यतिलुनीते ।

ननु क्रियाणां साध्यैकस्वभावत्वात्कथं व्यतिहार इति चेत्। अत्राहुः—योग्यतावशादस्येयं क्रिया साध्या अस्या इदं साधनमिति निर्ज्ञातसाध्यसाधनभावयोर्व्यत्यासः क्रियाव्यतिहारः। यथा संप्रहरन्ते राजान इति। अत्रैकैव क्रिया संचारिणीव संलक्ष्यते इति। कर्तृग्रहणमुत्तरार्थम्।

न गतिहिंसार्थेभ्यः १५।

पूर्वेण प्राप्तं न स्यात्। व्यतिगच्छन्ति। व्यतिघ्नन्ति।

"प्रतिषेधे हसादीनामुपसंख्यानम्"।

व्यतिहसन्ति। आदिपदं प्रकारार्थम् तेन शब्दार्थानां ग्रहणम्। व्यतिजल्पन्ति।

"हरतेरप्रतिषेधः"।

सम्प्रहरन्ते राजानः। अर्थग्रहणसामर्थ्याच्छब्दान्तरनिरपेक्षा एव ये गतिहिंसयोर्वर्त्तन्ते तेषामेव निषेधः। हरतिस्तूपसर्गयोगादेव हिंसावृत्तिरत इदं लभ्यते इत्याहुः।

ततः संप्रहरिष्यन्तौ दृष्ट्वा कर्णधनञ्जयावित्यत्र कर्मव्यतिहारो न विवक्षित इति कैयटः। 'वहेरनिषेधः' प्रापणार्थत्वात्। आक्षेपेण गतिप्रतीतेः। संविवहन्ते गर्गाः।

इतरेतरान्योऽन्योपपदाच्च १६।

आत्मने पदं न स्यात्। "परस्परोपपदाच्चेति वक्तव्यम्" इतरेतरस्य व्यतिलुनन्ति। लौकिकैर्व्यवहारे शब्दलाघवस्यानादरादितरेतरादिशब्दा उपसर्गाश्च कर्मव्यतिहारद्योतनाय प्रयुज्यन्ते तद्वदात्मनेपदमपि स्यादिति निषेधारम्भः। सम्पाद्विनिमयेनोभौ दधतुर्भुवनद्वयम् इत्यत्र क्रियाविनिमयस्याविवक्षा।

नेर्विशः १७ ।

निपूर्वाद्विश आत्मनेपदं स्यात् । निविशते । नेः किम् । प्रविशति ।

अथ कथं न्यविशत न्यविक्षत इति । नच स्वाङ्गमव्यवधायकमिति वा समाधेयम् । अङ्गभक्तस्याटो विकरणान्तं प्रत्यवयवत्वे ऽपि धातुं प्रत्यनवयवत्वात् ।

अत्राहुः–लावस्थायामेवाडागमः । "लुङ्लङ्–"इत्यत्र द्विलकारको निर्देशः इति भाष्ये वक्ष्यमाणत्वात् । लकारविशेषापेक्षमडागमं बाधित्वा लमात्रापेक्षत्वादन्तरङ्गेषु तिबादिषु कृतेषु नियमस्य प्रवृत्तेश्च । "विकरणेभ्यो नियमो बलीयान्" इति सिद्धान्तात् । अथ तज्ज्ञापकेन विकरणव्यवधाने ऽपि नियमप्रवृत्तिरिति ज्ञाप्यते तथाऽप्यदोषः । अन्तरङ्गत्वात्तिबादिषु सत्सु शब्दान्तरप्राप्त्या ऽनित्ययोरड्विकरणयोर्मध्ये परत्वादट्प्रवृत्तेः । नच विकरणः शब्दान्तरात्प्राप्तो न तु शब्दान्तरस्येति वाच्यम् । नहि शब्दान्तरस्येति वाचनिकं किन्तु न्यायः । तथा च शब्दान्तरस्य प्राप्नुवत इव शब्दान्तरात्प्राप्नुवतो ऽप्यनित्यत्वम् । यद्व्यक्तिसम्बन्धितया पूर्वं प्राप्नोति तद्व्यक्तिसम्बन्धितया पुनः प्राप्तेस्तुल्यत्वात् । अत एव "उपसर्गपूर्वनियमे ऽड्व्यवाये उपसंख्यानम्" इति वार्त्तिकं "शदेः शितः" इति सूत्रे भगवता प्रत्याख्यातमिति दिगिति केचित् ।

केचित्तु विकरणेभ्यः पूर्वमेव परत्वादडागमे तस्य धातुभक्तत्वान्न व्यवधायकत्वम् । विकरणेभ्यो नियमस्य बलवत्त्वे ऽपि अडागमाद्बलवत्त्वाभावेनाडागमात्पूर्वं "नेर्विशः" इति बहिरङ्गस्य नियमप्रवृत्त्ययोगाच्च । नच विकरणात्पूर्वं नियमो भवतीत्य-

त्रैव तात्पर्यं नत्वडागमादपि पूर्वम्, तथा च परत्वादडागमे कृते तस्य धातुभक्तत्वेनाऽव्यवधायकत्वान्नियमप्रवृत्तिरित्यभिप्राय इति वाच्यम्। नियमस्य विकरणाद्बलीयस्त्वेऽपि नित्यस्य विकरणास्याडागमात्परस्य दुर्बलत्वस्यानुक्तत्वेनाडागमात्पूर्वं प्रवृत्तेरनिवारणात्। अडागमाभावस्थले तत्परिभाषायाः सार्थक्याच्च। विकरणव्यवधानेऽपीत्यादिकमप्ययुक्तम्। विकरणस्यानित्यत्वे मानाभावात्। अन्यस्य प्राप्नुवत एवानित्यत्वमिति भाष्यकृता व्यवहारात्। शब्दान्तरस्य प्राप्नुवन्विधिरनित्य इति वचनमूलन्यायस्याप्रसिद्धेः। भाष्यकृता अटो नित्यत्वोक्तावपि विकरणानामनित्यताया अनुक्तत्वात्। कृताकृतप्रसङ्गित्वमात्रेण न्यायान्नित्यत्वमाश्रित्य सुटो वुको नित्यत्वादिन्धेः छन्दोविषयत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति "इन्धिभवतिभ्यां च" इतिसूत्रं प्रत्याचक्षाणेन भगवता तत्सूत्रावयवभवतिग्रहणज्ञापितस्यान्यस्य प्राप्नुवन्विधिरनित्य इति वचनमाश्रित्य न्याय्यमड्विकरणयोर्नित्यत्वमाश्रित्यैव परत्वादटः पूर्वं प्रवृत्तिमभ्युपेत्य वा नेरित्यस्य षष्ठ्यन्तत्वमाश्रित्य तद्वार्त्तिकस्य प्रत्याख्यातत्वात्। एतेन वृत्तिसीरदेवग्रन्थावप्यपास्तावित्याहुः।

परिव्यवेभ्यः क्रियः १८।

एभ्यः क्रीणातेरात्मनेपदं स्यात्। क्रिय इत्यत्र प्रकृतिवदनुकरणमिति धातुत्वादियङ्। अकर्त्रभिप्रायार्थोऽयमारम्भः। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। परस्परसाहचर्यात्पर्यादय एव उपसर्गा गृह्यन्ते। नेह वे क्रीणासीति। एकदेशविकृतस्यानन्यत्वात्प्राप्तिः। नच विभक्तिविशिष्टस्य विरित्यस्यायं विकारो न तु विशब्द-